

3.2
टीकाद्वयोपेतः-
वैयाकरण-भूषण-सारः

3.2

Rajsthan Sanskrit College Granthmala-10th Kusum.

(In memory of Snehiramaji Shastri and Radhakrisnaji Poddar)

VAIYAKARAN BHUSHAN SAR

OF

M. M. Kaund Bhatt

WITH

Kashika and Darpana Commentaries

BY

Pt. Hari Shastri and Pt. Hari Vallabha Shastri.



Expalanatory Note

BY

Pt. Guru Prasad Shastri,

Vyakarnacharya, Nyaya-Shastri

Principal Rajasthan Sanskrit College Benares.



Edited by

Pt. Nandkishore Shastri, Ayurvedacharya.

[*Professor Rajasthan Sanskrit College*]



Published by

BHARGAVA PUSTAKALAYA,

Gaighat, Benares City.

Library Edition] 1934. [~~Rs. 2|12|-~~

श्री 'छोहिरामजी' शास्त्रिणां—'सेठ राधाकृष्णजी' पोद्दाराणाञ्च स्मारकं—

श्रीराजस्थान-संस्कृत-कालेज-ग्रन्थमालाया दशमकुसुमम्—

महामहोपाध्यायकौण्डभट्टविरचितः—

वैयाकरण-भूषण-सारः



म० म०—श्रीहरिशास्त्रिकृतयाऽतिमहत्या—


'काशिका'-टीकया,—

म० म०—श्रीहरिवल्लभपर्वतीयकृतया प्राञ्जलया—

'दर्पण'-टीकया,—

'श्रीगुरुप्रसादशास्त्रि' कृतया

टिप्पण्या च-समुद्भासितः।



सम्पादकः—


पं० नन्दकिशोरशास्त्री, आयुर्वेदाचार्यः।

[प्रोफ़ेसर—श्रीराजस्थान-संस्कृत-कालेज, मीरघाट, काशी]



प्रकाशकः—

भार्गवपुस्तकालयाध्यक्षः, गायघाट, बनारस।



प्रथमं राजसंस्करणम्] १९९१ मार्गशीर्षपूर्णिमा [मूल्यं नाममात्रं—२॥)

मुद्रक—द० ल० निघोजकर, श्रीलक्ष्मीनारायण प्रेस, जतनबर, काशी ।

वाङ्मुखम्

अथ जगद्विदितयशोराशिभिर्भट्टोजिदीक्षितैर्विरचितानां वैयाकरणसिद्धान्तकारिकाणां व्याख्यानभूतः—कौण्डभट्टविरचितोऽन्वर्थनामा वैयाकरणभूषणसारो विद्वच्चेतांसि समुल्लासयन्प्रथते इति न तिरोहितं केषामपि। परं परमतसमीक्षापरीक्षादिगहनस्य, तर्ककर्कशस्यास्य सारस्य सारः सर्वैर्न शक्यो यथावल्लब्धुमिति नाना व्याख्यानानि विद्वद्भिस्तैस्तैराविष्कृतानि। तत्र हरिवल्लभकृतो १ 'दर्पणः' २ भैरवमिश्रकृता 'परीक्षा', ३ हरिशास्त्रिकृता 'काशिका', ४ मन्नूदेवापरनामधेयेन नागेशभट्टपट्टशिष्य—'वैद्यनाथपायगुण्डे'शिष्येण गोपालदेवेन कृता 'कान्तिः' ५. रुद्रनाथकृता 'विवृतिः', ६. कृष्णमित्रकृता'रत्नप्रभा' च समधिगता मया निरीक्षिताश्च।

तत्र खलु 'काशिका' सकलटीकामूर्धाभिषिक्ता विद्वन्मनो मोहयति, दर्पणश्चेति ताभ्यां सहैव ग्रन्थरत्नमिदं प्रकाशयामः। यदि विदुषां मनसामावर्जनाय प्रभवेदिदं सफलः स्यादयं हन्त ! सकलोऽपि श्रमोऽस्माकम्।

भूषणसारकर्त्तुः कौण्डभट्टस्य समयादिनिर्णये—१६५० वै० समये वर्त्तमानस्य भट्टोजिदीक्षितस्य कनीयसो भ्रातू रङ्गोजिभट्टस्य पुत्रोऽयं कौण्डभट्टः १६६० वैक्रमेऽनितरसाधारणं ग्रन्थमिमं निर्मितवानिति वक्तुं शक्यते।

१७०० वैक्रमसंवल्लिखितवैयाकरणभूषणपुस्तकस्याप्युपलब्धेरस्य मतस्य पुष्टिर्भवति। अयञ्च कौण्डभट्टः—भट्टोजिदीक्षितगुरु-शेषश्रीकृष्णभट्ट—तनयस्य महामहोपाध्यायशेषवीरेश्वरस्य शिष्यः। अत एव ग्रन्थान्ते—"अशेषफलदातारमपि सर्वेश्वरं गुरुम्[1]॥ श्रीमद्भूषणसारेण भूषये शेषभूषणम्॥" इति शेषवीरेश्वराणामनेन स्मरणमकारि। मनोरमादौ शेषश्रीकृष्णकृत'प्रक्रियाप्रकाश'खण्डनाच्च शेषवीरेश्वराणां[2] मनसि वैमनस्यलेश आविरासीदिति तु प्रसिद्धमेव।

---

१ सर्वेश्वरं = रेफवकारेकारसहितमीश्वरम्—'वीरेश्वर'मिति यावदिति निगूढोऽर्थः। अत एव शेषभूषणमित्यपि, गुरुमिति च स्वरसतः सङ्गच्छते। इदानीमपि गुरुनाम साक्षान्नोच्चारयन्ति शिष्टाः, एवमेव भङ्गिविशेषेणेपाददत इति च गौडाः।

२. अस्य वीरेश्वरभट्टस्य शिष्यो जगन्नाथः पण्डितराजः। स्फुटमेतत् मनोरमाकुचमर्दने स्वयमेव पण्डितराजेनोक्तम्। वीरेश्वरपुत्रेण चक्रपाणिना 'मनोरमाखण्डनं' प्रणीतम्—तस्य प्रारम्भे 'वीरेश्वरं गुरुं शेषवंशोत्तंसं भजाम्यह'मिति तेनोपश्लोकितः स्वपिता। 'वटेश्वर'मिति मुद्रितपाठस्तु प्राचीनाक्षरानभिज्ञैः कल्पितोऽशुद्ध एवेति गौडाः।

तदेवमुपरि प्रचलत्यपि विवादेऽन्तर्निहितगुरुस्नेहानामेषां व्यवहारो भीष्मद्रोण-युधिष्ठिरादिचरितमनुकरोति। तदित्थं भूषणसारस्य समयोऽपि १६६० वैक्रम एव निर्णयः।

'दर्पण'टीकाकर्त्ता 'हरिवल्लभः' पर्वतीयो १८०० सम्वत्सरे काह्वयामासीत्, १८५८ वैक्रमे निर्मितायां काशिकायां बहुषु स्थलेषु दर्पणकृतां मतमुपपादितम्। एवञ्च दर्पणकृतः स एव समयो युक्तः।

दर्पणे काशिकायां च मञ्जूषाकृतो नागेशस्य¹ मतमुपपादितमिति ततोऽर्वाचीनोऽयं दर्पणकार इति सुस्थम्।

अशुद्धिसङ्कुलस्य दर्पणस्य शोधनाय पुस्तकप्रदानेनास्माननुगृह्णतां पूज्यानां म० म० गोपीनाथकविराजमहोदयानां, मान्यवरगङ्गाधरशास्त्रिभारद्वाजमहोदयानां श्रीनारायणशास्त्रिखिस्तेमहोदयानाञ्चोपकारभरं शिरसा वहामः।

अस्मत्सुहृदां पं० विश्वनाथपाण्डेयानां, लक्ष्मीनारायणमुद्राशालाऽध्यक्षाणां 'दत्तात्रेय' महोदयानाञ्चोपकारं भृशं स्मरामः। शोधितेष्वेवं दर्पणादौ यद्यशुद्धयः स्युरवशिष्टाः—ननु विद्वत्स्वेवायं भार आहितोऽस्माभिस्तैर्निबोढव्य इति—


श्रीराजस्थान
संस्कृत कालेज
मीरघाट, काशी।
३१-१२-३४

श्रीगुरुप्रसादशास्त्रिणः।



---

१. अयं नागेशः शेषवीरेश्वरशिष्याणां भट्टोजिदीक्षितपौत्राणां हरिदीक्षितानां शिष्यः, साहित्ये च जगन्नाथपण्डितराजानां शिष्यः, अत एव तेन रसगङ्गाधरे 'गुरुमर्मप्रकाश'नाम्नी टीका रचिता। अन्यथा गुरुपदोपादानं नातीवोपयुज्येत, युक्तमपि तादृशस्य प्रसिद्धस्य विदुषोन्तिके तस्याध्ययनम्। हरिदीक्षितेनापि शब्दरत्नप्रारम्भे 'शेषविभूषणमीडे'इत्यादिश्लेषेण शेष-वीरेश्वर एव स्तुतः। नागेशकृतं 'शब्दरत्न'मिति तु निर्मूलमेव प्रवादः। बृहच्छब्दरत्नस्य सङ्क्षेपेण लघुशब्दरत्नत्वेननिर्मितौ गुरोः साहाय्यमनेन नागेशभट्टेन कृतं भवेदिति तथा प्रसिद्धिमूलमिति गौडाः।



जगद्विदित प्रत्यग्रशङ्कराचार्य—मरुमण्डलमार्त्तण्ड-षट्शास्त्रपारङ्गत-
'पण्डितराज-' म० मा० श्रीस्नेहिरामशास्त्रिणः ।
(चिड़ावा-राजपूताना)

जन्मसंवत् १९०४— कैलासवास संवत् १९८१



श्रीराजस्थान-संस्कृत-कालेज-ग्रन्थमाला—काशी—



परमपावन-महनीयकीर्त्तिपरिमलोल्लासितजगती-

तलनिलयनिखिललोकमानसानां—

योगविभूतिततिसमधिगतसमस्ततत्त्वसाक्षात्काराणां—

प्राच्य-पाश्चात्य-विद्यामहार्णवानां—


'महामहोपाध्याय'—

श्री श्रीगोपीनाथकविराजमहोदयानां—

विद्वन्निवहैरहमहमिकया चिराया ऽर्चितयोश्चरण-

—पादुकयोराराधीयते—

श्रीगुरुप्रसादशास्त्रिणा ।



श्री १०८ श्रीस्नेहिरामशास्त्रिणां पौत्रः, श्रीशिवनारायणशास्त्रिणां पुत्रः—

श्रीगुरुप्रसादशास्त्री, व्याकरणाचार्यः, न्यायाचार्यः,
दर्शनाचार्यः, आयुर्वेदाचार्यः (काशी)।

श्रीगणेशाय नमः ।

दर्पण-काशिकाऽऽख्यव्याख्याद्वयसहितः—

वैयाकरणभूषणसारः ।

[1]श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम् ।

❀ श्रीहरिवल्लभकृतो दर्पणः ❀

रमाप्रेमाऽऽमज्जज्जगदवनदक्षं मधुहृत—
—श्रुतिस्तोमाऽऽहृत्या परिजनितवेदाननमुदम् ।
अखण्डानन्दाढ्यं निखिलजनहृत्कञ्जनिलयं
हयग्रीवं वन्दे प्रकृतकृति·विघ्न·क्षतिकृते ॥१॥

सत्येकस्मिन्नपि बाधके समवहितसाधकसहस्रादपि कार्य्योत्पत्तेरदर्शनादपेक्षितप्रारिप्सितप्रत्यूहाऽपोहायाऽनुष्ठितं भगवत्स्तुतिरूपं मङ्गलं ग्रन्थकृच्छिष्यशिक्षार्थमादौ निबध्नाति—**श्रीलक्ष्मीरमणमिति**। अधिकरणव्युत्पन्नल्युडन्त'रमण'शब्देन

* श्रीहरिभट्टकृता काशिका टीका *

वन्दे गणपतिचरणौ विघ्नध्वान्तालिवारणोद्योतौ ।
वन्द्यौ सुरगणसङ्घैः सर्वाभीष्टप्रदातारौ ॥ १ ॥
भैरवं शंकरीं नत्वा सिद्धेशां लोकमातरम् ।
व्याख्यां **भूषणसारस्य काशिकां** तनुते **हरिः** ॥ २ ॥
मुनित्रयं सर्वजनोपकारकं प्रणौमि विद्यार्णवपात्रभूतान् ।
गुरूंश्च तातं विबुधेन्द्रवन्द्यं यशःप्रकाशं जननीं च देवीम् ॥ ३ ॥

प्रारिप्सितग्रन्थस्य निर्विघ्नसमाप्तये कृतं तावत् सकलजगत्कर्तृभूतश्रीलक्ष्मीरमणस्तुत्यात्मकं मङ्गलं शिष्यशिक्षायै निबध्नाति,—श्रीलक्ष्मीरणमिति । श्रीर्लोकोत्तरशोभा, तद्युक्ता या श्रीमहा-

* टिप्पणी *

वन्देऽनवद्य-सद्बुद्ध्य·विद्योद्योतितदिङ्मुखान् ।
मरुमण्डलमार्त्तण्डस्नेहिरामाभिधान् गुरून् ॥१॥
ढुण्ढिराजपदाम्भोजचिन्तनाप्तलसन्मतिः ।
भूषणे तनुते बालललितां टिप्पणीं शुभाम् ॥२॥

१. श्रीर्लोकातिशायिनी निरुपमा शोभा, कान्तिर्लावण्यं वा, तया युक्ता लक्ष्मीः=

❀ दर्पणः ❀

कर्तृषष्ठ्यन्त'लक्ष्मी'पदस्य समासः। तेन च 'श्रीसहित'शब्दस्य मध्यमपदलोपी समासः, शाकपार्थिवादेराकृतिगणत्वात्। तदुपादानञ्च-सशक्तिकस्यैव भगवतो जगन्निर्माणकारणत्वमिति ध्वनयितुम्। **नौमीति**। 'णु स्तुता'विति धातोरस्मच्छब्दाप्रयोगेऽपि गम्यमानतदर्थसामानाधिकरण्यस्य लकारार्थकर्त्तरि सत्त्वाद् वर्तमानक्रियाद्योतकलडुत्तमपुरुषः, 'अस्मद्युत्तम'इत्यत्र पूर्वसूत्रात् 'स्थानिनी'त्यस्यानुवृत्तेः।

स्तुतिश्च—उत्कृष्टगुणवत्त्वप्रकारकबोधानुकूलो व्यापारः, स एव च प्रकृतधात्वर्थः, बोधरूपधात्वर्थफलाश्रयत्वाल्लक्ष्मीरमणस्य कर्मता, एवञ्च वैयाकरणमते प्रकृते—श्रीसहितलक्ष्मीरमणाश्रयकोत्कृष्टगुणवत्त्वप्रकारकबोधाऽनुकूलो मदभिन्नाश्रयको वर्त्तमानशब्दप्रयोगरूपो व्यापार इति—वाक्यार्थः।

नन्वेतच्छास्त्रप्रवर्तकत्वेन शिवस्याभ्यर्हिततरत्वात्तत्स्तुत्यात्मकमङ्गलमपि कुतो नाचरितमत आह—**गौरीरमणरूपिणमिति**। स्वरूपपर'रूप'पदेन'गौरीरमण' पदस्य षष्ठीसमासस्ततोऽदन्तत्वनिबन्धनो मत्वर्थीय इनिः, गौरीरमणो रूपं-स्वरूपं-यस्येति षष्ठ्यर्थबहुव्रीहिणोक्तार्थलाभेपि लाघवमूलक—'न कर्मधारया'दिति न्यायस्य

❀ काशिका ❀

लक्ष्मीर्निखिलप्रकृतिस्तस्या रमणं = दयितं विष्णुं, नौमि = स्तौमीत्यर्थः। यद्वा,—श्रीः पूर्वोक्ता, नित्यत्वादिधर्मोपेता विलक्षणा बुद्धिर्वा, तद्युक्तो लक्ष्मीरमण इत्यर्थः। अथवा; श्रीः = सरस्वती, सा च लक्ष्मीश्च, तयो रमण इत्यर्थः, 'श्रीश्च ते लक्ष्मीश्च पत्न्यौ' इति श्रुतेः, तत्र 'श्री' शब्देन सरस्वती, न तु लक्ष्मीः, लक्ष्मीशब्दस्य पृथगुपादानात्, 'पत्न्यौ' इति द्विवचनासंगत्यापत्तेश्चेति स्पष्टमेव। ननु 'कुर्याद्धरिहरार्चनम्' इति वचनाद्,—'यथा विष्णुस्तथा शिवः।'

"शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः।
विष्णुरुद्रान्तरं यश्च यो ब्रूते मूढधीस्तु सः॥"
रौरवादिषु घोरेषु नरकेषु पतत्यधः॥"

—इत्यादिवचनेभ्यश्चाभेदेनैवोपासनाया विहितत्वाद्विपरीतायाश्च निषेधात्, केवलविष्णुस्तुतिकरणे, पार्थक्येन शिवविष्णुस्तुत्याचरणे च भेदभावना प्रतीयेतेति तदपनुत्तये—लक्ष्मीरमणविशेषणमाह,—**गौरीति**। गौरी = पार्वती, सा च कालिका,—

'तस्यां विनिर्गतायां तु कृष्णाभूत् सापि पार्वती। कालिकेति समाख्याता'—

रमा, त्रिगुणात्मकलक्ष्मवती माया वा, रमते—रमयतीति वा—रमणः, नन्द्यादित्वाल्ल्युः, दर्पणकृतस्त्वधिकरणल्युडन्तो रमणशब्द इत्याहुः। "—श्रीलक्ष्मीरमण'मिति ताच्छील्ये णिनिः, न तु मत्वर्थीय इनिः, 'रसादिभ्यश्चे'ति मतुब्विधानस्येन्यादिरूपान्यमत्वर्थीयनिवृत्त्यर्थत्वा— "दिति—**'कान्तिः'**।



स्फोटरूपं यतः सर्वं जगदेतद्विवर्त्तते ॥१॥

❀ दर्पणः ❀

'प्रत्ययस्था'दिति सूत्रेऽसुव्रत इति प्रयोगमुदाहरता भाष्यकृताऽनादृतत्वान्न मत्वर्थीयानुपपत्तिः। दृश्यते चेदृशस्थले प्रयोगद्वैविध्यं—"शिवाय विष्णुरूपाय, विष्णवे शिवरूपिणे"—इत्यादि। तथा च तदभिन्नमित्यर्थः। प्रमाणं चात्रोक्तपुराणवाक्यमेव। एवञ्च कार्य्यवैचित्र्यस्य कारणवैचित्र्यनियम्यत्वाज्जगदवनादिकार्य्यवैचित्र्योपपत्तये तत्तद्गुणप्रधानमूर्तिपरिग्रहो भगवतो, न पारमार्थिको भेद इति—स्तुतिकर्मता शिवस्य नाऽनुपपन्नेति भावः।

उत्कृष्टगुणवत्त्वमेवाविष्करोति—**यत इति**। वेदान्तिमते—मायाशबलस्य ब्रह्मणो जगदुपादानत्वा'ज्जनिकर्त्तु'रित्युपादानहेतावपादानसंज्ञानिबन्धना पञ्चमी, 'गुण' इत्युक्ते'र्विभाषे'त्यस्य न प्रसक्तिः, तथा च, यस्मादुपादानहेतोरित्यर्थः, सर्वं जगत् [१]स्फोटरूपं विवर्तत इति—योजना। स्फुटत्यभिव्यक्तीभवत्यर्थोऽस्मादिति स्फोटो—नामाद्यात्मकः शब्दः, बाहुलकादपादाने घञ्, रूप्यते = निरूप्यत इति रूपमर्थः, तयोः समाहारद्वन्द्वे नपुंसकैकवचनान्तम्, वाच्य-वाचकस्वरूपमिति

❀ काशिका ❀

—इति मार्कण्डेयपुराणात्, 'उमा कात्यायनी गौरी काली' इति कोशाच्च। इत्थं च महाकाल्यादित्रयस्यापि स्तुतिः कृता भवति। तस्या रमणः शिवस्तस्य रूपं तदस्यास्तीत्यर्थः। गौरीरमणेन रूपयति तदभिन्नतया गृह्णातीति वार्थः, कर्मकर्तरि णिनिः। गौरीरमणं स्वाभिन्नतया रूपयति ग्राहयतीति वार्थः। पूर्वकल्पे तद्धित इनिः, उत्तरपक्षे 'सुप्यजातौ—'इति णिनिः।

स कः? एतद् दृश्यमानं सर्वं जगत् यतः, = यस्य। आद्यादित्वात्तसिः। विवर्त्तते = विषयसत्ताकं भवति, अतात्त्विकान्यथाभावाश्रयो भवतीति वार्थः। तदुक्तम्,—'तात्त्विकोऽन्यथाभावः परिणामोऽतात्त्विकोऽन्यथाभावो विवर्तः' इति। अन्यथाभावश्च भ्रम एव। तदाश्रयत्वं तु विषयतया जगति बोध्यम्। एतेन—जगतो विवर्ताधिष्ठानत्वरूपं सर्वजगदुपादानकारणत्वमुक्तं, तेन सर्वोत्कृष्टतया स्तुत्यत्वमावेदितम्। तदुपादानत्वं च—'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति' इत्यादिश्रुतिसिद्धम्। एतच्छ्रुतिसिद्धे—जगत्-

---

१. 'स्फोटरूप'मिति भगवतो, जगतश्च विशेषणं, आद्ये—स्फोटस्वरूपं = सकलार्थप्रकाशकं, द्वितीये—स्फोटरूपं = नाम-रूपात्मकं, ब्रह्माऽभिन्नमिति वाऽर्थः। 'नामरूपे व्याकरणवाणि', 'सर्वं खल्विदं ब्रह्मे'ति च श्रुतेः।

२. विवर्त्तो यथा—'रज्जौ सर्प' इति, अत्र रज्जुः स्वयमविकृतैव मायया सर्पाकारेण विवर्त्तते, परिणामश्च दुग्धस्य दध्यात्मना, तत्र दुग्धं विकृतं सदेव दधि भवति।

❀ दर्पणः ❀

तदर्थः । 'नामरूपे व्याकरवाणी'ति श्रुतेः । एतत् = अत्यन्तसान्निध्येन बुद्ध्या विषयीक्रियमाणम् । विवर्त्तते—उत्पद्यत इत्यर्थः, धातोरुपसृष्टत्वात् ।

ननु नामरूपात्मकस्य, 'सदेव सोम्येदमग्र आसी'दिति श्रुत्या सनातनत्व-बोधनात् कथमुत्पत्तिशालित्वमत आह—**जगदिति** । 'वर्तमाने पृष'दिति निपातनात्साधु । तथा च—गच्छति = तिरोधत्त—इति व्युत्पत्त्या तिरोधाने उक्ते—यत्तिरोधत्ते तदाऽऽविर्भवतीति नियमेनाऽऽविर्भावस्य लाभात्स एवात्रोपसृष्टार्थः । एवञ्च सत्त्वेनैतस्य सनातनत्वेऽपि नामत्वादिनाऽऽविर्भावाद्यभ्युपगमान्नोक्तश्रुतिविरोधो नाऽपि 'तस्मादेतस्माद्वा आत्मन आकाशः सम्भूत' इत्याद्युत्पत्तिबोधकतद्विरोधः ।

यत्किञ्चिन्नामरूपात्मकस्यान्यतोऽपि सम्भवादाह—**सर्वमिति**—यावदर्थकम् । उत्पत्तिरुपलक्षणमवनादेः,—तेन जगत्कर्तृत्वादिरूपोत्कृष्टधर्मस्य स्तुत्यतावच्छेदकस्य लाभः । अत्र च, 'यतो वा इमानि भूतानि जायन्ते; येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशन्ती'त्याद्याः श्रुतयः प्रमाणम् ।

मतान्तरे,—'यत' इति पञ्चमी—निमित्तहेतुतायाम्, व्युपसृष्ट'वृतु'धातोराद्यक्षणसम्बन्धरूपा—उत्पत्तिरर्थः । ननु सर्वान्तर्गतवियदाद्यात्मकपदार्थस्यानादितया कथमुत्पत्तिमत्वमत आह—**जगदिति** । स्थावर-जङ्गमात्मकमित्यर्थः । तथा च, गच्छति = नश्यतीति—व्युत्पत्त्या विनाशित्वे बोधिते, विनाशिभावस्य जन्यत्वनियमेन तस्योत्पत्तिर्न विरुद्धेति भावः । एतत्कल्पे 'स्फोट'पदं शास्त्रानुमानप्रतीतपरम्, तादृशं रूपं यस्येति व्युत्पत्त्या'स्फोटरूप'मिति भगवतो विशेषणं बोध्यम्, शेषं पूर्ववत् ।

यद्वा—स्तुत्यतावच्छेदकरूपं प्रदर्शयितुं विशिनष्टि—**स्फोटरूपमिति** । वक्ष्यमाणव्युत्पत्त्या समस्तार्थप्रकाशकस्वरूपमित्यर्थः, तदुपपादयन्नेव स्तुत्यतावच्छेदकान्तरमपि दर्शयति—**यत इति** । यस्मादुपादानादिति, सार्वविभक्तिकतसिना यस्मिन्नधिष्ठाने इति वाऽर्थः । 'विवर्त'श्चातात्त्विकोऽन्यथाभावः, अपरित्यक्तपूर्वरूपस्य रूपान्तरप्रकारकप्रतीतिविषयत्वमिति यावत् । 'जग'च्छब्दश्च रूढ्या नाम-

❀ काशिका ❀

स्थितिलयकर्तृत्वेऽपि—बोध्ये । जगतो विशेषणं स्फोटरूपं, स्फुटत्यस्मादिति—स्फोटः, स च सिद्धान्ते ब्रह्मस्वरूप इति स्पष्टं हर्यादिग्रन्थे । तद्रूपं तदभिन्नमित्यर्थः । 'सर्वं खलु इदं ब्रह्म' इत्यादिश्रुतिसिद्धो ब्रह्माभेदः । लक्ष्मीरमणविशेषणं वैतत्, स्फोटस्य वैयाकरणोपास्यत्वेन समुचितदेवतास्तुतिसंपत्त्यर्थं तदुपादानम् ॥ १ ॥

पाणिन्यादिमुनित्रयमध्ये इदानीमतिप्रामाणिकत्वोत्कृष्टत्वादिनाभिमतो यः शेषस्तद्विशिष्ट-



अशेषफलदातारं भवाब्धितरणे तरिम् ।

❀ दर्पणः ❀

रूप'परः । तथा च—यस्मिन्नधिष्ठाने एतत्सर्वं जगद्—भूतेन्द्रियादि-तत्तद्रूपेण प्रतिभातीत्यर्थः । 'नेह नानाऽस्ती'ति श्रुत्या बोधितबाधस्यापि जगतः प्रतिभासे अधिष्ठानसत्ताया एव नियामकत्वात् समस्तार्थप्रकाशकत्वोपपत्तिः, अप्रच्युतस्वरूपस्यैव ब्रह्मणो जगद्रूपेण विवर्त्तनादविकारित्वरूपोत्कृष्टधर्मावगतिश्च । अत्र च 'तमेव भान्तमनुभाति सर्वं'मित्याद्याः कूटस्थस्वरूपप्रतिपादिकाश्च श्रुतयः प्रमाणत्वेनानुसन्धेया इति भावः । अत्र भगवद्विषयकरतिभावस्य हेत्वलङ्कारोऽङ्गम् ॥ १ ॥

जगदुपादानत्वेन स्तुत्वा, अपवर्गसाधनज्ञानविषयत्वेनैतच्छास्त्रव्याख्यातृशेषभूषणत्वेन च स्तुवञ्छेषोक्तसमस्तसिद्धान्तप्रतिपत्तये प्रार्थयते—**अशेषेति । फलं**-प्रवृत्त्युद्देश्यम् । स्वर्गादियत्किञ्चित्फलदातृत्वस्य देवतान्तरसाधारण्यादाह—**अशेषेति ।** तथा चाऽपवर्गरूपफलस्याऽप्यशेषपदेन कुक्षीकृतत्वात् तद्दातृत्वस्यानन्यसाधारण्यात् प्रार्थ्यताऽवच्छेदकधर्मलाभः, तदेव विशदयति—**भवाब्धीति ।** भव एवाब्धिरिति रूपकम्, अब्धीयग्राहादिसदृश-कामलोभाद्याक्रान्तत्वाद् दुरवगाहत्वेन भवे तदारोपः, तेन च भवस्य दुस्तरत्वं व्यज्यते, तस्य **तरणं**—पारदेश-

❀ काशिका ❀

देवसंकीर्तनात्मकं मङ्गलं निबध्नाति—अशेषफलेति । शेषाशेषार्थलाभाय,—शेषस्य = शेषनागस्य महाभाष्यकृतोऽशेषाः = कृत्स्नाः—वाच्यादयः, स्फुटा अस्फुटाश्च येऽर्था महाभाष्यस्थास्तेषां लाभाय = ज्ञानाय । शेषभूषणं,—शेषो भूषणमलंकारत्वेन, पर्यङ्कत्वेन वा भूषणं यस्य तं—शिवं, शेषशायिनं विष्णुं च प्रार्थय इति संबन्धः ।

ननु शेषार्थलाभः शेषादेव संभवति, न तु शिवादेः, न हि देवदत्तीयार्थलाभो मित्रदत्तादेः अतः शेष एव प्रार्थनीयो न तु शिवादिरित्याशङ्कां निराचिकीर्षुस्तद्विशेषणमाह,—अशेषफलेति । अशेषाण्यैहिकामुष्मिकाण्यपवर्गपर्यन्तानि, फलानि = तत्तत्कर्मफलानि, तेषां दाता इति—तृन्नन्तेन शेषषष्ठ्यन्तस्य समासः । यद्वा तृजन्तेन शेषषष्ठ्यन्तस्य समासः, एतेन—तृजन्तत्वे 'तृजकाभ्याम्–' इतिसमासप्रतिषेधापत्तिस्तृन्नन्तत्वे 'न लोक–'इति षष्ठीनिषेधापत्तिरिति दूषणं प्रत्युक्तं, कारकषष्ठ्या एव 'न लोक–'इति निषेधात्, तस्या एव समासनिषेधाच्च । फलदातृत्वं चेश्वरस्य—

'यादृगिव वै देवेभ्यः करोति तादृगिवास्मै देवाः कुर्वन्ति',

'यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥
स तया श्रद्धया युक्तस्तस्याराधनमीहते ।

ॐ दर्पणः ॐ

प्राप्तिस्तस्मिन्नित्यर्थः। तरिम्—साधनम्। यद्यपि तरन्त्यनयेति व्युत्पत्त्या तरणसाधनं तरिपदार्थस्तथापि तद्घटकीभूततरणस्य सन्निहितपदेनैव लाभाद् द्विरुक्तिर्माभूदिति विशेष्यमात्रपरतया व्याख्यातं, मुक्तिसाधनज्ञानविषयमिति यावत्।

मुक्तिश्च—वेदान्तिमतेऽज्ञाननिवृत्तिसमकाला स्वरूपप्राप्तिः। नन्वज्ञाननिवृत्तेरधिकरणाऽनतिरिक्तायाः, स्वरूपस्याऽपि च सिद्धत्वात्तद्रूपायास्तस्यास्तत्त्वज्ञानसाध्यत्वानुपपत्तिरिति चेन्न, परेषां प्रागभावस्येव सिद्धाया एवाऽज्ञाननिवृत्तेर्योगक्षेमसाधारण्याः साध्यतायाः सम्भवात्। अधिकमन्यतोऽवधेयम्।

नैयायिकास्तु—आत्यन्तिकदुःखध्वंसो मोक्षः। ध्वंसे आत्यन्तिकत्वञ्च,—स्वसमानाधिकरणदुःखासमानकालिकत्वम्, अत्रैव तत्त्वज्ञानस्योपयोगः, विशेष्यांशस्य स्वासाधारणसामग्र्या एव सम्भवात्, नित्यसुखाभिव्यक्तिर्वा स—इत्याहुः।

ॐ काशिका ॐ

लभते च ततः कामान् मयैव विहितान् हितान्॥"

—इत्यादि श्रुतिस्मृतिपुराणेषु प्रसिद्धं—'वैषम्यनैर्घृण्ये न, सापेक्षत्वात्, तथा हि दर्शयति' इति व्याससूत्रे द्वितीयाध्यायस्य प्रथमपादस्थे, तृतीयस्य द्वितीयपादस्यान्ते—'पूर्वं तु बादरायणो हेतुव्यपदेशात्'इति व्याससूत्रे च भगवच्छङ्कराचार्यैः शारीरभाष्ये निपुणतरमुपपादितम्। तत्तज्जीवगतधर्माधर्मसापेक्षस्येश्वरस्यैव फलदातृत्वं, न केवलकर्मणः, तत्र हि प्रथमे,—यथा पर्जन्यो व्रीहियवादिसृष्टौ साधारणं कारणं, व्रीहियवादिवैषम्ये तु तत्तद्बीजगतानि सामर्थ्यानि शक्तयपरपर्यायाणि कारणानि भवन्त्येवमीश्वरो देवादिसृष्टौ साधारणं कारणं भवति,—देवमनुष्यादिवैषम्ये तु तत्तज्जीवगतादृष्टानि विलक्षणानि ह्यसाधारणानि कारणानि भवन्ति, एवमीश्वरः कर्मसापेक्षत्वाद्वैषम्यनैर्घृण्याभ्यां न दुष्यति, यथा सेवानुरूपफलदाता राजा। कथं पुनरवगम्यते सापेक्ष ईश्वरो नीचमध्यमोत्तमसंसारं निर्मिमीत इति। तथाहि दर्शयति श्रुतिः—'एष ह्येव साधु कर्म कारयति तं, यमेभ्यो लोकेभ्य उन्निनीषते, एष उ एवासाधु कर्म कारयति तं, यमधो निनीषते' 'पुण्यो वै पुण्येन कर्मणा भवति, पापः पापेन' इति च। स्मृतिरपि, 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।'—इत्याद्यभिहितं।

तृतीये तु—'धर्मं जैमिनिरत एव' इति जैमिनिसूत्रित धर्मादेव फलमिति पक्षः 'तु' शब्देन व्यावर्त्यते,—तथा च कर्मसापेक्षादपूर्वसापेक्षाद्वेश्वरादेव फलमिति सिद्धान्तः, कुतः?, 'हेतुव्यपदेशात्'। धर्माधर्मयोरपि कारयितृत्वेनेश्वरो हेतुर्व्यपदिश्यते फलस्य दातृत्वेनेत्यभिधाय—'एष ह्येवे'ति पूर्वोक्तश्रुतिः प्रदर्शितेत्याद्यन्यत्र विस्तरः।

ननु प्रतिबन्धकानेकदुरितसत्त्वे कथं शेषाशेषफललाभः, सत्येकस्मिन्नपि बाधके साधकसहस्रस्याप्यकिंचित्करत्वादित्याशङ्कामपनेतुं विशिनष्टि—भवाब्धीति। भवः=संसारः, स एवाब्धिरिति मयूरव्यंसकादित्वात् समासः, तरण्यमात्वेत्यत्, यद्वा—'भवोऽब्धिरिवे'त्युपमित-



शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम् ॥२॥
[वाग्देवी यस्य जिह्वाग्रे नरीनर्ति सदा मुदा ।
भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये ॥ ३ ॥

❀ दर्पणः ❀

शेषाऽशेषेति । कर्मधारयोत्तरपदः षष्ठीतत्पुरुषः, तस्य च 'लाभ'पदेन समासः । लाभायेदमिति विग्रहे चतुर्थ्यन्तलाभपदस्यार्थपदेन सः । **शेषः**—पतञ्जलिः, शेषांशत्वात्तस्य । तथा च शेषोक्तभाष्यप्रतिपादितनिखिलसिद्धान्तज्ञानायेत्यर्थः । **शेषभूषणमिति ।** शेषोऽनन्तः, स भूषणं यस्येत्यर्थः, यतोस्य भूषणं शेषोऽतोऽस्य शेषोक्तसिद्धान्तलब्ध्यै प्रार्थनमिति साभिप्रायविशेष्यस्योपादानात्परिकराङ्कुराऽलङ्कारोत्र भगवद्विषयकरत्यङ्गम् ॥ २ ॥

प्रेक्षावत्प्रवृत्तये इतरग्रन्थेभ्यः स्वग्रन्थस्योत्कर्षं प्रदर्शयन्नेव दर्शनीयविषय-

❀ काशिका ❀

समासः, नाशरूपस्य तरणस्य तत्राप्यन्वयसंभवात्, 'भाष्याब्धिः क्वातिगम्भीरः' इत्यत्रेव प्रकृते साधारणधर्मवाचकोपादानरूपबाधकाभावाच्च । भवाब्धेस्तरणं तत्र तरिं नौकां साधनमिति यावत्, 'तरति शोकमात्मवित्' इति श्रुतेः । 'स्त्रियां नौस्तरणिस्तरिः' इत्यमरः । तथा चानन्यसाध्यानेकदुःखसमूहसंसारनिवर्तकत्वे प्रतिबन्धकदुरितनिवृत्तिः सुतरां ततो भविष्यति,—कैमुतिकन्यायादिति भावः । शेषालंकारत्वेन तन्नियोजकत्वं, तेन तद्विशिष्टप्रार्थनयावश्यं शेषोक्ताशेषार्थलाभः, विघ्नेशजनकत्वेन विघ्नप्रचयनिवृत्तिरप्यावश्यकीति सूचितम् । एतेन विघ्ननिवारणसंपत्तये—'आदौ पूज्यो गणाधिपः' इत्यादिवाक्यनिचयादादौ गणेशप्रार्थनैवोचितेति तद्दूषणं निरस्तम् ॥ २ ॥

निखिलपण्डितमान्यं स्वगुरुभूतं पितृव्यं तत्कीर्त्यनुवृत्तये तन्नामत निबध्नं स्तौति,—वाग्देवीति । सिद्धये = प्रारिप्सितग्रन्थसमाप्तये, तत्प्रचाराय च । नरीनर्ति = पुनः पुनरतिशयेन वा नृत्यं करोति, वाग्देव्या जिह्वाग्रे नृत्यं च,—झटित्यनवरतं धारारूपेण प्रकाशरूपम् । एतेन लोकोत्तरं पाण्डित्यं वक्तृत्वं चावेदितम् । 'नृती गात्रविक्षेपे' इत्यतो धातोर्यङ्लुगन्ताल्लट्, तिप्, शपो लुक्, 'चर्करीतं च' इति यङ्लुगन्तस्यादादौ पाठात्, 'रीगृदुपधस्य च' इत्यभ्यासस्य रीगागमः । छन्दसोऽपि यङ्लुक्—'हुश्नुवोः सार्वधातुके' इति सूत्रे हुश्नुग्रहणात्, 'बभूथाततन्थ—' इति सूत्रे निगमग्रहणाच्च ज्ञापकाद् भाषायामपि न विरुद्ध इति भावः । अत्रैतादृशविलक्षणसोमर्थ्यवत्तोपन्यासेन दीक्षितस्य देवांशत्वसूचनद्वारा तदीयस्तुतेरभीप्सितार्थसाधकत्वं, समुचितत्वं च सूचितम् । एतादृशस्य देवांशत्वञ्च,—

'यद्यद्विभूतिमत् सत्त्वं श्रीमदूर्जितमेव वा, तत्तेजो मामकं विद्धि'—

——इति भगवद्गीतायां स्पष्टमुक्तम् ॥ ३ ॥

व्याकरणप्रवर्तकाचार्यपाणिन्यादिमुनित्रयादिनमस्कारात्मकं चिकीर्षितं मङ्गलं निबध्नन्,

पाणिन्यादिमुनीन् प्रणम्य पितरं रङ्गजिभट्टाभिधं
द्वैतध्वान्तनिवारणादिफलिकां पुंभाववाग्देवताम् ।

ॐ दर्पणः ॐ

प्रयोजनसम्बन्धाधिकारिणां मध्येऽवश्यप्रदर्शनीयं विषयं दर्शयति—पाणिन्यादीति । 'पुम्भाववाग्देवता'मिति पितुर्विशेषणं, पुंसो भावो यस्या इति व्यधिकरणबहुव्रीहिपूर्वपदकः कर्मधारयो—'वाग्देवता'पदेन । अथवा—'पुम्भाव'-शब्दोऽर्श आद्यजन्तः, तथा चाऽऽविष्कृतपुंविग्रहां—सरस्वतीमित्यर्थः ।

द्वैतध्वान्तेति । द्वाभ्यां प्रकाराभ्यामितो—ज्ञातो विरुद्धोभयधर्मप्रकारकज्ञान-विषयो—धर्मीति यावत् । यद्वा—द्वयोर्भावो द्विता,—स्वनिष्ठैकविशेष्यतानिरूपित-प्रकारतासम्बन्धेन विरुद्धानानधर्मांशे धर्मिणोऽपि भावत्वसम्भवाद् 'द्विता'पदार्थोऽपि धर्म्येव । तत्र भवं,—द्वैतं = संशयात्मकज्ञानम् ।

अथवा—द्वयोरनेकस्य भावो द्विता = नानात्वं, तत्सम्बन्धि, ज्ञानं—द्वैतम्—परमार्थदशायामद्वितीयस्यैव ब्रह्मणोऽङ्गीकारेण श्रुतिबाधितनानात्वावगाह्यन्तःकरण-वृत्तिविशेषरूपम्—अविद्यापरपर्यायं—मिथ्याज्ञानम्, तदेव ध्वान्तं = तमस्तत्त्वाऽऽच्छादकत्वात्तन्निवारणमेकं = मुख्यं, फलं यस्यास्तामित्यर्थः । अनधिकारिणां स्वाश्रितानामेकतरकोटिकज्ञानोत्पादकत्वेन, अधिकारिणां सन्मात्रावलम्बनज्ञान-

ॐ काशिका ॐ

प्रेक्षावत्प्रवृत्तयेऽनुबन्धचतुष्टयं बोधयन् शिष्यावधानाय चिकीर्षितं प्रतिजानीते, पाणिन्यादीति । पाणिन्यादिमुनीन्, रङ्गोजिभट्टाभिधं पितरं, ढुण्ढिं = गणपतिं, प्रणम्य = प्रकृष्टं साष्टाङ्गत्व-गुणविशिष्टनमस्कारं कृत्वा, गौतमजैमिनिवचनव्याख्यातृभिर्दूषितान् सिद्धान्तान् = वैयाकरण-सिद्धान्तान् । उपपत्तिभिः = युक्तिभिः । प्रकट्ये = प्रकाशये । तेषां = गौतमजैमिनीयव-चोव्याख्यातॄणामाधुनिकतार्किकमीमांसकानां वचो दूषये इति योजना । 'व्याख्यातृभिर्दूपिता'निति 'व्याख्यातृ'ग्रहणेन-गौतमादिमुनीनां पाणिन्यादिभिः सहाविरोध इति सूचितं, स च मञ्जूषायां तत्र तत्र स्पष्टीकृतः, इहापि क्वचित् प्रतिपादयिष्यते । पाणिनिरादिर्येषां ते पाणिन्यादयः, ते च ते मुनयश्चेति बहुव्रीहिगर्भः कर्मधारयः । अयं बहुव्रीहिस्तद्गुणसंविज्ञानः, 'सर्वादीनि' इतिवत् । तेन पाणिनेरपि नमस्कारकर्मत्वलाभः । आदिपदग्राह्यौ—कात्यायनि-पतञ्जली । 'रङ्गोजिभट्ट'-त्यभिधा नाम यस्येति बहुव्रीहिः । गौतमश्च जैमिनिश्च गौतमजैमिनी = न्यायमीमांसासूत्रप्रणेतारौ, तयोरिमानि—गौतमजैमिनीयानि, इदमर्थे 'वृद्धाच्छः' इति छः, तानि च तानि वचनानि—न्यायसूत्राणि, मीमांसासूत्राणि चेति—कर्मधारयः, तेषां व्याख्यातार इति अशेषफलदातृपदवत् षष्ठीसमासः ।

नमस्कार्यताप्रयोजकं पितृविशेषणमाह—द्वैतध्वान्तेति । द्वौ इतः = आश्रयत्वेन प्राप्तो,

[1]ढुण्ढिं, गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान्
सिद्धान्तानुपपत्तिभिः प्रकटये, तेषां वचो दूषये ॥ ४ ॥
[2][नत्वा गणेशपादाब्जं गुरूनथ सरस्वतीम् ।
[3]श्रीकौण्डभट्टः कुर्वेहं वैयाकरणभूषणम् ॥ ५ ॥]

❀ दर्पणः ❀

प्रदत्वेन पुम्भाववाग्देवतायास्तन्निवर्तकत्वमिति भावः । ढुण्ढिं = गणपतिं, 'प्रणम्ये'त्यनुपज्ज्यते ।

सिद्धान्तानिति । भाष्यकारादिनिर्णीतार्थाः सिद्धान्तास्तानित्यर्थः । उपपत्तिभिः–साधकप्रमाणोपन्यासरूपाभिर्युक्तिरित्यर्थः । दूषये,–उपपत्तिभिरेव—बाधकप्रमाणोपन्यासरूपाभिरित्यर्थः । एतेनाऽन्यग्रन्थेभ्यः स्वग्रन्थस्योत्कृष्टत्वं ध्वनितम् । तथा च वैयाकरणसिद्धान्तोऽत्र विषयः प्रदर्शितः । तेनैव, तज्ज्ञानं प्रयोजनं, प्रतिपाद्यप्रतिपादकभावः सम्बन्धः, सिद्धान्तजिज्ञासुरधिकारीति–त्रयोऽन्येऽपि—दर्शितप्राया इति भावः ॥ ३ ॥

❀ काशिका ❀

द्वीतो = भेदः, तस्येदं ज्ञानं द्वैतम् । यद्वा–'द्व्येकयोः' इतिवद् द्विशब्दो द्वित्वपरः, तथा च द्वित्वविशिष्टौ द्वीतपदप्रतिपाद्यौ, तयोर्भवः द्वैतो–भेदः, तद्रूपं ध्वान्तं–तमो–मोह इति यावत् । तस्य निवारणं तत्—आदि फलं यस्याः सा एतादृशीं–पुंभाववादेवतां, पुमान् पुरुषः तस्य भावः = आकाररूपो यस्याः सा, पुंभावा = पुरुषाकृतिकेत्यर्थ । सा चासौ वाग्देवता = सरस्वती, तद्रूप इत्यर्थः । अजहल्लिङ्गत्वात् 'स्त्री प्रधान'मितिवत् विभिन्नलिङ्गत्वेऽपि समानाधिकरणविशेषणत्वमविरुद्धम् । अनेन विशेषणेनाद्वैतप्रतिपादकोत्तरमीमांसायामतिशयितनैपुण्यं प्रतिपादितं, तेन विलक्षणोत्कर्षः सूचितः ॥ ४ ॥

प्रचुरविघ्नशङ्कया पुनरपि गणेशादिनमस्कारात्मकं मङ्गलमाचरन् स्वकीर्त्यनुवृत्तये स्वस्य चिकीर्षितग्रन्थस्य च नाम निबध्नाति, नत्वेति । श्रीकौण्डभट्टः,–श्रीर्नवनवोन्मेषशालिनी स्फूर्त्याख्या मतिस्तद्युक्तः कौण्डभट्टोऽहं,–गणेशपादाम्बुजं,–गणेशस्य–गणानां शिवगणानामीशो नियन्ता तस्येत्यर्थः । अथवा–गणानां शत्रुगणानामीर्लक्ष्मीस्तां श्यति = तनूकरोतीत्यर्थः, शो तनूकरण इति धातोर्नैमित्तिक आत्वे कृते 'आतोऽनुपसर्गे कः' इति कः । यद्वा–गणानामिः = कामस्तं कामोद्वेगं, 'कामे'त्युपलक्षणं क्रोधादीनामपि, तथा च कामादिषड्वर्गं सदुपदेशादिद्वारा श्यति = खण्डयतीत्यर्थः । एतादृशस्य पादाम्बुजं = पादावेवाम्बुजं कमलम्, अतिशयितसंश्लेषविशिष्टत्वेन

१. 'ढुण्ढि'मिति पितृविशेषणं, तदेवं—न केवलं शारदावतारः, महागणपतिस्वरूपोऽपि मत्पितेत्यनेन सूच्यते, अन्यथा स्वपितृकीर्तनानन्तरं महागणपतिकीर्तनमनुचितमेव स्यादिति–गौडाः।

प्रारिप्सितप्रतिबन्धकोपशनाय कृतं श्रीफणिस्मरणरूपं मङ्गलं शिष्यशिक्षार्थं निबध्नंश्चिकीर्षितं प्रतिजानीते—

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः[१]।
तत्र निर्णीत एवार्थः संक्षेपेण कथ्यते ॥ १ ॥

❀ दर्पणः ❀

ग्रन्थादावनुष्ठितस्य मङ्गलस्य, तन्निबन्धनस्य च प्रयोजनमाह—**प्रारिप्सिते**त्यादिना। 'समाप्तये' इति विहाय, 'प्रतिबन्धकोपशमनाये'त्युक्त्या—अलौकिकाऽविगीतशिष्टाचारनुमितमङ्गलस्य विघ्नध्वंस एव फलम्, जन्मान्तरीयसमाप्तिमुद्दिश्य शिष्टानां मङ्गलाननुष्ठानान्मङ्गलसमाप्त्योः शरीरनिष्ठप्रत्यासत्त्यैव कार्यकारणभावस्य कल्पनीयतया, तस्य च नास्तिकसमाप्तौ व्यभिचारेण समाप्तेस्तत्त्वासम्भवात्, किन्तु कार्यमात्रं प्रति प्रतिबन्धकाभावस्य हेतुतया दुरितरूपप्रतिबन्धकनिरास एव मङ्गलस्योपयोगी, न तु समाप्तावपि, विघ्नध्वंसेनान्यथासिद्धत्वात्, समाप्तिस्त्वन्यत्र क्लृप्ततत्कारणकलापादिति—सूच्यते। **फणिस्मरणेति।** फणी = शेषः। 'शेषाख्यं धाम मामक'मिति भगवदुक्तेः, तत्स्मरणस्य विघ्ननिवारकत्वात्। मङ्गलस्य नति-स्तुत्यादिभेदेन नानात्वमिति सूचयितुं—'स्मरणे'त्युक्तम्। **प्रतोजानीत इति।** प्रतिज्ञाफलं तु शिष्यावधानं बोध्यम्। उद्धरणकर्त्राकाङ्क्षायामाह—

❀ काशिका ❀

ध्यातत्वसूचनायाम्बुजमित्येकवचनम्। गुरून् = निगूढमर्थं गृणातीति गुरुः, 'कृग्रोरुच्च' इत्युणादिसूत्रेण 'गृ शब्द' इति क्र्यादेर्गृधातोः कुप्रत्ययः। सरस्वतीं सरोऽमृतसरस्तद्वती सरस्वती, 'सर इत्युदकनाम, सर्तेस्तद्वती' इति **निरुक्तात्**, सरोवरविशेषो वा यस्या आश्रयो वर्तत इति वार्थः। वैयाकरणभूषण'मित्यन्वर्थं ग्रन्थनाम, तेन वैयाकरणानामत्रस्योपादेयता ध्वनिता ॥ ५ ॥

प्रारिप्सितेति। प्रारब्धुमिष्टो यो ग्रन्थस्तस्य प्रतिबन्धकानि तेषां व्यूहः = समूहस्तस्योपशमनाय = नाशायेत्यर्थः। एतेन—'समाप्तिं प्रति मङ्गलं न कारणमन्यथासिद्धत्वात्, किं तु विघ्नध्वंसं प्रति, समाप्तिस्तु स्वसामग्रीत' इत्यादि बोधितमित्याद्यन्यत्र विस्तरः। ननु तथापि ग्रन्थाद्बहिरेव मङ्गलाचरणमस्तु, ग्रन्थमध्ये तन्निबन्धनं निष्प्रयोजनमत आह,—**शिष्यशिक्षार्थ**मिति। ग्रन्थारम्भसमये शिष्यैरपि तादृशनिबद्धश्लोके पठिते सति तेऽपि मङ्गलभाजो भवन्ति तत्प्रयुक्तफलभाजश्चेत्येदर्थमित्यर्थः। चिकीर्षितं = कारिकावलीरूपं ग्रन्थम्। **अस्माभिरिति**

१. शब्दकौस्तुभोद्धरणकर्तृतया स्वस्य विष्णुतुल्यत्वसूचनात् प्रभाववत्त्वं सूचितम्। अस्माभिः = भट्टोजिदीक्षितैः। एतेन वैयाकरणसिद्धान्तकारिका भट्टोजिदीक्षितकृता इति सूचितम्।

'उद्धृत' इत्यात्रा'स्माभि'रिति शेषः। 'भाष्याब्धेः शब्दकौस्तुभ उद्धृत' इत्युक्तिः शब्दकौस्तुभोक्तार्थानामाधुनिकोत्प्रेक्षितत्वनिरासाय।

अन्यथा तन्मूलकस्यास्य ग्रन्थस्याप्याधुनिकोत्प्रेक्षितसारत्वापत्तौ पाणिनीयानामनुपादेयतापत्तेः। 'तत्र निर्णीत' इत्युक्तिरितोऽप्यधिकजिज्ञासुभिः शब्दकौस्तुभे द्रष्टव्यमिति ध्वनयितुम् ॥ १ ॥

❀ दर्पणः ❀

अस्माभिरिति। मूले–कथ्यते इति। 'हर्यादिनिबद्धकारिकाभि'रिति शेषः ॥ १ ॥

तत्र स्फोटस्याऽर्थबोधजनकत्वात् तेनैवाऽऽकाङ्क्षानिवृत्तेश्च—वाक्यस्फोटस्य,–"वाक्यस्फोटोऽतिनिष्कर्षे" इत्यादिना सिद्धान्तयिष्यमाणत्वेऽपि–प्रतिवाक्यं सङ्केतग्रहासम्भवात्, तदन्वाख्यानस्य लघूपायेनासुकरत्वाच्च, तत्र कल्पनया पदानि विभज्य, तेष्वपि प्रकृतिप्रत्ययभागाँस्तथैव प्रविभज्य, कल्पिताभ्यामन्वयव्यतिरेकाभ्यां तत्तदर्थेष्वपि प्रकृतिप्रत्ययानामनादिसङ्केतबोधनद्वारा साधुत्वान्वाख्यायके महर्षिप्रणीते शास्त्रे–प्रक्रियानिर्वाहाय पदवर्णस्फोटावपि सम्मताविति दर्शयँस्तिङन्तार्थप्रधाने सुप्तिङ्चयादिरूपे वाक्ये—धात्वर्थस्य प्राधान्यात्तमेवादौ निरूपयितुमाह–

❀ काशिका ❀

शेष इति। अनेन वाक्येन कारिकावलीरूपग्रन्थकर्तुरतिशयितसामर्थ्यप्रकाशनद्वारा तत्कृतप्रकृतग्रन्थस्यावश्योपादेयता ध्वनिता। आधुनिकोत्प्रेक्षितनिरासप्रयोजनमाह—अन्यथेति। अन्यथा = कौस्तुभोक्तानामाधुनिकोत्प्रेक्षितत्वनिरासाकरणे। आधुनिकोत्प्रेक्षितेति। आधुनिकैरुत्प्रेक्षितो यः कौस्तुभस्तत्सारत्वापत्तौ = तत्सारत्वनिश्चयापत्तावित्यर्थः। पाणिनीयानां = पाणिनिना प्रोक्तं शास्त्रमधीयानानाम्। मूले,–देवतान्तरं विहाय फणिन एवोपादानं तु व्याकरणशास्त्रप्रणेतृमुनित्रयाभ्यर्हितत्वेनेष्टतमत्वसूचनाय, इतरभाष्यवद्व्याकरणभाष्यं नाधुनिकप्रणीतमपि तु विष्णुरूपिमहामुनिप्रणीतमतस्तदुक्तिष्वप्रमाण्यशङ्का नैव विधेयेत्यस्यार्थस्य लाभाय चेत्याहुः। मूले प्रथमतो धात्वर्थनिरूपणं तु 'सर्वाण्याख्यातजानि' इति शाकटायननिरुक्तात्, 'सर्वं नाम धातुजं निरुक्ते व्याकरणे शकटस्य च तोकम्' इति भाष्याच्च सकलप्रयोगमूलत्वेन धातोरभ्यर्हितत्वेन, प्रायो वाक्यजन्यबोधे धात्वर्थस्य प्राधान्याच्च तरयाभ्यर्हिततमत्वादिति बोध्यम्। 'आख्यातजानी'त्यत्रत्याख्यातशब्दस्तिङन्तसमुदायात्मकाख्यातघटकधातुपरः। 'सर्वं नाम धातुजम्'इति भाष्यात्, नाम्नस्तिङन्तजत्वासंभवाच्च ॥ १ ॥

'स्मृता' इति बहुवचनान्तस्य 'धातु'रित्यन्त्रान्वयो न संभवति, विशेष्यवाचकपदसमानवचनत्वाभावादित्यत आह—स्मृत इति। वचनविपरिणामेति। अस्य 'वाचकत्वेने'ति शेषः।

प्रतिज्ञातमाह—

'फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥ २ ॥

'धातु'रित्यत्र 'स्मृता' इति वचनविपरिणामेनान्वयः ।

ॐ दर्पणः ॐ

मूले-फलव्यापारयोरिति । 'तत्र-धातु'रित्यस्य, 'स्मृता' इति न विशेषणम्, विभिन्नवचनान्तोपस्थापितत्वात्, विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्या-विरुद्धसंख्याया अविवक्षायां विशेषणविशेष्यवाचकपदयोः समानवचनकत्वनियमात्, अत एव 'नीलो घटा' इत्यादेर्न साधुत्वम् । तद्विवक्षायां तु-'वेदाः प्रमाणं,' 'जात्या-कृतिव्यक्तयः पदार्थ' इत्यादौ विभिन्नवचनत्वमपि, न च प्रकृते तद्विवक्षायां बीजमस्तीत्यतो वचनविपरिणामेनान्वयं दर्शयति—भूषणसारे—धातुरित्यत्रेति ।

ननु यदुद्देशेन श्रुतेर्लोकतो वा प्रवृत्तिरवगता तत्त्वं—फलत्वम्, अन्येच्छान-धीनेविषयत्वमिति यावत् । तदुक्तं हरिणा—

"यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः ।
तत्प्रधानं फलं तेषां, न लाभादिप्रयोजनम् ॥" इति ।

ॐ काशिका ॐ

'फलव्यापारयो'रिति द्विवचनान्तनिर्देशेन — फले, व्यापारे च पृथक् शक्तिर्न तु फलविशिष्ट-व्यापारे प्राचीनतार्किकाभिमतैका शक्तिः, तथा सति फलस्य पदार्थैकदेशतया द्वितीयादिपदार्था-न्तरान्वयो न स्यादिति—सूचितम् । फलव्यापारयोः साध्यसाधनभावेनान्वयः, संसर्गस्यापदार्थत्वेऽपि क्षतिविरहात्, सांसर्गिकविषयतातिरिक्तविषयताशालिशाब्दबोधं प्रत्येव वृत्त्या पदजन्यपदार्थोपस्थितेः प्रयोजकत्वात्, तथा च,—जन्यतावच्छेदककोटौ–सांसर्गिकविषयतातिरिक्तविषयतात्वेन विषयताया अनुप्रवेश इति केचित् ।

वस्तुतस्तु—सांसर्गिकविषयतातिरिक्तविषयतात्वेन न तदनुप्रवेशः, तथा निवेशेऽपि वृत्त्या घटपदाद् घटोपस्थितौ सत्यां पटादिविषयकशाब्दबोधापत्तिः, अतस्तद्विशेष्यकतत्प्रकारकशाब्दत्वाव-च्छिन्नं प्रति वृत्त्या तत्तत्पदजन्यतत्तदर्थोपस्थितिर्हेतुरिति विशिष्यैव हेतुहेतुमद्भावो वक्तव्यः, एवं च सांसर्गिकविषयतामन्तर्भाव्य कार्यकारणभावविरहात् शक्त्यानुपस्थितस्यापि संसर्गस्य भानं निष्प्रत्यूहमेव ।

किं च शक्त्या, लक्षणया वोपस्थितस्य तत्तदर्थस्य शाब्दबोधे भानाद् द्विविधोपस्थितेरपि शाब्दबोधप्रयोजकत्वमुपेयं, तत्रानुगतानतिप्रसक्तागुरोः कारणतावच्छेदकधर्मस्यासंभवात् पृथक्

२. फलव्यापारयोरिति द्विवचननिर्देशात्फले, व्यापारे च खण्डशः शक्तिरिति सूचितम्, सा चैकवृन्तगताम्रादिफलद्वयवदवगन्तव्या, तेन क्वचित्फलांशस्य क्वचन च व्यापारांशस्य मोक्षो भवति ।

❀ दर्पणः ❀

"स्वरितञित" सूत्रेऽपि 'फल'पदस्य प्रवृत्त्युद्देश्यमुख्यफले एव प्रसिद्धेः। तथा च तादृशफलस्य धातुवाच्यत्वे विक्लित्त्यनुकूलव्यापारदशायां तण्डुलस्य धात्वर्थतादृशफलाश्रयत्वाभावात् कर्मत्वानुपपत्तिः, तज्जन्यतादृशफलाऽऽश्रयस्य

❀ काशिका ❀

पृथक् हेतुतावश्यं स्वीकार्या, तथा चैकविधोपस्थितिविरहेऽप्यन्यविधोपस्थित्या तत्तदर्थविषयकशाब्दबोधजननाद् व्यभिचार इत्यतः—'शक्तिप्रयोज्यतत्तदर्थोपस्थितिविशिष्टतत्तदर्थविषयकशाब्दत्वं', 'लक्षणाप्रयोज्यतत्तदर्थोपस्थितिविशिष्टतत्तदर्थविषयकशाब्दत्वं' च कार्यतावच्छेदकमभ्युपेयम्, उपस्थितिवैशिष्ट्यं च—स्वसामानाधिकरण्य, स्वाव्यवहितोत्तरत्वाभ्याम्, एवं च संसर्गविषयकशाब्दबोधस्य कार्यतावच्छेदकानाक्रान्ततयाऽशक्यस्यापि तस्य भानं निष्प्रत्यूहमिति परे।

'संबन्धो वाच्य' इति वैयाकरणाः, 'लक्ष्य' भट्टा इति दिक्।

ननु तथापि 'विभिन्नपदोपस्थितयोरेव परस्परान्वयबोध' इति व्युत्पत्तेः कथमेकधातूपस्थितयोर्व्यापार-फलयोः परस्परान्वयबोधः, न च तादृशव्युत्पत्तिरसिद्धा, निष्प्रयोजनत्वादिति वाच्यं, हरिपदादिन्द्राश्वयोरुपस्थितयोराधाराधेयभावावगाहिशाब्दबोधापत्तेर्वारणस्य, वाशब्दादित उपस्थितयोर्विकल्पाद्योरर्थयोः परस्परान्वयबोधापत्तेर्वारणस्य च प्रयोजनत्वादिति चेन्न। परमते लिङाद्यर्थयोः--कृतीष्टसाधनत्वयोराख्यातार्थकृतिवर्त्तमानत्वयोश्च परस्परमन्वयबोधदर्शनेन तादृशव्युत्पत्तेः संकोचनीयतया फलव्यापारयोरपि परस्परमन्वयबोधसंभवात्, नव्यनैयायिकैरपि स्वीकृतत्वाच्च। फलव्यापारयोरेवादावन्तरङ्गत्वादन्वयस्तदन्तरमेवार्थान्तरेणान्वयोऽनुभूयते, अत एव 'गमनं न स्पन्द' इति वाक्यान्न स्पन्दभेदान्वयानुभवः, विशेष्यभूतव्यापारे तद्बोधात्, फलस्य तद्विशेषणत्वापन्नत्वादिति भावः। अभेदेन स्तोकादेरन्वयो भवत्येव, व्युत्पत्तिवैचित्र्यात्, एवं कर्मकारकस्य भेदेनापीति न 'स्तोकं पचती'त्यादेरसंगतिः।

तत्र भवन्तो **मञ्जूषाकारास्तु**—"फलविशिष्टव्यापारे, व्यापारविशिष्टफले च शक्तिः, फले व्यापारे च पृथक्शक्तिस्वीकारे व्यापारोद्देश्यकफलविधेयकबोधस्य, फलोद्देश्यकव्यापारविधेयकबोधस्य चापत्तिः, तादृशबोधप्रयोजिकायाः पृथगुपस्थितेः सत्त्वात्, विशिष्टशक्तिमते तु न तादृशबोधापत्तिः, तत्प्रयोजिकायाः पृथगुपस्थितेरभावात्, न च पृथगुपस्थितेस्तादृशबोधप्रयोजकत्वमसिद्धमिति वाच्यं, घटपटादिजन्यैकोपस्थितिविषययोर्घटत्वपटत्वाद्योस्तथाबोधाननुभवबलेन तथाविधोपस्थितेस्तथात्वकल्पनात्, न च धातुजन्यव्यापाराद्युपस्थितेस्तथाविधबोधप्रतिबन्धकत्वकल्पनान्न तथाविधबोधापत्तिरिति वाच्यं, तादृशप्रतिबध्यप्रतिबन्धकभावकल्पने गौरवात्, कर्तृभावप्रत्ययसमभिव्याहारः फलविशिष्टव्यापारबोधनियामकः, कर्मप्रत्ययसमभिव्याहारो व्यापारविशिष्टफलबोधनियामकः, न च विशिष्टद्वये शक्तिद्वयं कल्पनीयं, शक्तिज्ञानद्वयस्य धातुजन्यविशिष्टविषयोपस्थितिद्वयस्य च शाब्दबोधं प्रति हेतुत्वं कल्पनीयमिति गौरवमिति वाच्यं, प्रामाणिकत्वेन तस्यादोषत्वात्, पृथक्-

'फलं—विक्लित्त्यादि ।

❀ दर्पणः ❀

तदापत्तिश्चेत्यत आह,—फलं विक्लित्त्यादीति ।

अयमाशयः—'फल'पदस्य लोके रूढ्या तादृशाऽर्थोपस्थापकत्वेऽप्यत्र पारिभाषिकार्थपरतैव, अन्यथा सकर्मकत्वादिव्यवहारो दुरुपपादः स्यात् । तत्त्वं च—तद्धात्वर्थजन्यत्वे सति तद्धातुजन्योपस्थितिविषयत्वं, तद्धात्वर्थत्वं वा । जन्यत्वं च जन्यत्वप्रकारकप्रतीतिविषयत्वम्, तेन सत्तादौ नाऽप्रसङ्गः[1] । गम्याद्यर्थव्यापारजन्यविभागादावतिप्रसङ्गवारणाय—विशेष्यं, तदर्थव्यापारेतिप्रसक्तिनिरासाय च—सत्यन्तम्, तच्च—विक्लित्त्यादीनामक्षतम्, तस्यापि प्रकृतपच्यादिशक्यता—तत्तद्रूपेणैव, तथाबोधस्य सर्वानुभवसिद्धत्वात्, यद्वक्ष्यति—वाक्यार्थप्रदर्शनाऽवसरे—'विक्लित्त्यनुकूलो व्यापार'इति, धातुत्वादिकमजानतोऽपि तद्बोधाच्चेति भावः ।

परे तु—कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थजन्यत्वे सति, तद्धात्वर्थनिष्ठविशेष्य-

❀ काशिका ❀

शक्तिवादेऽपि भिन्नपदोपस्थितयोरेवान्वयबोध इति व्युत्पत्तेस्त्यागस्य, व्युत्पत्त्यन्तरस्य च कल्पनीयतया गौरवम् । अपि च कर्तृप्रत्ययसमभिव्याहृतधातुजोपस्थितेः फलप्रकारकव्यापारविशेष्यकबोधं प्रति, कर्मप्रत्ययसमभिव्याहृतधातुजोपस्थितेर्व्यापारप्रकारकफलविशेष्यकबोधं प्रति हेतुतायाः कल्पनीयतया कार्यकारणभावद्वयकल्पनागौरवं,—धातोरर्थद्वये शक्तिद्वयस्य कल्पनीयतया च । न च भवन्मतेऽपि तादृशविशिष्टविषयकोपस्थितिद्वयस्य कारणतायास्तथाविधेऽर्थद्वये शक्तिद्वयस्य च कल्पनीयतया साम्यमिति वाच्यं, बोधजनकत्वस्य विषयासंबद्धेऽनुपपत्त्या तत्तत्प्रत्ययसमभिव्याहृतधातौ विशिष्टद्वयनिरूपितसंबन्धद्वयस्य कल्पनीयतयाऽधिकगौरवस्य जागरूकत्वात्, अन्यथा शक्तेरुच्छेदः, एवमन्यत्रापि पृथक्शक्तिकल्पना निरसनीये'ति प्रोचुः ।

फलव्यापारयोरि'ति—मूलमपि तदुभयसमुदाये शक्तिरित्येतावन्मात्रतात्पर्यकं, न तु पृथक्शक्तितात्पर्यकं, एवं च शाब्दबोधे एकविशिष्टस्यैवापरस्य भानादुक्तविशिष्टद्वयेऽपि शक्तिर्मूललभ्यैवेत्येतदभिप्रायोऽवगन्तव्यः ।

मूलोक्तक्रमानुरोधाद् व्यापारात् प्राक् फलांशं व्याचष्टे—फलं विक्लित्त्यादीति । विक्लित्तिः =

---

१. ननु 'स्वरितञित' इत्यादौ फलमुद्देश्यं, तादृशफलस्यैवात्र फलपदेन ग्रहणं स्यात्तर्हि पाकोद्देश्यीभूतक्षुन्निवृत्तेरनिष्पत्तावपाक्षीदित्यादिप्रयोगानापत्तिरित्यत आह—फलमिति ।

'तदित्थं—'धातुविशिष्टत्वं फलत्वं, वै० 'स्वनिष्ठवृत्तिप्रयोज्योपस्थितिविषयत्व', 'स्वनिष्ठशक्तिप्रयोज्योपस्थितिविषयनिष्ठजनकतानिरूपितजन्यत्वनिष्ठप्रकारतानिरूपकप्रतीतिविशेष्यत्व'एतदुभयसम्बन्धेनेति रीत्या फलत्वं परिष्कुर्वन्त्यस्मद्गुरुचरणाः ।



❀ दर्पणः ❀

तानिरूपितप्रकारतावत्त्वं तत्त्वं। जन्यता चाऽऽरोपिताऽनारोपिता वेत्यन्यदेतत्। विभागजन्यसंयोगादिरूपे पतत्यर्थे विभागसंयोगयोः फलत्ववारणायोभयम्। कर्माख्याते फलस्य विशेष्यतयैव भानात्तत्रातिप्रसङ्गवारणाय—'कर्तृप्रत्ययसमभिव्याहार' इति—वदन्ति। तच्चिन्त्यम्। अनुगतफलत्वानिरुक्तेः। विभागजन्यसंयोगे निरवयवत्वात्प्रत्यक्षत्वात् पतत्यर्थत्वाभावस्य वक्ष्यमाणतया व्यावर्त्याऽप्रसिद्धेश्चेत्यधिकमग्रे वक्ष्यते।

ननु व्यापारत्वं—न फलप्रयोजकक्रियात्वम् आत्माश्रयात्, क्रियात्वस्यैव हि तत्त्वात्, दण्डादिव्यापारस्य धात्वर्थत्वापत्तेश्च, नचेष्टापत्तिः, धात्वर्थव्यापाराऽऽश्रयस्यैव कर्तृताया वक्ष्यमाणतया तदाश्रयस्य दण्डादेः कर्तुराख्यातेनाभिधानाद् 'दण्डेन देवदत्तः पचती'त्यादौ दण्डादिपदोत्तरं तृतीयाऽनापत्तेः, प्रथमापत्तेश्च, कर्तृकरणसंज्ञयोराकडारीयतया संज्ञाद्वयसमावेशाऽसम्भवेनाऽभिमतकरणसंज्ञायाः परया कर्तृसंज्ञया बाधात्। किञ्च—प्रयोजकत्वं यदि साक्षाज्जनकत्वं, तदा 'पचती'त्यादौ कर्तृव्यापारस्य धात्वर्थत्वाऽनापत्तिः, तस्य करणव्यापारद्वारैव फलजनकत्वात्, यदि जनकाजनकसाधारणं,—तदा तण्डुलक्रयणस्यापि फलप्रयोजकक्रियात्वात् तद्दशायामपि देवदत्तादौ 'पचती'ति प्रयोगापत्तिः, तण्डुलाऽऽदिक्रयणाऽऽदिव्यावृत्तस्य तादृशप्रयोजकत्वस्य निर्वक्तुमशक्यत्वाच्च, अत एव न 'तज्जन्यत्वे सति, तज्जन्यजनकत्व'रूपं तन्त्रान्तरप्रसिद्धं तत्। तदवच्छिन्नस्य धातुवाच्यत्वे साक्षाद्विक्लित्तिजनकाऽन्तिमाऽग्निसंयोगदशायामेव 'पचती'ति प्रयोगः स्यात्, न त्वधिश्रयणादिदशायामपि, तेषामन्तिमाऽग्निसंयोगेनाऽन्यथासिद्धतया

❀ काशिका ❀

शिथिलीभावोऽवयवविभागविशेषस्तत्संयोगविशेषो वा, तस्य च विक्लित्तित्वाद्यात्मकविशेषरूपेण वाच्यता, न तु फलत्वेन, विशेषरूपेणैव शाब्दबोधस्यानुभवात्।

विक्लित्त्यादिनिष्ठफलत्वं तु—'तद्धात्वर्थजन्यत्वे सति कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वं', जन्यत्वमारोपितानारोपितसाधारणं, तेन 'वारयती'त्यादौ संयोगानुकूलव्यापाराभावानुकूलव्यापारं प्रति संयोगानुकूलव्यापाराभावादेः फलत्वनिर्वाहः, विभागजन्यसंयोगादिरूपे पतत्याद्यर्थे विभागस्य फलत्ववारणाय सत्यन्तं, जन्यत्वमात्रनिवेशेऽतिप्रसङ्गतादवस्थ्यात्, तद्धात्वर्थस्य जन्यत्वनिरूपकतयोपादानं, विभागस्यापि गम्यादिरूपयत्किञ्चिद्धात्वर्थजन्यत्वात्तदवस्थ एवोक्तदोष इति तत्पदोपादानम्,। न च विभागजन्यसंयोगस्य स्वजन्यक्रियाद्वारा विभागजनकतया तद्दोषतादवस्थ्यमिति वाच्यम्, उपधायकतारूपजनकतानिरूपितजन्यतायाः, क्रियाद्वारिकाया वा जन्यताया—निवेशनीयत्वात्। तत्रैव संयोगे फलत्ववारणाय 'प्रकारतावत्त्वान्तनिवेशः। 'पतति भवती'ति वाक्यजन्यबोधीयभवतिक्रियानिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वात्—'तद्धात्वर्थनिष्ठे'ति विशेष्यताविशे-

व्यापारस्तु—भावनाभिधा[1] साध्यत्वेनाभिधीयमाना—क्रिया ।
उक्तञ्च वाक्यपदीये—
'यावत्—सिद्धमसिद्धं वा—साध्यत्वेनाभिधीयते ।'

❀ दर्पणः ❀

विक्लित्त्यजनकत्वादित्यत आह—व्यापारस्त्विति । 'साध्यत्वेने'ति विशेषणे तृतीया, तथा च–पदान्तरसमभिव्याहाराऽप्रयोज्यसाध्यत्वप्रकारकाऽभिधानविषयत्वं व्यापारत्वमित्यर्थः । अभिधानस्य—प्रकारतावत्त्वं, विषयतानिरूपकत्वं चौपचारिकं, तादृशसाध्यत्वप्रकारकप्रतीतिविषयत्वमिति यावत् । 'घटं करोती'त्यादौ कृञ्समभिव्याहारे घटादीनामपि साध्यत्वेन प्रतीतेरतिप्रसङ्गभङ्गाय 'पदाऽन्तरसमभिव्याहाराऽप्रयोज्ये'ति 'प्रतीति'विशेषणम्, तदसमभिव्याहारे तेषां तत्त्वेनाऽप्रतीतेः । अधिश्रयणाऽऽद्यधःश्रयणपर्यन्तक्रियाकलापस्य पदाऽन्तरसमभिव्याहारमन्तरेणाऽपि साध्यत्वेन प्रतीयमानत्वादुक्तव्यापारत्वमविकलमिति तदवच्छिन्ने पच्यादिधातुवाच्यता नाऽनुपपन्नेति भावः ।

उक्तार्थस्य स्वोत्प्रेक्षितत्वं निरस्यति—उक्तञ्चेति । यावदिति । सर्वमित्यर्थः । 'सर्व'पदार्थमेव विवृणोति—सिद्धमित्यादिना । सिद्धं—विद्यमान-

❀ काशिका ❀

पणं, कर्मप्रत्ययसमभिव्याहारे 'तण्डुलः पच्यते' 'तण्डुलः पक्व' इत्यादौ विक्लित्यादेर्विशेष्यत्वात्तत्र तस्य फलत्वं न स्यादतः—'कर्तृप्रत्ययसमभिव्याहारे'ति । यद्वा,—तदनुपादाने शाब्दत्वावच्छेदेन तादृशप्रकारतावत्त्वं लभ्येत, तथा चासंभवः स्यादतस्तदुपादानं, तथा च तादृशप्रकारतावत्त्वमुपलक्षणं, न विशेषणम्, अतो न कर्मप्रत्ययस्थले विक्लित्यादेरतत्त्वापत्तिरिति भावः । अत्र 'यत्किञ्चित्प्रत्ययसमभिव्याहारे' इत्यपहाय तथोक्तिस्तादृशबोधस्थलप्रदर्शनाय ।

व्यापारं निरूपयति—व्यापारस्त्विति । भावनेति । उत्पत्त्यनुकूलो व्यापार इत्यर्थः, उत्पत्त्यर्थकभवतेर्ण्यन्तात् 'ण्यासश्रन्थ—' इति भावे युच् । अभिधेति । अभिदधाति = जनयति फलमित्यभिधा, साध्यत्वेन धातुनाभिधीयत इति वाभिधा, तत्र प्रथमे 'आतश्चोपसर्गे' इति कर्तरि कः । द्वितीये–तेनैव सूत्रेण कर्मण्यङ्प्रत्ययः, तथा च भावनाभिधापरनामिका साध्यत्वेनाभिधीयमाना क्रिया व्यापार इत्यर्थः । 'भावनाभिधे'त्युक्तिस्तु-व्यापारस्य धात्वर्थत्वेऽपि भावनादिनामकस्यार्थविशेषस्य आख्यातार्थत्वमेवेति भ्रमनिवारणार्था । 'क्रिये'त्युक्तिर्ण्यन्तस्य भवतेः शुद्धेन करोतिना तुल्यार्थत्वप्रदर्शनार्था च । यावत्सिद्धमिति । 'पचति' 'पक्ष्यती'त्यादाव-

१. भावनाऽभिधेति । मीमांसकनये यः भावनापदेनोच्यते, सैवाऽस्माकं व्यापार इति भावः, तदेतेन 'भावनाऽऽख्यातार्थ' इति मतं कटाक्षयन् निरस्यति ।

'आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते ॥' इति ।

न च साध्यत्वेनाभिधाने, मानाभावः—'पचति' 'पाकः' 'करोति' 'कृति' रित्यादौ धात्वर्थावगमाविशेषेऽपि क्रियान्तराकाङ्क्षानाकाङ्क्षयोर्दर्शनस्यैव—मानत्वात् ।

तथा च—क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपं—साध्यत्वम् ।

❀ दर्पणः ❀

ध्वंसप्रतियोगि,—'अपाक्षी'दित्यादौ । **असिद्धं**—भूतभिन्नं वर्त्तमानं, तादृशप्रागभावप्रतियोगि च, 'पचति' 'पक्ष्यती'त्यादौ । **साध्यत्वेन**—वक्ष्यमाणस्वरूपेण, **अभिधीयते**—तत्प्रकारकप्रतीतिविषय इत्यर्थः । क्वचिद् 'विवक्ष्यते इति पाठः । एतेन—'क्रिया'शब्दस्य रूढिः प्रदर्शिता ।

यौगिकत्वमप्याह,—**आश्रितेति** । आश्रितं क्रमरूपं यस्यास्तत्त्वात्, = पूर्वाऽपरीभूताऽवयवकत्वादित्यर्थः । तदीयाऽवयवानामधिश्रयणाद्यधःश्रयणपर्यन्तानां क्रमेणोत्पत्तेः 'क्रिया'पदेन सा-उच्यते । यत्र च न क्रमिकावयवको व्यापारस्तत्र रूढिरेवाऽऽदरणीया, पौर्वापर्यारोपो वा । फलस्याऽपि स्वजनकव्यापारगतपौर्वापर्यारोपेण तथैव भानम्, अत एव तन्मात्रवाचकस्य धातुत्वसिद्धिरिति भावः ।

पाक इति । यद्यपि—साध्यत्वेनोपस्थितिरप्यत्र, कथमन्यथा 'स्तोकं पाक' इत्यादौ स्तोकादीनां कर्मता; तथापि तत्र धातूपस्थाप्यभावस्य गुणतया प्रधानीभूतघञुपस्थाप्यस्य सिद्धतैवेत्याशयः । पर्यवसितार्थमाह—**तथा चेति** । **क्रियान्तरेति** । अयमाशयः—यद्धर्मवत्ताज्ञानात् क्रियान्तराऽऽकाङ्क्षोदयस्तादृशज्ञाने प्रकारतयाऽवच्छेदकं यत्तत्सिद्धत्वम्, तद्भिन्नत्वं,—ज्ञाननिष्ठतादृशाऽऽकाङ्क्षोत्थाप-

❀ काशिका ❀

सिद्धम'अपाक्षी'दित्यादौ सिद्धं वा—'**साध्यत्वेन**' तत्प्रकारेणाभिधीयमानं वस्तु, 'क्रिये'त्यभिधीयते । कुत इत्याकाङ्क्षायां योगस्य हेतुत्वं प्रदर्शयति—**आश्रितेत्यादिना**[1] । क्रियतेऽवयवानां क्रमेणोत्पत्त्यात एवाश्रितक्रमरूपेत्यर्थः । आश्रितं क्रमरूपं ययासौ—आश्रितक्रमरूपेति बहुव्रीहिः, ततस्त्वः, सामान्यविवक्षायां नपुंसकत्वं ।

दर्शनस्यैव मानत्वादिति । यदि साध्यत्वेन प्रतीतिर्नाङ्गीक्रियेत तर्हि कृतिरित्यादितोऽविलक्षणप्रतीत्या तत्रेवात्रापि क्रियान्तराकाङ्क्षापद्येत, तदभ्युपगमे च सिद्धस्यैव क्रियान्तरनिवर्तकत्वस्य दर्शनात्,—साध्यत्वेन प्रतीतौ क्रियान्तरानाकाङ्क्षानिर्वाहः । अनुत्थापकता-

१. आश्रितः—क्रमः—पौर्वापर्यं येन (रूपेण) तत्—आश्रितक्रमं, तद्रूपं यस्याः सा—आश्रितक्रमरूपा, तस्या भावस्तत्वात्—आश्रितक्रमरूपत्वात् । क्रियारूपं हि—तदवयवा अधिश्रयणादयः, ते च क्रमश एवोत्पद्यन्ते । दर्पणादौ तु—क्रमशब्दमर्शआद्यजन्तमाश्रित्य—क्रमं = क्रमवत् च तद्रूपं च—क्रमरूपम्, आश्रितं क्रमरूपं यस्या इति विग्रहः प्रदर्शितः ।

'तद्रूपवत्त्वम्,—असत्त्वभूतत्वम् ।

—एतदेवाऽऽदाय,—

"असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते"—

——इति वाक्यपदीयमिति द्रष्टव्यम् ।

❀ दर्पणः ❀

कत्वाभावावच्छेदकं वा,—साध्यत्वम् । साध्यत्वज्ञानस्य तु नाकाङ्क्षाप्रतिबन्धकत्वं, क्लृप्तकारणाभावादेव तदनुत्पादात् । न च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदक-धर्मरूपसाध्यत्वेन धात्वर्थोपस्थितौ, 'कृष्णं नमेच्चेत् सुखं याया' दित्यादावाकाङ्क्षा-भावेन क्रियान्तराऽन्वयो न स्यादिति वाच्यं, तत्रापि चेत्पदसमवधानेनाकाङ्क्षो-त्थापनात्, 'हिरुगा'दीनां क्रियाप्राधान्यव्यवहारस्तु—तदर्थस्य क्रियामात्रविशेषण-त्वात्, अत एव न हिरुगाद्यर्थे कारकाणामन्वयः, तेषां क्रियान्तरसाकाङ्क्षत्वादिति ।

वस्तुतस्तु सिद्धत्वज्ञाने साध्याकाङ्क्षावत्-पचाद्यर्थे साध्यतयाऽवगते 'किमस्य साधन'मित्याकाङ्क्षोदयेन—साधनाकाङ्क्षोत्थापकतावच्छेदकरूपवत्त्वमेव साध्य-त्वम्, अत एव'एतदेवादाये'त्यग्रिमग्रन्थसङ्गतिः, अन्यथा 'पचति–भवती'त्यादौ पूर्वोक्तरूपाभावेन तदसङ्गतिः स्पष्टैव । उक्तञ्च हरिणा,—

"प्रयोगार्हेषु सिद्धः सन् मन्तव्योऽर्थो विशेषणैः ।
प्राक् च साधनसम्बन्धनात् क्रिया नैवोपजायते ॥" इति ।

"साधनं हि क्रियां निर्वर्तयती"ति, सुट्का'दिति सूत्रस्थभाष्यमप्येतत्कल्पेऽनु-गुणमित्यवधेयम् ।

केचित्तु—'पचती'त्यनुगतव्यवहारादस्ति पचित्वादिकं जातिः, तथाच क्रमिका-नेकव्यक्तिवृत्तिजातिरेव क्रिया, साध्यत्वं च तस्या व्यक्तिद्वारकमेत्र, स्फोटवदस्याः क्रमवद्भिः क्षणैरभिव्यक्तिः,—

"जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्तिनीम् ।
असाध्या व्यक्तिरूपेण सा साध्येवोपलक्ष्यते ॥"—

—इति वाक्यपदीयं चाऽत्र कल्पे मानमित्याहुः ।

साध्यत्वासत्त्वभूतपदयोः पर्यायतामाह,—**तद्रूपवत्त्वमिति** । **एतदेवेति** । निरुक्तरूपासत्त्वभूतत्वमेवेत्यर्थः ।

असत्त्वभूत इति । 'भावप्रधानमाख्यात'मिति निरुक्तार्थप्रतिपादकमेतत् ।

❀ काशिका ❀

वच्छेदकमिति । तदुत्थितिप्रतिबन्धकतावच्छेदकतया सिद्धजातिविशेषरूपमित्यर्थः । तद्रूपमिति । धातूपस्थितक्रियामात्रवृत्तिवैजात्यसिद्धौ लाघवात्तस्यैवासत्त्वरूपत्वं स्वीकर्तुं युक्तं, न तु लिङ्गाद्य-

१ 'तद्रूपवत्त्व' मित्यपि पाठः, अर्थस्तु तुल्य एव ।

अयं च व्यापारः—फूत्कारत्वाऽधःसन्तापनत्व-यत्नत्वादितत्तद्रूपेण वाच्यः,—'पचती'त्यादौ तत्तत्प्रकारकबोधस्याऽनुभवसिद्धत्वात् ।

❀ दर्पणः ❀

'सत्त्वस्वभावमापन्ना व्यक्तिर्नामभिरुच्यते', इति—अस्य पूर्वार्द्धम् । **भावश्चेति ।** चोऽवधारणे, उक्तभाव एवेत्यर्थः । तेन सत्त्वभूतस्य तस्य व्यवच्छेदः । **तिङ्पदैरिति**—बहुवचनस्वारस्येन तिङन्तपदैरित्यर्थः । अभिधीयते = बोध्यते इत्यर्थः । 'अभिधीयत' इत्यस्य 'प्राधान्येनैवे'ति शेषः । तेन कृदन्तपदैरसत्त्वावस्थभावाऽभिधानेऽपि न क्षतिरिति भावः । 'तिङन्तपदै'रिति भावाऽऽख्याताऽभिप्रायेणेति कश्चित् ।

अयं चेति । साध्यत्वेन प्रतीयमानो व्यापारश्चेत्यर्थः । **वाच्य इति ।** पचत्यादिशक्य इत्यर्थः । **अनुभवसिद्धत्वादिति ।** अत एव व्यजनादिना वह्निप्रज्वलनदशायां फूत्कार एव गृहीतशक्तिकस्य न 'पचती'ति प्रयोगः । यागे—'इच्छा ज्ञानं वे'ति विप्रतिपत्तिस्तु स्वीयबोधानुसारादेवेति भावः ।

❀ काशिका ❀

नन्वयित्वादेरिति भावः । परन्तु तद्वैजात्यं लिङ्गाद्यनन्वयित्वसमानाधिकरणं पूर्वापरीभूतावयवत्वसमानाधिकरणमेव । 'एतदेवे'त्यस्योक्त एवाभिप्रायः । **तिङ्पदैरिति** तिङन्तपदैरित्यर्थः । एतत्प्रतिद्वन्द्वितया—क्रियाकाङ्क्षोत्थापकतावच्छेदकजातिविशेषः सिद्धत्वमिति बोध्यम् ।

न चैवं हिरुगाद्यव्ययानां तादृशसाध्यत्वेन रूपेण तत्तदर्थानुपस्थापकतया क्रियाप्रधानत्वव्यवहारो विरुध्येतेति वाच्यं, तदर्थस्य क्रियामात्रविशेषणत्वनिबन्धनत्वात्, अत एव हिरुगाद्यर्थे न कारकाणामन्वयः, कारकान्वययोग्यतावच्छेदकवैजात्येनाभानात् ।

नन्वेवं 'कृष्णं नमेच्चेत्सुखं याया'दित्यत्र नमनसुखप्राप्तिरूपक्रिययोर्हेतुहेतुमद्भावेनान्वयो न स्यादिति चेन्न । चेच्छब्दसमभिव्याहारसाचिव्येन क्रियाकाङ्क्षोत्थानादित्याहुः । वस्तुतः साध्यत्वं निष्पाद्यत्वमेव, तेनैव रूपेण बोधस्यानुभवसिद्धत्वात्, स्पष्टं चेदम् 'उपपदमतिङ्,' 'सुट् कात्पूर्वः', "गतिगतौ"—इत्यत्र च भाष्ये, तत्र 'उपपदमतिङ्' इति सूत्रे—'धातूपपदयोः समासमाशङ्क्य,—'पूर्वं धातुः साधनेन युज्यते' इति पूर्वं तिङि विशिष्टेनैव सामर्थ्यं स्यात्, तत्र 'अतिङ्' इति निषेधान्न तिङन्तेनैकार्थीभाव इति समाहितम् । 'सुट् कात् पूर्वः' 'गतिर्गतौ' इत्यत्र,—धातूपसर्गयोः कार्यं यत्तदन्तरङ्गमित्याद्युक्त्वा 'नैतत् सारं पूर्वं हि धातुः साधनेन युज्यते पश्चादुपसर्गेण, साधनं हि क्रियां निर्वर्तयति, तामुपसर्गो विशिनष्टि' इत्युक्तम् । साधनं = तद्बोधकप्रत्ययः, क्रियां निर्वर्तयति = साध्यत्ववैशिष्ट्येन बोधयत्यतस्तत्प्रयुक्तकार्यं पूर्वमिति वृद्धास्तदर्थमाहुः । 'उपपदमतिङ्' इत्यत्र भाष्येऽप्येतदाशयेनैव पूर्वं साधनसंबन्धाभिधानम्, एतद्भाष्यप्रामाण्येन साध्यत्वमानमङ्गीकृतम् । एतेन शब्दशक्तिस्वभावादेव तिङन्ते क्रियानाकाङ्क्षासिद्धौ न साध्यत्वमानमिति दूषणं प्रत्युक्तमिति बोध्यम् । **अनुभवसिद्धत्वादिति ।** अत एव 'पचती'त्यादितः शाब्दबोधे सति फूत्कारत्वादिरूपेण

न च नानाऽर्थताऽऽपत्तिः, तदादिन्यायेन बुद्धिविशेषादेः शक्यताऽवच्छेदकानामनुगमकस्य सत्त्वात्, आख्यातक्रियैकत्वव्यवस्थाप्यवच्छेदकबुद्धिविशेषैक्यमादायैव। उक्तं च वाक्यपदीये—

❀ दर्पणः ❀

नच नानेति। नानाधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदकैकधर्मवत्त्वं नानार्थत्वं, तच्च पच्यादावक्षतमिति भावः। फलांशमादाय तत्त्वन्तु आशङ्कितुरपीष्टमेवेति बोध्यम्। **बुद्धिविशेषादेरिति।** 'स्वनिरूपितविषयतावच्छेदकत्वसम्बन्धेने'ति शेषः, बुद्धिविशेषविषयतावच्छेदकत्वस्येति यावत्। अयं भावः—तदादिभ्यश्चैत्रादितत्तद्रूपेण बोधः सर्वानुभवसिद्धः, स च चैत्रत्वाद्यनुगमकधर्मं विनाऽनुपपन्न इति बुद्धिविशेषविषयतावच्छेदकत्वं तदनुगमकधर्ममङ्गीकृत्य—तदनुगतीकृततदवच्छिन्नेषु चैत्रादिषु तदादीनां शक्तिः, बुद्धिविशेषविषयतावच्छेदकत्वस्योपलक्षणत्वोपगमाच्च न चैत्रत्वादीनां तेन रूपेण शाब्दबोधे भानापत्तिः, अनुगतनानाधर्माऽवच्छिन्नशक्तिनिरूपकताऽवच्छेदकैकधर्मवत्त्वस्यैव नानार्थत्वं, न तेषां तदपीति तदादिशक्तिनिरूपणे निर्णीतमन्यत्र, तद्वदिहाप्यवसेयमिति।

ननु पूर्वापरीभूतक्षणनश्वरक्रमिकव्यापाराणां मेलनाऽसम्भवात्तदात्मकक्रियाया अनैक्यात्'एका च क्रिये'ति, 'प्रशंसाया'मितिसूत्रस्थभाष्याऽसङ्गतिरत आह—**आख्यातेति**—निर्विभक्तिकः पाठः साधुः। आख्यातप्रतिपाद्यक्रियैकत्वव्यवस्था-

❀ काशिका ❀

न तत्संशयः। **नानार्थतापत्तिरिति।** शक्यतावच्छेदकानां फूत्कारत्वादीनां नानात्वादेकशक्तेर्वक्तुमशक्यत्वात्, अत एव हर्यादिपदस्य नानार्थत्वाभ्युपगमः। **तदादीति।** तदादिपदस्य यथा—बुद्धिविषयत्वरूप—बुद्धिस्थत्वेन बुद्धिविशेषेणोपलक्षणीभूतेन घटत्वादीननुगमय्य तदवच्छिन्ने शक्तिः स्वीक्रियते, घटत्वादिविशेषरूपेणानुभवसिद्धबोधनिर्वाहार्थं, तथा प्रकृतेऽपि संभवान्न नानार्थत्वापत्तिः, शक्यतावच्छेदकनानात्वेऽपि शक्यतावच्छेदकतावच्छेदकस्यैकस्यैव संभवादित्यर्थः। तज्जन्यशाब्दबोधे भानं मा भूदित्येतदर्थं 'तस्योपलक्षणत्वोपगमः। उपलक्षणत्वं च—तत्तत्पदजन्यबोधविषयत्वेन तत्पदशक्तिग्रहाविषयत्वं। **बुद्धिविशेषादेरिति।** फूत्कारादिविषयकबुद्धेरित्यर्थः। बुद्धेः शक्यतावच्छेदकतावच्छेदकत्वं विषयतासंबन्धेन। तस्य वृत्त्यनियामकतयावच्छेदकताघटकत्वानङ्गीकारे त्वाह—**आदेरिति।** आदिना—बुद्धिविशेषविषयत्व-तदवच्छेदकत्वयोः परिग्रहः।

परे तु—हर्यादिवत् पचादीनां नानार्थत्वे इष्टापत्तिः, तदादिशब्दानां तु बुद्धिस्थत्वाद्यात्मकसामान्यरूपेणैव बोधकत्वं, तदुक्तं 'शेषे' इति सूत्रभाष्ये—'इदंविशेषा ह्येतेऽपत्यं, निवासः, समूहः इति वदन्ति। नन्ववयवव्यापाराणां नानात्वादाशुतरविनाशिनां क्रमिकाणां तेषां युगपदवस्थानासंभवेन समूहगतैकत्वाभिप्रायत्वासंभवाच्च'आख्यातैका क्रिया प्रत्याय्यत' इति व्यवस्थानुपपत्तिः,



"गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।
बुद्धया प्रकल्पिताऽभेदः क्रियेति व्यपदिश्यते ॥" इति

❀ दर्पणः ❀

पीत्यर्थः । सविभक्तिकपाठे सप्तमी वैषयिकाधारे अध्याहृतज्ञानक्रियामादाय बोध्या । बुद्धिविशेषैक्यमिति । समूहरूपबुद्धिविशेषात्मकावच्छेदकैक्यमादायेत्यर्थः, तथा चावयवाऽऽश्रयं पौर्वापर्यं, समुदायाश्रयमेकत्वमादाय तत्सङ्गतिरिति भावः । तत्र मानमुपन्यस्यति—उक्तञ्चेति । गुणेति । "क्रमिकैतद्व्यापारसमूहं प्रति गुणभूतैस्तत्तद्रूपेण भासमानैरवयवैरुपलक्षितः सङ्कलनात्मकैकत्वबुद्ध्या प्रकल्पिताऽभेदरूपः समूहः क्रियेति व्यवह्रियत" इति कारिकार्थः । तत्र क्षणनश्वराणां वस्तुभूतसमुदायाऽभावाद्,—'बुद्धये'त्युक्तम् ॥

❀ काशिका ❀

न च तादृशव्यवस्था सिद्धैव, मानाभावादिति वाच्यं, न वा तिङन्तान्येकशेषारम्भं प्रयोजयन्तीति स्वरूपसूत्रस्थभाष्यस्यैव मानत्वादित्याशङ्कां निराचष्टे—आख्याते इति । व्यवस्थापि = क्रियैवैव प्रत्याय्यत इति नियमोऽपि । अवच्छेदकेति । अवच्छेदकः—शक्यतावच्छेदकतावच्छेदको यो बुद्धिविशेषस्तदैक्यमादायैवेत्यर्थः, सा च बुद्धिः—समूहालम्बनरूपा एकैव, तथा च तादृशबुद्धिगतैक्यारोपनिबन्धना तादृशी व्यवस्थेति भावः, अथवा तद्बुद्धिस्थसमूहैक्यमादायैवेत्यर्थः । उक्तार्थे हरिसंमतिमाह—उक्तं चेत्यादिना ।

गुणभूतैरिति । क्रमजन्मनामेषां व्यापाराणां समूहं प्रति गुणीभूतैस्तत्तद्रूपेण भासमानैरवयवैर्युक्तः संकलनात्मिकयैकत्वविषयकबुद्ध्या प्रकल्पिताभेदः = प्रकल्पितो यो भेदः तद्रूपो यः समूहः स क्रियेति व्यवह्रियत इत्यर्थः । अभेदश्चावयवभूतव्यापाराणाम् । अत्रावयवाश्रयं पौर्वापर्यं, समूहगतमेकत्वं च स्पष्टमेव लभ्यते । एकैकावयवेऽपि समूहत्वरूपारोपादधिश्रयणाद्येकावयवदशायामपि 'पचती'त्यादिव्यवहारोपपत्तिः, आरोपे च प्रतीतिरेवावलम्बनम्, अध्यासगृहीतयैव क्रियया धातोराख्यातस्य शक्तिरूपसंबन्धग्रहो बोध्यः, तदतिरिक्तमुख्यार्थसद्भावान्न धात्वर्थस्य गौणत्वमेवं सत्याशङ्क्यं, यस्य हि मुख्योऽर्थोऽतिरिक्तोऽस्ति तस्यैव गौणत्वं—यथा 'सिंहो माणवक'इत्यादौ ।

यद्वा—तादृशानेकव्यक्तिगता पचित्वादिजातिरेव क्रिया, स्वतःसाध्यत्वविरहेऽपि तस्या व्यक्तिद्वारकं तदबाधितमेव, स्फोटवदस्याः क्रमवद्भिरपि क्षणैरभिव्यक्तिस्तत्साधकश्चानुगतव्यवहारः ।

उक्तं च वाक्यपदीये—

'जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्तिनीम् ।
असाध्या व्यक्तिरूपेण सा साध्येवोपलक्ष्यते ॥' इति ।

फलस्यापि स्वहेतुव्यापारवर्तिपौर्वापर्यारोपेण साध्यत्वेनैव भानम्, अत एव 'पच्यते तण्डुलः स्वयमेवे'त्यादौ 'फलमात्रवाचकता पच्यादे'रिति मतेऽपि तस्य धातुसंज्ञानिर्वाहः, कारकाणां

धात्वर्थं निरूप्य तिङर्थमाह—आश्रये त्विति । फलाश्रये, व्यापाराश्रये चेत्यर्थः । फलाश्रयः,—कर्म्म,—व्यापाराश्रयः—कर्त्ता,

तत्र फलव्यापारयोर्धातुलभ्यत्वान्न तिङस्तदंशे शक्तिः, 'अन्यलभ्यत्वात्, 'शक्यताऽवच्छेदकञ्चाश्रयत्वं—तत्तच्छक्तिविशेषरूप'मिति सुबर्थनिर्णये वक्ष्यते ।

❀ दर्पणः ❀

'निरूप्ये'त्यस्य 'सङ्क्षेपेणे'त्यादिः । प्रधानीभूतप्रकृत्यर्थनिरूपणानन्तरं विशेषणप्रत्ययार्थस्याऽवश्यवक्तव्यतयाऽवसरसङ्गत्या तन्निरूपणमित्यभिप्रेत्याह—तिङर्थमिति । अन्यलभ्यत्वादिति । 'अनन्यलभ्यो हि शब्दार्थ'इति न्यायादिति भावः । एतेन "कृतिमतो, व्यापारवतो वा कर्तुः शक्यत्वेऽनेककृतिव्यापाराणां शक्यताऽवच्छेदकत्वकल्पने गौरव"मिति नैयायिकाद्युक्तं दूषणमस्मन्मताऽज्ञानविजृम्भितमिति सूचितम् । नन्वाश्रयस्य तिङर्थत्वे—आश्रयत्वं शक्यतावच्छेदकं वाच्यं, तस्य च स्वरूपाऽभिन्नतया, नानासम्बन्धाऽवच्छिन्नतया च नानात्वादननुगमोऽत आह—शक्यतावच्छेदकञ्चेति । वक्ष्यत इति । अस्य,—'द्वितीं

❀ काशिका ❀

भावनयैवान्वय' इति नियमश्च संगच्छते । अन्यथा द्वितीयाद्यर्थकर्मकारकस्य फलेनैवान्वयात्तदसंगतिः स्पष्टैव । अत्र शक्ततावच्छेदकं पचित्वादिकं तत्तदानुपूर्वीविशेषरूपं, न तु धातुत्वम्, अतिप्रसक्तत्वात्, तदजानतोऽपि बोधाच्च ।

फलाश्रय इति । ननु कारकचक्रप्रवर्तकत्वाद्, व्यापारांशस्य प्राधान्याच्च व्यापाराश्रय इति प्रथमतो वक्तुमुचितं, न तु फलाश्रय इति इति चेन्न । शक्तिग्राहक 'लः कर्मणि' इति सूत्रे, मूले च फलाश्रयस्य कर्मणः प्राङ्निर्देशात्तस्यैवादावभिधानस्य युक्ततरत्वात्, व्यापारस्य सर्वप्राधान्यमिति नियमाभावाच्च, कर्मप्रत्ययसमभिव्याहारे व्यभिचारात् । ननु कर्मकर्त्रोः शक्तिग्राहकसूत्रसत्त्वेऽपि फलाश्रयव्यापाराश्रययोर्न किंचिदाख्यातस्य शक्तिग्राहकं, कर्मकर्तृपदयोर्लोके स्पन्दकृतिमतोरेव प्रसिद्धेरित्याशङ्क्याह—फलाश्रयः कर्मेति । कृत्रिमाकृत्रिमन्यायेनैतयोरेव कर्मादिपदेन ग्रहणं युक्तमिति भावः । 'स्वतन्त्रः कर्ता' इति सूत्रेण धातूपात्तप्रधानीभूतव्यापाराश्रयस्यैव स्वतन्त्रस्य कर्तृसंज्ञाविधानात्, कृतिमत एव तद्विधाने 'घटो भवति' 'काष्ठानि पचन्ती'त्यादौ घटादेः सा न स्यादिति दिक् ।

ननु फलव्यापारयोरप्याख्यातार्थत्वापत्तिः, न चेष्टापत्तिः, 'देवदत्तः पचती'त्यादावाख्यातेन, धातुना च फूत्काराद्युपस्थितौ निराकाङ्क्षत्वेनान्वयानुपपत्तेः, फूत्कारादिविशिष्टस्य फूत्कारादावन्वये आकाङ्क्षाविरहात्, अत एव 'कर्म गच्छती'ति न प्रयोगः, एवं 'पच्यते तण्डुल' इत्यादावपीत्याशङ्कां निरसितुमाह—तत्रेत्यादिना । धातुलभ्यत्वादिति । अनन्यलभ्यस्यैव शब्दशक्यता-

१. 'धातुलभ्यत्वा'दिति'काशिका' सम्मतः पाठः ।

नन्वनयोराख्याताऽर्थत्वे किं मानम् ? प्रतीते,—लक्षणया, आक्षेपात्,

❀ दर्पणः ❀

यार्थनिरूपणाऽवसर' इति शेषः। तथाच तत्राऽखण्डोपाधिरूपस्यानुगतस्य वक्ष्यमाणत्वान्न तन्नानात्वप्रयुक्तो दोष इति भावः।

मीमांसकमतं प्रबलप्रमाणेन निराकरिष्यन् कर्तृकर्मणोरुक्तं तिङर्थत्वं व्यवस्थापयितुं शङ्कते–**नन्विति**। "यद् यद्बोधकं तत्तदर्थक"मिति नियमादाख्यातजन्यकर्तृकर्मप्रतीतिरेव मानमत आह—**प्रतीतेरिति**। 'सम्भवा'दित्यनेनान्वितं। सम्भवहेतुमाह–**लक्षणयेति**। नन्वाख्यातस्याऽऽश्रयलक्षकत्वे भावनाभानाऽनुपपत्तिस्तदुपपत्तये तत्र तस्य शक्तिकल्पने-नाश्रये लक्षणासम्भवो, युगपद्वृत्तिद्वयविरोधात्, भावनाश्रयत्वेन भावनाश्रये लक्षणायान्तु भावनायाः प्राधान्याऽनुपपत्तिरत आह—**आक्षेपादिति**। आक्षेपोऽनुपपत्तिस्तत इत्यर्थः। तथाहि—अन्विताऽभि-

❀ काशिका ❀

दिति भावः। नन्वाश्रये शक्तिस्वीकारे आश्रयत्वं शक्यतावच्छेदकत्वमभ्युपेयम्, आश्रयत्वं चाधारत्वं, तच्च निरूपकादिभेदाद् भिन्नं, तदानन्त्याच्छक्त्यानन्त्यापत्तिरत आह—**तत्तच्छक्तीति**। कर्तृत्वादिशक्तिस्वरूपमित्यर्थः। यद्यपि शक्तेरपि निरूपकभेदान्नानात्वमभ्युपेयमन्यथा'ऽद्य भुक्त्वाऽयं द्व्यहे द्व्यहाद्वा भोक्ते'त्यत्र सप्तमीपञ्चम्योः 'सप्तमीपञ्चम्यौ कारकमध्ये' इत्यत्र कारकपदस्य शक्तिपरत्वेऽप्यनुपपत्तितादवस्थ्यं स्यात्तथाप्याश्रयतात्वादिनानुगतस्य तस्य शक्यतावच्छेदकत्वे दोषानवकाशादिति भावः, अत एव कृतिविशिष्टवाचितृचः 'कृत्यर्थककृधातुसमभिव्याहारे आश्रयपरत्व'मिति **नैयायिका** मन्यते। एवं कृत्प्रत्ययस्थले भावनांशस्याक्षेपलभ्यत्वात् 'आश्रयमात्रमर्थ' इति **मीमांसकाः**।

नन्वाश्रयस्याख्यातवाच्यत्वे मानाभावः, न च 'पचती'त्युक्ते आश्रयप्रतीतिर्जायमानाऽऽख्यातस्य शक्तिकल्पनायां मानं—गवाद्यर्थप्रतीतिरिव गवादिपदे तत्तदर्थशक्तिकल्पनायामिति वाच्यम्, अन्यथानुपपन्नप्रतीतेरेव मानत्वात्, अन्यथा गङ्गादिपदस्य तीरादावपि शक्तिकल्पनापत्तेः, तत्र लक्षणयैवोपपत्तिरिति चेत्, प्रकृतेऽप्यन्यथोपपत्तेर्वक्ष्यमाणत्वात्। न च 'लः कर्मणि'—इत्यादि सूत्रमेव मानं, तत्रत्य'कर्म'पदस्यानुवृत्त'कर्तृ'पदस्य च लाघवेन धर्ममात्रपरत्वात्, तत्सूत्रस्य 'कर्मादिबोधका लकारा' इत्यर्थप्रतिपादकत्वाद्वा, एवं च बोधस्य वक्ष्यमाणरीत्यापि निर्वाहे न तस्य तच्छक्तिग्राहकत्वमित्याशयेन पृच्छति,—**नन्वनयोरित्यादिना**।

प्रतीतेरिति। फलाश्रयव्यापाराश्रयप्रतीतेरित्यर्थः। लक्षणास्वीकारे पदवृत्तिकल्पनागौरवादाह—**आक्षेपादिति**। **आक्षेपो** नामार्थापत्तिर्मीमांसकमते, तार्किकमतेऽनुमानं, येन विना यदनुपपन्नं तेन तत् कल्प्यते, यथा 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्र भोजनं विनानुप-

प्रथमान्तपदाद्वा सम्भवादिति चेत्—
अत्रोच्यते—"लः कर्म्मणि च भावे चाऽकर्म्मकेभ्य" इति सूत्रमेव मानम्,

❀ दर्पणः ❀

नाश्रयप्रतीत्यनुपपत्तिराश्रये आख्यातशक्तिसाधिकेति भावः। मानमिति। यद्यप्याश्रयत्वेनाश्रयभानार्थं तत्राख्यातस्य शक्तिरावश्यकीत्येवोत्तरं वक्तुमुचितं, तथापि 'धातोः फलव्यापारयोः शक्तिराख्यातस्याश्रयत्वे शक्ति'रिति मते आश्रय-

❀ काशिका ❀

धानवादिमते—पदानां विशेषणत्वेनैवाऽर्थोपस्थापकतयाऽऽख्यातार्थभावनाया विशेषणत्वाऽनुपपत्त्या भवति तस्या आश्रयाऽऽक्षेपकत्वम् यद्वा,—अनुमानं सः, तत्प्रयोगश्च,—'आख्यातपदबोध्या भावना, किञ्चिदाश्रिता, विशेषणत्वेन गृहीतशक्तिकत्वात्, घटपदबोध्यघटत्ववदिति। समानसंवित्संवेद्यत्वं तु नाऽऽक्षेपः, 'प्रमेय'-मित्याश्रयभाने भावनाया अभानाद्, भावनापदजन्यभावनाबोधे आश्रयाऽभानाच्चेति।

ननु व्याप्त्यादिप्रतिसन्धानं विनाऽऽप्याश्रयबोधस्यानुभवसिद्धत्वान्नाक्षेपादाश्रयभानोपपत्तिः, क्वाचित्कत्वात् तथा भानस्य, किञ्चोक्तरीत्या तद्भानसमर्थने आख्यातजन्यबोधे भावनायाः प्राधान्याऽनुपपत्तिः, शक्तिग्रहे तस्या विशेषणत्वेनैवोपस्थितत्वाद् घटत्ववत्, तत्तत्त्वस्य विचाराऽसहत्वाच्चेत्यत आह—प्रथमान्तपदाद्वेति। समभिव्याहृतप्रथमाऽन्तचैत्रादिपदादेवाश्रयप्रतीत्युपपत्तेरित्यर्थः, एवञ्च

पन्नेन योगाभ्यासाद्यजन्यपुष्टत्वेन भोजनं कल्प्यते, तच्च दिने बाधे रात्रिभोजनमादाय पर्यवस्यति, तथा प्रकृते भावनायाः कर्तारं विनानुपपत्त्या कर्तृरूपाश्रयं सा कल्पयति, तथा चानुपपत्तिज्ञानमर्थापत्त्यपरनामाक्षेपः, तज्जन्यं ज्ञानमपि तन्नामकं प्रमित्यन्तरम्। तार्किकमते तु 'भावना क्वचिदाश्रिता, गुणत्वात्, सकर्तृका वा कार्यत्वाद्घटत्ववदित्यनुमितिजनकं व्याप्तिज्ञानादिकमाक्षेपः। एवं चाक्षेपेण भावनाज्ञानोत्तरमर्थापत्त्यानुमित्या वा कर्ता विषयीक्रियत इति पर्यवसन्नम्। मीमांसकैराक्षेपलभ्यस्यापि शाब्दबोधविषयत्वाभ्युपगमादाख्यातजन्यशाब्दबोधे भानमविरुद्धम्, एवं फलस्यापि स्वाश्रयं विनानुपपत्त्या तेन साक्षिप्यत इत्यर्थः।

ननु वृत्त्या पदजन्यपदार्थोपस्थितेः शाब्दबोधहेतुत्वेनाक्षेपलभ्यस्य शाब्दबोधविषयत्वं न संभवति, किं चानुपपत्त्यादिज्ञानविधुराणामप्यनुभवसिद्धतद्बोधानुपपत्तिः, आक्षिप्ते तत्राख्यातार्थसंख्यान्वयानुपपत्तिश्च, वृत्त्या पदानुपस्थितत्वात्, तथा चोच्यते—'शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्यते' इति। शाब्दी = शाब्दबोधविषयिणी, आकाङ्क्षा = जिज्ञासा, शब्देनैव प्रपूर्यते = वृत्त्या पदार्थोपस्थितिद्वारा विषयसिद्धिसंपादनेन निवार्यते'इति तदर्थ इत्यत आह—प्रथमान्तेति। उत्तरयति—अत्रोच्यत इत्यादिना।

अत्र हि चकारात्, "कर्त्तरि कृ"दिति सूत्रोक्तं 'कर्त्तरी'त्यनुकृष्यते, बोधकतारूपां तिबादिशक्तिं तत्स्थानित्वेन कल्पिते लकारे प्रकल्प्य, लकाराः कर्मणि कर्त्तरि चानेन विधीयन्ते, नकार-विसर्गादिनिष्ठां कर्म-करणादिबोधकताशक्तिमादाय शसादिविधानवत् ।

ॐ दर्पणः ॐ

त्वेनापि लाभान्न सामान्यत आश्रये स्वाभिमताख्यातशक्तिः सिद्ध्यतीति तन्मतनिरासार्थमपि सूत्रमेव प्रमाणत्वेनोपन्यस्तमिति बोध्यम् ।

ननु कर्तृपदाघटितमिदं सूत्रं कथमाख्यातस्य कर्तृवाचकत्वे मानमित्याशङ्कां निरस्यति—**अत्र हीति ।** नन्वेतत्सूत्रं लकाराणामेव कर्त्रादिशक्तिबोधकं नाख्यातस्येत्यत आह—**बोधकतारूपामिति ।** बोधजनकत्वरूपामित्यर्थः । इदं च—'आदेशिष्वेव शक्तिरादेशानामादेशिस्मृतिद्वारार्थोपस्थापकत्व'मिति मतनिरासायोक्तं, यथा चैतत् तथा वक्ष्यते । **विधीयन्त इति ।** तथाच वर्णस्फोटपक्षे श्रूयमाणवर्णानामेव वाचकताया व्यवस्थापयिष्यमाणतया, 'लः कर्मणी'त्यादिसूत्राणां तिबादिशक्तिग्रहे एव तात्पर्याऽवधारणेन सम्भवति तस्याऽऽख्यातशक्तिसाधकप्रमाणत्वमिति भावः । **नकारविसर्गादीति ।** 'रामान्' 'रामैः' इत्यादावित्यर्थः ।

ॐ काशिका ॐ

नन्विदं सूत्रं कर्मणि शक्तिग्राहकं, न कर्तरि, तत्र कर्तृपदासत्त्वादित्याशङ्क्याह—**अत्र हीति ।** **चकारादिति ।** भाष्येऽनुकर्षणार्थंसर्वचकारप्रत्याख्याने सति कथं तदनुवृत्तिरिति चेत्, स्वरितत्वप्रतिज्ञानादपेक्षावशाच्चान्यस्यान्यत्रेवात्रापि तदनुवृत्तिसंभव इत्यवेहि । भावे लकारस्तदनुवादको न वाचको नापि द्योतको, धातुत एव तस्य स्फुटप्रतीतेः, संख्याकालार्थकश्च सः, तदर्थे संख्याया एकत्वरूपाया क्रियायामन्वयसंभवात्, अत एव भाष्येऽव्ययेभ्य इवैकवचनानुत्पत्तिर्नाशङ्कितेति स्पष्टं मञ्जूषा-शेखरादौ । नन्वनेन सूत्रेण लकारे कर्मादिबोधकतारूपा शक्तिर्गृह्यते, न तु तिबादौ, न च स्थान्यर्थ एवादेशार्थ इति तत्रापि तत्सिद्धिरिति वाच्यं, स्थानिनोऽप्रयोगेण बोधाजनकत्वादित्याशङ्कां निराचिकीर्षुराह—**बोधकतारूपामित्यादिना ।** अतिरिक्तशक्तिपक्षेऽपि तत्समनैयत्यमेव तस्या इति बोध्यम् ।

तिबादिशक्तिमिति । तन्निष्ठां शक्तिमित्यर्थः, व्यवहारदशायां तत्प्रयोगादेवार्थबोधात् । **तत्स्थानित्वेन** = तिबादिस्थानित्वेन । **कल्पिते** = लाघवेन प्रक्रियानिर्वाहार्थं कल्पिते । ननु 'लस्ये'त्यनुक्त्वा 'तिप्तस्झी'त्यादिना स्वतन्त्राणां तिप्तसादीनामेव विधानमस्तु, एवं 'लः कर्मणि—' इति सूत्रे 'तिङ्कर्मणी'त्यस्तु, 'वर्तमाने तिङ्' 'तिङः शतृशानचावप्रथमासमानाधिकरणे' इत्यादिन्यासैस्तिबादीननूद्य तत्तत्कालविधिरस्त्विति चेन्न,—'टित आत्मनेपदानाम्—'इत्यादेरसंगतत्वापत्तेः ।

नच सूत्रे 'कर्तृ-कर्म'पदे कर्तृत्व-कर्मत्वपरे, तथा च, कर्तृत्वं—कृतिः, कर्मत्वञ्च—फलमेवार्थोऽस्त्विति शङ्क्यं, फलव्यापारयोर्धातुलभ्यत्वेन लकारस्य पुनस्तत्र शक्तिकल्पनाऽयोगात् ।

अथ दर्शनान्तरीयरीत्या व्यापारस्य धात्वर्थत्वाभावात्तत्र लकार-

ॐ दर्पणः ॐ

'कर्तृकर्मपदे' इत्यस्या'नुवृत्त्योपात्ते' इत्यादिः । **कर्तृत्वकर्मत्वपरे इति**—आकृतिशक्तिवादमभिप्रेत्य, भावप्रधाननिर्देशाद्वेति भावः । **कर्तृत्वं च कृतिरिति** । कृञो यत्नवाचकत्वेन तत्प्रकृतिककर्त्रर्थकतृजन्तकर्तृशब्दस्य कृत्याश्रयवाचकतया तदुत्तरभावप्रत्ययेन प्रकृत्यर्थप्रकारीभूतधर्मबोधनादिति भावः । **कर्मत्वं च फलमिति** । 'कर्मशब्दस्य धात्वर्थफलाश्रये पारिभाषिकत्वादिति भावः । **शङ्क्यमिति** । तथा च तत्सूत्रबलान्न कर्तृकर्मणोराख्यातशक्तिः सिद्ध्यतीति भावः ।

दर्शनान्तरीयेति । दर्शनं—शास्त्रं, न्यायादिः, अन्यद्दर्शनाऽन्तरं, तत्र भवा-दर्शनान्तरीया,—गहादित्वाच्छः "पचतीत्यस्य पाकं करोतीति विवरणात् फलं पच्याद्यर्थः, तिङ् तु व्यापारवचन" इति मीमांसका मन्यन्ते, तन्मते व्यापारस्यान्यलभ्यत्वाभावात्तत्र लकारविधौ न किञ्चिद् बाधकम्, यद्यप्युक्तरीत्या व्यापारे शक्तिसिद्धावपि फलशक्तिबोधकं 'कर्मणी'त्यनुपपन्नमेव, तथाप्यभिधानाऽनभिधानाव्यवस्थार्थं तदप्यावश्यकमेव, द्वेधा भानं तु कथञ्चित्

ॐ काशिका ॐ

न च 'वर्तमाने तिङ्' 'अनद्यतने तिङ्' इत्यादिन्यासैस्तत्तत्कालार्थकतिवादेस्तत्तदनुबन्धासङ्गः क्रियतां, तथा च 'टित आत्मनेपदानाम्—' इत्यादेर्नासंगतिरिति वाच्यं, 'लिटस्तझयोरेशिरेच्' 'लुटः प्रथमस्य डारौरसः' इत्यादेस्तथाप्यसंगतत्वापत्तेः, तत्र तत्र न्यासान्तरकरणे गौरवापत्तेश्चेत्यास्तां विस्तरः । **प्रकल्प्य** = आरोप्य । 'अर्थवत्येव स्थान्यादेशभाव' इति नियमानुरोधात्तदारोप इति भावः । तत्रानुरूपं दृष्टान्तमाह—**नकारेति** । 'रामान्' 'घटैः' इत्यादौ नकारादित एव तत्तदर्थप्रतीत्या तन्निष्ठैव शक्तिरिति भावः । **कर्तृत्वकर्मत्वपरे इति** । लाघवानुरोधात् । धर्मिपरत्वे गुरुभूतधर्मधर्मिणोरुभयत्र शक्तिः कल्प्या, अनन्तानां कृतीनां, फलानां च शक्यतावच्छेदकत्वमुपेयं, तथा चातिगौरवम् । कृतेः शक्यत्वे तु,—कृतित्वस्य जातिरूपस्य शक्यतावच्छेदकतया लाघवमिति भावः ।

दर्शनान्तरीयरीत्या = भावार्थाधिकरणोक्तमीमांसकरीत्या । **धात्वर्थत्वाभावादिति** । विक्लित्त्यादिफलमेव धात्वर्थो, न व्यापारः, बहूनां धातूनां तत्र शक्तिकल्पनापेक्षया तदपेक्षयाऽल्पानां प्रत्ययानां तत्कल्पने लाघवात्, 'पचतीत्यत्रा'ख्यातस्य भावनार्थककृधातुना विवरणाच्च

विधिः स्यादिति चेत्—तर्हि कृतामपि कर्तृ–कर्म्मादिवाचित्वं न सिध्येत्, 'कर्त्तरि कृ'दिति च, 'लः कर्म्मणी'त्यनेन तुल्ययोगक्षेमम् ।

❀ दर्पणः ❀

परिहरणीयमिति भावः। **कृतामिति**। कृत्संज्ञकानां ण्वुल्तृजादीनामित्यर्थः। नतु, 'कर्त्तरि कृ'दित्येव तत्र शक्तिसाधकमत आह—**कर्तरि कृदिति चेति**। तत्सूत्रादेव च 'कर्तरी'ति–अत्रानुवर्त्तते। तथाच पूर्वसूत्रस्थ'कर्तृ'पदस्य धर्मिपरत्वेऽत्राप्यनुवृत्तयस्य तस्य धर्मिपरत्वमेव, धर्मपरतायां तु तत्रापि धर्मपरतैव स्यात्, तदेवाह—**तुल्ययोगक्षेममिति**। अलब्धलाभो–योगो, लब्धरक्षणं—क्षेमम्। एवञ्च 'लः कर्मणी'त्यस्यानन्यलब्धभावनाया आख्यातार्थत्वप्रतिपादकत्वोपगमे न्यायसाम्यात्, 'कर्तरि कृ'दित्यस्यापि कृतां भावनार्थत्वप्रतिपादकत्व, 'तस्या आक्षेपादेव लाभान्न कृतां तच्छक्तिप्रतिपादकं तदि'ति यदि,—तर्हि 'लः कर्मणी'त्यपि नाख्यातस्य भावनाशक्तिप्रतिपादकमिति—समानमित्यर्थः।

नतु पूर्वसूत्रस्थ 'कर्तृ'पदस्य धर्मिपरत्वेऽप्यनुवृत्तस्य तस्य शब्दाऽधिकाराऽऽश्रयणेन धर्मपरत्वसम्भवान्नोक्तदोषः। यदि च 'शब्दाऽधिकाराऽऽश्रयणं सत्येव गमके, प्रकृते च तदाश्रयणे प्रमाणाऽभाव' इति विभाव्यते, तदाऽपि,–'शक्तिः कारकं', 'शक्तिमत्कारक'मिति पक्षद्वयस्याऽऽप्याकरसिद्धतया तद्विकल्पस्य तिङ्कृतोर्व्यवस्थितत्वाऽऽश्रयणादर्थाऽधिकाराऽऽश्रयणेऽप्यभिमताऽर्थलाभोऽक्षत एवेत्यत

❀ काशिका ❀

तस्यैव भावनार्थकत्वं युक्तं, विव्रियमाणविवरणयोः समानार्थकत्वस्य क्लृप्तत्वादिति भावः। तत्फलस्यापि 'कर्मवत् कर्मणा—'इत्यत्र क्रियाशब्दव्यवहर्तव्यतया दृष्टत्वेन तन्मात्रवाचिनोऽपि धातुसंज्ञासिद्धिः, एवमेव'पच्यते तण्डुलः स्वयमेवे'त्यत्र भवन्मतेऽपि पच्यादेर्धातुत्वमिति भावः।

तत्र = व्यापारे, व्यापारत्वं फूत्कारत्वादिकं वा शक्यतावच्छेदकं ण्वुलादीनाम्, एवं 'फलस्य धातुलभ्यत्वेऽपि तदाश्रयत्वरूपे कर्मत्वे एव लकारविधिः स्या''दिति पूरणीयम्, अत एव 'कर्तृकर्मादिवाचित्वं ने'त्युत्तरग्रन्थे कर्मादिग्रहणं संगच्छते, पूर्वपक्षे कर्मवाचकत्वानङ्गीकारे तदसंगतिः स्पष्टैव। **कृतामपीति**। कर्त्राद्यर्थे विहितानां ण्वुल्तव्यदादीनामपि। **न सिध्येदिति**। उक्तयुक्तिसाम्यादिति भावः। ननु 'कर्तरि कृत्' 'तयोरेव कृत्य—' इत्याद्यनुशासनवलात् कृतां कर्त्रादिवाचित्वसिद्धिः, तत्रत्यकर्त्रादिपदस्य धर्मिपरत्वादित्यत आह—'**कर्तरि कृत्**'**इति चेति**। चेन 'तयोरेव—' इत्यादीनां परिग्रहः। **तुल्ययोगक्षेममिति**। तुल्यो योगक्षेमोऽर्थप्रतिपादकता यस्येत्यर्थः। अयं भावः,—'यदि लाघवमात्रपक्षपातेन 'लः कर्मणि—' इति सूत्रस्थकर्मादिपदस्य धर्मपरत्वाङ्गीकारस्तर्हि तत्रापि तथैव स्वीकार उचितो, वैषम्ये बीजाभावात्।

अपि च मीमांसकानां कृतामिवाऽऽख्यातानामपि कर्तृवाचित्वमस्तु, भावनाया एवाऽऽक्षेपेण कृदादिवत् प्रतीतिसम्भवे—वाच्यत्वं माऽस्तु। तथा सति प्राधान्यं तस्या न स्यादिति चेन्न, 'घटमानये'त्यादावाक्षिप्त-व्यक्तेरपि प्राधान्यवदुपपत्तेः। 'पचती'त्यादौ 'पाकं करोती'ति भावनाया

❀ दर्पणः ❀

आह—**अपि चेति**। तथाच विकल्पव्यवस्थाया एवाऽप्रामाणिकत्वेनैकाऽर्थपरतैव न्याय्येति भावः। नन्वाऽऽख्यातस्य व्यापाराऽवाचकत्वे कथं ततस्तद्बोधोऽत आह,—**भावनाया इति। कृदादिवदिति**। 'तत्र तस्येवे'ति वतिः, कृदादिस्थले इवेत्यर्थः। आदिपदात्—कर्त्तृविहिततद्धितादेः परिग्रहः। तथाच—यथा भवन्मते धातोर्व्यापाराऽवाचकत्वेन कृदर्थकर्त्राऽऽक्षिप्तभावनाया बोधविषयत्वं तथाऽऽख्यातेऽपीति भावः। **तथा सतीति**। भावनाया आख्याताऽवाच्यत्वे सतीत्यर्थः। तस्याः = भावनायाः, प्राधान्यं = मुख्यविशेष्यत्वम्। **घटमा-नयेति**। 'जातिः पदार्थ' इति मते जात्याऽऽक्षिप्तव्यक्तेर्यथा प्राधान्यं तथा कर्त्राक्षिप्तभावनाया अपि प्राधान्यमुपपत्स्यत इत्यर्थः।

शक्तिग्राहकेषु परिगणिताद्विवरणाद्भावनावाचकत्वमाख्यातस्याऽऽयास्यतीत्या-

❀ काशिका ❀

ननु देवदत्तादिनाऽभेदान्वयानुभवबलात् कृतां धर्मिवाचकत्वपुरस्कारः, भावनायास्त्वा-क्षेपाल्लाभः सेत्स्यतीत्याशङ्क्य प्रकृतेऽपि अभेदान्वयानुभवबलादेव तथात्वमुरीकर्तुमुचित-मित्याह—**अपि चेति। मीमांसकानामि**त्यस्य'मते'इति शेषः। **तथा सति** = आक्षेप-लभ्यत्वे सति। **न स्यादिति**। आख्यातावाच्यत्वात्, वाच्यस्यैव प्राधान्यमिति नियमात्। अन्यथा'ग्निमानये'त्यादावाक्षिप्तपात्रादेरपि प्राधान्यापत्तेः, किं च 'मयूरः पर्वतेतरस्मिन्न नृत्यति' 'नृत्यति चे'त्यत्र नृत्यस्याधिकरणं विनानुपपत्त्या कल्प्यमानमधिकरणमितरबाधात् पर्वतरूपम धिकरणं सिध्यतीति **मीमांसकसिद्धान्तः**, तत्र तस्याधिकरणस्य प्राधान्यापत्तेः। अत एव विपरीतं न, तिङ्क्ष्विव कृत्स्वपि भावनायाः प्रत्ययवाच्यत्वादाक्षिप्तकर्त्रपेक्षया प्राधान्यापत्तेः। तथा चाऽनुभवविरोधः, तथा चोक्तं भट्टैः—यदि कर्त्रा धात्वर्थेन वा भावनावगम्येत, ततः पाचकपाठकादिपदे इव तिरोहितस्वरूपावगम्येत, प्राधान्यात्तु शब्दार्थत्वाध्यवसानमिति भावः।

घटमानयेत्यादाविवेति। जातेरानयनकर्मत्वान्वयानुपपत्त्या तदन्वयोपपत्तये जात्याक्षिप्तायाः स्वाश्रयव्यक्तेर्यथा प्राधान्यमनुभवसिद्धं, तद्वदाख्यातवाच्यकर्त्राक्षिप्तभावनाया अनुभवसिद्धप्राधान्य-मुपपादयितुं शक्यमित्यर्थः, उक्तनियमस्य व्यभिचारादिति भावः। न च प्रत्ययवाच्यत्वात् कर्तुरेव प्राधान्यापत्तिः, प्रत्ययार्थाक्षिप्तस्याप्राधान्यनिदम्भात्, अत एवाक्षिप्तमात्रस्याप्राधान्यनियमे

विवरणदर्शनाद्वाच्यत्वमिति चेन्न, पाकाऽनुकूलव्यापारवतः कर्त्तुरपि विवरणविषयत्वाऽविशेषात्।

नच कर्त्तुर्विवरणं तात्पर्याऽर्थविवरणं, 'पाकं करोती'त्यशब्दाऽर्थ-कर्मत्वविवरणवद्, —इतरेतरयोगद्वन्द्वे समुच्चयांऽशविवरणवद्वा, —

❀ दर्पणः ❀

शङ्कते—भावनाया इति। विवरणेति। तत्समानाऽर्थकपदाऽन्तरेण तदर्थकथनस्य विवरणतया, प्रकृते, 'पचती'त्यस्य पाकभावनेत्याख्यातस्य भावनापदेन विवरणात्तस्य भावनावाचकत्वमित्यर्थः। विवरणस्य स्वस्वबोधानुसारितया, न तेनाऽर्थनिर्णय इत्याह—पाकाऽनुकूलेति। 'पचती'त्यस्यैककर्तृका पचिक्रियेति कर्त्तुर्विवरणस्याऽपि दर्शनेनाऽऽख्यातस्य भावनायां शक्तिरुत कर्त्तरीत्यत्र विनिगमकाऽभावादिति भावः। इतरेतरयोगद्वन्द्व इति। समाहारद्वन्द्वे, —उत्तरपदलक्ष्याऽर्थसमाहारस्य 'च' शब्देन विवरणादुक्तम् 'इतरेतरे'ति। 'धवखदिरा'वित्यादिद्वन्द्वघटकपदाऽशक्यसाहित्यस्य विग्रहवाक्यस्थ'च'शब्देन विवरणवदित्यर्थः। इदञ्च—"अन्वयप्रयोजकरूपवत्त्वं योग्यता, एवञ्च, 'घटेन जलमाहरे'त्यत्र जलाऽऽहरणप्रयोजकतया छिद्रेतरत्ववत् प्रकृते द्वित्वाऽन्वयप्रयोजकतयाऽपदार्थसाहित्यस्याऽपि भानम्" इत्यभ्युपेत्योक्तम्। तत्र—"साहित्यस्य द्वित्वाऽऽव्यतिरिक्तस्याऽननुभवात्तस्य द्विवचनादिनैवोपस्थितेर्न तत्र समासघटकप्रत्येकपदवृत्तिः, तस्यैव चैन विवरणा"मिति मताऽन्तरन्तु वक्ष्यते॥

❀ काशिका ❀

आकृत्यधिकरणोच्छेद इति दूषणस्यापि नावसर इति वाच्यं, तादृशनियमे मानाभावात्, 'गोमन्तमानये'त्यत्र मतुवर्थसंबन्धाक्षिप्तधर्मिणः प्राधान्यानुभवेन व्यभिचाराच्च।

विवरणदर्शनात् = पाकं करोतीति भावनार्थककृधातुना विवरणदर्शनात्। वाच्यत्वं = प्रत्ययवाच्यत्वम्। विवरणविषयत्वाविशेषादिति। 'करोती'त्याख्यातेन कर्तुर्विवरणं, ततः कर्तुरपि बोधाद् विव्रियमाणस्यापि तदर्थकत्वमावश्यकमिति भावः। तात्पर्यार्थेति। 'पचती'त्यतः कर्तुर्बोधो जायतामिति यत्तात्पर्यं तद्विषयीभूताक्षेपलभ्यकर्तुर्विवरणं, न शब्दार्थविवरणमित्यर्थः।

ननु शब्दार्थविवरणस्यैव दृष्टत्वेनेदमशब्दार्थविवरणमित्यसङ्गतमित्याशङ्कामनुरूपदृष्टान्तप्रदर्शनेन निराकरोति—पाकं करोतीति। द्वितीयाऽशब्दार्थकर्मत्वादिविवरणादशब्दार्थस्यापि संसर्गस्य विवरणदर्शनेऽपि तदतिरिक्ताशब्दार्थविवरणमदृष्टचरमेवेत्यनुशयानो दृष्टान्तान्तरमाह—इतरेतरद्वन्द्व इति। समुच्चयांशेति। चद्वयेन समुच्चयांशो विव्रियते। तुल्य-

न तदर्थनिर्णायकमिति वाच्यं, भावनायामपि तुल्यत्वात् ।

किञ्च 'पचति देवदत्तः' इत्यत्राऽभेदान्वयदर्शनात्तदनुरोधेन कर्त्तुर्वाच्यत्वमावश्यकं, 'पक्ता देवदत्त' इतिवत्, न चाऽभेदबोधे समानविभक्तिकत्वं नियामकम्;

❀ दर्पणः ❀

तुल्यत्वादिति । भावनापदेनाऽऽख्यातस्य विवरणमप्यपदार्थविवरणमित्यस्यापि वक्तुं शक्यत्वादित्यर्थः । स्वस्वबोधाऽनुसारिविवरणस्य नाऽर्थनिर्णायकत्वमित्यप्युभयोः समानमिति भावः ।

नन्वाख्यातस्य कर्तृवाचित्वे,—तदाक्षिप्तभावनायाः प्राधान्याऽनुपपत्तिः, नचाऽऽकृतिवादे जात्याक्षिप्तव्यक्तिवत् प्राधान्यमुपपादितमेवेति वाच्यं, दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात्, तथाहि—कर्त्रा स्वस्वरूपनिरूपकतया भावनाक्षेप्या, भावनाविरहिणः कर्तृत्वासम्भवात्, ततश्च धर्मिग्राहकमानसिद्धगुणत्वेन प्राधान्याऽसम्भवः, कृतीव, जात्या तु-परिच्छेद्यतयाऽवगतस्य द्रव्यस्य तथैवाऽऽक्षेपाद् भवति तस्य प्राधान्येन भानमिति प्राधान्याऽनुरोधाद्भावनाया वाच्यत्वमावश्यकमित्यतो दूषणाऽन्तरमाह—**किञ्चेति** । **अभेदाऽन्वयदर्शनादिति** । देवदत्ताऽभिन्नैककर्तृको वर्त्तमानो व्यापार इत्याकारकबोधस्याऽऽकरसंमतत्वादित्यर्थः । **तदनुरोधेनेति** । अभेदाऽन्वयाऽनुरोधेनेत्यर्थः । **आवश्यकमिति** । अन्यथाऽनुभूयमानतादृशबोधाऽपलापाऽऽपत्तिरिति भावः ।

नियामकमिति । तद्विभक्त्यन्तनामार्थनिष्ठाऽभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धिं प्रति तद्विभक्त्यन्तपदजन्योपस्थितेर्हेतु-

❀ काशिका ❀

त्वादिति । भावनायाः शब्दार्थत्वविरहेऽप्युक्तरीत्या विवरणोपपत्तौ भावनाया अप्याख्यातार्थत्वं न सिध्येदित्यर्थः ।

ननु लाघवाद्भावनैव प्रत्ययवाच्या, न तु कर्ता, गौरवात्, 'तथा सति कृतामपि तथात्वं स्या'दिति न शङ्कनीयं, 'देवदत्तः पक्ते'त्यादौ देवदत्तादिनाभेदान्वयबोधस्यानुभवसिद्धत्वादित्यत आह,—**किञ्चेति** । **अभेदान्वयदर्शनात्** = अभेदान्वयस्यानुभवसिद्धत्वात् । **समानविभक्तिमत्त्वमिति** । तादृगन्वयप्रतियोग्यनुयोगिवाचकविशेषणविशेष्यपदयोः समानविभक्तिमत्त्वं, तच्च विशेषणवाचकपदे विशेष्यवाचकपदोत्तरविभक्तिसजातीयविभक्तिमत्त्वं, विशेष्यवाचकपदे विशेषणवाचकपदोत्तरविभक्तिसजातीयविभक्तिमत्त्वं वा । साजात्यं च विभक्तिविभाजकतावच्छेदकप्रथमात्वादिना, नातः प्रथमाद्वितीयादीनां सर्वासां विभक्तित्वादिना साजात्यां'न्नीलो घट'मित्यादिवाक्यादभेदान्वयबोधापत्तिः । **नियामकम्** = प्रयोजकम् । नास्तीति ।

तच्च—अत्र नास्तीति वाच्यं, 'सोमेन यजेत' 'स्तोकं पचति' 'राजपुरुष' इत्यादावव्यभेदबोधाऽनापत्तेः,

❀ दर्पणः ❀

त्वस्य, 'नीलो घट'इत्यादौ क्लृप्तत्वादित्यर्थः। **तच्चेति।** अभेदान्वयबोधप्रयोजकसमानविभक्तिकत्वं चेत्यर्थः। अत्र,='देवदत्तः पचती'त्यादौ। तादृशनियमे व्यतिरेकव्यभिचारस्थलानि दर्शयति,—**सोमेने**त्यादिना। नन्वत्र यागे सोमस्य करणत्वेनैवान्वयात् कथमुक्तनियमस्य व्यभिचार इति चेन्न। सोमस्य यागभावनायां करणत्वेनाऽन्वये यागस्याऽपि तत्र करणत्वेनैवाऽन्वयात् 'सोमेन यागेनेष्टं भावये'दित्युभयविधाने वाक्यभेदप्रसङ्गः, सोमस्य यागवत् फलभावनाकरणत्वेन प्राधान्यापत्तिः, यागार्थत्वानुपपत्तिः, प्रत्ययवाच्यफलभावनायाः समानपदोपात्तयागेनैव करणाऽऽकाङ्क्षानिवृत्तेर्विभिन्नपदोपात्तस्य सोमस्य करणत्वेनाऽन्वयानुपपत्तिश्च, सोमेन याग'मित्यन्वयाभ्युपगमे,—यद्यपि सोमस्य न यागार्थत्वानुपपत्तिः, करणत्वेनैवान्वयात्, तथापि—प्रत्ययार्थभावनाकरणत्वेनोपस्थितस्य साध्यत्वेनाऽन्वयानुपपत्तिर्दुष्परिहरैवेति सोमपदस्य मत्वर्थलक्षणया 'सोमवता यागेनेष्टं भावये'दिति विशिष्टार्थविधानाद्वाक्यभेदप्रसङ्गो नेति—मीमांसकसिद्धान्तः, तत्र चोक्तनियमे व्यभिचारो दुर्वार इति भावः। **स्तोकं पचतीति।** अत्रापि धात्वर्थव्यापारजन्यफले विभिन्नविभक्तिकस्तोकपदार्थस्याभेदान्वयादित्यर्थः। ननु समानविभक्तिकत्वं नामाऽर्थयोरेवाऽभेदाऽन्वयबोधे प्रयोजकमत एव व्युत्पत्तौ द्विवचनस्यैवोल्लेखः, नामत्वं च वक्ष्यते,—प्रकृते चाऽनुयोगिप्रतियोगिनोर्नामार्थत्वाभावान्नोक्तदोषोऽत आह,—**राजपुरुष इति।** यद्यपि—'सोमेन यजेते'त्यत्रेव 'देवदत्तः पचती'त्यत्राऽपि समानविभक्तिकत्वस्याऽतन्त्रतयाऽभिमतबोधान्वयानुरोधात् कर्तृ-

❀ काशिका ❀

प्रथमातिङ्विभक्त्योरेकरूपेण साजात्याभावात्, एवंचाभेदान्वयबोधप्रयोजकाभावादभेदान्वयबोधासंभवान्न धर्मिणि शक्तिस्वीकारो युक्त इति भावः।

व्यभिचारात् समानविभक्तिमत्त्वस्य नियामकत्वं न संभवतीत्याह—**सोमेन यजेतेति।** सोमपदस्य सोमवति लक्षणा, सोमवतो यागेनाभेदान्वयः, अभेदान्वयानुरोधादेव चात्र मत्वर्थलक्षणाभ्युपगम इति न्यायप्रकाशादौ विस्तरः।

स्तोकं पचतीति। अत्र स्तोकपदार्थस्य धात्वर्थफलेऽभेदेनान्वयः। **राजपुरुष इति।** अत्र राजस्वत्ववतो लक्षणया राजपदार्थस्य पुरुषेण तथान्वयः। अत्राद्यस्थलद्वये विभक्त्योः सजातीयत्वाभावयुक्तो विशिष्टाभावः, चरमे तु विशेष्याभावप्रयुक्तः स इति विवेकः। अभेदा-

नच लक्षणया कर्तुरुक्तत्वात् सामानाधिकरण्यं, पिङ्गाक्ष्यादियौगिकानामपि द्रव्यवाचित्वाऽनापत्तेः, एवं वैश्वदेवीत्यादितद्धितानामपि । अनेकमन्य-

❀ दर्पणः ❀

वाचित्वं सिद्धमेव, तथापि—व्युत्पत्तेर्नामाऽर्थद्वयविषयकत्वेऽपि व्यभिचारो दुरुद्धर एवेत्याशयेन नामार्थद्वयस्थलमुपात्तम् । नैयायिकमतेन चेतम्,—तैः कर्मधारये, षष्ठीतत्पुरुषे च पूर्वपदशक्यलक्ष्यान्यतरस्योत्तरपदार्थेऽभेदान्वयोपगमात्, स्वमते तु—जहत्स्वार्थवृत्त्यभ्युपगमेन पूर्वोत्तरपदार्थयोरन्वयस्यैवाऽभावेनोक्तव्युत्पत्तेर-प्रसरादिति बोध्यम् । इदमुपलक्षणं—षष्ठ्यर्थबहुव्रीहेरपि । अपरे तु—उक्तव्यु-त्पत्तौ नामांशेऽसमस्तत्वस्यापि विशेषणान्नोक्तस्थले व्यभिचार इत्याहुः, अधिकमग्रे वक्ष्यते ।

सामानाधिकारण्यमिति । पदयोरेकार्थाऽभिधायित्वमित्यर्थः । **यौगि-कानामिति** । योगोऽवयववृत्तिः, तन्मात्रपुरस्कारेण प्रवृत्तानामित्यर्थः । **द्रव्यवाचित्वाऽनापत्तेरिति** । धर्मिशक्तत्वाऽनापत्तेरित्यर्थः । **एवमिति** ॥ लक्षणयैव सामानाधिकरण्योपपादने इत्यर्थः, इत्थमेवेति वाऽर्थः । **वैश्व-देवीत्यादीति** । 'द्रव्यवाचित्वाऽनापत्ते'रित्यनुषज्यते । तथाच बला-बलाऽधिकरणोच्छेदाऽऽपत्तिरिति भावः, तथाहि,—'तप्ते पयसि

❀ काशिका ❀

न्वयबोधानापत्तेरिति । उक्तसमानविभक्तिमत्त्वविरहादिति भावः । तथा चोक्तस्थलेऽभेदान्वय-बोधो निष्प्रत्यूहस्तदुपपत्तये कर्त्रादौ शक्तिरावश्यकीति तात्पर्यार्थः ।

शङ्कते—न चेति । सामानाधिकरण्यमेकधर्मिबोधकत्वं, तथा च लक्षणयैवाभेदान्वयबोधनिर्वाहे तत्र शक्तिस्वीकारो निरर्थक इति भावः । **द्रव्यवाचित्वानापत्तेरिति** । लक्षणयैव द्रव्यबोध-निर्वाहात् । **इत्यादितद्धितानामपि** । इत्यादिसमुदायघटकतद्धितानामपीत्यर्थः । अत्रापि 'द्रव्य-वाचित्वानुपपत्ते'रित्यनुषङ्गेणान्वयः । ननु समस्यमानपदार्थसंबन्धिन्येव बहुव्रीहेरनेकमन्यपदार्थेऽनुशा-सनाद्विग्रहवाक्याद्यदुपसर्जनको वर्तिपदार्थस्थः प्रतीयते स स्वाम्यादिरेवान्यपदार्थः, विग्रहवाक्यवृत्ति-वाक्ययोर्विशेषणविशेष्यभावव्यत्यासरूपमेव वैलक्षण्यमित्यन्यत् । तथा च कुतो यौगिकानां द्रव्यवाचि-त्वानुपपत्तिः । एवं वैश्वदेव्यादिषु तद्धितस्यापीत्याशङ्कमानोऽनुपपत्तिमुपपादयति—**अनेकमिति** । इत्यनुशासनेन इति विग्रहप्रदर्शनात् प्रधानपष्ठ्यर्थे एवानुशासनलाभादिति योजना । **इत्यनु-शासनेन** । एतद्रूपेणानुशासनेन = शास्त्रेण । 'अनुशासनेने'ति करणे ल्युट् । इति विग्रह-प्रदर्शनात् = एतादृशविग्रहप्रदर्शनहेतोः, प्रधानीभूतषष्ठ्यर्थे एवानुशासनस्य = साधुत्वान्वाख्यानस्य लाभादित्यर्थः । अयमनुशासनशब्दो भावल्युडन्तः । विग्रहात् षष्ठ्यन्तार्थे तल्लाभः । षष्ठ्यन्तेन

पदार्थे,' 'साऽस्य देवता', इत्यनुशासनेन, 'पिङ्गे अक्षिणी यस्याः', 'विश्वे देवा देवता अस्या' इति विग्रहदर्शनात् प्रधानषष्ठ्यर्थे एव अनुशासनलाभात्।

❀ दर्पणः ❀

द्ध्यानयति, सा वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिन'मिति श्रूयते, अत्रायं संशयः,—किमनया श्रुत्याऽऽमिक्षावाजिनोभयगुणकमेकं कर्म विधीयते ? अथवा तत्तद्गुणदेवताभिन्नं कर्मद्वयम् ? इति, वाजेनाऽन्नेनाऽऽमिक्षारूपेण—सम्बन्धाद्वाजिनो—विश्वेदेवास्ताननूद्य वाजिनगुणो विधीयते, येनोभयगुणकं वैश्वदेवमेकं कर्मेति पूर्वपक्षे—'वैश्वदेव्यामिक्षे'त्यत्र तद्धितस्य देवतासंवन्ध्यर्थकतया श्रौतः सम्बन्धो, 'वाजिभ्यो वाजिन'मित्यत्र तु वाक्येन सः, सत्यामपि पदान्तरापेक्षायां स्वाभिन्नाऽर्थकपदस्यैवापेक्षणान्न श्रौतत्वबाधः सम्बन्धस्य, यत्र तु भिन्नाऽर्थकपदापेक्षा तत्रैव वाक्यस्य विनियोजकत्वात्। एवञ्च,—'वैश्वदेव्याऽऽमिक्षे'त्येतद्विहितवैश्वदेवयागानुवादेन न वाजिनगुणविधानं श्रौतद्रव्येण निराकाङ्क्षत्वात्, किन्तु कर्मान्तरविधिः; 'वाजिभ्य' इति चापूर्वदेवताविधानमिति राद्धान्तः। यदि च तद्धितस्य देवतासम्बन्ध एव शक्तिस्तदा वाजिनाऽऽमिक्षयोर्वाक्यविनियोज्यत्वस्य सास्यादामिक्षाद्रव्येण देवतासम्बन्धस्य श्रौतत्वमिति सिद्धान्तव्याकोपः। लक्षितामिक्षाद्रव्यमादाय देवतासम्बन्धे श्रौतत्वसवन्धात्तदनुपपत्त्यभावेन तद्धितस्य द्रव्यार्थकत्वकल्पनमत्ययुक्तं स्यादिति। **अनुशासनलाभादिति**। उपलक्षणमिदं,—युक्तेरपि, तथाहि—घटपदाद् घटप्रकारकबोधवद्दण्ड्यादिपदाद्दण्डसम्बन्धवानिति प्रतीतिः सर्वसिद्धा, तत्राऽऽकृत्यधिकरणन्यायेन सम्बन्धमात्रं मतुबादिवाच्यं स्यात्, अत एव,—'देवदत्तस्य गोमत्त्व'मित्यत्र त्वप्रत्ययस्य सम्बन्धबोधकत्वं सङ्गच्छते, घटत्वमित्यादौ प्रकृत्यर्थघटत्वबोधकत्ववत्, प्रकृतिजन्यबोधप्रकारस्य भावप्रत्ययार्थत्वाद् विशेषस्य संसर्गस्य कथं ततो बोध इति तु नाऽऽशङ्कनीयम्, यतस्तस्य स्वाक्षिप्तव्यक्त्यंशे प्रकारतयैव भानात्, एवं षष्ठ्यर्थविहितबहुव्रीहेर'प्येकं हायनमस्या' इति विग्रहे, देवतार्थकतद्धितस्यापि,—'विश्वेदेवा देवता अस्या' इति

❀ काशिका ❀

च प्रकृत्यर्थोपसर्जनको विभक्त्यर्थः संवन्ध एव प्रतीयते, अतस्तत्रैव तस्य साधुत्वं लभ्यते इति समुदिततात्पर्यार्थः। उक्तं चारुणाधिकरणवार्तिके—

'बहुव्रीहिः समासोऽयं मतुबर्थे विधीयते।
अस्यात्रेति च संबन्धे षष्ठ्यर्थांशः प्रवर्तते॥' इति।

तथाच, "अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति" इति वाक्ये

❀ दर्पणः ❀

विग्रहे च प्रत्ययार्थसम्बन्धस्यैव प्राधान्यदर्शनात्, तस्यैव वृत्तिवाच्यत्वनिर्णयः, उक्तञ्च—यस्मिन्नन्यपदार्थे च बहुव्रीहिर्विधीयते।

"तस्याऽपि प्रत्ययार्थत्वात् सम्बन्धस्य प्रधानता"—इति।

नच—'गोमा'नित्यादौ सम्बन्धिप्रतीत्यनुपपत्तिः, उभयाऽऽश्रितेन सम्बन्धेनाऽऽक्षेपात्तदुपपत्तेः, तव कर्तृवत्, सम्बन्धवच्च,

नचाऽसत्त्वभूतसम्बन्धस्यैव विभक्त्यर्थतया तद्विहितमतुबादेस्तादृशसम्बन्धबोधकत्त्वेन तत्र लिङ्गसंख्याऽनन्वयाऽऽपत्त्या सत्त्वभूतसम्बन्ध एवाऽनुशासनसनाऽऽदरेण शक्तिरभ्युपेया, एवञ्च द्रव्यमेवार्थो मत्वर्थीयस्यास्तु, सम्बन्ध आक्षेपलभ्य एव किं न स्यात्, किञ्च,—मतुबादेः सम्बन्धसामान्यार्थकत्वे तस्य सम्बन्धादिपदपर्य्यायताऽऽपत्त्या सम्बन्धविशेषार्थकत्वमेवोररीकरणीयं, तत्त्वं चाऽनुयोगिप्रतियोगिविशेष्यनिरूप्यत्वम्, तथाचैकस्य निरूपकस्य प्रकृत्या लाभेऽप्यनुयोगिरूपनिरूपकभानार्थं तत्र शक्तिकल्पने त्वतीव गौरवमिति वाच्यम्। मतुबादेर्ह्यसत्त्वभूतसम्बन्ध एव वाच्यः, अत एव सम्बन्धानामनेकत्वेऽलिङ्गकत्वेऽपि च दण्ड्यादिशब्दानामेकवचनान्तत्वं, नानालिङ्गकत्वं च, सम्बन्धिनां तथात्व एव तादृशप्रयोगदर्शनात्। तथाच,—मतुबर्थसम्बन्धे लिङ्गाद्यन्वयासम्भवात्तैरेवाऽऽक्षेपः सम्बन्धिनः, आख्यातार्थसंख्ययेव कर्त्रादेः।

वस्तुतस्तु—लिङ्गसंख्याऽनन्वयित्वरूपासत्त्वभूतत्वमपि षष्ठ्यर्थादावर्थसिद्धम्, —प्रत्ययार्थलिङ्गसंख्यादेः प्रत्यार्थ एवाऽन्वयायोगात्, 'प्रत्ययाना'मिति व्युत्पत्तेश्च, तस्मान्नासत्त्वभूतसम्बन्धः षष्ठीवाच्यः। यत्तु अनुयोगिरूपनिरूपकभानार्थं द्रव्ये शक्तिकल्पने गौरवमिति, तदपि न,। सम्बन्धप्रत्यक्षे हि यावदाश्रयभानापेक्षा, न शाब्दे, येन तच्छक्तिकल्पनागौरवं सम्भाव्येत, तस्मात् तत्र मतुबादेः शक्तौ न किञ्चिद् बाधकमिति, प्रपञ्चितं चैतदधिकमन्यत्र। एवञ्चैकहायन्यादिपदानां सम्बन्धवाचकतायामनुशासनस्य, तदुपष्टब्धानेकयुक्तीनां च सत्त्वात् तत्रैव शक्तिः सिद्ध्येन्न सम्बन्धिनीत्यखण्डार्थः।

तथाचेति। सामानाधिकरण्यस्य लक्षणयैवोपपादन इत्यर्थः।

❀ काशिका ❀

एवं वैश्वदेवादिशब्देऽपि बोध्यं, न चेष्टापत्तिरित्याह—तथा चेति। द्रव्यानुक्तेरिति। आकृत्यधिकरणन्यायेनारुणादिपदस्यारुण्यादिगुणे एव शक्तिकल्पनात्, पिङ्गाक्ष्यादिपदस्योक्तरीत्या संबन्धे एव शक्तिकल्पनाच्चेति भावः। स्ववाक्येति। स्वं = क्रयणभावना, तत्प्रतिपादकवाक्यघटक-

द्रव्याऽनुक्तेरारुण्यस्य स्ववाक्योपात्तद्रव्य एवाऽन्वयप्रतिपादकाऽरुणाधि-करणोच्छेदाऽऽपत्तिः, द्रव्यवाचकत्वसाधकमूलयुक्तेः सामानाधिकरण्य-

ॐ दर्पणः ॐ

अरुणाधिकरणेति। तथाहि,—अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति'

ॐ काशिका ॐ

पिङ्गाक्ष्यादिपदोपात्तेत्यर्थः। अत्रारुण्यस्यामूर्तत्वात् क्रयणभावनां प्रति करणत्वासंभवात् तामुद्दिश्य तद्विधानासंभवाद् गुणवाचकस्याप्यस्य लक्षणया द्रव्यबोधकत्वसंभवेन क्रयात्पृथग्भूतः प्राकरणिकद्रव्याण्युद्दिश्य तत्परिच्छेदकत्वेनारुण्यरूपो गुणो विधीयते,—'येन द्रव्येण किंचित् क्रियते तदरुणगुणकेने'ति।

ननु लक्षितद्रव्यस्य क्रये एव करणत्वसंभवात् किमिति वाक्यभेदमुरीकरोषीति चेन्न, एकहायन्यवरुद्धक्रये लक्षितद्रव्यान्तरविध्यसंभवात्, एकहायन्यास्तद्गुणविशिष्टाया-विधानं सुकरमिति चेन्न, स्वशब्देन विधानेन पुनर्विधानाऽसम्भवात्, न चैकहायनीमेवानूद्य गुणविधिरस्तु, नैवं सति वाक्यभेद इति वाच्यम्। तथा सति तस्याः क्रयणं प्रति गुणीभावः स्वार्थत्वं च स्यात्, तच्चैकोच्चारणेन न संभवति, गुणीभूतत्वप्रधानत्वयोर्विरोधात्, तस्मादावृत्तिप्रसङ्गः, अतो वाक्यभेदं परिकल्प्य प्राकरणिकद्रव्यमात्रे आरुण्यनिवेश इति पूर्वपक्षयित्वा,—तृतीयया गुणस्यैव करणत्वं क्रयं प्रति विस्पष्टं गम्यते, तच्च द्रव्यद्वारेण युज्यत इति **सिद्धान्त** उक्तः। यद्यपि गुणस्यामूर्तत्वात् क्रयं प्रति साधनत्वं न संभवति, तथापि द्रव्यपरिच्छेदद्वारा संभवत्येव, तथा चायमर्थो भवति—'अरुणपरिच्छिन्नेन द्रव्येण क्रयं कुर्या'दिति। एवं श्रौतस्यैव गुणस्यैकवाक्यत्वे संभवति—लक्षणा, वाक्यभेदश्च न युज्येते, क्रियार्थत्वे च तदीयद्रव्ये एव निवेश इत्यभिहितं **पार्थसारथिमिश्रै**रित्यलं विस्तरेण।

एवं वैश्वदेव्यादिपदघटकतद्धितस्योक्तरीत्या द्रव्यवाचकत्वाभावे,—

'आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः।
आमिक्षापदसांनिध्यात् स्वस्यैव विषयार्पणम्॥'—

—इति **भाट्टसिद्धान्तविरोध**स्तन्मूलकगुणाधिकरणोच्छेदश्च द्रष्टव्यः। तथाहि 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्' इति चातुर्मास्यान्तर्गतवैश्वदेवपर्वणि श्रूयते, तत्र 'वाजिभ्यो वाजिन'मिति वाक्येन प्रक्रान्तवैश्वदेवयागे—'वाज आमिक्षारूपमन्नं येषामस्ती'ति व्युत्पत्त्या वाजिपदलब्धविश्वेदेवानुद्दिश्य वाजिनरूपो गुणो विधीयते इति **पूर्वपक्ष**मुक्त्वोत्पत्तिशिष्टश्रौतामिक्षारूपद्रव्यावरुद्धत्वेन निराकाङ्क्षतया प्रकृतयागे वाजिनस्य निवेशासंभवेन तद्गुणकमपूर्वदेवताकं कर्मान्तरं विधीयते, प्रकृतयागे वाजिनसंबन्धो भवनवाक्येन स्यात्, ततः पूर्वमेव तद्धितश्रुत्या प्रबलयामिक्षासंबन्धसंपादनं कृतमिति नैराकाङ्क्ष्यम्, आमिक्षेतिपदांतरापेक्षासत्त्वेऽपि स्वभिन्नार्थकपदान्तरापेक्षणात् श्रौतत्वमेव विनियोगस्य, यत्र भिन्नार्थकपदान्तरापेक्षा तत्र वाक्यप्रमाणकत्वम्, तथा चोक्तगुणकर्मान्तरविधानमिति **सिद्धान्त** उक्तः, उक्तरीत्या तदसंगतिः स्पष्टैवेति। **मूलोक्तयुक्तेः**

❀ काशिका ❀

सामानाधिकरण्यस्येति । द्रव्यवाचकत्वसाधिका मूलयुक्तिः, = असाधारणयुक्तिः, सामानाधिकरण्यं = 'पिङ्गाक्षी गौः' वैश्वदेव्यामिक्षेत्यत्रानुभवसिद्धं सामानाधिकरण्यं, तस्योक्तरीत्या = आक्षेपादिनोपपत्तेरित्यर्थः । एवं च यौगिकानां गोमत्पिङ्गाक्ष्यादिपदानां, तद्घटकस्य प्रत्ययस्य च न किंचिद् द्रव्यवाचकत्वसाधकं, तत्प्रतीतेराक्षेपादिनोपपत्तेरिति तेषां तद्वाचित्वं न स्यादिति भावः ।

नन्वेवं गोमत्त्वमित्यतः संसर्गप्रत्ययो न स्यात्, पदार्थतावच्छेदकस्यैव त्वाद्यर्थत्वादिति चेन्न, गोत्वादिपदेभ्यः शक्यजातिभानवत्तद्भानोपपत्तेः, ननु प्रकृतिजन्यबोधे आक्षिप्तव्यक्त्यंशे प्रकारतया तद्भानोपपत्तिरिति चेन्न, प्रकृतेऽपि साम्यात् । यत्तु मीमांसावार्तिककारैर्मतुवादेर्द्रव्यवाचकतासाधकयुक्तिरुपन्यस्ता,—"मतुबादेर्न संबन्धसामान्यं वाच्यं, गोमद्दण्ड्यादिपदानां पर्यायतापत्तेः, न संबन्धविशेषः, तत्र संबन्धिरूप एव हि विशेषोऽतःसोऽवश्यं वाच्योऽनभिहितस्य व्यावर्तकत्वासंभवात्, प्रातिपदिकेनैकसंबन्ध्यभिधानेऽपि संबन्धस्योभयनिरूप्यत्वेन द्वितीयाभिधानावश्यकत्वे उभयवाचकत्वे प्रत्युत गौरवं स्यात्, अतो लाघवाद् द्रव्यमेव मतुबादिवाच्यं, तेनाक्षेपाल्लाभे न संबन्धे शक्तिः । उक्तं च——

'सर्वत्र यौगिकैः शब्दैर्द्रव्यमेवाभिधीयते ।
न हि संबन्धवाच्यत्वं संभवत्यतिगौरवात् ॥'

किं च—

'संबन्धिनैव संबन्धः प्रत्येतुं यदि शक्यते ।
पुनरतस्याभिधाशक्तिं कः श्रुतेः परिकल्पयेत् ॥' इति

भावप्रत्ययेनैव संबन्धाभिधानं न स्यादिति चेन्न ।

'यदा स्वसमवेतोऽत्र वाच्यो नास्ति गुणोऽपरः ।
तदा गत्यन्तराभावात् संबन्धो वाच्य आश्रितः ॥'

—इत्यनेन तदभिधाने युक्तेरुक्तत्वात् । मतुबर्थविशेषणीभूतानां गवां पुरुषासमवेतत्वात् समवेतगुणाभिधायिना त्वप्रत्ययेन ग्रहणासंभवेनागत्यार्थाक्षिप्तः संबन्धस्तदर्थ इत्याश्रीयते इति तदर्थः । यदप्येकं हायनमस्या इति विग्रहदर्शनात् षष्ठ्यर्थसंबन्धार्थकता तादृशसमासस्य स्यादिति दूषणं, तदपि न । अनुभूयमानमतुबर्थानुसारेण चित्राणां गवामयमित्यादिवाक्यस्यैव विग्रहत्वस्वीकारात् । तदुक्तम्—

'अभिधेयो बहुव्रीहेर्यद्यप्यस्येति कथ्यते ।
तथापि प्रथमान्तेन तुल्योऽसौ संप्रतीयते ॥' इति ।

अत्राहुर्बृहद्दूषणकृतः—मतुबादीनां द्रव्यसामान्यवाचित्वे पर्यायतापत्तेः तुल्यतया विशेषत एव तद्बोधकत्वाङ्गीकार आवश्यकः । तत्र विशेषः संसर्गो गवादिप्रातिपदिकार्थो वा, आद्येऽप्रतीतस्यानभिहितस्य विशेषकत्वासंभवाद्वाच्यत्वं तस्याङ्गीकार्यमेवं च गौरवं स्पष्टमेव ।

-स्योक्तरीत्योपपत्तेरिति प्रपञ्चितं विस्तरेण वैयाकरणभूषणे ।

❀ दर्पणः ❀

इति श्रूयते, तत्र किमरुणिमा वाक्यं भङ्क्त्वा प्रकारे निवेशनीयः ? किं वा क्रीणातिना सम्बध्यते ? इति संशये, क्रीणातिना सम्बध्यमानस्तद्योगात् क्रयणकरणं स्याद्, न चाऽमूर्त्तस्य तद्युक्तमिति नास्य क्रयणसम्बन्ध इति पृथगेव प्रकरणे निवेशनीय इति पूर्वपक्षः । सिद्धान्तस्तु—'सम्भवति सन्निहितपदार्थान्वये प्रकरणनिवेशानौचित्यात्,–'पिङ्गाक्ष्या'दिपदानां द्रव्यवचनतया तस्मिन्नन्वयसौलभ्येन तद्द्वारा क्रीणात्यर्थेनाऽपि समन्वयलाभाद्वाक्यघटकत्वमेव तस्ये'ति । स चाऽनुपपन्नः,–'पिङ्गाक्ष्या'दियौगिकानां पदानामुक्तयुक्त्या सम्बन्धार्थकतया द्रव्यस्य तैरनुपादानात्,–किञ्च पूर्वपक्षोऽप्यनुपपन्नः,–पिङ्गाक्ष्यैकहायनीशब्दार्थसम्बन्धस्याप्यमूर्त्तत्वात् क्रीणातिकरणत्वाऽसम्भवेन क्रीणातिकरणत्वस्यैतद्वाक्यादलाभादारुण्यस्यैव वाक्यभेदशङ्कायां मूलशैथिल्याच्च । बहुव्रीह्योररुणपदस्य च लाक्षणिकद्रव्यविधायकताया अविशिष्टत्वेन,–बहुव्रीह्यादेरेव द्रव्यविधायकत्वं, नारुणपदस्येत्यत्र विनिगमकाभावात्, अधिकमग्रे वक्ष्यते । **उक्तरीत्येति ।** सम्बन्धिलक्षणाकल्पनेनेत्यर्थः । **प्रपञ्चितमिति ।** प्रपञ्चस्तूक्तप्रायः । **भूषणे इति ।** प्रकृतस्थले, समासशक्तिनिरूपणाऽवसरे चेत्यर्थः ।

❀ काशिका ❀

अन्ये संसर्गवाचितामतेऽपि प्रातिपदिकार्थस्य गवादेर्व्यावर्तकतया विशेषणत्वसंभवे तत्पक्षोपेक्षा नोचिता । संबन्धप्रत्यक्षे एव यावत्संबन्धिप्रत्यक्षं कारणमन्यथा घटाकाशसंयोगप्रत्यक्षापत्तेः । एवं चोभयनिरूप्यः संबन्ध इति द्वितीयसंबन्धिज्ञानं विना तद्बोधानिर्वाहात्तद्वाचकतावश्यकीति दूषणं निरस्तम् । तथा च गोमत्पदाद्गोविशिष्ट इतिवद् गोसंबन्ध इति बोधो निष्प्रत्यूह एव शब्दशक्तिस्वभावादेव,–भावनापदोपात्तभावनाया आश्रयानाक्षेपकत्वमाख्यातोपात्तायास्तस्यास्तदाक्षेपकत्वमितिवत्—संबन्धपदोपात्तसंबन्धस्याश्रयानाक्षेपकत्वेऽपि मतुबाद्युपात्तस्य तस्य तदाक्षेपकत्वं संभवति । 'यद्वा स्वसमवेत' इत्याद्यपि न, त्वादेः स्वसमवेतगुणवाचकत्वनियमासिद्धेर्जातेः पदार्थत्वमते प्रकृत्यर्थवाचकत्वस्वीकारेण मतुबादेः संबन्धावाचकत्वे गोमत्त्वमित्यतस्तत्प्रत्ययानापत्तेः, प्रकृत्यर्थसमवेतवाचकत्वेऽतिगौरवापत्तेः । घटत्वत्वमित्यतो घटत्वत्वस्यैव बोधापत्तेश्च । घटादिपदेन घटत्वाभिधानेऽपि प्राधान्येन बोधार्थं त्वादिशक्तेरावश्यकतेति न वैयर्थ्यशङ्केति बोध्यम् । तस्मात् संबन्धवाच्यत्वे दोषाभावादनुशासनलभ्यत्वाच्च तस्यैव वाच्यत्वं स्यान्न तु द्रव्यस्य । सामानाधिकरण्यानुरोधेन द्रव्यं मतुबादिवाच्यमिति चेत्—प्रकृतेऽपि तुल्यमित्यादि विस्तरेण बृहद्भूषणे निरूपितमित्याशयेनाह—**विस्तरेणेति ।** ननु 'लः कर्मणि–', तिप्तस्झि–', द्व्येकयोर्द्विवचनैकवचने', 'बहुषु बहुवचनम्' इत्येषां सूत्राणामेकवाक्यतया कर्त्रादिगतैकत्वादौ लकारस्य स्थाने एकवचना-

तिङ इति । बोधकतारूपा शक्तिस्तिङ्क्ष्वेवेत्यभिप्रेत्येदम् ।

पदार्थं निरूप्य वाक्यार्थं निरूपयति—फले इत्यादि । विक्लित्त्यादि फलं प्रति । तिङर्थः = कर्तृकर्मसंख्याकालाः, तत्र कर्तृकर्मणी फलव्यापार-

❀ दर्पणः ❀

पदार्थं निरूप्येत्यनेन पदार्थनिरूपणानन्तरं वाक्यार्थनिरूपणे तयोः सङ्गतिः सूच्यते । तत्फलं तु पूर्वापरग्रन्थैकवाक्यप्रतिपत्तिरेकप्रयोजनवती ज्ञानफलिका ।

❀ काशिका ❀

दिसंज्ञकास्तिवादयो भवन्तीति वाक्यार्थपर्यवसानादेकत्वादिसंख्याया एव वाच्यत्वमनुशासनाल्लभ्यते, न कर्तृकर्मणोः, शबरस्वामिभिः पुरस्कृतोऽयमर्थ इति चेन्न, एकवचनादिसंज्ञाया आदेशनिष्ठतया तिवादिविधिनैव 'द्व्येकयो–' इत्यादेरेकवाक्यता, न तु 'लः कर्मणि–' इत्यनेनापि, तत्र च न कर्तरीत्यादिकमस्ति । अत उक्तार्थकत्वासंभवाल्लविधितिवादिविध्योस्तु न पदैकवाक्यतापि तु वाक्यैकवाक्यता, लविधिलभ्यलकारानुवादेनादेशविधेः प्रवृत्तेः, स चैकवचनादिसंज्ञाविनिर्मुक्त एव, तस्मात्–'लः कर्मणि–' इत्यनेनादौ वाक्यार्थबोधने कृते सत्येवान्येनैकवाक्यता तेन च कर्त्रादिकमर्थमुपादाय तत्र लकारस्य विधानात्तस्य वाच्यत्वं दुष्परिहरमेव । ननु 'वर्तमाने लट्' इत्यादिना विहितलकारमुद्दिश्योक्तरीत्या पदैकवाक्यतासंभव इति चेदेवमपि सुप्स्विव तिङ्क्ष्वपि कर्त्रादीनां प्रत्ययार्थत्वं संख्यायायास्तद्विशेषणत्वं च दुर्वारम् । अपि च कर्मांशेऽप्येवमेवापत्तौ कर्मणोऽप्यवाच्यत्वापत्त्या 'पच्यते तण्डुल' इत्यादौ भावनायाः कर्मव्यभिचारितयाक्षेपासंभवेन कर्मणो बोधानापत्तिः । आख्यातार्थसंख्ययाश्रयाक्षेपसंभवेऽपि कर्मत्वशक्तिमत्त्वेन बोधानुपपत्तिर्दृढैव । ननु कर्तुर्वाच्यत्वे नानृतं वदेदिति निषेधस्य प्रकरणापेक्षया श्रुतेर्बलवत्त्वात् पुरुषार्थत्वमेव स्यान्न क्रत्वर्थत्वं तथा च क्रतौ तादृशापभाषणे कृतेऽपि क्रतुभ्रंशप्रायश्चित्तानापत्तिः, न चेष्टापत्तिः, याज्ञिकसमाचारविरोधात् । 'परावरज्ञा केचिदृषयो यद्वा नरतद्वा न इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते, याज्ञे कर्मणि पुनर्नापभाषन्ते, यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः' इति पस्पशाह्निकस्थभाष्यस्वरसविरोधाच्चेति चेन्न । प्रकरणसचिवश्रुत्या क्रतुयुक्तपुरुषार्थत्वसंभवेनादोषात्, प्रमाणयोर्विरोधे एव बलाबलचिन्ताप्रवृत्तेः, प्रकृते विरोधाभावादन्यथा 'जञ्जभ्यमानोऽनुब्रूयान्मयि दक्षक्रतू' इत्यत्र क्रतावपि जञ्जभ्यमानपुरुषसत्त्वादविरुद्धाभ्यां वाक्यप्रकरणाभ्यां पुरुषसंस्कारमुखेन क्रत्वर्थत्वसिद्धान्तस्त्वदीयो भज्येतेति मञ्जूषादौ विस्तर इत्यलं पल्लवितेन ।

ननु 'लः कर्मणि–' इत्यनुशासनेन लकाराणां शक्तिबोधनात् 'आश्रये तु तिङः' इत्ययुक्तमित्याशङ्क्याह—बोधकतेति । तत्र = कर्त्राद्यर्थानां मध्ये । कर्तृकर्मणी व्यापारफलयोरिति । कर्ता व्यापारे, कर्म फले विशेषणमित्यर्थः । कर्मप्रत्यये कर्मणी त्यत्र विशेषणमित्यनुषज्यते । ननु धात्वर्थस्य प्रकृत्युपस्थापिततया तस्यापि प्रत्यासन्नतया तत्र कुतो न विशेषणं, किं च प्रत्ययार्थस्य प्रकृत्यर्थ एवान्वयस्य न्याय्यत्वात् , सुबर्थसंख्यायाः प्रकृत्यर्थ एवान्वयस्य दृष्टत्वाच्च, तत्रैव तदन्वय उचित

योर्विशेषणे। संख्या—कर्तृप्रत्यये कर्तरि, कर्मप्रत्यये कर्मणि। समानप्रत्य-

❀ दर्पणः ❀

केचित्तु उन्मत्तप्रलपितेत्याशङ्कानिदानासङ्गतत्वज्ञाननिरासः प्रयोजनमित्याहुः। सा चाऽनन्तर्य्याऽभिधानप्रयोजकजिज्ञासाजनकतावच्छेदकधर्मरूपा षड्विधा। तदुक्तम्—

सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा।
निर्वाहकैककार्यत्वे षोढा सङ्गतिरिष्यते ॥ इति।

तत्र प्रकृतसिद्ध्यनुकूलचिन्ताकालावच्छिन्नप्रकृतानुकूलत्वमुपोद्घातः, अनुकूलत्वं चात्र घटकत्वज्ञापकत्वादिरूपं यथायथं ग्राह्यं। तत्रावच्छेदकांशः स्वरूपसन्, इतरांशश्च ज्ञात—उपयोगी। एवमग्रेऽपि। स्मृतिकालावच्छिन्नोपेक्षानर्हतावच्छेदकधर्मवत्त्वं प्रसङ्गः। हेतुता प्रसिद्धा। प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्तिकालावच्छिन्नावश्यवक्तव्यत्वमवसरः। निर्वाहकत्वम्,—एककार्यजनकत्वं कारणतदवच्छेदकसाधारणप्रयोजकत्वरूपम्। एककार्य्यत्वम् = एकस्य कार्यता, सा च जन्यता, जन्यज्ञानविषयत्वरूपा चेति। उदाहरणानि कानिचित्त्वत्रैव वक्ष्यन्ते, अन्यानि तु स्वयमूह्यानि, आक्षेपोदाहरणादीनां तु तन्त्रान्तरे सङ्गतित्वेन प्रसिद्धानामेष्वेवान्तर्भाव इति न तेषामाधिक्यसम्भावना। प्रकृते च पदार्थतत्संसर्गविशेषरूपवाक्यार्थयोः प्रसङ्गसङ्गतिः, तथाहि निरूपितेषु पदार्थेषु प्रायशोऽसंसृष्टपदार्थाऽभावेन तत्संसर्गस्य सामान्यरूपेण स्मरणम्, ततः सामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकजिज्ञासाजनकत्वाच्छिष्यस्य 'क एषां संसर्ग' इत्याकारा विशेषधर्मजिज्ञासा, ततस्तद्बोधनाय शिष्यस्य शब्दप्रयोगः। ततः शिष्यजिज्ञासाज्ञानं गुरोः, ततो जिज्ञासाविषयज्ञाने इष्टसाधनताज्ञानात् कण्ठताल्वाद्यभिघातादिसम्पादनेन गुरोः शिष्यजिज्ञासानिवृत्तिफलकं विशेषसंसर्गरूपवाक्यार्थाभिधानमिति। संसर्गगतसमान्यस्योपेक्षाऽनर्हतावच्छेदकत्वात्तद्वत्त्वस्य तत्र सत्त्वाल्लक्षणसङ्गतिः। इत्थमन्यत्राऽपि लक्षणानि योज्यानि।

विशेषण इति। आधाराऽऽधेयभावसम्बन्धेन प्रकारावित्यर्थः। सङ्ख्याया

❀ काशिका ❀

इत्याशङ्कां निराकर्तुं कर्त्रादौ विशेषणत्वे हेतुमाह—**समाने**ति। तथा च धात्वर्थापेक्षया प्रत्यासत्त्यतिशयात्तत्रैव तदन्वय उचितः। अत एव 'अनभिहिते' इति सूत्रभाष्ये 'प्रातिपदिकार्थ—' इति सूत्रे एतदनुवृत्तौ सत्यां संख्याया एवैतद्विशेषणं स्यादन्यस्यासंभवात्। तथा च 'पचत्योदनं देवदत्त' इत्यादौ प्रथमा न स्यात्, तिङोक्तत्वादेकत्वादीनामित्युक्तमाञ्जस्येन संगच्छते, क्रियायां तदन्वये तु तदसंगतिः स्पष्टैव। अत एव 'पचतीति कर्तुरेकत्वं तिङाऽभिहितमिति प्रथमा न स्यात्' इति कैयटोपाध्यायैरुक्तम्। रूपसूत्रे 'साधनापेक्षं पचत इत्यादौ

❀ काशिका ❀

द्विवचनम्' इति भाष्यमपीत्थमेव व्याख्यातं तैः। क्रियायामनारोपितद्वित्वासंभवश्च, सर्वत्रारोपे मानाभावश्च। 'तिवन्तं चापि किंचिद्विभक्त्यर्थप्रधानं ,किंचित् क्रियाप्रधानम्, काण्डे कुड्ये इति विभक्त्यर्थप्रधानं, रमते ब्राह्मणकुलमिति क्रियाप्रधानं, न चैतयोरर्थयोर्लिङ्गसंख्याभ्यां योगः' इति 'ह्रस्वो नपुंसके—' इति सूत्रस्थभाष्यविरोधश्च (न)? अत्र प्राय इति शेषः। तेन हतशायिका इत्यादौ तद्योगेऽपि नाऽसंगतिः। पचतोरूपमित्यादावप्यौत्सर्गिकमेकवचनं पचतिरूपमितिवत्।

वस्तुतस्तु हतशायिका इत्यादावपि नासत्त्वभूतक्रियायां संख्यान्वयः, परं तु भाष्यकारवचनादेव तत्र बहुवचनमिति प्रामाणिका इति बृहद्भूषणादौ स्पष्टम्। अन्ये तु भावतिङन्ते एकवचनमौत्सर्गिकमसत्त्वभूतत्वात् क्रियायाः। अन्यथा 'ब्राह्मणाभ्यामास्यते' इत्यादौ द्विवचनाद्यापत्तेः, क्रियाभेदेन कर्तृभेदस्यावश्यकत्वादिति वदन्ति। मीमांसकनैयायिकादीनामपि साधन एव संख्यान्वयोऽभिमतो न क्रियायामियानेव परं भेदो यत्तन्मते पदान्तरोपस्थापितादौ तदन्वयः, त्वमते तिङुपस्थापिते इति। न चानेकः पचति, दाराः पचन्ति इत्यादौ साधनेऽप्यारोपितसंख्यान्वय आवश्यक इति वाच्यम्। तत्रागत्या तदङ्गीकारेऽपि सर्वत्र तदङ्गीकारे मानाभावादिति भावः। सुब्विभक्त्यर्थसंख्यायास्तु समानप्रत्ययोपात्तेऽन्वयासंभवात् प्रकृत्यर्थे एवान्वयः, कर्मादीनां विभक्तिवाच्यतामते तत्संभवेऽपि द्योत्यतामते तदसंभव एव। तथा चोक्तं 'बहुषु बहुवचनम्' इति सूत्रभाष्ये—'एवं तर्हि एकवचनं, द्विवचनं, बहुवचनमिति शब्दसंज्ञा एताः, येष्वर्थेषु स्वादयो विधीयन्ते तेषु बहुषु, केष्वर्थेषु स्वादयो विधीयन्ते, कर्मादिषु, न वै कर्मादयो विभक्त्यर्थाः, के तर्हि? एकत्वादयः; एकत्वादिष्वपि वै विभक्त्यर्थेष्ववश्यं कर्मादयो निमित्तत्वेनोपादेयाः; कर्मण एकत्वे, कर्मणो द्वित्वे, कर्मणो बहुत्वे इति' इति। अत्रानभिहिताधिकारारम्भसामर्थ्यात् संख्या 'विभक्तिवाच्या, चतुष्टयं प्रातिपदिकार्थ इत्याशयको 'न वै कर्मादयः' इत्यादिः 'के तर्हि एकत्वादयः' इत्यन्तो ग्रन्थ इत्याहुः। परे तु पञ्चकं प्रातिपदिकार्थ इत्याशयकोऽयं ग्रन्थः, अर्धजरतीयस्यायुक्तत्वात्, अत्रापि पक्षे एकत्वादीनामाश्रयाकाङ्क्षायां 'कर्मणि द्वितीया' इत्यादिभिरेकवाक्यत्वे सति प्रत्यासन्नतया संभवेन च निमित्तत्वमित्याशयेन 'एकत्वादिष्वपि वै' इत्याद्युक्तं भाष्ये। 'एकत्वादयः' इत्युक्तिस्तु तादृशैकवाक्यत्वे कर्मादिकं प्रत्येकत्वादीनां प्राधान्याभिप्रायिका इत्याहुः। तथा च समानप्रत्ययोपात्तत्वप्रत्यासत्त्याख्यातार्थसंख्यायास्तदर्थान्तरे आश्रये एवान्वयः। एवं 'लः कर्मणि—' 'तिप्तस्—' 'द्व्येकयोः—' इत्यादीनामेकवाक्यतयैकत्वादिविशिष्टकर्त्रादौ तद्विधानादित्यपि बोध्यम्। तत्र भवन्तः परे तु तेषां पूर्वोक्तरीत्या वाक्यैकवाक्यता, न पदैकवाक्यता, सा च लकाराः कर्मादौ भवति, तेषां च स्थाने एकत्वादौ तिबादयो भवन्तीत्येवंरूपा। तत्र हि द्वितीयस्य कर्मणीत्यादिपदस्यासत्त्वात् कर्मादावेकत्वादेर्विशेषणत्वं न संभवति। आवृत्तौ च मानाभावः, तस्माद्धात्वर्थ एव संख्यान्वयः। कस्यैकत्वादावित्याकाङ्क्षायामुपस्थितप्रकृत्यर्थस्यैव सम्बन्धौचित्यात्प्रकृत्यर्थगतैकत्वादावित्येवार्थः। एवं हि सुप्तिङ्विषये 'द्व्येकयोः—' इत्यादीनामैकरूप्यं भवति। अत एव समानप्रत्ययो-

❀ काशिका ❀

पात्तत्वमप्यकिंचित्करम् । कर्मणेत्यादेरपि विधेयं प्रति गुणत्वाद्गुणानां च परार्थत्वादिति न्यायेन संख्यया तत्संबन्धासंभवात्। स्वप्रकृतिकप्रत्ययवाच्यसाधनगतसंख्यारोपेण च न द्विवचनाद्यनुपपत्तिः । आरोपमूलभूतसाधनधर्मिकतत्संख्याप्रकारकमानसनिश्चयसत्त्वान्न कर्त्रादौ तत्संशयः । देवदत्तयज्ञदत्ताभ्यां भूयते, सुप्यत इत्यादौ कर्तृगतद्वित्वाद्यारोपनिबन्धनद्विवचनादिकं तु नापादनीयम् । शक्तिस्वभावात्, स्वप्रकृतिकप्रत्ययवाच्यसाधनगतसंख्याया एव क्रियायामारोपो न तु भिन्नपदोपात्तसाधनगतसंख्याया इत्यङ्गीकारात् । अनेकः पचतीत्यत्रारोपितायाा एव साधनगतसंख्यायाः प्रत्यायकत्वस्य भाष्यसिद्धान्ते क्लृप्तत्वाच्च । उत्तरपदार्थप्रधानो नञ्तत्पुरुष इति भाष्यसिद्धान्तात् ' पञ्चकृत्वः पच्यत इत्यादौ पदान्तरसमभिव्याहारेण बहुत्वावगमेऽपि लक्ष्यानुसारेण पदसंस्कारपक्षस्यैवाङ्गीकारान्न बहुवचनाद्यापत्तिः । धातुना च निर्वृत्तिभेदेव क्रियाप्रतिपाद्यते । तदुक्तं हरिणा—

'एकत्वेऽपि क्रियाख्याते साधनाश्रयसंख्यया ।
भिद्यते न तु लिङ्गाख्यो भेदस्तत्र तदाश्रयः ॥' इति ।

व्याख्यातं चैतद्धेलाराजेन,—एकपदोपात्तकर्तृकर्मलक्षणसाधनाधारकद्वित्वबहुत्वाभ्यां पचतः पचन्ति पच्येते पच्यन्ते इति क्रिया विशेष्यते, तेन हि द्विबहुसाधनसाध्यत्वं प्रतीयते क्रियायाः । एवं तद्गतलिङ्गयोगो न, शब्दार्थप्रतीतेः स्वाभाविकत्वेन युक्त्यगम्यत्वादिति । तथा 'सम्बन्धाज्ज्ञातभेदोऽयम्' इति हरिकारिकाप्रतीकमुपादाय 'यथाख्याते प्रत्ययवाच्यकारकभेदे सति तत्सम्बन्धाद्धात्वर्थक्रियायामपि भेदः प्रतीयते यथा पचतः पचन्ति इति पुञ्जराजः । अत्र द्विवचनान्तोदाहरणादेकत्वं स्वगतमेव प्रतीयत इत्यभिप्रेतम् । अत एव ङ्याप् सूत्रे भाष्ये तत्सूत्रानारम्भे पचतीत्यादौ तिङन्तात् स्वाद्युत्पत्तिशङ्केकत्वादीनामुक्तत्वात् परिहृता । तव मते साधनगतायाा उक्तत्वेऽपि प्रधानभूतधात्वर्थगतसंख्याया अनुक्तत्वात्सुबुत्पत्तिर्दुर्वारा, सुपो विशेष्यगतसंख्याऽभिधायकत्वात् । तथा रूपपसूत्रभाष्येऽपि 'पचतिरूपं' पचतो रूप'मित्यादावमोऽनुपपत्तिलिङ्गसंख्याविरहादित्याशङ्क्य क्रियाप्रधानमाख्यातं, क्रिया चैका न द्वित्वादिमतीति तिङन्ताद्भेदानवगतेः । क्लीवत्वं च स्वभावात् यद्येका क्रिया पचत इत्यादौ कथं द्विवचनादीत्याशङ्क्य साधनापेक्षं तदित्युक्तम् । अत्र साधने द्वित्वाद्यन्वय इति व्याख्या न साधीयसी । एकत्वस्य क्रियायामन्वय, द्वित्वादेः साधने इति वैरूप्यापत्तेः । यद्यपि क्रियागतमेकत्वं तिङोक्तं तथाप्यनेन ग्रन्थेन पचतोरूपं पचन्तिरूपमित्यत्रानुपपत्तिः परिहृतेति भावः । अत एव तदग्रे पचतोरूपमित्यादावपि पचत इतिवद् द्विवचनाद्यापत्तेस्तिङोक्तत्वात् परिहारे कृते सति 'एकवचनमपि तर्हि न प्राप्नोति' इत्युक्तम् । पचतीत्यत्र तिङोक्तत्वादेकत्वस्यैकवचनं न प्राप्नोतीति तदाशयः कैयटोपाध्यायैरुक्तः । तदग्रे च 'एकवचनमुत्सर्गतः करिष्यते' इति तत्परिहार उक्तः । न चौत्सर्गिकमेकवचनं पचतोरूपमित्यादावपि भविष्यति तथा च क्रिया चैकेत्याद्युक्तिर्निरर्थिकेति वाच्यम् । 'द्व्येकयो—'इति यथाश्रुततत्सूत्राभिप्रायेण तस्य सत्त्वात् । औत्सर्गिकमेकवचनमिति पक्षेऽपि पूर्वोक्तक्रियागतैकत्वस्याखण्डनाच्च तस्यानभिप्रेतत्व-

योपात्तत्वात्। तथाचाऽऽख्यातार्थसंख्याप्रकारकबोधं प्रति आख्यातजन्य-कर्तृकर्मोपस्थितिर्हेतुरिति कार्यकारणभावः फलितः।

ॐ दर्पणः ॐ

आख्याताऽर्थकर्तृकर्माऽन्वयित्वे प्रयोजकमाह—**समानप्रत्ययोपात्तत्वादिति।** एतेन समानाऽभिधानश्रुतेर्वाक्याऽपेक्षया बलवत्त्वात् समानपदोपात्तान्वयित्वं विहाय प्रथमाऽन्तार्थेऽन्वयोऽनुचित इति व्यज्यते। एकप्रत्ययजन्योपस्थितिविषयत्वादिति तदर्थः। लडादीनां वाचकत्वकल्पे, आख्यातजन्योपस्थितिविषयत्वस्य कालेऽपि सत्वात्तत्र व्यभिचारवारणाय कर्तृकर्मविषयत्वेन तां विशिनष्टि—**तथाचेति।** घट इत्यादावेकत्वादिसङ्ख्याप्रकारकबोधे व्यभिचारो माभूदिति कार्यता-

ॐ काशिका ॐ

मिति बोध्यम्। एको द्वौ बहव इत्यादौ द्वयोरेकस्य बहुषु त्रयाणामित्यादिनिर्देशैः प्रातिपदिकार्थ-सूत्रे वचनशब्देन च संख्याप्रवृत्तिनिमित्तकैकादिशब्देष्वनुवादकविभक्त्यैव न केवलेति नियमपरि-पालनेऽप्यन्यत्रौत्सर्गिकैकवचनेनैतत्परिपालनं लक्ष्यानुरोधादुक्तभाष्यप्रामाण्याच्च। अतो न पचतो-रूपमित्यादौ द्विवचनाद्यापत्तिः। एवं भावे स्वगतैकत्वनिबन्धनमेवैकवचनं न त्वौत्सर्गिकम्। धात्वर्थे तदन्वयानुपगमे पचति भवति पचतो भवतीत्यादौ भूधातूत्तराख्यातार्थसंख्यानन्विता स्यात्, न चेष्टापत्तिः। 'भवतिः पुनर्वर्तमानकालं चैकत्वं च' इति भूवादिसूत्रस्थभाष्येण तस्य संख्यार्थकत्वप्रत्यायनादित्यादि समूचिरे। विस्तरो मञ्जूषायामनुसंधेयः। **आख्यातार्थसंख्याप्रकारकेति।** कर्तृकर्मविशेष्यकेत्यपि पूरणीयम्। तथा चाख्यातोपस्थितसंख्याप्रकारककर्तृभूतार्थ-विशेष्यकबुद्धित्वं, तत्त्वविशिष्टकर्मभूतविशेष्यकबुद्धित्वं च कार्यतावच्छेदककम्, आख्यातजन्यकर्तृ-पस्थितित्वं तत्कर्मोपस्थितित्वं कारणतावच्छेदकं, समवायः कार्यत्वकारणत्वयोरवच्छेदकः सम्बन्धः। कर्तृप्रत्ययेन कर्त्रादिविशेष्यकबोधजननादाख्यातजन्योपस्थितेर्व्यभिचारात् कार्यतावच्छेदकदिशि प्रका-रकान्तनिवेशः, 'सुबर्थसंख्याप्रकारकतादृशबुद्धेरुदयात्तद्दोषतादवस्थ्यं स्यादतः—**आख्यातार्थेति** संख्याविशेषणम्। तदर्थसंख्याया अपि आख्यातशक्यतया तदवस्थो दोष इति तदुपस्थितिपरं, तज्जन्योपस्थितिसहकारेण संख्याप्रकारकबोधप्रापकम्। अन्यथा सुबुपस्थितायास्तिङुपस्थितायाश्च संख्याया एकेनोक्तत्वाद्दोषतादवस्थ्यापत्तिः। काष्ठः तण्डुलं पचतीत्यत्राख्यातार्थसंख्यायाः करणा-दावन्वयबोधवारणाय कर्तृविशेष्यकत्वादेः कार्यतावच्छेदककोटौ निवेशः। ननु तथापि कर्तृप्रत्यये कर्मणि कर्मप्रत्यये कर्तरि तदापत्तिरिति चेन्न। कर्तृकर्मणोराख्यातार्थत्वस्य निवेशनीयत्वात्। तस्य च पूर्ववदेवार्थोऽतो न तदवस्थो दोषः। पदान्तरेण कर्त्राद्युपस्थितितस्तादृशबोधवारणायाख्यातजन्यत्वं तत्तदुपस्थितौ निवेशितम्। चैत्रस्य तथाविधसंख्योपस्थितिसत्त्वे मैत्रस्य तादृशवारणाय समवायस्य तद्घटकतया निवेशः। **वस्तुतस्तु** कर्तृकर्मविशेष्यकत्वं कार्यतावच्छेदके न निवेश्यं, कर्तृत्वाद्य-

नैयायिकादीनामाख्यातार्थसंख्यायाः प्रथमान्तार्थ एवाऽन्वयादाख्यातार्थसंख्याप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्यकारणभावो वाच्यः, सोऽपि 'चन्द्र इव मुखं दृश्यते' 'देवदत्तो भुक्त्वा व्रजती'त्यादौ चन्द्र-क्त्वार्थयोराख्यातार्थानन्वयादितराऽविशेषणत्वघटित इत्यतिगौरवम् ।

❀ दर्पणः ❀

वच्छेदककोटौ—आख्याताऽर्थेति । तदर्थकालप्रकारकबोधे तन्निरासाय—संख्येति । स्वोक्तमाख्यातस्य कर्तृकर्मार्थकत्वं दर्शयितुं प्रसङ्गान्न्यायमतं निराकरोति—नैयायिकानामित्यादिना । अन्वयादिति । एकपदोपात्तयोरेकार्थान्वयित्वस्य न्याय्यत्वादिति भावः । आख्यातार्थकालप्रकारकबोधे प्रथमान्तपदजन्योपस्थितेरनपेक्षणादाह—सङ्ख्येति ।

इतराविशेषणत्वेति । प्रथमान्तार्थेतरविशेषणत्वाघटित इत्यर्थः । तथा-चेतरविशेषणताऽनापन्नार्थविषयकोपस्थितिः कारणमित्यर्थः । एवञ्च चन्द्र–

❀ काशिका ❀

वच्छिन्नविशेष्यतासम्बन्धेन कार्यकारणभावाङ्गीकारान्न पूर्वोक्तदोषः, तज्जन्या कर्त्राद्युपस्थितिरुद्बोधिका उद्बोधककार्यताकारणतावच्छेदककोटौ तत्पुरुषीयत्वप्रवेशान्न चैत्रस्येत्यादिदोषः । तत्पुरुषीयत्वनिवेशात् कार्यकारणभावबाहुल्यमिति तु न शङ्क्यं, विषयनिवेशापेक्षया कार्यकारणभावानामल्पत्वात्, विषयापेक्षया पुरुषाणामल्पत्वात् । परमते कार्यकारणभावप्रयुक्तं गौरवमाह, नैयायिकेति । वक्ष्यमाण-कार्यकारणभावाभ्युपगमे युक्तिमाह—आख्यातार्थेत्यादिना । तथा च तदनभ्युपगमे तथाविधनियमानुपपत्त्या स आवश्यकः । द्वितीयाद्यन्तपदोपस्थापितेऽपि तदन्वयापत्तेरिति भावः ॥ आख्यातार्थेति पूर्ववद्व्याख्येयं, पदप्रयोजनमपि पूर्ववदवगन्तव्यम् । जन्योपस्थितिरिति । विषयनिष्ठप्रत्यासत्त्या कार्यत्वकारणत्वपक्षे प्रथमान्ततत्पदार्थनिष्ठविषयता कारणतावच्छेदकतया प्रवेश्या, नातः समूहालम्बनप्रथमान्तपदजन्योपस्थितिविषयतायाः पदार्थान्तरे सत्त्वादतिप्रसङ्गः । प्रथमान्तपदजन्येत्यादिना पदान्तरजन्योपस्थितेः कारणताभ्युपगमात् । एतन्मते स्वमतापेक्षया गौरवमावेदितम् । सोऽपि = उक्तकार्यकारणभावोऽपि । चन्द्र इवेति । चन्द्रादेरपि प्रथमान्तार्थतया चन्द्र-भोजनादौ 'दृश्यते' 'व्रजती'त्याद्याख्यातार्थसंख्याप्रकारकान्वयबोधापत्तिः, न चेष्टापत्तिः, अननुभवात्, 'चन्द्र इव दृश्येते मुखे'इत्यादौ 'दृश्येते'इति द्विवचनाद्यनुपपत्तिः, चन्द्रस्यैकत्वेन द्वित्वान्वयासंभवात्, न च कारणेन कार्यजननाद्विरोधत आपादकाभावः, सामग्र्या एवापादकत्वात्, मुखे एव तदन्वयबोधो न चन्द्रे इति नियमानिर्वाहयोरुद्भावनीयत्वाच्च । इतराविशेषणत्वेति । समवायेन कार्यकारणभावपक्षे 'इतरविशेषणतानापन्नप्रथमान्तार्थविशेष्यत्वं' कार्यतावच्छेदककोटावन्तर्भावनीयं, द्वितीयपक्षे इतरविशेषणतानापन्ननिष्ठविषयतैव प्रत्यासत्तित्वेन निवेश्येत्यर्थः चन्द्रभोजनस्य व्रजनक्रियायामिवार्थसादृश्ये विशेषणत्वान्नोक्तापत्तिः । अतिगौरवमिति । स्वमते चन्द्रादेरतत्रा–

इदमपि कर्तृकर्मणोराख्यातार्थत्वे मानमिति स्पष्टं भूषणे ।

❀ दर्पणः ❀

भोजनादीनां प्रथमान्तार्थत्वेऽपि इवार्थसादृश्यव्रजनादिविशेषणत्वान्न व्यभिचार इति भावः। **घटित इति**। तदविषयकप्रतीत्यविषयः स इत्यविषय इत्यर्थः, तदवच्छिन्नावच्छेदकताककारणताग्रहविषय इति यावत्। इतराविशेषणत्वं चेतरविशेषणत्वतात्पर्याविषयत्वम्, नातश्चैत्र इव पचतीत्यादौ खले कपोतन्यायेन बोधे चैत्रीयं सादृश्यमित्यवान्तरबोधाऽभावेन चैत्रस्येतरनिरूपितप्रकारताशून्यत्वरूपेतराऽविशेषणत्वसत्त्वेऽपि क्षतिः, अविशेषणत्वेऽपि विशेषणत्वतात्पर्यविषयत्वसत्त्वात्, तथाऽऽख्यातार्थसङ्ख्याप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धिं प्रति इतरविशेषणत्वतात्पर्याविषयार्थवृत्तिविशेष्यतासम्बन्धेन प्रथमान्तपदजन्योपस्थितिर्हेतुरिति पर्यवसितोऽर्थः। 'चैत्रेण सुप्यते' इत्यादिभावाऽऽख्यातस्थले 'चैत्रकर्तृकः स्वापः' इत्यादिबोधाद्यथोक्तविशेषणकधात्वर्थस्वापे तदनन्वयाद्व्यभिचारपरिहाराय—प्रथमान्तेति पदविशेषणम्। यद्येवमपि 'चैत्र एव पचति न मैत्र' इत्यादावन्ययोगव्यच्छेदरूपैवकारपदार्थैकदेशेऽन्यत्वे चैत्रस्य विशेषणत्वात् तत्र संख्याऽऽन्वयाऽऽनुपपत्तिरिति विभाव्यते, तदा प्रथमान्तार्थो विशेषणत्वमात्रतात्पर्याविषयत्वेन विशेषणीयः। अवशिष्टांशस्यापि निवेशे प्रयोजनाऽभावादुक्तस्थले च चैत्रस्य मुख्यविशेष्यत्वविशेषणत्वाभ्यां तात्पर्यविषयत्वात्तत्सङ्ख्याऽन्वयाऽनुपपत्तिरिति तन्मतनिष्कर्षः।

अतिगौरवमिति। अन्यलभ्यकृतौ शक्तिकल्पने सङ्ख्यान्वयबोधहेतूपस्थितौ विभिन्नपदजन्यत्वनिवेश एव गौरवम्। प्रथमान्तपदार्थस्य विशेषणत्वमात्रतात्पर्याविषयत्वेन निवेशे त्वतिगौरवमित्यर्थः। **इदमपीति**—उपदर्शितकार्यकारणभावे दर्शितलाघवमपीत्यर्थः।

यद्यपि तन्मते भावनान्वयिनि सङ्ख्यान्वयनियमादाख्यातेन भावनाऽविषयकसङ्ख्यान्वयबोधस्य क्वाप्यजननाद्भावनान्वयबुद्धित्वस्य सङ्ख्यान्वयबुद्धित्वव्यापकतया व्याप्यधर्मावच्छिन्नसामग्र्या फले जननीये व्यापकधर्मावच्छिन्नसामग्र्या अपेक्षणाद्विशेषणत्वमात्रतात्पर्याऽविषयत्वविशेषणविशिष्टप्रथमान्तार्थोस्थितिरूपायास्तस्यास्तत्राऽभावादेवोक्तस्थले व्यभिचाराप्रसक्तं न तद्व्यावृत्तये सङ्ख्यान्वयकारणतावच्छेद-

❀ काशिका ❀

ख्यातार्थत्वविरहेण तत्र संख्यान्वयबोधस्याप्रसक्ततया नेतराविशेषणत्वं तत्रान्तर्भावनीयमिति भावः। इदमपि = उक्तगौरवमपि, स्वमते परमतापेक्षया लाघवमपीति वार्थः। ननु व्यापारे विशेषणत्वमन्याय्यं, समानप्रत्ययोपात्तयोः कर्तृकर्मणोरेव तदन्वयस्योचितत्वात्। न च धातोरित्य-

कालस्तु व्यापारे विशेषणं,—तथाहि—"वर्त्तमाने लड्" इत्यत्राधिकाराद् धातोरिति लब्धम्, तच्च धात्वर्थं वदत् प्राधान्याद् व्यापारमेव

❀ दर्पणः ❀

कोटावुक्तविशेषणप्रवेशाऽवसरः, तथापि कृतिशक्तिवादिमते उक्तस्थले तदापत्तिवारणाय भावनान्वयबोधकारणतावच्छेदककोटावेवोक्तविशेषणविवरणप्रयुक्तगौरवम्। अस्मन्मते तु प्रथमान्तपदार्थस्याख्यातार्थे विशेषणतयैवान्वयेन चन्द्रादेरेकत्र विशेषणतयाऽन्वितस्य नैराकाङ्क्ष्येणाऽपरत्र विशेषणतयान्वयाऽयोगादुक्तव्यभिचाराऽभावेन न तन्निवारकविशेषणोपादानप्रयुक्तगौरवमित्यभिप्रेत्योक्तम्—इदमपीति। अधिकमन्यत्रानुसन्धेयम्।

अत्राऽऽहुर्नव्याः—लाघवोपबृंहितोक्तयुक्तिकदम्बेनाऽऽख्यातस्य धर्मवाचकत्वसिद्धावुत्तरकालकल्प्यतादृशकार्यकारणाभावप्रयुक्तगौरवं, निषादस्थपत्यधिकरणन्यायेनाकिञ्चित्करम्, फलमुखत्वात्, किञ्च—चन्द्राद्युपमाने आख्यातार्थसङ्ख्याद्यन्वयोपगम आवश्यकः। तत्र तदन्वयाऽनुपगमे सादृश्यप्रयोजकधर्माऽलाभेन वाक्यस्याऽपरिपुष्टार्थतापत्तेः। क्त्वान्तार्थभोजनादौ तु सङ्ख्यादीनामयोग्यत्वादेवानन्वयेनाऽनतिप्रसङ्गात्, एवञ्च—नास्मन्मते दोषलेशोऽपीति। कर्तृकर्मणोः सङ्ख्यायाश्च विशेषणतां व्यवस्थाप्य कालस्यापि तां प्रतिपादयति—कालस्त्वित्यादिना। व्यापारे इति। धात्वर्थव्यापारे इत्यर्थः।

नन्वाख्यातस्य कालशक्तिपरिच्छेदकेषु 'वर्तमाने लड्' इत्यादिषु व्यापारवाचकपदानुपादानात् कथं कालस्य धात्वर्थव्यापारविशेषणतेत्यतस्तत्सूत्रप्रामाण्येनैव तां साधयति—तथाहीति। तच्च = धातुपदं च। धात्वर्थमिति। फलव्यापारोभयात्मकमित्यर्थः। सत्तायामित्याद्यर्थनिर्देशात् भ्वादिसूत्रप्रामाण्याच्चेति भावः। वदत् = बोधयत्। सन् ब्राह्मण इतिवच्छता। प्राधान्यात्। धातुजन्यबोधे विशेष्यतया भासमानत्वादित्यर्थः। व्यापारमेवेत्येवकारेण फलव्यवच्छेदः। प्राधान्यादित्युक्त्या यन्मते कर्माऽऽख्याते फलस्य प्राधान्यं तन्मते फल एवान्वय इति ध्वनितम्। ग्राहयतीति। आख्यातार्थकालविशेष्यतया बोधयतीत्यर्थः। "गुणानां च परार्थत्वाद्" इति न्यायात्, प्रत्ययार्थस्य साक्षात्प्रकृतिजन्यबोध-

❀ काशिका ❀

नुवृत्त्या प्रयोगे, धातोर्वर्तमानत्वस्याविवक्षणात्तदर्थगतवर्तमानत्व इत्यर्थलाभाद् व्यापारे एव तदन्वयाङ्गीकार इति वाच्यं, फलस्यापि धात्वर्थत्वाविशेषेण व्यापारे एव तदन्वये विनिगमकाभावादित्यत आह—तथाहीति। तच्च=धातुपदं च। धात्वर्थं वदत् = उक्तरीत्या धात्वर्थं बोधयत्।

ग्राहयतीति तत्रैव तदन्वयः, न च सङ्ख्यावत् कर्तृकर्मणोरेवान्वयः शङ्क्यः, अतीतभावनाके कर्तरि—पचतीत्यापत्तः, अपाक्षीदित्यनापत्तेश्च, पाकानारम्भदशायां कर्तृसत्त्वे पक्ष्यतीत्यनापत्तेश्च। नापि फले तदन्वयः।

ॐ दर्पणः ॐ

विशेष्याऽन्वयित्वनियमाच्चेति भावः। **कर्तृकर्मणोरिति**—समानप्रत्ययोपात्तत्व-प्रत्यासत्तेरिति भावः। **पचतीत्यापत्तेरिति**। कर्तुर्विद्यमानत्वादिति भावः। एवमग्रेऽपि। **नापि फल इति**।

केचित्तु—फलव्यापारयोर्धातोः पृथक् शक्तौ तयोरुद्देश्यविधेयभावेनाऽन्वया-ऽऽपत्तिः। पृथगुपस्थितयोस्तथाऽन्वयस्यौत्सर्गिकत्वात्, तत्तद्धातुजन्यतादृशबोधस्य तथाऽन्वयबोधे प्रतिबन्धकताकल्पने तु गौरवम्, तस्मात् फलाऽवच्छिन्नव्यापारे व्यापारावच्छिन्नफले च धातूनां शक्तिः, कर्तृकर्मार्थकतत्तत्प्रत्ययसमभिव्याहारश्च तत्तद्बोधे नियामकः, गौरवं च प्रमाणिकत्वान्न दोषाय, इत्थञ्च कर्त्राऽऽख्याते व्यापारस्य प्राधान्यम्, कर्माख्याते तु फलस्य, यदा यस्य प्राधान्यं तदा तस्मिन् कालाऽन्वयः, सूत्रस्थधातुपदादुभयोरपि प्राधान्येनोपस्थितत्वान्नोक्तनियमावकाशः, फलानुत्पत्तिदशायामारब्धे पाके फले वर्तमानत्वारोपाद्वा, पच्यते इत्यस्योपपत्तिः, एकाऽवयवेऽपि समूहाऽऽरोपादधिश्रयणकाले पचतीति प्रयोगवत्। आरोपे च प्रतीतिरेव मानम्। व्यापारविगमे फलसत्त्वे, अपाचि देवदत्तेन इत्यादिप्रयोगास्तु भूतत्वस्योत्पत्तिघटितत्वादित्याहुः।

तदपरे न क्षमन्ते। पृथगुपस्थितयोस्तथान्वबोधाभ्युपगमे नानार्थहर्यादि-पदोपस्थितानामश्वसूर्यादीनामप्युद्देश्यविधेयभावापत्तिरतो विभिन्नपदजन्योपस्थितेरेव तन्त्रता तत्राऽनुसर्त्तव्या। तदभावाच्च प्रकृते कथं तदन्वयबोधाऽऽपादनम्, तादृश-फलव्यापारयोर्धातुशक्तौ मानाभावो गौरवं च, विशिष्टधर्मस्य शक्यतावच्छेदकत्वे

ॐ काशिका ॐ

प्राधान्याद्—प्राधान्याच्च चकारेण लक्ष्यानुरोधपरिग्रहस्तेन 'पच्यते' 'पच्यमान' इत्यादौ फलस्य प्राधान्येऽपि न क्षतिः। **कर्तृकर्मणोरेवेति**। न च पूर्वोक्तयुक्त्या व्यापारे एवान्वय इति वाच्यम्, अनुवृत्तधातोरित्यस्य पञ्चम्यन्ततया तथावाक्यार्थसंभवात्, आवृत्तौ मानाभावात्, लक्षणैकचक्षुष्कस्य लक्ष्यदर्शनाभावाच्चेति भावः। लक्ष्यैकचक्षुष्कदर्शनाभिप्रायेण समाधत्ते—**अतीतेति**। अनिष्टप्रसञ्जनमुक्त्वेष्टासिद्धिमप्याह—**अपाक्षीदिति**। ननु फले एव तदन्वयः स्वीक्रियतां, तत्र च न पूर्वोक्तदोषावसर इत्याशङ्क्य निराचष्टे—**नापीत्यादिना—आपत्तेश्चेत्य-न्तेन**। **प्रयोगापत्तिरिति**। फले तदन्वयाङ्गीकारपक्षे तु फलस्यावर्तमानतया नायं दोषः, तथा चायमपि पक्षो दुष्टः, एवं च सर्वपक्षाणां दुष्टत्वे तुल्ये एतत्पक्षस्यैवाश्रयणमनुचितमिति

फलाऽनुत्पत्तिदशायां व्यापारसत्त्वे—पचतीत्यनापपत्तः, पक्ष्यतीत्यापत्तेश्चे-त्यवधेयम् ।

न चामवातजडीकृतकलेवरस्योत्थानाऽनुकूलयत्नसत्त्वादुत्तिष्ठतीति प्र-योगाऽऽपत्तिः, परयत्नस्याज्ञानादप्रयोगात्, किञ्चिच्चेष्टादिनावगतौ च,—

❀ दर्पणः ❀

उक्तप्रयोगाणामारोपेणोपपादनं त्वगतिकगतिकमिति स्पष्टमेव विवेकिनाम् । एतदनुरोधेन भूतत्वस्योत्पत्तिघटितत्वाऽभ्युपगमे परमताऽनुसृतिरपीति ।

व्यापारे आख्यातार्थकालाऽन्वये दूषणमाशङ्क्य निराचष्टे—**नचेति** । **यत्नस-त्वादिति** । यत्नरूपव्यापारस्य वर्तमानत्वेन विषयबाधात्, मम तु तदानीं फला-ऽनुत्पत्त्या न तादृशप्रयोगाऽऽपत्तिरित्यर्थः । **अप्रयोगादिति** । ननु परयत्नस्य विजातीयमनःसंयोगाश्रयसमवायरूपहेत्वभावादप्रत्यक्षत्वेऽपि चेष्टादिपक्षकेण तल्लि-ङ्गकेन वाऽनुमानेन तदवगमादुत्तिष्ठतीति प्रयोगाऽऽपत्तिः दुःसमाधेयैवेत्याशङ्क्येष्टापत्त्या परिहरति **किञ्चिच्चेष्टादिनेति** । यत्किञ्चिच्छरीरावयवक्रिययेत्यर्थः । **तदवगतौ** । यत्नानुमितौ । अनुमानप्रयोगश्चैवम्—देवदत्तीयचेष्टा प्रयत्नजन्या । चेष्टात्वात् । मच्चेष्टावत् । अथवा, अयमुत्थानाऽनुकूलयत्नवान्, विजातीयचेष्टावत्त्वात्, अहमिवेति । चेष्टाप्रयत्नयोः कार्यकारणभावश्च प्रकृतेऽनुकूलस्तर्कः । स्वाश्रयावच्छे-द्यत्वस्य हेतुतावच्छेदकसम्बन्धत्वान्न स्वरूपासिद्धिरिति ।

परे तूक्तापत्तिमन्यथैव परिहरन्ति, तथाहि आमवातजडीकृतकलेवरप्रयत्नस्यो-त्थानोद्देश्यकत्वेऽपि तदजनकत्वेपि तदजनकत्वान्नोक्तप्रयोगापत्तिः । 'उत्थानाय यतते' इत्येव तत्र प्रयोगः । यागपाकाद्युद्देश्यककुण्डादिनिर्माणतण्डुलक्रयणादिदशायां, यजति पचति इत्यादिप्रयोगवारणाय स्वरूपसम्बन्धरूपप्रयोजकताविशेषस्यैव सम्बन्धताया अभ्युपेयत्वादिति ।

तच्चिन्त्यम् । तदुद्देश्यकत्वं हि तदिच्छाऽधीनेच्छाविषयत्वम् । उपायेच्छायाः

❀ काशिका ❀

भावः । अज्ञानादप्रयोगादिति । ज्ञानस्यैव बुबोधयिषया प्रयोगे निमित्तत्वात्, शुकादिवत् प्रयोगस्त्विष्ट एव । ननु परप्रयत्नाप्रत्यक्षत्वेऽप्यानुमानिकादिज्ञानसंभवात्तथाविधप्रयोगो दुर्वार एवेत्याशङ्क्येष्टापत्त्या परिहरति,—किंचिदिति । किंचिच्चेष्टादिनेत्यर्थः, आदिना तदीयलेखादिः ।

बृहद्भूषणकारादयस्तु—"तदीययत्नो नोत्थानात्मकफलानुकूलोऽपि तु तदुद्देश्यकोऽत एव तत्रोत्थानाय यतत इत्येव प्रयोगो नोत्तिष्ठतीति, अनुकूलताविशेषस्यैव फलव्यापारयोः संसर्गत-याभ्युपेयत्वात् । अत एव तण्डुलक्रयणादिदशायामयं पचतीति न प्रयोग"—इत्याहुः ।

अयमुत्तिष्ठति, शक्त्यभावात् फलन्तु न जायत इति लोकप्रतीतेरिष्टत्वात्, एवञ्च तिङर्थो विशेषणमेव, भावनैव प्रधानम् ।

यद्यपि प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमन्यत्र दृष्टं, तथापि 'भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि' इति निरुक्ताद्, भूवादि-

ॐ दर्पणः ॐ

फलेच्छाधीनत्वात् । उपायत्वं च प्रयोजकत्वमेव । कथमन्यथा तत्रेच्छेति, प्रकृते यजतीत्यादि प्रयोगो दुर्वार एव । तस्मात् साक्षाज्जन्यजनकभाव एव फलव्यापारयोः सम्बन्ध इत्येवाभ्युपेयम् , तावतैवोक्तप्रयोगवारणात् । प्रकृते शक्तिरूपसहकारिकारणाभावेन तदनुत्पत्तावपि तदीययत्ने साक्षाज्जनकत्वस्य निराबाधत्वेनोत्तिष्ठतीतिप्रयोगस्यैवेष्टत्वात् । प्रकृतधात्वर्थतयाऽवगते तस्मिन् साध्यत्वस्यैव सत्त्वेनोद्देश्यत्वस्य तदानीमसम्भवाच्च । एवदभिप्रेत्यैव सारकृता 'उत्थानानुकूलयत्नसत्त्वे' इत्युक्तम् । अत एव पाकानुकूलप्रकृतधात्वर्थयत्नसत्त्वे पचतीत्येव प्रयोगोऽन्यदा तु पाकाय यतते' इति ।

वस्तुतस्तु कृतिरूपव्यापारमात्रस्य धात्वर्थत्वविवक्षायामुत्तिष्ठतीतिप्रयोगः । प्रयत्नसामर्थ्यचेष्टादिघटितस्य तस्य समुदायस्य तद्विवक्षायान्तु नेति सारकाराशयः, अत एव तदोत्थानाय यतते इति प्रयोगोऽपि सूपपाद इति बोध्यम् ।

उपसंहरति **एवञ्चेति** । विशेषणमेवेत्येवकारेण तिङर्थस्य विशेष्यत्वव्यवच्छेदः । **भावनैवेति** । धात्वर्थभावनैवेत्यर्थः । अत्राप्येवशब्देन फलस्य तिङर्थकर्त्रा-

ॐ काशिका ॐ

एवंञ्चेति । एवं = पूर्वोक्तयुक्तीनामवश्याश्रयणीत्वे । **भावनैव** = धात्वर्थं एव । ननु 'भावनाया धातुवाच्यत्वे कर्त्रादेस्तिङ्वाच्यत्वे तस्याः प्रत्ययार्थसाधनं प्रति विशेषणत्वापत्तिः, संख्याकालाद्यतिरिक्तप्रत्ययार्थस्य प्रकृत्यर्थं प्रति प्राधान्यस्यैव नियतत्वा'दिति मीमांसकादिप्रोक्तं दूषणमाशङ्क्य निराचष्टे—**यद्यपीति** । **भावप्रधानमिति** । आख्यातं = तिङन्तं,—तिङर्थनिष्ठप्रकारतानिरूपितधात्वर्थनिष्ठविशेष्यताकबोधजनकम् । **सत्त्वप्रधानानि नामानीति** । सत्त्वं = द्रव्यं, लिङ्गाद्यन्वयि, तत्प्रधानबोधजनकम्, तन्निष्ठमुख्यविशेष्यताकबोधजनकमित्यर्थः । मुख्यविशेष्यता'निवेशाच्च 'पचत्यादौ तिङन्ते, आश्रयत्वसंख्या–निष्ठप्रकारतानिरूपितकर्त्रादि–सत्त्व–निष्ठविशेष्यताकबोधजनकत्वेऽपि नातिप्रसङ्गः, क्रियानिष्ठप्रकारतानिरूपितविशेष्यतानिवेशेन तत्रातिप्रसङ्गवारणेऽपि 'घट'इत्यादावव्याप्तेः । **धात्वर्थभावनाप्राधान्यमध्यवसीयत इति** । तथा च निरुक्तभाष्यप्रामाण्येनोक्तनियमसंकोचोऽवश्यमङ्गीकार्यः, भवतामेव प्रत्युत निरुक्तादिविरोध इति भावः ।

ॐ दर्पणः ॐ

देश्च व्यवच्छेदः। "प्रकृतिप्रत्ययार्थयो'रिति व्युत्पत्तिविरोधमाशङ्कते—**यद्यपीति**। **अन्यत्र**=पक्तेत्यादौ। **दृष्टमिति**। तथाच प्रकृत्यर्थभावनायाः प्राधान्योपगमे तद्विरोध इति भावः। **भावप्रधानमिति**। नामाऽऽख्यातोपसर्गनिपातभेदेनोद्दिष्टं चतुर्विधं पदं प्रकल्प्य नामाऽऽख्यातलक्षणप्रतिपादके इमे वाक्ये, अत्राऽऽख्यातं भावप्रधानमिति योजना। यथाश्रुते—'यच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम्'—इत्यभियुक्तोक्तेः शाब्दबोधे प्राङ्निर्दिष्टस्यैवोद्देश्यतया विवक्षितार्थाऽलाभात्, अत एव 'वृद्धिशब्दस्य प्राङ् निर्देशो मङ्गलार्थः' इत्याकरोक्तं सङ्गच्छते। एवमग्रेऽपि। आख्यातत्वाऽवच्छिन्ने प्रधानभावार्थप्रतिपादकत्वरूपलक्षणतात्पर्यावधारणाच्च लक्षणवाक्याच्छब्दमर्यादया प्रकृतपदद्वयार्थाभेदस्याऽधिकस्य भानेऽपि न क्षतिः। लक्ष्यताऽवच्छेदकं च तिङन्तत्वरूपम्, 'आख्यातमाख्यातेन' इत्यादौ तत्रैवाऽऽख्यातपदस्य शक्त्यवधारणात्। "भावकालकारकसंख्याश्चत्वारोऽर्था आख्यातस्य; तत्र भावः प्रधानम्" इति प्रकृतनिरुक्तभाष्याच्च। एतेन तिङः प्रधानभावार्थकत्वस्य प्रतिपादकमेव तदिति वदन्तः प्रत्युक्ताः।

तच्छब्दपरामृश्यभावादिचतुष्टयस्यैकदा तिङा प्रतिपादनाऽसम्भवाच्च; भावत्वं=निष्पाद्यत्वम्, नातः कर्माऽऽख्यातस्य फलविशेष्यकबोधकतावादिमते तत्राऽप्रसक्तिः। प्रधानप्रतिपादकत्वस्य नाममात्रे, भावप्रतिपादकत्वस्य भुक्त्वेत्यादिनाम्न्यतिप्रसक्तत्वात्तद्वारणाय विशिष्टमुपात्तम्।

ॐ काशिका ॐ

ननु भावयतीति भाव इति व्युत्पत्त्या भावयतेरजन्तभावपदेन कृतिरूपा भावनोच्यते, क्रियापदेनापि सैव, तथा च तिङर्थकालादिमध्ये कृतिरूपतदर्थस्यैव प्राधान्यं, तथा च धात्वर्थनिष्ठप्रकारतानिरूपितकृतिनिष्ठविशेष्यताशालिबोधजनकमाख्यातमिति तदर्थः, एवं च न निरुक्तादिकं भवदभिमतार्थसाधकमस्मत्प्रतिकूलं वा, पचतीत्यादितः कृतिनिष्ठविशेष्यताकबोधोत्पत्तेरिति वाच्यं, 'रथो गच्छति' 'जानाती'त्यादावव्याप्तेः, (आद्ये) कृतेरप्रतीतेः, 'करोती'त्यत्र तत्प्रतीतावपि तिङर्थत्वाभावात्, एवं 'पच्यते' इति कर्माख्याते 'सुप्यते' इति भावाख्यातेऽव्याप्तेश्च; तत्र तिङ्प्रत्ययेन कृतेरबोधनात्, न चैवं तद्घटिताद् 'देवदत्तेन पच्यते' इत्यादिवाक्यात् कृतिप्रतीतिर्न स्यादिति वाच्यं, तृतीययैव तद्बोधसंभवात्। न चाऽऽधेयत्वमेव तन्मते तृतीयार्थः, अत एव 'देवदत्तेन पच्यते न यज्ञदत्तेने'त्यतो यज्ञदत्तवृत्तित्वस्याश्रयत्वसंबन्धावच्छिन्नप्रतियोगिताकाभावबोधसंभवः, तस्याः कृत्यर्थकत्वे तु कृतेर्जन्यत्वसंबन्धावच्छिन्नप्रतियोगिताकाभाव एव क्रियायां बोधनीयः, स च न संभवति, जन्यत्वस्य वृत्त्यनियामकतया प्रतियोगितावच्छेदकत्वासंभवात्,

१ नैयाकरणनये प्रकृत्यर्थभावनायाः प्राधान्ये 'प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थः

※ दर्पणः ※

प्राधान्यं चोपस्थितत्वात् स्ववाचकप्रकृतिकप्रत्ययार्थनिरूपितमेव, नातः 'काष्ठैः पाकः' इत्यादौ प्रत्ययार्थकरणनिष्ठप्रकारतानिरूपितविशेष्यताशालिबोधजनके पाकादिनाम्न्यतिप्रसङ्गः, न वौत्सर्गिकैकवचनान्तभावविहिततव्याद्यन्तनाम्नि सः। तथा च तिङ्बोध्यार्थनिष्ठप्रकारतानिरूपितविशेष्यतातात्पर्यप्रतिपादकत्वं 'तत्पर्यवस्यति।

इतराविशेषणत्वरूपं तु न तत्, पचति भवतीत्यादिवाक्यघटकपच्याद्यर्थक्रियायां तदसत्त्वेन पचतीत्याख्यातेऽव्याप्तेः। क्त्वः पूर्वकालार्थकत्वस्य निराकरिष्यमाणत्वान्नोक्तलक्षणस्यालक्ष्येऽतिप्रसङ्गः। 'कृदभिहितो भावो द्रव्यवत् प्रकाशते' इति भाष्येण पाक इत्यादाविव तस्य सत्त्वाऽतिदेशेन साध्यत्वरूपभावत्वाऽभावादेव नाऽतिप्रसङ्ग इति तु न सत्। यतः साधुत्वान्वाख्यायकव्याकरणस्मृत्या यत्कृदर्थभावे लिङ्गाद्यन्वयोऽनुभवसिद्धस्तस्मिन्नेव तदतिदिश्यते, यथा 'पाक' इत्यादौ घञर्थभावे, क्त्वार्थे तु लिङ्गाद्यननुभवेन तत्र तदतिदेशविषयत्वस्यान्याय्यत्वात्, अव्ययकृत्वेन तस्य धात्वर्थानुवादकत्वस्य वक्ष्यमाणत्वाच्च।

तथाच भावप्रधानकत्वं तिङर्थनिष्ठप्रकारतानिरूपितविशेष्यताशालिभावप्रतिपादकत्वं पर्यवस्यति। एतेन—पचति भवतीत्यादिवाक्यघटकाख्यातसंग्रहाय क्वचित् क्रियान्तरनिष्ठविशेष्यतानिरूपितविशेषणत्वाभाववत्त्वं तत्, पच्याद्यर्थक्रियाया भवत्यर्थविशेषणत्वेऽपि क्वचित्तदसमभिव्याहारे विशेष्यतयैव भानान्न तत्रातिप्रसंग इत्युक्तं—निरस्तम्। उक्तापेक्षया अभावघटितत्वेनास्य गुरुत्वात्। अग्रिमलक्षणे प्राधान्यस्य विशेष्यत्वरूपस्यैव वक्ष्यमाणतयाऽत्रापि तस्यैव न्याय्यत्वात्, तत्र 'भावप्रधानम्' इति भाष्येण मदुक्तार्थस्यैव लाभाच्च।

※ काशिका ※

श्राश्रयत्वसंबन्धावच्छिन्नप्रतियोगिताकाभावभानोपगमने च यज्ञदत्तकर्तृकपाकेऽपि तादृशाभावस्याबाधिततया तादृशप्रयोगापत्तिः, तथा च तत्र तिङ्प्रत्ययस्यैव तदर्थकत्वमभ्युपगम्यते इति न तत्राव्याप्तिरिति वाच्यं, 'देवदत्तेन पक्वस्तण्डुल'इत्यतः कृतिबोधानापत्त्या तृतीयायास्तदर्थकत्वावश्यकत्वात्, अत एव 'कर्तृकरणयोस्तृतीया' इत्यनुशासनमपि साधु संगच्छते। प्राचीननैयायिकैर्वृत्त्यनियामकसंबन्धस्याभावप्रतियोगितावच्छेदकत्वाङ्गीकाराच्च न नञ्समभिव्याहारे दोषः, नव्यमते—कृतिजन्यत्वस्य तृतीयार्थत्वान्नोक्तदोषः। एवं च-तृतीययैव तद्बोधनसंभवे कर्माख्यातस्य तद्बोधकत्वाभावात् 'पच्यते' इत्यादावव्याप्तिदुष्परिहरैव। 'तृतीयाया आधेयत्वमेवार्थः, कर्माख्यातेनैव कृतिर्बोध्यते, क्तप्रत्ययस्थले तृतीयायाः कृतौ, कृतिजन्यत्वे वा लक्षणा' इत्यभ्युपगमेऽपि कर्माख्याते कृतेः प्राधान्याभावादव्याप्तिस्तदवस्थैव। न च 'कृति'पदं संख्याप्रधान'मिति न्यायविरोधः स्पष्ट एव।

१ तत् = आख्यातत्वम्, भावप्राधानकत्वं वा।

॥ दर्पणः ॥

सत्त्वप्रधानानीति । अत्रापि 'पूर्ववदुद्देश्यविधेयभावकल्पना, लक्ष्यतावच्छेदकं च कृदाद्यन्तप्रकृतिकविभक्त्यन्तत्वरूपं नामत्वम् । 'प्रकृतिः, प्रत्ययो, विभक्तिरित्येतन्नाम, सत्त्वा, द्रव्यं, लिङ्गं, संख्या च नामार्थं' इति तद्भाष्यात् । "क्रियाप्रधानमाख्यातं, सत्त्वप्रधानं नाम, यतः क्रियां पृष्टस्तिङाचष्टे—किं करोति ?, पचतीति । द्रव्यं पृष्टः कृताऽऽचष्टे—कतरो देवदत्तो ? यः पाचक" इति "प्रशंसायाम्" इति सूत्रस्थमहाभाष्याच्च । तत्र 'कृते'त्यस्य तत्प्रकृतिकसुबन्तेनेत्यर्थः । कृता द्रव्याऽभिधानेऽपि, [2]"न केवला" इतिन्यायेन केवलस्य प्रयोगाऽनर्हत्वात् , निरुक्तभाष्यस्थविभक्तिपदस्वारस्याच्च । व्युत्पत्तिपक्षमवलम्ब्य चेदम् , नातोऽव्युत्पत्तिपक्षे नामादिष्वतिप्रसङ्गः ।

लक्षणमाह—**सत्त्वप्रधानानीति ।** सत्त्वं = द्रव्यं—वक्ष्यमाणलक्षणं, तत्प्रधानं यत्रेति विग्रहाल्लिङ्गादिनिष्ठप्रकारतानिरूपितविशेष्यताशाल्यर्थप्रतिपादकत्वं नामलक्षणमित्यर्थः । विशेष्याऽर्थकत्वस्य निपाताऽऽख्यातादावतिप्रसक्तत्वात् तद्वारणाय 'प्रकारतानिरूपितत्वा'न्तं विशेषणम् । व्यक्तिबोधस्य धर्मविषयकत्वनियमेन जातिप्रकारतानिरूपितत्वस्यातिप्रसङ्गाऽवारकत्वात्तदनुपादानम्, लक्ष्यतावच्छेदकाऽनाक्रान्तेषु यादृच्छिकेष्वतिप्रसङ्गस्तु लक्षणे तद्व्यतिरिक्तत्वविशेषणेनैव परिहरणीयः । एवं धात्वर्थाऽनुवादकप्रत्ययान्तेष्वप्रसङ्गोऽपि लक्ष्यतावच्छेदकसंकोचेनैव परिहार्यः । तत्र नामत्वव्यवहारोऽपि स्वाद्यन्तत्वनिबन्धनो भाक्त इति तद्भावः । उपसर्गादिलक्षणं तु वक्ष्यते ।

॥ काशिका ॥

कालाद्यतिरिक्ततिङर्थमात्रपरं, तथा च न 'रथो गच्छति' 'जानाति' 'नश्यती'त्यादौ 'पच्यते' इत्यत्र चाव्याप्तिः, तत्राप्याश्रयत्वादेस्तदर्थस्य प्राधान्यादिति वाच्यम्, एवमपि भावाख्यातेऽव्याप्तेरपरिहारात्, न च तत्रापि तङर्थकृत्याश्रयत्वविशेष्यकबोधाङ्गीकारान्नाव्याप्तिसंभवः, 'चैत्रेण सुप्यते' 'गगनेन स्थीयत' इत्यादितश्चैत्रवृत्तिः स्वापानुकूला कृतिः, गगनवृत्तिः स्थित्याश्रयता इति बोधसम्भवादिति वाच्यं, तार्किकैस्तादृशबोधो नानुभवसिद्धोऽपि तु चैत्रवृत्तिकृतिजन्यःस्वापः, गगनवृत्तिः स्थितिरित्येव बोधोऽनुभवसिद्ध इत्युक्तत्वात्, तत्त्व ? जनितबोधके 'पचती'त्यादावव्याप्तिवारणाय तथाविधबोधजनकतावच्छेदकानुपूर्व्यादिकत्वमेव वक्तव्यमेवं च न भावाख्यातेऽव्याप्तिर्भूयते इत्यादितोऽपि कर्मत्वतात्पर्यग्रहदशायां प्रत्ययार्थविशेष्यकबोधजननेन तादृशानुपूर्व्या अपि तथाविधबोधजनकत्वाच्चतेः । अथवा 'चैत्रेण सुप्यत' इत्यादितः पूर्वोक्तबोधोऽङ्गीक्रियतेऽत एव भावनाविशेष्यविरहादनन्वितैव संख्येत्याख्यातवादस्थदीधितिग्रन्थः संगच्छते । तन्मुख्यविशेष्यताक-

१. पूर्ववत् = भावप्रधानमित्यंशवत् । २. 'न केवला प्रकृतिः प्रयोक्तव्या नापि केवलः प्रत्ययः' ।

सूत्रादिस्थक्रियाप्राधान्यबोधकभाष्याच्च धात्वर्थभावनाप्राधान्यमवसीयते[१]।

❁ दर्पणः ❁

भूवादीति। इत्थं हि तत्र भाष्यम् "का तर्हीयं वाचोयुक्तिः? पचति भवति त्वं पचसि भवसि, पक्ष्यति भवतीति, सैषा वाचोयुक्तिः—पचादिक्रिया भवतिक्रियायाः कर्त्र्यो भवन्ति" इति। तेन चाऽऽहत्यैव[२] पचाद्यर्थक्रियाकर्तृकभवनक्रियायाः प्राधान्यं प्रतिपाद्यते। धात्वर्थक्रियाया आख्यातार्थविशेषणत्वाभ्युपगमे तु स्वस्वार्थविरुद्धत्वेन पदार्थान्तरे विशेषणतयाऽन्वये नैराकाङ्क्ष्येण भवत्यर्थक्रियायामाख्यातार्थविशेषणपचादिक्रियाणामन्वयाऽसम्भवेन तद्विरोधोऽप्रतिरोध एव स्यादिति भावः। **सूत्रादी**त्यादिना, 'प्रशंसायाम्' इति सूत्रपरिग्रहः।

ननु 'भावप्रधानमाख्यात'मिति निरुक्तेन तिङन्ते भावनाऽपरपर्य्यायभावप्राधान्यं प्रतिपाद्यते, सा च नैयायिकमते कर्त्राख्याते कर्तृत्वं—कृतिः, कर्माख्याते कर्मत्वं—फलं, तन्निरूपिताऽऽश्रयत्वं वा। तैः सङ्ख्याकालातिरिक्ताऽऽख्यातार्थस्य भावनापदव्यपदेश्यत्वोपगमात्, भावाऽऽख्याते तु धात्वर्थव्यापार एवाऽनुवादकत्वात् तदाख्यातस्य। प्राधान्यं च तस्याः प्रकृत्यर्थापेक्षम्।

'समानप्रत्ययोपात्तत्वप्रत्यासत्त्या फलमात्रं धात्वर्थ' इति वदतां मीमांसकानामेतदपि भाष्यं मूलं, तत्र लडाद्यर्थकालान्वयोपगमे तु तदपेक्षमपि, उक्तभाष्येऽपि क्रियापदार्थस्तत्सम्मतभावनैव। अत एव, "क्रियां पृष्टस्तिङाऽऽचष्टे" इत्येवोक्तं, न तु तिङन्तेनेति।

कृत्यादिरूपभावनाया आख्यातार्थत्वे मानं तु भूवादिसूत्रस्थं 'कथं ज्ञायतेऽयं प्रकृत्यर्थोऽयं प्रत्ययार्थ' इति प्रघट्टकेऽन्वयव्यतिरेकाभ्यां शक्तिग्राहकम्—'इह पचतीत्युक्ते कश्चिच्छब्दः श्रूयते, पच्शब्दश्चकारान्तः, अतिश्च प्रत्ययः, अर्थोऽपि कश्चिद् गम्यते, विक्लित्तिः कर्तृत्वमेकत्वम्। पठतीत्युक्ते कश्चिच्छब्दो हीयते

❁ काशिका ❁

बोधानुभवेनेतरविशेष्यताकबोधविरहादित्यर्थकत्वात्। धात्वर्थे निरूपकतासंबन्धेन भावनाप्रकारकबोधसंभवेन यथाश्रुतेऽसंगतेः, तिङर्थभावनाया धात्वर्थविशेष्यताकबोधस्यान्यत्र क्लृप्तस्यापलापापेक्षया एतादृशनिरुक्ताद्यनुरोधेन तादृशबोधस्वीकारस्योचितत्वाच्च। मीमांसकनये प्रत्ययार्थव्यापाररूपभावनायाः प्राधान्यस्यैव संभवात्, तथा च 'पचती'त्यादावाख्यातप्रत्ययार्थः कृत्यादिरूपा भावना, सैव च प्रधानमिति मतमेव सम्यक्, प्रकृतिप्रत्यययोरिति नियमस्यासंकोचेनैव

१. धात्वर्थभूताया भावनायाः प्रत्ययार्थापेक्षयापि प्राधान्यमिति निश्चीयत इति तदर्थः, अत्र हेतुद्वयं 'निरुक्ता'दिति 'भाष्या'दिति। २. तेन = भाष्येण, आहत्यैव = कण्ठस्वरेणैव, स्पष्टमेवेति यावत्।

※ दर्पणः ※

कश्चिदुपजायते, कश्चिदन्वयी, पचछब्दो हीयते, पठ्शब्द उपजायते, अतिशब्दान्वयी। अर्थोऽपि कश्चिद्धीयते, कश्चिदुपजायते, कश्चिदन्वयी। विक्लित्तिर्हीयते, पठिक्रियोपजायते, कर्तृत्वमेकत्वं चान्वयि। तेन मन्यामहे यः शब्दो हीयते तस्याऽसावर्थो योऽर्थो हीयते, यः शब्द उपजायते तस्याऽसावर्थो योऽर्थ उपजायते, यः शब्दोऽन्वयी तस्याऽसावर्थो योऽर्थोन्वयी' इति भाष्यम्। तत्राऽतेः प्रत्ययस्य कैश्चित्पूर्वाचार्यैः कल्पनाद्, 'अतिश्च प्रत्यय' इत्युक्तमिति कैयटः। पच्यते पठ्यते इत्यादावप्युक्ताऽन्वयव्यतिरेकोहेन कर्मत्वस्याप्याख्यातार्थत्वं, न्यायसाम्यात्, तत एवाऽवधार्य्यते। किञ्च—'भावप्रधानम्' इति निरुक्तम्,—तद्भाष्यस्वरसात् सकलकारकसङ्ख्याविशिष्टभावनाया धातुत्वमाश्रित्य प्रवृत्तम्,—अत एव नामलक्षणनिर्वचने न कारकस्य तत्र[1] नामार्थत्वेनोल्लेखः, तस्य धातुलभ्यत्वेन नामार्थत्वाभावादिति तदाशयात्[1]।

नच रूपप्सूत्रस्थभाष्यप्रामाण्यात् क्रियाया एकत्वसत्त्वेऽपि द्वित्वाऽऽदिसत्त्वे मानाऽभावात् कथं तथोक्तसङ्गतिरिति वाच्यं, परेत्वित्यादिना वक्ष्यमाणरीत्या कारकगतायास्तस्यास्तत्राऽऽरोपसम्भवात्। कालसङ्ख्ययोर्द्योत्यत्ववत् कारकस्याऽपि द्योत्यत्वं न्यायसाम्यात्। [तस्य प्रत्ययार्थत्वोपगमे पाचकः पक्व इत्यादाविव प्राधान्यापत्तेः। जात्यतिरिक्तपदार्थस्य विशेषणताया द्योत्यत्वस्यैव तन्त्रत्वात्। अत एव, 'स्त्रियाम्' इति सूत्रे भाष्ये प्राधान्याऽऽपत्तिभिया लिङ्गस्य वाच्यतापक्ष उपेक्षितः। वाच्यस्याऽपि प्रकृत्यर्थविशेषणत्वे तदसङ्गतिः स्पष्टैव।

न चोक्तकल्पे, 'ग्रामं गच्छति' इत्यत्र कर्मबोधवद्धातोरपादानादिकारकविशिष्टक्रियाबोधाऽऽपत्तिः, पञ्चम्यादिरूपसमभिव्याहृतद्योतकविभक्तेरभावात्। तत्र कर्तृकर्मणोस्तिङ्समभिव्याहृतद्वितीयादिविभक्तिश्च द्योतिका, अन्येषां त्वन्याः। न हि स्वप्रकृतिकप्रत्ययत्वमेव स्वार्थद्योतकतायां तन्त्रम्, उपसर्गाणां तदनापत्तेः। किंतु स्वसमभिव्याहृतप्रत्ययनिपातान्यतरत्वम्। तच्च तण्डुलादिपदोत्तरविभक्तेरप्यऽक्षतम्, द्रव्यस्य संख्याऽविशेषितस्य तत्त्वे नाम्नः संख्याभानाऽऽपत्त्या तदर्थकत्वमावश्यक मिति तद्भावः। अत एव "भावकालकारकसंख्याश्चत्वारोऽर्था आख्यातस्य" इति भाष्यस्थकारकपदस्याऽसङ्कुचितवृत्तिताऽपि सङ्गच्छते।

यदि चान्यप्रकृतिकविभक्तेरन्यप्रकृत्यर्थद्योतकतायाः क्वाप्यदृष्टचरत्वान्नोक्ताऽऽशयवर्णनं साधीय इति विभाव्यते, तदापि संख्याकालकर्तृत्वकर्मकारकविशिष्टक्रियाया धात्वर्थत्वमादाय तत्प्रवृत्तिः। आख्यातस्यैव तादृशक्रियाद्योतकतासम्भवात्।

१ तत्र = निरुक्तभाष्ये। तदाशयात् = निरुक्तभाष्याशयात्।

❀ दर्पणः ❀

न चास्त्वेवमेवाऽऽशयः—वाच्यताकल्पोक्तकार्यकारणभावकल्पनप्रयुक्तलाघवस्योपोद्बलकत्वादिति वाच्यम्। यत् तादृशमतं प्रक्रियादशायां 'चक्षुःश्रुत्युक्तिविश्वस्तैरप्याश्रयितुमशक्यम्, प्रागेव' तु प्रकृतिप्रत्ययाऽर्थविवेचनं चतुरैराक्षपादैः। तथाहि—कारकविशिष्टक्रियाया धात्वर्थत्वे, 'लः कर्मणि' इति विधिवैयर्थ्यापत्तिः। नच तस्य द्योतकत्वप्रतिपादकता—शानजादेरपि तथात्वाऽऽपत्त्या तत्राऽपि कर्त्रादीनां क्रियाविशेषणतया भानापत्तेः।

किञ्च चैत्रौ पचत इत्यादौ चैत्रादिगतसंख्यायास्तत्रारोपे मानाभावः, वाचकतामते कर्त्राद्यंशे तद्भानोपगमेन प्रयोगप्रामाण्योपपत्तावप्रामाण्याऽभ्युपगमस्याऽन्याय्यत्वात्। स्वाश्रयाऽऽधेयत्वसंबन्धेन द्वित्वादेस्तत्र सत्त्वेऽप्यव्यावर्त्तकतया विशेषणत्वाऽभावेन तद्वैशिष्ट्यस्य तत्राऽसम्भवाच्च, न हि द्वित्वाश्रयाश्रितं घटादिरूपं क्रिया वा 'द्वे' इति व्यवह्रियते। अधिकमग्रे वक्ष्यते।

किञ्च—कर्तृकर्मणोः पदार्थैकदेशतया तत्र देवदत्तादीनामन्वयाऽसम्भवः। "पदार्थः पदार्थेनाऽन्वेति" इति व्युत्पत्तेः। तदन्वयाऽभ्युपगमेऽपि धात्वर्थेऽभेदेन विशेषणतया स्तोकादिपदवन्नपुंसकत्वाऽऽपत्तिश्च। अपिच क्रियाविशेषणत्वेनोपस्थितस्य कर्त्तुर्विशेषेणाऽऽकांक्षाविरहात् पचतीत्युक्ते कः कीदृगिति प्रश्नाऽनुपपत्तिः। वक्ष्यति हि ग्रन्थकृत्—'नहि गुणभूतः कर्त्ता निषेधं स्वाङ्गत्वेन ग्रहीतुमलम्' इति। अत एवैतत्प्रामाण्यात् प्रत्ययवाच्यत्वं, कर्तुर्धात्वर्थविशेषणत्वं चेति गर्जन्तः परास्ताः। प्रत्ययस्य द्योतकतायामेव तन्निर्भरस्य दर्शितत्वात्। प्रत्ययार्थप्राधान्यस्यैव ततो लाभाच्च।

नच भावनायाः प्रत्ययवाच्यतापक्षेप्युक्तप्रश्नाऽनुपपत्तिर्दुःसमाधेयैवेति वाच्यम्, शक्तिभ्रमाल्लक्षणया वोपस्थितस्य कर्त्तुः साकाङ्क्षत्वसम्भवात्।

किञ्च 'प्रत्यायानां प्रकृत्यर्थाऽन्वितस्वार्थबोधकत्वम्' इतिव्युत्पत्तिसिद्धविभक्त्यर्थसंख्याप्रकारकबोधं प्रति विशेष्यतया प्रकृतिजन्योपस्थितेर्हेतुत्वस्य कर्त्रादावभावेन सङ्ख्याऽन्वयाऽसम्भवः। आख्यातार्थसङ्ख्याप्रकारकबोधे आख्यातार्थकर्तृकर्मोपस्थितेर्हेतुत्वकल्पनमप्याग्रहमूलकमेव, पदार्थयोराधाराधेयभावेनाऽन्वये विभिन्नपदजन्योपस्थितेस्तन्त्रत्वात्, विभक्त्यर्थकर्त्तुर्लिङ्गानन्वयिनोऽद्रव्यतया तत्र सङ्ख्यान्वयासम्भवात्, "गुणानां च परार्थत्वाद्" इति न्यायाच्च, मन्मते अयोग्यतया तस्याः स्वप्रकृत्यर्थानन्वयेऽपि प्रकृत्यर्थान्वयनियमोऽक्षत एव, "अणुरपि विशेषोऽध्यवसायकर" इति न्यायात्।

१. चक्षुःश्रुतिः = फणी—पतञ्जलिः, तदुक्तिविश्वस्ताः भाष्यानुयायिनः।—भाष्यप्रमाणकाः।
२. प्रागेव = अत्यन्तमेव—'अशक्य'मिति शेषः। द्रागेवेतिवा पाठः।

❀ दर्पणः ❀

किञ्चाऽऽख्यातस्य कर्त्रर्थकत्वे राजसम्बन्धिपुरुषाऽभिन्नकर्तृकं गमनमित्यभिप्रायेण—राज्ञः पुरुषो गच्छतीतिवत् स्वस्वामिभावादिसम्बन्धेन राज्ञः कर्त्रन्वयविवक्षया, 'राजा पुरुषो गच्छती'ति प्रयोगापत्तिः। नच तत्र षष्ठीप्रसक्तिः, तदर्थस्य प्रातिपदिकार्थविशेष्यतया विवक्षायामेव तत्प्रसरात्। व्यक्तीभविष्यति चैतदुपरिष्टात्। आख्यातार्थकर्तुरनामधात्वर्थत्वेन "नामार्थधात्वर्थयोः" इति व्युत्पत्तिविपतया अप्यभावात्।

नच तवापि चैत्रस्य पाकानुकूला कृतिरिति चैत्रस्य पचतीति प्रयोगापत्तिरिति वाच्यम्, षष्ठ्यर्थस्य नामार्थसाकाङ्क्षतयाऽऽख्यातार्थकृतेश्च प्रथमान्तार्थसाकाङ्क्षतया परस्पराकाङ्क्षाविरहात्। "गुरुविप्रतपस्विदुर्गताना"मित्यादाविव पाकादिसम्बन्धितया चैत्रादिविवक्षायां षष्ठ्यन्तप्रयोगस्य सर्वैरेवोपगमाच्च। तस्माद्धात्वर्थक्रियाया आख्यातार्थं प्रति प्राधान्ये निरुक्तमानोपन्यसनं मुधैवेति कोविदा विदांकुर्वन्तु।

पचति–भवती'त्यादौ पाकानुकूलाऽऽख्यातार्थकृतौ भवनाश्रयत्वरूपभवतीति–तिङन्ताऽर्थभावनाऽन्वयोपगमेन पाकविशिष्टकृतौ भवनकर्तृत्वेऽवगते तद्विशेषणपच्यर्थक्रियायामपि तल्लाभात्, 'पच्यादयः क्रियाः—भवतिक्रियायाः कर्त्र्यो भवन्ती'ति भाष्यस्थादिपदस्य हेतुपरतया तेन व्यापाराऽर्थकपचादिशब्दस्य समासे–'पच्याद्यर्थहेतवः क्रियाः कृत्यात्मकव्यापारा भवनक्रियानिरूपितकर्तृत्ववत्यो भवन्ती'त्यर्थस्य तस्माल्लाभाद्वा। तादृशैकवाक्यत्वस्याऽस्माभिरभ्युपगमाच्च भूवादिसूत्रस्थभाष्यविरोधोऽपि। तादृशभाष्यप्रामाण्यादेव च भवन्मते धात्वर्थप्रकारकबोधे,—धातुजन्योपस्थितेर्हेतुत्ववन्मन्मतेऽप्याख्यातार्थभावनाप्रकारकबोधे,–तिङ्जन्यभावनोपस्थितेरपि विशेष्यतासम्बन्धेन हेतुत्वस्य कल्प्यतयोक्तैकवाक्यत्वस्य सूपपादत्वात्।

न चोक्तबोधाभ्युपगमे आख्यातेन कर्तुरबोधनाच्चैत्रादिपदोत्तरं तृतीयापत्तिरिति वाच्यं, तादृशप्रथमान्तार्थप्रकारकबोधे विशेष्यतया तिङ्जन्योपस्थितेर्हेतुतया तस्यां चैत्रस्याऽऽधेयतासम्बन्धेनाऽन्वयाभ्युपगमेन मुख्यविशेष्यतयैव तद्भानेन आश्रयातिरिक्तांशे विशेषणतया कृत्याश्रयबोधनरूपस्याभिधानस्य तत्र सत्त्वात्तृतीयापत्त्यसम्भवात्। नच 'चैत्रः पचती'त्येतावन्मात्रप्रयोगेऽपि चैत्रस्याऽऽधेयतासम्बन्धेनान्वयाऽऽपत्तिरिति वाच्यं, प्रथमान्ताऽर्थप्रकारकबोधे तिङर्थविशेष्यतापन्नभावनोपस्थितेर्हेतुत्वस्यापि कल्पनेनोक्तदोषाऽप्रसक्तेः। नच चैत्रे पाकानुकूला कृतिरित्यत्रेव, 'चैत्रः पचति भवती'त्यादौ सप्तम्यापत्तिर्दुर्वारैवेति वाच्यं, धात्वर्थविशेषणभूताधेयत्वस्य प्रातिपदिकार्थविशेष्यतया विवक्षायामेव

अपिच—आख्यातार्थप्राधान्ये तस्य देवदत्तादिभिः सममभेदान्वयात् प्रथमान्तस्य प्राधान्यापत्तिः, तथाच 'पश्य मृगो धावती'त्यत्र भाष्यसिद्धे-

❀ दर्पणः ❀

सप्तमीविधानात्, एवमाधेयत्वस्य प्रकारतयाऽविवक्षणाच्च ।

इदं चाख्यातार्थकृतिमुख्यविशेष्यकबोधमभिप्रेत्योक्तं, वस्तुतस्तु, 'चैत्रः पचति-भवती'त्यादौ प्रथमान्तार्थविशेष्यकबोधाभ्युपगमेऽपि नैकवाक्यताक्षतिः, भवन-कर्तृत्वाऽन्वितायाा एव पाकविषयकभावनायाश्चैत्रांशे प्रकारतया भानसम्भवात् ।

एतेन कृतिविशेष्यकबोधाभ्युपगमे प्रथमान्तार्थप्रकारकबोधे तिङर्थविशेष्यतापन्न-भावनोपस्थितेर्हेतुत्वकल्पने गौरवमिति दूषणमलग्नं, विशेषणतयैव तदन्वयाभ्युप-गमादित्यरुचेराह—**अपिचेति । अभेदान्वयादिति ।** इदं च तन्मतेऽपि कर्ताऽऽख्या-तार्थ इति स्वीयवासनाऽनुसारेण, नैयायिकमते तु कृतेराख्यातार्थतया तस्या आश्रयत्वेनैव प्रथमान्तपदार्थेऽन्वयादित्यवधेयम् । **भाष्यसिद्धेति ।** 'क्रियाऽपि कृत्रिमं कर्म, क्रियाऽपि हि क्रिययेप्सिता भवति, कया—सन्दर्शनप्रार्थनादिक्रिय-ये'ति 'कर्मणा य'मितिसूत्रस्थभाष्यसिद्धेत्यर्थः । तन्मते 'धावनाऽनुकूलकृतिमान् मृग' इत्यवान्तरवाक्यार्थबोधस्य तत्र जायमानत्वेन धावनस्य कर्त्रवरुद्धतया विशेषणतयाऽन्यत्राऽन्वये नैराकाङ्क्ष्येण दर्शने कर्मतयाऽन्वयाऽयोगात्, किन्तु धावनाऽनुकूलकृतिमान् मृगो दर्शनाश्रयस्त्व'मित्येव बोध एष्टव्यः, एवञ्चैक-मुख्यविशेष्यकबोधजनकत्वरूपैकवाक्यत्वाऽभावात् तद्विरोधो दुर्वार इति भावः ।

❀ काशिका ❀

निर्वाहादित्यत आह—अपि चेति । अभेदान्वयादिति । इदं कर्तुः प्रत्ययार्थत्वपक्षे । कृतेस्त-दर्थत्वपक्षे त्वाश्रयत्वसंबन्धेनान्वयादिति बोध्यम् । प्राधान्यापत्तिरिति । प्रत्ययार्थकृत्यादेरितर-विशेषणतानापन्नतया प्रथमान्तार्थे प्रकारतया बोधजनकसामग्रीसत्त्वान्नैयायिकमतसिद्धतथाविधबोध-स्वीकारापत्तिरिति भावः ।

ननु प्रथमान्तार्थमुख्यविशेष्यकबोधे इष्टापत्तिः, यतस्तदङ्गीकारेणैव प्रथमान्तार्थोद्देश्यकभावना-विधेयान्वयबोधस्य सर्वानुभवसिद्धस्य निर्वाहो भवति, न क्रियाविशेष्यकबोधस्वीकारे 'देवदत्तः पचती'ति वाक्यजन्यबोधदशायां देवदत्तः पाकानुकूलकृतिमान् न वेति संशयानुत्पत्तिनिर्वाहश्च क्रियाप्राधान्यमते न स्यात् । समानविशेष्यकैककोटिप्रकारकनिश्चयस्यैव तत्तदभावकोटिकसंशय-निवर्तकत्वादित्याशङ्कां परिहर्तुमाह—तथा चेति । भाष्येति । 'का तर्हीयं वाचोयुक्तिः' पचति भवति, पचसि भवति, पक्ष्यति भवति' इति प्रश्ने उत्तरं 'पचादयः क्रिया भवतिक्रियायाः कर्त्र्यो भवन्ति' इति भूवादिसूत्रस्थभाष्येत्यर्थः । अत्र 'पक्ष्यति भवती'त्यस्य भविष्यन्ती पाकक्रिया

कवाक्यता न स्यात्, प्रथमान्तमृगस्य धावनक्रियाविशेष्यस्य दृशिक्रियायां कर्म्मत्वापत्तौ द्वितीयापत्तेः,

※ दर्पणः ※

ननु धावनाऽनुकूलकृतिमन्मृगस्यैव कर्मतया दृश्यर्थेऽन्वयान्नोक्तदोषोऽत आह—प्रथमान्तेति। कर्मत्वापत्ताविति। कर्मत्वेन प्रकारतापत्तावित्यर्थः, कर्मतासम्बन्धेन मृगस्य दर्शनक्रियायामन्वयस्त्वसम्भवी, नामार्थधात्वर्थयो'रिति व्युत्पत्तिविरोधाद्वक्ष्यमाणद्वितीयाऽऽपादनविरोधाच्चेति भावः। द्वितीयापत्तेरिति। कर्मणोऽत्र तिङाऽनभिधानेनाऽनभिहिताधिकारीय'कर्मणि द्वितीये'त्यस्य जागरूक

※ काशिका ※

सूक्ष्मरूपेण भवतीत्यर्थः। एतेन भविष्यत्पाकक्रियाकर्तृकवर्तमानभवनस्य बाधात् तादृशप्रयोगानिर्वाह इति दूषणं प्रत्युक्तम्। अत्र क्रिययोः क्रियाकारकभावेनान्वयाङ्गीकारात्तुल्यन्यायेन'पश्य मृग' इत्यत्रापि क्रिययोस्तथा बोधस्तदभ्युपगत इति भावः। एवं 'कर्मणा यमभिप्रैति—' इति सूत्रे—क्रियाग्रहणं कर्तव्यमिति वार्त्तिकखण्डनार्थं 'क्रियापि कृत्रिमं कर्म, क्रियया हि क्रियेप्सिता भवति, कया क्रियया? संदर्शनादिक्रियया' इति भाष्ये उक्तम्। तद्रीत्या धावनक्रियाया दर्शनक्रियां प्रत्यपि कर्मत्वमभिमतमेव। एवं च 'मृगकर्तृकं धावनकर्मकं दर्शन'मित्यर्थे तद्वाक्यंआप्यकृतामभिमतमिति भावः। हरिणाप्युक्तम्—

'सुबन्तं हि यथानेकं तिङन्तस्य विशेषणम्।
तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणम्॥' इति।

'पुरीमवस्कन्द लुनीहि नन्दनम्' इति माघपद्ये 'समुच्चयेऽन्यतरस्याम्' इति सूत्रे कौमुद्युदाहृते स्पष्ट एव तिङन्तार्थक्रियाणां विशेष्यविशेषणभावः।

परमते एकवाक्यतानुपपत्तौ बीजमाह—प्रथमान्तेति। प्रथमान्तमृगपदोपस्थापितस्येत्यर्थः। विशेष्यस्येत्यनेन धावनं प्रति विशेष्यत्वाद्दर्शने साक्षाद्विशेषणत्वादन्तरङ्गादपि प्रधानकार्यस्य बलवत्ताया 'हेतुमिति च' इति सूत्रभाष्यसंमतत्वेनान्तरङ्गामपि प्रथमां बाधित्वा द्वितीया स्यात्, मम तु नायं दोषः, मृगस्य धावनं प्रति विशेषणत्वेनान्तरङ्गाज्जातस्य प्रथमारूपसंस्कारस्यानिवृत्तिरिति सूचितमिति वदन्ति। द्वितीयापत्तेरिति। तथा च धावनाश्रयमृगकर्मकदर्शनाश्रयत्वमित्यर्थे 'पश्य मृगं धावती'ति वाक्यस्यैव संभवेन तादृशवाक्यस्यैवासिद्धिरिति भावः। स्वमते तु न द्वितीयापत्तिः, धावनस्य धात्वर्थतया कर्मभूततद्वाचकधातोरप्रातिपदिकत्वात्, न च द्वितीयाविरहे कर्मत्वभानानापत्तिर्वृत्त्या पदानुपस्थितत्वादिति वाच्यं, मीमांसकनयेऽर्थोपस्थितिमात्रस्यैव शाब्दबोधे हेतुतया पदजन्योपस्थितिं विनापि कर्मत्वप्रकारकबोधसंभवात्, तादृशो-

❀ काशिका ❀

पस्थितिहेतुतावादिमते तु तत्संसर्गकबोधस्यैवाभ्युपगमात्। न च तार्किकमतेऽपि न द्वितीयापत्तिः, धावनक्रियाविशिष्टमृगस्यैव कर्मतासंबन्धेन दृशिक्रियायामन्वयो न तु केवलमृगस्य। विशिष्टस्य शुद्धादनतिरेकेऽपि मृगत्वावच्छिन्नविषयत्वापेक्षया धावनविशिष्टमृगत्वावच्छिन्नविषयताया भिन्नत्वात्। नामार्थधात्वर्थयोः साक्षाद् भेदेनान्वय इति व्युत्पत्तिविरोधोऽपि न। तादृशव्युत्पत्तेः केवलनामार्थधात्वर्थान्वयविषयत्वात्। अतः 'श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः' 'जानामि सीता जनकप्रसूता' [१]इत्यादि संगच्छते। भवन्मते उत्पत्तिपदादितो द्वितीयापत्तेरसंगतिः स्पष्टैव। एवं च प्रथमान्तार्थमुख्यविशेष्यकबोधाङ्गीकारे न कोऽपि दोष इति वाच्यम्। नीलादिविशिष्टघटादेः कर्मत्वबोधे 'नीलं घट'मित्यत्र द्वितीयानापत्तेः, प्रथमापत्तेश्च। न चेष्टापत्तिः। अनभिहितसूत्रस्थभाष्यविरोधात्। तत्र [२]हि 'भीष्ममुदारं कटं कु'र्वित्यत्र विशिष्टस्य कर्मत्वपक्षे कटपदादुत्पन्नया द्वितीयया अभिधाने भीष्मादिपदात्तदुत्पत्तिर्न स्यादिति तिङादिपरिगणनमित्युक्तम्। न च कर्मत्वस्य प्रातिपदिकार्थविशेष्यतया विवक्षायामेव द्वितीया, न तु संसर्गतया विवक्षायामपि, प्रकृतभाष्यग्रन्थश्च कर्मत्वस्य विशेष्यतापर इति न तद्विरोध इति वाच्यम्। भाष्यकारमते सर्वत्र विभक्त्यर्थस्य संसर्गतया भानात् तथा वक्तुमशक्यत्वात्। नीलादिविशिष्टघटादिक्रियायामाहरणादेरकारणत्वादिसंबन्धेन बोधतात्पर्ये नीलो घट आहर विद्वान् ब्राह्मणो देहीत्यादिप्रयोगाणामुक्तार्थे काव्यपुराणादावनुपलम्भात्। नीलो घट आनय शुक्लस्तण्डुलः पचतीत्यादिषु 'तिङसमानाधिकरणे प्रथमा' 'अभिहिते प्रथमा'इत्यनुशासनात् प्रथमाया अप्यनुत्पत्त्या तादृशप्रयोगासिद्धिश्च। एवं 'तथा चोत्पत्तयः शुभाः' इत्यादिप्रयोगा आर्षत्वादेव समाधेयाः। अनार्षस्त्वसाधुरेव। दृशधातोरुत्कटधावनकर्तृकमृगकर्मकदर्शने, मृगकर्तृकोत्कटधावनकर्मकदर्शने वा लक्षणा, इतरपदानि तात्पर्यग्राहकाणि, अतो न व्युत्पत्तिविरोधलेशोऽपि। मृगकर्तृकोत्कटधावनकर्मकदर्शनस्य प्रतिपिपादयिषितस्य बोधनिर्वाहोऽपि भवतीति तु न युक्तम्। उक्तरीत्या लक्षणां विनैव निर्वाहे तदाश्रयणस्यानुचितत्वात्। अनुपपत्तिप्रतिसंधानं विनापि बोधोदयाच्च। ननु तथापि क्रियामुख्यविशेष्यको बोधो न युक्तोऽपि तु प्रथमान्तार्थमुख्यविशेष्यक एव युक्तस्तथा हि 'अनभिहिते कर्तरि तृतीया' इत्यस्य समभिव्याहृततिङादिना कर्तुरवाच्यत्वे तृतीयेति नार्थः शाब्दिकैः स्वीकर्तुं शक्यस्तिङ्सामान्यस्यैव कर्तृनिष्ठशक्तिनिरूपकत्ववाचकतया 'चैत्रेण पच्यते तण्डुल' इत्यत्रापि तृतीयानापत्तेः। कर्तरि यकोऽसाधुत्वादेव चैत्रः पच्यत इत्यादिप्रयोगवारणसंभवे यगाद्यनु तङन्तत्वादेर्गौरवेण वाचकतावच्छेदककोटावनुप्रवेशाभावात्। नाप्यबोध्ये कर्तरि तृतीयेत्यर्थः। चैत्रेण पच्यत इति वाक्यस्य कर्तृविषयकबोधजनकत्वे तद्घटकसकलपदानामपि तद्बोधजनकतया कर्तृतिङ्बोध्यत्वात्तद्दोषतादवस्थ्यात्। न च तच्छाब्दौपयिकाकाङ्क्षाशून्यत्वमेव तद्बोधकत्वं निवेश्यम्' पच्यत इत्यत्र तद्बोधप्रयोजकाकाङ्क्षाशून्यत्वमक्षतमेव।

१ अत्रैतेन 'सीतां जनकप्रसूता'मिति कल्पयन्तो निरस्ताः। २ तत्र = अनभिहितसूत्रभाष्ये।

❀ काशिका ❀

चैत्रादिपदोत्तरतृतीययैव तद्बोधसंभवात्तत्र तादृशाकाङ्क्षाया अकल्पनादिति वाच्यम्। चैत्रेण पच्यत इत्यादौ तृतीयानुपपत्तेः। चैत्रः पच्यत इत्यतश्चैत्रप्रकारककर्तृविशेष्यकक्रियामुख्यविशेष्यकस्य, केवलात् पच्यत इत्यतश्च कर्तृप्रकारकक्रियाविशेष्यकस्य बोधस्योदयात्तत्रानुपूर्वीरूपाकाङ्क्षायास्तच्छाब्दौपयिकत्वावश्यकत्वात्। न च समभिव्याहाररूपैवाकाङ्क्षा विवक्षणीया, प्रकृते त्वानुपूर्वीरूपैव सा तथाविधेति नोक्तदोष इति वाच्यम्। तथा सति चैत्रेण पचतीत्यादावपि तृतीयापत्तेः। तादृशसमभिव्याहारस्य तद्बोधौपयिकत्वाभावात्। तस्मात् तत्तत्प्रातिपदिकार्थविशेष्यतया कर्तृविवक्षायां तत्तत्प्रातिपदिकात् तृतीयेत्येव 'अनभिहिते तृतीया' इत्यस्यार्थो वाच्यः। तथा च चैत्रः पचतीत्यत्रापि चैत्रपदात् तृतीयापत्तिश्चैत्रेण पच्यत इत्यादाविव—कर्तुश्चैत्रपदार्थं प्रति विशेष्यत्वाविशेषात्। तस्मात् प्रथमान्तार्थमुख्यविशेष्यक एव बोधो युक्तोऽङ्गीकर्तुमिति चेदत्र वदन्ति,—प्रातिपदिकार्थविशेष्यकतयेत्याद्युक्तरीत्यनुसरणेऽपि न चैत्रेण पचतीति प्रयोगापत्तिः। क्रियामुख्यविशेष्यकबोधवादिमते कर्तृविशेष्यता? पचायामेव क्रियायां तृतीयया कर्त्रन्वयबोधनात्। एकपदोपात्तत्वप्रत्यासत्त्या पूर्वमेव तिङर्थान्वयबोधस्य जातत्वात्। तिङादेः कर्त्रनभिधायकत्वं तत्तात्पर्यशून्यत्वं, तदतात्पर्ये चैत्रेण पचतीत्यत्र तृतीयायाः साधुत्वेऽपि भावकर्मणोरित्यात्मनेपदेन बाधान्न परस्मैपदं साध्विति न तादृशप्रयोगापत्तिः। चैत्रेण पचतीति प्रयोगस्तत्र स्यादित्यपि न, कर्तृतात्पर्याभावेन शपोऽविषयतया यको दुर्वारत्वात्। तथा च तत्तत्प्रातिपदिकार्थस्य तिङाद्युपस्थितकर्त्रन्वयाविवक्षायां ततस्तृतीयेति तदर्थः। तथा च तादृशकर्त्रनन्वितत्तत्प्रातिपदिकार्थविशेष्यत्वेन कर्तृविवक्षया तृतीयेति पर्यवसितार्थ इति न कोऽपि दोषः। यद्धात्वर्थकर्तरि तृतीयादिकं विधित्सितं समभिव्याहृततिङाद्युपस्थाप्यतद्धात्वर्थकर्त्रनन्वितत्वमुपादेयमतो भुञ्जानेन चैत्रेण पच्यत इत्यत्र शानजर्थकर्त्रन्वितत्वेऽपि चैत्रस्य न चैत्रपदात् तृतीयानुपपत्तिः। पचिक्रियाकर्त्रनन्वयात्। तत्तद्धात्वर्थक्रियाव्यक्तीः तत्तद्व्यक्तित्वेनोपादाय तथाविधतत्तत्क्रियाकर्त्राद्यनन्वितत्वं निवेश्यम्। तेन चैत्रेण दृश्यमानं मैत्रं देवदत्तः पश्यतीत्यादौ न मैत्रादिपदाद् द्वितीयानुपपत्तिः। वस्तुतः कर्तुः समभिव्याहृततिङादेस्तात्पर्यशून्यत्वे [1]कर्तृपरप्रातिपदिकात् तृतीयेति 'अनभिहिते कर्तरि तृतीया' इत्यस्यार्थः। चैत्रेण पच्यत इत्यत्र तिङ्प्रत्ययस्य कर्त्रतात्पर्यकत्वाच्चैत्रः पचतीत्यत्र तस्य तत्तात्पर्यकत्वात्तृतीयातच्छून्यप्रयोगनिर्वाहः। एवमेव 'अनभिहिते कर्मणि द्वितीया' इत्यादेरर्थोऽवसेयः। ननु पक्वानि भुङ्क्ते चैत्रः, पक्त्वा भुज्यत ओदन इत्यादौ क्रमेण कृता कर्तृकर्मानभिधानाच्चैत्रपदात्तृतीयाया ओदनपदाद् द्वितीयाया आपत्तिः। न च समभिव्याहृततिङाद्यभिहितत्वसामान्याभावस्यैव विवक्षणात् प्रथमे कर्तुः कृतानभिधानेऽपि तिङाभिधानाद्, द्वितीये कृता कर्मणोऽनभिधानेऽपि तिङाभिधानान्नोक्तदोष इति वाच्यम्। चैत्रेण पक्वमोदनं मैत्रो भुङ्क्ते, पाचकेन चैत्रेण

१ देवदत्तादिपदात्।

❀ काशिका ❀

भुज्यते ओदन इत्यादौ ओदनचैत्रपदाभ्यां द्वितीयातृतीययोरनुत्पत्त्यापत्तेः, कृता कर्मणः कर्तुश्चाभिधानादिति चेन्न। प्रधानक्रियानिरूपितशक्तेरनभिधाने गुणक्रियानिरूपितशक्तेरभिधानेऽपि तत्तद्विभक्तेः साधुत्वानङ्गीकारात्। तदुक्तं भर्तृहरिभिः[1]—

'प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते ॥
प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते।
यदा गुणे तदा तद्वदनुक्तापि प्रतीयते ॥' इति।

प्रथमकारिकोक्तं प्रधानक्रियानिरूपितशक्त्यनुरोधं प्रपञ्चयति—प्रधानविषयेति। गुणे गुणनिरूपिता अनुक्तापि तद्वदुक्तवत् प्रतीयत इति योजना। तुल्यन्यायाद् गुणनिरूपिताया उक्तत्वेऽपि प्रधाननिरूपितशक्तेरनुक्तत्वे गुणनिरूपिताप्यनुक्तवत् प्रकाशत इत्यपि लभ्यत इति बोध्यम्। अत एव 'प्रासादे आस्ते' इत्यत्र सदिनिरूपिताधिकरणत्वस्याभिधानेऽप्यासिनिरूपिताधिकरणत्वनिमित्तिका सप्तमी सिध्यति। अनभिहित इति पर्युदासाङ्गीकारात्। इदं च 'स्वादुमि णमुल्' इत्यत्र भाष्ये स्पष्टम्। तत्र हि आ च तुमुनः समानाधिकरणेऽनुप्रयोगेण प्रत्यया वक्तव्याः। अन्यथा 'स्वादुंकारं भुज्यते यवागूर्देवदत्तेने'त्यत्र णमुल् 'कर्त्तरि कृ'दिति कर्त्तरि स्यात्। तेनाभिधानाद् देवदत्तशब्दात् तृतीया न स्यादित्यादिकमुक्त्वा'ऽव्ययकृतो भाव' इत्याश्रित्योक्तवचनं खण्डितम्। तत्र कैयटेन—यद्येवं पक्त्वौदनं भुङ्क्ते देवदत्तः पक्त्वौदनं भुज्यते देवदत्तेनेति क्त्वाप्रत्ययेन कर्तृकर्मणोरनभिधानात् पाकापेक्षया तृतीयाद्वितीये कस्मान्न भवतः—इत्याशङ्क्य प्रधानक्रियानिरूपितशक्त्यनुरोधेन पूर्ववत् समाहितम्। एवं चैतद्भाष्याशयप्रकाशिके इमे हरिकारिके इति स्पष्टमेव तद्विदाम्। समानाकारज्ञानभेदाद्विषयताभेदेमानाभावेऽपि तत्तज्ज्ञानक्रियानिरूपितकर्मत्वशक्त्योर्भेदाच्चैत्रेण दृश्यमानं घटं मैत्रः पश्यतीत्यत्र तिङ्प्रकृतिभूतदृश्यर्थनिरूपितानभिहितकर्मत्वशक्तिप्रयुक्तद्वितीयासिद्धिः। विषयताया द्वितीयाद्यर्थत्वं तु नानुशासनसिद्धम्। आवरणभङ्गानुकूलव्यापारस्य विषयतासंबन्धावच्छिन्नज्ञानानुकूलात्ममनोयोगरूपव्यापारस्य वा दृश्याद्यजानात्यर्थत्वेन फलस्य क्रियादिभेदेन भिन्नतया फलरूपत्वेऽपि कर्मत्वशक्तेर्न क्षतिरित्यलं प्रसङ्गागतविचारप्रपञ्चेन।

'आनय धावति मृग इत्येकं वाक्यं न स्यात्। क्रियायाः प्राधान्यवादिमते क्रियाया आनयनकर्मत्वासंभवात्। मन्मते तु धावनविशिष्टमृगस्य तत्संभवान्नानुपपत्तिरेकवाक्यताया' इति तु न शङ्क्यम्। 'शिखी ध्वस्त' इतिवदुपपत्तेः। एवमेव ब्राह्मणानां शतं भोज्यतामित्यादिप्रयोगसंगतिः। तादृशैकवाक्यत्वे मानाभावाच्चेति दिक्। एतेन 'भावप्रधानमाख्यातम्' इति निरुक्ताद्यनुरोधात् तिङर्थस्य क्रियां प्रति विशेषणत्वोपगमेऽपि 'पचति, देवदत्त' इत्यत्रैककर्तृकपचिक्रियाश्रयो देवदत्त

१ भर्तृहरिभिति शेषः। भर्तृहरिकारिके व्याचष्टे—प्रधानेति।

नचैवमप्रथमासामानाधिकरण्यात् 'शतृप्रसङ्गः, 'एवमपि द्वितीयाया दुर्वारत्वेन,—'पश्य मृग' इत्यादिवाक्यस्यैवाऽसम्भवापत्तेः।

नच 'पश्ये'त्यत्र 'त'मिति कर्माध्याहार्य्यं, वाक्यभेदप्रसङ्गात्,

उत्कटधावनक्रियाविषयस्यैव दर्शनकर्मतयाऽन्वयस्य प्रतिपिपादयिषितत्वादध्याहारेऽनन्वयापत्तेश्च।

एवञ्च 'भावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारण'मिति नैयायिकोक्तं नादरणीयम्।

❀ दर्पणः ❀

त्वादिति भावः। **एवमिति**। मृगपदोत्तरं द्वितीयाप्रसङ्गे इत्यर्थः, शतृशानज्विधौ लडर्थकर्त्तुः प्रथमान्तार्थसामानाधिकरण्येन विशेषितत्वान्मृगपदस्य द्वितीयान्तत्वे तदापत्त्या द्वितीया न भविष्यतीति शङ्कितुराशयः, न हि शत्रापत्तिर्द्वितीयाप्रतिबन्धिका, किन्तु कर्मणोऽभिधानम्, तदभावसत्त्वाच्च द्वितीया दुर्वारेत्याशयेन समाधत्ते—**एवमपीति**। **असम्भवापत्तेरिति**। मृगस्य कर्मतया दृश्यर्थेऽन्वयोपगमे धावन्तं मृगं पश्येति वाक्यस्यैवोचितत्वादित्यर्थः। ननु 'अर्थैक्यादेकं वाक्यं साकाङ्क्षञ्चेद्विभागे स्या'दिति जैमिनिसूत्राद् 'विच्छिद्य पाठे साकाङ्क्षत्वे सत्येकार्थप्रतिपत्तिजनकत्वमेकवाक्यत्व'मित्यर्थो लभ्यते, प्रकृते तमित्युक्ते कमित्याकाङ्क्षासत्त्वाद्, यथाकथञ्चिद् वाक्यद्वयस्य धावनानुकूलकृतिमन्मृगकर्मकदर्शनरूपैकार्थप्रतिपादकत्वाच्च न वाक्यभेदप्रसङ्गोऽत आह—**उत्कटेति**। **अध्याहार इति**। पूर्वाऽनुपात्ताकाङ्क्षितपदस्याऽनुसन्धाने इत्यर्थः। **अनन्वयापत्तेश्चेति**। तत्पदेन मृगस्य, धावनाऽनुकूलकृतिमन्मृगस्य वा परामर्शेऽपीप्सितस्य तादृशधावनक्रियायां दृश्यर्थकर्मत्वान्वयस्य तद्वाक्याद्भानाऽनुपपत्तेरित्यर्थः। उपसंहरति—**एवञ्चेति**। आख्यातार्थविशेष्यकबोधाऽङ्गीकर्त्तृनये एकवाक्यताऽनुपपत्तिरूपदूषणदार्ढ्ये चेत्यर्थः। **नादरणीयमिति**। उक्तदोषग्रस्तत्वादिति भावः। स्वमत-

❀ काशिका ❀

इति प्रथमान्तार्थमुख्यविशेष्यकबोधसंभवात् स एवाङ्गीक्रियतामिति प्रत्युक्तम्। कुतो वाक्यभेद इत्यत आह। **अध्याहारे इति**। **अनन्वयापत्तेश्चेति**। चो हेत्वर्थः। तथा च परस्परम-नन्वयापत्त्या भाष्यकृदभिमतैकवाक्यत्वहानिरित्यर्थः। परमतदूषणमुपसंहरति—**एवं चेति**। एवम्। उक्तरीत्या कर्तुराख्यातार्थत्वे धात्वर्थप्राधान्ये च। **भावनाप्रकारकेति**। संख्याकालाद्यतिरिक्तस्तिङर्थो भावना। अत एव रथो गच्छति चैत्रो जानातीत्यादिजन्यबोधसाधारण्यम्।

१. 'लटः शतृशानचा'वित्यत्राऽप्रथमासामानाधिकरण्यस्यैव हेतुत्वात्। २. एवमपि = शतृप्रसङ्गेऽपि।

किन्तु,—आख्यातार्थकर्तृप्रकारकबोधे धातुजन्योपस्थितिर्भावनात्वावच्छिन्नविषयतया कारणमिति कार्यकारणभावो द्रष्टव्यः[१]।

भावनाप्रकारकबोधं प्रति तु—कृज्जन्योपस्थितिवद् धात्वर्थभावनो-

❀ दर्पणः ❀

निष्कर्षमाह—किन्त्विति। फले व्यभिचारनिरासायोपस्थितिविशेष्यतां विशिनष्टि—भावनात्वावच्छिन्नेति। ननु कृत्स्थले त्वन्मतेऽप्याख्यातस्य धात्वर्थमुख्यविशेष्यकबोधजनकत्वनियमभङ्गप्रसङ्गोऽत आह—पश्येति। तथाचोक्तनियम एतदतिरिक्तविषयक इति भावः। ननु धावनकर्तृत्वविशिष्टमृगरूपवाक्याऽर्थस्य कर्मतया दर्शनेऽन्वयः, तथाच न 'नामार्थयो'रिति व्युत्पत्तिविरोधः, वाक्यस्यानामत्वात्, अत एव न ततो द्वितीयापत्तिरपि, धावनविशिष्टस्य दर्शनकर्मत्वाऽवगतौ विशेषणीभूतधावनस्यापि कर्मतालाभाच्च न प्रतिपिपादयिषितान्वयालाभोऽपि, 'चैत्रः पचति भवती'त्यादौ तूक्तदिशैकवाक्यत्वमुपपादितमेव, तथाचोक्तकार्य्यकारणभावकल्पे कथं तदनुरोधो बीजमत आह—दिगिति। [२]तदर्थस्त्वेवंरीत्या वाक्यैकवाक्यताप्रतिपादने भाष्यकृत्संमतपदैकवाक्यतया प्रतिपिपादयिषितान्वयालाभ एव, किं चाभेदेन नीलविशिष्टघटस्य कर्मत्वे प्रतिपिपादयिषिते 'नीलं घटं जानाती'त्यादौ द्वितीयानुपपत्तिरिति।

❀ काशिका ❀

कारणमिति। विशेष्यतासंबन्धेन भावनाप्रकारकशाब्दबोधं प्रति तत्तत्प्रथमान्तार्थनिष्ठविशेष्यतासंबन्धेन तत्तत्प्रथमान्तपदजन्योपस्थितिः कारणमित्यर्थः। तेन समूहालम्बनोपस्थितित्रिपयतामादाय नातिप्रसङ्गः। भावनात्वावच्छिन्नेति। इदं धातुना भावनात्वप्रकारकबोध इत्यभ्युपेत्य। यदि तु विशेषरूपेणैव बोधनानुभवानुरोधाद्विशेषधर्मावच्छिन्ने एव शक्तिस्तर्हि तत्तद्धात्वर्थतावच्छेदकविशेषरूपावच्छिन्नविषयतयेति बोध्यम्। कार्यतावच्छेदकस्तु विशेष्यतासंबन्धो बोध्यः। तिङर्थकर्मप्रकारकबोधे व्यभिचारवारणाय कार्यतावच्छेदकदिशि कर्तृप्रकारकत्वनिवेशः। एवं तिङर्थप्रकारकबोधे तत्तत्फलनिष्ठविशेष्यतासंबन्धेन धातुजन्योपस्थितिः कारणमित्यपि कार्यकारणभावो द्रष्टव्यः। ननु धात्वर्थव्यापारस्य कृदर्थ प्रत्येव प्रकारत्वं स तिङाद्यर्थ प्रतीति नियमनिर्वाहाय भावनाप्रकारकशाब्दबोधे कृज्जन्योपस्थितिः कारणमिति कार्यकारणभाव आवश्यकः। तथा च पचत्यादितः क्रियाप्रकारकक्रियाविशेष्यकबोधो न संभवति, तद्धेतुभूतकृज्जन्योपस्थितेरभावादित्याशङ्कां निराकर्तुमाह—भावनेति। कृज्जन्योपस्थितिवदिति। यद्यपि यत्र कृज्जन्योपस्थितौ शब्दाविज्ञानात् तदर्थोऽपि विषयस्तादृशसमूहालम्बनोपस्थितिविषयता घटाद्यर्थेऽप्यस्तीत्यतिप्रसङ्ग-

१ द्रष्टव्यः = स्वीकरणीयः। २ तदर्थः = दिगर्थः।

पस्थितिरपि हेतुः, 'पश्य मृगो धावति,' "पचति भवती'त्याद्यऽनुरोधादिति दिक्।

❀ दर्पणः ❀

अत्र नैयायिकाः, धावनक्रियाकर्तृत्वावरुद्धमृगस्य कर्मतासम्बन्धेन दृश्यर्थेऽन्वयोपगमात् न पदैकवाक्यताभङ्गः, तदवरुद्धत्वं च तदन्वयितया तात्पर्यविषयत्वम्, नचैवं कर्मतासंसर्गेण तण्डुलस्याप्यन्वयसम्भवा'त्तण्डुलः पचती'ति प्रयोगापत्तिरिति वाच्यं, यतो न वयं सामान्यतः कर्मत्वादिभेदसम्बन्धेन नामार्थस्य धात्वर्थेऽन्वयमभ्युपेमः, किन्तु क्रियान्तरकर्तृत्वाऽवरुद्धस्य, नच तण्डुलस्तथा, येन पच्याद्यर्थे तस्य कर्मतासंसर्गः स्यात्, अत एव 'काष्ठं भस्मराशिः करोती'ति न प्रयोगः, भस्मराशेः कर्तृत्वानवरुद्धत्वात्, 'काष्ठं भस्मराशिः क्रियते' इत्यादौ कर्मत्वान्तरावरुद्धक्रियायां तु तदनवरुद्धस्यापि व्युत्पत्तिवैचित्र्यात्। तस्य तत्र तत्संसर्गत्वाऽनभ्युपगमे वाक्याऽभेदापत्त्या तद्वाक्यजबोधस्य 'काष्ठं नाश्यते', 'भस्म क्रियते' इति वाक्यद्वयजबोधस्येव भस्म काष्ठविकृतिर्वेति संशयनिवर्त्तकत्वानापत्तेरित्याद्यन्यत्र प्रपञ्चितम्।

एवं चाऽत्र पदैकवाक्यताया अनायासेनैवोपपत्तौ भावनाप्रकारकबोधेधात्वर्थभावनोपस्थितेर्हेतुत्वं निष्प्रमाणकमेव, नाऽपि मृगपदोत्तरं द्वितीयाऽऽपत्तिः, प्रातिपदिकार्थविशेष्यतया कर्मत्वस्याऽविवक्षणात्, अत एव न तत्र षष्ठीप्रसक्तिरपि, संसर्गस्य प्रातिपदिकार्थविशेष्यतया विवक्षायामेव, 'षष्ठी शेषे' इत्यनेन तद्विधानात्, एवं 'घटो नास्ती'त्यादावपि बोध्यं, किन्तु प्रातिपदिकार्थे तत्र प्रथमैव, नाऽपि 'नीलं घटं जानाती'ति प्रयोगाऽनुपपत्तिः, घटस्य क्रियान्तरकर्तृत्वाऽनवरुद्धत्वेन कर्मत्वान्तरविशेषणतानापन्नायां जानात्यर्थक्रियायां कर्मतायाः

❀ काशिका ❀

स्तदवस्थस्तथापि स्वजनकज्ञानीयकृद्वृत्तिप्रकारतानिरूपितविशेष्यतासंबन्धेन कृज्जन्योपस्थितेर्हेतुत्वान्नातिप्रसङ्गः। स्वमुपस्थितिः समूहालम्बनोपस्थितिजनकं शक्तिसंबन्धेन यत्कृत्प्रकारकं तदर्थविशेष्यकं ज्ञानं तादृशज्ञानीयकृन्निष्ठप्रकारतानिरूपितविशेष्यतायास्तदर्थकर्त्रादावेव सत्त्वात्। धात्वर्थभावनेति। धातुजन्यभावनानिष्ठविशेष्यतासंबन्धेनोपस्थितिरित्यर्थः। अन्यथा सत्तादिपदोपस्थितस्यापि सत्तादेर्धात्वर्थानपायादतिप्रसङ्गापत्तेः। भावनापदं च तन्निष्ठविशेष्यतालाभार्थमेव। दिगिति। तदर्थस्तु पूर्वं विस्तरेण निरूपितः। यद्वा ननु तिङन्तसमुदायस्याप्येकवाक्यत्वे 'तिङ्ङतिङः' इति सूत्रे 'अतिङः' इति व्यर्थं तिङन्तात्परं तिङन्तस्य समानवाक्यस्थत्वविरहान्नि-

१ 'पचति-भवती'ति भाष्यप्रामाण्यादित्यर्थः।

॥ दर्पणः ॥

संसर्गत्वाऽसम्भवात्, 'पश्य लक्ष्मण! पम्पायां बकः परधार्मिकः' इत्यादा-'वस्ती'त्यध्याहार्य्यम्, वस्तुतस्त्वेतद्दृष्टान्तेन 'तण्डुलः पचती'त्यादौ बोधा-पादनं न विचारसहं, कर्मताऽन्वयसंसर्गकपच्यर्थविशेष्यकबोधस्याप्रसिद्धौ तथापादनासम्भवात्, 'तण्डुलं पचती'त्यादौ विभक्त्यर्थकर्मत्वसम्बन्धेन तादृशबोधः प्रसिद्ध इति चेत्तर्हि तादृशबोधे द्वितीयान्ततण्डुलपदसमभिव्याहृत-पचतीत्यानुपूर्वीज्ञानस्य हेतुतया तदभावादेवाऽऽपाद्यस्याप्यसम्भवात्, तदुक्तं 'यादृशं फलं क्वचित् प्रसिद्धं तादृशस्यैवाऽऽपत्तिः सम्भवती'ति। एतेन 'पश्य लक्ष्म-णे'त्यत्रा'ऽस्तिर्भवन्तीपरोऽनुप्रयुज्यमानोऽप्यस्ती'ति भाष्यस्थाऽपिशब्दस्वारस्येन वाक्यपरिपोषकक्रियान्तराऽभावेऽस्तेरध्याहार इत्यर्थलाभेन प्रकृते वाक्यपरिपोषिकाया दर्शनक्रियायाः सत्त्वेन तदध्याहारे मानाभावात् कर्मतासंसर्गेणाऽन्वयोऽनुपपन्न इति दूषणमलग्नकम्। एवञ्चाख्याते प्रथमान्तपदसमभिव्याहारे प्रायः प्रथमान्तार्थ-विशेष्यकबोधो निराबाधः, अत एव 'यो यः शूद्रस्य पचति द्विजाऽन्नं सोऽतिनिन्दित' इत्यत्र प्रधानपरामर्शि-तदो द्विजपरामर्शकत्वमनायासेन सङ्गच्छते, ननु प्रथमा-न्तार्थविशेष्यकबोधवादिमते, 'पचतिकल्पं चैत्रः,' 'पचतःकल्पं चैत्रा'वित्यादौ कल्पबाद्यन्तस्य नामतया तद्विशेषणवाचकतया च प्रथमान्तचैत्रादिपदसमानलिङ्ग-वचनत्वापत्तिराख्यातार्थकृतेः प्रथमान्तार्थचैत्रादावभेदान्वयापत्तिश्चेति चेन्न। स्वार्थिकानां प्रायशः प्रकृत्यर्थताऽवच्छेदकगतकुत्सादिद्योतकतया प्रकृते प्रकृत्यर्थताऽ-वच्छेदकक्रियागतेपदसमासत्वस्य कल्पपा द्योतनात्सत्त्वासत्त्वाभ्यां प्रकृत्यर्थतावच्छेद-कसमानस्य भावेपदसमासत्वप्रतिपादककल्पबाद्यन्ते नपुंसकैकवचनान्तत्वयोरौचि-त्यात्। कल्पबाद्यन्तस्य नामत्वेन समानविभक्तिकत्वेन च तदर्थस्य चैत्रेऽभेदाऽन्वया-ऽऽपत्तिरिति तु मूर्खप्रलपितत्वादनादेयं, लक्ष्यार्थकर्त्तुरभेदान्वयस्येष्टत्वात्, शक्या-र्थस्य त्वयोग्यत्वादेवानन्वयात्, 'घटः पट' इत्यादौ व्यभिचारवारणाय व्युत्पत्ता-'वसति बाधके' इति विशेषणाच्चेत्याहुः।

अत्रेदमाभाति,—प्रथमान्तकर्तृवाचकपदसमभिव्याहारे प्रायः प्रथमान्तार्थाऽ-विशेष्यकबोध एव नैयायिकानाम्, क्वचित्तु—'पश्य मृगो धावती'त्याद्येकवाक्यताऽ नुरोधात् तिङर्थभावनाविशेष्यकोऽपि सः, तथाहि—वैयाकरणैरुक्तस्थलीयैकवाक्य-तानुरोधाद्धात्वर्थभावना कारकबोधे धातुजन्यभावनोपस्थितेर्हेतुता कल्प्यते, नैयायि-कैस्तु कर्मतासम्बन्धेन तिङर्थभावनाप्रकारकबोधे धातुजन्यभावनोपस्थितेस्तदिति सममेव। 'देवदत्तः पचति भवती'त्येकवाक्यताऽनुरोधात् प्रथमान्तार्थकर्तृप्रकारक-बोधे तिङर्थभावनोपस्थितेरपि तत् कल्प्यते, तथाचोक्तस्थले आधेयतासम्बन्धेन

इत्थञ्च 'पचती'त्यत्रैकाश्रयिका पाकाऽनुकूला भावना, 'पच्यते'-इत्यत्रैकाश्रया या विक्लित्तिस्तदनुकूला भावनेति बोधः। देवदत्तादिपद-

❀ दर्पणः ❀

मृगविशिष्टधावनाऽनुकूलकृतेः कर्मतया दृश्यर्थेऽन्वये मृगनिष्ठा या धावनाऽनुकूला कृतिस्तत्कर्मकदर्शनाऽऽश्रयस्त्वमिति वाक्यार्थबोधः। धावनविशिष्टकृतौ च बोधित-कर्मत्वस्य, 'सविशेषणे ही'ति न्यायाद्धावने पर्यवसानाच्च प्रतिपिपादयिषितार्थस्याऽपि लाभः, नाऽपि मृगपदोत्तरं द्वितीयाऽऽपत्तिः, मृगकर्मताया एतद्वाक्यादलाभात्, एवञ्च 'पचति भवती'त्यत्राऽपि प्रथमान्तार्थकर्तृविशिष्टा पाककृतिर्वर्त्तमानभावनाऽऽश्रयिकेति बोधात्तत्राप्येकवाक्यत्वाऽक्षतिः। एवञ्च 'प्रकृतिप्रत्ययार्थयो'रिति न्यायाऽविरोधेनैव भाष्यकारोक्तैकवाक्यता न्यायनयेऽपि सूपपादेत्यलं परमताऽनुवर्णनेन।

फलितमाह—इत्थञ्चेति। आख्याताऽर्थकर्तृप्रकारकबोधं प्रति धात्वर्थभावनोपस्थितेः, तादृशकर्मप्रकारकबोधे तादृशफलोपस्थितेर्हेतुत्वे चेत्यर्थः। 'भावने'त्यस्य 'वर्त्तमाने'त्यादिः। कर्माऽऽख्याते भावनाविशेष्यकबोधोपवर्णनं तु प्राचामनुरोधेन।

नव्यास्तु—कर्मकृति[1] फलविशेष्यकबोधस्य दृष्टत्वेन कर्माख्यातेऽपि तद्विशेष्यक-बोध एव न्याय्यः। एवञ्च प्रत्ययार्थे साक्षात्प्रकृत्यर्थविशेष्यान्वयित्वमिति व्युत्पत्तिरपि न विरुध्यते, अत एवेष्यते पुत्र इत्यर्थे, 'पुत्रीयती'ति न, भिन्नार्थकत्वात्, किन्तु पुत्रमिच्छतीत्यर्थे एवेति, 'सुप आत्मन' इति सूत्रे भाष्ये उक्तम्। अन्यथोभयत्राऽपि व्यापारविशेष्यकबोधेन भिन्नार्थकत्वकथनाऽसङ्गतिः, अस्मन्मते त्वेकत्र व्यापारो विशेष्योऽन्यत्रेच्छारूपं फलमिति भिन्नाऽर्थकत्वं स्पष्टमेव। क्यजन्तात्तु कर्मणि प्रत्ययो दुर्लभोऽकर्मकत्वात्, उक्तञ्च कैयटेन—'यदा क्रियाफलस्य प्राधान्यं तदा वाक्यमेव—इष्यते पुत्रः, न तु क्यजन्तस्तस्याऽकर्मकत्वात् कर्मणि प्रत्ययाऽनुत्पादादिति। इत्थञ्च भावनाजन्यैकाश्रयिका वर्त्तमाना विक्लित्तिरिति बोध इत्याहुः।

भावाऽऽख्याते तु भावनैव विशेष्या, तथैवाऽनुभवात्, तिङ् त्वनुवादक एव, किन्तु लट्त्वादिना कालार्थकः, संख्या तु न तदर्थः, कर्त्रादिरूपाऽर्थोपस्थित्यात्मक-हेत्वभावेन तदर्थसंख्याया अन्वयाऽसम्भवात्, किन्तु 'न केवले'त्यादिन्यायेन साधु-त्वार्थमेकवचनमेव 'एकवचनमुत्सर्गतः करिष्यत' इति सिद्धान्तात्।

❀ काशिका ❀

घाताप्राप्तेरिति भाष्यविरोध इति भाव इत्यन्यत्र विस्तरः। इत्थं चेति। प्रत्ययार्थस्य कर्त्रादेर्धात्वर्थविशेषणत्वे तदर्थसंख्यायास्तदर्थकर्त्रादिविशेषणत्वे च। एकाश्रयिकेति। वर्तमानकालिकीत्यपि बोध्यम्। नव्यमते त्वेककर्तृकेति बोधाकारो द्रष्टव्यः। पाकानुकूलेति। विक्लित्त्यनुकूले-

१ 'पक्वस्तण्डुल' इत्यादौ कर्मकृदन्तस्थले।

❀ दर्पणः ❀

'काले युक्ताभिसरणे मुह्यन्ते मृगमोहिकाः ।
उष्ट्रासिकाः समास्यन्ते शय्यन्ते हतशायिकाः ॥'—

—इत्यत्र बहुवचनं तु भाष्यकारप्रयोगादेवेति प्राञ्चः ।

नव्यास्तु—एकवचनस्यौत्सर्गिकत्वं सत्येव गमके, यथाऽव्ययात्तदुत्पत्ताव'व्ययादाप्सुप' इति, अत एव 'ङ्याबि'ति सूत्राऽभावे तिङन्तेभ्यस्तदुत्पत्तिमाशङ्क्य तिङा संख्याया उक्तत्वान्नेति परिहृतं भाष्ये । त्वदुक्तरीत्या तिङा कारकगतायास्तस्या उक्तत्वेऽपि प्रकृत्यर्थगतायास्तस्या अनुक्ततयौत्सर्गिकतया वैकवचनस्याशक्यवारणत्वेन तदसङ्गतिः स्पष्टैव । 'द्व्येकयो'रित्यादे'र्लः कर्मणी'त्यनेनैकवाक्यताऽपि-लकाराः कर्मादौ भवन्ति तेषां स्थाने चैकत्वादौ तिबादयो भवन्तीत्याकारैव, न हि तत्र द्वितीयं कर्मणीत्याद्यस्ति, येन संख्यायाः कारकविशेषणता प्रतीयेत, आवृत्तौ च न मानम्, तस्मात् सर्वत्र संख्यायाः प्रकृत्यर्थ एवाऽन्वयः । कस्यैकत्वादावित्याकाङ्क्षायामुपस्थितत्वात् प्रकृत्यर्थाऽन्वयस्यैवोचितत्वात् । कर्मणीत्यादेरपि विधेयं प्रति विशेषणत्वमेव, 'गुणानां च परार्थत्वा'दितिन्यायेन संख्यायामसम्बन्धात् । कर्मणीत्यादेः कस्य कर्मणीत्याकाङ्क्षासत्त्वेन तत्र धात्वर्थान्वयस्य क्लृप्तत्वात् । क्रियायामप्येकत्वमस्त्येव, 'एका क्रिये'ति रूपप्सूत्रभाष्यात् । एवञ्च तस्य प्रकृत्यर्थेऽन्वयादेकवचनम्, द्वित्वादिकन्तु स्वोत्तरतिङ्वाच्यकारकगतं तत्रारोप्य कर्तृकर्मकेषु तिङ्पु द्विवचनादिसिद्धिः, अत एव न साधने द्वित्वादिसंशयः, क्रियागतसंख्यारोपस्य साधनज्ञाननिमित्तत्वात्, 'अनेकः पचती'त्याद्यनुरोधे साधनेऽपि संख्यारोपस्य तवाऽपि वाच्यत्वात्, तस्याऽप्यन्वयः प्रकृत्यर्थ एव । प्रकृते 'हतशायिकाः शय्यन्ते' इत्यादौ हतशयनसदृशानीत्यर्थे उपमाने बहुत्वोपपादनसामर्थ्येनोपमेये तिङन्तार्थक्रियारूपे उपमानगतबहुत्वारोपेण बहुवचनम्; तिङ्वाच्यकारकगताया एवारोपो नाऽन्यगताया इत्यत्र धात्वर्थशक्तिस्वभाव एव बीजम्, अत एव भावे द्विवचनादि, तदुक्तम्—

'एकत्वेऽपि क्रियाऽऽख्याते साधनाश्रयसंख्यया ।
भिद्यते न तु लिङ्गाख्यो भेदस्तत्र तदाश्रयः ॥' इति ।

एवञ्चाख्यातार्थप्रकारकबोधे धातुजन्योपस्थितिः कारणमित्येक एक कार्यकारणभाव इति लाघवम्, 'प्रत्ययाना'मिति व्युत्पत्तिपरिपालनं चेत्याहुः । तदपरे न क्षमन्ते —औत्सर्गिकैकवचनस्य समयपरिपालनार्थकतया तत्र गमकाऽऽकाङ्क्षाया अभावेन सत्येव गमक इत्युक्तिर्व्यर्था । यदपि गमकतया ङ्याप्सूत्रभाष्योपन्यसनं तत् तथैव, यतस्तदेव भाष्यं क्रियायां संख्यासामान्याभावबोधकं, तथाहि,—ङ्याप्सूत्राऽभावे तिङन्तात् सुबुत्पत्तिशङ्का प्रत्ययार्थकारकसंख्यामादाय प्रकृत्यर्थगतसंख्यामादाय वा

प्रयोगे त्वाख्यार्थकर्त्रादिभिस्तदर्थस्याऽभेदाऽन्वयः।

❀ दर्पणः ❀

वक्तव्या, तत्र प्रकृत्यर्थस्याऽसत्त्वरूपतया संख्यान्वयाऽयोगात् कारकगतसंख्यामादायैव प्रसक्ता सा—लिङ्गोक्तत्वादित्वादित्यनेन निराक्रियतें, समयपरिपालनस्य तिङैव कृतत्वात् तदप्राप्त्यैव तन्निराकरणस्याऽप्रसक्तेः, 'सुप्तिङन्तं पदं' 'तिङ्ङतिङः' इत्यादिसूत्रस्वारस्यादुक्तार्थज्ञापनापेक्षया तिङन्तादौत्सर्गिकैकवचनाभावस्यैव तेन ज्ञापयितुमुचितत्वाच्च। 'एका च क्रिये'ति भाष्यमपि न क्रियायामेकत्वं बोधयति, किन्तु संख्यासामान्याऽभावमेव, कथमन्यथा साधारणैकवचनेनैवोपपत्तौ वचनारम्भसार्थक्यम्। किञ्चोपमाने बहुत्वोपपादनसामर्थ्येनेति वदता—कारके द्वित्वाद्युपपादनसामर्थ्येनेत्यप्युक्तप्रायम्, एवञ्च 'हतशायिका' इत्यत्रोपमाने बहुत्वोपपादकबहुवचनवत् प्रकृते कारके कस्यचिद् द्वित्वाद्युपपादनस्याभावात् तदारोपासम्भवः। न च 'चैत्रमैत्रा'विति द्विवचनादितस्तदवगतिः, 'चैत्रो मैत्रश्च पचत' इत्यादौ तदभावात् कारकान्वयात्प्रागेव चैत्राद्यन्वितायास्तस्याः कारकानन्वितत्वाच्च। भावाख्याते स्वोत्तरतिङ्वाच्यकारकाऽप्रसिद्धया द्विवचनासम्भवाच्च। कस्यैकत्वे इत्याकाङ्क्षाया योग्यजिज्ञास्यसम्बन्धिन्या एवौचित्यात्। क्रियाया असत्त्वेन परिच्छेदकाकाङ्क्षाया एवासम्भवेन तत्र तदन्वयोक्तेः पराहतत्वाच्च। पचतीत्यादिबोधानन्तरं जायमानस्य सर्वसिद्धैकत्वादिवैशिष्ट्येन जिज्ञास्यकारकबोधक—'कः' 'का' विल्यादिप्रश्नस्यानुपपत्त्या सिद्धायाः कारके संख्यान्वयप्रतीतेरेव 'कर्मणी'त्यादिपदानुवृत्तौ मानत्वात्। उक्तवाक्यपदीयस्याप्याख्यातार्थक्रियाया एकत्वेऽपि संख्यासामान्याभाववत्त्वेपि क्वचित् कर्तृकर्मादिबाहुल्येन सा नानेव प्रतीयते इत्यर्थान्न तद्विरोधोऽपि, ततः शब्दमर्यादया धात्वर्थे तिङर्थसंख्याऽन्वय इत्यर्थस्यालाभाच्च। 'गुणानां च परार्थत्वा'दिति तु—प्रधानस्यान्वययोग्यत्वे सत्येव, अत एव कैयटादिभिस्तिङर्थसंख्यायाः कारक एवाऽन्वयः स्वीकृतः, एवञ्च भाष्यकारप्रयोगादन्यत्र भावाख्याते द्विवचनाद्यसाध्वेवेत्यधिकं स्वयमूहनीयम्।

आख्यातार्थकर्त्रादिभिरिति। 'समानविभक्तकयोरेवाऽभेदाऽन्वयं' इति नियमस्य प्रागेव दूषितत्वादिति भावः। अकर्मकस्थलेऽपि फलव्यापारोभयार्थकत्वं

❀ काशिका ❀

त्यर्थः। एकाश्रयिका या विक्लित्तिस्तदनुकूला भावनेति। 'भावप्रधानमाख्यातम्' 'क्रियाप्रधानमाख्यातम्' इति निरुक्तभाष्यानुरोधात् कर्मप्रत्ययान्तजबोधेऽपि भावनायाः प्राधान्यमिति भावः। वस्तुतस्तु कर्मकृदन्ते फलस्य व्यापारं प्रति प्राधान्यं दृष्टमिति कर्मतिङन्तेऽपि तस्यैव मुख्यविशेष्यत्वं युक्तम्। अत एव प्रत्ययार्थे साक्षात् प्रकृत्यर्थविशेष्यान्वयित्वस्य सर्वत्र क्लृप्तस्य न त्यागः। अत एव 'इष्यते पुनः' 'इष्टः पुत्रः' इत्यर्थे न पुत्रीयतीति प्रयोगो भिन्नार्थत्वादपि तु पुत्र-

—'घटो नश्यती'त्यत्र घटाऽभिन्नाश्रयको नाशाऽनुकूलो व्यापार इति बोधः, स च व्यापारः—प्रतियोगित्वविशिष्टनाशसामग्रीसमवधनम्, अत एव तस्यां सत्यां—'नश्यति', तदत्यये—'नष्टः', तद्भावित्वे—'नङ्क्ष्यती'ति प्रयोगः। देवदत्तो जानाति' 'इच्छती'त्यादौ 'देवदत्ताभिन्नाश्रयको ज्ञानेच्छा-

※ दर्पणः ※

धातोरन्यैरपि स्वीकार्य्यमिति सूचयञ्छाब्दबोधप्रकारमाह—**घटो नश्यतीति**। तद्व्यापाराकाङ्क्षायामाह—**स चेति**। **प्रतियोगित्वेति**। प्रतियोगित्ववैशिष्ट्यं तु निरूपकतासम्बन्धेन बोध्यं, तत्समवधानमेव तदनुकूलो व्यापार इत्यर्थः। **अत एवेति**। यतो नाशमात्रं नार्थः, किन्तु प्रतियोगित्वविशिष्टनाशसामग्रीरूपो व्यापारोऽप्यत एवेत्यर्थः। फलव्यापारयोरेकाधिकरण्याच्च न सकर्मकत्वम्; एत-दर्थमेव 'प्रतियोगित्वविशिष्टे'त्युपात्तं, यन्मते नाशमात्रं न धातोरर्थस्तन्मते नाशो-त्पत्त्यनन्तरं नाशस्य सदैव सत्त्वान्नश्यतीति प्रयोगापत्तिस्तस्य ध्वंसाऽप्रतियोगित्वाच्च नष्ट इति प्रयोगाऽनुपपत्तिरिति सूचनाय,—तस्यां सत्यामित्यादिना त्रैकालिकप्रयोग-प्रदर्शनम्। नैयायिकमतं तु लुङर्थनिरूपणे वक्ष्यते। जानात्यादिसविषयार्थकानां ज्ञाना-द्यतिरिक्तव्यापाराद्यर्थकत्वानभ्युपगमे सकर्मत्वाऽनुपपत्तिं सूचयन् स्वमते शाब्दबोधं दर्शयति—**देवदत्तो जानातीत्यादि**। आदिपदग्राह्याऽर्थमाह—**इच्छादीति**।

※ काशिका ※

मिच्छतीत्यर्थे एव। क्यजन्तात् कर्मणि प्रत्ययस्तु दुर्लभोऽकर्मकत्वादित्युक्तं 'सुप आत्मनः—' इत्यत्र भाष्ये। अन्यथा उभयत्रापीच्छानुकूलव्यापारस्यात्ममनःसंयोगाद्यात्मकस्य प्राधान्याविशेषात् तदसंगतिः। मन्मते त्वेकत्र व्यापारो विशेष्योऽपरत्र फलमिति भिन्नार्थत्वं स्पष्टमेव। तथा चोक्तं कैयटेन—'यदा क्रियाफलस्य (कर्मणः) प्राधान्यं तदा 'इष्टः पुत्र' 'इष्यते पुत्र' इति वाक्यमेव, न तु क्यजन्तं; तस्याकर्मकत्वात्, कर्मणि प्रत्ययानुत्पादात्' इति परे प्राहुः।

यद्यपि कर्मप्रत्यये भावनायाः प्राधान्येऽपि तदर्थसंख्यायाः कर्मणि विशेषणत्वं कर्तृप्रत्यये कर्तरि, तावता भिन्नार्थत्वोपपत्तिराश्रयान्वयमादायापि तदुपपत्तिस्तथापि भिन्नमुख्यविशेष्यक-बोधजनकत्वरूपं भिन्नार्थत्वं विवक्षितं तदसंगतिर्दृढैव। यत्किंचिदंशे विभिन्नप्रकारकबोधजनकत्व-मेव भिन्नार्थकत्वं विवक्षितमिति चेदिच्छापदनिर्दिष्टप्रत्ययार्थांशे वृत्तिवाक्ययोर्भिन्नार्थत्वविरहे प्रत्ययावारणेन तस्याकिंचित्करत्वादिति भावः। ननु सर्वधातूनां व्यापारार्थकत्वं न संभवति नश्यतीत्यादौ तदननुभवादत आह—**नश्यतीत्यत्रेति**। **प्रतियोगित्वविशिष्टेति**। अन्य-प्रतियोगिकनाशसामग्रीसमवधानेऽपि घटो नश्यतीत्यप्रयोगात् प्रतियोगित्वविशिष्टेति स्वप्रतियोगि-त्वविशिष्टार्थकम्। **अत एव** = नशधातोरतादृशसामग्र्यर्थकत्वादेव। **इति प्रयोग इति**। तदर्थकत्वाभावे नश्यति नङ्क्ष्यतीति प्रयोगोपपत्तावपि नाशस्यातीतत्वविरहान्नष्ट इति प्रयोगो

द्यनुकूलो वर्त्तमानो व्यापार' इति बोधः, स चान्तत आश्रयतैवेति रीत्योह्यम् ॥ २ ॥

नन्वाख्यातस्य कर्तृ-कर्मशक्तत्वे, 'पचतीत्यत्रोभयबोधापत्तिः, 'कर्तृमात्र-बोधवत् कर्ममात्रस्यापि बोधापत्तिरित्यतस्तात्पर्यग्राहकमाह—

❀ दर्पणः ❀

क्वचिज्जानातीत्यादावित्येव पाठः । **स चेति** । ज्ञानानुकूलो व्यापारश्चेत्यर्थः । तदन्वेषणायात्ममनःसंयोगस्यैव सुलभत्वादाह—**अन्तत इति** । तदनुपस्थिता-वित्यर्थः । **आश्रयतैवेति** । तस्या अनवयवत्वेऽपि साऽवयवत्वारोपाद् व्यापारत्वं निर्वाह्यमिति भावः ॥ २ ॥

उपोद्घातसङ्गत्या शबादीनां द्योतकतां निरूपयितुमाह—**नन्विति** । ननु 'सकृदुच्चरितः शब्दः सकृदर्थं गमयती'ति व्युत्पत्तेर्नैकदाऽर्थद्वयबोधोऽत आह—**कर्तृमात्रबोधवदिति** । मात्रशब्दोऽवधारणे । **तात्पर्येति** । तत्तदर्थप्रतीतीच्छ-योच्चरितत्वरूपतात्पर्यग्रहजनकमित्यर्थः, अत एव कर्तरि शबित्यादौ कर्त्रादिग्रहणं

❀ काशिका ❀

न स्यात् । चिरविनष्टेऽपि नश्यतीत्येव प्रयोगः स्यात् । सामग्र्यर्थकत्वे तु सामग्र्यामेव प्रत्ययार्थकालान्वयान्नोक्तापत्त्यनुपपत्ती इति भावः । इदं च दूषणं वर्तमानध्वंसप्रतियोगित्वरूप-मतीतत्वं प्रत्ययार्थ इति मते । वर्तमानध्वंसप्रतियोगिकालवृत्तित्वस्य तदर्थत्वे तु नोक्तं दूषणमिति बोध्यम् । **अन्तत आश्रयतैवेति** । वस्तुत आत्ममनःसंयोगोऽपि ज्ञानानुकूलः संभवतीति भावः । अत्र फलतावच्छेदकः संबन्धो विषयता तेन घटादेः कर्मत्वमिति बोध्यम् । ज्ञानमेव फलं, तदेव तदनुकूलो व्यापारः, फलतावच्छेदकः संबन्धो विषयता, व्यापारतावच्छेदकस्तु समवाय इति मतान्तरं बोध्यम् । **ऊह्यमिति** । इच्छतीत्यादावूह्यमित्यर्थः ॥ २ ॥

उभयबोधापत्तिः=कर्तृकर्मोभयबोधापत्तिः । उभयत्रापि शक्तेः सत्त्वादित्यर्थः । ननु यत्र तात्पर्यग्रहस्तस्यैव बोधो न त्वपरस्य, एकदोभयबोधे तात्पर्यग्रहसत्त्वेऽप्येकेन प्रत्ययेनैकदो-भयबोधस्याव्युत्पन्नत्वान्नैकदोभयबोधापत्तिरित्यतो दूषणान्तरमाह—**कर्तृमात्रबोधवदिति** । **बोधापत्तिरिति** । हर्यादिपदात् कदाचिदिन्द्रमात्रस्य कदाचिद्धिरण्यादिमात्रस्य बोधोत्पादवदिति भावः । तात्पर्यग्राहकप्रकरणादेः समानत्वादिति भावः । **तात्पर्यग्राहकमिति** । अनादितात्पर्य-ग्राहकमित्यर्थः । तथा च पच्यत इत्यत्र कस्यचित् कर्तृबोधे तात्पर्यसत्त्वेऽप्यनादितात्पर्याभावान्न कर्तृबोध इति भावः ।

१ एकशक्तिनिरूपकार्थविषयकशाब्दबोधं प्रत्यपरशक्तिनिरूपकार्थविषयकतात्पर्यज्ञानस्य हर्यादिनानार्थस्थल इवात्रैकदोभयबोधवारकत्वे त्वाह—**कर्त्तृमत्रेति** ।

फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः ।
व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयाऽन्वयम् ॥३॥

तङादयः फले आश्रयाऽन्वयं द्योतयन्ति, फलाऽन्वय्याश्रयस्य कर्म-त्वात्,—[तद्द्योतकाः—कर्मद्योतकाः] व्यापाराऽन्वय्याश्रयस्य कर्तृ-त्वात्,—[तद्द्योतकाः—कर्तृद्योतका] इति समुदायार्थः । द्योतयन्ति = तात्पर्य्यं ग्राहयन्ति ॥ ३ ॥

नन्वेवं, 'क्रमादमुं नारद इत्यबोधि स' इत्यादौ, 'पच्यते ओदनः स्वयमेवे'त्यादौ च व्यभिचारः, कर्मणः कर्त्तृत्वविवक्षायां कर्त्तरि लकारे सति 'कर्मवत् कर्मणा तुल्यक्रिय' इत्यतिदेशेन यगात्मनेपदचिण्चिण्वदिटा-मतिदेशाद्यगादिसत्त्वेऽपि कर्त्तुरेव बोधाद् व्यापारे एवाश्रयान्वयाच्च,

---

ॐ दर्पणः ॐ

सार्थकम् ; अन्यथा 'लः कर्मणी'त्येतद्विहितलादेशैरेव कर्त्रादिबोधेनान्यलभ्यत्वात्त-द्वैयर्थ्यं स्पष्टमेवेति भावः । मूले—**फलव्यापारोस्तत्रेति** । **तत्रेति** । धातुप्रत्या-र्थयोरित्यर्थः । 'फलव्यापारयोरिति निर्द्धारणे सप्तमीत्याशयेन व्याचष्टे सारे—**फल इति** ।

व्यभिचार इति । यगादीनामन्वये शबादीनां व्यतिरेके चेत्यर्थः, यगादि-सत्त्वेऽपि फले आश्रयाऽन्वयाऽबोधाच्छबाद्यभावेऽपि व्यापारे तिङर्थ आश्रयान्वयात्, तदेवोपपादयति—**कर्मणः कर्तृत्वविवक्षायामित्यादि** । सौकर्य्यातिशयद्योत-

ॐ काशिका ॐ

कारिकायां तत्रेति तयोरित्यर्थकम् । तथा च तयोः—फलव्यापारयोर्मध्ये इत्यर्थः । नन्वेवं तङादयः कर्मद्योतका इत्यादिव्यवहारः कथमुपपादनीय इत्यत आह—फलान्वयेत्यादिना **समुदायार्थ** इत्यन्तेन । शक्त्युद्बोधकत्वरूपद्योतकत्वासंभवादाह—**तात्पर्यं ग्राहयन्तीति** । तत्प्रतीतीच्छां ग्राहयन्ति । तङ् यगादिसमभिव्याहृतो बोध्यः, तेन धत्ते इत्यादौ नातिप्रसङ्गः ॥ ३ ॥

एवम् = तङादीनां फले आश्रयान्वये तात्पर्यग्राहकत्वे । ननु 'भावकर्मणोः'—इत्यादि-सूत्रविहिततङादीनां कथं कर्तरि साधुत्वमित्याशङ्क्याह—**'कर्मवत् कर्मणा'**—इत्यादिना **साधनात्** इत्यन्तेन । मूले—**उत्सर्गोऽयमिति** । **अयं** = तङादिः, कर्मद्योतक इत्यादिः, पूर्वोक्तोऽर्थः । **उत्सर्गः** = प्रायिकः, न सार्वत्रिक इत्यर्थः । कुत इत्याशङ्कायामाह—**कर्मेति** । **विपर्ययात्** = वैपरीत्यात् । **यथागमं** = यथाशास्त्रम्, यथाबोधं वा । तच्च व्याख्याने स्पष्टम् । 'पच्यते ओदनः स्वयमेवे'त्यादौ व्यापारे एवाश्रयान्वये इति स्पष्टयितुं शाब्दबोधं वर्णयति—**अत्र हीति** ।

'अबोधी'त्यत्रापि बुध्यतेः कर्त्तरि लुङ्, तस्य 'दीपजने'ति चिण्, 'चिणो लु'गिति तस्य लुग्—इति साधनादित्याशङ्कायामाह—

उत्सर्गोऽयं कर्मकर्तृविषयादौ विपर्ययात् ।
तस्मात् यथोचितं ज्ञेयं द्योतकत्वं यथागमम्[1] ॥ ४ ॥

कर्म-कर्तृविषयादौ = 'पच्यते ओदनः स्वयमेवे'त्यादौ, अत्र ह्ये'कौदनाभिन्नाश्रयकः पाकानुकूलो व्यापार' इति बोधः ।

क्रमादिति—आदिपदग्राह्यम्, तत्र 'सामान्यविशेषज्ञानपूर्वक एकनारदविषयकज्ञानाऽनुकूलः कृष्णाभिन्नाश्रयकोऽतीतो व्यापार' इति बोधः ।

यथोचितमिति । सकर्मकधातुसभिव्याहृतभावसाधारणविधिविधेयचिण्यगादि कर्मद्योतकमिति भावः ॥ ४ ॥

❀ दर्पणः ❀

नार्थो च तद्विवक्षा तण्डुलादिगताग्निसंयोगादिरूपव्यापारस्यैव फलजनकतया धात्वर्थत्वविवक्षायामित्यर्थः, वस्तुतस्तु—फलस्यापि जनकव्यापारगतपौर्वापर्य्यारोपेण व्यापारत्वेन भानादिति पूर्वमुक्तत्वात्तण्डुलगतफलस्यैव व्यापारत्वेन विवक्षायामित्यर्थः । साधनादिति । तथा च व्यभिचारान्न तङादीनां द्योतकतेति भावः ।

क्रमादित्यादीति । कर्मकर्तृविषयादाविति—मूलस्थादिपदेनेत्यर्थः । सामान्येत्यादि-'क्रमा'दित्यस्य विवरणं, सविषयधात्वर्थनिरूपितकर्मत्वस्य विषयत्वे पर्य्यवसानमित्यभिप्रेत्याह—विषयकेति । सकर्मकधातुसमभिव्याहृतयगादीनां कर्मद्योतकत्वादाह—सकर्मकेति । 'पच्यते तण्डुलः स्वयमेवे'त्यादौ । यगादि तु न तथा, किन्त्वातिदेशिकम् । 'कर्मवत् कर्मणे'ति विहितातिदेशे कार्य्यातिदेशत्वस्याकरे सिद्धान्तितत्वान्न तत्र व्यभिचार इति भावः । भावसाधारणेति । भाव-

❀ काशिका ❀

एकनारदेति । एको यो नारदस्तद्विषयकं ज्ञानमित्यर्थः । अत्र निपातेनेतिशब्देन कर्मणोऽभिधानान्न नारदशब्दोत्तरं द्वितीयेति भावः । नव्यमते तु नारद इत्याकारकं यज्ज्ञानं तदनुकूल इत्यादिशाब्दबोधोऽवगन्तव्यः, तैः क्वचिन्निपातेनाभिधानमिति नानुमन्यते, तिङादिपरिगणनस्यैव भाष्ये उक्तत्वात् । 'सकर्मकधात्वि'ति—समभिव्याहृतान्तोपादानं—तण्डुलः पच्यते स्वयमेवेत्यादौ कर्मवदित्यनेन 'भावकर्मणो'रिति शास्त्रमतिदिश्यते इति पक्षेऽतिप्रसङ्गवारणाय । 'अबोधि श्रीकृष्ण' इत्यादावतिप्रसङ्गवारणाय—भावसाधारणेति । यगादीति । आदिना चिण्वदिट् ।

१. यथागमं = यथाशास्त्रम् ।

एवं सूचीकटाहन्यायेन सोपपत्तिकं 'वाक्यार्थमुपवर्ण्य, 'फलव्यापारयो'रिति प्रतिज्ञातं धातोर्व्यापारवाचित्वं–लडाद्यन्ते भावनाया अवाच्यत्वं

❀ दर्पणः ❀

कर्मणोः 'सार्वधातुके य'गित्यादिविहितेत्यर्थः । तेन,—'दीपजने'त्यादिविहितव्यावृत्तिः ॥ ४ ॥

एवमिति। उक्तप्रकारेणेत्यर्थः। ननु 'फलव्यापारयो'रित्यनेन सामान्यतो धातोः फलव्यापारवाचकत्वप्रतिज्ञातस्योत्तरक्षणे एवोपपत्तिभिस्तद्व्यवस्थापनं कर्त्तुमुचितं, न तु वाक्यार्थनिरूपणानन्तरं,तेन जिज्ञासाविच्छेदादित्याशङ्कायामाह–**सूचीकटाहन्यायेनेति**। तथाच सामान्यतः फलव्यापारयोर्धात्वर्थत्वे आश्रयस्य तिङर्थत्वे च ज्ञाते निरसनीयाल्पवादिविप्रतिपत्तिकत्वेन, सुप्रतिपाद्यतया च प्रथमं वाक्यार्थ एव शिष्यजिज्ञासोदयात् स एवादौ निरूपितो, न तु धात्वर्थः, निरसनीयबहुवादिविप्रतिपत्तिकत्वेनातिदुरूहतया च तस्य पूर्वमजिज्ञासितत्वादिति भावः।

'लडाद्यन्त' इत्यतद्गुणसंविज्ञानबहुव्रीहिणा धातुपरं, तथाच,'यजेत', 'पचेते'त्यादौ यज्यादिधातावित्यर्थः, अवाच्यत्वम् = वाच्यतानिरूपकत्वाऽभावम्। 'प्राभाकरादी' नित्यादिना नैयायिकसंग्रहः। यद्यपि व्यापारो धात्वर्थत्वेन नैयायिकसंमतस्तथापि नाऽसौ तन्मते[२] भावनापदव्यपदेश्य इति भावः। 'व्यापारो भावना सैवे'त्यादिपूर्वार्द्धस्य यो'गुणभूतैरवयवै'रित्याद्युक्तलक्षणलक्षितोर्थस्तद्वाचकव्यापारपदं भावनादिपदैर्विव्रियते, विव्रियमाणस्य विवरणसमानार्थकत्वेन धातोर्भावनावाचकत्वसिद्धिरित्यर्थः। तत्रोद्देश्यविधेययोरैक्यमापादयतः सर्वनाम्नः पर्यायेणान्यतरलिङ्गकत्वस्य,—'शैत्यं हि यत् सा प्रकृतिर्जलस्ये'त्यादिबहुषु स्थलेषु दर्शनान्न सेति स्त्रीलिङ्गनिर्देशानुपपत्तिः, पुँलिङ्गत्वेऽपि,—'सोऽचि लोपे चे'दिति लोपेन साधुत्वाच्च, भावनैव वाऽस्तु तत्पदपरामृश्या। ननु सम्भवेदेवं धातोर्व्यापारार्थकत्वे, तत्र च किं मानमित्याशङ्क्य क्रमा धातुविवरणे मानं दर्शयति, सारे—पचति

❀ काशिका ❀

तत्तद्विधायकशास्त्रज्ञानशून्यस्य तु प्रकरणादिकमेव तात्पर्यग्राहकम्। एवं लिङादावपि। अन्यथा 'पेचे' इत्यत्र कर्तृकर्मणोरुभयोरपि समानत्वात् तात्पर्यग्राहकदुर्भिक्षमेव स्यात् ॥ ४ ॥

भावनाया अवाच्यत्वमिति। तस्या धातुवाच्यत्वे प्राधान्यानुपपत्त्या तदवाच्यत्वमित्यर्थः। व्यापाराख्यभावनाया अवाच्यत्वमेवेत्यर्थ इति वा। **वाच्यतां ध्वनयितुमिति**। तथा च यत्नभिन्नो व्यापारो न धातुवाच्यो नापि तिङ्वाच्योऽपि तु फलमात्रं धात्वर्थः, कृतिः प्रत्ययार्थ इति प्राचीननैयायिकादिमतं न सम्यगिति सूचितम्। 'कस्यचित् कश्चिच्छब्दः प्रसिद्ध इत्यनेक-

१ देवदत्तः पचतीत्यादीत्यादिः। २ तन्मते = तार्किकमते। व्यपदेश्यः = व्यवहारविषयः।

वदतः प्राभाकरादीन् प्रति-व्यवस्थापयति—

व्यापारो भावना सैवोत्पादना सैव च क्रिया ।
कृञोऽकर्मकतापत्तेर्न हि यत्नोऽर्थ इष्यते ॥ ५ ॥

पचति = पाकमुत्पादयति, पाकानुकूला भावना, [1]तादृश्युत्पादनेति विवरणाद् [2]विक्रियमाणस्यापि [3]तद्वाचकतेति भावः । व्यापारपदञ्च फूत्कारादीनामयत्नानामपि फूत्कारत्वादिरूपेण वाच्यतां ध्वनयितुमुक्तम्, अत एव 'पचती'त्यत्र अधःसन्तापनत्वफूत्कारत्वचुल्ल्युपरिधारणत्वयत्नत्वादिभिर्बोधः सर्वसिद्धः । नचैवमेषां शक्यतावच्छेदकत्वे गौरवापत्त्या कृतित्वमेव तदवच्छेदकं वाच्यं,

❁ दर्पणः ❁

पाकमुत्पादयतीति । ननु 'या क्रिया भावना सैवोत्पादनाऽपि च सा स्मृते'त्युक्तेऽपि क्रियाया भावनात्वलाभे किमिति व्यापारपदोपादानमत आह—**व्यापारपदञ्चेति ।** तथाच व्याप्रियतेऽनेनेति करणव्युत्पन्नेन, भावव्युत्पन्नेन वा व्यापारपदेन फलानुकूलयावतामधिश्रयणादीनां भावनात्वलाभः, क्रियापदेन तु कृतिपदवद्यत्नमात्रार्थकेनोक्तविवरणात् कृतेरेव भावनात्वलाभः स्यादिति तदुपात्तमिति भावः ।

अत एवेति । तत्तद्रूपेण फूत्कारत्वादीनां धातुवाच्यत्वादेवेत्यर्थः । **सर्वसिद्ध इति ।** 'पचती'त्युक्ते फूत्कारादिमान्न वेति सन्देहाऽनुदयादिति भावः । यद्रीत्या नैयायिकैः कृतित्वस्याख्यातवाच्यत्वं व्यवस्थापितं तद्रीत्यैव धातोः कृतित्वं शक्यतावच्छेदकं भविष्यतीति तटस्थाऽऽशङ्कां निराकरोति—**नचैवमेषामित्यादि ।** 'न चे'ति 'साध्वी'त्यनेनान्वितम् । **एषाम्** = अधिश्रयणत्वादीनाम् । **गौरवेति ।** धातुवाच्यत्वावच्छेदकत्वे गौरवापत्त्येत्यर्थः, तेषां कृतित्वापेक्षया गुरुत्वान्नानात्वाच्चेति भाव । **तदवच्छेदकमिति ।** धातुवाच्यतावच्छेदकमित्यर्थः । ननु कृतेरेव धात्व-

❁ काशिका ❁

पर्यायोपादानम् । अथवा चेतनाचेतनसाधारणफूत्कारयत्नादीनां धातुवाच्यत्वक्रियात्वयोर्बोधनार्थं तत् । **अत एव** = तेन तेन रूपेण व्यापारस्य वाच्यत्वादेव । **सर्वसिद्ध** इति । सर्वानुभवसिद्ध इत्यर्थः । सर्वानुभवसिद्धस्यापलापोऽनुचित इति भावः । एवं 'देवदत्तः पचती'ति वाक्यजन्यबोधदशायां देवदत्तः फूत्कारादिमान्न वेति संशयोऽप्यत एव नेत्यपि बोध्यम् । **एवम्** = उक्तप्रकारेण फूत्कारादिव्यापाराणां वाच्यत्वे । **गौरवापत्त्येति ।** फूत्कारत्वादीनामुपाधिरूपत्वात् ।

तदवच्छेदकमिति । प्रवृत्तित्वरूपकृतित्वमिष्टसाधनताज्ञानकार्यतावच्छेदकतया सिद्धो जाति-

१ पाकानुकूला । २ धातोः । ३ व्यापारवाचकता ।

—'रथो गच्छति' 'जानाती'त्यादौ च व्यापारत्वादिप्रकारकबोधो लक्षणयेति नैयायिकरीतिः साध्वी, शक्यतावच्छेदकत्वस्यापि लक्ष्यतावच्छेदकत्ववत् गुरुणि सम्भात्, तयोर्वैषम्ये बीजाभावात्,

❀ दर्पणः ❀

र्थत्वे रथादावचेतने तद्बाधात्तादृशप्रयोगानुपपत्तिरत आह—रथो गच्छतीत्यादि। 'व्यापारादी'त्यादिनाश्रयत्व-प्रतियोगित्वपरिग्रहः। नैयायिकरीतिरिति। आख्यातार्थविचारे हि तैर्व्यापारे लक्षणां स्वीकृत्याऽयं प्रयोगः समर्थितस्तद्वन्मयाऽपि समर्थनीय इत्यभिप्रेत्य 'रीति'पदोपादानं, न त्वन्यांऽशे तन्मताऽऽदर इति भावः। लाघवोपष्टम्भमानादेवाऽर्थसिद्धिर्न केवलाल्लघवादित्याशयेन मीमांसकरीत्या तद्रीतेरेवाऽसाधुत्वमाविष्करोति—शक्यतावच्छेदकत्वस्येति। तथाच, असति बाधके, शक्तिर्गुरुणाऽपि धर्मेणावच्छिद्यते कृतित्वाल्लक्षणावदित्यनुमानात्तेषु शक्तिः सेत्स्यतीति भावः। ननु तेषां कृतित्वाऽपेक्षया गुरुत्वमेव बाधकमत आह—तयोरिति। शक्यतावच्छेदकत्वलक्ष्यतावच्छेदकत्वयोरित्यर्थः। बीजाभावादिति। असम्भवति

❀ काशिका ❀

विशेषेऽतस्तदेवाख्यातशक्यतावच्छेदकं लाघवादिति भावः। तथा च फलं धात्वर्थो यत्न आख्यातार्थ इति प्राचीननैयायिकमतं पर्यवसन्नम्। यत्नत्वं धातुशक्यतावच्छेदकमिति तु नार्थः। तथा सति प्रत्ययस्याश्रयार्थकतापत्तेः। तच्च न नैयायिकाभिमतम्। अत एव कालसंख्ययोरेव प्रत्ययवाच्यतेत्यपि न, नैयायिकानभिमतत्वात्। धातुवाच्ययत्नस्य प्रथमान्तार्थेऽन्वयानापत्तेश्च, नामार्थधात्वर्थेति व्युत्पत्तिविरोधात्। 'लः कर्मणि'—इति सूत्रविरोधाच्च। ननु 'रथो गच्छती'त्यादौ यत्नस्य बाधाद् व्यापारादिप्रतीतिः सर्वानुभवसिद्धा कथं निर्वाह्येत्यत आह—रथो गच्छतीति। 'जानाति' इत्यस्य 'देवदत्त' इत्यादिः शेषो बोध्यः। आदिपदात् इच्छति-नश्यतीत्यादिपरिग्रहः। व्यापारत्वादित्यादिनाश्रयत्वत्वप्रतियोगित्वत्वपरिग्रहः। घटो नश्यतीत्यतो नाशानुकूलव्यापारस्य नाशाश्रयत्वस्य च प्रतियोगिनि बाधात् प्रतियोगित्वमेव तत्र भासत इति बोध्यम्। एवं 'रथो गच्छती'त्यत्रापि व्यापारभानमिति न साधु, गमनानुकूलनोदनादिमत्येकत्र स्थितेऽपि चैत्रादौ चैत्रो गच्छतीति प्रसङ्गात्। गुरुणि संभवादिति। शक्तिलक्षणयोरुभयोरपि पदतदर्थसंबन्धत्वाविशेषाद् गुरुधर्मावच्छिन्ने लक्षणाया इव शक्तेरपि संभवादित्यर्थः। वैषम्ये बीजाभावादिति। ननु कारणतावच्छेदकत्वप्रतियोगितावच्छेदकत्ववच्छक्यतावच्छेदकत्वं स्वरूपसंबन्धविशेषरूपं संभवति लघुधर्मे गुरुणि न कल्पयेत्। अत एव लघुधर्मवत् कारणतावच्छेदकता प्रतियोगितावच्छेदकता च कल्प्यते। अत एव प्रमेयधूमे प्रमेयत्वविशिष्टाभावप्रतियो-

नच पचति=पाकं करोतीति यत्नार्थककरोतिना विवरणाद्—यत्न

❀ दर्पणः ❀

समनियते लघौ धर्मे गुरौ तदभावादित्यस्य प्रकृतेऽनवतारेण यद्यवच्छेदकत्वं स्वरूपसम्बन्धविशेषस्तदा तत्स्वरूपत्वं गुरूणामप्यक्षतम्, अथातिरिक्तं तदा गुरुधर्मेऽपि तत्स्वीकार आवश्यकः, 'गङ्गातीरत्वं लक्ष्यतावच्छेदक'मिति व्यवहारात्, वृत्त्यवच्छेदककोटिप्रविष्टत्वस्योभयत्र साम्याच्च, तत्र न्यूनाऽतिरिक्तवृत्तित्वरूपाऽवच्छेदकत्वमादाय तादृशव्यवहारो यदि—तदा सर्वत्रैव तथास्त्विति भावः। ननु लाघवादेव न तस्याऽवच्छेदकत्वं वदामः, किन्तु मानादपीत्याशङ्कते—नचेति। 'यत्नार्थककरोतिने' त्युक्त्या व्यापारजन्यत्वप्रतिसन्धानाऽविशेषेऽपि घटाङ्कुरयोः कृताऽकृतव्यवहारात्कृञो यत्नार्थकत्वं सिद्धमेवेति ध्वनयति—विवरणादिति। तदर्थप्रतिपादकपदकथनरूपादित्यर्थः, 'धातुमात्रं यत्नत्वविशिष्टे शक्तं, बाधकं विना यत्नत्वविशिष्टाऽर्थककरोतिप्रतिपादिताऽर्थकत्वाद्, यद्यद्विशिष्टबोधकपदप्रतिपादितार्थकं भवति तत्तत्र शक्तं, घटत्वविशिष्टशक्तघटपदप्रतिपादितार्थककलशादिपदव'दिति सामान्यतो दृष्टाऽनुमानविधया शक्तिग्राहकत्वाद्विवरणस्येति भावः। 'यत्न एवार्थे' इति पाठः, 'यत्न एव आख्यातार्थ' इति पाठस्तु प्रकृतसन्दर्भविरुद्धः। अर्थः=धात्वर्थः। 'एव'-कारेण व्यापारस्य वाच्यत्वव्यवच्छेदः। कृञो यत्नार्थकत्वे एव धातुमात्रस्य तदर्थकत्व-

❀ काशिका ❀

गितावच्छेदकत्वं नास्तीति प्रतीतिः सिद्धा धूमत्वे नास्तीति तार्किकप्रवादः संगच्छते। अतः संभवतीत्यस्य संभवत्तदवच्छेदकताके इत्यर्थः। तथा च संभवत्तदवच्छेदकताकधर्मापेक्षया यो गुरुः स तदनवच्छेदताक इति व्याप्तिः पर्यवसिता। संभवत्तदवच्छेदकताकत्वं च तदवच्छेदकत्वबाधकशून्यत्वं, बाधकं चावच्छेद्यप्रतियोगित्वाद्यसमनैयत्यम्। तथा च तत्समनैयत्यमेव संभवत्तदवच्छेदकतात्वम्। समनैयत्यघटकदलद्वयनिवेशाद् घटपटान्यतराभावमहानसीयवह्न्यभावप्रतियोगितावच्छेदकत्वं घटत्ववह्नित्वाद्यपेक्षया गुरोरपि तादृशान्यतरत्वमहानसीयवह्नित्वादेर्निर्वहति। प्रतियोगितायाः समनैयत्यं च—तदन्यूनवृत्तित्वे सति तन्निरूपकाभावविरोधितावच्छेदकत्वम्। अतो गुणकर्मान्यत्वादिविशिष्टसत्ताद्यभावप्रतियोगितावच्छेदकत्वस्य न सत्तात्वसमनियततादृशविशिष्टसत्तात्वेऽनुपपत्तिः, शक्यतावच्छेदकत्वमेव स्वरूपसंबन्धविशेषो न लक्ष्यतावच्छेदकत्वमिति चेन्न। स्वरूपसंबन्धस्य तत्तत्स्वरूपरूपत्वे गुरुधर्मस्वरूपाणामपि सत्त्वात् तद्वारणासंभवात्। किं च गुरुधर्मे त्ववच्छेदकत्वास्वीकारे तदभावस्वीकार आपतति, तद्वरमवच्छेदकत्वस्वीकार एव। भावकल्पनायां लाघवात्। अन्यत्र क्लृप्ताभावस्य संबन्धमात्रं कल्प्यते लाघवादिति चेदन्यत्र कल्प्यमानावच्छेदकत्वस्य संबन्धकल्पनैव युक्ता। गुरुधर्मे अन्यूनानतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्यानपायाच्चेति बृहद्भूषणादितोऽवगन्तव्यम्। यत्नार्थककरोतिनेति। यत्नजन्यत्वप्रतिसंधानदशायां

एवार्थ इति वाच्यं, 'रथो गमनं करोति' 'बीजादिना अङ्कुरः कृत' इति दर्शनात् कृञो यत्नार्थकताया असिद्धेः ।

ॐ दर्पणः ॐ

सम्भावना, तदेव गगनकुसुमोपमानमित्याह—रथो गमनं करोतीत्यादि । रथादावचेतने यत्नस्य बाधेन तादृशप्रयोगाऽनुपपत्त्या न कृञो यत्नार्थकत्वमपि तु व्यापारार्थकत्वमेव सिद्ध्यतीति भावः । ननु 'रथो गच्छती'ति प्रयोगस्य धात्वर्थप्रतिपादककृञो व्यापारे लाक्षणिकत्वान्न तेन यत्नार्थकत्वक्षतिरत आह—बीजादिनेति । तथाच कृञो व्यापारे प्रयोगप्राचुर्य्येण तत्रैव शक्तिर्न्याय्येति तेन विवरणाद्धातोर्व्यापारार्थकत्वमवश्यमङ्गीकरणीयमिति भावः ।

अत्रेदमवधेयं—'पचत्यादेः फूत्कारादिव्यापारे व्यापारत्वेनैव शक्तिः, व्यापारसामान्यार्थककृञा विवरणात्, एवञ्च व्यापारत्वेन कृतेरपि संग्रहा'न्मत्तो भूतं न तु मया कृत'मित्युपपद्यते इति तत्र तत्रोक्तं सङ्गच्छते, तत्तद्रूपेण क्वचिद् बोधस्तु पचत्यादीनां तत्तद्रूपावच्छिन्ने लक्षणयोपपाद्यः, 'शक्यादन्येन रूपेण ज्ञाने भवति लक्षणा:' इत्यभियुक्तोक्तेः, अत एव वाक्यार्थप्रदर्शनाऽवसरे 'विक्लित्यनुकूलो व्यापारः' ज्ञानानुकूलो व्यापार' इति व्यापारसामान्यार्थकव्यापारपदेन स्वोत्कीर्तितस्य सङ्गतिरिति ।

ॐ काशिका ॐ

पटाङ्कुरयोः कृताकृतव्यवहारात्तस्य यत्नार्थकत्वमावश्यकमिति भावः । रथो गमनमिति । रथपदानुक्तौ गमनानुकूलकृतेश्चैत्रादिसमवेतायाः सत्त्वान्न तादृशप्रयोगानुपपत्तिरतो 'रथ' इति । 'अङ्कुरः कृत' इत्येतावन्मात्रस्येश्वरकृतिजन्यत्वमादायोपपत्तेराह—बीजादिनेति । विवरणादिति । इदमुपलक्षणं, 'किं करोती'ति यत्ने प्रश्ने पृष्टे पचतीत्युत्तरस्य यत्नार्थकत्वं विनानुपपत्तेश्चेत्यपि द्रष्टव्यम् । यत्नार्थकताया असिद्धेरिति । न च रथो गमनं करोतीत्यादौ करोतेर्व्यापारसामान्ये लक्षणेति वाच्यं, मुख्यार्थत्वे संभवति लक्षणाकल्पनस्यान्याय्यत्वादिति भावः ।

ननु व्यापारशक्तत्वे यत्नजन्यत्वाप्रतिसंधानदशायां 'पटः कृतः' 'अङ्कुरः कृत' इति व्यवहारानुपपत्तिः, व्यापारजन्यत्वप्रतिसंधानाविशेषात्, ईश्वरीयकृतिजन्यत्वेऽपि चैत्रादिकृतिजन्यत्वाभावप्रतिसंधानदशायां तादृशव्यवहारस्येष्टत्वात्, तदुक्तमाचार्यैः—

'कृताकृतविभागेन कर्तृरूपव्यवस्थया ।
यत्न एव कृतिः पूर्वा परस्मिन् सैव भावना ॥' इति ।

तत्र = कृञो (कृतौ-यत्ने ?) परस्मिन् मते = मीमांसकमते इत्यर्थः । निरूढलक्षणा एव कर्तृपदस्थकृञोऽपीति चेल्लाघवात् कृतित्वावच्छिन्ने एव शक्तिरस्तु, व्यापारे एव लक्षणास्तु, लघुधर्मावच्छिन्ने एव शक्तेर्मीमांसकादिमतसिद्धत्वात्, लक्षणया बोधात् तत्पदजन्यबोधविषयत्वप्रकारकभाववदिच्छायाः संन्मात्रविषयिण्यास्तत्रावश्यकत्वेऽपि लघुधर्मावच्छिन्ने एव संबन्धत्वमङ्गीक्रियते,

किञ्च–भावनाया अवाच्यत्वे, 'घटं भावयती'त्यत्रेव 'घटो भवती'-त्यत्रापि द्वितीया स्यात्, नचात्र घटस्य कर्तृत्वेन तत्संज्ञया कर्म्मसंज्ञाया बाधान्न द्वितीयेति वाच्यम्, अनुगतकर्तृत्वस्य त्वन्मते दुर्वचत्वेन घटस्याऽकर्त्तृत्वात्, कृत्याश्रयत्वस्य, कारकचक्रप्रयोक्तृत्वस्य वा घटादाव-

❀ दर्पणः ❀

'कृञोऽकर्मकतापत्ते'रिति मूलमवतारयति—किञ्चेति। अवाच्यत्वे धात्व-शक्यत्वे। द्वितीया स्यादिति। धात्वर्थोत्पत्तिरूपफलाऽऽश्रयत्वात्। ननु 'घटो भवती'त्यत्र कृत्याश्रयत्वरूपकर्त्तृत्वबाधेऽपि धात्वर्थफलाऽन्विताऽऽख्यातार्थ-व्यापाराश्रयत्वरूपकर्त्तृत्वसत्वात्तेन कर्मत्वस्याऽवश्यं बाधेन नोक्तस्थले द्वितीयाप्रसक्तिरन्यथा कर्त्तरि लकारोऽप्यनाकरतामापद्येतेत्याशङ्क्य निराकुरुते—नचेति। घटस्येति। 'घटं भावयती'त्यत्रेव 'घटो भवती'त्यत्राऽपि द्वितीयाऽऽपत्तिः, मन्मते तु धातूपात्तव्यापाराऽऽश्रयत्वेन परया कर्त्तृसंज्ञया कर्मसंज्ञाया बाधान्न तदापत्तिरिति भावः। निराकरणप्रकारमेवाह—अनुगतेति। चेतनाऽचेतनसा-धारणेत्यर्थः। त्वन्मते=भवदीयमते। दुर्वचत्वेनेति। वक्तुमशक्यत्वेनेत्यर्थः। तदेवाह—कृत्याश्रयत्वस्येति। तस्याऽचेतनेऽव्याप्तत्वादिति भावः। कारकच-क्रप्रयोक्तृत्वस्य वेति। तद्धात्वर्थीयनिखिलकारकप्रवर्त्तकत्वरूपस्य चेत्यर्थः।

❀ काशिका ❀

न गुरुधर्मावच्छिन्ने, अनुभवबलेन गौरवज्ञानस्य प्रतिबन्धकत्वकल्पनात्, शक्यसंबन्धरूपलक्षणा-यास्तु तत्रापि संबन्धत्वं क्लृप्तं, न कल्प्यमिति वैषम्यमत एव न लक्षणोच्छेद इति सकलतान्त्रिक-सिद्धमित्यत आह—किं च भावनाया इति। अवाच्यत्वे=व्यापाररूपभावनाया धातोस्ति-ङश्चावाच्यत्वे। द्वितीया स्यादिति। तस्या अवाच्यत्वे स्वजनकव्यापारव्यधिकरणधात्वर्थ-फलाश्रयत्वं कर्मत्वं वक्तव्यं, धात्वर्थफलाश्रयत्वमेव वा, एवं च 'घटं भावयती'त्यत्रेव 'घटो भवती'त्यत्रापि घटपदाद् द्वितीयापत्तिः,। उभयत्रापि घटस्य धात्वर्थोत्पत्तिरूपफलाश्रयत्वाविशेषा-दित्यर्थः। कर्मसंज्ञाया बाधादिति। घटस्य फलाश्रयत्वेऽपि द्वितीयाप्रयोजककर्मसंज्ञाया विरहान्न द्वितीयापत्तिरित्यर्थः। अनुगतेति। चेतनाचेतनसाधारणेत्यर्थः। घटस्याकर्तृत्वमुपपाद-यति–कृत्याश्रयत्वस्येति। तद्धात्वर्थफलानुकूलकृत्याश्रयत्वस्य। कारकेति। प्रकृतधात्वर्थ-कारकचक्रेत्यर्थः। अभावात्=अचेतनत्वात्, कारकचक्रप्रयोक्तृत्वाभाव इति भावः। तथा च कृत्यादिमत एव कर्तृसंज्ञाविधानात् कृत्याद्यभावे कर्तृसंज्ञाप्राप्त्यभावेन कर्मसंज्ञाया अनपवादाद् द्वितीयापत्तिर्दुर्वारेति भावः। ननु धात्वर्थानुकूलव्यापाराश्रयत्वं स्वतन्त्रपदेन विवक्षणीयं, तच्च

भावात्, धात्वर्थानुकूलव्यापाराश्रयत्वस्य च कारकमात्रातिव्यापकत्वात्। अपिच—भावनाया अवाच्यत्वे धातूनां सकर्म्मकत्वाकर्म्मकत्वविभाग उच्छिन्नः स्यात्; स्वार्थफलव्यधिकरणव्यापारवाचकत्वं,' 'स्वार्थव्यापार-

❀ दर्पणः ❀

नैयायिकमतं निरस्य मीमांसकं प्रत्याह—**धात्वर्थेति। कारकमात्रेति।** मात्रपदं कृत्स्नाऽर्थकं, सर्वस्याऽपि कारकस्य धात्वर्थाऽनुकूलयत्किञ्चित्क्रियाश्रयत्वात्, क्रियाजनकत्वस्यैव कारकत्वादिति भावः। नन्वचेतने कृत्याश्रयत्वरूपकर्तृत्वस्य बाधेऽपीतरव्यापाराऽनधीनत्वप्रकारकविवक्षाविषयव्यापाराश्रयत्वरूपकारकचक्रप्रयोक्तृत्वरूपमेव तत्कर्तृसंज्ञानियामकम्, व्यापारश्च क्वचित् कृतिः, क्वचित् संयोगादिरेव। तादृशव्यापाराश्रय एव, स्वतन्त्रः कर्त्तेति सूत्रे स्वतन्त्रपदार्थः, तत्सूत्रप्रणयनसामर्थ्यात्, तदुक्तं 'कारके' इति सूत्रे भाष्ये—'प्रधानेन समवाये स्थाली परतन्त्रा' व्यवाये परतन्त्रा, किं पुनः प्रधानं? कर्त्ता, कथं ज्ञायते कर्त्ता प्रधानमिति? यत्सर्वेषु कारकेषु सन्निहितेषु कर्त्ता प्रवर्त्तयिता भवतीति। 'स्थाली काष्ठैः पचती'त्यादौ स्थाल्येव तत्त्वेन विवक्षितेति तद्भावः। वक्ष्यते चाऽधिकमुपरिष्टात्, मीमांसकमते प्रसक्तदूषणोद्धृतिरपि वक्ष्यमाणैव, एवञ्च घटगततादृशव्यापारस्यैव स्वातन्त्र्यविवक्षया कर्तृत्वस्य निराबाधेन न द्वितीयाप्रसङ्गोऽत आह—**अपिचेति। स्वार्थ-**

❀ काशिका ❀

घटेऽबाधितमेवेत्यत आह—धात्वर्थेति। **कारकमात्रेति।** कारकमात्रे प्रकृतधात्वर्थानुकूलव्यापारवत्त्वात् सर्वकारकेष्वतिप्रसङ्गः। ननु कारकचक्रप्रयोक्तृत्वं कर्तृत्वं, तच्च वैवक्षिकमतो नातिप्रसङ्गः, अत एव 'स्थाली पचती'त्यपि भवति। स्पष्टं चेदं 'कारके' इति सूत्रभाष्ये इत्यत आह—**तथा चेति।** भूप्रभृतावतिप्रसङ्गवारणाय—**स्वार्थफलव्यधिकरणेति।** भूप्रभृतेरपि पच्यादिधात्वर्थफलव्यधिकरणव्यापारवाचित्वादतिप्रसङ्गतादवस्थ्यम्, अतः स्वार्थत्वं फले निवेशितम्। फलव्यधिकरणत्वं च फलतावच्छेदकसंबन्धेन यत्किंचित्तत्फलाधिकरणभिन्नवृत्तित्वं, नातो गम्यादेरसंग्रहः। फलतावच्छेदकसंबन्धनिवेशाद् भूप्रभृत्यर्थफलस्य कालिकादिसंबन्धेन यदधिकरणं कालादि, तद्भेदस्य स्वजनकव्यापाराधिकरणे सत्त्वेऽपि नातिप्रसङ्गः। चैत्रग्रामोभयनिष्ठसंयोगव्यक्त्यधिकरणत्वावच्छिन्नप्रतियोगिताकभेदस्य चैत्रेऽसत्त्वाद्गम्यादेरसंग्रहस्तदवस्थ इति—'यत्किंचित्' तत्फलवत्यधिकरणे निवेशितम्। यद्वा फलाधिकरणयत्किंचिद्वृत्तित्वं फलव्यधिकरणत्वं, विनिगमनाविरहादाह—**स्वार्थव्यापारेति।** व्यापारव्यधिकरणत्वं = व्यापारानधिकरणवृत्तित्वम्। संबन्धनिवेशनं पूर्ववद्बोध्यम्। अथवा स्वानधिकरणवृत्तितत्तत्फलकत्वं—फलव्यधिकरणत्वं, स्वशब्दार्थो व्यापारः,

व्यधिकरणफलवाचकत्वं' वा सकर्म्मकत्वं—भावनाया वाच्यत्वमन्तरेणाऽसम्भवि, अन्यतमत्वं तत्त्वमिति चेन्न, एकस्यैवार्थभेदेनाकर्म्मकत्वसकर्म्मकत्वदर्शनात्—तदेतदभिसन्धायाह—कृञ इति। अयं भावः—'व्यापारा-

ॐ दर्पणः ॐ

फलेति। शक्यतावच्छेदककोट्यप्रविष्टाऽऽश्रयकत्वेन फलस्य विशेषणान्न जीवत्यादावतिप्रसङ्गः, एवमविवक्षितकर्मकत्वाऽभाववत्त्वेनाऽपि स्वार्थौ विशेषणीयो, नातो विवक्षितकर्मतयाऽभ्युपगतभावलकारप्रकृतिश्रुधातौ सः, वैयधिकरण्यं स्वग्रे विवेचयिष्यते। असम्भवीति। तथा च व्यापारवाचकत्वं धातोरावश्यकमिति भावः।

अन्यतमत्वमिति। पच्यादिधातून् शृङ्गग्राहिकयोपादाय तावद्भिन्नभिन्नत्वमित्यर्थः। तत्त्वमिति। अनुगतं सकर्मकत्वमित्यर्थः। दर्शनादिति। यथा जयतिधातोरभिभवार्थेऽकर्मकत्वस्य न्यूनीकरणार्थे सकर्मकत्वस्याभ्युपगमात्सकर्मकधातुलक्षणे तत्प्रवेशेऽकर्मके तस्मिन्नतिव्याप्तेरप्रवेशे च न्यूनीकरणेऽर्थे तत्रैवाऽव्याप्तिरित्यर्थः। यद्यपि तत्तदर्थविशिष्टानेवोक्तरीत्योपादाय सकर्मकत्वनिर्वचने दोषाभावस्तथापि 'बहुलमेतन्निदर्शन'मिति स्मरणात्तत्र तत्रावृत्तिकरणाच्च तावद्धातूनां युगपद् ग्रहणासम्भवे तात्पर्यमिति बोध्यम्। तदेतदिति। पूर्वोक्तदूषणगणमित्यर्थः। ननु 'कृञोऽकर्मकतापत्ते'रित्यस्य कृञो यत्नार्थकत्वनिरासप्रतिपादकस्य कथमुक्तार्थाऽभिसन्धायकत्वमित्याशङ्कयाऽभिसन्धानप्रकारं विशदयति—अयम्भाव इति।

ॐ काशिका ॐ

स्वाधिकरणत्वं व्यापारतावच्छेदकसम्बन्धेन बोध्यं, नातो ग्रामस्यापि कालिकसंबन्धेन चैत्रवृत्तिव्यापारवत्त्वेऽपि क्षतिः। तद्वृत्तित्वं च—फलतावच्छेदकसंबन्धेन, तेन नाकर्मकेऽतिप्रसङ्गः। वाच्यत्वम् = धातुवाच्यत्वम्। अन्यतमत्वमिति। सकर्मकत्वेनाभिमता यावन्तो धातवस्तद्वृत्त्यन्यतमत्वमित्यर्थः, तच्च तत्तद्धात्वानुपूर्व्यवच्छिन्नप्रतियोगिताकभेदसमुदायवद्भिन्नत्वम्। एकस्यैवेति। एकानुपूर्वीकस्यैवेत्यर्थः। तेन 'भारं वहति' 'नदी वहती'ति वाक्यद्वयघटकवहधातुव्यक्त्योरुच्चारणभेदेनार्थभेदेन परस्परभेदावश्यकत्वेनैकस्यैवेत्यसंगतमिति निरस्तम्। यद्वाऽर्थभेदादिसत्त्वेऽपि शब्दाभेदमते इदमिति बोध्यम्। एवं च सकर्मकत्वेनाभिमतधातूनां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदानामन्यतमत्वरूपभेदप्रतियोगितावच्छेदककोटौ प्रवेशेऽपि निस्तार इति बोध्यम्।

ननु सकर्मकत्वं स्वजनकव्यापारव्यधिकरणफलवाचकत्वं, तच्च करोतेरक्षतम्, यत्नस्य फलतावच्छेदकविषयतासंबन्धेन स्वजनकात्ममनोयोगादिरूपव्यापारानधिकरणवृत्तित्वात्, तद्भिन्नत्वमकर्मकत्वं, तच्च करोतौ न संभवतीति 'कृञोऽकर्मकतापत्ते'रित्यसंगतमित्याशङ्क्याह—अयं

ऽवाच्यत्वपक्षे फलमात्रमर्थ इति फलितं, तथा च 'करोती'त्यादौ यत्नप्रतीतेस्तन्मात्रं वाच्यमभ्युपेयं,–तथाच 'यती प्रयत्ने' इतिवत् फलस्थानीययत्नवाचकत्वाविशेषादकर्म्मकतापत्तिरुक्तरीत्या दुर्वारे'ति। तथाच,–'न हि यत्न' इत्यत्र 'फलस्थानीयत्वेनेति शेषः। कृञ इति धातुमात्रोपलक्षणम्।

ॐ दर्पणः ॐ

फलमात्रमिति। मात्रपदेन व्यापारव्यवच्छेदः। 'करोत्यादा'वित्यादिना सविषयार्थ-धातुसंग्रहः। **तन्मात्रमिति।** यत्नादिरूपविषयि मात्रमित्यर्थः। **अकर्मकताप-त्तिरिति।** व्यापारस्य धात्ववाच्यत्वे उक्तलक्षणाऽऽक्रान्तस्येति भावः। केचित्तु अकर्मक-त्वापत्तिरिति विपर्ययर्थंककृञाद्यभिप्रायेणैव, तेषामेव प्रक्रान्तत्वादेवं च न तदप्रसिद्धि-रित्याहुः। **उक्तरीत्येति।** उक्तप्रायरीत्या सकर्मकधातुभिन्नधातुत्वमित्याकारिकये-त्यर्थः। यथाश्रुते धातोर्व्यापाराऽवाचकत्वे स्वार्थफलसमानाधिकरणव्यापारवाचकत्व-रूपाऽकर्मकत्वापादानस्याऽसम्भवदुक्तिकत्वापत्तेः। नन्विदानीं धातुमात्रस्यैव व्या-पारवाचकत्वस्याऽसिद्धत्वात् सकर्मकप्रतियोग्यप्रसिद्ध्या भवदुक्तार्थापादनस्याप्य-सम्भवदुक्तिकत्वं समानम्। अन्यतमत्वरूपस्य तु स्वयमेव निराकृतत्वादुक्तपदेन तद्ग्रहणाऽसम्भवादिति चेन्न। नयत्यादिद्विकर्मकाणां संयोगाद्यनुकूलाऽजादि-निष्ठक्रियात्मकफलार्थकत्वस्य धातोः फलमात्रार्थकत्ववादिनाऽप्यभ्युपगमादजादिनि-ष्ठक्रियायाः संयोगरूपफलजनकत्वाल्लोकप्रसिद्धेश्च व्यापारत्वात्तदर्थकधातून्, ण्यन्ता-दिधातून् वोपादायैव कथञ्चित्प्रसिद्धिसम्भवादिति। नन्वेतावता ज्ञा-कृञादीनां व्यापारार्थकत्वं सिद्धं, न धातुमात्रस्येत्यतः कृञ्पदं धातुमात्रपरतया व्याचष्टे— **कृञ इति। धातुमात्रोपलक्षणमिति।** कृञ्पदं शक्यलक्ष्यसाधारणधातुत्वेना-

ॐ काशिका ॐ

भाव इति। अर्थ इति। अस्य 'धातो'रित्यादिः। **यती प्रयत्ने इतिवदिति।** तथा च नोक्तरूपं सकर्मकत्वं वक्तुमुचितं, यतधातावतिप्रसङ्गात्, अपि तु 'स्वार्थफले'त्याद्युक्तमेवास्मद्रीत्या, पररीत्या फलविशिष्टव्यापारवाचकत्वमेव, तच्च करोतेर्यत्नमात्रवाचकत्वे न संभवतीत्यकर्मकता-पत्तिर्दुर्वारैवेति भावः।

नुन धातुमात्रस्य व्यापारावाचकत्वे धातुमात्रस्याकर्मकतापत्तिसंभवात् 'कृञ' इति विशेषो-क्तिरनुचितेत्याशङ्क्याह–कृञ इतीति। फलवाचकत्वं सकर्मकत्वमित्यभिप्रेत्याह–सकर्मकतेति।

१. व्यापारस्थानीयो यत्नस्तु इष्ट एवेत्याशयः।

—सर्वेषामप्यकर्म्मकता सकर्म्मकता वा स्यादिति भावः।

अथवा—'व्यापारो भावना' इत्यर्थेन व्यापारस्य वाच्यत्वं प्रसाध्य फलांशस्यापि तत् साधयन् नैयायिकाभ्युपगतं जानातिकरोत्यादेः केवलज्ञानयत्नादिक्रियामात्रवाचित्वं दूषयति—कृञ इति।

❀ दर्पणः ❀

ऽजहत्स्वार्थलक्षणया धातुमात्रबोधकम्। तथाच धातुमात्रस्याऽकर्मकतापत्त्या न फलमात्रार्थकता, किं तु व्यापाराऽर्थकताऽपीत्यर्थः। **अकर्मकतेति**। पूर्वोक्तभिन्नसर्वधातूनां सेत्यर्थः। यदि फलवाचकत्वमेव सकर्मकत्वं, तदा सर्वेषामविशेषेण सकर्मकतैव स्यादित्याह—**सकर्मकतेति**। वस्तुतस्तु उक्तयुक्त्या धातोर्व्यापारार्थकत्वसिद्धिस्तदैव स्याद्यदि 'स्वार्थफले'त्यादि सकर्मकलक्षणं सकर्मकधातुमात्रसाधारणं स्यात्, तदेव न, अध्याद्युपसृष्टशीङादिष्वव्याप्तेः, तस्माद् भ्वादीनां धातुत्वाऽनापत्तिः, 'मैत्रेण पाचयती'त्यादौ मैत्रादीनां कर्तृत्वाऽनुपपत्तिश्च तथा, अत एव 'निवृत्तप्रेषणाद्धातोः प्रकृतेऽर्थे णिजिष्यते' इत्याद्युपपत्तिरिति दिक्।

ननु 'कृञोऽकर्मकतापत्ते'रिति ग्रन्थो न मीमांसकमतनिराकरणपरः, तस्य 'तस्मात् करोतिरि'त्यादिना निराकरिष्यमाणत्वात्, तैः कृञो यत्नार्थकत्वाऽनभ्युपगमाच्च, नापि नैयायिकमतनिरासपरः, नैयायिकैः फलव्यापारयोरुभयोरपि धातुवाच्यत्वाऽभ्युपगमात्, तदुक्तमाख्यातवाददीधितौ—'स्तां वा फलव्यापारौ पृथगेव धात्वर्थौ'विति। धातोः फलाऽवच्छिन्नव्यापारार्थकत्वे कर्माख्याते फलस्य द्वेधा भानापत्त्या तयोर्विशकलितयोरेव शक्तिर्ज्यायसीति तद्भावः। फलस्य धातुवाच्यत्वे परं केषाञ्चिन्न्यायविदां विप्रतिपत्तिः, कर्माख्यातेन द्वितीयया च तद्भानसम्भवात्, किञ्चैतद्ग्रन्थस्य धातुमात्रस्य व्यापाराऽर्थकत्वसाधकत्वे धातोरकर्मकत्वापत्तेः, 'फलमात्राऽर्थता न ही'त्येव ब्रूयान्न तु—'कृञ' इत्यपरितोषादन्यार्थपरतया मूलमवतारयति—**अथवेति**। **प्रसाध्येति**। पूर्वाऽर्द्धस्य विवरणपरतया व्याख्यानादिति भावः। **तदिति**। धातुवाच्यत्वमित्यर्थः। **जानातिकरोत्यादेरिति**—निर्दिष्टयत्नार्थकभिन्नसविषयार्थकधातुमात्रोपलक्षणम्। **क्रियामात्रेति**। 'मात्र'-

❀ काशिका ❀

तथा च सकर्मकाकर्मकविभागोच्छेद इति तात्पर्यम्। तत् = सकलधातुवाच्यत्वम्। एतेन व्यापारो भावनेति कारिकया व्यापारस्य धातुवाच्यत्वसाधनेऽपि फलांशस्य तदसाधनेन न्यूनतेति दूषणं प्रत्युक्तम्। कृञ इतीति। 'यती प्रयत्ने' इतिवद् यत्नार्थकतायामकर्मकतापत्तिरित्युक्तम्, अन्यथा 'वायुर्विकुरुते' 'सैन्धवा विकुर्वते' इत्यादिप्रयोगदर्शनाद्यथाश्रुतेऽसंगत्यापत्तेः। ननु फला-

अयं भावः—फलांशस्यावाच्यत्वे व्यापार एव धात्वर्थः स्यात्, तथाच स्वार्थफलव्यधिकरणव्यापारवाचित्वादिरूपसकर्म्मकत्वोच्छेदापत्तिः, —नच 'कृञादौ सकर्मकत्वव्यवहारो भाक्त' इति नैयायिकोक्तं युक्तं—व्यवहारस्य

❀ दर्पणः ❀

पदेन फलव्यवच्छेदः, "सकर्मकाणां प्रायशः फलाऽवच्छिन्नव्यापारबोधकत्वं, विशकलितफलव्यापारोभयार्थकत्वं वा, 'जानात्या'दीनां तु ज्ञानादिव्यापारार्थकत्वमेव, अकर्मकाणां सर्वेषां न फलाऽर्थकत्वं; तस्य ततोऽननुभवात्, किन्तु व्यापाराऽर्थकत्वमेवे"ति प्राचीननैयायिकाभ्युपगमात्, वक्ष्यमाणरीत्या कृञः फलार्थकत्वे तु तुल्यन्यायात् सर्वेषामेव तत्सिद्धिरिति भावः। ननु कृञः फलाऽवाचकत्वे कथमकर्मकत्वमत आह—**अयं भाव इति**। 'वाचकत्वादी'त्यादिना—स्वार्थव्यापारव्यधिकरणफलवाचकत्वस्य, नैयायिकनये फलाऽवच्छिन्नव्यापाराऽर्थकत्वस्याऽपि सकर्मकत्वात्तस्य च सङ्ग्रहः। 'जानात्यादी'नामेव फलार्थकत्वाऽनभ्युपगमे—'उच्छेद'पदार्थोऽव्याप्तिः। सर्वेषामेव तदनभ्युपगमे त्वसम्भवः[१]। तथा च 'कृञ्धातुः फलवाचकः सकर्मकत्वात् पच्यादिव'दित्यनुमाने विपक्षबाधकतर्कप्रदर्शकं, 'कृञोऽकर्मके'त्यादीति बोध्यम्।

❀ काशिका ❀

वाचकत्वेऽपि फलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वं कृञादेरप्यक्षतमेव, उत्पत्त्यादिरूपफलव्यधिकरणयत्नाद्यात्मकव्यापारवाचकत्वादित्याशङ्क्याह—**अयं भाव इति। धात्वर्थ इति।** सकलधात्वर्थ इत्यर्थः। **सकर्मकत्वोच्छेदापत्तिरिति।** समनन्तरोक्तं न सकर्मकत्वमाश्रयितुमर्हं, यतिस्यन्द्याद्यतिव्यापकत्वादिति भावः। ननु सकर्मकत्वव्यवहारानुरोधादस्तु पच्यादेः फलांशोऽपि वाच्यः, अत एव धातोर्व्यापारमात्रवाचित्वे फलं द्वितीयाद्यर्थो वाच्यः, तथा च प्रयागात् काशीं गच्छति चैत्रे 'प्रयागं गच्छति चैत्रः' 'काशीं त्यजती'त्यपि प्रयोगः स्यात्, एवं 'ग्रामं स्यन्दते इति प्रयोगापत्तिश्च, एकस्यैव व्यापारस्य गम्यादिवाच्यस्य पूर्वापरदेशनिष्ठविभागसंयोगजनकत्वात्-तत्तत्फलविशेषान्वयबोधे तद्धातुजन्योपस्थितेर्हेतुत्वकल्पनयोक्तप्रयोगापत्तेर्वारणे तु गौरवम्। त्यजिगम्योः पर्यायताभ्रमदशायां 'गच्छति ग्रामं' 'त्यजति ग्राम'मिति वाक्यद्वयादप्यविलक्षणबोधोत्पत्त्या तथाविधहेतुहेतुमद्भावकल्पनमशक्यं च, व्यभिचारात्, तत्पुरुषीयतथाविधभ्रमशून्यकालिकतत्पुरुषीयतत्तत्फलान्वयबुद्धित्वस्य कार्यतावच्छेदकत्वं स्वीकृत्य व्यभिचारवारणे त्वतिगौरवम्। तथाविधभ्रमदशायामपि तादृगन्वयबोधो नाभ्युपेत इति तु न युक्तमनुभवसिद्धस्यापलापानर्हत्वात्। एवं त्यजति गच्छति त्यागो गमनमित्यतोऽप्यविलक्षणबोधापत्तिः। न च तत्र फलविशेषावच्छिन्न-

१. असम्भवः—उच्छेदपदार्थ इत्यन्वयो बोध्यः।

❀ दर्पणः ❀

वस्तुतस्तु,—'व्यापारो भावना सैवे'ति पूर्वार्द्धमेव विवरणप्रतिपादनेन धातोः फलव्यापारोभयार्थत्वसाधकं, तथाहि—धातोर्व्यापारार्थकत्वे सिद्धे भावनादिपदै-र्व्यापारपदविवरणपरतैव तस्य वाच्या, व्याख्यातं च तथैव सारकृता, तथाच—व्यापारार्थककृञेव विक्लित्त्याद्यर्थकपाकादिपदेनाऽपि विवरणादुभयोरपि धात्वर्थत्व-सिद्धिः। तत्र जानात्यादौ फलांशे विप्रतिपन्नं नैयायिकं प्रत्युक्तार्थोपष्टम्भकतया—'कृञोऽकर्मकते'त्याद्युक्तम्। धातुमात्रे व्यापाराऽवाचकत्वं वदन्तं मीमांसकं प्रति तु तदुपपादकतयैव,—तस्मात्करोतिरित्यादि। यद्यपि व्यापारांशे विप्रतिपन्नं प्रत्यपि 'कृञ' इत्याद्युपष्टम्भकं, तथापि विवरणस्यैवाऽऽख्यातपरतया सकर्मकत्वस्य व्यापारार्थकत्वं विनाऽप्यन्यथासिद्धावुद्भावितायां तद्ग्रन्थस्यावश्यकत्वादिति।

नव्यनैयायिकास्तु—"सकर्मकधातूनां फले तज्जनकत्वेन विवक्षितव्यापारेषु चोपलक्षणीभूतसाधनाऽऽकाङ्क्षोत्थापकताऽवच्छेदकधर्मसमानाऽधिकरणधर्मत्वाऽनुग-तीकृततत्तद्धर्माऽवच्छिन्नेषु शक्तिः सम्भवति, फलजनकतया विवक्षितानां तेषां विभिन्नधर्मवत्त्वम्। यत्ते त्वेकधर्मावच्छिन्नस्यैव फलाऽनुकूलत्वं विवक्षाविषयस्तद-वच्छिन्न एव धातोः सा, न हि सर्वत्र समुदाय एव शक्तिरिति राजाऽऽज्ञाऽस्ति,

'क्रिया नामेय'मित्यादि भाष्यं तु बहुकालसाध्योक्तधात्वर्थविषयमिति न तद्व्याकोपः, अन्यथा सर्वत्राऽगतिकगत्यारोपाश्रयणापत्तेः, तेषामेव च व्यापार-पदव्यपदेश्यत्वं, कृतित्वस्य तादृशधर्मसमानाधिकरणधर्मत्वेऽपि न तस्य पच्याद्यर्थ-ताऽवच्छेदकत्वं, तदंशे तस्योपलक्षणत्वाऽनङ्गीकारात्, अत एव व्युत्पन्नानां न कदाचिदपि तत्तात्पर्येण यागपाकादिपदप्रयोगस्तथा प्रयुक्तादपि तस्मात्पाकादि-कृतिबोधश्च। एतेन 'तस्या अपि व्यापारतया धातोरेव लाभान्न तिङस्तत्र शक्ति'रिति निराकृतम्। जानात्यादीनां तु विषयत्वं फलं, तन्निर्वाहकज्ञानादि व्यापारश्च शक्यं, कृञस्तु साध्यत्वं यत्नश्चाऽर्थः, तेन तद्धात्वर्थफलसम्बन्धित्वरूपं मुख्यकर्मत्वं घटादीनां निराबाधम्, एवं स्वार्थफलव्यधिकरणत्वरूपं सकर्म-कत्वमपि। यत्याद्यकर्मकाणां तु तत्तद्धर्माऽवच्छिन्नयत्नादिरूपव्यापार एव सा।

❀ काशिका ❀

व्यापारे लक्षणास्वीकारान्नोक्तापत्तिरिति वाच्यम्। अनेककर्मप्रत्ययानां तत्तत्फलविशेषे शक्तिकल्पनां,—कर्मप्रत्ययासमभिव्याहृतगम्यादेस्तत्तत्फलावच्छिन्ने लक्षणाकल्पनां,—चापेक्ष्य गम्यादेरेव विशिष्ट-वाचकत्वस्योचितत्वात्। एवं 'पच्यते तण्डुलः स्वयमेवे'त्यादिप्रयोगानुपपत्तिश्च, फलस्य धात्ववाच्यत्वे कर्मस्थक्रियकत्वाभावेन कर्मवद्भावाप्राप्तेरित्यादिदोषाणामनवतार एव, तथा पच्यादेरुक्तरीत्या फलावच्छिन्नव्यापारार्थकत्वेऽपि कृञादेर्यत्नादिरूपव्यापारमात्रार्थकत्वे बाधकाभावः, तत्र सकर्म-

भाक्तत्वेऽपि कर्मणि लकारासम्भवात्,—न हि तीरे गङ्गापदस्य भाक्तत्वेऽपि

❀ दर्पणः ❀

'भोजनं यतते'—इत्यप्रयोगेण तद्विषयत्वस्य धातुशक्यत्वाऽनुपगमात्, 'यतते' इत्युक्ते कर्माऽकाङ्क्षाया अभावाच्च। अत्याद्युपसृष्टशीङादीनां तु फले लक्षणैव, शीङादितः सर्वत्र फलाऽबोधात्, तदर्थेऽनादितात्पर्यग्राहकतयैव चा'ऽधिशीङ्स्थाऽसा'मित्यादिसूत्रोपयोगः। 'कर्त्तें'त्यादौ तु कृञो यत्नबोधकत्वादेव नाऽचेतने कृतौ स्वरसतः कर्त्तृपदप्रयोगः। एवञ्च कर्त्तृबोधनिर्वाहाऽर्थं पचतीत्यादावाख्यातस्य शक्तिरावश्यकी, तदर्थंप्रयत्नस्याऽऽश्रयाश्रयिभावेन प्रथमान्तार्थेऽन्वयात् तद्बोधोपपत्तेः, यत्र तु न तद्बोधसिद्धी 'रथो गच्छती'त्यादौ—तत्र व्यापारे आश्रयत्वादौ वा यथायथं लक्षणा। 'स्वतन्त्रः कर्त्तें'ति सूत्रसामर्थ्येन धात्वर्थव्यापाराऽऽश्रयतत्प्रतियोगिनामपि कर्त्तृत्वस्य परिभाषणाच्च कर्त्तृबोधाऽनुपपत्तिर्यत्र प्रथमान्तसमभिव्याहारः। यत्र तु न समभिव्याहारस्तत्र कृत्यादिविशेष्यक एव बोधः, 'अनभिहिते' इत्यास्याप्यबोधिते इत्येवाऽर्थः,—अबोधनं त्वाश्रयाऽतिरिक्तांशे विशेषणतया कृत्यद्यर्थप्रबोधनमेवेति नाऽभिधानाऽनभिधानव्यवस्थाऽनुपपत्तिः, चैत्रः पचती'त्यादौ कर्त्तृबोधस्य कृतिशक्तयैव निर्वाहे तत्राख्यातशक्तिकल्पनाऽनौचित्याच्च, व्यापारव्यपदेशाऽभावेन विक्लित्यादीनामुक्तधर्मत्वस्योपलक्षणत्वाऽनुपगमात् पृथक् शक्तिरदृष्टैव, फलत्वं तु पूर्वं निरुक्तमेव, एवं सति क्वचिद् दूषणं प्रसक्तमवगणयिष्यते इत्याहुः।

एवं सकर्मकत्वादिनिर्वचनाऽनुपपत्त्या धातोरुभयार्थकत्वमावश्यकमिति पर्यवसितम्। व्यापारमात्रशक्तिवादिनस्तु—द्वितीयाद्यर्थकत्वं सकर्मकत्वम्, पच्यादिसमभिव्याहारे द्वितीयाया विक्लित्याद्यर्थकत्वात्, जानात्यादिसमभिव्याहारे च विषयत्वाऽद्यर्थकत्वात् तदन्वयित्वं तदर्थेऽक्षतमित्याहुः।

जानात्यादियोगे घटादीनां गौणकर्मत्वमिति वदतां मतमाशङ्क्य निराचष्टे— **नचेति। भाक्त इति।** भज्यते—आमृद्यते सेव्यते वा शक्यार्थोऽनयेति भक्तिर्लक्षणा, तया शक्याऽर्थस्य तिरोधानात्, स्वज्ञाने घटकतया शक्याऽर्थस्याऽपेक्षणाच्च तत आगतो भाक्त इत्यर्थः। **भाक्तत्वेऽपि** = लक्षणानिबन्धनत्वेऽपि। **कर्मणीति।**

❀ काशिका ❀

कत्वव्यवहारः कर्मान्वितार्थकत्वनिमित्तको गौणः। एवं तत्र धात्वर्थतावच्छेदकफलशालित्वरूपमुख्यकर्मत्वविरहेऽपि विषयत्वरूपं लाक्षणिकमेव कर्मत्वं संभवतीत्याशङ्क्याह—न च कृञादाविति। लकारासंभवादिति। गौणमुख्ययोरिति न्यायादिति भावः। तदेव दृष्टान्तेन दर्शयति—

तेन स्नानादिकार्य्यं कर्त्तुं शक्यम्, एवञ्च, 'न हि यत्न' इत्यत्र यत्न-मात्रमित्यर्थः ।। ५ ।।

अत एवाह—

[1]किन्तूत्पादनमेवातः कर्म्मवत् स्याद् यगाद्यपि ।
कर्म्मकर्त्तर्य्यन्यथा तु न भवेत्तद् दृशेरिव ।। ६ ।।

ॐ दर्पणः ॐ

मुख्यसकर्मकत्वमादाय शास्त्रस्य चारितार्थ्ये गौणे तद्व्यापारे मानाभावादिति भावः। तत्र लौकिकं दृष्टान्तमाह—न हीत्यादि। भाक्तराजपदव्यवहार्य्येण पुरोहितादिना तदीयकार्यप्रवर्त्तनात् 'महद्भूतश्चन्द्रमा' इत्यादावात्ववारणायाऽऽश्रितस्य गौणमुख्यन्यायस्य विशिष्यार्थोपस्थापकविशिष्टरूपोपादानपुरस्सरपदकार्यविषयकत्वस्याऽन्यत्र व्यवस्थापनाच्च नाऽत्र तद्विषयतेत्यन्ये।

परे त्वेतच्छास्त्रीयकर्मसंज्ञकार्थान्वय्यर्थकत्वमेव सकर्मकत्वं, सकर्मकपदात् कर्मणा सहेत्यर्थकाच्छब्दमर्यादया पूर्वोक्ताऽर्थालाभाच्च, 'लः कर्मणी'त्यादौ सकर्मकपदाद् बोधाऽनापत्तेः, तदनन्वय्यर्थकत्वमकर्मकत्वम्, अत 'एवाऽध्यासिता भूमय' इत्यादौ कर्मणि क्तोपपत्तिः, अन्वयस्य पृथगुपस्थितसंसर्गरूपतया न जीवत्यादिषु दोष इत्याहुः। अयमेव पक्षः फलाऽवच्छिन्नव्यापारबोधकत्वं सकर्मकत्वमिति वदद्भिराश्रितः, फलस्य कर्मतायाः सर्वैरेवोपगमात्, फलाऽन्वय्यर्थकत्वस्य सकर्मकेषु सत्त्वात् यदि चैकोपस्थितिविषयत्वान्नोक्तः प्रकारः सम्भवतीति विभाव्यते, तदा पृथक् शक्तिवादिमते निर्दुष्टत्वमेव। अवच्छिन्नपदस्य सम्बन्धपरत्वेन कर्मीभूतफलसम्बन्धिव्यापारार्थकत्वस्य सुस्थत्वात्। अकर्मकाणां फलार्थत्वाऽनङ्गीकारेणाऽतिव्याप्त्यव्याप्त्योरनवकाशादित्यवधेयम्। 'अध्यासिता भूमय' इत्यादौ यथोक्तोपपत्तिस्तथोपपादितं प्राक् ।। ५ ।।

ननु 'कर्मवत् स्याद् यगाद्यपी'ति मूलस्य कर्मवद् यगाद्यपि भवेदित्यर्थौ

ॐ काशिका ॐ

न हीति। उत्पत्त्यनुकूलयत्नार्थकत्वे कृञो नोक्तदोषसंभव इत्यत आह—एवं चेति। यत्नमात्रमितीति। मात्रपदेनोत्पत्तिरूपफलव्यवच्छेदः, तथा च पराभिमतयत्नमात्रार्थकत्वं निषिध्यते, उत्पत्तिविशिष्टयत्नार्थकत्वं तु स्वाभिमतमेवेति भावः ।। ५ ।।

अत एव = यत्नपदस्य तन्मात्रपरत्वादेव। अन्यथोत्पादनपदस्योत्पत्त्यनुकूलयत्नाद्यर्थक-

१. यतो—यत्नः = व्यापारस्थानियत्नमात्रमर्थो, न सम्भवति, अतः—उत्पादनं = उत्पत्तिरूपफलसहितं यत्नादि—एव—कृञर्थः; (न केवलं व्यापारमात्रमर्थः—) तथा च फलस्योत्पत्ति-

उत्पादनम् = उत्पत्तिरूपफलसहितं यत्नादि,—कृञर्थ इत्यर्थः। फलस्य वाच्यत्वे युक्त्यन्तरमाह—अत इत्यादि। यतः कृञो यत्न-मात्रमर्थो नेष्यतेऽतः। 'कर्म्मवत् स्या'दिति पदेन—'कर्म्मवत् कर्म्मणा तुल्यक्रिय' इति सूत्रं लक्ष्यते। अयमर्थः—"यत एवास्योत्पादनार्थकता,

❀ दर्पणः ❀

लभ्यते, स च बाधितोऽविवक्षितश्चेत्यत आह—**कर्मवत्स्यादिति पदेनेति। सूत्रं लक्ष्यत इति।** सूत्रविहितं लक्ष्यते इत्यर्थः। यथाश्रुते कर्मपदात् स्वघटितत्वेन लक्षणया सूत्रोपस्थितावपि तस्य यगादिकमित्यनेनाऽनन्वयापत्तेः, एतद्बोधनायैव,

❀ काशिका ❀

तयाऽसंगतिः स्पष्टैवेति भवत्युपष्टम्भकता। यत्नादीत्यादिपदेनान्यव्यापारस्यापि परिग्रहः, 'बीजा-दिनाङ्कुरः कृत' इत्याद्यनुरोधात्, तत्र यत्नबाधात् तत्त्यागेऽपि शक्त्यैवेतरव्यापारभानमिति भावः। ननु प्रत्ययार्थफलव्यधिकरणव्यापारवाचित्वं सकर्मकत्वमस्तु, प्रत्ययार्थफलाश्रयत्वमेव कर्मत्वमतो न कश्चिद् दोष इति चेन्न, 'घटं भावयती'त्यादौ फलस्यान्वयव्यतिरेकाभ्यां प्रकृतिभूतधातुवाच्यत्वे सति गौरवान्मानाभावाच्च तस्य प्रत्ययार्थत्वाभावेन तत्र लक्षणद्वयस्याप्यव्याप्त्यापत्तेः। किंच फलस्य प्रत्ययार्थत्वे 'पचती'त्यादौ फलविषयकबोधानापत्तिरिति दिक्। युक्त्यन्तरमाहेति। मुख्यभाक्तसाधारणकर्मत्वान्वितस्वार्थबोधकत्वमेव सकर्मकत्वम्, कर्मत्वानामननुगमेऽपि कर्मत्व-पदवत्त्वेन तेषामनुगमः। गौणेऽपि कर्मत्वे घटं जानाति करोतीत्यादिप्रामाणिकप्रयोगानुरोधाद् द्वितीयादयः, यथा शाब्दिकमते आरोपितकर्तृत्वादिकमादाय तृतीयादयः, अत एव 'शृणोत ग्रावाण' इत्यादि संगच्छते। अत एव च कारकचक्रप्रयोक्तृत्वं कर्तृत्वमिति भाष्यमते घटो भवतीत्यादिप्रयोगनिर्वाहः, न च कारकाधिकारे गौणमुख्यन्यायाप्रवृत्तेः सिद्धान्तसिद्धतया द्वितीयादिसिद्धावपि तत्र लकाराद्यसिद्धौ 'ज्ञायते क्रियते घट' इत्यादिप्रयोगासिद्धिरेवेति वाच्यम्; स्वरितत्वप्रतिज्ञया अधिकः कारोऽधिकारोऽधिकं कार्यमित्यर्थक—'स्वरितेन—' इति सूत्रेण तेषामपि सिद्धेः। धातुविशेषजन्ययत्नाद्युपस्थितेर्द्वितीयाद्यर्थविषयत्वान्वयबोधे नियामकत्वात्र घटाय यतत इति वक्तव्ये 'घटं यतत' इत्यादयः प्रयोगाः। अस्तु वा तत्र विषयतैव फलं, तस्या अपि ज्ञानादिप्रयोज्यत्वरूपफलत्वसत्त्वात्। एवं च मुख्यमेव कर्मत्वमिति नोक्तन्यायावतारोऽपि। अथवा पाणिन्यादिसंकेतसंबन्धेन कर्मपदवदर्थान्वय्यर्थकत्वमेव सकर्मकत्वम्, एतदेवैतच्छा-

रूपस्य कर्मस्थतया—'कर्मवत्कर्मणे'ति कर्मवद्भावात्कर्मकर्त्तरि 'क्रियते घटः स्वयमेवे'त्यादौ यगादयोऽप्युपपद्यन्ते इत्यपरमनुकूलं, यदि व्यापारस्थानिकयत्नमात्रमेवार्थः स्यात् तदा कर्मवद्भावो न स्यात्, व्यापारस्थानियत्नस्य घटादावभावात्। फलस्योत्पत्त्याख्यस्याङ्गीकारे तु—'पच्यते ओदनः स्वयमेवे'तिवत् 'क्रियते घटः स्वयमेवे' त्युपपद्यत एवेति—कारिकायाः सरलोऽर्थः।

अतः—'पच्यते ओदनः स्वयमेवे'तिवत्, 'क्रियते घटः स्वयमेवे'ति यगादयोऽप्युपपद्यन्ते,—अन्यथा यत्नस्य कर्मनिष्ठत्वाऽभावात् तन्न स्यात्, दृशिवत्, यथा—'दृश्यते घटः स्वयमेवे'ति न, दर्शनस्य घटावृत्तित्वात्, तथा यत्नास्यापीति तथा प्रयोगानापत्तेरिति ॥६॥

नन्वेवं कृञादेरिव जानतीत्यादेरपि विषयावच्छिन्नावरणभङ्गादि-

ॐ दर्पणः ॐ

'स्या'दिति लक्ष्यकोटावुपात्तमिति । **घटावृत्तित्वादिति** । घटमात्रवृत्तित्वाऽभावेन कर्मस्थक्रियकत्वाभावादिति तु परमार्थः ॥ ६ ॥

एवमिति । कर्मवद्भावाऽनुरोधेन करणार्थकरोतेरुत्पत्तिसहितयत्नार्थकत्वाभ्युपगमे इत्यर्थः । 'जानात्यादेरपी'त्यादिपदाद् 'गम्यादि'परिग्रहः । 'आवरणभङ्गादी'त्यादि-पदेन तु संयोगादेः सः । 'आवश्यक'मित्यनेन तत्र ज्ञानस्यैव फलत्वाङ्गीकारे तदनाश्रयत्वाद् घटादेः कर्मत्वमुपपत्तिरपि सूच्यते । आवरणभङ्गस्याप्यतीतादौ यथा फलत्वं तथा सारे एव सुबर्थनिर्णये वक्ष्यते ।

ॐ काशिका ॐ

स्त्रीयकर्मसंज्ञकार्थान्वय्यर्थकत्वमुच्यते, एतच्च भवतोऽप्यावश्यकमत एवाध्यासिता भूमय इत्यादि सिद्धम् । अन्यथा स्वार्थफलेत्यादेस्तत्साधारण्याभावेन कर्मणि प्रत्ययानुपपत्तेरित्यतो युक्त्यन्तरमाहेत्यर्थः । ननु वचनाभावात् कर्मकर्तरि—**कर्मवत् स्याद्यगाद्यपीति**—मूलमनुप-पन्नमित्यत आह—**कर्मवत् स्यादिति पदेनेति** । **सूत्रं लक्ष्यत इति** । सूत्रविहितमित्यर्थः । अन्यथा यगादीत्यनेनान्वयापत्तेः । कार्यातिदेशपक्षे साक्षादेव तत्सूत्रविहितत्वं यगादेः, शास्त्रातिदेशपक्षे तु परम्परयेति बोध्यम् । **तन्न स्यादिति** । कर्मस्थक्रियया तुल्या क्रिया फलरूपा, फलसमानाधिकरणव्यापाररूपा वा यत्र तादृशकर्ता कर्मवदित्यर्थकस्य—'कर्मवत् कर्मणा—' इति सूत्रस्याप्राप्तेः, कृञः फलवाचकत्वाभावात्, तदर्थयत्नस्य तु घटादिसमवेतत्वा-भावात् । तत्र कर्मवद्भावाभावे इष्टापत्तिस्तु न, प्रकृतसूत्रभाष्यविरोधात् । ननु कर्मणि समवायेन यत्नस्यासत्त्वेऽपि विषयतया तन्निष्ठत्वमक्षतमेव, अत एव घटं जानातीत्यादिवद् घटं करोतीति प्रयोग उपपद्यते, फलतावच्छेदकविषयतासंबन्धेन ज्ञानादिवद् यत्नस्य घटनिष्ठतया तस्य कर्मत्वात् । न चैवं घटं यतत इत्यपि स्यादिति वाच्यम् । तदुपस्थितयत्नस्य विषयतया फलत्वव्यवहाराभावेन विषयतायाः फलतावच्छेदकत्वानङ्गीकारात् । एवं च 'क्रियते घटः स्वयमेवे'त्युपपन्नमेवेत्याशङ्क्य नैवं वक्तुं शक्यं 'दृश्यते घटः स्वयमेवे'त्यादिप्रयोगापत्तेरित्याशयेन मूलोक्तं दृष्टान्तमुपपादयति—**यथा दृश्यते घट इति** ॥ ६ ॥

एवम् = फलव्यधिकरणेत्यादेरेव सकर्मकत्वरूपत्वे । **विषयावच्छिन्नेति** । अवच्छेदकता-

फलवाचित्वमावश्यकम्, अन्यथा सकर्म्मकतानापत्तेः, तथाच 'ज्ञायते घटः स्वयमेवे'ति किन्न स्यात्, एवं 'ग्रामो गम्यते स्वयमेवे'त्याद्यपीत्याशङ्कां मनसि कृत्वाह—

निर्वर्त्ये च विकार्य्ये च कर्म्मवद्भाव इष्यते ।
न तु प्राप्ये कर्म्मणीति सिद्धान्तोऽत्र व्यवस्थितः ॥७॥

❀ दर्पणः ❀

सकर्मकताऽनापत्तेरिति । स्वार्थफलव्यधिकरणे'त्याद्युक्तरूपस्य तत्राऽसम्भवादिति भावः । वस्तुतस्तु जानातेर्ज्ञानरूपफलाऽर्थकत्वमेव युक्तं 'न च कर्तृस्थभावकानां कर्मणि क्रियायाः प्रवृत्तिरस्ती'ति भाष्येण—कर्तृस्थभावकानां क्रियाफलस्य कर्ममात्रे वृत्तिर्नास्तीत्यर्थकेन—कर्तृकर्मोभयसाधारणफलार्थकत्वं कर्तृस्थक्रियकत्वं वदता कर्ममात्रवृत्तिफलार्थकत्वरूपकर्मस्थक्रियकत्वस्यैवाऽभ्युपगमेन तत्राऽऽवरणभङ्गस्य फलत्वे तत्पक्षे कर्मवद्भावस्य दुर्निवारतापत्तेः । आदृतश्चायमेव पक्षो 'जानाती'त्यादौ ज्ञानेच्छाद्यनुकूलो व्यापार इति शाब्दबोधप्रकारं दर्शयता ग्रन्थकृताऽपि । प्रकृते आशङ्कासमाधाने तु—भाष्यहर्य्याद्युक्तप्रथमकल्पाऽभिप्रायेणेति सारे एव स्फुटम् । नचोक्तकल्पे ज्ञानस्य समवायेन घटादावसत्त्वात्तेषां जानातिकर्मत्वाऽनुपपत्तिः, ज्ञानस्य—तदनुकूलव्यापारस्याश्रयतादेश्च सामानाधिकरण्यादकर्मकत्वापत्तिः, कर्तृस्थभावकत्वानुपपत्तिश्चेति वाच्यम् । 'शास्त्रे ज्ञानं, घटे ज्ञान'मिति प्रतीत्या विषयतया तस्य ज्ञानाश्रयताभ्युपगमेनाद्यदोषस्य, फलताऽवच्छेदकसम्बन्धघटितसामानाधिकरण्यघटिताऽकर्मकत्वस्य तत्राऽभावेन द्वितीयस्य, विषयतासमवायाभ्यां कर्मकर्त्रुभयवृत्तित्वेनाऽन्त्यदोषस्य वाऽभावात्, अधिकमग्रे वक्ष्यते । प्रकृतमनुसरामः । **किन्न स्यादिति** । 'क्रियते घटः स्वयमेवे'त्यत्र घटस्योत्पत्तिरूपफलाश्रयत्ववदावरणभङ्गरूपफलाश्रयत्वस्यापि सत्त्वादिति भावः । ननु निर्वर्त्यविकार्यकर्मणोः कर्मवद्भावो, न प्राप्यकर्मणीत्यत्र किं मानमत आह—**सिद्धान्तोऽत्रेति** । अत्र = 'कर्मवत् कर्मणा तुल्यक्रिय' इति । सूत्रभाष्ये तत्र हि—'धातोरेकाच' इति सूत्रादनुवर्त्तमानधातुग्रहणेन धातुवाच्यक्रियया इत्यर्थलाभेन 'साध्वसिश्छिनत्ति' 'स्थाली पचती'त्यादौ करणाधिकरणाभ्यां तुल्यक्रिये कर्त्तरि वस्तुतः

❀ काशिका ❀

संबन्धेन विषयनिष्ठ आवरणभङ्ग इत्यर्थः । भङ्गादीत्यादिपदेन विषयतापरिग्रहः । **किं न स्यादिति** । तथा च फलव्यधिकरणेत्यादिरूपं सकर्मकत्वमपि स्वीकारयोग्यं न भवतीति तात्पर्यम् । किं च 'गम्यते ग्रामः स्वयमेवे'त्यादिप्रयोगापत्तिरूपोऽपि दोष इत्याह—**एवं ग्राम**

ईप्सितं कर्म्म त्रिविधं—'निर्वर्त्त्यं,' 'विकार्य्यं', 'प्राप्यञ्च', तत्राद्ययोः कर्म्मवद्भावो, नान्त्ये। प्राप्यत्वञ्च—क्रियाकृतविशेषानुपलभ्यमानत्वमिति सुबर्थनिर्णये वक्ष्यते। न ह्ययं घटः केनचिद् दृष्टो, ग्रामोऽयं केनचिद् गत इति शक्यं कर्म्मदर्शनेनाऽवगन्तुम्, 'घटं करोती'ति

❁ दर्पणः ❁

सतोऽपि व्यापारस्य धातुवाच्यत्वाऽभावादेवाऽनतिप्रसङ्गे कर्मग्रहणमितिरिच्यमानं कर्मस्थक्रियां लक्षयतीति सिद्धान्तो व्यवस्थित इत्यर्थः। कर्मस्थक्रियकत्वं च-प्राप्यभिन्नकर्म्मण्येव सम्भवतीति दर्शयितुमादौ वक्ष्यमाणमपि विभागं सुखबोधायाऽऽह–**ईप्सितङ्कर्मेति**। यद्यपि द्वेष्याद्यनीप्सितस्याप्यत्रेवान्तर्भावात् कर्म त्रिविधमित्येवं वक्तुं युक्तं, तथापि हरिणा "तयोरेभ्यस्त्रिधा मतं, तच्चेप्सिततमम्" इत्यादिना पार्थक्येन विभजनात् तदनुसृत्याऽत्राऽपि तथैवोक्तमिति ध्येयम्। **प्राप्यत्वञ्चेति**। आद्ययोर्लक्षणे तु सुवर्थनिर्णये वक्ष्येते। **वक्ष्यत इति**। 'क्रियाकृतविशेषाणा'मिति कारिकयेत्यर्थः। कर्मगतविशेषाधायकक्रियाथकत्व कर्मस्थक्रियकत्वं कर्मवद्भावप्रयोजकमिति दर्शयितुं तदन्वयव्यतिरेकौ दर्शयति—**न ह्येत्यादि**। **सोमं सुनोतीति विकार्य्य इति**। नन्वाद्ययोः कर्मस्थक्रियकत्वेन कर्मवद्भावविषयत्वेऽपि तत्र कथं सोमं सुनोतीत्यस्य विकार्य्यलक्षणाक्रान्तत्वं, प्रकृतेः सोमस्य परिणामित्वाऽनवगमात्, तदुक्तं 'प्रकृतेस्तु विवक्षायां विकार्य्य'मिति 'विवक्षाया'मित्यस्य 'परिणामित्वेने'त्यादिरिति चेदित्थं—चूर्णीकरणरूपाऽभिषवैकदेशचूर्णं प्रति प्रकृतिसोमस्य परिणामित्वविवक्षया तदुपपत्तिः।

❁ काशिका ❁

इति। निर्वर्त्यादिस्वरूपज्ञानार्थमाह—**ईप्सितमिति**। तेन तद्भिन्नकर्मण आधिक्येऽपि न क्षतिः।

क्रियाकृतविशेषेति। क्रियाकृतविशेषेण तद्वैशिष्ट्येनानुपलभ्यमान इत्यर्थः। यद्वानुपलभ्यमानः क्रियाकृतविशेषो यत्रेति बहुव्रीहौ राजदन्तादित्वादिना विशेषणस्यापि परनिपातः। 'विशेषदृष्टिसर्पदृष्ट्योर्यद्यपि मूर्च्छादिरूपो विशेषो दृश्यते, तथापि न सर्वत्र, तथा यद्धातुकर्मणि प्रायः क्रियाकृतविशेषोपलम्भाभावस्तद्धातुकर्म प्राप्यं कर्मेति पर्यवसन्नम्। **वक्ष्यत इति**।

'क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत् प्राप्यमिति कथ्यते॥' इति।

१ 'विषदृष्टी'ति मुद्रितपुस्तके पाठः, सोऽपि युक्त एव, विषदृष्टिः = पुरुषभेदः, येन दृष्टा जना मूर्च्छामापद्यन्ते। 'विशेषदृष्टी'ति पाठेऽपि विशेषदृष्टिः = योगशक्तिशालिप्रेक्षणमित्यर्थो बोध्यः।

निर्वर्त्त्ये, 'सोमं सुनोती'ति विकार्य्ये च तज्ज्ञातुं शक्यमिति—न तत् प्राप्यम् । तथाच घटादेर्दृश्यादौ प्राप्यकर्म्मत्वान्नोक्तातिप्रसङ्ग इति भावः ।

❀ दर्पणः ❀

अन्ये तु—क्रिया यद्धर्मनाशकं फलं जनयति तद्विकार्य्यमिति लक्षणाऽभिप्रायेण सोमे विकार्य्यत्वनिर्देशः, तथाहि—आरम्भकसंयोगनाशकविभागाऽनुकूला क्रिया सुनोतेरर्थः, सोमपदं च प्रकृते तदवयवे लाक्षणिकं, तथाच सोमावयवरूपसोमपदाऽर्थवृत्त्यारम्भकसंयोगस्य धात्वर्थक्रियाजन्यविभागेन नाशाद्विकार्य्यत्वोपपत्तिरित्याहुः ।—ज्ञातुं शक्यमिति । एतेन क्रियाकृतविशेषधर्मप्रकारकप्रतीतियोग्यत्वं कर्मवद्भावप्रयोजकमित्युक्तं भवति । प्राचीननैयायिकमते तु–प्रकृते कृञ उत्पत्तिरूपफलावच्छिन्ने यत्ने लक्षणया कर्मवद्भावोपपत्तिः । नोक्तातिप्रसङ्ग इति । न कर्मवद्भावापत्तिरित्यर्थः । प्रकृतनैयायिकमते तु ज्ञानं करोतीत्याद्यप्रयोगात् साध्यत्वे फले यत्ने च कृञः शक्तिरेव, तथा च घटादौ साध्यत्वरूपविशेषधर्म-

❀ काशिका ❀

—इति वाक्यपदीयादिति वक्ष्यत इत्यस्यार्थः । नोक्तातिप्रसङ्ग इति । तद्बीजं तु 'कर्मवत् कर्मणा—' इति सूत्रे कर्मणेत्युपादानात् कर्मस्थक्रियाणां कर्मस्थभावकानामेव धातूनां ग्रहणं विनाप्यन्तरङ्गत्वात् प्रकृतधात्वर्थाश्रयकारकेणैव तुल्यक्रियत्वलाभेन 'साध्वसिश्छिनत्ती'त्यत्र वारणात्, कर्तृभिन्नं च प्रकृतधात्वर्थाश्रयीभूतं कर्मैवेति भावः । क्रियाव्यवस्था चेत्थमुक्ता भर्तृहरिभिः—

'विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता ।
क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पिता ॥' इति ।

पूर्वार्धस्य तूक्त एवार्थः । "[1]नन्वेवं चिन्तयति पश्यत्यादीनां कर्तरि क्रियाकृतविशेषानुपलम्भात् कर्तृस्थभावकत्वानुपपत्तिरतः सिद्धान्तिमतमाह[2]—अन्येषामिति । मत इति शेषः । यत्र कर्तृकर्मोभयसाधारणं फलं शब्देन प्रतिपाद्यते स कर्तृस्थभावकः, यथा 'पश्यति घटं' 'ग्रामं गच्छती'त्यादौ, ज्ञानरूपफलस्य समवायविषयतासंबन्धाभ्यामुभयनिष्ठत्वात्, संयोगस्य च समवायेनोभयनिष्ठत्वम्, एवं हासस्यापि चित्तवृत्तिविशेषस्योभयनिष्ठत्वम् । अत एव जानातेरावरणभङ्गाद्यनुकूलव्यापारार्थकत्वे कर्तृस्थक्रियकत्वानापत्तिः, कर्मस्थक्रियकत्वापत्तिश्चेति ज्ञानानुकूलव्यापारार्थकत्वमेव स्वीक्रियते । यत्र तु कर्तृवृत्तिफलं स कर्मस्थभावको यथा 'भिनत्ती'त्यादौ, न हि द्विधाभवनादिकं कथमपि कर्तृगतं भवतीति" हेलाराज इत्यन्यत्र विस्तरः ।

१ हेलाराजीयां कारिकोत्तरार्द्धव्याख्यामाह—नन्विति । एवं = एवं क्रियाव्यवस्थायाम् ।
२ 'आहे'ति 'हरि'रिति शेषः ।

धातूनां फलावाचकत्वे त्यजिगम्योः पर्य्यायतापत्तिः, क्रियावाचकत्वाविशेषात्, फलस्योपलक्षणत्वेऽप्येकक्रियाया एव पूर्वदेशविभागोत्तरदेश-संयोगजनकत्वादुक्तदोषतादवस्थ्यमित्यपि वदन्ति, तस्मादावश्यकं सकर्म्म-

❁ दर्पणः ❁

प्रकारकप्रतीतेः सार्वजनीनत्वात्, तादृशप्रतीतियोग्यतायास्तत्राऽनपायादनायासेनैव कर्मवद्भावोपपत्तिः, यदि च कर्तृविशेषाऽऽधायकक्रियार्थकत्वं तत्स्थक्रियकत्वमिति लक्षणे पच्यादिकर्त्तरि श्रमरूपविशेषदर्शनाज्जानात्यादिकर्त्तरि तददर्शनाच्चाऽतिव्याप्त्यादिदोषादुक्तभाष्येण, 'विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता ।
क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पिता ॥' इति ।

—हरिकारिकोत्तरार्द्धेन च पूर्वोक्तलक्षणयोरेव निर्भरः प्रतीयते इत्युच्यते तदाऽपि न क्षतिः, कर्मस्थक्रियकलक्षणे जानात्यादिभिन्नत्वस्य षोपदेशलक्षणे ष्वष्काद्यन्यतमत्वस्येव कर्त्तृस्थक्रियकलक्षणे जानात्याद्यन्यतमत्वस्यापि निवेशेन करोतौ कर्मस्थक्रियकत्वस्य, जानात्यादौ कर्तृस्थक्रियकत्वस्योपपत्तेः । अत एव हरिणाऽपि,—'शब्दैरेव प्रकल्पिते'त्यत्र शब्दपदमुपात्तं, शब्दप्रतिपाद्याऽर्थगतविशेषैः शब्दैश्चेति तदर्थादिति । दर्शनान्तरीयां युक्तिमुपन्यस्यति— **धातूनामिति** । 'त्यजिगम्यो'रित्युपलक्षणं तादृशधातुमात्रस्य । **पर्यायतापत्तिरिति** । तच्छक्यताऽवच्छेदकाऽवच्छिन्नशक्तत्वस्यैव पर्य्यायतापदार्थत्वादिति भावः । ननु त्यजिगम्योः क्रमेण विभागसंयोगोपलक्षितव्यापाराऽर्थकत्वमेवञ्च पर्य्यायलक्षणे तदुपलक्षणेतराऽनुपलक्षितत्वस्याऽपि विशेषणान्नोक्ताऽऽपत्तिरत आह—**उपलक्षणत्वेऽपीति** । उपलक्षणत्वं च तत्पदजन्यबोधविषयत्वेन शक्त्यविषयत्वे सति शक्तिविषयत्वम् । **जनकत्वादिति** । तथाच संयोगविभागयोः स्वार्थव्यापारजन्यत्वाऽविशेषाद् गम्यर्थव्यापारे संयोग एवोपलक्षणं, नो विभाग इत्यत्र विनिगमकाऽभावादुभयस्यैवोपलक्षणत्वे उक्तापत्तिर्दुर्वारेति फलेऽपि शक्तिरावश्यकीति भावः । अत्र ग्रामं गच्छतीत्यादौ द्वितीयाऽर्थसंयोगादिरूपफलाऽन्वयित्वस्यैव विनिगमकत्वाद् गमनक्रियायां संयोगस्यैवोपलक्षणत्वमित्यस्य सुवचतयाऽन्यत्र लक्षणयोपपत्तेश्च

❁ काशिका ❁

धातोः फलवाचकतासाधिकामन्येषां युक्तिमाह—**धातूनामिति** । **क्रियावाचकत्वाविशेषादिति** । एकजातीयक्रियावाचकत्वाविशेषादित्यर्थः । अत एव धातुमात्रस्य पर्यायतापत्तिर्न कृता । अपि वदन्तीत्यनेनास्वरसः सूचितः, तद्बीजं तु द्वितीयया तत्तत्फलबोधे तत्तद्धातुजन्योपस्थितेर्हेतुत्वकल्पनया प्रयागं त्यजतीति प्रयोक्तव्ये प्रयागं गच्छतीत्यादिप्रयोगवारणं सुकरमिति ।

काणां फलवाचकत्वम्, अकर्म्मकाणां तु तन्निर्विवादमेव, 'भू सत्ताया'मित्याद्यनुशासनाच्च। अत एव—'द्व्यर्थः पचि'रिति भाष्यं सङ्गच्छते इति दिक्॥ ७॥

"एवं सिद्ध्यतु फलव्यापारयोर्वाच्यत्वं, किन्तु आख्यातवाच्यैव सा भावना, न धातोः, प्राधान्येन प्रतीयमानव्यापारस्य धात्वर्थतायाः

❀ दर्पणः ❀

नोक्तरीतिः साध्वीत्यस्वरसोऽपि—वदन्तिभ्यां सूचितः। उपसंहरति—तस्मादिति। उक्तयुक्तिसंहतेरित्यर्थः। **निर्विवादमेवेति**। स्वार्थफलसमानाऽधिकरणव्यापार-वाचकत्वरूपाऽकर्मकत्वस्य धातोः फलवाचकत्वं विनाऽनुपपन्नत्वादिति भावः। ननु सकर्मकत्वं पूर्वोक्तमेव तद्भिन्नधातुत्वं चाऽकर्मकत्वमिति नोक्ताऽनुपपत्तिरत आह—**भूसत्तायामिति**। गणेषु फलस्यैव निर्देशादिति भावः। **अत एवेति**। धातुमात्रस्य फलवाचकत्वादेवेत्यर्थः। **द्व्यर्थ इति**। द्व्यर्थपदं फलव्यापारोभयार्थकमित्याशयः। ननु 'द्व्यर्थः पचि'रिति भाष्यं पचेरुपादानात्सकर्मकाणां फलार्थकत्वे साधकमस्तु, न त्वकर्मकाणामत आह—**दिगिति**। तथा सति सत्ताद्यर्थनिर्देश-वैयर्थ्याऽऽपत्तेः, धातुसामान्यशक्त्या पच्यादेरिव भवत्यादेरपि व्यापारबोधसम्भवादिति दिगर्थोऽवसेयः॥ ७॥

ननु 'व्यापारो भावना सैवे'त्युक्तविवरणेन न व्यापारस्य धात्वर्थतानिर्णयः, पचति पाकं करोतीति विवरणेन आख्यातार्थताया अपि वक्तुं शक्यत्वादिति मीमांसकाशङ्कासमाधानपरतया मूलमवतारयति—**एवमित्यादिना**। **वाच्यत्वमिति**। तिङन्तजन्यबोधविषयत्वमित्यर्थः तथाच पाकाऽनुकूला भावनेत्यादिविवरणे-

❀ काशिका ❀

निर्विवादमिति। भवतीत्यादितः सत्तादिबोधस्य सर्वमतसिद्धत्वादित्यर्थः। पचतीत्यादित एव फलबोधे विवादः। तत्र फलबोधो द्वितीयादित एवेति पराभ्युपगतत्वात्। **अत एव** = धातोः फलवाचकत्वादेव। **संगच्छत इति**। तण्डुलानोदनं पचतीत्यत्र तण्डुलानां विकार्यकर्मत्वमोदनस्य निर्वर्त्यकर्मत्वमभिमतं तन्निर्वाहार्थमुत्पत्तिविक्लित्तिरूपफलद्वयार्थकत्वपर एव स भाष्यग्रन्थः। एकस्यैव व्यापारस्योक्तफलद्वयजनकतया व्यापारद्वयपरत्वे त्वसंगतिः स्पष्टैवेति भावः। नन्वेवं जानात्यादेः सकर्मकत्वाय ज्ञानाद्यनुकूलव्यापारवाचित्वं, तथा च चक्षुरादिकं जानातीति स्याच्चक्षुरादावपि ज्ञानानुकूलचक्षुर्मनःसंयोगादेः सत्त्वादिति चेन्न, 'स्थाली पचती'तिवदिष्टापत्ते-रित्याशयेनाह—दिगिति॥ ७॥

पूर्वोक्तयुक्तिभिः फलव्यापारयोर्वाच्यत्वे साधिते 'तिङ्प्रत्ययवाच्यैव भावने'ति मण्डन-

'प्रकृतिप्रत्यार्थयोः प्रत्ययार्थस्य प्रधान्य'मिति न्यायविरुद्धत्वात्, 'तदागमे

❀ दर्पणः ❀

नाऽपि 'पचती'त्यस्य पाकाऽनुकूलभावनाबोधकत्वमस्त्वित्यर्थः। यथाश्रुते विवरणेन धातोर्भावनावाचकत्वनिर्णये 'किं त्वाख्यातवाच्यैव सा'इत्युत्तरग्रन्थासङ्गतेः,

'प्रकृतिप्रत्ययौ'विति न्यायस्य संख्यादौ व्यभिचारमाशङ्क्याह—तदागमे हीति। इदं च 'यः प्रधानं स प्रत्ययार्थ' इति न्यायाऽऽकार इत्यभिप्रेत्य, तन्मूलसूत्रालोचने तु 'यः प्रत्ययार्थः स प्रधान'मिति न्यायाकारो लभ्यते, तथाहि,—'पशुना यजेते'ति श्रूयते, तत्रैकवचनोपात्तमेकत्वं यागे विशेषणमुत प्रकृत्यर्थे इति संशये, पशुपदार्थस्य यागं प्रति गुणत्वात् सम्भावितयावत्पशुकरणेन प्रधानावृत्तौ प्रधानभङ्गापत्त्या यावद्गुणं प्रधानाऽऽवृत्तेरयोगादेकत्वविशिष्टपशोर्विधाने त्वेकत्वस्य पशुविशेषणतया यागाङ्गत्वाऽभावात्तदविवक्षितमेव स्यादित्यर्थकेन—'तत्रैकत्वमयज्ञाङ्गमर्थस्य गुणभूतत्वा'दिति सूत्रेण पूर्वपक्षिते, 'शब्दवत्तूपलभ्यते, तदागमे हि दृश्यते, तस्य ज्ञानं यथाऽन्येषा'मिति सिद्धान्तसूत्रम्[1]। शब्दवत् = शब्दवाच्य यथा भवति तथोपलभ्यते, एकत्वं हि यतस्तदागमे एकवचनसमवधाने दृश्यते, अतस्तस्य प्राधान्येन प्रतीतिर्यथाऽन्येषामरुणादीनामित्यर्थः[2]। एवञ्च समानप्रत्ययो-

❀ काशिका ❀

मिश्रानुयायिमतमाशङ्क्य निराकुरुते—एवं सिध्यत्वित्यादिना। तदागमे हीति। 'शब्दवत्तूपलभ्यते तदागमे हि तद् दृश्यते तस्य ज्ञानं यथान्येषाम्'—इति जैमिनिसूत्रम्। 'पशुना यजेते'त्यत्रैकवचनोपात्तैकत्वस्य करणत्वेन न क्रियायामन्वयः, किं तु प्रकृत्यर्थे, 'प्रत्ययानां प्रकृत्यर्थान्विते'ति व्युत्पत्तेरिति स्वीकारे एकत्वस्य यागाङ्गत्वाभावात्तदभावेऽपि यागावैगुण्यात्तदविवक्षितमेव स्यादिति,—पूर्वपक्षे; इदमुत्तरसूत्रम्। तदर्थस्तु—शब्दवत् = शब्दबोध्यं यथा भवति तथोपलभ्यते एकत्वं, हि = यतः तदागमे = एकवचनश्रवणे, दृश्यतेऽतरतस्याङ्गत्वज्ञानं, यथान्येषां पशुत्व—लौहित्यादीनामिति। तथा च विशिष्टस्य श्रुत्याङ्गत्वबोधनेन पशुवाचित्ववच्छब्दबोध्यस्यास्य विशेषणस्याङ्गत्वोपपत्तिरिति भावः। एवं च तत्र यथा एकवचनागमे एकत्वं दृश्यतेऽतरतदर्थत्वमेवं पचतीत्यादावाख्यातश्रवणे सति व्यापारबोधात् तस्य तदर्थत्वमेवाङ्गीकार्यमन्यथोक्तन्यायविरोधापत्तेरिति तात्पर्यम्। तथा चोक्तं भट्टपादैः—

'तथा क्रमवतो नित्यं प्रकृतिप्रत्ययांशयोः।
प्रत्ययश्रुतिवेलायां भावनात्मावगम्यते॥' इति।

नन्वेवं पूर्वोक्तसकर्मकत्वाकर्मकत्वविभागोच्छेदः, व्यापारस्य धात्वर्थत्वाभावात्, एवं 'देवदत्तः

१ मीमांसासूत्रम्। २. 'शब्दवत्तपे'ति सूत्रार्थः।

हि दृश्यते' इति न्यायविरुद्धत्वाच्च, एवञ्च स्वयुक्ताख्यातार्थव्यापार-व्यधिकरणफलवाचकत्वं सकर्म्मकत्वम्, आख्यातार्थव्यापाराश्रयत्वञ्च कर्तृत्वं वाच्य"मित्यादि वदन्तं मीमांसकम्मन्यं प्रत्याह—

❀ दर्पणः ❀

पात्तत्वप्रत्यासत्त्या विभक्त्यर्थंकरणाऽन्वितस्याऽरुणाऽधिकरणन्यायेन प्रथमं क्रियाया-मन्वयः, पश्चात् प्रकृत्यर्थे, तथाच'पश्वेकत्वोभयकरणको याग' इति बोधेनैकत्वस्य यागाङ्गत्वऽवगमान्नानेकपशुभिर्याग इति तद्भावः। प्राधान्यं च प्रकृत्यर्थाऽवि-शेषणत्वमेव, प्रत्ययार्थमादाय न्यायावतारात्तु-यः प्रत्ययार्थं इति भागस्य न्यायघट-कत्वम्, प्रकृते आख्याताऽसमवधाने भावनाऽबोधात् तस्याप्राधान्येन भानमिति तत्सङ्गतिरिति बोध्यम्। ननु सकर्मकत्वाऽनुगतकर्तृत्वयोर्दुर्वचत्वमेवैतन्मते दूषणमत आह—**एवञ्चेति**। भावनाया आख्यातवाच्यत्वे चेत्यर्थः। तथाचाऽऽरब्धे पाके फलाऽनुत्पत्तिदशायां पाको जातो न वेति प्रश्ने 'भविष्यती'त्युत्तराऽनुरोधात्

❀ काशिका ❀

पचती'त्यादौ धातूपात्तव्यापाराश्रयत्वरूपकर्तृत्वस्य दुर्वचत्वेन देवदत्तादिरूपे कर्तरि प्रत्ययो न स्यादित्यतः सकर्मकत्वादिकमन्यादृशमाह—**एवं च स्वयुक्तेति**। स्वं = प्रकृतधातुः। भव-त्यादेः पच्यादियुक्ताख्यातार्थव्यापारव्यधिकरणफलवाचकत्वात् सकर्मकत्वापत्तिरतः—'स्वयुक्ते'-त्याख्यातविशेषणम्। योगश्च स्वाव्यवहितोत्तरवर्तित्वं, तेन 'देवदत्तः पचति' 'भवति घट' इत्यत्र पच्युत्तराख्यातस्य भूधातुयुक्तत्वेऽपि नातिप्रसङ्गतादवस्थ्यम्। 'स्वोत्तरवृत्तित्व'मात्रनिवेशे,—'घटो भवति' 'पचति देवदत्त' इत्यत्र भूधातावतिप्रसङ्गः, 'अव्यवहितोत्तरवर्तित्व'मात्रनिवेशे—'अस्ति''पपाचे'त्येतद्घटकास्तिपच्योः संग्रहेऽपि पचति अस्त्यतीत्येतत्समुदायघटकयोस्तयोरसंग्रहः, अतो द्वितीयदलप्रवेशः। तेन 'घटं भावयति,' 'ग्रामं गमयती'त्यादौ भवत्यादेर्णिजर्थव्यापार-व्यधिकरणोत्पत्त्यादिफलवाचकत्वसत्त्वान्नासंग्रहः। उत्पत्त्यादिवाचकत्वं,—प्रकृतिभूतभूप्रभृतावेव न ण्यन्तस्येति ण्यन्तस्य सकर्मकत्वाभावे 'भाव्यते घट' इति ण्यन्तात् कर्मणि लकारानुप-पत्तिरिति न वाच्यं, स्वस्वघटकान्यतरवृत्त्या तद्बोधकत्वरूपस्य तद्वाचकत्वस्य निवेशेनादोषात्। 'तद्घटकभूधातावतिप्रसङ्ग' इति तु न शङ्क्यम्, इष्टापत्तेः। एवं 'स्वयुक्तप्रत्ययार्थव्यापार-समानाधिकरणफलवाचकत्व'मकर्मकत्वं, 'स्वयुक्तप्रत्ययार्थव्यापारजन्यफलाश्रयत्वं कर्मत्व'मित्यपि बोध्यम्। **कर्तृत्वं वाच्यमिति**। यथा देवदत्तः पचतीत्यादौ देवदत्तादेः-चैत्रो मैत्रेण पाचयती'त्यादौ प्रयोज्यप्रयोजकयोरपि णिजर्थाख्यातार्थाश्रयत्वात् कर्तृत्वं, देवदत्तेन पच्यते, देवदत्तेन स्थीयत इत्यत्राप्याख्यातार्थव्यापाराश्रयत्वाद् देवदत्तस्य कर्तृत्वमिति। इत्यादीत्यादिपदादुक्ताकर्मकत्वलक्षणा-दिसंग्रहः। **मीमांसकम्मन्यमिति**। 'आत्ममाने खश्च' इति खश्। अनेन भावनामुख्यविशेष्यको

तस्मात् करोतिर्धातोः स्याद् व्याख्यानं, न त्वसौ तिङाम् ।
पक्ववान कृतवान् पाकं किं कृतं पक्वमित्यपि ॥ ८ ॥

तस्मात् = अभिप्रायस्थहेतोः, सचेत्थम्, फलमात्रस्य धात्वर्थत्वे ग्रामो गमनवा'निति प्रयोगापत्तेः संयोगाश्रयत्वात्, फलानुत्पाददशायां व्यापारसत्त्वे 'पाको भवती'त्यनापत्तेः, व्यापारविगमे फलसत्त्वे 'पाको विद्यते' इत्यापत्तेश्च । यत्तु—भावप्रत्ययस्य घञादेरनुकूलव्यापारवाचकत्वान्नापपत्तिरिति, तन्न, कर्त्राख्यातवत् 'कर्त्तरि कृ'दित्यत एव तद्विधान-

ॐ दर्पणः ॐ

फलमात्रं धातुवाच्यमिति मीमांसकाशयः । हेतोः पूर्वमनुपादानादाह—**अभिप्रायस्थेति** । त्यदादीनां बुद्धिस्थपरामर्शकत्वादिति भावः । **प्रयोगापत्तेरिति** । भावल्युडन्तगमनपदार्थसंयोगात्मकफलस्य ग्रामे सत्त्वाद् 'ग्रामः संयोगवा'नितिवद् 'ग्रामो गमनवा'निति प्रयोगस्य प्रामाण्यापत्तेरित्यर्थः, एवमग्रेऽप्यूह्यम् । **फलानुत्पादेति** । फलानुत्पादे तादृशप्रयोगस्य सर्वाननुमतत्वादुक्तम् । **व्यापारसत्त्व इति** । **भवतीत्यनापत्तेरिति** । पाकपदार्थस्य विक्लित्तेरवर्तमानत्वादित्यर्थः । फलोत्पाददशायामर्थाऽबाधात्तादृशप्रयोगस्येष्टत्वादाह—**विद्यत इत्यापत्तिश्चेति** । व्यापारांशपरित्यागेन फलमात्रस्य धात्वर्थत्वाऽभिप्रायेण तु 'भविष्यती'त्युत्तरं पाकमुत्पादयतीति विवरणञ्चेति भावः । **अनुकूलेति** । अनुकूलत्वोत्कीर्त्तनं त्वन्विताऽभिधानवादिनां मतमेतदिति सूचयितुम् । **नानुपपत्तिरिति** । भावविहित-

ॐ काशिका ॐ

बोध इति सूचितम् । **गमनवानिति** प्रतीत्यापत्तिरिति । फलव्यापारयोर्धात्वर्थत्वमतेऽपि तदापत्तिरिति तु न शङ्क्यम्, अन्तरङ्गत्वात् फलस्य व्यापारे एवान्वयाङ्गीकारात् । एवं 'गमनं न स्यन्द' इति प्रयोगापत्तिश्च बोध्या । **संयोगाश्रयत्वादिति** । अस्य 'ग्रामस्ये'त्यादिः । ननु कर्मणः कर्तृत्वविवक्षायां तादृशप्रयोगापत्तिः सिद्धान्तेऽपीति चेन्न । कर्मदेवदत्तादेरेव कर्तृत्वविवक्षायामपि तदापत्तिरित्याशयात्, फलमात्रार्थकात् तत्समानाधिकरणव्यापारार्थकाच्च ल्युडादेरनभिधानाद्वेति भावः । **व्यापारविगमे** = व्यापारनाशे । **इत्यापत्तिश्चेति** । धातोर्व्यापारावाचकत्वे पाकपदार्थफलमेव वाच्यं, तथा चोक्तानापत्तिरुक्तापत्तिश्चेति भावः । फलानुत्पाददशायां फलकर्तृकसत्ताया वर्तमानत्वाभावात्, व्यापारविगमेऽपि फलकर्तृकसत्ताया वर्तमानत्वाच्चेति भावः । पूर्वोक्तस्थले पचतीत्यनापत्तिस्तदापत्तिश्च न संभवति, प्रत्ययार्थव्यापारे एव समानाभिधानश्रुत्या तदर्थकालान्वयोपगमात् । उक्तदूषणोद्धारं तदुक्तं निराकुरुते—**यत्तु भावेति** । **नानुपपत्तिरिति** । उक्तदोषाणामनवकाशादेतन्मतानुपपत्तिर्नेत्यर्थः ।

लाभे,-भावे विधायकाऽनुशासनवैयर्थ्यापत्तेस्तद्विरोधापत्तेश्च ।
अथ व्यापारोऽपि धात्वर्थ इत्यभ्युपेयमिति चेत्तर्हि धातुत एव

❀ दर्पणः ❀

ल्युड्घञाद्यर्थव्यापारस्य ग्रामादौ बाधान्न पूर्वोक्तप्रयोगापत्तिरित्यर्थः । विक्लित्त्यनुकूलघञाद्यर्थव्यापारस्य कर्तृतया भावनादावन्वयान्न पूर्वोक्तप्रयोगाऽनुपपत्त्यापत्तिरिति भावः । ननु'कर्त्तरि कृ'दिति विहितस्य कृतः 'पक्ता' 'पाचक' इत्यादौ कर्त्रर्थत्वदर्शनात्तद्विहित घञादीनां व्यापाराऽर्थत्वदौर्लभ्यात्तदर्थत्वबोधनाय 'भाव' इत्यनुशासनचारितार्थ्यमित्याशङ्कामपाकरिष्यंस्तदनुगुणं दृष्टान्तमाह—**कर्त्राख्यातवदिति** । तथाच 'लः कर्मणी'ति विहितकर्त्राख्यातस्य त्वन्मते व्यापाराऽर्थकत्ववत्, 'कर्त्तरि कृ'दिति विदितघञादीनामपि व्यापाराऽर्थकत्वसम्भवादित्यर्थः । **विरोधापत्तेश्चेति** । चो हतौ, यतो वैयर्थ्यमतस्तद्विरोधापत्तिरित्यर्थः । उक्तिवैचित्र्यमेतत् । यद्वा भावविहितप्रत्ययानां धात्वर्थानुवादकत्वात् प्रयोगसाधुतामात्रार्थकत्वमिति त्वदीयसिद्धान्तविरोधापत्तेरित्यर्थः । व्याख्यानमित्यस्य विवरणम्—

❀ काशिका ❀

कर्त्राख्यातवदिति । यथा 'लः कर्मणि–' इति सूत्रेऽनुवृत्त 'कर्तरि' इत्यस्य कर्तृत्वपरत्वमभ्युपगम्य तत्सूत्रेण व्यापारे लकारविधानं मीमांसकैरङ्गीक्रियते, तथा घञादीनामपि 'कर्तरि कृत्' इति सूत्रेण व्यापारे विधिसंभव इत्यर्थः । न केवलं तद्वैयर्थ्यमपि तु तद्भाष्यविरोधोऽपीत्याह—**तद्भाष्यविरोधेति** । घञादेरप्यसत्त्वभूतकारकान्वययोग्यव्यापारार्थकत्वे 'भावे' इति सूत्रभाष्यविरोधापत्तेरित्यर्थः । तत्र हि 'सत्त्वभूतभावो घञादेरर्थ' इति प्रतिपादितमित्यग्रे वक्ष्यते । ननु द्विविधभावोऽपि घञाद्यर्थोऽस्त्वतो न तद्विरोध इत्यतस्तद्भाष्यविरोधापत्तेश्चेति चेनान्येषां दूषणानां संग्रहः सूचितः । तथा हि—आख्यातप्रत्ययस्य कर्तुरवाच्यत्वेऽभिधानानभिधानव्यवस्थोच्छेदः, कर्तृकर्मकृतां व्यापारावाचकत्वे तण्डुलानां पाचकः देवदत्तेन पक्व इत्यादौ षष्ठ्याद्यनुपपत्तिः, कर्मत्वाद्यसंभवात् । तेषामपि भावनार्थकत्वे गौरवम्, अनुशासनेन तदर्थकत्वालाभश्च । न च 'कर्तरि कृत्' इति सूत्रस्थकर्तृपदस्यावृत्त्या धर्मधर्म्युभयबोधकतया भावनायां तद्विधिलाभ इति वाच्यम्, आवृत्तौ प्रमाणाभावात्, एवमपि कर्मकृतां तदर्थकत्वानुपपत्तिः स्थिरैव । न च 'तयोरेव कृत्य—' इत्यादावपि कर्तृग्रहणमनुवर्त्य भावनायामपि तेषां विधानमिति वाच्यं, गौरवापत्तेः । एवं 'गुरुः शिष्याभ्यां पाचयती'त्यत्र 'हेतुमति च' इति सूत्रबलात् प्रयोजकव्यापारस्य णिजर्थत्वे स्थिते प्रयोज्यव्यापार एवाख्यातार्थो वाच्यः, एवं च णिजर्थव्यापारस्य प्रकृत्यर्थतया आख्यातार्थव्यापारान्वयिन्येव तदर्थसंख्यान्वयाद्गुरुगतसंख्यानभिधाने गुरुपदात् प्रथमानापत्तिः, शिष्यपदात् तदापत्तिश्चेत्याद्यन्यत्र विस्तरः । **इत्यभ्युपेयमिति** । पूर्वोक्तदूषणगणनिरासाय

सकलव्यापारलाभसम्भवेनाख्यातस्य पृथक्शक्तिकल्पने गौरवमिति। पचतीत्यस्य[1] पाकं करोतीति विवरणात्मा करोतिर्धातोरेव व्याख्यानं= विवरणम्, अतस्तदपि नाख्यातार्थत्वसाधकमिति भावः। मीमांसकोक्तं

ॐ दर्पणः ॐ

विवरणमिति। अतस्तदपीति। 'पचती'त्यस्य 'पाकं करोती'ति विवरणमपी-

ॐ काशिका ॐ

यत्नातिरिक्तो व्यापारोऽपि धात्वर्थः, यत्न-आख्यातार्थं इत्यभ्युपेयत इति भावः। **सकलव्यापारलाभसंभवेनेति**। विनिगमनाविरहाद्यत्नोऽपि धातुवाच्य इत्यर्थः। **गौरवमिति**। संख्यायां कालादौ तच्छक्तिरस्तु, न तु यत्नेऽपि, अन्यलभ्यतया तत्र शक्तिकल्पनानौचित्यादित्यर्थः। न पुन'र्व्यापारत्वेन धातुत एव लाभे प्रत्ययस्य यत्नत्वावच्छिन्ने शक्तिकल्पनायां गौरवादित्यर्थः', तथा सत्यनुभवसिद्धफूत्कारत्वादिना बोधस्यानिर्वाहात्, तत्तत्फलानुकूलयत्नलाभेऽपि तदनुकूलव्यापारानुकूलयत्नालाभात्। 'तल्लाभार्थमाख्यातस्य यत्ने शक्ति'रिति नव्यमीमांसकोक्तमपि न युक्तं, तथाननुभवात्, अन्यथा व्यापारानुकूलव्यापारालाभात् तत्रापि शक्तिकल्पनापत्तेः, पाकं करोतीति धात्वर्थात् पृथक् करोतिना विव्रियमाणतया विक्लित्त्यादिफलानुकूलव्यापारानुकूलयत्नादिरूपा भावना आख्यातार्थः, व्यापारविगमे फलसत्त्वदशायां 'पाको विद्यते' इत्यप्रयोगात्, घञन्तपाकादिपदस्य फलावच्छिन्नव्यापारार्थताया आवश्यकत्वादिति स्ववाच्यं, पाकं करोतीत्यत्रत्यपाकपदस्य फलमात्रार्थकत्वात्, फलानुत्पादसमये फूत्कारादिव्यापारसत्त्वेऽपि'पाको भविष्यती'त्यादिव्यवहारात् क्वचित्तस्य फलमात्रपरत्वस्यापि दर्शनात्, अन्यत्र फलावच्छिन्नव्यापारपरत्वान्नोक्तदोष इति भावः। 'कथं पुनर्ज्ञायते क्रियावचनाः पचादयः? इति, यदेषां करोतिना सामानाधिकरण्यं, किं करोति—पचतीति, धातुरेव क्रियामाह' इति भूवादिसूत्रे भाष्यमप्यत एव संगच्छते। अत्र **गौरवमित्यन्तेन तस्मादित्यनेन** सूचितो युद्धिस्थहेतुसमुदायः प्रतिपादितः। उक्तहेतुतः करोतिः पचादिधातोरेव व्याख्यानं विवरणमिति मूलार्थमाह—**पचतीत्यस्येत्यादिना**। **बाधकम्**= प्रकृतिप्रत्यययोः प्रत्ययार्थेति न्यायविरोधात्मकं बाधकम्। **तन्मतम्**= आख्यातवाच्यैव भावना, करोतिना विवरणात्, 'धात्वर्थस्यैव विवरण'मिति तु न, विनिगमकाभावात्, '[2]अस्मन्मते च 'व्यापारविशेष्यकबोधानुपपत्तिरेव मानम्, तदुक्तम्—

'प्रत्ययार्थं सह ब्रूतः प्रकृतिप्रत्ययौ सदा।,
प्राधान्याद् भावना तेन प्रत्ययार्थोऽवधार्यते॥' इति—

—मीमांसकमतमित्यर्थः। ननु पदपदार्थोपस्थित्यादिघटितसामग्रीसत्त्वे कुतोऽन्वयबोधाभावः, न च कारकाणां भावनायामेवान्वय इति नियमान्न परस्परमन्वय इति वाच्यं, कारकरूपेणान्वयासंभवेऽपि मीमांसकरीत्या संबन्धसामान्येनान्वयसम्भवादित्यत आह—

१. कादिकार्थमुपदर्शयति 'पचती'त्ति। २. अस्मन्मते= मीमांसकमते।

बाधकमुद्धरंस्तन्मतं दूषयति—**न त्वित्यादिना** । नाऽसौ तिङां व्याख्यानं, 'पक्वा'नित्यादावनन्वयापत्तेः । अयं भावः—'प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थः प्रधान'मित्यत्र हि 'विशेष्यतया प्रकृत्यर्थप्रकारकबोधे तदुत्तरप्रत्ययजन्योपस्थितिर्हेतु'रिति कार्य्यकारणभावः फलितः, तथाच 'पकवा'नित्यत्र पाकः कर्म्मकारकं, क्तवतुप्रत्ययार्थः कर्तृकारकम्, तयोश्चारुणाधिकरणोक्तरीत्या वक्ष्यमाणाऽस्मद्रीत्या चान्व-

❀ दर्पणः ❀

त्यर्थः । अपिना—दूषयिष्यमाण'प्रकृतिप्रत्ययौ'विति न्यायसमुच्चयः । धातोः पृथग्विवरणं तु तवाऽऽख्याताऽर्थसंख्याकालव्यापाराणां मध्ये व्यापारस्य कृञा, संख्यादेस्तदुत्तरतिङा विवरणवद्धात्वर्थव्यापारस्याऽप्युपपन्नमिति न तदाख्यातार्थत्वसाधकम्, अत एव,—'कथं ज्ञायते क्रियावचनाः पच्यादयो यदेषां करोतिना सामानाधिकरण्यं, किं करोति? पचती'ति भूवादिसूत्रभाष्य उक्तम्, तेन विवरणमपि धातोरेवेति स्पष्टमेव बोध्यते इति भावः । 'पक्ववा'निति मूलमपि करोतेराख्यातविवरणत्वाऽभावसाध्यतया व्याचष्टे-**पक्ववानित्यादाविति** ।

अनन्वयमेव विशदयति—**अयं भाव इत्यादि** । **सहार्थमिति** । सम्बद्धार्थमित्यर्थः । ब्रूतो=बोधयतः । तयोः = प्रकृतिप्रत्ययाऽर्थयोर्मध्ये, प्रत्ययाऽर्थः = प्रत्ययवृत्तिग्रहविशेष्यः, प्रधानमिति = प्रकृत्यर्थप्रकारतानिरूपितविशेष्यताशालीत्यर्थः । तादृशव्युत्पत्तिसिद्धिकार्य्यकारणभावमभिनयेन दर्शयति–**विशेष्यतयेति** । प्रत्ययस्य प्रकृत्यर्थप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रतीत्यर्थः । 'हेतु'रित्यस्य विशेष्यतासम्बन्धे'नेति शेषः । **अरुणाधिकरणोक्तरीत्येति** । 'अरुणये'ति पदोपात्तारुण्यस्य प्रथमं करणत्वेनेतरक्रियायामन्वयो, नामार्थाऽन्वयस्तु पार्ष्ठिक इति तत्रोक्तम् । **वक्ष्यमाणेति** । कारकत्वस्य क्रियाजनकत्वरूपत्वेन क्रियाजनकमिति ज्ञाते का सा क्रियेत्याकाङ्क्षोदयेन क्रियाया अपि साध्यरूपायाः साधकाकाङ्क्ष-

❀ काशिका ❀

—**अयं भाव इति** । **सहार्थं ब्रूत इति** । एकार्थान्वितस्वार्थं बोधयतः । अर्थद्वयमध्ये कस्य विशेष्यत्वं, कस्य विशेषणत्वमित्याकाङ्क्षायामाह—**तयोरिति** । फलितार्थमाह—इत्यस्य हीति । प्रकृतिप्रत्ययार्थयोः परस्परानन्वयप्रयोजकमुभयोः कारकत्वमाह—**पाकः कर्मकारकमिति** । पाकः = फलांशस्तस्य–क्रियानिर्वर्त्यतया, व्यपदेशिवद्भावेन स्वाश्रयतया च कर्मत्वमित्यर्थः । अरुणाधिकरणे हि कारकाणां क्रियायामेवान्वय इत्युक्तम् । **वक्ष्यमाणेति** । क्रियात्वस्यैव तदन्वयितावच्छेदकतया तद्विशिष्टक्रियायामेवान्वय इति वक्ष्यमाणेत्यर्थः । तत्र

यासम्भव इति प्रकृतिप्रत्ययार्थयोरन्वयनियमस्यैवाऽभावेन क्व प्राधान्यबोधक उक्तकार्य्यकारणभावः? न च—

सम्बन्धन्धमात्रमुक्तञ्च श्रुत्या धात्वर्थभावयोः।
तदेकांशनिवेशे तु व्यापारोऽस्या न विद्यते"।

—इति भट्टपादोक्तरीत्या सम्बन्धसामान्येन कारकाणामन्वयः शङ्क्यः, योग्यताविरहाद्, अन्वयप्रयोजकरूपवत्त्वस्य[1] तथात्वात्,—

ॐ दर्पणः ॐ

या च परस्पराऽन्वयौचित्यमित्याशयेन क्रियात्वमेव हि कारकाऽन्वयिताऽवच्छेदकमिसुवर्थनिर्णये वक्ष्यमाणरीत्येत्यर्थः। **सम्बन्धमात्रमिति**। 'ज्योतिष्टोमेन यजेते'त्यत्र यजेतेति श्रुत्या धात्वाख्यातार्थयागभावनयोः सम्बन्धसामान्यं प्रतिपाद्यते,—तयोः क्रियाकारकभावरूपसम्बन्धविशेषबोधने तु नाऽस्याः श्रुतेः कश्चिदभिधादिरूपो व्यापारस्तद्वाचकपदाऽभावादिति तदर्थः, तथा च 'यजेते'त्यत्र यागसम्बन्धिभावनेति बोधो, न यागकरणकभावनेति, तद्वत्प्रकृते पाकसम्बन्धी कर्त्तेति बोधः, कर्मत्वादिना तत्संसर्गकबोध एव क्रियाया अपेक्षणादित्याशङ्कितुराशयः। फलस्य कारकत्वेनाऽयोग्यत्वात्तादृशाऽन्वयबोधोऽप्यसम्भवदुक्तिक इत्याह—**योग्यताविरहादिति**। ननु तत्पदार्थे तत्पदार्थवत्त्वं योग्यता, अस्ति च सा प्रकृतो पाकप्रयोजकत्ववत्पाकसम्बन्धित्वरूपाऽकर्तुरत आह—**अन्वयप्रयोजकरूपवत्त्वस्येति**। तथाच तत्पदार्थे तत्पदार्थताऽवच्छेदकाऽवच्छिन्नत्वस्यैव योग्यत्वे जलाहरणे घटकरणत्वस्य सत्त्वात्तस्मिन् सुषिरघटस्यापि करणत्वेनाऽन्वयापत्तिः, अस्मन्मते तु सच्छिद्रेतरघटस्य जलाऽऽहरणाऽन्वयप्रयोजकत्वेन तादृशघटे तादृशाहरणान्वयप्रयोजकत्वमिति न

ॐ काशिका ॐ

इयान् परं भेदो—यन्मीमांसकमते 'अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणाती'त्यादौ विशेष्यविशेषणानां सर्वेषां क्रियायामन्वयः, परस्परमन्वयस्तु पाक्षिकः, स्वमते तु विशेषणविशिष्टविशेष्यस्येति। अत एव नीलोत्पलमित्यादौ सामर्थ्यात् समास उपपद्यते। **नियमस्यैवाभावे इति**। भवन्मते एतादृशस्थले व्यभिचारादुक्तनियमस्यैवासंभवे इत्यर्थः। **न च 'संबन्ध'-इति**। यजेतेत्यत्र—श्रुत्या = धात्वादिश्रुत्या, धात्वर्थभावयोः = धात्वर्थभावनयोः, संबन्धमात्रं = संबन्धसामान्यमुक्तम्, तत्र तृतीयादिविभक्त्यभावेन करणत्वादिविशेषरूपेणान्वयासंभवात् संबन्धसामान्येनान्वयः प्रतिपाद्यते, तदेकांशनिवेशे = संबन्धविशेषबोधने, अस्याः = श्रुतेर्व्यापारः = सामर्थ्यं नेति तदर्थः[2]। अर्थाबाधरूपयोग्यतासत्त्वात् तद्विरहोक्तिस्संगतेत्यत आह—**अन्वयेति**।

१. तादृशं रूपन्तु क्रियात्वमेव। २ भट्टपादोक्तश्लोकवार्तिकार्थः।

क्रियात्वमेव हि कारकान्वयितावच्छेदकमिति वक्ष्यते। तदेतदाविष्कर्तुं विवरणेन धात्वर्थक्तवत्वर्थयोः कर्म्मत्वकर्तृत्वे दर्शयति—कृतवान् पाकमिति। वस्तुतः 'प्रत्ययार्थः प्रधान'मित्यस्य—यः प्रधानं स प्रत्ययार्थ एवेति वा, यः प्रत्ययार्थः स प्रधानमेवेति वा नाऽर्थः। 'अजा' 'अश्वा' 'छागी'त्यत्र स्त्रीप्रत्ययार्थस्त्रीत्वस्यैव प्राधान्यापत्तेश्छाग्यादेरनापत्तेश्च, किन्तूत्सर्गोऽयम्',

ॐ दर्पणः ॐ

तदन्वयापत्तिरिति भावः। ननु 'घटेन जलमाहरे'त्यत्र घटे छिद्रेतरघटत्ववत् प्रकृते किं कारकान्वयितावच्छेदकं यदभावादनन्वयापत्तिरुद्भाव्यतेऽत आह—**क्रियान्वयित्वमेव हीति**। ननु कृदर्थकर्त्राक्षिप्तभावनायां पाकादीनां कर्मत्वेनाऽन्वयसौलभ्यान्नोक्तदूषणमत आह—**वस्तुतस्त्विति**। 'प्रधानप्रत्ययार्थवचन'मिति सूत्रस्वरसो—यः प्रधानं स प्रत्ययार्थः, 'तदागमे हीति' न्यायश्च—यः प्रत्ययाऽर्थ' इत्यर्थे मूलमिति ध्येयम्। 'अजे'त्यादौ विशेष्याजादिपदार्थस्य प्रत्ययार्थत्वाऽभावेन व्यभिचारस्य स्फुटत्वात् तदुपेक्ष्य द्वितीयकल्प एव व्यभिचारं दर्शयति—**अजेति**। इष्टापत्तावाह—**छाग्यादेरिति**। स्त्रीत्वविशेषणछाग्यादेश्छागनिष्ठस्त्रीत्वादेरिति वाऽर्थः। एकत्र विशेषणतयाऽन्वितस्याऽपरत्र विशेषणतयाऽन्वये नैराकाङ्क्ष्येण 'छागीमानये'त्यादौ कर्मत्वादिकारके 'छागी गच्छती'त्यादौ छागनिष्ठस्त्रीत्वस्य छागीपदार्थस्यायोग्यतयाऽऽख्यातार्थकर्त्तरि वाऽनन्वयापत्तेश्चेति भावः[२]। 'छाग्यादेरनापत्तेश्चेति पाठे प्राधान्यानापत्तेरित्यर्थः। ननु सा व्युत्पत्तिरपार्थैव स्यादत आह—**किन्त्विति**। तथा च तादृशव्युत्पत्तेः कृत्तद्धितमात्रविषयकत्वं, न प्रत्ययमात्रविषयकत्वमिति न तद्बलाद् व्यापारस्याख्यातार्थत्वमिति भावः। ननु कथं तर्हि

ॐ काशिका ॐ

तन्मतेऽपि तस्यैव योग्यतात्वात्। अत एव स्थूलजलाभिप्रायकं 'पयसा सिंचती'ति वाक्यं न योग्यं, द्रवद्रव्यत्वस्यैवान्वयितावच्छेदकत्वात्, अन्वयप्रयोजकपदेनान्वयितावच्छेदकस्यैवाभिधानात्, यदवच्छिन्नेऽन्वयस्तस्यैव ह्यन्वयितावच्छेदकत्वं, न च स्थूलजले द्रवद्रव्यत्वज्ञानदशायां 'सेको नैतज्जलकरणक' इति बाधकप्रमासत्त्वेऽपि शाब्दबोधापत्तिरिति वाच्यं, स्वरूपसद्योग्यताया हेतुत्वात्। यद्वा—बाधकप्रमाविरहोऽप्यपेक्षणीय इति भावः। नियमद्वयेऽपि दूषणमाह—अजाश्वेत्यादिना। स्त्रीत्वस्यैवेति। यः प्रधानं स प्रत्ययार्थ एवेति नियमेऽजादेः प्रत्ययार्थत्वविरहेण प्राधान्यानापत्तिः, किं तु स्त्रीत्वस्यैवेति भावः। द्वितीयनियमे तु स्पष्टमेवेदं दूषणम्। ननु विशेष्यत्वादिना बोधे नियामकाभावेऽनियत एव बोधः स्यादित्यत आह—विशेष्यत्वादिनेति।

१. अयं = 'तयोः प्रत्ययार्थः प्रधान' मित्ययम्। २. 'छाग्यादेरनन्वयापत्ते'रिति पाठमादृत्येदं व्याख्यानमित्यनुसन्धेयम्।

विशेष्यत्वादिना बोधस्तु-तथा व्युत्पत्त्यनुरोधात्, अत एव नैयायिकानां प्रथमान्तविशेष्यक एव बोधः, लक्षणायामालङ्कारिकाणां शक्यतावच्छेदकप्रकारक एव बोधो, न नैयायिकादीनाम्। 'घटः' 'कर्म्मत्वम्'

❀ दर्पणः ❀

व्यापारविशेष्यको बोधोऽत्र आह—**विशेषत्वादिनेति**। तथाच व्युत्पत्त्यनुसारी बोधो न तु बोधानुसारिणी व्युत्पत्तिः। एवञ्च तादृशव्युत्पत्त्यङ्गीकर्त्तॄणां तथैव बोधोऽन्यादृग्व्युत्पत्तिमतां त्वन्यथापीति भावस्तदेव विशदयति—**अत एवेति**। **शक्यतावच्छेदकप्रकारक इति**। 'लक्षणाऽऽरोपिता क्रिये'ति काव्यप्रकाशीयसूत्रपर्यालोचनया शक्यतावच्छेदकारोपविषयनिष्ठसंसर्गस्यैव लक्षणात्वलाभाद्, 'गङ्गायां घोप' इत्यत्र गङ्गात्वेनैव लक्ष्यार्थप्रतीतिरत एव ततो वैयञ्जनिकी शैत्यपावनत्वादिप्रतीतिः। 'जाता लता हि शैले' इत्यादौ च कनकलतात्वेनैव रूपेण बोधस्य चमत्काराऽऽधायकत्वादिति तदाशयः। **नैयायिकादीनामिति**। सम्बन्धितावच्छेदकरूपेणैव लक्ष्यार्थस्य भानम्, अत एव 'कचतस्त्रस्यति वदन'मित्यादौ सम्बन्धिताऽवच्छेदकराहुत्वादिनैव बोधस्य त्रासाऽऽधायकस्योपपत्तिः, कचत्वादिशक्यतावच्छेदकरूपेण लक्ष्याऽर्थबोधाङ्गीकारे तदनुपपत्तिः स्पष्टैव, किञ्च शक्यतावच्छेदकं न लक्ष्यतावच्छेदकम्, 'शक्यादन्येन रूपेण ज्ञाते भवति लक्षणे'त्यभियुक्तोक्तिविरोधादिति तद्भावः। **घटः कर्मत्व-**

❀ काशिका ❀

व्युत्पत्त्यन्विति। तथा च व्युत्पत्तिरेव तत्र नियामिकेति भावनाया धात्वर्थत्वेऽपि न प्राधान्यानुपपत्तिरिति भावः। व्युत्पत्त्यनुसारित्वं बोधस्य दर्शयति—अत एवेत्यादिना। शक्यतावच्छेदकप्रकारक एवेति। अत एव 'गङ्गायां घोषः',—

'जाता लता हि शैले जातु लतायां न जायते शैलः।
संप्रति तद्विपरीतं कनकलतायां गिरिद्वयं जातम्॥'

—इत्यादौ गङ्गात्व-लतात्वादिनैव बोधः। अत एव विलक्षणशैत्यपावनत्वादिप्रतीतिचमत्कारोऽपि। अन्यथा गङ्गातीरे घोप इत्यतः को विशेषः स्यात्, विपरीतपदप्रतिपाद्यं वैपरीत्यं च न भवेदित्याहुरालङ्कारिकाः।

'कचतस्त्रस्यति वदनं वदनात् कुचमण्डलं त्रसति।
मध्याद्बिभेति नयनं नयनादधरः समुद्विजति॥'—

—इत्यत्र कचत्वादिना बोधो न त्रासकरोऽपि तु राहुत्वचन्द्रत्वादिनैव, अत एव 'गङ्गायां घोप' इत्यादौ तीरत्वादिना बोधः। कचपदं राहौ, वदनपदं चन्द्रे, कुचमण्डलपदं चक्रवाकदम्पत्योर्मध्यपदं सिंहे, नयनपदं हरिणेऽधरपदं प्रवाले लाक्षणिकम्। गङ्गापदेन स्ववृत्त्या प्रतिपादनादेव

आ'नयनं' 'कृति'रित्यादौ विपर्य्ययेणापि व्युत्पन्नानां नैयायिकनव्यादीनां बोधो, न तद्व्युत्पत्तिरहितानाम्, अन्येषां तन्निराकाङ्क्षमेवेत्यादिकं सङ्गच्छते। अत एव—'प्रधानप्रत्ययाऽर्थवचनमर्थस्यान्यप्रमाणत्वा'दित्याह भगवान् पाणिनिः, 'प्रधानं प्रत्ययार्थं इति वचनं न कार्य्यम्, अर्थस्य =तथाबोधस्यान्यप्रमाणत्वाद् =व्युत्पत्त्यनुसारित्वा'दिति हि [1]तदर्थः, एवं सत्यपि नियामकापेक्षणे च—भावप्रधानमाख्यातमिति वचनमेव गृह्यतामिति सुधीभिरूह्यम्।

❀ दर्पणः ❀

मिति। नव्यमते एकपदेऽपरपदव्यतिरेकप्रयुक्तान्वयाननुभावकत्वस्याकाङ्क्षात्वोपगमेन घटपदे कर्मत्वपदव्यतिरेकप्रयुक्तान्वयाननुभावकत्वज्ञानदशायां तादृशवाक्यात्तैः शाब्दबोधाऽभ्युपगमादित्यभिप्रेत्य—'नव्याना'मित्युक्तम्। 'निराकाङ्क्ष'मित्यस्या'धेयतासंसर्गेण बोध' इति शेषः। अत एवेति। बोधस्य व्युत्पत्त्यनुसारित्वादेवेत्यर्थः।

व्युत्पत्त्यनुसारित्वादिति। कार्यकारणभावग्रहाऽधीनत्वादित्यर्थः। बोधानुसारिणी हि व्युत्पत्तिर्न हि बोधो व्युत्पत्त्यनुसारी, अत एवारोपे सति निमित्ताऽनुसरणं, न तु निमित्तमस्तीत्यारोप इति—प्रामाणिकाः। अर्थस्य=विशेष्यत्वादिना प्रतीयमानस्य, अन्यप्रमाणत्वात् = स्वविशेषणीभूतप्रतीत्यनुरोधकव्युत्पत्तिकत्वादित्यर्थः। 'प्रधानं प्रत्ययार्थं' इति नियमस्य पाणिनिनाऽनादृतत्वेऽपि, 'यो यः प्रत्ययार्थः स प्रधान'मित्यर्थस्य, 'तदागमे ही'तिसूत्रयता जैमिनिनाऽऽदृतस्याऽदुष्टत्वादाख्यातार्थतयैव व्यापारस्य प्राधान्यं, टाबादीनां द्योतकत्वेन, संख्यावाचकत्वेऽपि प्रत्ययजन्योपस्थितौ संख्याद्यवृत्तित्वस्य विशेषणाच्चोक्तकार्यकारणभावस्य निर्दुष्टत्वा-

❀ काशिका ❀

विलक्षणशैत्यपावनत्वादिप्रतीतिनिर्वाह इति नैयायिकादय आहुः। विपर्ययेणेति। वैपरीत्येन। व्युत्पन्नानाम् = तादृशवाक्ये आधाराधेयभावसंबन्धेन घटप्रकारककर्मत्वविशेष्यकबोधजनकताग्रहवताम्। नैयायिकेति। कर्मधारयसमासे नैयायिकशब्दस्य क्रियाशब्दतया पाठकपाचकादौ पाठकादिवत् पूर्वनिपातः। बोधः =उक्तबोधः। न तदिति। अत्र बोध इत्यनुपज्यते। तथाव्युत्पत्तिरहितानां घटवृत्तिकर्मत्वमित्याकारको बोध इत्यर्थः, न तु बोधसामान्यानुदयोऽर्थः, अयोग्यतानिश्चयशून्यसमये तथाव्युत्पत्तिरहितानामपि तादात्म्यसंबन्धेन घटप्रकारककर्मत्वविशेष्यकबोधोदयात्। अत एव = बोधस्य व्युत्पत्त्यनुसारित्वादेव। वचनमेवेति। एवकारेण प्रकृति-

[1] प्रधानप्रत्येत्यादिसूत्रार्थः।

'तदागमे ही'ति न्यायो विवरणञ्चाऽतिव्याप्तमित्याह—किं कृत पक्वमिति। कृत्वा विवरणं प्रतीतिश्च पक्वमित्यत्रापीति,–तत्रापि भावना वाच्या स्यादिति भावः। नन्वस्तु तिङ इव कृतामपि भावना वाच्येत्यत आह—अपीति। तथाचोभयसाधारण्येन तत्प्रतीतेरुभयसाधारणो

❀ दर्पणः ❀

दित्यन्ये। प्रतीयमानाऽर्थस्य प्राधान्यमिति—'तदागमे ही'ति न्यायाकार इत्याशयेनाह—तदागमे हीतीति। अतिव्याप्तमिति। 'नपुंसकमनपुंसकेने'ति क्लीबशेषत्वैकवचनान्ततायां च व्यभिचरितमित्यर्थः। तदेव विशदयति—कृत्वेति। पक्वमित्यत्रापिनाऽनुपदोक्तपक्ववानित्यस्याऽपि संग्रहः, तत्र भावनाया आक्षेपात् प्रतीयमानत्वेऽपि प्रत्ययार्थत्वाऽभावेन व्यभिचारसम्भवात्। 'किं कृत'मित्यतो व्यापारविषयस्य जिज्ञास्यत्वाऽवगमात् पक्वमित्यतस्तदनवबोधेनाऽस्योत्तरत्वाऽनुपपत्त्या व्यापारबोधकत्वध्रौव्ये तस्य प्रत्ययार्थत्वाऽभावादव्यभिचार इत्यर्थः। विवरणमिति। विवरणं चाऽत्र प्रश्नोत्तररूपमेव, तद्बोधनार्थमेव किमनुल्लेखः, अन्यथा केवलकृतशब्दस्य पक्वपदविवरणतया लोकाऽप्रसिद्धेर्विवरणं चाऽतिव्याप्तमित्यस्याऽसङ्गतेः। वाच्या स्यादिति। प्रत्ययवाच्या स्यादित्यर्थः। अपिशब्दः पूर्वोक्ताऽर्थस्यैव न समुच्चायकः, किन्त्वर्थान्तरस्यापीति, वक्तुमाशङ्कते नन्विति। तथाचोक्तापत्तिरिष्टैवेति भावः। अपिसमुच्चितार्थं प्रकटयति तथाचेति। उभ-

❀ काशिका ❀

प्रत्यययोरित्यस्य व्यावृत्तिस्तस्यौत्सर्गिकत्वात् सामान्यवचनत्वाच्चैतस्य विशेषवचनत्वादिदमेव ग्राह्यमिति भावः। तत्राख्यातपदेन धातुरुच्यते, आख्यायते सर्वप्रधानभूतोऽर्थोऽनेनेति व्युत्पत्तेः। नामादिप्रकृतीनामेवोद्देशात्। तत्र 'नामान्याख्यातजानि' इति निरुक्ताच्च। न ह्याख्यातप्रत्ययजं तदन्तजं वा नाम संभाव्यते। अत एव 'सर्वं नाम धातुजमाह व्याकरणे शकटस्य च तोकम्' इति पूर्वोक्तनिरुक्तसमानार्थकं वाक्यं महाभाष्ये पठ्यते। तथा च वाक्ये सर्वापेक्षया प्रधानीभूतभावार्थकत्वं धातुलक्षणं पर्यवसन्नम्। प्राधान्योक्तिस्तु तन्मुख्यविशेष्यक एव बोधो जायत इति स्फोरणाय, न तु तस्य लक्षणे निवेश इति भूषणकारानुमता सरणिः।

मञ्जूषाकारास्तु तत्राख्यातशब्देन तिङन्तम्, 'आख्यातमाख्यातेन' इत्यादौ तथैव प्रतीतेः, 'चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च' इत्युपक्रमाच्च, 'भावकालकारकसंख्याश्चत्वारोऽर्था आख्यातस्य, तत्र भावः प्रधानम्' इति तद्भाष्याच्चेत्यादिकमाहुः। विस्तरस्तु तत एवावगन्तव्यः। एतन्मतेऽपि एत'न्निरुक्तं भावस्य प्रागुक्तयुक्तिभिर्धात्वर्थत्वे स्थिते तत्प्राधान्यनियामकं भवतीति ध्येयम्। इत्यत्रापीति'। अपिना पक्ववानित्यस्य समुच्चयः। उभयसाधारण्येन = तिङन्त-

धातुरेव वाचक इति भावः, भवद्रीत्या प्रत्ययार्थत्वात् 'प्राधान्यापत्तिश्चेति द्रष्टव्यम् ॥ ८ ॥

—साधकान्तरमाह—

'किं कार्य्यं पचनीयं चेत्यादि दृष्टं हि कृत्स्वपि ॥
किञ्च क्रियावाचकतां विनां धातुत्वमेव न ॥ ९ ॥

'कार्य्य'मित्यत्र ऋहलोर्ण्यदिति कर्मणि ण्यत्, 'पचनीय'मित्यादौ चानीयर् । आदिना,—'ज्योतिष्टोमयाजो'इत्यादौ करणे उपपदे कर्त्तरि णिनिः । एते च क्रियायोगमन्तरेणासन्तस्तद्वाच्यतां बोधयन्ति, विना

❀ दर्पणः ❀

येति । आख्यातकृदन्तोभयेत्यर्थः । साधारण्येनेति । साधारण्यमत्र समभिव्याहाराविशेषः । प्रतीतेरिति । भावनाप्रतीतेरित्यर्थः । उभयसाधारण इति । घटकतया प्रयोगद्वयाऽनुस्यूत इत्यर्थः । तथाच प्रयोगद्वये नियतवृत्तित्वेन धातोरेव भावनावाचकत्वसिद्धिः, धातुत्वस्य शक्ततावच्छेदकत्वेन लाघवान्न तु तिङ्कृतोस्तिङ्त्वस्य चाननुगतस्य शक्ततावच्छेदकत्वे गौरवात्, परस्परव्यभिचाराच्चेत्युक्तापत्तेर्नेष्टत्वसम्भावनेति भावः । ननु धातुत्वस्य शक्ततावच्छेदकतायाः प्रागेव निराकृतत्वान्नोक्तदूषणस्याऽपिशब्दसमुच्चेयत्वमत आह—भवद्रीत्येति । स्वमते भावनायाः प्रकृत्यर्थत्वादुक्तं—भवदिति । 'प्रत्ययार्थत्वा'दित्यनेन पूर्वोक्तमतद्वयमध्ये त्वस्यैव मीमांसकसम्मतत्वमिति सूच्यते । व्याख्यातं च तथैव । अवतरणे तन्न्यायविरोधोपदर्शनं तु प्रत्ययाऽर्थत्वप्राधान्ययोः प्रायशः समनैयत्येन, प्रधानस्य प्रत्ययार्थत्वसाधकत्वस्याऽपि ततो लाभेन प्रकृतिवाच्यत्वे तदनुपपन्नमित्याशयेनेति बोध्यम् ॥८॥

'साधकान्तर'मित्यस्य 'धातोर्व्यापारवाचकत्वे' इत्यादिः । 'किं कार्यं'मित्यत्र प्रश्नोत्तरभावरूपविवरणेनैव व्यापारस्य धात्वर्थत्वसिद्धिरित्यत्र न तात्पर्यं, किन्तु प्रश्नोत्तरभावरूपविवरणस्य प्रक्रान्तत्वात् किम उल्लेख इति सूचयन्नाह—कार्यमित्यत्रेति । णिनिरिति । 'भूते' इत्यधिकृत्य,—'करणे यज'इति सूत्रेणेति शेषः । एते = ण्यदादय इत्यर्थः । क्रियायोगमन्तरेणेति । क्रियान्वयिनामेव

❀ काशिका ❀

कृदन्तोभयसाधारण्येन । धातुरेव वाचक इति । उभयत्रापि पचिधातोरेकत्वेन लाघवात्, प्रत्ययानां भिन्नतया तद्वाचकतायां गौरवादिति भावः । प्राधान्यापत्तिश्चेति । कृतामपि भावनावाचकत्वे भावनयैवाक्षेपात् कर्तृकर्मलाभसंभवे तिङ्भिन्नत्वात्रापि तस्या एव प्राधान्यापत्तिरिति भावः ॥८॥

१. एवञ्चौदनेनानन्वयापत्तिः, नामार्थयोरभेदातिरिक्तसम्बन्धस्याव्युत्पन्नया—भावनाजन्यफलाश्रयत्वेनान्वयस्य कर्तुमशक्यत्वात् ।

क्रियां कारकत्वासम्भवेन तद्वाचकप्रत्ययस्याप्यऽसम्भवात्, नच 'गम्यमानक्रियामादाय कारकयोग' इति भाट्टरीतिर्युक्ता, आख्यातेऽपि तथात्वापत्तौ तत्रापि भावनाया वाच्यत्वासिद्ध्यापत्तेः।

अथ लिङ्गसंख्यान्वयानुरोधात् कर्त्तुर्वाच्यत्वमावश्यकमिति तेनाक्षेपाद् भावनाप्रत्ययः स्यादिति मतम्, तर्हि संख्यान्वयोपपत्तेराख्यातेऽपि कर्त्ता वाच्यः स्यात्, 'पक्वा'नित्यादौ कालकारकान्वयानुरोधाद् भावनाया अपि वाच्यत्वस्यावश्यकत्वाच्चेति भावः। अपिना हेत्वन्तरसमुच्चयः, तथाहि–नखैर्भिन्नो नखभिन्नः, हरिणा त्रातो हरित्रात इत्यादौ 'कर्त्तृकरणे कृता वहुल'मिति समासो न स्यात्, 'पुरुषो राज्ञो भार्य्या देवदत्तस्ये'इतिवदसामर्थ्यात्, नचाध्याहृतक्रियामादाय सामर्थ्यं वाच्यं, 'दध्योदनो' 'गुड-

❀ दर्पणः ❀

कारकतया धातोर्व्यापाराऽवाचकत्वे 'कार्य्यो घट' इत्यादौ कर्मादिसंज्ञानां 'कारक' इत्यधिकृत्य विहितानां घटादावसम्भवेन तत्र विधीयमानण्यदाद्यनुपपत्तिर्धातोस्तदाक्षिपति, देवदत्तस्य पीनत्वानुपपत्तिरिव रात्रिभोजनमिति भावः, तदेवाह—विना क्रियामिति। गम्यमानेति। अस्य 'तदुपस्थापकपदाभावेऽपी'त्यादिः।

तथात्वापत्ताविति। गम्यमानक्रियामादायैव कर्त्तृकर्माऽर्थकप्रत्ययोपपत्तावित्यर्थः। तत्रापि = तिङ्संज्ञकाऽऽख्याते। लिङ्गसंख्यान्वयाऽनुरोधादिति। अस्य 'पाचक इत्यादा'वित्यादिः। 'आवश्यक'मित्यस्य 'कृती'ति शेषः, कृन्निरूपितवाच्यत्वं कर्त्तुरवश्यमङ्गीकरणीयमित्यर्थः। 'तेन = कर्त्रा। आक्षेपा'दित्यस्य 'स्वरूपनिरूपकतये'त्यादिः। प्रत्यय इति। बोध इत्यर्थः। तस्य–वाच्यत्वस्येत्यर्थः। असामर्थ्यादिति। विशिष्टार्थोपस्थित्यजनकत्वादित्यर्थः, निराकाङ्क्षत्वादिति यावत्। त्रातभिन्नपदान्तर्गतधात्वर्थक्रिययोः कर्त्तृकरणकारकसाकाङ्क्षत्वेन, 'हरिणे'त्यादिपदोपस्थितकर्त्तृकरणयोश्च कारकत्वेन क्रियासाकाङ्क्षत्वेन परस्परसाकाङ्क्षत्वरूपसामर्थ्यं सुघटं–व्यापारस्य–धात्वर्थतावादिमते,

❀ काशिका ❀

लिङ्गसंख्यान्वयेति। पक्वान् पक्ववती पक्वत् इत्यादौ पुंस्त्वस्त्रीत्वादिलिङ्गैकत्वादिसंख्यान्वयायेत्यर्थः। कर्तुर्वाच्यत्वमिति। इदं 'पक्वस्तण्डुल' इत्यादौ कर्मादेरप्युपलक्षणम्। समासानुपपत्तौ हेतुमाह—पुरुष इति। राजसंबन्धी पुरुषो देवदत्तसंबन्धिनी भार्येत्यन्वये विवक्षिते राज्ञो भार्या इत्यनेन यथा समासो न भवति, असामर्थ्यादनन्वयादेवं नखैर्भिन्न इत्यादावपि स न स्यादित्यर्थः। असामर्थ्यादिति। कारकाणां भावनायामेवान्वयेन परस्पर-

धाना' इत्यादिवत्, अन्यथा तत्रापि 'अन्नेन व्यञ्जनं,' 'भक्ष्येण मिश्रीकरण'मिति समासो न स्यादिति वाच्यं, तत्र विध्यानर्थक्यादगत्या तथा स्वीकारेऽपि 'हरिकृत'मित्यादौ साक्षाद्धात्वर्थान्वयेनोपपद्यमानस्य 'कर्तृकरण' इत्यस्याक्षेपेण परम्परासम्बन्धे प्रवृत्त्ययोगात्। नचैकस्यां क्रियायामन्वयित्वमेव सामर्थ्यमिति शङ्क्यम्, 'असूर्य्यम्पश्या' इत्यादेरसमर्थसमासत्वाना-

❀ दर्पणः ❀

भवन्मते तु,—'पुरुषो राज्ञो भार्या देवदत्तस्ये'त्यादिवन्निराकाङ्क्षत्वात् समासाऽनुपपत्तिरिति भावः। इदमुपलक्षणं—कारकविभक्तेरपि,। **अध्याहृतक्रियामादायेति**। करोत्यर्थव्यापारमादायेत्यर्थः। **सामर्थ्यमिति**। तथाच 'नखैः कृत्वा भिन्न' इति बोधाऽभ्युपगमेनाऽध्याहृतार्थमादाय सामर्थ्योपपत्तिरित्यर्थः। अध्याहृतक्रियामादाय सामर्थ्याऽभ्युपगमे दृष्टान्तमाह—**दध्योदनेत्यादि**। **विध्यानर्थक्यादिति**। 'अन्नेन व्यञ्जन'मित्यादेरपि पदविधित्वेन समर्थपरिभाषाविषयतया स्वतोऽसमर्थदध्यादिपदानां समासविधानवैयर्थ्यापत्त्योपसेचनादिक्रियाध्याहाराऽभ्युपगमेऽपीत्यर्थः। **हरिकृतमिति**। कृधातोर्व्यापारार्थकत्वस्वीकारात्तन्निरूपितकर्तृत्वस्य हरौ साक्षात्सत्वादध्याहारं विनैव शास्त्रचारितार्थ्ये 'हरित्रात'इत्यादावध्याहृतक्रियाद्वारकसामार्थ्यमादाय तत्प्रवृत्तौ मानाभावादित्यर्थः। कृञो व्यापारार्थकत्वानभ्युपगमे त्वध्याहृतार्थस्यापि सामर्थ्यानुपपादकत्वाच्छास्त्रवैयर्थ्यमेव स्यादिति सूचनाय 'कृत'मित्युक्तम्। आदिना—'शरकृत्त'मित्यादिकरणतृतीयातत्पुरुषपरिग्रहः। केचित्तु-कृदर्थकर्त्रैव तृतीयार्थकर्त्राक्षिप्तभावनामादाय 'हरित्रात' इत्यादौ, नखैर्भिन्न इत्यादौ तु करणसामर्थ्येनाध्याहृतां तामादाय सामर्थ्योपपत्तौ न तदनुपपत्तिर्धातोर्भावनावाचकत्वसाधिका। एवञ्च कृञः फलार्थकत्वेऽपि न समासानुपपत्तिरित्याहुः, तच्चिन्त्यम्—**एकक्रियान्वयित्वमेवेति**। 'धवखदिरा'वित्यादौ तस्य दृष्टत्वेनान्यत्रापि साक्षात्परम्परया वा तस्यैव समासप्रयोजकत्वमिति भावः। **असूर्यम्पश्या इति**। नञर्थप्रसज्य-

❀ काशिका ❀

मनन्वयात्, परमते तिङादेर्भावनावाचकत्वात्। **साक्षाद्धात्वर्थस्वान्वयेनेति**। कृधातोस्तन्मतेऽपि कृतिरूपभावनार्थकत्वादिति भावः। **परम्परेति**। स्वकर्तृकादिक्रियाजन्यत्वरूपपरम्परेत्यर्थः। शङ्कते—**न चेति**। तथा च नोक्तपरम्परासंवन्धेन तयोरन्वयः, अपि त्वेकस्यां क्रियायामन्वयित्वरूपमेव सामर्थ्यं नीलोत्पलमित्यादिसमाससिद्धये तैरङ्गीकर्तव्यं, तच्चात्राप्यस्तीति न समासानुपपत्तिरिति भावः। **असमर्थेति**। 'असूर्यपश्या राजदारा'इत्यत्र दर्शनक्रियाया एवाभावबोधेन

पत्तेः,' इष्टापत्तौ,—'कृतः सर्वो मृत्तिकये'त्यत्र 'कृतः सर्वमृत्तिक' इत्यापत्तेः।

नचाऽत्र समासविधायकाभावः, 'सह सुपा' इत्यस्य सत्त्वात्, अन्यथा असमर्थसमासोऽपि विधायकाभावान्न स्यादिति। किञ्च,—भावनायास्तिङर्थत्वे—'भावयति घट'मितिवद्भवति घटमित्यपि स्यात्, धात्वर्थफलाश्रयत्वरूपकर्मत्वसत्त्वात्, नचाख्यातार्थव्यापाराश्रयत्वेन कर्तृत्वात्तत्संज्ञया कर्मसंञ्ज्ञाया बाधान्न द्वितीयेति वाच्यम्, आख्यातार्थव्यापारा-

ॐ दर्पणः ॐ

प्रतिषेधस्य क्रियान्वयित्वस्य वक्ष्यमाणतया सूर्यस्यापि कर्मकारकतया तदन्वयित्वेन भवदुक्तसामर्थ्यस्य तत्र सत्त्वादिति भावः। **कृतः सर्वमृत्तिक इति।** मृत्तिकायाः करणतया सर्वपदार्थस्य कर्मतया कृधात्वर्थाऽन्वयित्वादिति भावः। योगविभागस्या-

ॐ काशिका ॐ

सूर्यपदार्थेन नञर्थस्यान्वयविरहादसमर्थसमासत्वेन भाष्यकारादेरभिमतः, तस्याऽसमर्थसमासत्वं तव मते भज्येत, न सूर्यं पश्यन्तीत्यर्थे नञ्सूर्यपदार्थयोरेकक्रियान्वयित्वरूपसामर्थ्यसत्त्वादिति भावः। आदिपदा'दश्राद्धभोजी ब्राह्मण' 'अपुनर्गेयाः श्लोका' इत्यादेः संग्रहः। इत्याद्यापत्तेरिति। न चात्रापीष्टापत्तिः, तत्र समासाभावस्यैव सर्वानुमतत्वात्, अत एव 'सर्वचर्मणः कृतः—' इति सूत्रे सर्वश्चर्मणा कृत इत्यर्थे 'सर्वचर्मण' इति निपातनात् समास इत्युक्तम्। ननु कृतः सर्व इत्यादावनभिधानान्न समासः, किं च 'सह सुपा' इत्यसार्वत्रिकं। तेनैव सर्वत्र समाससिद्धौ 'द्वितीया श्रिता—' इत्यादिना समासवधानात्, अन्यथा तत्तत्सूत्रैस्तत्पुरुषादिसंज्ञा एव विधीयेरन्। अत एवानेन समासस्यागतित्वं तत्र तत्रोक्तम्। किं चैवं 'कर्तृकरणे कृता—' इत्यादिना कृत्प्रकृतिककृतेति वा वक्तव्ये सामान्यसूत्रप्रणयनसामर्थ्यात् 'देवत्रातो गलो ग्राह'इति निर्देशाच्च क्रियाद्वारकसामर्थ्यमादाय कृदन्तेन कारकस्य समास इत्यभ्युपगमान्न दोषः। कृद्ग्रहणसामर्थ्यादप्ययमर्थः सिध्यति। 'कर्तृकरणे' इति न्यासेनैव 'सुपा' इत्यनुवृत्त्या कृदन्तेनैव समासस्य सिद्धेः, 'काष्ठैः पचतितरा'मित्यत्र समासस्य बहुलग्रहणेनापि वारयितुं शक्यत्वात्, बहुलग्रहणेनैव सुबुत्पत्तेः प्रागेव समासस्य सिद्धत्वादित्यभिप्रेत्य दूषणान्तरमाह—किं चेति।

धात्वर्थफलेति। उत्पत्तिरूपफलेत्यर्थः। ननु भवन्मतेऽपीयमापत्तिस्तुल्या, कर्तृसंज्ञया कर्मसंज्ञाया बाधान्नेति समाधानमपि तुल्यमित्याशङ्कां निराचष्टे—न चाख्यातार्थेति। तथा च दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यम्, दृष्टान्ते प्रयोजकव्यापारो णिजर्थः, दार्ष्टान्तिके तु प्रयोज्यव्यापार आख्यातार्थः। एवं च घटं भावयतीत्यत्र घटस्य कर्तृत्वाभावेन णिजर्थभावनां प्रति कर्मत्वं

१. दर्शनक्रियायामेवोभयोरन्वयात्। आपत्तेरिति। उभयोरपि कृत इत्यत्रैकस्यामेव क्रियायामन्वयात् सामर्थ्यात्समाससिद्धत्वापत्तेरित्याशयः।

-श्रयस्य कर्तृत्वे 'पाचयति देवदत्तो विष्णुमित्रेणे'त्यत्र विष्णुमित्रस्याकर्तृतापत्तौ तृतीयानापत्तेः। 'ग्रामं गमयति देवदत्तो विष्णुमित्र'मित्यत्र कर्तृतापत्तौ ग्रामस्य गमिकर्मत्वानापत्तेश्च, तथाच—'ग्रामाय गमयति देवदत्तो

❀ दर्पणः ❀

ऽनिष्टाऽनापादकत्वादाह—**किञ्चेति। अकर्तृत्वापत्ताविति।** 'आख्यातार्थ-व्यापारानाश्रयत्वा'दिति शेषः, अस्मन्मते तु णिच्प्रकृत्यर्थव्यापाराश्रयत्वेन कर्तृत्वान्न तदनुपपत्तिरिति भावः। ननु विष्णुमित्रस्याऽकर्तृत्वेऽपि करणत्वविवक्षयैव तत्र तृतीया सुलभेत्यत आह—**ग्रामं गमयतीति।** 'कर्तुरीप्सिततम'मित्यनेन प्रकृतिकर्तृनिष्ठव्यापारजन्यफलसम्बन्धिन एव कर्मसंज्ञाविधानेन त्वन्मते विष्णुमित्रस्याकर्तृतया तद्व्यापारजन्यफलाश्रयस्यापि ग्रामस्याकर्मत्वेन तद्वाचक-पदोत्तरं द्वितीयानापत्तिः, विष्णुमित्रस्य करणत्वे णिचोऽसम्भवश्च। धात्वर्थव्यापार-जन्यफलाश्रयस्यैव कर्मत्वाङ्गीकारे तु णिजन्तकर्मतैव स्यान्न गमिकर्मतेति भावः।

❀ काशिका ❀

निरपवादमेव। घटो भवतीत्यत्र आख्यातार्थव्यापाराश्रयतया कर्तृसंज्ञया बाधितत्वान्न घटस्य कर्मत्वमित्यर्थः। **अकर्तृत्वापत्ताविति।** सर्वस्यैव यत्किंचिदाख्यातार्थव्यापाराश्रयत्वात् समभि-व्याहृतेत्यावश्यकम्। प्रकृते चाख्यातस्य न प्रयोज्यव्यापारोऽर्थः, अपि तु णिजर्थव्यापार एव तेनानूद्यते। अत एव प्रयोजकस्य कर्तृत्वनिर्वाहः, अत एवाख्यातार्थव्यापारान्वयिन्येव तदर्थ-संख्यान्वयनियमाद् 'गुरुः शिष्याभ्यां पाचयती'त्यत्र गुरुपदात् प्रथमोत्पत्तिः, पाचयतीत्येकवचनो-पपत्तिश्च। एवं चाख्यातार्थव्यापारानाश्रयत्वात् प्रयोज्यस्य कर्तृत्वानुपपत्तिरिति भावः। कारण-तृतीयैवेयमिति तु न शङ्क्यं, तथा सति कर्तुः प्रयोजकस्यैव हेतुतया देवदत्तस्य हेतुतापत्तौ णिजुत्पत्तेरेवासंभवापत्तेः। 'तत्प्रयोजक—' इत्यत्र तत्पदेन धात्वर्थानुकूलव्यापारवान् ग्राह्योऽतो न णिजनुत्पत्त्यापत्तिः, प्रयोज्यस्य कर्तृसंज्ञाविरहेऽपि धात्वर्थानुकूलव्यापाराश्रयत्वादिति न वाच्यम्, 'स्वतन्त्रः कर्ता' इति पूर्वसूत्रेण कर्तृसंज्ञाविधानात् तत्पदेन कर्तृसंज्ञकस्यैव परामर्शा-र्हत्वात्, कारकमात्रस्यैव धात्वर्थानुकूलव्यापाराश्रयतया कारकमात्रप्रयोजकव्यापारे णिजुत्पत्त्या-पत्तेः। न चेष्टापत्तिः 'काष्ठैः पाचयति' 'दर्शयति भवं भक्त' इत्यादिप्रयोगाणां दर्शनादिति वाच्यं, काष्ठानि पचन्ति पश्यति भव इत्यर्थे काष्ठादीनां कर्तृविवक्षायां तत्प्रेरणायामेव तादृश-प्रयोगाणामिष्टत्वादिति भावः। **गमिकर्मतानापत्तेरिति।** कर्तुरीप्सितस्यैव कर्मत्वात्। ननु त्वत्सिद्धान्तेऽपि कर्मसंज्ञाविधायके 'कर्तुरीप्सिततमम्—' इति सूत्रे कर्तृपदं स्वतन्त्रमात्रपरं, न तु कर्तृसंज्ञकपरं, 'देवदत्तो विष्णुमित्रं ग्रामं गमयती'त्यत्र ग्रामस्य कर्मत्वानापत्तेः, प्रयोज्यस्य गत्यादिसूत्रेण कर्मसंज्ञायां कर्तृसंज्ञाविरहात्। एवं च ममापि मते न दोषः, प्रयोज्यस्य धात्वर्थसंयोगानुकूलव्यापाराश्रयत्वरूपस्वातन्त्र्यसत्त्वादिति चेन्न। एतन्मते आख्यातार्थव्यापारा-

विष्णुमित्र'मित्यपि न स्यात्, 'गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनी'ति गत्यर्थकर्मण्येव चतुर्थीविधानात्, एतेन 'णिजन्ते आख्यातार्थ उभयं, तदाश्रयत्वाद्देवदत्त-यज्ञदत्तयोः कर्तृ ते'त्यपास्तम्।

❀ दर्पणः ❀

इष्टापत्तावाह—**तथाचेति**। **एतेनेति**। आख्यातार्थव्यापाराश्रयस्य कर्तृत्वनिरासेनेत्यर्थः। णिजन्ते = पाचयत्यादौ। **उभयमिति**। प्रयोज्यप्रयोजकव्यापारद्वयमित्यर्थः। **तदाश्रयत्वादिति**। आख्यातार्थव्यापारद्वयाश्रयत्वादित्यर्थः। **अपास्तमिति**। अयं भावः—आख्यातस्य व्यापारद्वयाऽभिधायकत्वेन विष्णुमित्रस्य कर्तृत्वोपपादनेऽपि तत्कर्तृत्वस्याख्याताभिधानाद्देवदत्तपदोत्तरमिव विष्णुमित्रपदोत्तरं तृतीयादौर्लभ्यम्, एवमाख्यातार्थव्यापाराश्रयत्वस्योभयोरप्यविशिष्टत्वात् प्रधानव्यवहारोच्छेदापत्त्या हेतुमति चेत्यनुशासनविरोधश्चेति। ननु णिजाख्यातार्थान्यतरार्थव्यापाराश्रयत्वं कर्तृत्वम्, अस्मन्मते फलमात्रस्य गणपठितधात्वर्थत्वेन तदनुकूलणिजर्थव्यापाराश्रयत्वेन विष्णुमित्रस्याऽपि कर्तृत्वाद्दौर्लभ्येन नोक्ताऽनुपपत्तिरत आह—**किञ्चेति**। आख्यातार्थव्यापाराश्रयत्वस्य केवलान्वयितया अव्यावर्तकत्वेनाऽऽख्यातं तद्वाक्यस्थ-

❀ काशिका ❀

श्रयत्वस्यैव स्वातन्त्र्यपदार्थत्वं, न तूक्तस्य, कारकमात्रेऽतिव्याप्तेः, तस्य च प्रयोज्येऽसत्त्वात्। प्रकृतधातुसंबन्धिकारकचक्रप्रयोक्तृत्वरूपं तद्धातुकर्तृत्वं त्वचेतने न संभवतीत्युक्तमेवेति भावः। ग्रामस्य णिजन्तकर्मत्वं संभवत्येव तत एव द्वितीयानिर्वाह इत्यत आह—**गमिकर्मतेति**। ननु तदभावे का क्षतिरित्याशङ्कामाह—**तथा चेति**। **इत्यपि न स्यादित्यत्र** हेतुमाह—**गत्यर्थकर्मणि—**' इति। अध्वभिन्ने गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ स्तश्चेष्टायां सत्यामिति तत्सूत्रार्थः। तन्मते गत्यर्थकर्मत्वं संयोगरूपगत्यर्थकधातुसमभिव्याहृताख्यातार्थव्यापाराश्रयरूपं कर्तुरीप्सिततमत्वं तादृशकर्तृनिष्ठाख्यातार्थक्रियाजन्यफलाश्रयतयेच्छाविषयत्वरूपं, तच्चोक्तरीत्या ग्रामस्य न संभवतीति णिजन्तकर्मत्वनिबन्धनद्वितीयासिद्धावपि चतुर्थी न सिध्येदिति भावः। **एतेन** = उक्तप्रयोगानिर्वाहेण। **उभयम्** = प्रयोज्यप्रयोजकव्यापारोभयम्। **अपास्तमिति**। उक्ताख्यातस्य णिजन्तधातुयुक्तत्वेऽपि गत्यर्थकधातुयुक्तत्वाभावेन प्रयोज्यस्य स्वयुक्ताख्यातार्थव्यापाराश्रयत्वरूपगत्यर्थकर्तृत्वाभावाद् गत्यर्थकधातुकर्मत्वानापत्तौ चतुर्थ्यनापत्तितादवस्थ्यादिति भावः। ननु गत्यर्थकर्मपदेन तदर्थसंयोगाश्रयत्वे सति तदनुकूलव्यापाराश्रयत्वेन विवक्षितो यस्तदभिन्नोऽर्थो विवक्षितः, लक्ष्यानुरोधात्। किं च 'गत्यर्थकर्मणि—' इति सूत्रं भाष्ये प्रत्याख्यातम्, तथा च गत्यर्थकर्मत्वाभावेऽपि न क्षतिः, 'पत्ये शेते' इतिवच्चतुर्थी सिद्धेति स्पष्टं भाष्यादावत आह—किं चेति। नन्वाख्यातश्रवणस्थलेऽपि प्रथमानुरोधेन तिङन्ताध्याहार आवश्यकः, अन्यथा

किञ्च,–तस्मिन् प्रयोगे य आख्यातार्थ इत्यस्यावश्यकत्वे'नाख्यातशून्ये 'देवदत्तः पक्ते'त्यादौ देवदत्तस्याऽकर्तृतापत्तेरिति दिक्।

सूत्रानुपपत्तिमपि² मानत्वेन प्रदर्शयन्नुक्तार्थस्य स्वोत्प्रेक्षितत्वं निर-

❀ दर्पणः ❀

स्त्वेनाऽवश्यं विशेषणीयम्। एवञ्च 'चैत्रः पक्ते'त्यादावाख्यातशून्ये वाक्ये कृदर्थकर्त्तर्यव्याप्तिर्दुर्वारेत्यर्थः। नन्व'स्तिर्भवन्तीपर' इति भाष्येणाख्यातप्रयोगस्य तत्राऽवश्यम्भावान्नोक्तापत्तिः, किञ्च धातुविहितप्रत्ययवाच्यतदाक्षिप्ताऽन्यतरव्यापाराश्रयत्वं कर्त्तृत्वं, 'धातुविहितेति प्रत्ययविशेषणाच्च न करणतृतीयार्थव्यापाराश्रयेऽतिव्याप्तिः, उक्तस्थले कृद्वाच्यकर्त्राक्षिप्तव्यापाराश्रयत्वान्नोक्तदोषोऽत आह—दिगिति। तदर्थस्त्वितरनिवृत्तितात्पर्यकताद्दशवाक्येऽस्त्यध्याहारस्यानावश्यकत्वादुक्तप्रकारस्य न साधीयस्त्वं, किञ्चैवं रीत्या कर्त्तृत्वनिर्वचनाऽपेक्षया धातोर्व्यापारार्थकत्वमभ्युपगम्य तदाश्रयत्वमेव कर्त्तृत्वं निर्वक्तुमुचितम्, 'लाघवा'दित्यादिः। स्वोत्प्रेक्षितत्वमिति।

❀ काशिका ❀

तिङ्समानाधिकरणे प्रथमेत्यनुशिष्टप्रथमायाः साधुत्वं न स्यात्, एवं च देवदत्तः पक्तेत्यत्रापि अस्तीत्याद्यध्याहाराद् देवदत्तस्य कर्तृत्वोपपत्तिरिति चेन्न, एवं सत्यप्यसुधातुकर्तृत्वोपपत्तावपि पचिकर्तृत्वानुपपत्तितादवस्थ्येन ततः कर्तरि तृजनापत्तेः। ननु यद्धातुप्रकृतिकाख्यातार्थव्यापाराश्रयत्वं यस्य गृहीतं तत्र तद्धातोः कृद् भवतीत्येव 'कर्तरि कृत्' इत्यस्यार्थोऽभ्युपेयते, सामर्थ्यात्, आक्षिप्तभावनाश्रयत्वेन यदा यो विवक्षितस्तदा तस्मिन् वाच्ये इति च। यद्वा कृत्प्रत्ययस्य व्यापारोऽप्यर्थोऽङ्गीक्रियते, एवं च प्रत्ययार्थाश्रयत्वमेव कर्तृत्वमभ्युपेयते इति चेन्न, क्लिष्टत्वापत्तेः। इत एव वास्वरसादाह–दिगिति। तदर्थस्तु भवता धात्वर्थफलप्रकारकानुकूलत्वसंसर्गकभावनाविशेष्यकबोधे धात्वाख्यातानुपूर्वीधातुकृदानुपूर्व्योः कारणतावच्छेदकत्वमङ्गीकरणीयम्, मया तु धात्वानुपूर्व्या एव तथात्वमङ्गीकर्तव्यमिति लाघवमित्यादि–बृहद्भूषणतोऽवगन्तव्यम्।

ननु 'भूवादयः' इत्यस्य भूरादिर्येषामिति बहुव्रीहिणा भूप्रभृतयो धातुसंज्ञा इत्येवार्थो न तु भ्वादिगणपठिताः क्रियावाचका धातुसंज्ञा इति, तद्बोधकशब्दाभावात्, कथं तर्हि 'भूवादयः' इति निर्देशोपपत्तिः, निपातनाद्वकारागम इति गृहाण। ननु तथापि तदानर्थक्यं दुष्परिहरमेवेति चेन्न।

'भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते'।

—इति वार्तिककारैरेव परिहृतत्वात्। मङ्गलार्थः = मङ्गलसूचकः। यथाऽपूर्वस्य दध्यादेर्लाभो लोके मङ्गलसूचकस्तथेत्यर्थः। अथवा सति वकारेऽविकृतभूशब्दोच्चारणेन महाव्याहृतिरेफान्तभूशब्दस्मरणसंपादनद्वारा तस्य मङ्गलसूचकत्वमिति कैयटीये स्पष्टम्। एवं च न सूत्रानुपपत्तिः

१. अन्यथा घटो विद्यत इत्यत्रत्यं तादृशव्यापाराश्रयत्वमादाय 'घटं करोती' त्यत्र प्रथमापत्तेः। २. व्यापारस्य धात्वर्थत्वे मानत्वेनेत्यर्थः।

स्यति—क्रिश्चेति । धातुसंज्ञाविधायकं 'भूवादयो धातव' इति सूत्रं, तत्र भूश्च वाश्चेति द्वन्द्वः, आदिशब्दयोर्व्यवस्थाप्रकारकवाचिनोरेकशेषः, आदिश्च आदिश्च आदो, ततो—भूवावादी येषामिति बहुव्रीहिः । तथाच भूप्रभृतयो, वासंदृशा धातव इत्यर्थः, तच्च—क्रियावाचकत्वेन, तथा च क्रियावाचकत्वे सति भ्वादिगणपठितत्वं धातुत्वं पर्य्यवसन्नम्, अत्र 'क्रियावाचित्व'मात्रोक्तौ वर्ज्जनादिरूपक्रियावाचके हिरुग्नानेत्यादावति-व्याप्तिरिति 'भ्वादिगणपठितत्व'मुक्तम् ॥ ९ ॥

तावन्मात्रोक्तौ चाह—

सर्वनामाव्ययादीनां या-वादीनां प्रसज्जतः ।
न हि तत्पाठमात्रेण युक्तमित्याकरे स्फुटम् ॥१०॥

गणपठितत्वमात्रोक्तौ सर्वनामाव्ययानामपि धातुत्वं स्यात्, तथाच 'याः पश्यसी'त्यादा'वातो धातो'रित्याकारलोपापत्तिः, ननु लक्षणप्रति-

❀ दर्पणः ❀

निर्मूलत्वकल्पनाविषयत्वमित्यर्थः । हिरुगिति । यथाश्रुतमनुरुध्य चेदं, तदर्थस्य कालानन्वितत्वेन क्रियात्वासम्भवात्, किन्तु तावन्मात्रोक्तावाणवयत्यादावतिव्याप्ति-र्बोध्या, तेषां धातुत्वे च शास्त्रविषतया साधुत्वापत्तेरिति बोध्यम् ॥ ९ ॥

'तावन्मात्रोक्ता'वित्यत्र 'मात्र'पदेन क्रियावाचकत्वदलव्यवच्छेदः । इष्टापत्ति-माशङ्क्याह—तथाचेति । 'या'इत्यस्य द्वितीयान्तत्वं सूचयितुमाह—पश्यसीति । लक्षणप्रतीति । लक्ष्यतेऽन्वाख्यायते साधुशब्दोऽनेनेति—लक्षणं = सूत्रं, तदनु-

❀ काशिका ❀

परमते इत्याशङ्कां निराचिकीर्षुः सूत्रार्थमाह—तत्र भूश्चेत्यादिना । व्यवस्थेति । नियमेनावधिसा-काङ्क्षप्रथमरूपोऽर्थः । क्रियावाचकत्वेनेति । शब्दत्वादिना सादृश्याभ्युपगमे वादय इत्यस्या-व्यावर्तकतापत्तिः । अदादित्वगत्यर्थकत्वेन तत्स्वीकारे सकलभ्वादीनामसंग्रह इत्यतो व्याख्यानाच्च क्रियावाचकत्वेनैव तदभ्युपगम इति भावः । हिरुगादीनां क्रियामात्रं प्रति विशेषणत्वेऽपि तेषां क्रियावाचकत्वाभाव इत्यभिप्रेत्याह—इत्यादाविति । आदिना शिश्ये इति भावतङः, आणवय-त्यादेश्च संग्रहः ॥ ९ ॥ आकारलोपापत्तिरिति । नन्वेतस्याकारस्य लाक्षणिकतया न लोप इति चेन्न । 'पशुपा' इत्यसिद्ध्यापत्तेः । पशुं सनोतीत्यर्थे 'जनसन—' इति विट् । 'विड्वनोः—' इत्यात्वम् ।

१. तच्च—साध्यत्वविशिष्टत्वं, वै० 'स्वावच्छिन्नार्थनिरूपितशक्तिपर्याप्त्यधिकरणत्व' 'स्वाव-च्छिन्नभिन्नार्थनिरूपितशक्तिनिरूपकार्थविषयकबोधतात्पर्येणोच्चरितो यस्तदघटितत्व' 'स्वावच्छिन्नार्थ-

पदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणान्न सर्व्वनाम्नां ग्रहणं, तस्य लाक्षणिकत्वा-दित्यत आह—वेत्यादि । अव्यये 'वा'—इत्यादावतिप्रसङ्गः, तादृशस्यैव गणे पाठेन निर्णयासम्भवात् । तथाच विकल्पार्थको 'वाती'ति प्रयोगः

ॐ दर्पणः ॐ

सन्धानसापेक्षत्वोपचारेण लाक्षणिकमपि लक्षणशब्देनोच्यते, यथा, पै—इत्यस्य, पा—इति रूपं विलम्बोपस्थितिकं, लक्षणाऽनुसन्धानसापेक्षत्वात्, प्रतिपदोक्तं तु तद्विभक्तिविशेषानुवादेन पठितं शीघ्रोपस्थितिकम्, लक्षणानुसन्धानानपेक्षणा-दिति । यथा पिबतेः पा इतिरूपं, तथा च शीघ्रोपस्थितिकत्वं प्रतिपदोक्तग्रहणे बीजम्, तत्र या इति गणपठिते एव सर्वनाम्नि लक्षणानुसन्धानसापेक्षे इति भावः । 'अव्यये वा—इत्यादावित्यादिना, सु—इत्युपसर्गस्य, 'मा'माङिति स्वरादेश्च संग्रहः । पत्वप्रकरणपाठादुपसर्गव्यावृत्तिर्न शङ्क्या, साधादिसंग्रहाय परिभाषितपोपदेशत्वस्य तत्राऽपि सत्त्वात् । **प्रयोगः स्यादिति ।** उपलक्षणं चैत'त्सुवति' 'माति' 'मिमीते' इत्यादिप्रयोगाणाम् । 'षु प्रसवे' 'मा' 'माङ्' माने इत्यादिधातूनां सत्त्वेन तन्निर्णयासम्भवात्, सत्यन्तोक्तौ तु न दोषः, वाद्यर्थस्य

ॐ काशिका ॐ

लाक्षणिकत्वादिति । प्रतिपदोक्तस्य 'या' इत्यस्यैव भ्वादिपदेन ग्रहणं न सर्वनाम्न इति भावः । यदि तु—'नकारजावनुस्वारपञ्चमौ झलि धातुषु ।

सकारजः शकारश्चेर्षाट्टवर्गस्तवर्गजः ॥'

—इत्यभियुक्तोक्तेर्धातुसंज्ञासूत्रे लक्षणप्रतिपदोक्तपरिभाषाप्रवृत्तिर्वक्तुमशक्या, तत्परिभाषाप्रवृत्तौ हि धातुविशिष्टघटकत्वं नकारादेरसंभवीति तथाभियुक्तोक्त्या धातुसंज्ञायामुक्तपरिभाषा न प्रवर्तत इत्यङ्गीकार्यमित्युच्यते, तर्ह्यस्तु धातुसंज्ञा, तथापि, 'आतोऽनापः' इति वार्तिकान्न प्रकृते आकारलोप इत्यत आहेत्यवतरणिका बोध्या। ननु निपातस्य वेत्यस्य धातुत्वेऽपि न क्षतिः, वातीति प्रयोगस्येष्ट-त्वात्, अत आह—विकल्पार्थक इति। तथा च गत्याद्यर्थकस्य वातीतिप्रयोगस्येष्टत्वेऽपि विकल्पार्थको नेष्ट इति भावः । किं च तस्य धातुत्वे 'अधातुः' इति पर्युदासात् प्रातिपदिकत्वानापत्तौ सुबन्तत्वा-भावे पदत्वानापत्तिः । एतेन हन्तेर्गत्यर्थत्वेऽपि हन्तीत्यतः प्रायस्तदर्थानवगतिवत् वातीत्यतो विक-ल्पानवगतिनिर्वाह इति तस्य धातुत्वेपि न क्षतिरिति दोषानवकाशः । यद्यपि निपातस्यानर्थकस्ये-त्यवश्यमनर्थकनिपातानां प्रातिपदिकसंज्ञार्थमारब्धव्यं तथा च तत्रानर्थकस्य निपातस्य संज्ञाविधानेन चरितार्थतया सर्वतो बलीयसो निषेधबाधे मानाभाव इत्याशयः, इत एवास्वरसाद्वा—यावादीनामि-

निरूपितशक्तिनिरूपकार्थविषयक बोधतात्पर्येणोच्चरितत्वे' तत्त्रितयसम्बन्धेन । नातो ऽभूयते', 'दरिद्रातीति दरिद्राः' इत्यस्य विकल्पार्थकस्य वेत्यस्य वा धातुत्वम् ।

स्यादिति भावः। नच गतिगन्धनाद्यर्थनिर्देशो नियामकः, तस्यार्थाना-देशनादिति भाष्यपर्य्यालोचनयाऽऽधुनिकत्वलाभात् ॥१०॥

नन्वस्तु क्रियावाचकत्वे सति गणपठितत्वं धातुत्वं, क्रिया च धात्वर्थ एव न व्यापार इत्याशङ्कां समाधत्ते—

धात्वर्थत्वं क्रियात्वञ्चेद्धातुत्वं च क्रियार्थता।
अन्योऽन्यसंश्रयः स्पष्टस्तस्मादस्तु यथाकरम् ॥११॥

यदि क्रियात्वं धात्वर्थत्वमेव–तर्हि धातुत्वग्रहे तदर्थत्वरूपक्रियात्वग्रहः,[1] क्रियात्वग्रहे च तदवच्छिन्नवाचकत्वघटितधातुत्वग्रह इत्यन्योन्याश्रय इति

❀ दर्पणः ❀

विकल्पादेर्भूतादिकालासम्बन्धेन क्रियात्वाभावादिति भावः। **नियामक इति।** गणे पठितानामेव धातुत्वस्याभिप्रेतत्वेऽर्थनिर्देशवैयर्थापत्त्या निर्दिष्टार्थानामेव धातुत्वं ज्ञाप्यते इत्यर्थः। तस्य—अर्थनिर्देशस्य। **अर्थानादेशनादिति।** अर्थस्य = सत्तादेः, अनादेशनाद् = अनाम्नानादित्यर्थः। **आधुनिकत्वलाभादिति।** भीम-सेनादिप्रणीतत्वावगतेरित्यर्थः। तथाच भूवादिसूत्रे,–'परिमाणग्रहणं कर्त्तव्यं, कुतो ह्येतत्, भूशब्दो धातुसंज्ञको भवति, न पुनर्भ्वेधशब्द'इति। यद्यप्यर्थनिर्देशस्य सूत्रकृत्प्रणीतत्वमपि, तथाच 'चुटू' इति सूत्रे—'यदयमिरितः कांश्चिन्नुमनुषक्तान् पठति, उबुन्दिर् निशामने, स्कन्दिर्गतिशोषणयोरिति, तेन नेरितामिदिद्विधिरिति भाष्ये उक्तं, तथापि भाष्यद्वयप्रामाण्यात्सर्वधात्वर्थनिर्देशस्याऽपाणिनीयत्वेन न तन्निर्देशस्य नियामकतेति भावः। 'चुलुम्पादीनां स्तम्भ्वादीनां' च 'कास्यनेकाच आ'मितिवचनादुदित्करणाच्च धातुतेति दिक् ॥ १० ॥

❀ काशिका ❀

स्यादिपदम्। अर्थानादेशनादिति—भाष्येति। मुण्डमिश्रेत्यादिसूत्रस्थेत्यादिः। अत एव प्रकृतसूत्रे 'परिमाणग्रहणं कर्तव्यमियानवधिर्धातुसंज्ञो भवतीति वक्तव्यम्, कुतो ह्येतद्भूशब्दो धातुसंज्ञो भवति न पुनर्भ्वेधशब्द इति' वार्तिकं तद्भाष्यं च संगच्छते। **अर्थानादेशनादित्यस्य** सर्वत्राऽर्थानादेशनादित्यर्थः। अत एव 'एवमर्थं स्वल्पप्याचार्यश्चित्रयति, क्वचिदर्थानादिशति क्वचिन्न—इति 'नमोवरिवश्चित्र–' इति सूत्रे भाष्ये उक्तम्। अत एव च 'कुर्द खुर्द क्रीडायामेव' इत्येवकारस्य धातूनामनेकार्थत्वे ज्ञापकतोक्ता संगच्छते। अर्थनिर्देशस्योपलक्षणत्वाच्चेत्यपि बोध्यम् ॥ १० ॥

---

१ 'सम्भवती'ति शेषः। विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात्।

ग्रहपदं पूरयित्वा व्याख्येयम्। यथाश्रुते चान्योन्याश्रयस्योत्पत्तौ ग्रहे वा प्रतिबन्धकत्वाभ्युपगमेनासङ्गत्यापत्तेः, नचान्यतमत्वं धातुत्वं, 'भूवाद्य' इत्यस्य वैयर्थ्यापत्तेरित्यभिप्रेत्याह—अस्त्विति। व्यापारसन्तानः—क्रिया, तद्वाचकत्वे सति गणपठितत्वमित्यर्थः। ननु सत्तादीन् फलांशानन्यतमत्वेनादाय तद्वाचकत्वे सति गणपठितत्वं लक्षणमुच्यताम्, धात्वर्थत्वात्

❀ दर्पणः ❀

धात्वर्थं एवेति। फलमेवेत्यर्थः। तथाच नैतत्सूत्रानुपपत्तिर्धातोर्व्यापारार्थत्वसाधिकेति भावः। **उत्पत्ताविति**। यथा बीजाऽङ्कुराद्युत्पत्तौ। अनादित्वेन तत्परिहार इत्यन्यत्। यथा वा 'चैत्रपुत्रश्चैत्र' इत्यादौ,—तत्राप्येकोत्पत्तिं विनाऽपरानुपपत्तेः। **ज्ञप्ताविति**। 'हलन्त्य'मित्यादौ प्रसिद्धः। **असङ्गत्यापत्तेरिति**। यथा पृथिवीजलयोराधाराधेयभाव इत्यादावुभयोः परस्पराधाराधेयभावेन स्थितेः सर्वैरेवाभ्युपगमात्, प्रकृते वस्तुतो धात्वर्थस्य क्रियात्वे क्रियात्वस्य धात्वर्थत्वे बाधकाभावेन तत्र दूषणदानस्यानुचितत्वापत्तेरित्यर्थः। **अन्यतमत्वमिति**। भ्वादिभिन्नभिन्नत्वमित्यर्थः। **वैयर्थ्यापत्तेरिति**। तावतैवातिप्रसङ्गभङ्गे गुरुधर्मावच्छिन्नशक्तिप्रतिपादकस्य तस्यानतिप्रयोजनकत्वापत्तेरित्यर्थः, दृष्टफलाभावादिति भावः। केचित्तु भ्वादिषु धातुरित्यनुगतव्यवहारात् क्रियात्वमपि जातिरेव, शक्यतावच्छेदकतयेव शक्तावच्छेदकतयाप्यसति बाधके जातिसिद्धेर्निष्प्रत्यूहत्वात्, भूवादिसूत्रं त्वनभिज्ञप्रतीतिपरं, तादृशजातिपरिचायकप्रदर्शकमित्याहुः। नन्वस्मन्मते पूर्वापरीभूतावयवसमुदायरूपक्रियाया धात्वर्थत्वेन तद्गृहीतपौर्वापर्यारोपेण फलस्य क्रियात्वोपपत्तिः, भवन्मते तु क्रियाया धात्वर्थत्वानुपगमेन कथं तत्र तद्व्यवहारोऽत आह—**धात्वर्थत्वादिति**। तथाच तत्र फलत्वव्यवहार इव क्रियात्वव्यव-

❀ काशिका ❀

ग्रहपदपूरणप्रयोजनमाह—**यथाश्रुतेति**। **उत्पत्तौ ग्रहे वेति**। देवदत्तस्य यज्ञदत्ताद् यज्ञदत्तस्य च देवदत्तादुत्पत्तिर्न संभवति। एवमित्पदार्थज्ञाने हल्पदार्थज्ञानस्य कारणत्वं हल्पदार्थज्ञाने चेत्पदार्थज्ञानस्य कारणत्वं न संभवति, कार्याव्यवहितनियतपूर्ववर्तिन एव कारणत्वं, तच्चोभयत्र न संभवतीति तत्रैव तस्य प्रतिबन्धकत्वमित्यर्थः। **न चान्यतमत्वमिति**। यावन्तो धातुपदव्यवहार्यास्तदन्यतमत्वरूपं 'धातुत्वं, धात्वर्थत्वं क्रियात्व'मित्येतद्घटकमतो नान्योन्याश्रयावकाश इति भावः। **वैयर्थ्यापत्तेरिति**। 'धातोः कर्मणः—' इत्यादौ तादृशान्यतमत्ववत एव ग्रहणेनेष्टसिद्धेस्तत्परिचयार्थमेव सूत्रमिति चेदेतद्वाक्यार्थबोधात्मकपरिचयासंभवे तादवन्यतमत्वेनोपादानासंभव इति भावः। **लक्षणमिति**। सूत्रजवाक्यार्थरूपमित्यर्थः। फलांशानामन्यतमत्वेनोपादाने सूत्रवैयर्थ्यशङ्कापि नेति भावः। नन्वेवं कथं पुनर्ज्ञायते क्रियावचनाः पचादयो यदेषां करोतिना सामान्-

तेषां क्रियाशब्देन व्यवहारो भाष्यादौ कृतोऽप्युपपत्स्यत इति चेन्न,—अन्यतममध्ये विकल्पस्यापि विकल्पयतीति प्रयोगानुसारात् प्रवेशावश्यकत्वेन तदर्थके 'वे'त्यव्यये उक्तरीत्या गणपठितत्वसत्त्वेनाऽतिव्याप्तेरिति ॥ ११ ॥

नन्वस्यैव धातुत्वे 'अस्ती'त्यादौ क्रियाप्रतीत्यभावादस्त्यादीनां तद-

❀ दर्पणः ❀

हारोऽपि, धात्वर्थत्वप्रयोजकत्वाऽभ्युपगमेन तदुत्पत्तेरिति भावः। भाष्यादौ कृत इति। 'कर्मवत्कर्मणे'ति सूत्रे, भूवादिसूत्रे च भाष्यादावित्यर्थः। आदिपदाद् वृत्त्यादिपरिग्रहः ॥ ११ ॥

अस्यैवेति। क्रियावाचकस्यैवेत्यर्थः, एवकारेण फलमात्रवाचकत्वव्यवच्छेदः। एतद्वाचकत्वे हेतुः—क्रियाप्रतीत्यभावादिति। तदवाचकानां = व्यापारावाचकानामित्यर्थः। अधातुत्वप्रसङ्ग इति। आपत्तेरिष्टत्वं तु न, ततो लकाराद्यनुत्पत्तिप्रसङ्गादिति भावः। धर्म्यंशे = फलरूपे इत्यर्थः। अंशपदोपादानं—धर्मिणो धर्मघटितमूर्त्तिकत्वादकर्मकस्थले कर्तृवृत्तित्वाच्च फलस्यापि तदंशत्वात्। तस्य भाव्यतायामेव विवादादाह—भाव्यत्वेनेति। भावनानिष्पाद्यत्वेनेत्यर्थः। फलसाध्य-

❀ काशिका ❀

धिकरणं क्रियावाचनो धातुरिति भूवादिसूत्रे भाष्यव्यवहारः कथं संगमनीयः, फलांशस्य क्रियात्वाभावादित्यत आह—धात्वर्थत्वादिति। तथा च गौणो व्यवहार इत्याशयः। अत्र वदन्ति—लडाद्युत्पत्तौ भ्वादिगणपठितत्वे सति क्रियावाचकत्वं न नियामकं, क्रियात्वस्यानुगतस्याभावात्, किं तु संज्ञाशब्दत्वात् संज्ञाविशेषः, संज्ञाशब्दानां जातिवाचित्वपक्षे जातिविशेष एव, सूत्रं तु तत्परिचायकमेव, कारिकायां क्रियाशब्दस्य साध्यत्वेनाभिधीयमानव्यापारे सांकेतिकशक्तेः स एव गृह्यते, सूत्रे वाशब्दः सूचनायेति न सूत्रं धातोः क्रियावाचकत्वसाधनायाभिहितं किं तूक्तयुक्तिभिः साधितार्थस्य स्वोत्प्रेक्षितत्वनिरासायैवेति तत्त्वम्। एतेन भ्वाद्यन्यतमत्वमेवास्तु धातुत्वं, तच्च न क्रियात्वगर्भमथवा गणपठितत्वे सति सत्ताद्यर्थकत्वमेव भूधातोर्धातुत्वम्, एवं तत्तदर्थमुपादाय तत्तद्धातुत्वमूह्यम्। अर्थस्य विशेष्योपादानाच्च नान्योन्याश्रयोऽपि। अथवा सर्वफलान्यन्यतमत्वेनोपादाय गणपठितविशेषिततद्वाचकत्वमेव सूत्रार्थः कल्प्यतामित्यपास्तम्। उक्तरीत्यैव निर्वाहेऽन्यतमत्वादिगर्भभवदुक्तपक्षाणां गुरुत्वात्। चरमपक्षे विकल्पार्थकवाशब्देऽतिप्रसङ्गतादवस्थ्याच्च, विकल्पार्थकस्य विकल्पयतीति प्रयोगस्य दर्शनाद्विकल्पस्याप्यन्यतममध्ये निवेशावश्यकत्वादिति। एतेन यस्माद्धातोर्यो योऽर्थः प्रतीयते लोके तत्तदर्थविशिष्टस्य तस्यैव गणे पाठेन, भ्वादिगणपठितत्वमेव निर्दिष्टमिति परास्तम्, दुर्ज्ञेयत्वाच्च ॥ ११ ॥

अस्यैव। भ्वादिगणपठितत्वे सति क्रियावाचकत्वस्यैव। प्रतीत्यभावादिति। अस्य

वाचकानामधातुत्वप्रसङ्ग इत्यत आह—

अस्त्यादावपि धर्म्यंशे भाव्येऽस्त्येव हि भावना।
अन्यत्राशेषभावात्तु सा तथा न प्रकाशते[1] ॥१२॥

अस्त्यादौ,= 'अस् भुवी'त्यादौ। धर्म्यंशे = धर्म्मिभागे, भाव्ये = भाव्यत्वेन विवक्षिते, अस्त्येव = प्रतीयत एव। अयमर्थः,—'स ततो गतो,—न वेति प्रश्ने,—'महता यत्नेनाऽस्ती'ति प्रयोगे सत्तारूपफलानु-

❀ दर्पणः ❀

व्यापारस्य जिज्ञासितत्वे इति यावत्, अतएव वक्ष्यत्या'सन्नविनाश'मिति। विवक्षास्थलमेव प्रश्नोत्तरभावेन तु दर्शयति—स ततो गतो न वेति। 'गत्यर्था-ऽकर्मके'ति कर्त्तरि क्तः। 'प्रश्न' इत्यनेन भाव्यत्वस्य जिज्ञास्यत्वं ध्वन्यते, तथाच 'गतो न वा कि'मिति प्रश्नाऽऽकारः। प्रयोग इति। प्रश्ननिवर्त्तके वाक्य इत्यर्थः। 'प्रतीयते एवे'त्यस्या'स्धातुने'ति शेषः। ननु 'स ततो गतो न वे'ति वाक्याद् गेहाद्यवधिकविभागानुकूलव्यापाराश्रयत्वतदभावाऽन्यतरस्य जिज्ञास्यत्वमवगम्यते, 'महता यत्नेनाऽस्ती'ति वाक्यात्त्वस्तेर्व्यापारार्थकत्वाभ्युपगमेऽपि चैत्रादिकर्तृकसत्ता-ऽनुकूलव्यापार एवेति कथमेतयोः प्रश्नोत्तरत्वं, तथाहि—यद्धर्मावच्छिन्ने जिज्ञासित-यद्धर्मावच्छिन्नस्य सम्बन्धो यत्प्रश्नवाक्यात् प्रतीयते तद्धर्मावच्छिन्ने जिज्ञा-सिततद्धर्मावच्छिन्नसम्बन्धबोधकवाक्यस्योत्तरता।

यदाहुः—'जिज्ञासितपदार्थस्य संसर्गो येन गम्यते।
तदुत्तरमिति प्रोक्तमन्यदाभासशब्दित'मिति ॥

यथा घटत्वावच्छिन्नजिज्ञासितधर्मावच्छिन्नसम्बन्धबोधकस्य, 'कस्माद् घट' इति प्रश्नवाक्यस्य—घटत्वाऽवच्छिन्ने जिज्ञासितदण्डत्वाऽवच्छिन्नस्य हेतुहेतुमद्भाव-बोधकं 'दण्डाद् घट' इति वाक्यमुत्तरम्। प्रकृते तु 'गत इति नेति वे'त्युत्तरं युज्यते। किञ्चोक्तप्रश्नेन सत्तासाधकव्यापारस्य जिज्ञास्यत्वानवगमात्, कथ-मेतस्योत्तरत्वम्, तथात्वेऽपि पूर्वोत्तरवाक्ये यत्नेनेत्युपादानात् यत्नपदोपस्था-प्ययत्ननिष्पाद्यत्वबोधेनैवोत्तरत्वसिद्धया न ततो धातोर्व्यापारार्थकत्वसिद्धिरत आह—

❀ काशिका ❀

'क्रियाया' इत्यादिः। तत्तत्कालसंबन्धरूपसत्ताया एव ततः प्रतीतेः। अत एव किं करोतीति प्रश्ने पचतीतिवदस्तीत्युत्तरं न। धर्मिभागे = सत्तादिरूपे धर्मिभागे। वस्तुसतो भाव्यस्य भावनाप्रतीत्युपयोगित्वं न संभवतीत्यत आह—भाव्यत्वेनेति। सुतरामिति। उत्पत्त्यनु-

१ सकर्मकस्थले इवाकर्मकस्थले वैयधिकरण्येन न प्रतीयते।

कूला भावना प्रतीयत एव,—उत्पत्त्यादिबोधने तु सुतराम्[1], "'रोहितो लोहितादासीद् धुन्धुस्तस्य सुतोऽभव'दित्यादिदर्शनात्[2] । किञ्च—अत्र भावनाविरहे लडादिव्यवस्था न स्यात्,—तस्या एव वर्त्तमानत्वादि-विवक्षायां तद्विधानात्, 'क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिके'ति —वाक्यपदीयादिति ।

❀ दर्पणः ❀

उत्पत्त्याद्वीति । 'सुतरा'मित्यस्य' 'व्यापारार्थकत्व'मिति शेषः । अत्राश्रयता-बोधस्योभयमतसिद्धत्वेन सैव साध्यत्वेनाभिधीयमानत्वाद् व्यापारः, पौर्वापर्यं च परमते सत्तायामिव कालगतं तत्रारोपितमेवेति भावः । ननु तत्राप्याश्रय-ताया धात्वर्थत्वकल्पनमप्याग्रहमूलकमेव, तत्रोत्पत्तिमात्रार्थकत्वेऽपि रोहिता-श्रयिका भूतानद्यतनोत्पत्तिरित्यभिमतार्थबोधलाभादत आह—किञ्चेति । तस्या एवेति । भावनाया एवेत्यर्थः । एवकारेण फलव्यवच्छेदः, यथा चैतत्तथोक्तं सार एव । तद्विधानात् = लडादिविधानात् । तत्र हरिसम्मतिमप्याह—क्रियाभेदा-

❀ काशिका ❀

कूलभावनाप्रतीतेः सकलानुभवसिद्धत्वात् सत्तार्थकत्वे क्वचिदेव तत्प्रतीतिः । उत्पत्त्याद्यर्थकत्वे तु सर्वत्रेति बोधनाय तरप्प्रत्ययः । उत्पत्त्यादीत्यादिपदात् पराभवतीत्यादौ पराभवादिसंग्रहः । उत्पत्त्यर्थकत्वे रामायणप्रयोगं प्रमाणयति—'रोहित'—इति । सत्तार्थकत्वेऽनुभवविरोधः, वंशावल्यामुत्पत्तेरेवानुभवात्, पञ्चम्यर्थहेतुत्वान्वयानुपपत्तेः । पञ्चम्यनुपपत्तेश्चेति भावः । अस्त्यादेः सत्तातुल्यभावनार्थकत्वे साधकान्तरमप्याह—किञ्चेति । तस्या एवेति । भावनाया एवेत्यर्थः । एवेन फलांशव्यवच्छेदः । तत्र मानमाह—क्रियाभेदायेति । स्वविशिष्टक्रियाया इतरक्रियातो व्यावर्तनाय । क्रियायां कालान्वये सत्येवेतरव्यावृत्तिरिति क्रियायामेव कालान्वयः, 'क्रियाभेदाये'त्यस्य सावधारणत्वात्, संख्या सर्वस्येत्युत्तरवाक्यात् । तथा च भाष्यकाराद्यनुभव एव मानमिति भावः । तथा चोक्तं भूवादिसूत्रे भाष्ये—'नान्तरेण क्रियां भूतभविष्यद्वर्तमानाः काला व्यज्यन्ते । अस्त्यादिभिश्चापि भूतभविष्यद्वर्तमानकाला व्यज्यन्ते' इति । अत एव च 'वर्तमानक्रियावृत्ते'रिति व्याख्यातम् । अत एवास्तीत्यादौ क्रियात्वनिर्वाहः । अस्तिभवतिविद्यती-नामात्मभरणमर्थः । आत्मा-सत्ता, सत्ता चापञ्चभावविकारादनुस्यूतं यद्रूपं सदिति प्रत्ययवेद्यं तत्, तद्विषयव्यापारश्चात्मभरणस्वरूपधारण-पदाभ्यामुच्यते । स्पष्टं चेदं भूवादिसूत्रे भाष्ये । निरुक्तेऽपि—'अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणम्' इति । 'अस्तीति चोत्पन्नस्य सत्त्वस्य

१ अवश्यं व्यापारार्थकत्वं प्रतीयत इत्यर्थः । २ उत्पत्तिरूपं फलं दर्शयति—'रोहित'इति ।

नन्वेवमस्तीत्यत्र स्पष्टं कुतो न बुद्धयत इत्यत आह—अन्यत्रेति । अशेषभावाद् = भावनायाः फलसमानाधिकरणत्वात्, तथाच भावनायाः फलसामानाधिकरण्यं तदस्पष्टत्वे दोष इति भावः । नन्वेवं 'किं करोती'ति प्रश्ने—पचती'त्युत्तरस्येवास्तीत्युत्तरमपि स्यादिति चेत्,—इष्टापत्तेः, आसन्नविनाशं कञ्चिदुद्दिश्य 'किं करोती'ति प्रश्ने 'पचती'त्युत्तरस्येव 'अस्ती'त्युत्तरस्य सर्व्वसम्मतत्वात् । इतरत्र तु सुस्थतया निश्चिते—'किं करोती'ति प्रश्नः पाकादिविशेषगोचर एवेत्यवधारणाद'स्ती'ति नोत्तरमिति ॥ १२ ॥

❀ दर्पणः ❀

येति । 'तुमर्था'दिति चतुर्थी, वार्त्तिकेन तादर्थ्ये वा । क्रियां भेत्तुं=विशेषयितुं, कालो=लडादिबोध्यः, 'अस्ती'ति शेषः, लडाद्यर्थकालः क्रियामात्रभेदक इति यावत्, विभक्त्यर्थरूपा संख्या तु सर्वस्याख्यातप्रातिपदिकार्थस्य भेदिकेति तदर्थः[1] । मतान्तरे तु धातुप्रातिपदिकार्थस्येति बोध्यम् एवं = धातोर्व्यापारवाचकत्वे ।

मूले—अशेषभावादिति । शेषः=फलव्याप्त्यतिरिक्तो, भवत्यस्मिन्निति भावोऽधिकरणं यस्येति बहुव्रीहिणा 'शेषभाव'शब्दः फलव्यधिकरणार्थकः, भावप्रधाननिर्देशः, तस्मान्नञ्समस्तात् पञ्चम्येकवचने फलव्यधिकरणत्वाभावादित्यर्थावगतिः ॥ १२ ॥

❀ काशिका ❀

सत्तावतोऽवधारणमाचष्टे इति तद्भाष्यकृतः[2] । अशेषभावपदार्थं व्याचष्टे—फलसमानाधिकरणत्वादिति । दोष इति । तदनुपपत्तिप्रयोजकः । तथा च दूरत्वादिकमिव तद्भावनायाः स्पष्टप्रतीतौ प्रतिबन्धकमित्यर्थः । सुस्थतया निश्चिते इति । सत्तानुकूलव्यापारनिश्चये किं करोतीति प्रश्नोऽन्यविषयक एवेत्यवधारणादस्तीत्युत्तरं तत्र नेत्यर्थः । बृहद्भूषणकारास्तु—वस्तुतो भूवादय इति सूत्रानुरोधाद्धातूनां क्रियावाचकत्वावश्यकत्वेऽपि फलवाचकत्वं नावश्यकम्, अतोऽस्त्यादौ सत्तादिरेव क्रिया, अत एव 'पश्यति भवः' 'पच्यते तण्डुलः स्वयमेवे'त्यादौ विषयतादिरूपफलस्यैव क्रियात्वात्—तदाश्रयभावादेः कर्त्तृत्वोपपत्तिरित्युक्तम् ।

'एकदेशे समूहे वा व्यापाराणां पचादयः ।
स्वभाववत् प्रवर्तन्ते तुल्यरूपं समाश्रिताः ॥' इति ।

—वाक्यपदीयव्याख्यावसरे हेलराजीयेऽपि—तद्धात्वर्थक्रियात्वं च तद्धात्वर्थविशेषणत्वे सति तद्धातुजन्यशाब्दबोधविषयताविशिष्टत्वम्, अतो न 'तण्डुलं पचति' 'घटं भावयति' 'पश्यति

१ वाक्यपदीयवाक्यार्थः । २ निरुक्तभाष्यकाराः ।

नन्वेवं भावनायाः फलनियतत्वात्, फलाश्रयस्य च कर्म्मत्वात्, सर्वेषां क्रियावाचकत्वे सकर्म्मकतापत्तिरित्यत आह—

ॐ दर्पणः ॐ

फलितमाह; सारे—भावनायाः फलेति। एकमात्राऽधिकरणकफलसामानाधिकरण्यस्य स्वरूपतो भावनास्पष्टभानप्रतिबन्धकत्वाऽभ्युपगमान्न स्पष्टं तत्प्रतीतिः, स्पष्टत्वं च फलप्रतीत्यनभिभूतत्वमिति भावः। एवम्=अस्त्याद्यकर्मकाणां-व्यापाराऽर्थकत्वे। फलनियतत्वादिति। फलव्याप्यत्वादित्यर्थः, भावनावाचकत्वस्य फलवाचकत्वव्याप्यत्वादिति यावत्। सकर्मकतापत्तिरिति। फलव्या-

ॐ काशिका ॐ

भव'मित्यादौ विक्लित्त्यादिरूपक्रियाश्रयत्वात् कर्त्तृतापत्त्या कर्त्तृसंज्ञया कर्मसंज्ञाबाधात् द्वितीयानापत्तिः। तस्मिन् प्रयोगे फलस्य तद्धात्वर्थविशेषणत्वेनोक्तक्रियात्वाभावात्। कर्मकर्त्तृप्रयोगे तु फलस्योक्तक्रियात्वसत्त्वादुपपद्यन्ते 'तण्डुलः पच्यते स्वयमेवे'त्यादयः प्रयोगाः। सत्यन्तघटकतत्पदानुपादाने पचति भवतीत्यादौ पच्याद्यर्थस्य क्रियात्वानापत्तिरतस्तदुपादानम्। न च यथाश्रुतेऽपि घटं भावयतीत्यादौ कर्मसंज्ञा 'पचति देवदत्त' इत्यादौ सावकाशां कर्त्तृसंज्ञां बाधत इति नानुपपत्तिरिति वाच्यम्। 'चैत्रो ग्रामं गच्छति' 'पश्यति भव'इत्यादावपि धातूपात्तफलाश्रयत्वाच्चैत्रादेरपि कर्मत्वापत्त्या द्वितीयापत्तेः। घटं भावयतीत्यत्र भवनस्य णिजन्तधात्वर्थविशेषणत्वेऽपि भ्वर्थाविशेषणत्वेन भ्वर्थक्रियात्वापत्त्या तदाश्रयस्य कर्त्तृत्वापत्तिस्तु न, इष्टापत्तेः। अत एव क्रियाभेदादुभयमप्यस्तीति 'ण्यन्ते कर्तुश्च कर्मणः' इति भाष्ये उभयथापि व्यवहारः कृतः। नन्वेवं क्रियात्वस्य धातुत्वघटिततयान्योन्याश्रयतादवस्थ्यमिति चेन्न, धातुत्वस्य जात्यादिरूपत्वात्, भूवादिसूत्रं तु तत्परिचायकमिति प्रागेवोक्तम्। तद्धात्वर्थफलत्वमपि = तद्धात्वर्थविशेषणत्वविशिष्टतद्धात्वर्थत्वम्। 'पश्य मृगो धावतो'त्यत्र धावनक्रियाया धावतो दृशिफलत्ववारणाय प्रथमदले तत्पदम्, अन्यथा मृगपदाद् द्वितीयापत्तिः। एवं च 'पच्यते ओदनः स्वयमेव' 'घटो भवती'त्यादौ आश्रयत्वं व्यापारं प्रकल्प्य फलव्यापारोभयार्थत्वकल्पनं तत्र तत्रोक्तमनादेयम्। भावयतीत्यादौ भवनाश्रयत्वानुकूलव्यापारप्रतीतेरनुभवविरहाच्च, भवनानुकूलव्यापारस्यैव ततः प्रतीतेः। तथा चैतन्मते केवलव्यापारार्थकत्वमकर्मकत्वम्। फलव्यापारोभयवाचकत्वं सकर्मकत्वं बोध्यम्। जीव प्राणधारणे, नृती गात्रविक्षेपे, स्रंसुध्वंसु अधः पतने इत्याद्यनुशासनेनैतादृशानां प्राणादिविशिष्टधारकसंयोग-गात्रविशिष्टविक्षेपादिक्रियामात्रवाचकत्वेनोभयवाचकत्वाभावात्, विशिष्टस्यैव क्रियात्वात्। दधात्यादेस्तु संयोगधारणक्रियोभयवाचकत्वात् सकर्मकत्वोपपत्तिः। गात्रं धत्त इत्यादिप्रयोगोपपत्तिश्च। पतधातोरपि गमिवदुभयार्थकत्वादूर्ध्वं पतति नरकं पतित इत्यादिप्रयोगनिर्वाह इत्याहुः॥ १२॥

फलनियतत्वादिति। फलानुकूलव्यापारस्यैव भावनापदार्थत्वादिति भावः। तद्व्यक्तिभिन्नानिष्ठत्वे सति तन्निष्ठत्वमेकमात्रनिष्ठत्वम्। फलव्यापारयोरन्यतरस्यान्यतराधिकरण-

फलव्यापारयोरेकनिष्ठतायामकर्म्मकः ॥
धातुस्तयोर्धर्म्मिभेदे सकर्म्मक उदाहृतः ॥ १३ ॥

एकनिष्ठातायाम् = एकमात्रनिष्ठतायां, भिन्नाधिकरणावृत्तितायामिति यावत्, तेन गम्यादौ फलस्य कर्त्तृनिष्ठत्वेऽपि नातिव्याप्तिः । अकर्म्मकः—यथा भ्वादिः । तयोः = फलव्यापारयोः, आश्रयभेदे सकर्म्मक इत्यर्थः ।

॥ दर्पणः ॥

पारोभयवाचकस्य पच्यादेः सकर्मकत्वदर्शनादिति भावः । ननु फलव्यापारयोरेकनिष्ठत्वस्याकर्मकतायां तन्त्रत्वे गम्यादीनामप्यकर्मकतापत्तिस्तदर्थफलव्यापारयोरेककर्त्तृवृत्तित्वादतो व्याचष्टे—एकमात्रनिष्ठतायामिति । एकमात्रनिष्ठत्वमेकेतरावृत्तित्वे सत्येकवृत्तित्वं, तत्र प्रयोजनाभावाद्विशेष्यांशमपहाय फलितार्थमाह—भिन्नाधिकरणेति । भिन्नत्वं च व्यापाराधिकरणापेक्षया बोध्यं, तथा च स्वार्थव्यापारानधिकरणावृत्तिफलवाचकत्वं पर्य्यवसितं लक्षणं—लक्ष्ये ग्राहयति—भ्वादिरिति । तत्र सत्ताऽऽत्मकव्यापारस्यैकमात्रनिष्ठत्वस्याऽविकलत्वादिति भावः । ननु मूले—'तयोर्धर्म्मिभेदे' इत्यनेन स्वार्थफलव्यधिकरणव्यापारवाचकत्वं स्वार्थव्यापारव्यधिकरणफलवाचकत्वं वा सकर्मकत्वमुक्तं, तत्र वैयधिकरण्यं तदधिकरणाऽवृत्तित्वं, तथाच गमादावव्याप्तिः, तदर्थफलव्यापारयोः परस्पराऽधिकरणवृत्तिभिन्नत्वाऽभावादतो व्याचष्टे—भूषणसारे—आश्रयभेद इति । तथाच

॥ काशिका ॥

भेदाधिकरणवृत्तित्वमित्यर्थः । मात्रान्तर्भावस्य प्रयोजनमाह—तेनेति । तत्र विशेष्यदलस्यवैयर्थ्यादाह—भिन्नाधिकरणेति । आत्मानं = सत्तामात्मना = स्वेन बिभ्रत् = तदनुकूलव्यापारवान् भवन्, म्रियतौ सत्तात्यागानुकूलव्यापारस्येवात्र तदनुकूलव्यापारस्य प्रतीतिरिति भावः । नन्वेवमात्मानं जानातीत्यादौ ज्ञानादिरूपफलस्य कर्त्तृमात्रनिष्ठतया सकर्मकत्वानुपपत्तिरित्याशङ्क्याह—आत्मानमिति । भाष्योक्तेति । तथा चान्तःकरणावच्छिन्न आत्मा कर्ता, शरीरावच्छिन्नः कर्म, तथा चौपाधिको भेद इति भावः । एवंरीत्या जीवत्यादेर्न सकर्मकत्वम्, फलाश्रयावाचकत्वे सतीति विशेषणानुप्रवेशात् । अत एवास्तेरात्मधारणानुकूलव्यापारार्थकत्वेऽप्यात्मरूपाश्रयवाचकत्वात्र सकर्मकत्वमित्याहुर्भूषणकृदादयः । मञ्जूषाकारास्तु—एतच्छास्त्रीयकर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वम् । तेन अध्यासिता भूमय इत्याद्युपपद्यते । अत्र तु 'अधिशीङ्स्थासाम्—' इत्याधारस्य कर्मत्वम्, अन्वयश्च पृथगुपस्थितयोः संसर्गरूपः, अन्वयपदस्य तत्रैव व्युत्पत्तेस्तेन जीवत्यादिषु न दोषस्तत्र प्राणादिरूपकर्मणो धात्वर्थात् पृथगनुपस्थितेः । एवं चाश्रयावाचकत्वरूपविशेषणाननुप्रवेशाल्लाघवमपीति प्राहुः ॥ १३ ॥

उक्तञ्च वाक्यपदीये—

'आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते ॥
अन्तर्भावाच्च तेनासौ कर्म्मणा न सकर्मक इति ॥'

बिभ्रदिति । तेन स्वधारणानुकूलो व्यापारोऽत्रापि गम्यत इति भावः । तेन—कर्म्मणा, सकर्म्मकत्वन्तु न, अन्तर्भावात् = फलांशेन सामानाधिकरण्यसत्त्वादित्यर्थः[1] । 'आत्मानं जानाति, इच्छती'त्यादौ च "द्वावात्मानौ—शरीरात्मा, अन्तरात्मा च, तत्रान्तरात्मा[2] तत्कर्म्म करोति येन शरीरात्मा सुखदुःखे अनुभवती"ति—'कर्म्मवत्कर्मणे'ति सूत्रीयभाष्योक्तरीत्या भिन्नाधिकरणनिष्ठतामादाय सकर्म्मकत्वमित्यवधेयम् ॥ १३ ॥

नन्वसत्त्वभूतक्रियाया धात्वर्थत्वे 'पाक' इत्यत्रापि तत्प्रत्ययापत्तिः,

❀ दर्पणः ❀

प्रथमलक्षणे कर्त्तृभिन्नतदधिकरणाऽवृत्तित्वरूपस्य, द्वितीये तदनधिकरणावृत्तित्वरूपस्य निवेशान्नाऽनुपपत्तिरिति भावः । अस्तेः फलव्यापारोभयार्थकत्वे हरिसम्मतिमप्याह—उक्तञ्चेति । व्यपदिश्यते—व्यवह्रियते । अन्तर्भावादिति । धात्वर्थतावच्छेदककोटिप्रविष्टत्वादित्यर्थः । पृथगुपस्थितयोरेवान्वयनियमात् कर्मसंज्ञकाऽर्थान्वय्यर्थकरूपसकर्मकत्वस्य तत्राऽनवकाशादिति भावः । स्वोक्तलक्षणाऽनुसारेण सारकृद् व्याचष्टे—फलांशेनेति । स्वकर्मकधारणरूपफलेन सह तदनुकूलव्यापारस्यैकाधिकरण्यादित्यर्थः । आत्मरूपकर्मणा सकर्मकत्वं कुतो नेत्याकाङ्क्षायां एतत्समाधानस्योदक्षरत्वदोषदुष्टस्य योग्यत्वमीदृशव्याख्याने सुधीभिर्विभावनीयम् ।

नन्वात्मानं जानाती'त्यादावनुपदोक्तसकर्मकलक्षणस्याऽव्याप्तिः, तत्र ज्ञानरूपफले तदर्थव्यापारस्य वैयधिकरण्याऽभावादतिव्याप्तिश्च फलसमानाधिकरणेत्याद्यकर्मकलक्षणस्येत्याशङ्क्य समाधत्ते—आत्मानं जानातीत्यादिना । अन्तरात्मेति । अन्तःकरणावच्छिन्नात्मा शरीरात्मा, तदवच्छिन्नः सः, तथाचात्मन एकत्वेऽपि ततः शरीररूपोपाधिभेदपरिकल्पितं भेदमादाय वैयधिकरण्यस्य सूपपादत्वादुक्तलक्षणयोर्नाव्याप्त्यतिव्याप्ती इत्याह—भिन्नाधिकरणेति ॥ १३ ॥

असत्त्वभूताया इति । क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकधर्माक्रान्ताया इत्यर्थः । तदिति । तेन रूपेण प्रतीत्यापत्तिरित्यर्थः । कृदभिहित इति = कृदर्थः,

❀ काशिका ❀

भाष्यविरोधादिति । तादृशभाष्यात् कृदन्तात् सत्त्वेनैव प्रतीतेर्लाभादित्याशयः । मृगो

१. वाक्यपदीयकारिकार्थः । २ अन्तरात्मा = व्यापाराश्रयः, शरीरात्मा—फलाश्रयः ।

नचेष्टापत्तिः—'कृदभिहितो भावो द्रव्यवत् प्रकाशत' इति भाष्यविरोधादित्यत आह—

आख्यातशब्दे भागाभ्यां साध्यसाधनरूपता[1] ।।
प्रकल्पिता यथा शास्त्रे, स घञादिष्वपि क्रमः ।।१४।।

आख्यातशब्दे = 'पश्य मृगो धावती'त्यादौ । भागाभ्यां = तिङन्ताभ्याम् । 'प्रकृतिप्रत्ययभागाभ्या'मिति विवरणकारोक्तमपव्याख्यानं, 'पचती'त्यत्राऽपि भागद्वयसत्त्वात्, साध्यसाधनरूपता यथाक्रमं ग्राह्या,

ॐ दर्पणः ॐ

द्रव्येण = नामार्थेन तुल्यं प्रकाशते = भासते इत्यर्थः, द्रव्यधर्माणि लिङ्गसंख्याकारकत्वानि गृह्णातीति यावत् । यद्वा द्रव्यं क्रियाकाङ्क्षोत्थापकतावच्छेदकरूपसिद्धत्ववत्, तेन तुल्यं प्रकाशते इत्यर्थः, सिद्धत्वेन भासत इति यावत् । तथा च तादृशभाष्येणापाद्यव्यतिरेकनिर्णये तद्धेतुभूते प्रामाण्योपगमादिष्टापत्तेरसुकरत्वादिति भावः । आख्याते शब्दौ यस्मिन्निति बहुव्रीहिणा वाक्यमन्यपदार्थं इत्याशयेनाह—पश्येत्यादि । तिङन्ताभ्यां=पश्यधावतिभ्याम् । धावतेः साधनत्वेन पश्यतेः साध्यत्वेन क्रियाबोधकत्वाद् दृष्टान्ततोपपत्तिरत एव वक्ष्यती'यान् परं विशेष'इति । 'प्रकृत्यादीति'—व्याख्यानं विवरणस्थम्, 'आख्यातशब्द' इति कर्मधारय इति तद्भावः । अपव्याख्याने हेतुमाह-पचतीत्यत्रेति । तथाच तिङन्तरूढेन केवलाख्यातपदेनैव पचत्यादितिङन्तरूपार्थलाभे शब्दपदवैयर्थ्यं, मन्मते तु तस्य बहुव्रीहिलाभसम्पादकतयाख्यातशब्दपदस्य तिङन्तद्वयघटितवाक्यपरतोपपत्तिः, पचत्यादेर्भागद्वयस्य साध्यसाधनवर्त्तित्वेऽपि क्रियायास्ततः साधनत्वेनाऽबोधाद् दृष्टान्तत्वासम्भवश्चेति भावः । तदेव विशदयति—साधनरूपतेति ।

ॐ काशिका ॐ

धावतीत्यादाविति । मृगो धावति पश्येति साध्यसाधनरूपतेत्यनुपदमेव—वाक्यपदीयेऽभिधानात् । आख्यातशब्दे इत्यस्य तिङ्समुदाये इत्यर्थः । भागद्वयसत्त्वादिति । तथा च तत्रापि सिद्धावस्थापन्नक्रियाप्रतीत्यापत्तिः । साध्यत्वसाधनत्वाभ्यां प्रतीतिमात्रेऽयं दृष्टान्तः । यथा पचतीति तिङन्ते धातुरूपप्रकृत्या साध्यत्वेन स्वार्थो बोध्यते, साधनत्वरूपस्वार्थस्तिङा, तथा 'पाक' इत्यत्र धातुना साध्यत्वेन क्रिया प्रत्याय्यते, प्रत्ययेन सिद्धत्वरूपेणेत्यर्थः । अत एवाख्यातशब्दे इत्येकवचनं स्वरसतः संगच्छते । इदमेव व्याख्यानं हेलाराजीये दृश्यत इति परे । कारकत्वेनान्वयित्वमिति । कर्तृत्वकर्मत्वेतरकारकत्वव्याप्यरूपेणान्वयित्वमित्यर्थः । तेन पचति भवती-

१· 'साध्यसाधनवर्त्तिते'त्यपि क्वचित्पाठः ।

साध्यत्वं—क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्त्वं, साधनत्वं—कारकत्वेनान्वयित्वम्। स घञादिष्वपीति। प्रकृत्या साध्यावस्था, प्रत्ययेन साधनावस्था। इयान् परं विशेषः—घञाद्युपस्थाप्या—लिङ्गसंख्यान्वयिनी, कारकार्थान्वयिनी च,—आख्यातान्तोपात्ता तु नैवं, तथापि कारकत्वेनान्वयित्वमात्रेण दृष्टान्तदार्ष्टान्तिकतेत्यवधेयम्।

नच घञन्ते धातुना तथाभिधाने मानाभावः, 'ओदनस्य पाक' इति कर्म्मषष्ठ्या मानत्वात्, नचाध्याहृततिङन्तक्रियान्वयात् षष्ठी, 'कर्तृ-

❀ दर्पणः ❀

'प्रकृत्येत्यादौ—'पाक इत्यादा'विति शेषः। नन्वनयोर्लिंगसंख्यान्वयित्वानन्वयित्वेन वैषम्यात् कथं दृष्टान्तदार्ष्टान्तिकभावोऽत आह—इयान् परमिति। तथाच यत्किञ्चिद्धर्मवत्वेन सादृश्यविवक्षणान्नोक्तदोष इति भावः। ननु धात्वर्थस्य कारकत्वेनाऽनन्वयित्वे कारकानन्वयित्वरूपमसत्त्वं तस्या भज्येतेति चेत्,—तत्र क्रियानाधारत्वविशेषणेन कर्त्तुर्व्यापाराधारत्वेन कर्मणः फलाधारत्वेन—कर्त्तृत्वेन कर्मत्वेनाऽन्वयेऽप्युक्तरूपस्यासत्त्वस्याऽक्षतत्वात्। उक्तञ्च—

क्रिया न युज्यते लिङ्गं क्रिया नाऽऽधारकारकैः।

असत्त्वरूपता तस्या इयमेवाऽवधार्यताम्॥' इति। क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकधर्मवत्त्वमसत्त्वभूतत्वमिति मते त्वत्र दोषः प्रागुक्त एव, साधनाकाङ्क्षोत्थापकतावच्छेदकधर्मवत्त्वरूपतया परिष्कृते तु न क्वापि दोष इति। तथाभिधाने इति। उक्तसाध्यत्वेन रूपेण प्रतीतावित्यर्थः। ओदनस्येति। अत्रौदनपदं तण्डुलादिपरम्, अन्यथा विक्लिन्नस्यैवौदनपदार्थतया तस्य पाकासम्भवेन बाधितार्थकताऽऽपत्तेः। कर्मषष्ठ्या इति। कर्मत्वेन कर्मशक्तायाः षष्ठ्या एवेत्यर्थः। मानत्वादिति। अनुपपत्तिरूपप्रमाणत्वादित्यर्थः। घञन्तेन सिद्धभावस्यैवाऽभिधाने कारकाणां साध्यस्वभावक्रियाऽन्वयित्वनियमेनौदनस्याऽकारकतयाऽकर्मत्वेन तत्र षष्ठ्यनुत्पत्तेरेव तस्य साध्यस्वभावक्रियार्थकत्वे मानत्वादिति भावः। क्रियान्वयादिति। साध्यस्वभावाऽध्याहृतभवत्यर्थस्य परम्परयान्वयादित्यर्थः।

❀ काशिका ❀

त्यादौ कर्तृत्वकर्मत्वरूपेणान्वयित्वसत्त्वेऽपि नासत्त्वभङ्ग इत्युक्तं प्राक्। नैवमिति। तथा च दृष्टान्तदार्ष्टान्तिकयोर्वैषम्याद् दृष्टान्तत्वं नोपपद्यत इति भावः। दृष्टान्तदार्ष्टान्तिकभावे सर्वांशे साम्यं न नियामकम्, तथा सति चन्द्रमुखादेरपि स न भवेत्, अपि तु किंचिदंशे एव, तच्च प्रकृतेऽस्तीत्याह—तथापीति। मानत्वादिति। साध्यत्वेन प्रतीयमानार्थे एव कारकान्वयात्, प्रकृते तथानुपस्थितौ कर्मत्वानुपपत्तौ 'कर्तृकर्मणोः—' इति षष्ठ्यनुपपत्तिरिति भावः। षष्ठीति।

कर्म्मणोः कृती'ति कृदन्तेन योग एव तद्विधानात्, 'न लोकाव्ययनिष्ठा-खलर्थतृना'मिति लादेशयोगे षष्ठीनिषेधाच्च। एवं रीत्या 'काष्ठैः पाक'

❀ दर्पणः ❀

नन्वोदनस्य कृदन्तार्थफलाश्रयत्वरूपकृदन्तयोगस्यापि सत्त्वेन कथं तदनुपपत्तिरत आह—**नलोकेति**। इदंच समाधिसौकर्य्यादुक्तं—प्रत्यासत्या यद्धात्वर्थ-फलाश्रयत्वं तद्धात्वर्थकारकस्यैव कर्मतालाभेन पाकपदार्थस्य क्रियात्वेन भवत्यर्थस्य क्रियात्वेऽपि तदर्थफलाश्रयत्वाभावेनौदने कर्मत्वस्यैव दुरुपपादत्वात्, ननु तत्र मा भूत् कृद्योगषष्ठी शेषषष्ठ्यैव तथा प्रयोगोपपत्तेरिति चेन्न, सर्वत्र सम्बन्ध-षष्ठ्यैव प्रयोगोपपत्त्या कर्त्तृकर्मणोरित्यादिविधिवैयर्थ्यापत्तेः। यदि च, 'जगतः कर्त्ते'त्यादौ कर्मत्वेन कर्मत्वप्रकारकसर्वसिद्धबोधोपपत्त्यर्थं, समासस्थले गति-कारकोपपदात्कृदित्यादिविहितस्वरनिर्वाहार्थं च तस्यावश्यकतेति विभाव्यते, तदा प्रकृते किं तत्प्रयोजनं पाणिपिहितमिति भावः। नन्वसत्त्वभूतक्रियाया भावप्रत्ययप्रकृत्यर्थत्वे काष्ठानां तन्निरूपितकरणत्वस्यापि सम्भवाद्भवत्यर्था-ऽनध्याहारेऽपि 'काष्ठैः पाक' इत्याद्यपि प्रसज्ज्येतेत्याशङ्क्येष्टापत्त्या परिहरति—**एवं रीत्येति**। अन्ये तु भावप्रत्ययस्थले सम्बन्धिभेदेनैकस्यैव पितृत्वभ्रातृत्ववद्भा-वत्यर्थस्य मृगदर्शनसम्बन्धिभेदात् साधनवच्चैकस्या एव क्रियाया वाचकप्रत्यय-रूपसम्बन्धिभेदात् साध्यत्वसाधनत्वाभ्यामुपस्थितिर्न ताभ्यां भिन्नभिन्नक्रियो-पस्थितिरित्याहुः। **एवमिति**। यथौ'दनस्य पाक' इत्यादावोदनस्य कर्मत्वाऽनुप-

❀ काशिका ❀

तथा च घञन्ते तथाऽप्रतीतावप्युपपद्यमानया षष्ठ्या तत्कल्पना न संभवतीति भावः। नन्वध्या-हृततिङन्तोपस्थितक्रियाद्वारको योगः कृदन्ते नास्त्यतो न षष्ठ्यनुपपत्तिरित्यभिप्रेत्याह—न लोकेति। न च 'कर्तृकर्मणोः—' इति विधिवैयर्थ्यम्, न च क्रियान्तरमादायैव षष्ठ्युपपादनीया, सा च न लोकेति निषेधेन न सम्भवतीति वाच्यं, कर्त्तरि कृदिति सूत्रभाष्यप्रामाण्यात्तुमुनादीनामिव-क्तिनोऽपि साध्यावस्थापन्नधात्वर्थानुवादकत्वमेवेति—वज्रस्य कृतिरित्यादौ चरितार्थत्वात्। एवमोदनपाक इत्यादौ समासोऽपि न भवेत्, असामर्थ्यात्। 'कृद्योगा च षष्ठी समस्यते' इति वचनस्य वज्रकृतिरित्यत्र चारितार्थ्यात्। न च शेषषष्ठ्यैव वाक्यं समासश्चेति वाच्यम्, नलपाक इत्यादौ नलकर्तृत्वादिप्रकारकबोधस्यानुभवसिद्धस्यानापत्तेः, 'आश्चर्यो गवां दोहोऽगोपेने'त्यसि-द्ध्यापत्तेश्च। 'उभयप्राप्तौ—' इत्यस्यानन्तरस्येति न्यायेन 'कर्तृकर्मणोः—' इत्यस्यैव नियामक-तया अगोपपदात् शेषषष्ठ्या दुर्वारत्वादित्याद्यूह्यमिति वदन्ति। नन्वेवं सति 'काष्ठैः पाक' इत्या-पद्येत, आख्यातेनैव भावना साध्यतयोच्यते इति मीमांसकमते तस्यानिष्टत्वादित्याशङ्कामिष्टापत्त्या परिहरति—एवं रीत्येति। तथा च 'नन्वसत्त्वभूतक्रियाया' इत्यादिपूर्वपक्षे इष्टापत्तिरेवेति तात्पर्यम्।

इत्याद्यपीष्टमेव, एवं फलांशोऽपि धातुनाऽसत्त्वावस्थापन्न एवोच्यते, अत एव—'स्तोकं पचती'तिवत् 'स्तोकं पाक' इत्युपपद्यते—इति ॥१३॥

एतदेव स्पष्टयति—

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना ॥
सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः ॥ १४ ॥

❀ दर्पणः ❀

पश्याऽसत्त्वभूतव्यापारो धातुवाच्यस्तथेत्यर्थः । तादृशफलस्यावाच्यत्वेऽनुपपत्तिं दर्शयति—अत एवेति । अन्यथा तादृशप्रयोगानुपपत्तिः, तादृशफलस्य वाच्यत्वे तु तस्य व्यपदेशिवद्भावेन स्वसम्बन्धितया कर्मत्वात् तत्समानाधिकरणस्तोकादिशब्देभ्यो द्वितीयोपपत्तिः, तत्र स्तोकादिभ्यः 'कर्तृकर्मणो'रिति षष्ठी तु न, कर्तृसाहचर्येण भेदान्वयिन एव कर्मणस्तत्र ग्रहणात्, अत एव 'पूजनात्पूजित'मिति सूत्रे भाष्ये—दारुणं यथा भवति तथाऽध्यापक इत्यर्थे दारुणाध्यापकसिद्ध्यर्थं मंलोपवचनमारब्धं । अन्यथा 'कर्तृकर्मणो'रिति विहितषष्ठ्यन्तेन समासे तद्वैयर्थ्यं स्फुटमेवेत्यन्यत्र विस्तरः ।

अन्ये तु 'ओजःसहोऽम्भसा वर्तते' इत्यधिकारे 'तत्प्रत्यनुपूर्वमीपलोमकूल'मिति सूत्रे द्वितीयान्ततच्छब्दग्रहणं ज्ञापकं—क्रियाविशेषणाद् द्वितीयेत्यस्यार्थस्य, न तु स्तोकाद्यर्थस्य कर्मत्वमपि, फलस्य फलाश्रयत्वाऽभावात्, एवञ्च न तद्वाचकेभ्यः षष्ठीप्रसक्तिरित्याहुः ॥१४॥

❀ काशिका ❀

नन्वेकस्यैव धात्वर्थस्य विरुद्धसाध्यत्वसिद्धत्वाभ्यां भानं न संभवतीति चेन्न । यथा संबन्धिभेदादेकस्यैवाचार्यत्वं मातुलत्वं च तथैकत्रैव कारकलिङ्गादिरूपसंबन्धिभेदादुभयसंभवेन तयोर्विरोधस्यैवाभावात् । यथा वा 'पश्य मृगो धावती'त्यत्रैकस्यैव धावनस्य मृगं प्रति साध्यत्वं, दर्शनं प्रति साधनत्वं तथैकस्यैव धात्वर्थस्य साध्यत्वेन प्रकारता, सिद्धत्वेन विशेष्यता । एकनिष्ठत्वाच्च न तयोः स्फुटं ग्रहो बोधे । अत एव 'घञ्वाच्यो भावः प्रधान'मिति ग्रन्थाः संगच्छन्ते । 'कर्तरि कृत्' इति सूत्रे भाष्ये चोक्तं 'घञ्वाच्यो भावो बाह्यः प्रकृत्यर्थात्' इति । इत्युपपद्यत इति । अन्यथा कारकाणां साध्यत्वेनोपस्थित एवान्वय इति नियमादभेदेनान्वयेऽपि साध्यत्वेनोपस्थितिरपेक्षितेति स्तोकं पाक इति नोपद्येतेति भावः । व्यापारान्वये तु शोभनः पाक इत्येव । व्यापारस्याकर्मतया तद्विशेषणे द्वितीयाया अप्राप्तेः । फलान्वये द्वितीयां बाधित्वा 'कर्तृकर्मणोः—इति षष्ठी न । कर्तृसाहचर्येण धात्वर्थेऽभेदेनान्वयिकर्मण एव ग्रहणात् । स्पष्टं चेदं 'पूजनात् पूजितम्—' इत्यत्र भाष्ये इत्यन्यत्र विस्तरः ॥ १४ ॥

नच घञादिभिः सिद्धत्वेनाभिधाने मानाभावः, 'पाक' इत्युक्ते-भवति, नष्टो वेत्याद्याकाङ्क्षोत्थानस्यैव मानत्वात्, धातूपस्थाप्यायां तदसम्भवस्यो-[1]क्तत्वात्, 'स्तोकः पाक' इत्यनापत्तेश्च, तस्माद्धात्वर्थान्वये स्तोकादिशब्देभ्यो द्वितीया, घञर्थान्वये प्रथमा, पुँल्लिङ्गता चेति,-तत्सिद्धये घञादेः शक्ति-रुपेया, एतेन 'घञादीनां प्रयोगसाधुतामात्र'मिति नैयायिकनव्योक्त-मपास्तम् ।

❀ दर्पणः ❀

उक्तत्वादिति । क्रियान्तराकाङ्क्षाऽनुत्थापकतावच्छेदकरूपवत्त्वं साध्यत्वमि-त्यादिनेत्यर्थः । क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपेणोपस्थिते क्रियान्वया-सम्भवादिति भावः, तेन रूपेणोपस्थितेः 'पश्य मृगो धावती'त्यादौ व्यभिचरित-त्वादाह—**स्तोकः पाक इति ।** घञा सिद्धावस्थक्रियाया अबोधने धात्वर्थविशेष-णवाचकस्तोकादिशब्दस्य लिङ्गसर्वनामनपुंसकत्वापत्तिरिति भावस्तदेव विशदयति—**तस्मादिति । एतेनेति ।** घञादीनां सिद्धावस्थापन्नक्रियावाचकत्वव्यवस्थाप-नेनेत्यर्थः । **प्रयोगसाधुतामात्रमिति ।** 'मात्र'पदेन वाचकत्वव्यवच्छेदः । **नैयायिकनव्योक्तमिति ।** धातूनां सुब्विभक्त्यप्रकृतित्वात्तदर्थे सुवर्थसंख्याकर्मत्वा-दीनामन्वयानुपपत्त्या धातोरिव घञन्तस्यापि क्रियावाचकत्वमभ्युपेयम् । प्रकृत्येक-देशार्थे तदन्वयाऽभ्युपगमे तु यत्र पाककर्त्रादेर्द्वित्वादिकं बाधितं, पाकादेश्च तदबा-धितं, तत्र 'पचन्तौ पश्यती'त्यादिप्रयोगापत्तेः, धातूपस्थाप्याऽर्थे सुवर्थान्वयबोधं प्रति तद्धातूत्तरधर्मिकयत्किञ्चिदर्थपरत्वज्ञानस्य प्रतिबन्धकत्वोपगमे तु गौरवम्, एवञ्च यत्र धातुमात्रस्य पाकादौ तात्पर्यं तत्र तद्विशेषणतावाचकस्तोकपदाद् द्वितीयैव, यत्र तु कृदन्तसमुदायस्य, तत्र तद्विशेषणवाचकपदं तत्समानविभक्तिकमेवेति कातन्त्र-

❀ काशिका ❀

मूले—**साध्यत्वेनेति ।** तत्र = घञाद्यन्ते । अत्र 'प्रतीयत' इति शेषः । तद्बोधकमाह—**धातुरूपेति ।** धातुरूपं—**निबन्धनं**=निमित्तं यस्या इत्यर्थः । प्रतीतिनिष्ठं निमित्तत्वं प्रतीयमाने-उपचरितमिति बहुव्रीहौ क्रियायाः प्राधान्योपपत्तिः । **सिद्धभावः** = सिद्धत्वेन प्रतीतिः ।

इत्यनापत्तेरिति । धातूपस्थाप्यक्रियाया लिङ्गानन्वयितया तत्र स्तोकपदार्थान्वये तत्रापि पुंस्त्वानुपपत्त्या सामान्ये नपुंसकस्यैवापत्तेरिति भावः । **धात्वर्थान्वये** = धात्वर्थफलान्वये । **प्रथमेति ।** उक्तरीत्या द्वितीयाया अप्राप्त्या प्रातिपदिकार्थमात्रे प्रथमेत्यर्थः । घञो न शक्तिरभ्युपेयतेऽपि तु घञन्तस्य, तदन्तशक्त्योपस्थितान्वये 'स्तोकः पाक' इत्युपपद्यत एवेति—'कातन्त्रपरिशिष्ट'-

१ तदसम्भवस्य = क्रियान्तराकाङ्क्षोत्थानासम्भवस्य ।

नच घञन्तशक्त्युपस्थाप्यान्वये 'स्तोकः पाक' इति भवतीति वाच्यं, घञन्तानुपूर्व्याः शक्ततावच्छेदकत्वे गौरवादनुशासनाच्च घञादेरेव तथा शक्तिकल्पनादिति दिक्। एवञ्च घञ्शक्त्यभिप्रायेण—'कृदभिहित' इति इति भाष्यमतो न तद्विरोध इति भावः ॥ १५ ॥

ननु कारकाणां भावनान्वयनियम एव 'पाक' इत्यत्रापि कर्म्मषष्ठ्यनुसारेण भावनाया वाच्यत्वं सिद्ध्येत्, स एव कुत इत्याशङ्कां समाधत्ते—

सम्बोधनान्तं, कृत्वोऽर्थाः, कारकं, प्रथमो वतिः ॥
धातुसम्बन्धाधिकार-निष्पन्नमसमस्तनञ् ॥ १६ ॥

❀ दर्पणः ❀

परिशिष्टकृन्मतं नव्यनैयायिकमतत्वेनानूद्य दूषयति—**नचेति। गौरवादिति।** ननु भावाख्यातवद्भावविहितघञादीनां धात्वर्थानुवादकत्वे स्थिते प्रागुक्तप्रयोगोपपत्तयेऽनायत्या घञन्तानुपूर्व्याः शक्ततावच्छेदकत्वस्वीकार आवश्यक इत्यत आह—**अनुशासनादिति।** तथाच गुरुभूतानुपूर्व्याः शक्ततावच्छेदकत्वापेक्षयानुशासनानुगुण्यादुक्तप्रयोगोपपत्तये घञत्वस्यैव तत्त्वमुचितमिति भावः। ननु घञादीनां व्यापारावाचकत्वेऽपि क्रियाविशेषणत्वाद् 'द्वितीये'त्यत्र क्रियापदस्य पाकार्थकतया तथानुपस्थाप्यपरत्वात् 'स्तोकः पाक'इत्यादौ धातूपस्थाप्यपाकस्योक्तविशेषणवैकल्याच्च तद्विशेषणवाचकपदाद् द्वितीयापत्तिरत आह—**दिगिति।** तदर्थस्तु—स्यादेवं यदि क्रियाविशेषणाद् द्वितीयेति स्वतन्त्रमनुशासनं स्यात्, किन्त्वस्मदुक्तफलितार्थकथनमेव तत्, तथात्वे वा त्वन्मते 'स्तोकं पाक' इत्यनापत्तेश्चेति ॥ १५ ॥

❀ काशिका ❀

कारादयोऽनुमन्यन्ते तन्मतमाशङ्क्य निराकुरुते—**न च घञन्तेति।** न च भवत्सिद्धान्तेऽपि समुदायशक्तिर्वृत्तिमात्रेऽभ्युपेयते एव, अन्यथार्थवत्त्वाभावेन प्रातिपदिकसंज्ञा न स्यात्, 'कृत्तद्धित'–इति सूत्रेऽप्यर्थवत्पदानुवृत्तेरुक्तत्वात्, प्रत्ययार्थस्य प्रकृत्यर्थे एवान्वयाद्विभक्त्यर्थसंख्याद्यन्वयोऽपि न स्यादिति वाच्यं, समुदायशक्तेरावश्यकत्वेन अनुशासनाद् घञोपि शक्तिरावश्यक्येवान्यथा ण्वुलादेरपि शक्तिर्न सिध्येत्, न चेष्टापत्तिः, समुदायशक्त्यैव तत्रापि कर्त्रादिबोधसंभवादिति वाच्यं, 'कर्तरि कृत्' इत्याद्यनुशासनविरोधात्, न च भावाद्यन्तर्भावेण समुदायशक्तिकल्पनायां तन्नियामकमिति वाच्यं, क्लिष्टत्वात्, सकलतान्त्रिकसिद्धान्तविरोधात्, खशादौ शवनुत्पत्त्या जनमेजयाद्यसिद्ध्यापत्तेश्च, खशो ङित्त्वेन गुणनिषेधादित्याशयेनाह—**दिगिति॥ १५॥**

सम्बोधनान्तस्य—क्रियायामन्वयः, 'त्वं ब्रूहि देवदत्ते'त्यादौ निघातानुरोधात्, 'समानवाक्ये [१]निघातयुष्मदस्मदादेशा' इत्यनेन समानवाक्ये एव तन्नियमात्, उक्तं च वाक्यपदीये—

'सम्बोधनपदं यच्च तत् क्रियाया विशेषणम् ।
'व्रजानि देवदत्ते'ति निघातोऽत्र तथा सति ॥' इति ।

❀ दर्पणः ❀

क्रियायामिति । प्रवर्त्तनाविषयक्रियायामित्यर्थः, तत्र तदनन्वये निघाताऽनुपपत्ति प्रमाणयति—**निघाताऽनुरोधादिति** । **समानवाक्य इति** । 'आख्यातं सविशेषणं वाक्य'मिति समर्थसूत्रभाष्यात्साक्षात्परंपरया वा पदार्थान्तराऽन्वित-क्रियाबोधकाख्यातस्यैकवाक्यतालाभेन सम्बोधनान्तार्थस्य क्रियायामनन्वये, 'त्वं ब्रूहि देवदत्ते'त्यादौ तदभावात् 'समानवाक्य' इति 'प्रकृत्याऽऽमन्त्रितस्येति विहितस्य निघातस्यानुपपत्तेरित्याखण्डलार्थः । तत्र 'शालीनां ते ओदनं दास्यामी'त्यादौ 'शालीना'मित्यादेः समानवाक्यत्वसिद्धये 'परम्परयेति । पचति भवतीत्यादि-साधारणं चैतत्, प्रकृते च सम्बोधनस्यानुवाद्यविषयतयाऽनुवाद्यस्य विधेयसाकाङ्क्षतया, विधेयतायाश्च क्रियानिष्ठत्वेन तत्रैव सम्बोधनान्तार्थान्वयौचित्यात् समान-वाक्यस्थत्वमक्षतमिति भावः । बोधस्त्वत्रा'भिमुखीभवनानुकूलव्यापारविषयदेव-दत्तोद्देश्यकप्रवर्तनाविषयत्वदभिन्नकर्तृकं भाषणमिति । तत्र हरिसम्मतिमाह—**उक्तञ्चेति** । **सम्बोधनपदमिति** । तद्बोध्यमित्यर्थः । **विशेषणमिति** । स्वोद्देश्यकप्रवर्तनाविषयत्वरूपपरम्परासम्बन्धेनेत्यर्थः । 'व्रजानी'त्यस्य हि—'जानीही'ति शेषः ।

❀ काशिका ❀

संबोधनान्तस्येति । संबोधनविभक्त्यन्तार्थस्येत्यर्थः, अर्थद्वारा तस्यैव वा । **निघातानुरोधादिति** । 'देवदत्त'त्यस्य व्रवणेऽन्वये सत्येवैकवाक्यत्वोपपत्तौ सत्याम्—'आमन्त्रितस्य च' इति निघातो—ऽनुदात्तः सिध्यति, नान्यथेति भावः । नन्वेकवाक्यत्वाभावेऽपि निघातः कुतो न इत्यत आह—**समानवाक्ये इति** । निमित्तनिमित्तिनोरेकवाक्यस्थत्वे सतीत्यर्थः । **संबोधनपदमिति** । अत्र 'पुञ्जराजः—"आख्यातं सविशेषणं वाक्यमिति समर्थसूत्रभाष्योक्तवाक्य-लक्षणस्य संबोधनपदार्थे क्रियाविशेषणत्वाभावे निघातो न स्यात्' इति । संबोधनविभक्तेरनुवाद्यविषयतया विधेयक्रियायामेवान्वयस्यौचित्येन न्यायसिद्ध एवायमर्थः । तदुक्तं हरिणा—

'सिद्धस्याभिमुखीभावमात्रं संबोधनं विदुः ।
प्राप्ताभिमुख्यो ह्यर्थात्मा क्रियासु विनियुज्यते ॥' इति ।

१. समानवाक्ये-'इत्यधिकृत्ये'ति शेषः । २. हरिकारिकार्थमाहेति शेषः ।

'पचति भवति देवदत्ते'त्यादौ तु सूत्रभाष्यादिरीत्यैकवाक्यता-सत्त्वात् स्यादेव निघातः। 'तिङ्ङतिङः' इति सूत्रयता तिङन्तानामप्येक-

❀ दर्पणः ❀

सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः।
प्राप्ताऽऽभिमुख्यो ह्यर्थात्मा क्रियासु विनियुज्यते।[१]

—इति कारिकान्तरे 'विनियुज्यत' इति वदता प्रवर्त्तनाविषयक्रियायामेव तद-न्वयबोधनात्। प्रवर्त्तनोद्देश्यस्यैव तद्विषयक्रियोद्देश्यत्वादुद्देश्यविधेयभावस्य तयोः संसर्गमर्यादया लाभादेकवाक्यतया निघात इति तदर्थः[१]। शाब्दबोधस्त्वत्र सम्बोधनविषयदेवदत्तोद्देश्यकप्रवर्त्तनाविषयो मत्कर्तृकव्रजनकर्मकं ज्ञानमिति। सूत्रभाष्यादिरीत्येति। भूवादि-समर्थ-सूत्रस्थभाष्योक्तरीत्येत्यर्थः। स्यादेवेति। आमन्त्रितदेवदत्तपदस्येत्यर्थः। अत्र 'जानीही'तिपदाध्याहारेणोक्तरीत्या देवदत्त-पदस्यैकवाक्यस्थत्वाऽक्षतेरिति भावः। तत्र सूत्रकारसम्मतिमाह—तिङ्ङतिङ

❀ काशिका ❀

अभिमुखीभावः = परोक्तवचनार्थग्रहणे सादरत्वाभ्युपगमः, एवं च 'राम मां पाहि' इत्यस्याभिमुखीभवद्रामोद्देश्यकं प्रवर्तनाविषयमत्कर्मकं रक्षणमिति बोधः, अत्र 'सविशेषण'मित्यनेन साक्षात्परम्परासाधारणं विशेषणत्वमिष्टं, न तु साक्षादेव, तेन 'नद्यास्तिष्ठति कूले' इत्यर्थे 'नद्यास्तिष्ठती'त्यत्र समर्थसूत्रभाष्यसंमतोदाहरणे निघातासिद्धिः। व्रजानि देवदत्ते'त्यत्र 'जानीही'त्यध्याहारः, अत एव 'क्रियासु विनियुज्यते' इत्यनेन न विरोधः, ज्ञानक्रियायां देवदत्तस्योद्देश्यतया व्रजनस्य कर्मतयान्वयेन समानवाक्यत्वोपपत्तिः। वाक्यैकदेशन्यायेन श्रूयमाणादेव ज्ञानबोधः, अयमेव चाध्याहारपदार्थः, अतो न तत्र 'एकतिङ् वाक्यम्' इति लक्षणस्याव्याप्तिरिति वदन्ति।

अन्ये तु संबोधनं ज्ञानोद्देश्यकेच्छा, ज्ञाने, इच्छायां च विशकलितशक्तिद्वयम्, ज्ञाने प्रकृत्यर्थस्य समवेतत्वसंबन्धेनान्वयः, प्रकृत्यर्थान्वितज्ञाने उद्देश्यतासंबन्धेनेच्छायाः, इच्छान्वित-ज्ञानस्य विशिष्टविषयतासंबन्धेन वाक्यार्थेऽन्वयः, एवं च प्रातिपदिकार्थसमवेतज्ञानस्योद्देश्यतया प्रातिपदिकार्थस्य ज्ञानसमवायितयोद्देश्यत्वरूपं संबोध्यत्वं प्रातिपदिकार्थस्य प्रतीयते; एतदेव संबोध्यत्वमाभिमुख्यपदेन 'काशिका'दावुक्तम्। एवं च 'राम मां पाही'त्यादा'विच्छाविषय-रामसमवेतज्ञानविषयो मत्कर्मकत्वत्कर्तृकाशंसाविषयो रक्षण'मित्याद्याकारो बोधः—इत्याहुः।

एकवाक्यतासत्त्वादिति। 'आख्यातं सविशेषण'मिति वाक्यलक्षणसत्त्वादित्यर्थः। तत्रैक-वाक्यतायां सूत्रकारसंमतिमाह—'तिङ्ङतिङः' इति। अतिङ्पदघटितं सूत्रं कुर्वतेत्यर्थः।

१ 'सम्बोधनपदं यच्चे'ति हरिकारिकार्थः।

वाक्यतास्वीकारात्, 'एकतिङ् वाक्य'मिति वदतां वार्त्तिककाराणां मते परं न, वस्तुतस्तु—एकतिङ्विशेष्यकं वाक्यमिति तदभिप्रायस्य हेलाराजीयादौ,—वैयाकरणभूषणेऽस्माभिश्च प्रतिपादितत्वात्तन्मतेऽपि भवत्येवेत्यवधेयम्। कृत्वोऽर्थाः। 'क्रियाभ्यावृत्तिगणने कृत्वसुच्' इति

❀ दर्पणः ❀

इतीति। 'तिङन्ताना'मिति बहुवचनेन प्रकृते जानातिपदाध्याहारः सूच्यते, अन्यथा तत्र निघाताऽप्राप्त्या तत्पर्युदासबोधकतिङ्ग्रहणस्य वैयर्थ्यापत्तेरिति भावः। सम्मतिरियं सूत्रकृत एकवाक्यतांशे, निघातांशे च, भाष्यसम्मतिस्तु न, तेनातिङ्ग्रहणस्य प्रत्याख्यानात्। नन्वेवं कथमतिङ्ग्रहणप्रत्याख्यानसङ्गतिः, 'पचति भवती'त्यत्र निघातवारकतया तस्यावश्यकत्वादिति चेन्न, तत्र कारकान्वितक्रिया-बोधकत्वरूपैकवाक्यत्वस्य सुप्चयसुप्तिङन्तचयसाधारणस्य सत्त्वेऽपि वार्त्तिककार-परिभाषितश्रूयमाणैकतिङ्त्वरूपैकवाक्यत्वस्य तत्रासत्त्वादित्याशयात्। तथाचोक्त-स्थले तादृशैकवाक्यत्वाऽभावान्निघाताऽप्रसक्तिरेव, तत्सूचनायैव—'स्यादेव निघात' इति सम्भावनाद्योतकलिङ उपादानम्'। तदेतदाविष्करोति—**वार्त्तिककाराणा-मिति।** यथाश्रुतसूत्रमनुरुद्ध्याह—**वस्तुतस्त्विति। हेलाराजीय इति।**

बहुष्वपि तिङन्तेषु साकाङ्क्षेष्वेकवाक्यता।
तिङन्तेभ्यो निघातस्य प्रतिषेधस्तथाऽर्थवान्॥'

—इति वाक्यपदीयव्याख्याऽवसर' इति शेषः। **तन्मतेपि भवत्येवेति। इदञ्च**

❀ काशिका ❀

'पचति भवती'त्यादौ तिङन्तात् परस्य निघातवारणप्रयोजनकमतिङ्ग्रहणमुक्तस्थले वाक्यत्वा-भावेऽनर्थकं सत्तिङन्तसमुदायेऽप्येकवाक्यत्वं सूत्रकृदभिमतमिति सूचयतीति भावः। **एकतिङिति।** एकं तिङ्=तिङन्तं यत्रेति बहुव्रीहिः, तथा चैकतिङन्तघटितसमुदायो वाक्यमित्यर्थः। अत्रापि 'विशेषणविशिष्टक्रियार्थकत्वं' विशेषणं निवेशनीयं, तेन 'तिष्ठति देवदत्तः' 'पचति मैत्र' इत्यत्र देवदत्तः पचतीत्यनयोरेकवाक्यं न, तथा सति 'पचती'त्यस्य निघातापत्तिः, न चेष्टापत्तिः, 'आख्यातं सविशेषण'मिति वाक्यलक्षणमिति पक्षेऽनिष्टत्वात्, अत एव च 'तिङ्ङतिङः' इति सूत्रे 'पचति करोती'ति प्रतीकमुपादाय 'विनापि चशब्देन समुच्चयावगमात् संबन्धसद्भावः' इत्युक्तं 'कैयटीये', 'क्रियाकर्मभावेनाप्यन्वयः सुवचः' इत्युक्तं 'प्रदीपोद्द्योते'। **मते परम्** = मते एव, नेत्यत्र 'निघात' इत्यनुषज्यते, संभवति मतैक्ये मतभेदो न न्याय्य इत्याशयेनाह—**वस्तुतस्त्विति। एकतिङ्विशेष्यकमिति।** एकतिङ्=तिङन्तं—विशेष्यं=मुख्यविशे-ष्यार्थप्रतिपादकं यत्रेत्यर्थः, तथा च मुख्यविशेष्यीभूतार्थबोधकैकतिङन्तघटितसमुदायत्वमिति

क्रियायोगे तत्साधुत्वोक्तेः। क्रियाया अभ्यावृत्तिः = पुनःपुनर्जन्म, तस्मिन् द्योत्ये इति तदर्थात्। कारकम्। 'कारके' इत्यधिकृत्य तेषां व्युत्पादनात्। कारकशब्दो हि क्रियापरः—'करोति कर्तृकर्म्मादिव्यपदेशा'-निति व्युत्पत्तेः,—तथाचाग्रिमेष्वपादानादिसंज्ञाविधिषु क्रियाऽर्थककारक-शब्दानुवृत्त्या क्रियान्वयिनामेव संज्ञेति भाष्ये स्पष्टम्। प्रथमो वतिः।

ॐ दर्पणः ॐ

निरुक्तलौकिकवाक्यत्वस्यैव निघातप्रयोजकत्वमित्याशयमूलकमित्यवधेयम्। पुनः पुनर्जन्मेति। अत एव सकृत्प्रवृत्तौ 'द्विःपचती'ति न, 'पञ्चकृत्वो भुङ्क्ते' इत्यादौ पञ्चादिशब्दाः संख्योत्पत्तिपराः, तस्या एव कृत्वसुजादिर्द्योतकः, सूत्रस्वारस्याच्च तद्द्योत्यार्थस्य क्रियायामन्वय इति भावः। 'क्रियान्वयिनामेव संज्ञे'त्यपादानादि-मध्यम्, 'क्वचित्तथैव पाठः'[1]। स्पष्टमिति। अन्ये तु—उत्तरभाष्ये करोति क्रियां निर्वर्त्तयतीति व्युत्पत्तिप्रदर्शनात्कारकत्वम्, अत एव, 'ब्राह्मणस्य पुत्रं पन्थानं पृच्छती'त्यादौ ब्राह्मणस्य न कारकत्वं, पुत्रेणाऽन्यथासिद्धत्वात्, अत एव तेषां

ॐ काशिका ॐ

पर्यवसन्नम्। परे तु 'एकतिङ् वाक्यम्' इति स्वशास्त्रीयनिघातादिकार्यमात्रोपयोगि, तेन 'पश्य मृगो धावती'त्यादावेतदसत्त्वेऽपि न क्षतिः, अत एवैतदाश्रित्य 'तिङ्ङतिङः' इति सूत्रस्थमतिङ्-ग्रहणं प्रत्याख्यातमष्टमे भाष्ये, एवं चोक्तस्थले 'देवदत्त'त्यस्य निघाताभाव एव लभ्यते, यथोत्तरं मुनीनां प्रामाण्यादिति प्राहुः। तदर्थादिति। 'पञ्चकृत्वो भुङ्क्ते' इत्यादौ पञ्चादिशब्दास्तत्संख्योत्पत्तिपराः, तद्द्योतक एव प्रत्ययः, तादृशोत्पत्तेश्च क्रियायामेवान्वय उचितः,—'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' इति सूत्रस्वारस्यादिति भावः। तत्राभ्या-वृत्तिपदं पुनःपुनर्जन्मार्थकं, तत्र प्रत्ययो द्योतकः, एवं च 'पञ्चसंख्योत्पत्तिका वर्तमान-कालिका एककर्तृका भुजिक्रिये'ति बोधः। अत्र सूत्रे 'क्रिया'पदं स्पष्टार्थं, द्रव्यादेरुत्पत्तेरेकत्वेन तस्य गणनयोग्यजन्माप्रसिद्धेः, अनेकस्या अपि क्रियायास्तु निवृत्तभेदाया धातुवाच्यताया-स्तादृशजन्मसंभवः, संख्यायास्तत्तत्संख्यावत्तया बोधनरूपगणने हेतुतया गणनलाभे 'गणन'पदं गणनायां ये प्रसिद्धा एकादयस्तेषामेव परिग्रहार्थं, तेन युग्मोभादिशब्दा नेति स्पष्टमाकरे इति दिक्।

क्रियान्वयिनामेवेति। 'ध्रुवमपाये—' इत्यत्र 'क्रियाया'मित्यनुवृत्तौ क्रियायां जनका-काङ्क्षया क्रियायां यदपाये ध्रुवमित्यनेन क्रियाजनकमित्यर्थसंपत्त्या जनकस्य जन्याकाङ्क्षया

१ क्रियान्वयिनामेवापादानादिसंज्ञेत्येवंरीत्याऽपादानादिपदं मध्ये योज्यं, क्वचित्तादृश एव पाठ इत्यर्थः।

'तेन तुल्यं क्रिया चेद्वति'रिति विहितः, तत्र यत्तुल्यं सा क्रिया चेदित्युक्तत्वात्। धातुसम्बन्धाधिकारे। 'धातुसम्बन्धे प्रत्यया' इत्यधिकृत्य तेषां विधानात्। असमस्तनञ्। समासायोग्यः प्रसज्यप्रतिषेधीयो नञि-

❀ दर्पणः ❀

क्रियायामन्वयः, क्रियाजनकमिति ज्ञाते का सा क्रियेत्याकाङ्क्षोदयेन क्रियाया अपि जनकाकाङ्क्षया च तत्रैवान्वयस्यौचित्यात्, अत एव 'गतिकारकोपपदात् कृ'दित्यादौ कारकशब्दस्यापादानादिपरता सङ्गच्छते, 'कारक' इति तु प्रथमार्थे सप्तमीत्याहुः।

इत्युक्तत्वादिति। तथाच 'ब्राह्मणव'दिति वृत्तौ ब्राह्मणशब्दस्य ब्राह्मणकर्तृकाध्ययनपरतया तत्तौल्यवत्यर्थसमभिव्याहृताऽध्ययनक्रियायां ब्राह्मणकर्तृकाध्ययनतुल्यमेककर्तृकमध्ययनमिति ब्राह्मणवदधीत इत्यतो बोधः, 'तत्र तस्येवे'ति विहितवतेर्द्रव्यगुणान्वयित्वान्मूले 'प्रथम' इत्युक्तम्। **विधानादिति।** तत्र धातुशब्दस्य धात्वर्थपरता, 'वसन् ददर्शे'त्यत्राऽतीतवासकर्तृकर्तृकं दर्शनमित्यादिरीत्या बोधादिति भावः। **प्रसज्येति।** प्रतिषेधशब्दः कर्मघञन्तो बाहुलकात्, 'प्रसज्य = आपाद्य प्रति-

❀ काशिका ❀

तत्रैवान्वय उचित इति तदन्वयिनामेवापादानादिसंज्ञेत्यर्थः। **इत्युक्तत्वात्।** यथा 'ब्राह्मणवदधीते' इत्यत्र ब्राह्मणशब्दस्तत्कर्तृकाध्ययनपरः, 'देवदत्तवन्मैत्रः सुंदर' इत्यत्र 'भवती'त्यध्याहारो बोध्यः, अन्यथा क्रियाग्रहणस्य निरर्थकत्तापत्तेः, एवं च तदर्थस्य क्रियैवाश्रय इति स्पष्टमेव। 'मथुरावत् पाटलिपुत्रे प्राकार' इत्यत्र वत्यर्थस्य प्राकारे एवान्वयेन क्रियायामनन्वयात् 'प्रथमो वति'रित्यभिदधौ। तत्र मथुराशब्दस्य तत्संबन्धिप्राकारे वृत्तिः, षष्ठ्यर्थसप्तम्यन्तादेव प्रत्ययो न त्वधिकरणसप्तम्यन्तादिवार्थेनासामर्थ्यादिति स्पष्टं शेखरादौ, विस्तरस्तत एवावगन्तव्यः।

तेषां विधानादिति। 'याहि-याहीति याति', अत्र लोडन्तार्थस्य 'याती'तिपदोपस्थितक्रियायां सामान्यविशेषभावेनान्वयः। **बृहद्भूषणे तु**—'भोक्तुं पचती'त्युदाहृतं, तत्र यद्यपि 'तुमुन्ण्वुलौ—' इति विहितस्तुमुन् न धातुसंबन्धे इत्यधिकारे विहितस्तथापि क्रियावाचिन्युपपदे एव विहितत्वात् क्रियासंबन्धनिमित्तकत्वमक्षतमेवेत्युदाहरणसंगतिः। ननु 'घटो न पट'इत्यत्राऽसमस्तनञः क्रियायामनन्वयेन नियमासंगतिरित्याशङ्कमानोऽसमस्तनञित्यस्य विवक्षितार्थमाह—**समासायोग्य इति। प्रसज्येति।** प्रसज्य—प्रतिषेधपदयोः 'सुप्सुपे'ति समासे तमर्हतीत्यर्थे 'तदर्हति' इति सूत्रेण छः, क्रियान्वययोग्य इत्यर्थः। तदन्वयायोग्यः = उत्तरपदार्थानन्वितः। तथा चोक्तम्—

'प्रसज्यप्रतिषेधस्तु क्रियया सह यत्र नञ्।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्॥' इति।

स्त्यर्थः। उत्तरपदाऽर्थान्वयेऽपि समासविकल्पेन पक्षे असमस्तत्वाद् यथाश्रुतग्रहणाऽयोगात्,—नचासमस्तनञः क्रियान्वये मानाभावः,—'न त्वं पचसि', 'न युवां पचथः', 'चैत्रो न पचति,' 'घटो न जायते' इत्यादौ क्रियाया एव निषेधप्रतीतेः।

अत एव विद्यमानेऽपि घटे तादृशप्रयोगः, तथाच 'घटो नास्ती'-

❀ दर्पणः ❀

षेधः = प्रतिषेधविषयः—प्रतियोगी यस्य तादृशाऽभावोऽर्थो यस्ये'ति व्युत्पत्त्याऽभावार्थक इत्यर्थः। **यथाश्रुतेति**। 'न ब्राह्मणमानये'त्यादौ नञर्थारोपस्य ब्राह्मणादावन्वयेन व्यभिचारापत्तेरिति भावः। **निषेधप्रतीतेरिति**। अत्यन्ताऽभावप्रतीतेरित्यर्थः। तथाच तादृशप्रतीतिरेवोक्तनञर्थस्य क्रियान्वयित्वे मानमिति भावः। तस्य प्रतियोगितया युष्मदाद्यर्थाऽन्वयित्वे तु युष्मदादौ लकारवाच्यकर्तृवाचकत्वरूपसामानाधिकरण्याभावान्मध्यमपुरुषाद्यनुपपत्तिर्युष्मदर्थप्रतियोगिकाभावस्यैकत्वेन द्विवचनाद्यनुपपत्तिश्चेति सूचयितुं 'न त्वं पचसि' 'न युवां पचथ' इत्युक्तम्, एवं चैत्रप्रतियोगिकाभावकर्तृत्वोपगमे पाके तत्कर्तृकत्वबाधः, पाकानुकूलकृत्यभावार्थकत्वे त्वन्मते पुरुषव्यवस्थापकाभावेन कदाचिन्मध्यमोत्तमयोरापत्तिश्चेति बोधयितुं, 'चैत्रो न पचती'त्युक्तम्।

अत एवेति। नञः क्रियाप्रतियोगिकाभावबोधकत्वादेवेत्यर्थः। **तादृशप्रयोग**

❀ काशिका ❀

व्याख्याप्रयोजनं दर्शयति—**उत्तरपदार्थेति**। उत्तरपदार्थान्वयेऽपि असमस्तत्वादिति योजना। असमस्तत्वे हेतुमाह—**समासविकल्पेनेति**। ननु 'घटो नास्ती'त्यत्र घटाभाव एव प्रतीयते न तु क्रियाभावः, न च भूतलाधिकरणघटकर्तृकसत्ताया एवाभावो नञा बोध्यत इति वाच्यम्, अनुभवविरोधात्, यत्र भूतले वर्तमानकालावच्छेदेन घटसंबन्धाभावस्तत्र तदधिकरणकवर्तमानकालिकसत्ताया अप्रसिद्ध्या तदभावबोधनासंभवाच्चेत्याशयेनाशङ्कते—**न चासमस्ते**त्यादिना। समाधत्ते—**न त्वमित्यादिना**। **क्रियाया एव निषेध इति**। अत एव युष्मदादिसामानाधिकरण्येन मध्यमपुरुषाद्युपपत्तिः, अन्यथा 'त्वदभावो' 'मदभावोऽस्ती'तिवत् 'त्वं न पचसी'त्यादावपि युष्मदस्मत्सामानाधिकरण्यविरहान्मध्यमोत्तमयोरनुपपत्तिः, प्रथमस्यापत्तिश्च स्यादिति भावः। चरमे क्रियानिषेधप्रतीतौ युक्तिमाह—**अत एवेति**। जननक्रियाया अभावप्रतीतेरेव। **विद्यमानेऽपि घटे** = घटस्य विद्यमानतादशायामपि। घटस्य विद्यमानत्वे घटाभावबोधनस्याऽशक्यतया तत्र क्रियानिषेधबोधोऽवश्यमभ्युपगन्तव्य इति भावः। यद्यप्य विद्यमानतादशायामपि घटात्यन्ताभावे नि ये जननाश्रयत्वस्य बाधाद् घटाभावबोधनं न संभवति, अतस्तत्रापि क्रियाया एव निषेधबोधोऽभ्युपगन्तव्यः, एवं च विद्यमानत्वोक्तिर्निरर्थिका, तथाप्युत्पादविनाशयोग्यभावाऽभ्युपगमपक्षे घटाभावे जननाश्रयत्वबोधः संभवतीति तस्य विद्यमानत्वानुसरणम्। **तथा चेति**।

त्यत्राप्यस्तित्वाभाव एव बोध्यते, न हि 'घटो न जायते' 'नास्ती'-त्वनयोर्धात्वर्थभेदमन्तरेणास्ति विशेषः, तथाच, 'भूतले न घट' इत्यत्राप्य'स्ती'त्यध्याहार्य्यम्, प्रकारतासम्बन्धेन नञर्थविशेष्यकबोधे

❀ दर्पणः ❀

इति । 'घटो न जायत' इत्याकारक इत्यर्थः। घटस्य विद्यमानतादशायां घट-कर्तृकोत्पत्त्यनुकूलव्यापाराभावाऽबाधात्, त्वन्मते तु घटाऽभावे उत्पत्त्यनुकूलव्यापार-कर्तृत्वाऽभावादुक्तप्रयोगानुपपत्तिरिति भावः। उक्तरीत्या नञः क्रियाप्रतियोगिका-ऽभावबोधकत्वध्रौव्ये, 'घटो' नास्ती'त्यत्र घटाऽभावकर्तृकत्वस्य धात्वर्थेऽबाधेऽपि तद्बोधमनादृत्य घटास्तित्वाभावबोधाभ्युपगम उचितो वक्ष्यमाणकार्यकारणभाव-बलादित्याह—**तथाच घट इति**। तदेवोपपादयति—**न हीत्यादिना**। ननु यत्र न क्रियावाचकसमभिव्याहारो 'भूतले न घट' इत्यादौ—तत्र नञा कथं क्रिया-प्रतियोगिकाऽभावो बोधनीयोऽत आह—**तथाचेति**। **अध्याहार्य्यमिति**। 'अस्तिर्भवन्तीपर'[1] इत्यादिभाष्ये क्रियान्तराभावेऽप्यस्तिक्रियामादाय वाक्यपरिपूर्त्ति-बोधनादिति भावः। **प्रकारतासम्बन्धेनेति**। नञर्थाऽभावनिष्ठविशेष्यतानि-रूपितप्रकारतासम्बन्धेन शाब्दबुद्धित्वाऽवच्छिन्नं प्रति विशेष्यतासम्बन्धेन धातु-जन्योपस्थितेर्हेतुत्वस्य 'न त्वं पचसी'त्याद्यनुरोधेन क्लृप्तत्वादत्राऽपि तद्बोधोप-पत्तयेऽस्त्यध्याहार आवश्यक इति भावः। न न्व 'त्वं पचसी'त्यादाविवात्राऽपि नञः पर्युदासद्योतकत्वाऽभ्युपगमाद् युष्मल्लक्ष्यार्थे-'त्वद्भिन्ने सामानाधिकरण्याऽबा-धान्न पुरुषव्यवस्थाऽनुपपत्तिः, संख्यायास्तत्राबाधान्न द्विवचनाऽनुपपत्तिरपीति

❀ काशिका ❀

'त्वं न पचसी'त्यादावुक्तक्रमेण क्रियानिषेधावश्यकत्वे चेत्यर्थः। **अस्तित्वाभाव एवेति**। घटकर्तृकसत्ताया एवेत्यर्थः। एवेन घटाभावव्यावृत्तिः। ननु पूर्वोक्तस्थले अनुपपत्त्या क्रियानिषेध-प्रतीतिस्वीकारेऽपि 'घटो नास्ती'त्यादौ घटाद्यभावप्रतीतिरेव स्वीक्रियतां, बाधकाभावात्, तथा च तत्रैवोक्तनियमभङ्ग इत्याशङ्क्याह—**न हीति**। तथा च तथाभ्युपगमे वैरूप्यं स्यात्, तच्च न युक्तमिति भावः। यदधिकरणकघटादिकर्तृकवर्तमानसत्ता अप्रसिद्धा तत्राप्यारोपितादिरूपा सास्त्येवेति नोक्तदोष इति भावः।

ननु 'भूतले न घट' इति क्रियावाचकपदरहितवाक्ये घटे भूतलवृत्तित्वाभाव एव बोधनी-यस्तथा च तत्रैव नियमभङ्ग इत्यत आह—**तथा च भूतल इति**। अध्याहारे हेतुमाह—**प्रकारतेति**। प्रकारतासंबन्धेन नञर्थविशेष्यकशाब्दबुद्धित्वावच्छिन्नं प्रति भावनानिष्ठविषयता-

१ 'भवन्ती'ति लटः सञ्ज्ञा, लट्परोऽस्तिरित्यर्थः।

धातुजन्यभावनोपस्थितेर्हेतुत्वस्य क्लृप्तत्वात्, शेषं नञर्थनिर्णये वक्ष्यते ॥ १६ ॥

तथा 'यस्य च भावेन' 'षष्ठी चे'त्युदितं द्वयम् ।
साधुत्वमष्टकस्यास्य' क्रिययैवावधार्य्यताम् ॥ १७ ॥

'यस्य च भावेन भावलक्षण'मित्यत्र भावनार्थकभावशब्देन तद्योगे साधुत्वाख्यानलाभात्, 'षष्ठी चानादर' इति तदग्रिमसूत्रेऽपि चकाराद्भावे-

❀ दर्पणः ❀

तादृशकार्य्यकारणभावस्यैवाऽप्रामाणिकतया कथं तदनुरोधोऽस्त्यध्याहारनियामकः– 'घटो न जायते' इति इत्यादौ प्रसज्ज्यप्रतिषेधाऽर्थकनञ्स्थले तु यथा नाऽनुपपत्तिस्तथा वक्ष्यते, तथाच 'भूतले घटो ने'त्यादौ भूतलवृत्तिघटाऽभाव इति बोधे बाधकाभावोऽत आह—**शेषमिति** । तथाच यदा युष्मदर्थभिन्नकर्तृको न पाकस्तदा 'न त्वं पचसीति प्रयोगाऽनापत्तिः पर्युदासद्योतकतावादिमतेऽतस्तत्र प्रसज्ज्यप्रतिषेधार्थकत्वमेवाऽङ्गीकरणीयमित्युक्तयुक्त्या कार्य्यकारणभावस्यावश्यकतेत्यादि 'शेष'पदार्थः, नैयायिकमतमपि तत्रैव व्यक्तीभविष्यति ॥ १६ ॥

साधुत्वाख्यानलाभादिति । अयम्भावः—'यस्य च भावेन भावलक्षण'मिति सूत्रेण क्रियाज्ञापकक्रियाश्रयवाचकपदात् सप्तमी विधीयते । भावलक्षण—'मित्युपादानाज्ज्ञापकत्वरूपसप्तम्यर्थस्य क्रियायामेवाऽन्वयः, अत एव 'गोषु दुह्यमानासु गत' इत्यादौ दोहनक्रियाऽऽधारकालेन गमनपरिच्छेदकत्वं बुद्ध्यत इति ।

❀ काशिका ❀

संबन्धेन धातुजन्योपस्थितिर्हेतुरिति हेतुहेतुमद्भावः पर्यवसन्नः, नञर्थे विषयतासंबन्धेन तादृशबुद्धेर्जननाद् व्यभिचारस्तद्वारणाय प्रकारतात्वेन विषयताया निवेशः । प्रकारता चाभावत्वावच्छिन्नविषयतानिरूपिता बोध्या, नातो 'घटो नास्ती'ति वाक्यजन्यबोधीयप्रकारताया घटादौ सत्त्वेऽपि व्यभिचारतादवस्थ्यम् । **क्लृप्तत्वादिति** । एतादृशकार्यकारणभावानङ्गीकारे उक्तनियमानिर्वाह इति तस्यावश्यकत्वादित्यर्थः । **शेषम्** = आरोपितत्वं नञ्द्योत्यमित्यादि ॥ १६ ॥

'तथा यस्य च भावेन षष्ठी चे'त्यत्र **'यस्य च भावेने'**त्यनेन तद्घटितं,—**'षष्ठी चे'**त्यनेन च तच्छब्दघटितं सूत्रं लक्ष्यत इत्याशयेन व्याचष्टे—**'यस्य च भावेन भावलक्षणमित्यत्रेति 'षष्ठी चानादरे' इतीति** च । तथा च 'गोषु दुह्यमानासु गत' इत्यत्राद्यसूत्रेण सप्तमी, 'रुदति रुदतो वा प्राव्राजी'दित्यत्र द्वितीयेन षष्ठीसप्तम्यौ च क्रियायोगे एव साधुत्वेनान्वाख्यायेते इति समुदितार्थः । 'गोषु दुह्यमाना'स्वित्यत्र गोपदोत्तरसप्तम्या ज्ञाप्यज्ञापकभावात्मकः

१ अस्य = 'सम्बोधनान्तं कृत्वोऽर्था' इत्यारभ्यैतत्पर्यन्तमुक्तस्येत्यर्थः ।

नेत्यायातीत्यर्थः। **साधुत्वमिति**। तत्स्वरूपं तु वक्ष्यते।

क्रिययैवेति। अयं भावः—"भूवादिसूत्रादिषु प्रायशः क्रिया-शब्देन भावनाव्यपदेशात् तत्र तस्य साङ्केतिकी शक्तिः, फलांशे काचित्कः 'क्रियत' इति यौगिकः प्रयोगः, तथाच संज्ञाशब्दस्यानपेक्ष्य प्रवृत्तत्वेन बलवत्त्वाद्भावनान्वय एव साधुता लभ्यते, अत एव 'संज्ञाशब्दप्राबल्याद्,

ॐ दर्पणः ॐ

आयातीति। समस्तसूत्रमेव तत्रानुवर्तेत इत्यर्थः, तथा चाऽनादरे गम्यमाने यन्निष्ठक्रियायाः क्रियान्तरज्ञापकत्वं तद्वाचकते'ति तदर्थात् तद्विहितयोरपि तयोः क्रियायोग एव साधुत्वं लभ्यत इत्यर्थः। ननूक्तानां क्रियान्वयाभावेऽपि शक्तत्वरूप-साधुत्वं सुलभमत आह—**तत्स्वरूपमिति**। साधुत्वस्वरूपमित्यर्थः। **वक्ष्यत इति**। साधुत्वनिर्वचनाऽवसर इति शेषः। साधुत्वं न शक्तत्वमपशब्दादपि बोधो-दयात्, किन्तु व्याकरणैकव्यञ्जिका[१] पुण्यजनकतावच्छेदकजातिरिति वक्ष्यत इत्यर्थः। प्रकृते च व्याकरणेन क्रियान्वितेष्वेव तद् व्यज्यत इति तदन्यस्याऽसाधुतैवेति भावः। ननु 'क्रिययैवाऽवधार्यता'मिति मूलेन क्रियाऽन्वय एवोक्तानां साधुत्वं लभ्यते इति सत्यमेव, तथापि भाष्ये क्रियापदस्य फलेऽपि प्रयोगात्साक्षात्परम्परया वा क्रियाफलान्वयेनाऽपि तेषां साधुत्वोपपत्तौ नोक्तरीतिर्धातोर्व्यापारवाचकत्वसाधि-केत्याशङ्कयाऽऽशयं प्रकाशयति—**अयम्भाव इति**। **प्रायशः क्रियाशब्देनेति**। तथाच प्रयोगबाहुल्यं रूढिसद्भावे प्रयोजकमिति भावः। **साङ्केतिकीति**। सङ्केता-भिव्यङ्ग्या रूढिरित्यर्थः। तत्र हेतुः—**काचित्क इति**। तत्र नियामकमाह—**यौगिक इति**। 'क्रियते व्यापारेण निष्पाद्यत' इति व्युत्पत्तेरिति भावः। **अनपेक्ष्येति**। प्रकृतिप्रत्ययशक्तिमननुसन्धायेत्यर्थः। **अत एवेति**। संज्ञाशब्द-

ॐ काशिका ॐ

संबन्धोऽर्थः। दुह्यमानानां गवां ज्ञापकत्वं ज्ञाप्यत्वं च गमनक्रियायां शब्दतः प्रतीयते, पर्यवसानं तु तद्गतदोहनक्रियायां, निर्ज्ञातकालक्रियाया एवानिर्ज्ञातकालक्रियायां स्वसहचरितकालावच्छिन्नत्व-ज्ञापकत्वात्। एवमपरत्रापि रुदतीत्यादौ अनादरः पुत्रादिविषयकोऽधिको भासत इति बोध्यम्।

वक्ष्यत इति। 'असाधुरनुमानेने'त्येतद्व्याख्यावसरे 'अनपभ्रष्टतानादि'रित्यादिना वक्ष्यत इत्यर्थः। ननु क्रियाशब्दस्य धात्वर्थमात्रे प्रसिद्धतया फलान्वयेनैवोक्ताष्टकस्य साधुत्वलाभे सति न भावनान्वयनियम इति न तदनुरोधेन 'पाक'इत्यादौ भावनाया वाच्यतावश्यकतेत्याशङ्कां निराकुरुते—**अयं भाव** इत्यादिना। संज्ञाशब्दस्यानपेक्षप्रवृत्तकत्वेन बलवत्त्वे नावमिकाधिकरणं

१ व्याकरणमेकमभिव्यञ्जकं यस्याः सा, तथेत्यर्थः।

रथन्तरमुत्तराग्रन्थपठितऋक्ष्वेव गेयं न तु वेदे तदुत्तरपठ्यमानऋक्ष्वि'ति नवमे निर्णीतम्, किञ्च फलांशोऽपि भावनायां विशेषणं, 'कारकाण्यपि

❀ दर्पणः ❀

स्याऽनपेक्ष्य प्रवृत्तिकत्वेन बलवत्त्वादेवेत्यर्थः। **नवमे इति।** मीमांसानवमाऽध्याये इत्यर्थः, तथाहि रथन्तरं हि 'यद्योन्यां तदुत्तरयोर्गायतीति' श्रूयते, तत्र रथन्तरयोनेः परतो बृहद्योनेः पठितत्वाद्रथन्तरं तस्यां गेयम्? उतोत्तराग्रन्थे 'न त्वा वामन्य' इत्यस्य पठितत्वात् तत्र गेयमिति-संशयेऽविशेषादुभयत्र गेयमिति पूर्वपक्षे-उत्तराग्रन्थे-उत्तराशब्दस्य संज्ञारूपेण प्रसिद्धिर्बृहद्योनौ तु तस्याः पूर्वग्रन्थाऽपेक्षिकोत्तरत्वबला-द्यौगिकी-इति संज्ञाशब्दस्याऽनपेक्ष्य प्रवृत्तिकत्वेन बलवत्त्वादुत्तराशब्दसङ्केतित-'न त्वा वामन्य' इत्याद्यृक्ष्वेव तद्गेयमिति नवमे निर्णीत्, तद्वत्तत्रापीति भावः।

ननु भावनायां क्रियापदस्य साङ्केतिकी शक्तिः, फले तु यौगिकः प्रयोग इत्यत्रैव न दृढतरं मानं, येनोक्ताधिकरणावतारः सम्भाव्येत, प्रायेण तस्य तु यौगिकत्वेनाऽप्यु-पपत्तेरत आह-**किञ्चेति। तथाभूतानीति।** विशेषणानीत्यर्थः, कर्त्राऽऽख्यातस्थले

❀ काशिका ❀

प्रमाणयति—अत एवेति। **निर्णीतमिति।** नवमाध्याये—'यद्योन्यां गायति तदुत्तरयोः' इति वचनस्थोत्तराशब्देन रथन्तरयोन्युत्तरयोरुत्तराग्रन्थपठितयोश्चोत्तरयोर्ग्रहणमुतोत्तराग्रन्थपठितयोरे-वेति संदेहे,—उत्तरशब्दस्य 'प्रशस्ततरमुत्तरं बर्हिषः सादयति' इत्यादौ संबन्धिशब्दत्वदर्शनाद्यैव योनेः परतः पठिता सैवोत्तरा, ततश्च योनिग्रन्थे रथन्तरयोनेः परतो बृहद्योनेः पाठात् तस्यामृचि रथन्तरस्य गानम्, उत्तराग्रन्थे च रथन्तरयोनेः परतो 'न त्वा वामन्यो दिव्यो न पार्थिवः' इत्यस्यामपि विकल्पेनेति प्राप्ते—उत्तराशब्दस्य उत्तराग्रन्थपठितोत्तरास्वेव वैदिकप्रयोगादसंबन्धिकतया रूढोऽयं शब्द इति निश्चयः, ततश्चोत्तराशब्देनात्रोत्तराग्रन्थे पठितयोरेव झटित्युपस्थितिः कृतेति तत्रैव रथन्तरं गेयं न बृहद्योनौ इति सिद्धान्तितम्। एवं च तत्र यथा संबन्धिशब्दस्य तत्तत्संब-न्धिप्रतीतिसापेक्षप्रवृत्तिकृतं दुर्बलत्वं, संज्ञाशब्दस्य निरपेक्षप्रवृत्तिकृतं प्रबलत्वं, तथा प्रकृते,—योगार्थसापेक्षप्रवृत्तिकयौगिकापेक्षया संज्ञाशब्दस्य तदनपेक्षप्रवृत्तिकतया प्रबलत्वम्। विलम्बेनो-पस्थापकत्वशीघ्रोपस्थापकत्वयोर्दौर्बल्यप्राबल्ये प्रयोजके इति पर्यवसानादिति भावः।

ननु फलस्यापि 'कर्मवत् कर्मणा—' इति सूत्रे क्रियाशब्देन व्यवहारात्, साध्यत्वेन प्रतीयमानत्वादस्त्यादौ सत्तादेरेव क्रियात्वोपपादनाच्च तस्यापि सर्वत्र क्रियाशब्देन ग्रहणे बाधक-भाव इत्याशयेनाह—किं च फलांशेति। क्वचित् तथाभूतानि = 'देवदत्तस्तण्डुलं पचती'त्यादौ कारकाणि भावनां प्रति विशेषणतापन्नानीत्यर्थः। कृदन्ते कारकाणां भावनां प्रति विशेष्यत्वात् क्वचिदिति। भावनायां कारकान्वये विशेषातिदेशाध्यायाधिकरणन्यायं साधकतयो-

१ क्वचित् = तिङन्ते-'चैत्रः पचती'त्यादौ। पक्तेत्यादिकृदन्ते तु भावनाऽप्रधानमेव।

क्वचित्तथाभूतानी"ति । 'गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्स्या'दिति न्यायेन 'सर्वे सेवका राजानमिव भावनायामेव परस्परनिरपेक्षाण्य-न्वियन्ति' 'न हि भिक्षुकोऽपि भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिन्न-भिक्षुके' इति न्यायेनाऽपि फलं त्यक्त्वा भावनामेवाऽन्वियन्तीति' 'मीमांसका अपि मन्वते, एवञ्च 'विशेष्यतया कारकादिप्रकारकबोधं प्रति धातुजन्यभावनोपस्थितिर्हेतु'रिति कार्य्यकारणभावस्य क्लृप्तत्वात्, यत्रापि 'पक्ता' 'पाचक' इत्यादौभावना गुणभूता तत्राऽपि[१] क्लृप्तकार्य्य-कारणभावाऽनुरोधात् तस्यामेवाऽन्वय इत्यवसीयते—इत्यादि भूषणे

❀ दर्पणः ❀

दृष्टत्वादिति भावः । **गुणानामिति** । विशेषणानां परार्थत्वादन्योपकारकत्वादत एव समत्वात्समानधर्मत्वात्तेषां परस्परं सम्बन्धो न भवेदिति—न्यायार्थः । तथाच यथा फलस्योपकारकत्वाद् विशेष्यभावनायामन्वयस्तथा कारकाणामपि साक्षात्परम्परया वा तत्रैवान्वयोऽन्यथा कारकत्वस्यैवाऽनुपपत्तेर्न तु फले निराका-ङ्क्षत्वादिति भावः, तदनुसारिलौकिकन्यायमप्युपन्यस्यति—**न हि भिक्षुक** इत्यादि । **मीमांसका अपीति** । उक्तन्यायेन कारकप्रकारकबोधं प्रत्याख्यातजन्य-भावनोपस्थितेर्हेतुतायास्तैः क्लृप्तत्वादिति भावः । 'कारकादी'त्यादिना लडाद्यर्थ-कालपरिग्रहः । **गुणभूतेति** । तृजाद्यर्थकर्तरि विशेषणीभूतेत्यर्थः । एतेन पूर्वोक्तन्या-यस्य तत्राऽसम्भवो दर्शितः । **तस्यामेवेति** । धात्वर्थभावनायामेवेत्यर्थः ।

❀ काशिका ❀

पन्यस्यति—**न हि भिक्षुक** इति । तथा च कारकाणां नित्यपरतन्त्राणां विशेष्याकाङ्क्षायां फलांशस्य तथान्वययोग्यत्वेऽपि विशेष्याकाङ्क्षायां तस्यापि न हि भिक्षुक इति न्यायेन भावनाया-मेवान्वयमङ्गीकुर्वन्ति न्यायविदः, तत्तुल्यतया कारकाणामपि भावनायामेवान्वय उचित इति तात्पर्यार्थः । **एवं च** = भावनायामेव कारकान्वयनियमे च । **कारकादी**त्यादिपदेन धात्वर्थ-फलांशपरिग्रहः । **तस्यामेव** = विशेषणीभूतभावनायामेव । **एवेन**—फलांशव्यवच्छेदः ।

ननु विशेषणत्वाविशेषात् फले एवौदनस्य पक्तेत्यादौ कारकान्वयोऽस्तु, एवं च तदनुरोधात् फलोपस्थितेरेव कारकान्वयबोधं प्रति हेतुतायाः क्लृप्तत्वादोदनस्य पाक इत्यादावपि फलेऽन्वयो नानुपपन्न इति चेन्न, कारकीभूतधात्वर्थस्य भावनायामनन्वयापत्तेः, न हि स्वयमेव स्वकारकं, फलांशस्य भावनां प्रति करणत्वेनान्वये तत्र कारकान्वये वाजपेयाधिकरणभङ्गापत्त्या करणान्त-

१ विशेष्यतासम्बन्धेन कारकप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति भावनात्वसमानाधिकरण-विषयतासम्बन्धेनोपस्थितिः कारणमिति कार्य कारण भावस्य क्लृप्तत्वात् ।

प्रपञ्चितम् ।

केचित्तु 'भूतले घटः', 'देवदत्तो घट'मित्यादावन्वयबोधाकाङ्क्षा-निवृत्त्योरदर्शनान्न तद्व्यतिरेकेण साधुत्वलाभ इत्याहुः ॥ १७ ॥

स्वयमुपपत्तिमाह—

❀ दर्पणः ❀

प्रपञ्चितमिति । फलांशे तु न कारकाणामन्वयः, मीमांसकमतेऽपि तस्या-ऽव्युत्पन्नत्वादन्यथा कारकान्वितस्य कारकत्वाऽसम्भवेन [1]यागरूपफलस्य करणतया क्रियायामनन्वयापत्तेरिति हि तत्रोक्तम् । अदर्शनादिति । 'सर्वं हि वाक्यं क्रियया परिसमाप्यते' इति न्यायेन तत्राऽस्तिजानात्यादिक्रियामन्तरेणाऽन्वयबोधनिराकाङ्क्ष-त्वयोरदर्शनादित्यर्थः । तत्र 'चैत्रः सुन्दर' इति क्रियासाकाङ्क्षवाक्यस्याऽसाधुतापत्तिः, फलांशान्वयलाभेनैवोपपत्तौ भावनावाचकत्वालाभश्चेत्यस्वरस [2]"आहुरित्यनेन सूच्यते ॥ १७ ॥

उपपत्तिमिति । उक्ताऽष्टकस्य भावनायामन्वये साधकोपमासरूपां तामुक्त्वा-

❀ काशिका ❀

रोपसंग्रहेण प्रयोगविधेरबोधकतापत्तेश्चेत्यादिकं बृहद्भूषणेऽनुसंधेयमित्याशयेनाह—भूषणे प्रपञ्चितमिति । तस्मात् पाक इत्यादावोदनस्येत्यादिकारकान्वयसिद्धये भावनाया वाच्यत्वमावश्यक-मिति सिद्धम् ।

प्रकारान्तरेण कारकाणां भावनान्वयनियमं साधयतामन्येषां वैयाकरणानां मतमाह—केचित्त्विति । अन्वयबोधाकाङ्क्षानिवृत्त्योरिति । अन्वयबोधस्याकाङ्क्षानिवृत्तेश्चेत्यर्थः । 'भूतले घट' इत्यत्र भूतलनिरूपितमाधेयत्वमेकत्वविशिष्टो घट इत्यन्वयबोधस्य परमते, स्वमते च भूतलाभिन्नमधिकरणमित्याद्यन्वयबोधस्य, देवदत्तो घटमित्यत्र घटवृत्तिकर्मत्वमेकत्वविशिष्टो देवदत्त इत्यन्वयबोधस्य परमते, स्वमते च घटाभिन्नं कर्मत्याद्यन्वयबोधस्योदयेऽपि वाक्यघटकयावत्पदार्थानां परस्परमन्वयबोधानुदय इति बोध्यम् । न च क्रियारूपार्थाध्याहारेणैव शाब्दबोधादेः संभवादलं तद्वाचकपदाध्याहारेणेति वाच्यम्, पदजन्यपदार्थोपस्थितेरेव शाब्दोपयोगित्वात् पदानां संभूयान्वयबोधकत्वव्युत्पत्तेश्च । इत्याहुरित्यस्वरससूचनम्, तद्बीजं तु फलान्वयनियमेनाप्युपपत्तौ भावनान्वयनियमालाभ इति ॥ १७॥

स्वयमुपपत्तिमिति । 'भूतले न घट' इत्यतो भूतलवृत्तित्वाभाववान् घट इति बोधोदयान्न

१ 'सोमेन यजेते'त्यादौ । २ साधुत्वस्य-व्याकरणव्यङ्ग्यजातिविशेषरूपस्य—क्रियावाचका-स्त्यादिपदसाकाङ्क्षेऽपि नीलो घट' इत्यादौ—स्वीकारात्, न तदसाधुत्वं वक्तुं शक्यम्, अतएव 'गामित्युक्ते कर्म'निर्दिष्टं कर्तृक्रिये चानिर्दिष्टे इति भाष्ये सङ्गच्छत इत्येवमरुचिबीजमूह्यम् ।

यदि पक्षेऽपि वत्यर्थः, कारकञ्च नञादिषु ।
अन्वेति ! त्यज्यतां तर्हि चतुर्थ्याः स्पृहिकल्पना ॥ १८ ॥

'पर्वतो वह्निमान् धूमान्महानसवत्', 'भूतले न घटः,। 'भूतले घट' आदिपदात्, एवमादिष्वनुशासनविरोधेऽपि यदि साधुत्वमन्वयश्चाभ्युपेयते तर्हि चतुर्थ्या स्पृहिकल्पनाऽपि त्यज्यतामित्यर्थः, अनुशासनानुरोधतौल्येऽर्द्धजरतीयमयुक्तमिति भावः ॥ १८ ॥

❀ दर्पणः ❀

ऽनन्वये बाधकोपमासरूपां तामाहेत्यर्थः, ननु सम्बोधनाऽन्तादीनां क्रियान्वय एव साधुत्वे, 'पर्वतो वह्निमान् महानसव'दित्यादौ वत्यर्थसादृश्यस्य कथं पर्वतेऽन्वयः ? कथं वा, 'भूतले न घट' इत्यत्र सप्तम्यर्थभूतलाधेयत्वस्य तथाऽभावे ? इत्यत आह मूले—**यदि पक्षेऽपीति** । पक्षे = प्रतिज्ञावाक्यजन्यबोधविशेष्ये सन्दिग्धसाध्यके धर्मिणि, पर्वतादाविति यावत् । कारकम् = अधिकरणादि, नञादिषु = नञर्थाभावे, इतरनामार्थे चेत्यर्थः । तमेव विशदयति, सारे—**पर्वतो वह्निमानित्यादिना** । **आदिपदादिति** । नञादिष्वित्यादिपदादित्यर्थः। तदेव विवृणोति-**एवमादिष्विति** । 'भूतले घट' इत्यादावित्यर्थः । **अन्वयश्चेति** । महानससदृशः पर्वतो, 'भूतलवृत्तित्वाऽभाववान् घटो' 'भूतलवृत्तिर्घटाऽभाव' इति वा बोधश्चेत्यर्थः । 'तेन तुल्य'मित्यनुशासनेन क्रियागतसादृश्यबोधन एव वतेः, 'कारक' इत्यधिकृत्य-'सप्तम्यधिकरणे चे'त्यनुशासनेन क्रियान्वय एव सप्तम्याश्च साधुत्वबोधनादुक्तम्-यदीति । **चतुर्थ्या इति** । 'पुष्पेभ्य' इत्यत्र 'स्पृहेरीप्सित' इति विहितचतुर्थ्याः स्पृहयत्युपात्तार्थे एव स्वार्थाऽन्वयबोधकत्वं, न पदान्तरोपात्ते, अध्याहृते वा तदर्थेऽनुशासनविरोधादिति सिद्धान्तस्त्यज्यतामित्यर्थः । **अर्द्धजरतीयमिति** । इदमर्थे गहादित्वाच्छः । 'क्वचिदनुशासनाऽनुरोधः, क्वचिन्ने'त्यर्द्धजरतीसदृशमित्यर्थः, तथाच

❀ काशिका ❀

क्रियापदापेक्षा, एवं 'पर्वतो वह्निमान् भवितुमर्हति धूमान्महानसवत्' इति वेदान्त्युक्तन्यायान्तर्गत-प्रतिज्ञावाक्ये क्रियापदप्रयोगो वृथेति क्वचित् तर्कग्रन्थे स्थितं—तद्दूषयन्नुपपत्तिमाहेत्यर्थः ।

नञादिष्वित्यादिपदग्राह्यमाह—**भूतले घट इत्यादिपदादिति** । **चतुर्थ्याः स्पृहीति** । 'पुष्पेभ्य' इति चतुर्थ्यन्तमात्रप्रयोगे 'स्पृहयती'ति शब्दाध्याहार एव चतुर्थ्याः साधुत्वार्थमनुस्रियते, न तु तत्समानार्थकधात्वन्तरघटितपदाध्याहारो, नाप्यर्थाध्याहारो—नैयायिकैस्तत् त्यज्यतामित्यर्थः ।

अर्धजरतीयमिति। जरत्या अर्धमित्यर्धजरती तत्सदृशमर्धजरतीयम्। 'समासाच्च तद्विषयात्' इति छः । यथा जरत्या अर्धं कामयतेऽर्धंन तथेत्यर्थः ॥ १८ ॥

एवं कर्त्रादौ विहितानामिन्यादीनां क्रिययैवान्वय इत्याह—

अविग्रहा गतादिस्था यथा ग्रामादिकर्म्मभिः।
क्रिया सम्बध्यते तद्वत् कृतपूर्व्यादिषु स्थिता ॥ १९ ॥

न विविच्य ग्रहो=ग्रहणं यस्याः सा–अविग्रहा, =गुणीभूतेति यावत्। यथा च—'ग्रामं गत' इत्यत्र क्तप्रत्ययाऽर्थं गुणीभूताऽपि क्रिया-ग्रामादिकर्म्मभिः सम्बध्यते, तथा 'कृतपूर्वी कट'मित्यत्रापि गुणभूता इन्यादिभिरित्यर्थः।

❀ दर्पणः ❀

स्वीयसिद्धान्तप्रच्युतिरूपबाधकभियाऽत्राऽपि पर्वतो वह्निमान् भवितुमर्हतीत्येव प्रतिज्ञाऽङ्गीकरणीया, न तु क्रियावाचकपदशून्या सेति नोक्तनियमे व्यभिचारः, 'भूतले न घट' इत्यादौ यद् वक्तव्यं तत्तूक्तं, वक्ष्यते वाऽधिकमिति भावः ॥ १८ ॥

'कृतपूर्वी'त्यत्र भावविहितक्तेन सिद्धाऽवस्थापन्नो भाव उच्यते, तद्विशेषणं च प्रकृत्यर्थक्रियेत्याशयेन मूलमवतारयति—**एवमित्यादिना**। 'कर्त्रादा'वित्यादिना भावपरिग्रहः। 'इन्यादीना'मित्यादिना–क्त्वातुमुनादीनाम्। **सम्बध्यते इति**। कारकप्रकारकबोधं प्रति विशेष्यतया धातुजन्यभावनोपस्थितेर्हेतुतायाः पूर्वमुक्तत्वादिति भावः। **कृतपूर्वी कटमिति**। नन्वत्र कर्मणि क्ते कटशब्दादनभिहिताऽधिकारीयद्वितीयाऽनुपपत्तिः, भावे क्तस्तु सकर्मकाद्गगनकुसुमायमान एव, 'तयोरेवे'ति नियमात्, अतएव नपुंसके भावेऽपि न सः, तथाच कथमुक्तदार्ष्टान्तिकवाक्योपपत्तिरिति चेदत्राहुः–कर्मणो विशेषरूपेण प्रागविवक्षयाऽकर्मकत्वाद्भावे प्रत्यये तदन्तस्य पूर्वशब्देन समासे 'सपूर्वाच्चे'तीनिः, पश्चात्तु कर्मणो विशेषरूपस्य विवक्षया तत्र द्वितीयेति। इदं च 'कर्त्तृकर्मणोः कृती'ति भाष्ये स्पष्टम्। ईदृशविवक्षाऽविवक्षे च तद्भाष्यप्रामाण्यात् कृतपूर्वीत्यादिविषये एव, नाऽन्यविषय इति बोध्यम्। **इन्यादिभिरिति**। तदर्थकर्त्रादिभिरित्यर्थः। वस्तुतस्तु दार्ष्टान्तिके स्ववाचकप्रकृतिकप्रत्ययार्थेऽन्यस्मिन् वा गुणीभूतकटादिकर्मभावादिभिरिति व्याख्येयम्, नातः कृतपूर्वीति प्रयोगघटकक्तस्य धात्वर्थाऽनुवादकत्वेऽपि क्षतिः। पूर्वकालिकक्रियाकर्त्तेति ततो बोधेन तादृशक्रियाया इन्यर्थकर्त्तरि गुणत्वात्, नाप्ययं भावाऽधिकारीयः, स्वातन्त्र्येणाऽप्रयोगात्,

❀ काशिका ❀

विविच्य = पृथग्भूय। इतराविशेषणत्वेनेति यावत्। इत्यत्रापि। गुणभूतेति—क्तप्रत्ययः कर्मसामान्ये इति पक्षे। 'तत्र भाव' इति पक्षेऽपि तत्रैव विशेषणतामापन्नेत्यर्थः। कथं तत्रान्वय

नच वृत्तिमात्रे समुदायशक्तेर्वक्ष्यमाणत्वात् तत्रान्तर्गता भावना पदार्थैकदेश इति कथं तत्रान्वय इति वाच्यं, नित्यसापेक्षेष्वेकदेशेऽपि 'देवदत्तस्य गुरुकुलं,' 'चैत्रस्य नप्त्रे''त्यादाविवान्वयाभ्युपगमात्,—एवं

❁ दर्पणः ❁

अत एव 'भोक्तुं गतमेतेने'त्यादिप्रयोगोपपत्तिः, भावाऽनधिकारीयभावविहितप्रत्ययस्य धात्वर्थानुवादकत्वात्प्रकृत्यर्थक्रियाया अगुणत्वात्, एवं'मव्ययकृतो भाव' इत्युक्ते 'पाक' इत्यादिप्रयोगस्थघञर्थात्तुमुनाद्यर्थे वैलक्षण्यानुभवात्, तुमुनादीनामपि साध्यमात्रस्वभावभावार्थकत्वमित्यर्थकत्वमित्यन्यत्र विस्तरः। **वृत्तिमात्रे इति।** 'मात्र'पदं कृत्स्नाऽर्थकम्। **वक्ष्यमाणत्वादिति।** 'समासे खलु भिन्नैवे'-त्यनेनेत्यादिः। तत्र समासपदस्य वृत्तिसामान्यपरत्वेन व्याख्यास्यमानत्वादिति भावः।

कथमिति। गत इत्यादौ कृद्वृत्तिसत्त्वेन गमनकर्तृरूपगतपदार्थैकदेशभावनायां कर्म्मान्वयासम्भवाद् दृष्टान्तासिद्धिरिति भावः। नित्यसापेक्षस्थले हि पक्षद्वयं—चैत्रस्य गुरुकुल'मित्यत्र विशेषणस्य चैत्रादेर्गुर्वादिद्वारकसम्बन्धेन कुलादिरूपविशेष्य एवान्वय इति तत्रैक पक्षः, स चोक्तो हरिणा—

'समुदायेन सम्बन्धो येषां गुरुकुलादिना।
संस्पृश्यावयवाँस्ते तु युज्यन्ते तद्वता सह' इति।

उक्तस्थले समुदायनिरूपितसम्बन्धे षष्ठी, अवयवद्वारकश्च समुदायेन सम्बन्ध इति सामर्थ्याद् अवयवमपि विशेषणं स्पृशतीति तदर्थः। अपरस्तु गुर्वादिनिरूपितसम्बन्धे एव 'देवदत्तस्येति षष्ठी तत्रैव तदन्वयः। उक्तञ्च—

'सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते।
वाक्यवत् सा व्यपेक्षा हि वृत्तावपि न हीयते'इति।

नित्यमपि साऽपेक्षपदाऽर्थोऽन्वयी, हि यतो देवदत्तस्य गुरोः कुलमित्यादिव्यस्ते या व्यपेक्षा सा समासेऽपि न हीयत' इति कारिकार्थः। 'पदार्थः पदार्थेनाऽन्वेती'ति व्युत्पत्तिस्तु नित्यसापेक्षाऽतिरिक्तविषयेति तद्भावः। तत्रान्तिमपक्षमभिप्रेत्य समाधत्ते—**नित्यसापेक्षेष्विति।** तथाच गुरुत्वादेरन्यनिरूप्यत्वेन

❁ काशिका ❁

इतीति। पदार्थः पदार्थेनैवेति व्युत्पत्तेस्तत्रान्वयस्यासंभवादिति भावः। अन्वयाभ्युपगमादिति। इदं च समर्थसूत्रे भाष्ये स्पष्टम्। हरिरप्याह—

१ नप्तृत्वस्य स्वजन्यजन्यत्वरूपतया तदेकदेशभूते जन्यत्वे निरूपितत्वरूपषष्ठ्यर्थस्यान्वय आवश्यकः, चैत्रनिरूपितजन्यत्ववच्छरीरजन्य इत्यर्थस्य तत्राभ्युपेयत्वादिति भावः।

'भोक्तुं पाकः,' 'भुक्त्वा पाक' इत्यत्रापि द्रष्टव्यम् ॥ १९ ॥

❀ दर्पणः ❀

तदुपस्थितौ नियमेन जायमानाया निरूपकाकाङ्क्षाया निवृत्तये देवदत्ताद्यन्वयवत् प्रकृतेऽपि किं साधकं ? गमनरूपसाध्यमिति साधनाकाङ्क्षानिवृत्तये ग्रामादिकर्माऽन्वयस्याऽऽवश्यकत्वान्न दृष्टान्तासङ्गतिरिति भावः। आदिना,—'शरैः शातितपत्र' इत्यादेः सङ्ग्रहः। अवतरणिकास्थादिपदग्राह्यं स्पष्टयति—**एवं भोक्तुमिति**। अत्राऽप्यादिपदग्राह्यम्—**भुक्त्वा पाक इति**। घञर्थभावगुणभूतायां पच्यर्थक्रियायां तुमुनन्तार्थक्रियान्वय इति बोध्यमित्यर्थः।

अत्र नव्याः—तुमुन्विधायके, 'क्रियार्थायां क्रियाया'मित्युक्त्या प्रत्यासत्त्या क्रिययोरेकजातीयत्वलाभेन स्ववाचकप्रकृतिकप्रत्ययार्थं प्रत्यगुणीभूतायाः साध्यमात्रस्वभावाया एव 'क्रियाया'मित्यनेन ग्रहणाद्भोक्तुं गतं, 'भोक्तुं पाक' इत्यसाध्वेव, ध्वनितं चेदमुपपदमति'ङिति सूत्रभाष्ये। यत्र तु क्रियामात्रार्थकस्य ग्रहणं तत्र क्रियामात्रविशेषणादपीति गतपाकादियोगेऽपि सुचूक्त्वादीत्याहुः। तेषामयमाशयः, घञाद्यन्तस्थले प्रकृतिप्रत्ययाभ्यां विशेष्यविशेषणभावापन्नसत्त्वाऽसत्त्वस्वभावक्रियाद्वयमुपस्थाप्यते, तत्र प्रत्ययार्थक्रियायाः प्राधान्यम्, एवञ्च धातूपस्थाप्यक्रियायाः

❀ काशिका ❀

'संबन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते।
वाक्यवत् सा व्यपेक्षा हि वृत्तावपि न हीयते॥' इति

समासे तद्घटकपूर्वपदे वा प्राचीनतार्किकमते शक्तेर्लक्षणायाश्चाभावेन गुरुर्न पदार्थैकदेश इति स्थलान्तरमनुसरति—**चैत्रस्य नप्तेति**। जन्यशरीरजन्यशरीरं नप्तृपदार्थः। तदेकदेशजन्यत्वे चैत्रनिरूपितत्वादिरूपषष्ठ्यन्तार्थान्वयः। न च षष्ठ्यर्थसंबन्धस्य विशेष्ये एवान्वयोऽस्तु किमेकदेशेऽन्वयस्वीकारेणेति वाच्यम्, चैत्रस्य पुत्रेऽपि तथाविधप्रयोगापत्तेः, तस्यापि पितामहजन्यजन्यत्वात्, चैत्रनिरूपितजन्यत्वात्मकसंबन्धाश्रयत्वाच्च, न च प्रयोज्यत्वं परम्पराजन्यत्वमेव संबन्धस्तत्र षष्ठ्यर्थ इति चैत्रपुत्रे न तादृशप्रयोगापत्तिरिति वाच्यम्, चतुर्थादिपुरुषेऽपि तथाविधप्रयोगापत्तेरिति भावः। ननु प्रयोज्यत्वविशेष एव संबन्धस्तत्र षष्ठ्यर्थ इत्यभ्युपगमान्न प्रयोगातिप्रसङ्ग इत्यत आह—**इत्यादावियेति**। आदिना 'घटादन्यः' 'घटात् पृथगि'त्यादिपरिग्रहः। अन्यपदार्थैकदेशे भेदे पञ्चम्यन्तार्थघटप्रतियोगित्वादेः, पृथक्पदार्थैकदेशे पृथक्त्वे पञ्चम्यन्तार्थघटावधित्वादेरन्वय इष्ट इति भावः। यद्यपि सर्वत्रैकदेशघटितपरम्परासंबन्धेनान्वय इति पक्षान्तरमपि समर्थसूत्रभाष्ये उक्तं, हरिरप्याह—

'समुदायेन संबन्धो येषां गुरुकुलादिना।
संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह॥' इति

अतिप्रसङ्गमाशङ्कय समाधत्ते—

कृत्वोऽर्थाः क्त्वातुमुन्वत्स्युरिति चेत्सन्ति हि क्वचित् ।
अतिप्रसङ्गो नोद्भाव्योऽभिधानस्य समाश्रयात् ॥ २० ॥

'भोक्तुं पाकः' 'भुक्त्वा पाक' इत्यादौ—'तुमुन्ण्वुलौ क्रियायां

ॐ दर्पणः ॐ

साध्यमात्रस्वभावत्वेऽपि तस्या घञर्थं प्रति गुणत्वान्न तत्र–तुमुनादीति, तत्रेदं चिन्त्यम्, भावाऽनधिकारीयधात्वर्थाऽनुवादकप्रत्ययान्तयोगे तुमुनो दुर्वारत्वात्, किञ्च—सुज्विधायकेऽप्युक्तविशेषणविशिष्टायास्तस्या ग्रहणमावश्यकं, तत्तद्विशेष-भूतक्रियायाः साध्यमात्रस्वभावत्वेन तज्जन्मगणने 'द्वौ पाका'वित्यत्र सुजापत्तेरशक्य-वारणत्वात्, न च तत्रेष्टापत्तिः, क्रियापदोपादानवैयर्थ्यादभ्यावृत्तिपदसामर्थ्येनैव क्रियाया लाभादिति वक्ष्यमाणत्वात्, किञ्च 'साध्यत्वेन क्रिया तत्रे'ति हरिपद्यव्या-ख्यावसरे एकस्यैव सम्बन्धिभेदादाचार्यत्वमातुलत्वादिवदेकस्या एव क्रियायाः प्रकृतिप्रत्ययरूपवाचकसम्बन्धिभेदादुपस्थितिरिति स्वोक्तिविरोधः क्रियाद्वयावोधा-ङ्गीकारे इति ॥

अतिप्रसङ्गमिति । गुणभूतक्रियामादाय कृत्वोर्थापत्तिरूपमित्यर्थः । 'तुमुन्ना-दीत्यादिना—'कृष्णं दर्शको याती'त्यत्र ण्वुलः सङ्ग्रहः । 'क्रिययो'रित्यस्योद्दे-

ॐ काशिका ॐ

तथाप्युक्तस्थले एकदेशे एवाकाङ्क्षासत्त्वादनुभवानुरोधाच्च प्रथमपक्ष एवात्रोररीकृतः । अत एव देवदत्तस्य गुरुकुलमित्यादिवाक्यजन्यशाब्दबोधानन्तरं गुरुर्देवदत्तीयो न वा, जन्यत्वं चैत्रीयं न वेत्यादिसंशयानुत्पत्तिश्चाञ्जस्येन संगच्छते । विशेष्ये एवैकदेशघटितपरम्परासंबन्धे-नान्वय इति पक्षे तु—'भावनायामेवान्वय' इत्यस्य भावनायामेव साक्षात् संबन्ध इत्यर्थः । स च विशेष्यभूतभावनायां संबन्धघटितायां वा, एवं च तादृशनियमेन भावनाघटितसंबन्धं विनान्य-त्रानन्वय एव व्यावर्त्यत इति बोध्यम् । उक्तमर्थमन्यत्राप्यतिदिशति—एवमिति । भोक्तुं पाक इति । 'तुमुन्ण्वुलौ—' इति सूत्रेण विहितस्य तुमुनः क्रियायोगे एव विधानादसत्त्व-भूतधातूपस्थापितक्रियायामन्वयात् साधुत्वं बोध्यमित्यर्थः । एवं 'भुक्त्वा पाक' इत्यत्रापि क्त्वा-प्रत्ययस्यापीति भावः । भाष्यप्रदीपोद्द्योतकृतस्तु—'उपपदमतिङ्' 'गतिकारकोपपदात्—' इति सूत्रभाष्याद् भोक्तुं पाक इत्यादेरसाधुत्वं लभ्यते तथा हि 'उपपदम्—' इति भाष्ये हि तत्रातिङ्ग्रहणस्य 'कारको व्रजती'त्यादिके प्रत्युदाहरणे सुप्सुपेति वर्तत इत्युक्त्वा खण्डिते तिङित्यनेन तिङन्तार्थो लक्षणया गृह्यते, तथा च प्रधानभूततदर्थक्रियावाचकशब्दस्य समासप्रतिषेधोऽतिङि-त्यनेन तिङन्तार्थो लक्षणया गृह्यते तथा च प्रधानभूततदर्थक्रियावाचकशब्दस्य समासप्रतिषेधोऽ-

❀ काशिका ❀

तिङित्यनेन क्रियते। एवं च 'सुप्सुपे'त्यस्यानुवृत्तावपि 'कारको गत' इत्यातद्व्यावर्त्यं भविष्यतीति तात्पर्यकम्—'अतिङिति तदर्थप्रतिषेधः' इत्युक्तम्, तदन्तरं चो'पपदमक्रिये'ति स्पष्टप्रतिपत्तये 'वक्तव्यम्' इत्यक्तं, तस्याप्युक्त एवार्थः। 'अथ 'अक्रिया' इत्यस्य किं प्रत्युदाहरणम्' इति प्रश्नोत्तरं प्रत्युदाहरणे प्रदर्शिते 'नैतत् क्रियावाचि' इति तत्खण्डनं कृतं, तस्यायमाशयः,–अत्र 'तमुनूण्वुलौ इति सूत्रे ण्वुलेव न भवति, तत्र 'क्रियार्थायाम् इति स्त्रीलिङ्गनिर्देशेन तत्फलक्रियाया एव लाभसंभवे क्रियाग्रहणसामर्थ्यात् प्रत्यासत्त्या च क्रिययोः सजातीयत्वलाभे प्रत्ययार्थविशेषणतानाश्रयसाध्यतामात्रापन्नक्रियावाचकपदे एव तुमुनादिविधानात्, अत एव सिद्धान्ते तत्र न समासापत्तिः। किं च क्रियावाचकत्वाभावात् समासप्रतिषेधो न, तुमुनूण्वुलौ तु भवत इत्यस्य वैषम्यस्यानुचितत्वं च। न च गतशब्दस्यानुपपदत्वान्न समासः, तस्य प्राधान्येन क्रियावाचकत्वाभावात्, धातोस्तु कृदर्थसंसृष्टार्थकतया निष्कृष्य पदार्थान्तरेणैकार्थीभावासंभवान्न स इति वाच्यं—'येन विधिस्तदन्तस्य' 'अनुपसर्जनात्' 'समर्थः पदविधिः' इति सूत्रभाष्यविरोधात्, तत्र[1] हि—निष्कृष्यैकार्थीभावविरहेऽपि तद्धितसमासवृत्तेरभ्युपगमात्, तथा 'येन विधिः—' इति सूत्रभाष्ये—परमगार्ग्यस्यापत्यमित्यर्थे गार्ग्यशब्दात् प्रत्ययग्रहणपरिभाषया यञन्तत्वप्रयुक्तो 'यञिञोश्च' इति फगित्युक्तम्।

'अनुपसर्जनात्' इत्यत्रैतदधिकाराभावे तदन्तविध्यभावेन कुम्भकारैकदेशकारशब्दस्यैवाणन्ततया तत एव ङीपि अनुपसर्जनस्त्रीप्रत्यये तदादिनियमप्रतिषेधेऽपि कदाचित्कारीशब्दाद् ढक् स्यादित्युक्तम्[2]।

'गतिकारकोपपदात्—' इत्यत्र भाष्ये तत्र सूत्रे कृद्ग्रहणाभावे तिङन्तेन समासाभावाद्यक्रियायुक्ता इत्यनेन निष्कौशाम्ब्यादेर्वारणाद्, गत्यादिभ्यः परस्य क्रियावाचककृदन्तस्यैवोत्तरपदस्य लाभसंभवे कृद्ग्रहणं व्यर्थमित्याशङ्कायां—यक्रियेत्यस्य प्रभवनमित्यत्रैव स्यात्, क्रियायाः प्राधान्यात्, न तु 'प्रणायकः' 'प्रणी'रित्यादौ क्रियाविशेषणबोधजनकेऽतः कृद्ग्रहणं कृदन्तमात्रसंग्रहार्थमित्युक्तम्। तदुपादानसामर्थ्याद्विशेषणीभूतक्रियकेऽपि प्रवृत्तिरिति भावः। क्रियावाचकशब्दग्रहणे प्रधानीभूतसाध्यमात्रावस्थक्रियाग्रहणं कृद्ग्रहणं ज्ञापयति, क्रियारूपार्थग्रहणे तु अतादृश्या अपि तस्या ग्रहणमतः कारकविभक्तिकृत्वसुजादयः सिद्धावस्थापन्नगुणीभूतक्रियायामपि भवन्ति, नन्वेवं प्रपचतितरामित्यादावुत्तरपदप्रकृतिस्वरानापत्तिः, कृद्ग्रहणासत्त्वे तु साध्यावस्थापन्नक्रियामात्रबोधकोत्तरपदस्यासंभवादधिकार्थे प्रणायकादाविवात्रापि स्वरप्रवृत्तिर्निष्प्रत्यूहैव, प्रभवनमित्यत्रापि न साध्यावस्थैव क्रिया प्रतीयते। तदुक्तं भाष्ये–'यदि कृद्ग्रहणं क्रियते आमन्ते स्वरो न प्राप्नोति, इत्यादीति चेन्न। 'तिङि चोदात्तवती'ति सूत्रस्थतिङ्ग्रहणप्रत्याख्यानादव्ययपूर्वपदप्रकृतिस्वरं परत्वाद्बाधित्वा 'प्रे'त्यस्य निघातप्रवृत्तौ—नार्थस्तत्रोत्तरपदप्रकृतिस्वर-

१ तत्र = समर्थसूत्रे भाष्ये, २ 'भाष्ये' इति शेषः।

क्रियार्थायां' 'समानकर्त्तृकयोः पूर्वकाले' इति क्रियावाचकोपपदे क्रिययोः पूर्वोत्तरकाले विधीयमाना अपि तुमुन्नादयो गुणभूतां तामादाय यथा जायन्ते, तथा कृत्वोऽर्थो अपि स्युः, 'एकः पाक' इत्यत्र 'एकस्य सकृच्च, 'द्वौ पाकौ' 'त्रयश्चत्वार' इत्यत्र—'द्वित्रिचतुर्भ्यः सुच्', 'पञ्चे'त्यत्र कृत्वसुच् स्यात्, तथाच 'सकृत् पाकः' 'द्विस्त्रिश्चतुः पाक' इत्याद्यापत्तिरिति चेदिष्टापत्तिः, 'द्विर्वचन'मित्यादिदर्शनात्, अतिप्रसङ्गस्त्वनभिधानान्नेत्याह—**अतीति**। न हि 'वचिरन्तिपरः प्रयुज्यते' इत्याद्यभियुक्तोक्तरीत्या समाधेयमिति भावः।

केचित्तु 'क्रियाभ्यावृत्तिगणन' इत्यत्र क्रियाग्रहणं व्यर्थं, तस्या एवाभ्यावृत्तिसम्भवेन सामर्थ्यात्तल्लाभात्, तथाच साध्यमात्रस्वभावक्रिया-

❀ दर्पणः ❀

श्यत्वरूपे तादर्थ्ये' इति शेषः। **विधीयमाना**—इत्यस्य 'द्योतकतये'त्यादिः। 'द्विर्वचन'मित्यादीत्यादिना—द्विःप्रयोगपरिग्रहः[1], तत्र ल्युड्घञर्थगुणीभूतक्रियामादाय सुचो दर्शनादिति भावः। **तस्या एवेति**। क्रियाया एवेत्यर्थः। एवकारेण—द्रव्यगुणव्यवच्छेदः, तयोः सकृदेवोत्पत्तेः, क्रियायास्तु नैकस्या अपि, निवृत्तभेदाया धातुवाच्यत्वोपगमेन तत्सम्भवादिति भावः। **साध्यमात्रेति**। यद्यपि धातूपस्थाप्यायां तत्त्वमक्षतमुक्तयुक्तेस्तथाऽपि 'साध्यमात्रस्वभाव'पदस्योक्त-

❀ काशिका ❀

प्रवृत्त्या, तस्मात् कृद्ग्रहणं कर्तव्यम्' इत्यनन्तरं 'यदि कृद्ग्रहणं क्रियते आमन्ते स्वरो न प्राप्नोति' इत्यादिः सर्वोऽपि ग्रन्थः शङ्कान्त एव, समाधिस्त्वयमेव निगूढः। एवं च भोक्तुं पाक इत्याद्यप्यनिष्टमेवेति **प्राहुः**। **पूर्वोत्तरकाले** इति। क्रियार्थक्रियावाचके उपपदे, अर्थात् फलीभूतक्रियावाचकधातोस्तुमुन्ण्वुलौ विधीयेते, फलीभूता च क्रिया उत्तरकालवृत्तिरेवेति भावः।

द्विर्वचनमित्यादीति। आदिपदाद् 'द्विरयविधिर्द्विरावृत्तिर्द्विष्प्रयोग' इत्यादेः परिग्रहः। **अतिप्रसङ्गः**=सकृत्पाकः, द्विःपाकावित्यादिप्रयोगातिप्रसङ्गः। **अनभिधानादिति**। तादृशप्रयोगात् क्रियाजन्मगणनाप्रतीतेरित्यर्थः। तदुक्तं भाष्ये—'द्वौ पाकावित्यत्र कस्मान्न भवति, नैतत् क्रियागणनम्, अभिमुखी प्रवृत्तिरभ्यावृत्ति'रिति, सा च जन्मरूपा, एवं च नैतत् क्रियाजन्मगणनमिति तदर्थः। क्रियाजन्मगणनार्थकत्वे तु द्वौ पाकाविति द्विवचनानापत्तिः। अत एव द्विष्प्रयोग इत्यत्र द्विवचनं न।

१. 'द्विःप्रयोगो द्विवचन'मिति सिद्धान्तादिति भावः।

लाभाय तदिति वाच्यं, नच 'पाक' इत्यादौ तादृशीति नातिप्रसङ्गः। 'द्विर्वचन'मिति च—'द्विःप्रयोगो द्विर्वचन'मिति व्युत्पत्त्या 'द्विर्वचनेऽची'ति ज्ञापकं वाऽऽश्रित्योपपादनीयमित्याहुः ॥ २० ॥

ननु सिद्धान्ते बोधकतारूपा शक्तिराख्यातशक्तिग्रहवतां बोधादावश्यकीति धातोरेव भावना वाच्या नाख्यातस्येति कथं निर्णय इत्याशङ्कां समाधत्ते—

भेद्यभेदकसम्बन्धोपाधिभेदनिबन्धनम्।
साधुत्वं तदभावेऽपि बोधो नेह निवार्य्यते ॥ २१ ॥

भेद्यं = विशेष्यं, भेदकं = विशेषणं, तयोर्यः सम्बन्धस्तस्य यो भेदस्तन्निबन्धनं साधुत्वम्, अयमर्थः—व्याकरणस्मृतिः शब्दसाधुत्वपरा, तत्रै-

❀ दर्पणः ❀

प्रत्ययार्थगुणीभूतसाध्यस्वभावमात्रपरत्वान्न दोषः। **तादृश्येति**। धातूपस्थाप्योक्तरूपेत्यर्थः। **व्युत्पत्त्येति**। विवरणपरभाष्यकारप्रयोगादित्यर्थः। **ज्ञापकमिति**। तादृशसूत्रकृत्प्रयोगं,—'हतशायिकाः शय्यन्ते' इतिवदिति भावः। **आहुरिति**। 'सारग्राहिण' इति शेषः ॥ २० ॥

सिद्धान्त इति। वैयाकरणसिद्धान्ते। 'इन्द्रियाणां स्वविषयेष्वि'त्यादिना प्रतिपादिता बोधकतारूपा शक्तिराख्यातेऽप्यबाधितैव, ततो भावनाबोधस्य जायमानत्वादित्यर्थः। **साधुत्वपरेति**। तथा च हरिः—

'साधुत्वज्ञानविषया सैषा व्याकरणस्मृति'रिति ॥

❀ काशिका ❀

द्विःप्रयोगो द्विर्वचनमिति। प्रयुज्यत इति प्रयोगः, एवञ्च साध्यमात्रस्वभावा धातूपस्थाप्या क्रिया तत्रेति तत्समानार्थकद्विर्वचनशब्देऽपि धातूपात्ता तादृश्येव क्रिया, प्रत्ययस्तु बाहुलकात् कर्मणि। अत्र आहुरित्यनेनास्वरसः सूचितः, तद्बीजं तु भावार्थकद्विरावृत्तिरित्यादेस्तथाप्यनिर्वाहः, 'द्विर्वचनेऽचि' इत्यादिप्रयोगदर्शनात् क्रियामात्रग्रहणस्यैव न्याय्यत्वम्। क्रियाग्रहणं तु स्पष्टार्थमुत्तरार्थं वेति स्पष्टमन्यत्रेति ॥ २० ॥

आख्यातशक्तिग्रहवतामिति। 'तिबादिप्रत्यये' भावनाशक्त इति शक्तिग्रहवताम्। बोधात् = तिबादिप्रत्ययाद् भावनाबोधात्। **तन्निबन्धनम्**। विशेष्यविशेषणभावसंबन्धनिमित्तकमित्यर्थः। यथाश्वत्वजातिप्रवृत्तिनिमित्तको दन्त्यसकारघटितोऽश्वशब्दस्तुरगेऽसाधुर्धनराहित्यप्रवृत्तिनिमित्तकस्तु साधुः, तालव्यशकारघटितस्तु तत्रैव वैपरीत्येन साधुरसाधुश्च भवति। ननु व्याकरणं साधुत्वान्वाख्यायकमेव न तु शक्तिग्राहकमत एव 'अथ शब्दानुशासनम्'

वावच्छेदकतया कल्प्यधर्म्मस्य शक्तित्वं वदतां मीमांसकानां पुनः शक्तत्वं साधुत्वमित्येकमेवेति तद्रीत्या विचारे साधुत्वनिर्णय एव शक्तिनिर्णय उच्यते, अतिरिक्तशक्तिवादेऽप्याख्यातानामसाधुता भावनायां स्यादेव, एवञ्च चतुर्थ्यर्थे तृतीयाप्रयोगवद्धात्वर्थभावनायामाख्यातप्रयोगे

❀ दर्पणः ❀

तत्र = साधुशब्दे । अवच्छेदकतया = बोधजनकताऽवच्छेदकतयेत्यर्थः । **अतिरिक्तशक्तिवादेऽपीति ।** 'साधुत्वं न शक्तत्वमसाधोरपि बोधात्किन्तु बोधकत्वमिति वक्ष्यमाणसिद्धान्तिमतेऽपीत्यर्थः । **असाधुता स्यादेवेति ।** आख्याताच्छक्तिभ्रमेण भावनाबोधेऽपि तत्र तस्याऽसाधुता स्यादेवेत्यर्थः । तथाच भाष्यकृता,—'सिद्धे शब्दार्थसम्बन्ध' इत्यत्र 'समानायामर्थावगतौ साधुभिर्भाषितव्यं नाऽसाधुभि'रिति गम्याऽगम्येतिवन्नियमः क्रियते' इति[१] पस्पशायामुक्तम्, एवं यादृशविशेषणान्वितयादृशविशेष्यबोधे यादृशानुपूर्व्याः सूत्रकृदाद्यन्यतमसम्मतत्वं तादृशबोधे तादृशानुपूर्व्वीकः शब्दः साधुर्नान्यत्र, अत एवाऽस्वशब्दोऽश्वे न साधुः, किन्तु-[२]निःस्वे, अश्वशब्दो निःस्वे न साधुः, किन्तु तुरग

❀ काशिका ❀

इत्येव महाभाष्ये उक्तम्, 'सिद्धे शब्दार्थसंबन्धे लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः' इति च, न त्वर्थबोधकमित्यादि,—

'साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः ।'

—इति वाक्यपदीयेऽपि—'साधुत्वज्ञानविषया' इत्येवोक्तमित्याशङ्कां निराकुर्वंस्तात्पर्यार्थमाह—**अयमर्थ इति ।** **अयम्** = वक्ष्यमाणः । **तत्रैव** = साधुशब्दे एव = **अवच्छेदकतया ।** बोधकतावच्छेदकतया । **शक्तित्वमिति ।** बोधकता = बोधजनकता । जनकतायाश्चावच्छिन्नत्वनियमेन तदवच्छेदकतया धर्मकल्पनावश्यकीति तस्यैव शक्तित्वं युक्तम् । **पुनः**—शब्दस्त्वर्थे । **शक्तत्वं साधुत्वमित्येकमेवेतीति ।** साधुशब्देभ्य एव बोधोत्पत्त्यङ्गीकारेण शक्तः साधुमात्रवृत्तितया शक्तत्वमेव साधुत्वमिति भावः । **तद्रीत्या** = मीमांसकरीत्या । **साधुत्वनिर्णय एवेति ।** तथा च व्याकरणस्य शक्तिनिर्णायकत्वस्य निष्प्रत्यूहतया 'लः कर्मणि—' इति व्याकरणविरोधाद् भावनाभिप्रायेण तिङ्प्रयोगोऽसाधुरेवेति तात्पर्यम् । **अतिरिक्तेति ।** साधुत्वापेक्षयाऽतिरिक्तेत्यर्थः । साधुत्वमनपभ्रष्टत्वेत्यादिरूपं, शक्तिरिच्छाविशेषः, पदार्थान्तरं वा । अत एव साधुः शक्त इत्यादिव्यवहार उपपद्यत इति भावः । **स्यादेवेति ।** व्याकरणस्मृतेः साधुत्वज्ञापनार्थं प्रवृत्तत्वेऽपि साधुत्वस्य पूर्वोक्तरीत्यार्थविशेषनिबन्धनत्वेनार्थवशसंपन्नमेव शक्तिनिर्णायक-

१ महाभाष्यस्य प्रथमाह्निके इत्यर्थः । २ निर्धने ।

याज्ञे कर्म्मण्यसाधुशब्दप्रयोगव'न्नाऽनृतं वदे'दिति निषेधोल्लङ्घनप्रयुक्तं प्राय-श्चित्तं दर्शनान्तरीयव्युत्पत्तिमतां स्यादेवेति। ननु त्वन्मते, 'नानृत'मिति

❀ दर्पणः ❀

इति सङ्गच्छते। नन्वस्तु साधुतेत्यत आह—**एवञ्चेति**। 'याज्ञे कर्मणी'त्यनेन,—'नाऽनृतं वदेन्नाऽपभ्रंशितं वा' इत्यादिश्रुतिः क्रतुप्रकरणे पाठादितरत्र तत्प्रयोगे प्रत्यवायाऽभावं सूचयति—**स्यादेवेति**। भावनाबोधकत्वेनाख्यातस्य सूत्र-कारादिभिरनुशिष्टत्वात्, कर्तृबोधकत्वेनैव तदनुशासनादिति भावः। मीमांसकः शङ्कते—**नन्विति**। त्वन्मते = वैयाकरणमते। **नानृतमिति**। दर्शपूर्णमास-प्रकरणे हि, 'नानृतं वदे'दिति श्रूयते, तत्र किमयं प्रतिषेधः पुरुषार्थ आहो-स्वित् क्रत्वर्थः? इति संशये,—'वदे'दित्याख्यातात् कर्तृप्रतीत्या कर्तृवाचक-त्वनिर्णयः, 'लः कर्मणी'त्यनुशासनात्तस्य कर्तृपरत्वलाभाच्च, प्रत्ययार्थत्वेन वदनं प्रति प्राधान्याद्, वदनं तावत् पुरुषार्थोऽतः प्रतिषेधोऽपि पुरुषार्थः, निषेधप्रतियोगित्वेन वदनक्रियामनुवदता 'वदे'दितिशब्देन पुरुषार्थतयैव बोधनात्, तादृशस्यैवाऽनृतवदनस्यानिष्टसाधनताया विपरीतस्वभावबोधकनञा बोधनादन्यादृशाऽनृतवदनस्य चाऽनुपस्थितत्वात्, अत एवाऽनारभ्याऽधीतस्मार्त्त-वदननिषेधस्याऽप्येतदेव मूलं भवतीति लाघवम्, अन्यथा तन्मूलभूतः पुरुषाऽ-र्थोऽन्यो निषेधः कल्प्य इति गौरवं प्रसज्ज्येतेति पूर्वपक्षे,—'अनन्यलभ्य एव शब्दार्थ' इति न्यायाद्भावनैवाख्यातवाच्या, कर्त्ता त्वाख्यातवाच्यभावनाया अविनाभावादाक्षेपलभ्य एवेति न तत्र तस्य शक्तिः, 'लः कर्म्मणी'त्यादिस्मृतिरपि 'द्व्येकयो'रित्यनेनैकवाक्यतया तत्संख्यातवाचित्वपरैव, 'पचति देवदत्त' इत्यादौ च 'गौः शुक्ल' इतिवत् सामानाधिकरण्यं लक्षणयैवेति नाख्यातस्य कर्तृवाचि-त्वमिति कर्त्तुः श्रुतेरनुपस्थितत्वान्न पुरुषार्थता तस्य, किन्तु प्रकरणात् क्रत्वर्थ-तैवे'ति निर्णीतं कर्त्रधिकरणे।

❀ काशिका ❀

त्वमिति व्याकरणविरोधाच्चतुर्थ्यर्थे तृतीयाप्रयोगवद् भावनायां तिबादिप्रत्ययस्यासाधुत्वं स्यादेवेति तात्पर्यार्थः।

नन्वेवं महामुनिजैमिनिसूत्रविरोधेन **पाणिनिस्मृतिर्बाध्येति** चेन्न, साधुत्वांशे **पाणिनिस्मृते**-र्बलवत्त्वात्, साधुत्वानुशासनार्थमेव प्रणीतत्वात्। वस्तुतस्तु **जैमिनीयवचनव्याख्यातृग्रन्थविरोधेऽपि** तत्सूत्रविरोधलेशोऽपि नावतरति, तथा हि—'भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते' इति हि भावार्थाधिकरणे **जैमिनिसूत्रम्**। "दद्याज्जुहुयादित्यादयः कर्मशब्दा भावार्थाः = प्राधान्येन क्रियार्थकाः, 'भावप्रधानमाख्यातम्' इति **निरुक्तात्**, अतस्तेभ्यः क्रिया प्रतीयेत—

निषेधः क्रत्वर्थ एव न सिद्ध्येद्, आख्यातेन कर्त्तुरुक्तत्वाच्छ्रुत्या पुरुषार्थतैव स्यात्, प्रकरणाद्धि क्रत्वर्थता, तच्च श्रुतिविरोधे बाध्यत इति चेन्न,

ॐ दर्पणः ॐ

आख्यातेनेति। तिङेत्यर्थः। तच्चेति। प्रकरणं चेत्यर्थः। श्रुतिविरोध इति। निरपेक्षस्वरूपश्रुतिप्रातिकूल्य इत्यर्थः। तथाहि श्रुत्यादयः षडिह विनियोजकाः,—तत्र विरुद्धयोरेकत्रोपनिपाते समुच्चयदौर्लभ्यादेकेनाऽपरस्य बाधो वक्तव्यः, स च बलवता दुर्बलस्येति कस्य दौर्बल्यमित्याकाङ्क्षायां परदौर्बल्यप्रतिपादकं,—"श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षा"दिति सूत्रं प्रणिनाय महर्षिर्जैमिनिः,—श्रुत्यादीनां पठितानां समवाये = एकत्रोपनिपाते पारदौर्बल्यमिति, पर एव पारः = उत्तरपठितं, तथाचैषां मध्ये यदपेक्षया यत्परं तद् दुर्बलमित्यर्थः, तत्र हेतुमाह[१]—'अर्थविप्रकर्षा'दिति। अर्थस्य = विनियोजकस्य, लिङ्गादितो—विप्रकर्षात् = उत्तरवर्त्तित्वात्,—लिङ्गादेर्विलम्बेन पूर्वापेक्षया विनियोजकत्वावगतेरिति यावत्। तत्र श्रुत्यादीनामुदाहरणानि निरपेक्षाण्येव स्युः, इतरप्रामाण्याऽनधीनप्रामाण्यकत्वं च निरपेक्षत्वम्,—यथा—

(१) 'व्रीहीनवहन्ती'ति, अत्र क्रियाजन्यफलभागित्वं कर्मत्वं बोधयन्ती द्वितीयाश्रुतिरितरनिरपेक्षैव व्रीहीणामवघातशेषित्वं प्रतिपादयति।

ॐ काशिका ॐ

प्राधान्येन प्रतीयेत, हि = प्राधान्याद्धेतोः। एष एव = क्रियारूप एवार्थो विधीयते न तु द्रव्यरूपः क्रियायाश्चाशुतरविनाशित्वात् कालान्तरभाविफलजनकता न संभवतीति द्वारमपूर्वं कल्प्य''मिति तदर्थः। एतत्सूत्राद् भावना प्रत्ययार्थो न कर्तेत्यादिकं तु न लभ्यते इति विभावनीयमिति दिक्। प्रकरणात् = दर्शपूर्णमासप्रकरणात्। तत्प्रकरणे नानृतमित्यस्य पाठात्। तच्च = प्रकरणप्राप्तं क्रत्वर्थत्वं च। बाध्येतेति। तथा च क्रतावपभाषणे क्रतुभ्रेषप्रायश्चिताचरणरूपसकलयाज्ञिकमीमांसकशिष्टाचारविरोधः स्यात्, अतो नेष्टापत्तिः कर्तुं शक्येति भावनावाचकत्वमेव तिबादीनामभ्युपेयम्। न चैवं 'लः कर्मणि—' इति व्याकरणस्याप्रामाण्यमिति वाच्यम्, वृद्ध्यादिपदस्य लोके आकारादिबोधकत्वेनादृष्टस्यापि स्वशास्त्रे तत्र वृद्ध्यादिपदं परिभाषितम्, एवं च व्याकरणस्य सर्वशक्तिनिर्णायकत्वाभावेनादोषात्, किं चासन्नेव लकारः कल्पितस्तथैव कर्तृकर्मवाचकत्वस्यापि काल्पनिकस्यापि संभवात्, यत्र तु न्यायविरोधस्तत्र लोकवेदयोरपि न तदुक्तार्थाभ्युपगमः, न चैतावतापि शास्त्रस्याप्रामाण्यम्, अर्थवादानामिव तात्पर्यार्थे प्रामाण्यनिर्वाहात्, 'जञ्जभ्यमानो ब्रूयान्मयि दक्षक्रतू' इत्यादौ वाक्यात् पुरुषार्थत्व-

१. आहेति—'जैमिनिरिति' शेषः।

❀ दर्पणः ❀

(२) अर्थविशेषप्रकाशनसामर्थ्यं लिङ्गं, यथा, 'बर्हिर्देवसदनं दामी'ति, अत्र लवनार्थप्रकाशकतया लवनस्य विनियोगः।

(३) परस्पराकाङ्क्षावशादेकस्मिन्नर्थे पर्यवसन्नानि पदानि वाक्यं, यथा,— 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् अग्नये त्वा जुष्टं निर्वपामी'ति। अत्र मन्त्रलिङ्गेन निर्वापे प्रयुज्यमानस्य समवेताऽर्थभागस्यैक-वाक्यताबलेन 'देवस्य त्वे'त्यादिभागस्यापि तत्रैव विनियोगः।

(४) लब्धवाक्यभावानां पदानां कार्य्यान्तरापेक्षावशाद्वाक्यान्तरेण सम्बन्ध आकाङ्क्षापर्यवसन्नं—प्रकरणम्, यथा—'समिधो यजती'ति। अस्य हि दर्शपूर्णमासे कथम्भावाकाङ्क्षायाः प्रकरणपाठवशाच्छेषत्वम्।

(५) स्थानं = क्रमः,–स चानेकस्याम्नातस्य सन्निधिविशेषाम्नानम्, यथा,— 'दधिरसी'त्यत्राऽग्नेयोपांश्वग्नीषोमीययागाः क्रमेण पठिताः, एवं मन्त्रभागेऽपि क्रमेणानुमन्त्रणत्रयं पठितम्, तत्राग्नेयाग्नीषोमयोर्द्वयोर्लिङ्गेनैव विनियोगसिद्धिः, 'दधिरसी'त्यत्र तु न लिङ्गादि विनियोजकं, किन्तु यस्मिन् प्रदेशे ब्राह्मणे उपांशु-यागविधानं तस्मिन् प्रदेशे मन्त्रेऽप्यस्य पाठ इति क्रमादुपांशुयागानुमन्त्रणे तस्य विनियोगः।

(६) समाख्या = योगबलम्, तथा, 'हौत्रमौद्गात्रमि'त्यादि, तत्र हि,—होतुरिदं हौत्रमित्यादियोगबलेन होत्रादिसमाख्यातानि कर्माणि होत्रादिभिरनुष्ठेयानीति।

(७) विरोधोदाहरणादि यथा–श्रुतिलिङ्गयोर्विरोधे श्रुतिर्बलीयसी, लिङ्गं तु दुर्ब-लम्, अर्थविप्रकर्षात्, यथा,–'कदाचनस्तरीरसी'त्यादिकाया ऋचो विनियोजिका श्रुति'रैन्द्र्या गार्हपत्यमुपतिष्ठते' इति इन्द्रप्रकाशनसामर्थ्याल्लिङ्गादिन्द्रोपस्थापने वि-नियोगोऽस्या प्रतिभाति, अन्यप्रकाशकस्याऽन्यत्र विनियोगाऽयोगात्, श्रुत्या गार्हपत्यो-पस्थापने स प्रतीयते, गार्हपत्यमिति द्वितीया हि कर्मविभक्तितया काममपि क्रियामपेक्ष्य प्रकृत्यर्थस्य शेषित्वं बोधयति, क्रियाजन्येष्टफलभागित्वस्य तदर्थत्वात्, एवमैन्द्र्येति तृतीयाप्रकृत्यर्थस्य शेषत्वं, क्रियां प्रति साधकतमस्वरूपकरणत्वस्य तदर्थत्वात्, तदन-योर्विरोधः, तत्राऽयं पूर्वपक्षः-सामर्थ्यज्ञानमपेक्ष्य श्रुतिर्विनियोजिका, न ह्यसमर्थं श्रुति-सहस्रमपि विनियोक्तुमलम्, अतो लिङ्गस्य बलवत्त्वादिन्द्रोपस्थापनेऽस्या विनियोगः, तदनुरोधितया द्वितीया सप्तम्यर्थतया व्याख्येया, गार्हपत्यसमीप इन्द्रोऽनया उपस्था-तव्य इत्यर्थः—पर्यवस्यतीति। सिद्धान्तस्तु—"श्रुतिः स्वरूपसत्सामर्थ्यमपेक्षते, न तु तज्ज्ञानमपि, येन लिङ्गं बलवद्भवेत्, तस्य च पूर्वसत एव विनियोगोऽन्यथानु-पपत्त्या ज्ञानं पश्चादुपजायते, लिङ्गं तु विनियोजने श्रुतिमपेक्षते। न ह्यनयेन्द्र

'तिङर्थस्तु विशेषण'मित्यनेन परिहृतत्वात्, न हि गुणभूतः कर्त्ता निषेधं स्वाङ्गत्वेन ग्रहीतुमलं, भावना तु प्रधानं तं ग्रहीतुं समर्थेति प्रकरणात्

❀ दर्पणः ❀

उपस्थातव्य इति लिङ्गात् स्वरसतः प्रतीयते, किन्त्विन्द्र एतादृगित्येतावन्मात्रम्, तथाच प्रकरणाम्नानसामर्थ्यादिन्द्रप्रकाशनसमर्थाया ऋचोऽन्यथाऽनुपपत्त्या लिङ्गेनाऽनयेन्द्र उपस्थातव्य इति श्रुतिः कल्पनीया, यया विनियोगो भवेत्, ततो यावल्लिङ्गं श्रुतिकल्पनायै प्रक्रान्तव्यापारं, तावत् प्रत्यक्षश्रुत्या विनियोगः सिद्ध इति प्रकरणे निराकाङ्क्षे कयानुपपत्त्या श्रुतिः कल्पनीया, तस्माच्छ्रुतेर्बलवत्त्वात्तदनुगुणतया सामर्थ्ये नीयमाने इन्द्रपदं परमैश्वर्याश्रयवाचकतया गार्हपत्यतात्पर्य्यकमित्यवधार्य्यत" इति ।

विरोधोदाहरणान्तराणि त्वन्यतोऽवधार्य्याणि, गौरवभयान्नेह प्रपञ्चितानि, तदयं निर्गलितोऽर्थः—श्रुतिर्निरपेक्षत्वात् सर्वतो बलवती, लिङ्गं तु विनियोगे एकान्तरितत्वाद् द्व्यन्तरितवाक्याद् बलवत्, एवं वाक्यादावप्यूह्यम्, समाख्या तु पञ्चान्तरितत्वात्सर्वतो दुर्बलेति, प्रकृते—आकाङ्क्षापर्यवसन्नप्रकरणेन वाक्यं कल्पनीयं, तेन च लिङ्गं, लिङ्गेन श्रुतिस्तयाऽनृतवदननिषेधस्य क्रतौ विनियोगः, यावच्च प्रकरणं वाक्यकल्पनायै प्रक्रान्तव्यापारं तावत्प्रत्यक्षया कर्त्रर्थैकाख्यातश्रुत्या तस्य पुरुषार्थत्वविनियुक्ते क्लृप्तमपि वाक्याद्यकिञ्चित्करमिति श्रुतिविरोधे बाध्यत इत्यस्यार्थः, लिङ्गादीनामुक्तप्रकारेण श्रुत्यपेक्षया दुर्बलत्वादिति भावः ।

समाधत्ते—**तिङर्थस्तु विशेषणमितीति** । तथाचाख्यातश्रुत्या कर्त्तुरुपस्थापनेऽपि न भावनावत् तस्य प्राधान्येन भानं, येन निषेधस्य पुरुषार्थता शङ्क्येत किन्तु विशेषणतयैव, तथोपस्थितस्य च विशेषणाऽन्तरनैराकाङ्क्ष्येण कर्त्तुः श्रौतनञर्थसम्बन्धाभावान्नाऽत्र श्रुत्या प्रकरणबाध इत्याशयं विशदयति—**स्वाङ्गत्वेनेति** । स्वविशेषणतयेत्यर्थः । नन्वेवं निषेधस्य क्वाऽपि श्रौतपुरुषार्थता न स्यात्, 'न

❀ काशिका ❀

सिद्धये कर्तुर्वाच्यत्वमावश्यकमित्युक्ता प्रतिबन्दिरपि नेति मीमांसकोक्तमेवाश्रयितुं युक्तमिति भावः । तिङर्थस्य विशेषणत्वेऽपि श्रुत्यर्थत्वानपायात् कथं न निषेधस्य क्रत्वर्थत्वमतस्तदुपपादयति—**न हि गुणेति** । विशेष्ये एवङ्गित्वस्य न्याय्यत्वाद् विशेषणेऽङ्गसंबन्धे प्राधान्यमप्राधान्यं च विरुद्धद्वयमापद्येत, अत एव 'सोमेन यजेते'त्यत्र सोमस्य यागे करणत्वेनान्वयो निराकृतः सोमसाध्येन यागेनेति मीमांसकैः । ननु धात्वर्थभावनापि कथं निषेधेनान्वयं लभते, तस्या अपि प्रत्ययार्थकर्तृसम्बन्धत्वादित्याशङ्क्याह—**भावनात्विति** । **प्रधानमिति**—प्रथमान्तं भावनाविशेषणं, तथा च विशेषणत्वेनेतरान्वितस्यान्यत्र विशेषणतयाऽन्वयासंभवेऽपि तिङर्थं प्रति

क्रत्वर्थतैव। अस्तु वा क्रतुयुक्तपुरुषधर्म्मः, अनुष्ठाने विशेषाभावात्, 'जञ्जभ्यमानोऽनुब्रूयान्मयि दक्षक्रतू' इति वाक्योक्तमन्त्रविधिवदित्यादि

❀ दर्पणः ❀

कलञ्जं भक्षये'दित्यत्राप्युक्तरीत्या कर्त्तरि नञर्थासम्बन्धेन श्रौतत्वात्, यदि च कर्तुरप्राधान्येऽपि कर्तृवृत्तिभावनायाः प्राधान्यात्तस्या नञर्थाऽन्वये तद्द्वाराख्यातार्थं कर्त्तुरप्यन्वयान्न तस्य श्रौतपुरुषाऽर्थत्वानुपपत्तिरिति विभाव्यते—तदा प्रकृतेऽपि तुल्यमत आह—**अस्तु वेति। अनुष्ठान इति।** 'नाऽनृतं वदे'दिति निषेधस्य क्रतुयुक्तपुरुषधर्मत्वे यजमानस्य प्राधान्यात्प्रधानीभूतकर्त्रैवानृतवदनं वर्ज्यं स्यात् क्रत्वर्थत्वे च यज्ञप्रवृत्तेन यजमानेनर्त्विग्भिश्च वर्जनं सिध्यतीति विशेषात् कथमेतदिति वाच्यम्. श्रुतिप्रकरणाभ्यां क्रतुसम्बद्धपुरुषकर्तृकानृतवदनाभाव इति बोधेन क्रतुकर्तृकेतिबोधे मानाभाव इति क्रतुयुक्तेति वदतोऽभिप्रेतत्वादिति। तत्र दृष्टान्तमाह–**मयि दक्षक्रतू इति।** दर्शपूर्णमासप्रकरण एवैतन्मन्त्रवचनं श्रूयते—'जञ्जभ्यमानोऽनुब्रूयान्मयि दक्षक्रतू' इति, तत्र किमेतन्मन्त्रवचनं शुद्धपुरुषधर्मः ? उत क्रतुयुक्तपुरुषसंस्कारकतया क्रत्वङ्गमिति सन्देहे, वाक्येन तावज्जञ्जभ्यमानपुरुषधर्मतयैवाऽयं प्रतीयते,—कृत्प्रत्ययस्य शानचः कर्तृवाचकत्वात्, प्रकरणेन तु क्रत्वङ्गतया, प्रकरणं च वाक्यापेक्षया दुर्बलमिति पुरुषधर्मतैव युक्ता, सत्यां च फलाकाङ्क्षायां, 'प्राणापानावेवात्मानं धत्त' इति वाक्यशेषे श्रुतस्य फलस्य 'रात्रि-

❀ काशिका ❀

विशेष्यायास्तया नञर्थे विशेषणतयान्वयो नानुपपन्न इति सा ग्रहीतुं समर्थैवेति भावः। एवं च निषेधस्य तद्भावनाया वा कैमर्थक्यात् प्रकरणात् क्रत्वर्थतैवेति भावः। श्रुतिप्रकरणयोरङ्गत्वग्राहकत्वसंभवे एव श्रुतिरेव ग्राहिका बलीयस्त्वात्, प्रकृते तु नैवमिति तात्पर्यम्। नन्वेवं 'न हिंस्यात् सर्वाभूतानि' 'न कलञ्जं भक्षये'दित्यादिनिषेधानामपि श्रुत्या पुरुषार्थत्वं न स्यात्, श्रुत्युपस्थितकर्तुः क्रियाविशेषणत्वात्। यदि च तत्रान्यस्याङ्गिनोऽसंभवात् विशेषणीभूतकर्तुरपि निषेधोऽङ्गमिति चेदुक्तनियमव्यभिचारेण 'नानृतं वदे'दित्यत्रापि निषेधः कर्तुरङ्गं स्यादत आह—**अस्तु वेति।** यद्वा श्रुत्यपेक्षया विलम्बेन विनियोजकतया प्रकरणस्य दौर्बल्यं क्लृप्तं, श्रुतेरितरनैरपेक्ष्येण प्रकरणात् पूर्वमेव विनियोजकत्वेन प्राबल्यात्, अतः प्रकृतेऽपि प्रबलायाः श्रुतेः प्रकरणबाधकत्वमभ्युपेत्येत्थं परिहारः कृतः, वस्तुतस्तु प्रमाणयोर्विरोधे एव बलाबलचिन्ता, अन्यथा वक्ष्यमाणरीत्या जञ्जभ्यमानाधिकरणविरोधः, प्रकृते तु श्रुतिप्रकरणाभ्यामविरोध एवेत्याह—**अस्तु वेति। क्रतुयुक्तपुरुषधर्म इति।** अस्य 'श्रुतिप्रकरणाभ्या'मित्यादिः। तत्रानुरूपं दृष्टान्तमाह—**जञ्जभ्यमान इति।** तत्र यथाऽविरुद्धाभ्यां वाक्यप्रकरणाभ्यामुक्तमन्त्रजपस्य क्रतुयुक्तपुरुषधर्मत्वं, तथा श्रुतिप्रकरणयोरनृतनिषेधस्यापीत्यर्थः। तदुक्तं **भट्टपादैरपि**—

भूषणे प्रपञ्चितम् ।

नन्वाख्यातस्य भावनायामसाधुत्वे ततस्तद्बोधो न स्यात्, साधुत्वज्ञानस्य शाब्दबोधहेतुत्वादित्यत आह—बोध इति । असाधुत्वेऽपि साधुत्वभ्रमाद् बोधोऽस्तु नाम, अपभ्रंशवत्, असाधुत्वन्तु स्यादेवेति भावः ।

❀ दर्पणः ❀

सत्र'न्यायेन कल्पनादिति पूर्वपक्षे, सिद्धान्तः—वाक्यप्रकरणयोर्विरोधे बाध्यबाधकभावो, न त्वत्रास्ति विरोधः,—जञ्जभ्यमानपदस्य कर्तृवाचकतया तादृशपुरुषस्य क्रतावपि सत्त्वात् तत्संस्कारमुखेन क्रत्वङ्गतासम्भवात्, एवञ्चाऽर्थवादोपस्थितफलकल्पनागौरवमिति नेति ।

तथाच बलाबलचिन्ताया विरोध एवौचित्येन जञ्जभ्यमानवाक्येऽनुवचनस्य वाक्यप्रकरणाभ्यां क्रतुयुक्तपुरुषधर्मतावत् प्रकृतेऽप्यनृतवदननिषेधस्य श्रुतिप्रकरणाभ्यां क्रतुसम्बन्धपुरुषधर्मतैवोचिता, उक्तञ्च भट्टपादैः—

स्युपायमांसभक्षादिपुरुषार्थमपि श्रितः ।
प्रतिषेधः क्रतोरङ्गमिष्टः प्रकरणाश्रयात् ॥' इतीति भावः ।

प्रपञ्चितमिति । प्रपञ्चस्तु उक्तः । ननु साधुत्वज्ञानं विनाऽपि शाब्दबोधोदयेन व्यभिचारात् कथमेतत्, साधुत्वस्य शक्तत्वरूपताया निराकरिष्य-

❀ काशिका ❀

'स्युपायमांसभक्षादिपुरुषार्थमपि श्रितः ।
प्रतिषेधः क्रतोरङ्गमिष्टः प्रकरणाश्रयात् ॥' इति ।

'भक्षादी'ति नपुंसकद्वितीयान्तं, तद्विषयीकृत्य यः प्रतिषेध इत्यर्थः । अत एव 'यदर्था प्रकृतिस्तदर्थः प्रतिषेध' इति नियमस्य 'नानृतं वदे'दित्यत्र भङ्गो न । वस्तुत उक्तभट्टोक्त्या तादृशनियमो न सार्वत्रिक इति बोध्यम् । अनारभ्याधीतो नानृतं वदेदिति निषेधस्तु 'परावरज्ञा ऋषयो यद्वा नस्तद्वा न इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जाना यर्वाणस्तर्वाणो नाम बभूवुर्याज्ञे कर्मणि पुनर्नापभाषन्ते' इति पस्पशाह्निकस्थभाष्यस्वरसादर्थानृतपर एव अत एव भाष्यात्, 'ते 'असुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः' इति क्रतुप्रकरणपठितभाष्यलिखितश्रुत्यन्तराच्च दर्शपूर्णमासप्रकरणपठितो नानृतमिति निषेध उभयविधस्याप्यनृतस्येति ध्येयम् । तदेतद् ध्वनयन्नाह—भूषणे प्रपञ्चितमिति । अपभ्रंशवदिति । यथाऽपभ्रंशानां साधुत्वभ्रमाद्बोधकत्वेऽप्यसाधुत्वं तथा भावनाबोधकत्वेऽपि तस्यां तिबादेरसाधुत्वं स्यादेवेत्यर्थः । असाधुत्वं स्यादिति । न चैतदनुशासनस्य निर्मूलत्वेन तिबादेर्भावनाबोधकत्वेऽपि साधुत्वं निराबाधमेवेति वाच्यम् । 'ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति श्रुतेः—

वस्तुतः साधुत्वज्ञानं न हेतुस्तद्व्यतिरेकनिर्णयोऽपि न प्रतिबन्धक इत्य- 'साधुरनुमानेने'त्यत्र वक्ष्यामः ॥ २१ ॥

रङ्गोजिभट्टपुत्रेण कौण्डभट्टेन निर्म्मिते ।
पूर्णो भूषणसारेऽस्मिन् धात्वाख्यातार्थनिर्णयः ॥१॥
इति वैयाकरणभूषणसारे धात्वाख्यातसामान्यार्थयोर्निरूपणम् ॥१॥

※ दर्पणः ※

माणत्वाद्यात आह—वस्तुत इति । तद्व्यतिरेकनिर्णय इति । असाधुत्व-निश्चय इत्यर्थः, तन्निश्चयेऽप्यपभ्रंशाद् बोधदर्शनात्, तथाचाख्याताद्भावनाबोधे बाधकाऽभाव इति भावः ॥ २१ ॥

इति भूषणसारदर्पणे धात्वाख्यातार्थनिरूपणम् ॥ १ ॥

※ काशिका ※

'पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं, त्याज्यं न किंचन ॥'

—इति पराशरोपपुराणादेश्च मूलत्वात्। न च लकारवत् कर्त्राद्यर्थकत्वमपि कल्पितमिति वाच्यम्, सर्वत्र प्रकृतिप्रत्ययविभागं कल्पितं तत्तदर्थं चादायैव साधुत्वबोधनात्। ज्ञानं न हेतुरिति तद्व्यतिरेकेऽपि शाब्दबोधानुभवात्। तस्य हेतुत्वाभावेऽपि असाधुत्वज्ञानसत्त्वे शाब्दबोधानुदयात् तस्य प्रतिबन्धकत्वं कल्पनीयम्। एवं च भावनायामसाधुस्तिबादिरिति ज्ञानसत्त्वे कथं ततस्तद्बोधः, न च तदा तद्बोधो न जायत एव, अपि त्वसाधुत्वज्ञानविरहदशायामेव तद्बोध इति वाच्यं, तदापि बोधस्यानुभवसिद्धत्वादित्याशङ्कां निराकरोति—तद्व्यतिरेकेति। साधुत्वव्यतिरेकनिर्णय इत्यर्थः। वक्ष्याम इति। साधुत्वज्ञानरहितानामसाधुत्वज्ञानवतामपि गगर्यादिशब्देभ्यो बोधस्य सर्वानुभव-सिद्धतया साधुत्वज्ञानं न हेतुस्तद्व्यतिरेकज्ञानं च न प्रतिबन्धकमिति वक्ष्यत इति नः सर्वेष्टसिद्धि-रिति भाव इति शिवम् ॥ २१ ॥

केशवाङ्गजविप्रस्य हरिरामस्य निर्मितौ ।
पूर्णो भूषणटीकायां धात्वर्थाख्यातनिर्णयः ॥

इति श्रीमद्वैयाकरणभूषणटीकायां कालोपनामकहरिरामविरचितायां धात्वाख्यातसामान्यार्थनिरूपणं समाप्तम् ॥

❀ अथ लकारार्थनिर्णयः ❀

प्रत्येकं दशलकाराणामर्थं निरूपयति—

वर्त्तमाने, परोक्षे, श्वोभाविन्यर्थे, भविष्यति ।

विध्यादौ, प्रार्थनादौ, च क्रमाज्ज्ञेया लडादयः ॥२२॥

लडादयष्टितः षट् क्रमेणैष्वर्थेषु द्रष्टव्याः, तथाहि—'वर्त्तमानेऽर्थे लट्', 'वर्त्तमाने ल'डिति सूत्रात् । प्रारब्धापरिसमाप्तत्वं—भूतभविष्यद्भि-

❀ दर्पणः ❀

लकारसामान्यार्थे निरूपिते तद्विषयकजिज्ञासानिवृत्ताववश्यवक्तव्यत्वज्ञाना-द्विशेषार्थनिरूपणेऽवसरस्य सङ्गतित्वं सूचयन्नाह—**प्रत्येकमिति । दशलका-राणामिति ।** लट्-लिट्-इत्यादिक्रमेण पठितानामित्यर्थः । 'आदेशानां वाचक-त्व'मिति पक्षेऽपि तिङाद्यादेशनिष्ठां बोधकतारूपां शक्तिं लडादिष्वारोप्य तद्विधा-नात् तदर्थकत्वं तेषामक्षतमिति भावः । **प्रारब्धापरिसमाप्तत्वमिति ।** विनष्टा-

❀ काशिका ❀

प्रत्येकमिति । एकैकस्येत्यर्थः, वीप्सायामव्ययीभावात् । **दशलकाराणामिति ।** 'दिक्संख्ये संज्ञायाम्' इति समासः, सप्तर्षिवदियं लडादीनां संज्ञेति भावः । अवयवावयविभाव-संबन्धे षष्ठी, प्रत्येकमित्यत्रान्वयः । **अर्थमिति**—सामान्याभिप्रायेणैकवचनम् । **निरूपयतीति ।** लकारसामान्यार्थज्ञाने सति लकारविशेषार्थजिज्ञासोदयात् । तथा च प्रसङ्गसंगत्या तन्निरूपण-मिति बोध्यम् । वर्तमानत्वं लक्षयति-**प्रारब्धेति ।** प्रारब्धस्तत्तत्फलानुकूलव्यापारध्वंससमान-कालिकतत्तत्फलानुकूलकृतिविषयीभूतो योऽपरिसमाप्तस्तत्तत्फलानुकूलचरमक्रियाध्वंसप्रागभावाधि-करणकालवृत्तिः,—प्रागभावानङ्गीकारे तु—तादृशध्वंसानधिकरणकालवृत्तिरित्यर्थोऽवसेयः, एतादृशो यः क्रियात्मकोऽर्थस्तत्तत्फलानुकूलव्यापारसंतानात्मकक्रियारूपतदधिकरणत्वोपलक्षित-समयत्वमित्यर्थः । वर्तमानत्वस्य कालगतत्वेन सर्वानुभवसिद्धत्वात्, अत एवाख्यातार्थः काल इति प्रवादोऽपि संगच्छते, भूषणेऽप्यत एवेत्थमेवोक्तम् । "भाष्ये न्याय्या त्वेषा वर्तमानकाल-ताऽऽरम्भानपवर्गादवश्यं भुञ्जानो हसति जल्पति पिबति निमिषति चे"त्युक्तम् । नान्तरीयकत्वात् तासां न विच्छेदकत्वमिति हसनादिदशायामपि 'भुङ्क्ते' इति प्रयोगोपपत्तिः, यद्वा तासामपि तत्तद्धात्वर्थफलानुकूलत्वेन भुज्यादिधात्वर्थत्वविवक्षेति तद्भात्र इति **कैयटः** । अनेकदिनादि-साध्यग्रन्थाध्ययनसमये भोजनगमनादिनानाविधक्रियाणामपि तथाविधत्वमिति भावः, अत एव संहिताद्यध्ययनसमाप्तिपर्यन्तं 'देवदत्तः संहितां पठती'त्यादिप्रयोगोपपत्तिः, परं तु पठधात्वा-देस्तथाविधबहुतरव्यापारवाचकत्वकल्पनायां गौरवात् कण्ठाद्यभिघातादिव्यापारेष्वल्पेष्वेव

❀ दर्पणः ❀

द्यवयवप्रागभावकत्वे सत्यनुत्पन्नध्वंसान्त्यावयवकत्वमित्यर्थः[1]। भाविभूतक्रिययोरति-

❀ काशिक ❀

शक्तिरुचितेति पूर्वोक्तमेव सम्यगिति प्रतिभाति, जलताडनाद्यनेकक्रियाणां तदनुकूलत्वे माना-भावाच्च, संहिताद्यध्ययनप्रारम्भक्षणतत्समाप्तिक्षणान्तरालिकसमये निरुक्तवर्तमानत्वसत्त्वादुक्त-प्रयोगनिर्वाहः, उक्तभाष्यस्याप्येतादृशवर्तमानत्वपरिग्रहे तात्पर्यम्, प्रारब्धापरिसमाप्तत्वञ्च विशेषणं न तूपलक्षणं तेनातीतादिक्रियायामपि तत्तत्कालावच्छेदेन प्रारब्धापरिसमाप्तत्वसत्त्वेन पचतीति प्रयोगापत्तिर्न, अन्यथा तु स्यात् तदापत्तिः। न च लिडादिना बाधान्न तदापत्तिरिति वाच्यम्, वक्ष्यमाणरूपभूतत्वाद्यविवक्षायां तदप्राप्तेः, प्रारब्धापरिसमाप्तक्रियोपलक्षितत्वमिति भूषणग्रन्थपर्यालोचनयेदं तत्तत्कालोपलक्षकमात्रं न तु तस्य शाब्दबोधे भानम्, शाब्दबोधे तु वास्तवमेतादृशवर्तमानत्वं यत्र स कालस्तत्कालत्वेन भासते, अतस्तत्कालत्वेनैव लड्-वाच्यता, परं तु एवंरीत्या कालगतभूतत्वानद्यतनत्वादेरपि लिडादिप्रयोगे भानानापत्तिः। तेषामनुभवबलाच्चेद् भानमिति तेषां लिडादिवाच्यतेति चेत् प्रकृतेऽपि तथेति प्रतिभाति। अत एव वर्तमानकालिकी पचिक्रियेति बोधं वर्णयन्ति प्रामाणिकाः। पपाचेत्यादिजन्यबोधे सति भूतत्वानद्यतनत्वादिसंशयानुदयात् तस्य वाच्यत्वे प्रकृतेऽपि तुल्यम्। अतीतादिसमये पाककर्तरि—वर्तमानसमये तत्कर्तृत्वशून्ये—देवदत्तादावपाक्षीत्, पक्ष्यति, देवदत्तो न पचतीति

---

१ प्रारब्धापरिसमाप्तत्वञ्चोपलक्षणं, तदेवं–प्रारब्धाऽपरिसमाप्तक्रियोपलक्षितकालत्वं वर्तमान-त्वमित्यक्षरार्थः, नन्वेवं पूर्वेऽह्नि द्विवादनावसरे यः पाकः कृत आसीत् तद्बोधायाद्यापि 'पचती'ति प्रयोगापत्तिः, प्रारब्धाऽपरिसमाप्तपूर्वदिनभव–पाकक्रियोपलक्षितकालबोधाय पचतीत्युच्चारणे बाधाभावात्, न च प्रारब्धापरिसमाप्तक्रियोपलक्षितोच्चारणाधिकरणीभूतकालत्वस्यैव तत्त्वान्न-दोषः, पूर्वघस्रीयद्विवादनकालस्य उच्चारणाधिकरणत्वाभावात्, अद्यैव 'पचती'त्युच्चारणादिति वाच्यं, कालस्याखण्डतया पूर्वदिनीयद्विवादनकालस्याप्येतद्दिनभवपचतीत्युच्चारणा-धिकरणत्वस्य सम्भवादिति चेत्सत्यम्, प्रयोगविशिष्टत्वस्यैव वर्त्तमानत्वात्, वै० स्वोच्चारणाधिकरणत्व, स्वजन्यबोधविषयत्वेन तात्पर्यविषयीभूतफलविशिष्टत्वोभयसम्बन्धेन। फलवैशिष्ट्यञ्च—'स्वनिष्ठ-जन्यतानिरूपितजनकतावद्यावद्व्यापारप्रतियोगिकध्वंसानधिकरणत्व', 'स्वनिष्ठजन्यतानिरूपित-जनकतावद्यावद्व्यापारप्रतियोगिकप्रागभावानधिकरणत्वे'तदुभयसम्बन्धेन, एवञ्च पचतीत्युच्चारण-काले तज्जन्यबोधविषयविक्लित्तिरूपफलजनकाऽधिश्रयणादिव्यापाराणां प्रागभावस्य, पूर्वोक्तव्यापाराणां ध्वंसस्य चाभावात्पचतीति प्रयोगो भवति, [यावत्पदोपादानात्—यत्किञ्चिद्व्यापारध्वंसादेः सत्त्वेऽपि नाव्याप्तिः,] एवञ्च–कालस्याखण्डतया पूर्वदिवसीयपाकक्रियाबोधककैतद्दिवसीयप्रयोग-काले तादृशव्यापारप्रतियोगिकध्वंसस्यैव सत्त्वान्न पूर्वदिवसजातपाकक्रियाभिप्रायेणाद्य'पचती'ति प्रयोगापत्तिरिति सङ्क्षेप–इत्यस्मद्गुरुवरेण्या जगद्विदितमाहात्म्यातिशयास्त्रिपाठिचरणाः।

न्नत्वं वा वर्त्तमानत्वम् । पचतीत्यादावधिश्रयणाद्यधःश्रयणान्ते मध्ये तद-

❀ दर्पणः ❀

प्रसङ्गवारणाय—क्रमेण पदद्वयम् । लक्ष्ये लक्षणं ग्राहयति–**पचतीति** । **अधिश्रयणादीति** । साध्यत्वप्रकारकप्रतीतिविषयपूर्वापरीभूतावयवसमुदायस्यैव क्रियात्वादिति भावः । **तदिति** । उक्तवर्त्तमानत्वमित्यर्थः । यद्यपि 'भावकालकारकसंख्याश्चत्वारोऽर्था आख्यातस्ये'ति निरुक्तभाष्यात् क्रियातिरिक्तकालस्यैव वर्त्तमानत्वादिकं प्रतीयते, तथापि निरुपाधिकस्य तस्य वर्त्तमानत्वादिना प्रत्येतुमशक्यत्वादुपाधिभूतक्रियामादायैव तत्र तत्त्वस्य वक्तव्यतयाऽऽवश्यकत्वात् क्रियायामेव तत्त्वमुक्तमित्यवधेयम् । वस्तुतस्तु दण्डमुहूर्त्ताद्यात्मकखण्डकाल एव वर्त्तमानत्वादिना लडादिवाच्यः, तद्गतं वर्त्तमानत्वं च तत्तच्छब्दप्रयोगाधिकरणत्वमेव, 'तदादि'

❀ काशिका ❀

प्रयोगानुपपत्तिश्च । चैत्रकर्तृकपाकसामान्याभावस्य बाधितत्वात्, उक्तविधवर्तमानस्यावाच्यत्वे तु अन्वयितावच्छेदकचैत्रकर्तृकवर्तमानपाकत्वावच्छिन्नप्रतियोगिताकाभावस्याबाधितत्वान्नानुपपत्तिरुक्तप्रयोगस्य, प्रतियोगिप्रसिद्धिश्चान्तत आहार्यारोपरूपैवेति ध्येयम् । अग्निर्दहतीत्यादौ निरुक्तप्रारब्धत्वस्यारोपात्, 'श्रृणोत ग्रावाणः' इति श्रुतिबलात् सर्वस्यैव चैतन्याद्वोपपत्तिर्बोध्या, तत्तत्फलानुकूलक्रियाध्वंसानधिकरणतदनुकूलक्रियाधिकरणसमयरूपाद्यक्षणसम्बन्धरूपं वा प्रारब्धत्वं निवेश्यम् । अत्र पक्षे गौरवाल्लघुवर्तमानत्वमाह–**भूतेति** । तथा च भूतभविष्यद्भिन्नकालत्वं वर्तमानत्वमित्यर्थः । तत्र भूतत्वं वर्तमानध्वंसप्रतियोगित्वम् । भविष्यत्त्वं वर्तमानप्रागभावप्रतियोगित्वम्, वर्तमानत्वं च ध्वंसादौ प्रकृतप्रयोगाधिकरणकालवृत्तित्वम्, प्रकृतप्रयोगाधिकरणकालश्च प्रहरदिनाद्यात्मको बुद्धिस्थस्तत्र तत्र विशिष्य निवेश्यः, तेन तदधिकरणप्रहराद्यात्मककालान्तर्गतासु कासुचिद् घटिकास्वपि तदधिकरणकिञ्चित्कालवृत्तिध्वंप्रतियोगित्वादिसत्त्वेऽपि भूतभविष्यद्भिन्नत्वस्य नासंभवः, अत्र भूतत्वादिकं परिचायकमेव भेदप्रतियोगिकालविशेषस्य, तत्तत्कालभेदविशिष्टकालत्वावच्छिन्ने एव तु शक्तिः, तादृशभेदस्यापि शाब्दबोधे भानानङ्गीकारे तु भेदान्तं परिचायकं, तत्तत्कालत्ववत्येव शक्तिरिति बोध्यम् । **भिन्नत्वं वेत्यत्र** वाशब्देनानास्थावेदिता । तन्मूलं तु वर्तमानभविष्यद्भिन्नत्वं भूतत्वमित्याद्यपि वक्तुं शक्यं, विनिगमनाविरहात्, तथा च न भूतादिभेदघटितं वर्तमानत्वं वक्तव्यं, किं तु भूतत्वादिवद्वर्तमानत्वमप्युक्तभेदाघटितमेवेति । **अधिश्रयणादिति** । अधिश्रयणमादिर्यस्याधःश्रयणमन्तो यस्येति बहुव्रीहिद्वये सति कर्मधारयः, अन्यपदार्थः समूहः । कर्मधारयेऽपि स एव विशेष्यः । तादृशसमूहान्तर्गतमध्ये इत्यर्थः । **तत्** = उक्तरूपवर्तमानत्वम् । न'न्वात्मास्ति''पर्वताः सन्ती'त्यादिप्रयोगानुपपत्तिः, तत्रात्मधारणानुकूलव्यापारस्य नित्यतयासाध्यत्वाभावात् क्रियात्वाभावात्, तद्धर्मस्य प्रारब्धापरिसमाप्तत्वरूपवर्तमानत्वाभावादित्याशङ्कां निराकुरुते—आत्मेत्यादिना ।

स्तीति भवति लट्प्रयोगः, 'आत्माऽस्ति', पर्वताः सन्तीत्यादौ तत्तत्कालिकानां राज्ञां क्रियाया अनित्यत्वात्तद्विशिष्टस्योत्पत्त्यादिकमादाय वर्त्तमानत्वमूह्यम् । उक्तं हि भाष्ये—"इह भूतभविष्यद्वर्त्तमानानां राज्ञां क्रियास्तिष्ठतेरधिकरण"मिति ।

❀ दर्पणः ❀

न्यायेन शब्दप्रयोगाधिकरणत्वेनाऽनुगमाच्च न शक्त्यानन्त्यम्, यद्येवमपि तत्तत्कालत्वेन तत्तत्कालबोधस्यानुपपत्तिरिति विभाव्यते, तदाऽस्तु शब्दप्रयोगाऽधिकरणवृत्तिकालत्वव्याप्यधर्मत्वेनोपलक्षिततत्तत्कालत्वावच्छिन्न एव लटः शक्तिः, क्रियारम्भात् पूर्वं समाप्त्युत्तरं च-'अधीते' 'पचती'त्यादिप्रयोगापत्तिस्तु—'स्ववृत्तिप्रागभावाप्रतियोगिवृत्तित्व'स्ववृत्तिध्वंसाऽप्रतियोगिप्रकृतक्रियाऽनुयोगिकत्वा'भ्यां विशेषितेन आधेयतासम्बन्धेनाऽन्वयनियमोपगमेन वारणीया। यत्र तु खण्डक्रियैव धात्वर्थस्तत्र शुद्धाधेयतासम्बन्धेनैव तदन्वयान्ना'ऽऽत्माऽस्ती'त्यादौ दोष इति । 'भूतभविष्यद्भिन्नत्वं वे'त्यत्र वाकारोऽनास्थायां, पूर्वलक्षणापेक्षयाऽस्य गुरुत्वाद्भविष्यत्वस्यापि वर्त्तमानत्वघटितत्वेन तद्ग्रहे, भविष्यत्त्वग्रहे च तदवच्छिन्नभिन्नत्वरूपवर्त्तमानत्वग्रह इत्यन्योऽन्याश्रयाच्च । एवं भूतत्वमादायाप्यन्योन्याश्रयो द्रष्टव्यः। ननु सत्ताश्रयत्वादीनां धात्वर्थत्वे तत्राऽसङ्गतिः, तेषामखण्डत्वेनाऽवयवघटितोक्तलक्षणवर्त्तमानत्वासम्भवादत आह—**आत्मास्तीति । अनित्यत्वादिति ।** सावयवत्वेन प्रागभावप्रतियोगित्वे सति ध्वंसप्रतियोगित्वादित्यर्थः। **तद्विशिष्टस्य** = अनित्यराजक्रियादिविशिष्टसत्तादिरूपार्थस्येत्यर्थः। तथाच केवलसत्तादिरूपाऽर्थे तदसत्त्वेऽप्युक्तविशेषणविशिष्टे तस्मिन् विशेषणांशमादाय तत्सत्त्वं नाऽनुपपन्नमिति भावः। यद्वा तद्विशिष्टेत्यस्य 'तदा अव्यवहितत्वादनित्यत्वस्यैव परामर्शात् तादृशक्रियागतं वर्त्तमानत्वमारोप्य सत्ताद्यर्थको लडित्यर्थः। "तत्र स्वोत्प्रेक्षितत्वं निरस्यति—

उक्तं हीति । तिष्ठतेरधिकरणमिति । आधेयतासम्बन्धेन तादृशक्रियात्मक-

❀ काशिका ❀

तद्विशिष्टस्य = तादृशराजक्रियाविशिष्टस्यात्मादिकर्तृकोक्तव्यापारस्येत्यर्थः। उत्पत्त्यादिकमित्यत्र आदिपदात् समाप्तेरतत्कालभेदस्य च परिग्रहः। तथा चात्मादिकर्तृकोक्तव्यापारस्य नित्यतयोत्पत्त्यादिविरहेऽपि तत्तत्कालिकराजक्रियाविशिष्टस्य तस्योत्पत्त्यादिमत्तया निरुक्तवर्तमानत्वं सूपपदमिति भावः। तत्र 'वर्तमाने लट्' इति सूत्रस्थभाष्यं प्रमाणयति—**उक्तं च भाष्ये इति । तिष्ठतेरधिकरणमिति ।** तत्र कैयटोपाध्यायोऽपीत्थं व्याचष्ट—'तत्र राज्ञां स्थिति-

१ तच्छब्देन । २ राजक्रियादिकमादाय लडाद्युपपादने ।

परतो भिद्यते सर्वमात्मा तु न विकल्पते ।
पर्वतादिस्थितिस्तस्मात् पररूपेण भिद्यते ।। इति । वाक्यपदीये च ।
एवं 'तम आसीत्', 'तुच्छेनाभ्यपिहितं यदासीत्' 'अहमेकः प्रथममासं वर्त्तामि च भविष्यामि चे'त्यादिश्रुतयोऽपि योज्याः । तच्च वर्त्तमान-

❀ दर्पणः ❀

कालविशिष्टत्वात् तासामिति भावः । अनेन भाष्येण वस्तुतस्त्वित्यादिन्योक्तस्यकल्पस्यैव साधुत्वं लभ्यते । तस्मिन्नुक्तलक्षणलक्षितकालस्यैव सर्वत्र क्रियायामाधेयतयाऽन्वयलाभात् । **परतो भिद्यते इति** । सर्वं=पच्यादिधात्वर्थसामान्यं, परतः= स्वाऽपेक्षयाऽन्येन वर्त्तमानत्वादिना, भिद्यते, आत्मा त्वित्यत्रात्मादिपदमात्मसत्ताद्यर्थकं, न विकल्पते—सनातनत्वेन निरवयवत्वादुक्तविशेषणसम्बन्धाऽभावेन भेदाऽनुमितिविषयो न भवतीत्यर्थः । तथाचा'ऽऽत्मास्ती'ति प्रयोगाऽनुपपत्तिरिति पूर्वार्द्धार्थः । समाधत्ते—**तस्मादिति** । विशेषाऽतिरिक्तपदार्थस्य स्वतो व्यावृत्तत्वाऽसम्भवादित्यर्थः । 'पर्वतादी'त्यादिनाऽऽत्मादिपरिग्रहः । **पररूपेणेति** । परस्य = राजक्रियादिरूपार्थस्य, रूपेण=धर्मेण वर्त्तमानत्वादिना—भिद्यते इत्युक्त एवार्थः । **तम इत्यादि** । 'तम आसी'दित्यादयो भूतक्रियागतभूतत्वारोपाद्भविष्यामि चेति भाविक्रियागतभविष्यत्त्वारोपाच्च योज्या इत्यर्थः । पक्षद्वयस्यैवाऽऽकरारूढतां प्रदर्शयन् प्रथमद्योतकत्वपक्षे उपपत्तिमाह—**तच्चेति** । **क्रियासामान्येति** । कालसामा-

❀ काशिका ❀

भूतादिभेदेन भिन्ना पर्वतादिस्थित्यादेर्भेदिकेति क्रियारूपत्वं कालत्रययोगश्चोपपद्यते' इति । अन्यथा पर्वतादिस्थितीनां सदृशावयवत्वात् पूर्वापरीभूतावयवकसमूहत्वरूपक्रियात्वानुपपत्तिः, एवं तासां दुरवधारभेदतया कालभेदानुपपत्तिश्च स्यादिति भावः । क्रियायाः कालरूपत्वे,—क्रियाः तिष्ठतेरधिकरणम् = कालिकसंबन्धेनाधिकरणमित्यर्थकतया यथाश्रुतमेव साधु । 'प्रकृतिपरिणामभूतोऽतिभङ्गुरोऽविभुः क्षणरतद्धारात्मक एव काल' इति मते तु—क्रियापदस्य तत्परिच्छेदककालपरत्वेन तदीयकालस्य पर्वतादिस्थितावात्मसत्तायां चाधेयतासंबन्धेनारोप इत्याशयकं बोध्यम् । **परतो भिद्यत इति** । सर्वं = आत्मसत्तादिकं सर्वं, परतो भिद्यते = परत एव भिद्यते, भेदसाधकं स्वातिरिक्तमेव । **आत्मा तु** = स्वस्वरूपं तु, **न विकल्पते** = स्वतो भेदकं भवति । **पररूपेण भिद्यत** इत्यस्योक्त एवार्थो **हेलाराजीये** स्पष्टः ।

तम आसीदिति । तमोऽज्ञानं तस्य सर्वदा सत्त्वेन भूतकालार्थकप्रत्ययप्रयोगोऽपीत्थमेव निर्वहति । एवमेव 'पिहितमज्ञानेनावृतमासी'दित्यादावपि बोध्यम् । **वर्तमानत्वादीति** । वर्तमानकालादीत्यर्थः । ननु लडादेर्द्योतकत्वं शक्त्युद्बोधकत्वरूपं वाच्यं, तच्च धातोर्वर्तमानत्वादौ शक्ति

त्वादि लडादिभिर्द्योत्यते, क्रियासामान्यवाचकस्य तद्विशिष्टे लक्षणायां लडादेस्तात्पर्य्यग्राहकत्वेनोपयोगात् । 'अन्वयव्यतिरेकाभ्यां तद्रूपं लडादि-

ॐ दर्पणः ॐ

न्यवृत्तिक्रियावाचकस्येत्यर्थः । तद्विशिष्टे—वर्त्तमानकालादिविशिष्टे, वर्त्तमानत्वादि-विशिष्टे वा व्यापार इत्यर्थः । 'लडादे'रित्यादिना लिडादिपरिग्रहः । उपयोगा-दिति । स च प्राक् प्रतिपादितः । तथा च लडाद्यादेशत्वेन तिबादिनां वर्त्तमान-त्वादिद्योतकत्वान्नापाक्षीदित्त्यादौ वर्त्तमानक्रियाप्रतीतिः, क्रियासामान्यशक्तधातो-स्तत्तद्विशिष्टे लक्षणयैव तत्तद्विशिष्टक्रियाबोधोपपत्तौ पृथग्वर्त्तमानत्वादौ तेषां शक्ति-कल्पने गौरवादिति भावः । वाचकत्वपक्षमवलम्ब्याऽऽह—अन्वयव्यतिरेकाभ्या-मित्यादि । नच तक्रकौण्डिन्यन्यायात् कर्त्राद्यर्थबाधः, शक्तताऽवच्छेदकभेदात्, किञ्चैवं 'लः कर्मणी'तिसूत्रं निरवकाशं स्यात्, स्थलान्तरेऽपि विध्याद्यर्थैर्बाधसम्भवा-

ॐ काशिका ॐ

विना न संभवति, एवं च बहूनां धातूनां तत्र शक्तिकल्पनायां गौरवादल्पतरप्रत्ययानामेव वाचकत्वमेव स्यान्न तु द्योतकत्वमित्यत आह—क्रियासामान्येति । वाचकस्येत्यनन्तरं 'धातो'रिति शेषः ।

तद्विशिष्टे इति । वर्तमानत्वादिविशिष्टक्रियायामित्यर्थः । तात्पर्यग्राहकत्वेनेति । विशिष्टल-क्षणायां तात्पर्यग्राहकत्वमेव प्रकृते द्योतकत्वमिति भावः । लक्षणास्वीकाराच्च न शक्तिकल्पना-प्रयुक्तं गौरवं, वृत्तिद्वयेनैकशब्दजन्यबोधानभ्युपगमाद्विशिष्टलक्षणानुसरणं, 'गङ्गायां मीनघोषौ स्त' इति वाक्यघटकगङ्गापदाच्छक्तिलक्षणाभ्यामुपस्थितप्रवाहतीरयोर्बोधानुभवाद्वृत्तिद्वयविरोधे मानाभाव' इति मताभ्युपगमे तु वर्तमानत्वादावेव लक्षणेति बोध्यम् । लडादेर्वर्तमानत्वा-दिवाचकत्वपक्षे तु कर्त्रादेर्लडादिवाच्यत्वं न स्यात्, विशेषेण सामान्यबाधात्, तथा च 'चैत्रमैत्रौ पचत' इत्यादौ कर्तुरभानात् तद्गतद्वित्वाद्यप्रतीतौ द्विवचनबहुवचनानापत्तिः, शबाद्यनुपपत्तिः, तृतीयापत्तिश्च—चैत्रादिपदात् स्यात्, कर्तुरनभिधानात्, अतो द्योतकतापक्ष एव युक्तः । यद्यपि निरवकाशत्वमेवं सति कर्त्रादीनां स्यात्, लोडादिस्थलेऽपि विध्याद्यर्थैर्बाधात्, किं च तक्र-कौण्डिन्यन्यायस्य विधेयविषयतयाऽर्थस्य समर्थसूत्रस्थभाष्यप्रामाण्यादविधेयतया बाधप्रसक्तिरेव न, स्पष्टं चेदं 'नित्यं कौटिल्ये गतौ' इत्यादि सूत्रे भाष्यप्रदीपोद्द्योतादाविति स पक्षोऽपि सूप-पदस्तथापि वाचकतापक्षे प्रत्ययार्थतया प्राधान्यापत्तिः, तदर्थं 'प्रकृतिप्रत्यययो'रिति नियमसंकोचः कल्पनीयः, द्योतकतापक्षे तु 'हेतुमति च' इति सूत्रभाष्यप्रामाण्येन द्योत्यार्थस्य विशेषणत्व-नियमसिद्धौ,—प्रत्ययवाच्यविषयस्य 'प्रकृतिप्रत्यययो'रित्यस्यावतार एवात्र नेति न संकोच-कल्पनाप्रसक्तिः, स्पष्टं चेदं 'मञ्जूषादा'वित्ययं [1]पक्ष एव साधीयानिति बोध्यम् । अत एवा-

[1] अयं = द्योतकतापक्षः ।

वाच्यमेव, अन्यथा प्रत्ययानां वाचकत्वविलोपापत्ति'रित्यपि पक्षान्तरम् ।

लिडर्थमाह—परोक्षे इति । 'परोक्षे लि'डिति सूत्रात् । कालस्तावदद्यतनानद्यतनभेदेन द्विविधः, द्विविधोऽपि भूतभविष्यद्रूपः, तत्रानद्यतने भूते परोक्षे लिडित्यर्थः, तेनाद्यतने भूते, अनद्यतने भविष्यति, भूतेऽप्यपरोक्षे च न लिट्प्रयोगः । परोक्षत्वञ्च—'साक्षात्करोमी'त्येतादृशविषयताशालि-

❀ दर्पणः ❀

दिति भावः । अन्यथा = अन्वयव्यतिरेकयोः शक्त्यग्राहकत्वे । **विलोपापत्तिरिति,** सर्वत्र प्रकृत्यैव तत्तत्प्रत्ययार्थत्वाभिमतबोधसम्भवादिति भावः, अधिकं सुबर्थनिर्णये वक्ष्यते । **अनद्यतने भूत इति ।** 'भूते' इति, 'अनद्यतने ल'ङिति सूत्राभ्यां तत्तत्पदानुवृत्तिरिति भावः । **न लिट्प्रयोग इति ।** उक्तार्थस्य बाधात् पपाचेत्यादिजबोधानन्तरमनद्यतनत्वादिसन्देहाऽनुदयाद् भूतत्वादिवत्तयोरपि तद्वाक्यजबोधे क्रियांशे विशेषणतया भानमभ्युपेयं,—तच्च वाचकतां, द्योतकतां वा विनाऽनुपपन्नमिति लिटस्तदभ्युपगम आवश्यक इति भावः । ननु परोक्षत्वं प्रत्यक्षाऽन्यज्ञानविषयत्वं,—तथाच प्रत्यक्षक्रियायामपि श्रुतानुमितत्वयोः सत्त्वात् 'पपाचे'त्यादिप्रयोगापत्तिरत आह—**परोक्षत्वञ्चेति ।** यथाश्रुतप्रत्यक्षाऽविषयत्वस्योपनीतक्रियायामभावेन तत्र 'पपाचे'त्यादिप्रयोगाऽनुपपत्तिरत आह—**साक्षात्करोमीति ।** 'साक्षात्करोमी'त्येतत्प्रतीतिसाक्षिकलौकिकविषयत्वाऽभाव-

❀ काशिका ❀

त्राप्यग्रे 'इत्यपि' पक्षान्तर'मिति—'अपि'पदघटितमस्वरससूचकमुक्तम् । **तद्रूपम्** = वर्तमानत्वादिरूपम् । **लडादिवाच्यमिति ।** वाचकतावच्छेदकं लट्त्वलिट्त्वादिकं, तदपि लडादेशे तिबादावनुभवसिद्धमेव, तच्च तत्रारोपितम्, अत एव—'यजेते'त्यत्रास्त्यंशद्वयम्, आख्यातत्वं, लिङ्त्वं च, तत्र लिङ्त्वेन शाब्दी भावनाभिधीयत''इति मीमांसकग्रन्थः संगच्छते । अन्ये तु तिबादिकमेव तथा, लट्त्वादिज्ञानविधुरस्यापि[२] शाब्दबोधोत्पत्तेः, तत्तदानुपूर्वीविशेषस्य तद्बोधे तात्पर्यग्राहकत्वाच्च न 'पठ्यती'त्यादौ 'वर्तमानत्वादिबोधापत्तिरि'त्याहुः ।

अनद्यतने भूते इति । अथ भवोऽद्यतनस्तद्भिन्नकालवृत्तिः परोक्षा या क्रिया तदर्थकाद्धातोर्लिडिति सूत्रार्थः । एवमेव 'अनद्यतने लुट्' इत्यादौ व्याख्यानं बोध्यम्, एवं चैतन्मते तदर्थबोधको लिडित्यर्थः, पक्षान्तरे तु तद्वाचक इत्यर्थः । क्रमेण 'अनद्यतन' इत्यादिविशेषणप्रयोजनमाह—**तेनेत्यादिना ।** तेन—अनद्यतन इत्यादिविशेषणोपादानेन । 'अद्यतने भूते' इत्यादिसप्तम्यन्तयुगलत्रिकस्य **'न लिट्प्रयोगः'** इत्यनेनान्वयः । **एतादृशविषयतेति ।**

१ वाचकत्वपक्षोऽपि । २ पामरस्य ।

ज्ञानाविषयत्वम्, न च "क्रिया नामेयमत्यन्तापरदृष्टा पूर्वापरीभूतावयवा न शक्या पिण्डीभूता निदर्शयितु"मिति भाष्यात् तस्या अतीन्द्रियत्वेन 'परोक्षे' इत्यव्यावर्त्तकमिति शङ्क्यं, पिण्डीभूताया निदर्शयितुमशक्यत्वेऽप्यवयवशः 'साक्षात्करोमी'ति प्रतीतिविषयत्वसम्भवात्, अन्यथा 'पश्य

❀ दर्पणः ❀

वत्त्वमित्यर्थः। उक्तस्थले प्रत्यक्षविषयतासत्त्वेऽपि तादृशविलक्षणविषयत्वाभाववत्त्वमक्षुण्णमिति न तदनुपपत्तिः, प्रत्यक्षं तादृशशब्दप्रयोक्तुर्ग्राह्यं, 'दशमस्त्वमसी'त्यादौ शाब्दज्ञानसहकृतमनसैव दशमसाक्षात्कारो, न तु शब्दात्, लौकिकविषयतानियामकेन्द्रियसंयोगादेरभावे शाब्दे तद्वत्त्वाऽसम्भवात्, अत एव,— 'तत्त्वमसी'त्याद्याचार्योपदेश-शम-दमादिसंस्कृतं मन आत्मदर्शने कारणमिति गीताभाष्ये उक्तमिति सर्वं समञ्जसम्। **'क्रिया नामेय'**मिति भाष्ये 'साऽसावनुमानगम्ये'ति शेषः, क्रिया = साध्यत्वेन प्रतीयमाना—इयं पचतीत्यादिव्यवहारविषयीभूता, यतः पूर्वाऽपरीभूता = क्रमिकानेकव्यापारसमूहात्मिका, अतोऽत्यन्ताऽपरदृष्टा = परेण—प्रत्यक्षप्रमाणेनाऽत्यन्तमदृष्टा, तज्जन्यज्ञानाऽविषया इति यावत्।

पिण्डीभूतेति। अवयवानामाशुविनाशित्वेन पिण्डस्यैवाऽभावादिति भावः। ननु तर्हि तस्यां किं प्रमाणमत आह—**साक्षादिति।** विक्लित्त्यादिरूपकार्य्याऽनुमेयेति। **अन्यथेति।** क्रियाया अवयवशोऽपि साक्षात्कारानभ्युपगम इत्यर्थः। **प्रतिभातीति।** उक्तार्थं एवाऽस्मद्बुद्धिविषयो भवतीत्यर्थः। ननु क्रियाऽवयवा अपि क्रियावदतीन्द्रिया एव, यथा पचेरुदकसेचनादयोऽवयवास्तथा तेषामप्य-

❀ काशिका ❀

एतादृशशब्दाभिलप्यमानविषयतेत्यर्थः, ज्ञाने वक्तृवृत्तित्वं निवेश्यं, तेनान्यवृत्तितादृशज्ञानविषयत्वेऽपि 'अयं पपाचे'त्यादिप्रयोगस्य नानुपपत्तिः। **अव्यावर्तकमिति।** कस्याश्चित् क्रियायाः प्रत्यक्षविषयत्वे तथाविधाभिप्रायेण तादृशप्रयोगव्यावर्तनाय 'परोक्षे' इति सार्थकं भवेत्, क्रियामात्रस्य पारोक्ष्ये तु तन्निरर्थकमित्याशङ्कते इत्यर्थः। **'अपरिदृष्टे'**ति पाठमाश्रित्य,—पूर्वापरीभूता अवयवा यस्याः,—अत एव—पिण्डीभूता निदर्शयितुं न शक्या, पूर्वापरीभूतावयवकत्वेन पिण्डीभावस्यैवाभावादिति—भाष्यस्य व्याख्यानमनुसृत्य समाधत्ते—**पिण्डीभूताया इति।** **अवयवशः** = एकैकस्यावयवस्येत्यर्थः, 'संख्यैकवचनाच्च' इति शस्। **प्रत्यक्षत्वसंभवादिति।** तथा च क्रियावयवानां वक्तृपरोक्षत्वदशायां लिट्प्रयोगस्य साधुत्वव्यावर्तनाय तदावश्यकमेवेति भावः। अवयवानामपि परोक्षत्वे बाधकमाह—**अन्यथेति।** **दर्शनकर्मता न स्यादितीति।** तथा च प्रामाणिकस्य तादृशप्रयोगस्यानुपपत्तिरिति भावः।

मृगो धावती'त्यत्र तस्या दर्शनकर्मता न स्यादिति प्रतिभाति, व्यापाराविष्टानां क्रियानुकूलसाधनानामेवात्र पारोक्ष्यं विवक्षितमतो नोक्तदोषः, 'अयं पपाचे'त्याद्यनुरोधात् 'व्यापाराविष्टाना'मित्यपि वदन्ति। कथं तर्हि

❀ दर्पणः ❀

वयवास्तेऽपि समूहरूपेणैव धातुवाच्याः, यस्तु क्षणाऽवच्छिन्नस्तद्रूपोऽवयवः, स तु न धातुवाच्यः, किन्त्ववयवसमूहाऽऽत्मनैव, आश्रितक्रमरूपत्वात्तद्वाच्यस्य, एवञ्च सदसद्रूपा क्रिया न सद्विषयेन्द्रियग्राह्या, तदुक्तं—

"क्रमात् सदसतां तेषामात्मना न समूहिनः।
सद्वस्तुविषयैर्यान्ति सम्बन्धं चक्षुरादिभिः॥" इति।

'अत्यन्तापरदृष्टे'ति—भाष्यस्याऽप्यवयवरूपेण समूहात्मना चाऽदृष्टेत्येवाऽर्थः, अत एव 'वर्त्तमाने ल'डिति सूत्रे भाष्ये,—"अस्ति वर्त्तमानो कालः, परं त्वादित्यगतिवन्नोपलभ्यत" इत्युक्तम्, तस्य 'प्रत्यक्षेणे'ति शेषः। एवञ्च वर्त्तमानत्वाक्रान्तक्रियाणां स्पष्टमेवाऽप्रत्यक्षत्वं तत उपलभ्यते, 'पश्य मृगो धावती'त्यादौ तु दृशिर्ज्ञानाऽर्थको, धावतिर्वा फलपर इति न कश्चिद्दोषः। किञ्च,—अवयवस्य प्रत्यक्षत्वे 'प्रकृतः कट'मित्यादाववयवातीतत्वेन समुदायाऽतीतत्वमादाय क्ताद्युपपादनवदवयवप्रत्यक्षत्वेन समुदायप्रत्यक्षत्वमादाय, 'परोक्षे' इत्यस्य चारितार्थ्ये भाष्यस्थपूर्वपक्षस्य निर्हलत्वापत्तिरित्यपरितोषान्मतान्तरमाह— **व्यापाराविष्टानामिति**। एवञ्चाऽतीतानद्यतनव्यापाराविष्टपरोक्षकर्त्तृकक्रियावृत्तेर्धातोर्लिडिति,—'परोक्षे लि'डिति सूत्रार्थः। **अयं पपाचेति**। तदानीं कर्त्तुरपारोक्ष्येऽपि व्यापारदशायां पारोक्ष्यसत्त्वादुक्तप्रयोगोपपत्तिरिति भावः। **इत्यपि वदन्तीति**। 'मतान्तराऽनादरेऽत्रापि पूर्वोक्तार्थस्याऽऽपातरमणीयत्वं मन्वाना भाष्याऽनुसारिण' इति शेषः।

अत्राहुर्नैयायिकाः—" पूर्वाऽपरीभूताऽवयवसमुदायाऽऽत्मकपारिभाषिकक्रियावाच्यप्रत्यक्षत्वं युक्तमेव, समूहस्यैवाऽभावात्, तदवयवानामपि पारोक्ष्यं तु सर्वा-

❀ काशिका ❀

प्रकारान्तरेण परोक्षपदं सार्थकयतामन्येषां मतमाह—**व्यापाराविष्टानामिति**। व्यापारविशिष्टानामित्यर्थः। **नोक्तदोष इति**। व्यापाराविष्टसाधनानां वक्तुः प्रत्यक्षदशायाम् 'अयं पपाचे'ति प्रयोगवारणार्थतया सार्थक्ये सत्यव्यावर्तकत्वरूपो दोषो नेत्यर्थः। व्यापारस्य विशेषणविधया निवेशप्रयोजनमाह—**अयं पपाचेति**। कर्तुः प्रत्यक्षदशायां तादृशप्रयोगानुपपत्तिरिति 'व्यापाराविशिष्ट'-निवेशः। वक्तुः—प्रत्यक्षाविषय-कर्तृकस्थले 'चैत्रः पपाचे'त्यादावेव लिट्प्रयोगः स्यादिति भावः। अत एवेदंशब्दघटितानुधावनम्। अपि वदन्तीत्यनेनारुचिसूचनं कृतं, तद्बीजं तु क्रियायामेव परोक्षेतिविशेषणान्वयेऽप्युक्तरीत्या सार्थकत्वे संभवति तथाविधसाधनान्वयानौचित्यं, 'धातोः

'व्यातेने किरणावलीमुदयन' इति, स्वक्रियायाः स्वप्रत्यक्षत्वादिति चेत्;

॥ दर्पणः ॥

ऽनुभवविरुद्धं, तत्र प्रत्यक्षकारणचक्षुःसंयुक्तसमवायादेः सत्त्वात्, अन्यथा घटपुस्तकादेरप्यप्रत्यक्षत्वाऽऽपत्तिरिति बहुव्याकोपः, 'अधिश्रयणं साक्षात्करोमी'ति सार्वजनीनप्रतीतेश्च, प्रतीतेः पदार्थाऽसाधकत्वे व्यवहारमात्रोच्छेदाऽऽपत्तिश्च। 'सदसतां तेषा'मित्यस्य विद्यमानाऽविद्यमानावयवरूपाणामित्यर्थात् समूहात्मकक्रियायाः पारोक्ष्यप्रतिपादनपरत्वान्न हरिवाक्यविरोधोऽपि, अन्यथा क्रिया सदसद्रूपेति वदतो व्याघातः स्पष्ट एव, कालस्य प्रत्यक्षत्वाऽभावेन तदनुवादकभाष्योपष्टम्भोपन्यासोऽपि नाऽवयवानां पारोक्ष्योपपादकः, 'प्रकृतः कट'मित्यत्राऽप्यवयवाऽतीतत्वमादायैव प्रयोगोपपत्तौ समुदायाऽतीतत्वारोपे मानाभावेन तद्दृष्टान्ताऽसङ्गतिश्च, दार्ष्टान्तिकेऽवयवप्रत्यक्षत्वेन समुदायप्रत्यक्षत्वमारोप्य पूर्वपक्षस्य निर्दलत्वापादनमपि स्वाग्रहमूलकमेवाऽत एव भाष्ये,–'पश्य मृगो धावतो'त्यनेन लौकिकविषय-

॥ काशिका ॥

इत्यधिकारात् क्रियायाः शोत्रोपस्थितेरित्यादिकमवसेयम्। भाष्यप्रदीपोद्द्योतादिकृतस्तु–, "शतपत्रभेदनकर्त्तुरतिसंनिकृष्टस्यापि स्वाङ्गुल्यादिगतक्रियाभेदादेरनवगमेन,—पदार्थसौक्ष्म्यवत् सूक्ष्मकालावच्छिन्नत्वस्यापि प्रत्यक्षप्रतिबन्धकतया,—क्रियावयवानामपि प्रत्यक्षत्वं न संभवति, आश्रयनाशाजन्यगुणनाशस्य विरोधिगुणप्रयुक्तत्वमिति नियमे मानाभावेन विभागानभ्युपगमेन क्रियाणां त्रिक्षणावस्थायित्वं मन्यन्ते, तथा हि प्रथमे क्षणे क्रियोत्पत्तिस्ततो द्वितीये पूर्वसंयोगनाशस्तृतीये उत्तरदेशसंयोगोत्पत्तिश्चतुर्थे क्रियाया नाशः, स्वजन्यसंयोगनाशहेतोः पूर्वक्षणे सत्त्वात्, एवं सूक्ष्मकालावच्छिन्नत्वम्; यैस्तूत्तरदेशसंयोगोत्पत्तिर्द्वितीयक्षण एवाङ्गीक्रियते, पूर्वदेशसंयोगनाशात्मकत्वस्वीकारात् तस्य,—तन्मते तस्याः क्षणावस्थायित्वेन सुतरां सूक्ष्मकालावच्छिन्नत्वम्। अत एव 'क्रिया नामेयम्—' इत्यादि भाष्यम्,—'अपरदृष्टे' इतिपाठाऽभिप्रायेण"परेण = प्रधानेन प्रत्यक्षात्मकप्रमाणेनात्यन्तमदृष्टा—अवयवरूपेण समूहरूपेण चेत्यर्थ" इति व्याख्यातं 'निष्ठा' इति सूत्रे कैयटोपाध्यायैः। 'पिण्डीभूत'इति त्वाशुतरविनाशिनां क्रमिकाणां मेलनासंभवात् पिण्डीभावासंभवतात्पर्यकमेव, तस्मादुत्तरदेशसंयोगादिरूपफलानुमेयैव सर्वाऽपि क्रियेति भूवादिसूत्रभाष्यादौ स्पष्टं, 'पश्य मृगो धावती'त्यस्य–दृशेर्ज्ञानसामान्यार्थकत्वेन संयोगात्मकफलविषयकदर्शनविवक्षया वोपपत्तिः। एवं च व्यर्थमेव परोक्षपदोपादानमित्याशङ्क्य–व्यापाराविष्टानामिति पक्षमेवाङ्गीचक्रुः, मनोरमायामप्ययमेव पक्षः स्थितः। यद्यपि क्रियाया अप्रत्यक्षत्वे तद्विशिष्टसाधनप्रत्यक्षं दुरुपपादमतस्तद्वैयर्थ्यं तदवस्थमेव, तथापि व्यापारवैशिष्ट्यसमये साधनपारोक्ष्यस्य विवक्षितत्वान्नोक्तदोष इति भावः।

कथंताया हेतुमाह—स्वक्रियाया' इति। प्रत्यक्षत्वात् = स्वात्मकवक्तुरवश्यं प्रत्यक्ष-

असङ्गतमेव, व्यासङ्गादिना स्वव्यापारस्य परोक्षत्वोपपादनेऽपि बहुतरमनः-प्रणिधानसाध्यशास्त्रार्थनिर्णयजनकशब्दरचनात्मके ग्रन्थेऽनद्यतनत्वाऽतीतत्वयोर्विस्तारक्रियायामसत्त्वेन अनद्यनातीतत्वयोरभावेन तदर्थकलिड-सम्भवात् ।

❀ दर्पणः ❀

ताशाल्यर्थकदशिकर्मत्वं धावतेः प्रतिपादितं, कथमन्यथा आगारान्तरस्थितस्य न तादृशप्रयोगः, मृगकर्तृकधावने ज्ञानविषयत्वरूपज्ञानकर्मत्वाऽबाधात्, धावतेः संयोगरूपफलार्थकत्वे व्यापारवाचकत्वाऽभावादधातुत्वप्रसङ्गश्च, स्वजनकव्यापारगत-पौर्वापर्यारोपेण क्रियात्वोपपादने चाऽप्रत्यक्षत्वापत्तिस्तदवस्थैवेति न किञ्चिदेतत्, तस्मात् पूर्वोक्तमतमेव निराबाध"मिति ।

व्यासङ्गादिनेति । यथा 'मत्तोऽहं किल विललापे'त्यत्र मदादिना मनोऽसन्निधानात् क्रियापारोक्ष्यं तद्वदित्यर्थः ।

लिडसम्भवादिति । अत्रेदं चिन्त्यं—न वास्तवं पारोक्ष्यादि लिडादि-नियामकम्, 'अध्यास्त सर्वर्तुसुखामयोध्या'मित्यत्र लङोऽसाधुतापत्तेः, किन्तु

❀ काशिका ❀

विषयत्वात् । पक्षान्तरे क्रियाविष्टसाधनस्य स्वप्रत्यक्षत्वादिति हेतुरुन्नेयः । ननु विषयान्तरसंचार-रूपव्यासङ्गादिना स्वव्यापारस्य, व्यापारविशिष्टस्य च स्वप्रत्यक्षविषयत्वाभावरूपपारोक्ष्यसंभवान्न लिट्प्रयोगासंगतिरित्याशङ्क्य भूतत्वाद्यसंभवनिबन्धनां तामाह—व्यासङ्गादिनेति । अत एव 'बहु जगद पुरस्तात्तस्य मत्ता किलाहम्' इति प्रयोग उपपन्नः । अनद्यतनेति । किरणावली-कर्मकविस्तारानुकूलव्यापारावच्छेदेनाद्यतनभिन्नत्वाभावात्, अतीतकालसंबन्धाभावाच्चेत्यर्थः । इदं चा'नद्यतनत्वमतीतत्वं च द्वयं कालाघटितं क्रियाविशेषण'मिति मतमाश्रित्याभिहितम् । 'अद्यतनभिन्नातीतकालस्य क्रियाविशेषणत्व'मिति निष्कृष्टभाष्यमते तु—तादृशक्रियायामद्यतन-भिन्नातीतकालसंबन्धाभावादिति हेतुर्बोध्यः । अनद्यतनकालवृत्तित्वातीतकालवृत्तित्वयोरिति वा भूतानद्यतनातीतत्वयोरित्यस्यार्थो बोध्यः । अत्र क्रियायामनद्यतनभूतकालसंबन्धस्य, परोक्षत्वस्य चारोपादुपपद्यत एव लिट्प्रयोगः, आरोपप्रयोजनं तु सुकरत्वशीघ्रनिर्वर्त्यत्वादिबोधनम्, तत्फलं त्वध्येतॄणां पदार्थतत्त्वनिश्चयफलकैतद्ग्रन्थं ज्ञातुं सोत्कण्ठानामाह्लादः, परोक्षत्वारोपोऽप्येतत्फलकः, अनायासेन ग्रन्थनिर्माणमप्यत्र व्यङ्ग्यम् । एवमेव 'इयं नु कदा गन्ता यैवं पादौ निदधाति', देवे वृष्टे—'देवश्चेद्वृष्टः संपन्नाः शालयः' इत्यादिप्रयोगोपपत्तिः । आद्ये अद्यतनेऽप्यनद्यतनत्वारोपः, अतिविलम्बगमनप्रत्यायनं प्रयोजनम्, अन्त्ये हेतुभूतमेघोत्पत्तिगतमतीतत्वं वृष्टौ, तद्गतमतीतत्वं च शालिसंपत्तावारोप्यत इति भूते क्तः । अत एव मेघोत्पत्त्यनन्तरकालेऽप्युक्तप्रयोगनिर्वाहः । एतेन' कार्यसंपत्तितादात्म्यस्य कारणीभूताप्शालिसंयोगे-

लुडर्थमाह—श्वो भाविनीति । अनद्यतने भाविनीत्यर्थः । 'अनद्यतने लु'डिति सूत्रात्, यथा 'श्वो भवितेत्यादौ ।

❀ दर्पणः ❀

वैवक्षिकं तत्, तथा 'वक्ष्यति च स्वयमेव सारकृत्—'अनद्यतनभूतत्वेन विवक्षिते लङ्', तत्रैव 'पारोक्ष्यविवक्षायां लि'डिति । प्रकृते चाऽनायासनिष्पन्नत्व-शीघ्रनिष्पन्नत्व-प्रतीतिफलकभूताऽनद्यतनत्वविवक्षायाः, 'एवं सूक्ष्मकालेन करिष्यामि यत्र काले मयाऽपि साक्षात्कर्तुमशक्य'मितिप्रतीतिफलकपारोक्ष्यविवक्षायाश्च सत्त्वाल्लिडुपपत्तिसम्भवादिति । अनद्यतन इति । 'अतीताऽव्यवहितरात्रिपश्चार्द्धविशिष्टाऽऽगामिरात्रिपूर्वार्द्धोपेतं दिनमद्यतनम्, एतद्भिन्नकालत्वमनद्यतनत्व'मिति वृत्तिकारादयः । कैयटस्तु—'लुङ्सूत्रेऽतीतरात्रेरन्त्ययामेनाऽऽगामिरात्रेराद्ययामेन सहितो दिवसोऽद्यतन' इत्यूचे । अत्रेदमवधेयम्—अनद्यतनभूते यदा भूतत्वमात्रविवक्षा तदा लुङेव, तेन 'ह्योऽपाक्षी''दित्यादौ भूतत्वमात्रविवक्षायां लुङि, पश्चाद् ह्यःपदेन सम्बन्धेनाद्यतनत्वप्रतीतिरिति न लुङोऽसाधुता, एवमनद्यतनभविष्यति भविष्यत्त्वमात्रविवक्षया लृट्—श्वो यक्ष्यमाणे 'देवता यक्ष्यती'त्यत्र, पश्चाद्द्यनद्यतनत्वप्रतीतिरिति ।

परे तु—"साङ्ग्यागस्य द्व्यहात्मककालसाध्यत्वात्तदधिकरणद्व्यहात्मककालस्याऽनद्यतनत्वाऽभावेन लुटोऽनवसराल्लृडुपपत्तिः, "अद्यप्रभृति मे दाश ! ब्रह्मचर्यं भविष्यती'ति"वदित्याहुः ।

नन्व'हमेकः प्रथममासं, वर्त्तामि, भविष्यामि चे'त्यत्र धात्वर्थसत्तायां वर्त्तमानप्रागभावप्रतियोगित्वस्य भविष्यत्त्वस्य बाधात्तदर्थकाद्भविष्यदर्थकप्रत्ययाप्रसक्तिरत आह—तत्त्वञ्चेति । वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकसमयवत्त्वमिति पाठः,

❀ काशिका ❀

ऽध्यासात् तस्यातीतत्वेन वृष्ट्यनन्तरं तथाविधप्रयोगोपपादनेऽपि मेघोत्पत्त्यनन्तरं तदुपपादनासंभव इति शङ्का निरस्ता । एवं ग्रामान्तरं जिगमिषुभिः स्थलविशेषे कूपसत्तानिर्णयवद्भिर्भाविनि तल्लाभे'कूपो भविष्यति', अतीते—'कूपोऽभू'दिति प्रयुज्यते, तत्रापि लाभगतभावित्वादेरारोप एव तत्प्रयोगनिर्वाहक इति 'क्षिप्रवचने लृट्', 'लुङ्' इत्यादिसूत्रभाष्ये—इति परे प्रतिपन्नाः ।

ननु श्वो भाविनीत्ययुक्तम्, तृतीयादिदिनभाविन्यपि पाकादौ पक्तेत्यादिप्रयोगस्येष्टत्वात् । श्व इत्यस्य निर्मूलत्वाच्चेत्याशङ्कमान आह—अनद्यतन इति । तथा च तदुपलक्षणं वृत्त्यनुरोधेन तु तदुक्तिरिति भावः । भावित्वं=भविष्यत्त्वं, तच्च—वर्तमानप्रागभावप्रतियोगिसमयत्वम् । तत्र प्रमाणमाह—'अनद्यतन-' इति । तत्र 'भविष्यति गम्यादयः' इत्यतो भविष्यतीत्यनुवर्तते, एवं च 'पक्ते'त्यत्रानद्यतनभविष्यत्कालिकी एककर्तृका पचिक्रियेति बोधः, श्वःपदाद्युप-

ॐ दर्पणः ॐ

तथाच तदर्थव्यापाराऽधिकरणस्य कालस्याऽनित्यराजक्रियाऽऽद्यात्मकस्योक्तभविष्यत्वात् तदादायैव लृडुपपत्ति"रिति यथाश्रुतार्थाऽनुसारिणः ।

अन्ये तु–"ननु येषां मते नश्यत्यादिधातूनां नाशमात्रमर्थस्तेषां भविष्यत्त्वस्य वर्त्तमानप्रागभावप्रतियोगित्वसत्त्वे, श्वोभाविनाशके 'परश्वो नङ्क्ष्यती'ति प्रयोगापत्तिः, वर्त्तमाननाशप्रागभावप्रतियोगिनि तन्नाशे परश्वस्तनकालवृत्तित्वसत्त्वात्, नच परश्वस्तनकालस्य भविष्यत्त्वघटकप्रागभावेऽन्वयाऽभ्युपगमात् तस्य च तत्प्रागभावे बाधान्नोक्तप्रयोगापत्तिरिति वाच्यं, तथा सति श्वोभाविनाशकेऽपि 'श्वो नङ्क्ष्यती'ति प्रयोगाऽनुपपत्तिः, तन्नाशप्रागभावे श्वस्तनकालसम्बन्धबाधादत आह—**तत्त्वञ्चेति** । अत्र 'समय'पदोपादानं, 'कालो लडाद्यर्थ' इत्यभिप्रेत्य, न तु तस्य लक्षणे निवेशः, प्रयोजनाभावाद्, विद्यमानप्रागभावप्रतियोग्युत्पत्तिकत्वस्यैव सम्यक्त्वात्, यत्र तूत्पत्तिरेव धात्वर्थस्तत्र तदघटितमेव तन्निर्वक्तव्यम्, अन्यथोत्पत्तेर्द्वैधा भानप्रसङ्गात्, एवञ्चोक्तस्थले भविष्यत्त्वघटकोत्पत्तौ परश्वस्तनकालवृत्तित्वबाधान्नोक्तप्रयोगापत्तिरिति"त्थमवतारयन्ति ।

ॐ काशिका ॐ

परस्थापितकालविशेषस्य क्रियायामन्वयो, न प्रत्ययार्थघटकप्रागभावे, न वा तदर्थकर्त्रादौ, प्रागभावस्य पदार्थैकदेशत्वेन 'पदार्थः पदार्थेने'ति व्युत्पत्तिविरोधात्, परश्वो भाविनि, परश्वः पक्तरि च–'श्वो भविता', 'श्वः पक्ते'त्यादिप्रसङ्गाच्च । परश्व आद्यक्षणप्रारब्धपाकादिस्थले परश्वः पक्ता, परश्वो भवितेत्यादेरनुपपत्तेश्च, परश्वस्तनसत्तादेः प्रागभावे श्वस्तनत्वबाधात् । अन्त्ये तथाविधपाकादिप्रागभावे परश्वस्तनत्वबाधात्, चरमपक्षे श्वःपक्तरि 'परश्वः पक्ते'त्याद्यापत्तेस्तस्याधिकरणकारकत्वेन क्रियान्वयस्यैव न्याय्यत्वाच्च । ननु क्रियायामन्वयाभ्युपगमेऽपि श्वोभाविनि 'परश्वो भविते'ति प्रयोगापत्तिः, धात्वर्थसत्तायां परश्वस्तनत्वस्याबाधात्, न च तत्कर्तृकधात्वर्थत्वावच्छेदेन तदन्वयाभ्युपगमान्नेयमापत्तिरिति वाच्यम्, श्वोभाविन्यपि 'श्वो भविते'ति प्रयोगानापत्तेः, परश्वस्तनतदीयसत्तायाः श्वस्तनत्वाभावदिति चेन्न । तत्रोत्पत्त्यर्थः एव धातुतः प्रतीयत इत्यनुभवात्, श्वःपदाद्युपस्थापितकालवृत्तित्वस्य स्वनिरूपककालोत्पत्तिकत्वविशिष्टाश्रयत्वसंबन्धेन वा क्रियायामन्वयोपगमादुक्तदोषो निरसनीयः । अनद्यतनभविष्यत्यपि भविष्यत्त्वमात्रविवक्षायां लृडेव, 'सावर्णिको नाम मनुर्भवान् भविष्यति' इत्यादौ यथा, एवमनद्यतनभूतेऽपि भूतत्त्वमात्रविवक्षायां लुङ्, यथा 'सुरथो नाम राजाभूत्' इत्यादौ, अत एवानद्यतनत्वादेर्वाच्यत्वाङ्गीकारः । वस्तुतस्तस्य प्रयोगसाधुत्वनिमित्तत्वाभ्युपगमे तु 'इयं नु कदागन्ता' 'भवान् भविष्यति' इत्यादिप्रयोगानिर्वाहात् । एवं प्रहरानन्तरमद्यैव गमनकर्तरि देवदत्ते—'गमिष्यति देवदत्तो न गन्ता' इत्यादिप्रयोगानुपपत्तेश्च भविष्यत्कालिकदेवदत्तकर्तृकगमनाभावस्य बोधनीयस्य बाधात् । अनद्यतनत्वस्य वाच्यत्वे

लृडर्थमाह—भविष्यतीति । भविष्यत्सामान्ये इत्यर्थः, 'लृट् शेषे च'ेति सूत्रात्, यथा 'घटो भविष्यती'त्यादौ । तत्त्वञ्च वर्त्तमानप्रागभावप्रतियोगिसमयोत्पत्तिमत्त्वम् ।

लेटोऽर्थमाह—¹विध्यादाविति । 'लिङर्थे ले'डिति सूत्रात् । लिङर्थश्च विध्यादिरिति वक्ष्यते ।

लोडर्थमाह—प्रार्थनेति । आदिना-विध्याद्याशिषो गृह्यन्ते, 'आशिषि

❀ दर्पणः ❀

अत्रेदमवधेयम्,—'इहाऽद्य घटो भविष्यती'त्यादौ देशकालविशेषादेरधिकरणत्वेन धात्वर्थोत्पत्तावेवाऽन्वयः । ननु भविष्यत्त्वघटकप्रागभावे उत्पत्तिमति वा तथा सति कपालनाशजन्यघटनाशस्थले 'इह कपाले घटध्वंसो भविष्यती'ति प्रयोगाऽऽपत्तिर्घटरूपप्रतियोग्यात्मकघटध्वंसप्रागभावस्य कपाले सत्त्वात्, एवं श्वोभाविन्य'द्य भविष्यती'ति प्रयोगप्रसङ्गश्च, अद्यतनकालवृत्तित्वस्य प्रागभावे सत्त्वात्, तथा भवने श्वः समुत्पद्य प्राङ्गणे परश्वो गमिष्यति मैत्रे,—'प्राङ्गणे परश्वो भविष्यती'ति प्रयोगाऽऽपत्तिः, उत्पत्तिमतो मैत्रस्य प्राङ्गणवृत्तित्वात्, परश्वस्तनकालवृत्तित्वाच्च, यथोक्ते तु तस्य परश्वस्तनकालवृत्तित्वेऽप्युत्पत्तेस्तत्कालावृत्तित्वान्न कश्चन दोषः—एवञ्च वर्त्तमानप्रागभावप्रतियोग्युत्पत्त्यनुकूलो घटाश्रयको व्यापार इति बोधः, तथाचोत्पत्त्यघटिते भविष्यत्त्वे लृडादेः शक्तिर्लाघवात्, तदघटिते तु लक्षणेति न नङ्क्ष्यतीत्याद्युक्तस्थल उत्पत्तिबोधानुपपत्ति"रिति । विध्याशिषाविति । आशीस्तु हितविषयकलोडाद्यन्तशब्दप्रयोक्त्रिच्छा । भवतु ते इति । हितविषयकमदिच्छाविषयत्व-त्सम्बन्धि शिवप्रसादकर्तृकं भवनमिति बोधः ।

❀ काशिका ❀

तु तद्विशिष्टभविष्यत्कालिकताद्दृशक्रियाभावस्यावाधादुक्तप्रयोगोपपत्तिरिति बोध्यम् । एवमादौ भविष्यत्त्वमात्रविवक्षायां लृट् । ततः श्वःशब्दयोगेऽनद्यतनत्वप्रतीतावपि न तस्य निवृत्तिरन्तरङ्गसंस्कारस्यानिवर्तनात् । अत एव 'श्वो यद्ये' इत्यादिप्रयोगोपपत्तिः । 'लृट् शेषे च' इतीति । अत्र 'भविष्यति गम्यादयः' इति सूत्राद् 'भविष्यति' इत्यनुवर्तते । क्रियार्थक्रियावाचकपदासत्त्वं शेषपदार्थः, 'तुमुन्ण्वुलौ क्रियायाम्—' इति सूत्रोत्तरमेतस्य पाठात् । चकारात् तत्सत्त्वेऽपि लृट् । समयोत्पत्तिमत्त्वमिति । उत्पत्तौ श्वःपदादिप्रतिपाद्यकालविशेषसंबधान्वयेन श्वोभाविनि 'परश्वो भविते'त्याद्यतिप्रसङ्गो न, एतदर्थमेवोत्पत्त्यनन्तरभावः, अन्यथोत्पत्तिमत्त्वस्थाने वृत्तित्वमेव निवेशनीयं स्यात् । तदनन्तर्भावे तु पूर्वोक्ता रीतिरेवानुसर्तव्या ।

१ विध्यादाविति । आदिना निमन्त्रणादीनां तत्सूत्रोक्तानां परिग्रहः ।

लिङ्लोटौ', 'लोट् चे'ति सूत्राभ्यां तथाऽवगमात्, यथा,—'भवतु ते शिवप्रसाद' इत्यादौ । एतयोरर्थो लिङर्थ एव, त्रयाणां समानार्थत्वादिति तन्निर्णयेनैव निर्णयः ॥ २२ ॥

लङादिक्रमेण ङितामर्थमाह—

ह्योभूते, प्रेरणादौ च भूतमात्रे लङादयः ।
सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृतः[१] ॥२३॥

लङर्थमाह—ह्योभूत इति । अनद्यतने भूत इत्यर्थः, 'अनद्यतने ल'ङिति सूत्रात् । यथा'स्य पुत्रोऽभव'दित्यादि ।

ॐ दर्पणः ॐ

एतयोरिति । लेट्लोटोरित्यर्थः । त्रयाणाम् = लेट्लोट्लिङामित्यर्थः । **तन्निर्णयेनैवेति** । लिङर्थनिर्णयेनेत्यर्थः ॥ २२ ॥

ह्यःपदस्याऽव्यवहितातीतदिवसे रूढतया तदात्मककालस्य लङर्थत्वेनैकदिनान्तरितभूते लङनुपपत्तिरत आह—**अनद्यतन इति** । तथाच ह्यःपदं लक्षणयाऽनद्यतनत्वेनाऽनद्यतनमात्रबोधकमिति नोक्तदोषाऽवकाशः,—एवं 'श्वोभाविनी'त्यत्राऽपि बोध्यम् । **अस्य पुत्र इति** । वर्त्तमानध्वंसप्रतियोग्यनद्यतनकालवृत्तिरेतसम्बन्धिपुत्रकर्तृकोत्पत्त्यनुकूलो व्यापार इति बोधः, 'अध्यास्ते'त्यादौ तु भूताऽनद्यतनत्वमात्रविवक्षया लङुपपत्तिः । सूत्राद् विध्यादीनां लिङर्थत्वप्रती-

ॐ काशिका ॐ

प्रार्थनेतीति । प्रार्थनस्यादिः प्रार्थनमादिर्यस्येति तत्पुरुषबहुव्रीह्योस्तन्त्रेण निर्देश इत्याशयेनाह—**आदिना विध्याद्याशिष इति** । तत्राशिष्युदाहरति—**यथा भवत्विति** । आशीः प्रयोक्तृनिष्ठा हितविषयिणीच्छा, तस्या विषयतासंबन्धेन कारकविशिष्टक्रियायामन्वयः, तथा चाशीर्विषयत्वसंबन्धिशिवकर्तृकप्रसादकर्तृकसत्तेति बोधः । विध्यादिपदार्थानामिदानीं निर्णयाभावात्तदुदाहरणानुपन्यासः । ननु विध्याद्यर्थानिर्णये कथं लेट्लोटोरर्थनिर्णय इत्यत आह—**एतयोरिति** । **तन्निर्णयेन** = लिङर्थनिर्णयेन । विध्यादीनां लिङविधायके एवोपादानात् तत्रैव तदर्थो निर्णेष्यत इति तात्पर्यम् ॥ २२ ।

लङादिक्रमेणेति । लङादीनां क्रमो लङादिक्रमस्तेन । तेषां क्रमस्तु लोकप्रसिद्धः । ह्योभूतत्वविवक्षणे दिनादिव्यवहितभूतकाले न स्यादतस्तदुपलक्षणमित्याह—**अनद्यतने भूत इति** । तत्र प्रमाणमाह—**'अनद्यतने लङ्' इतीति** ।

१ व्याकरणस्मृत्या बोधितः ।

लिङर्थमाह—प्रेरणादाविति । 'विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लि'ङिति सूत्रात्, तत्र,—विधिः = प्रेरणं, भृत्यादेर्निकृष्टस्य प्रवर्त्तनं, निमन्त्रणं = नियोगकरणम्, आवश्यके प्रेरणेत्यर्थः। आमन्त्रणं

❀ दर्पणः ❀

तेः कथं प्रेरणादेर्विध्यर्थत्वमत आह—तत्रेति। तेषु मध्ये इत्यर्थः। विधिः प्रेरणमिति। प्रेरणापर्यायो विधिशब्द इत्यर्थः। प्रेरणाया लिङादिशब्दस्वरूपतां वदतां मतं निराकर्त्तुं प्रेरणायाः स्वरूपं दर्शयति—भृत्यादेरित्यादि। अयम्भावः—यद्विषयकत्वेन ज्ञानस्य प्रवृत्तिजनकत्वं सैव प्रवर्त्तना, तादृशविषयतानिरूपकत्वं चेष्टसाधनताया एव; न तु लिङादीनां, तद्विषयकज्ञानात् प्रवृत्त्यनुदयात्, सा यदि वक्त्रपेक्षयाऽपकृष्टोद्देश्यकप्रवर्त्तकज्ञानविषयीभूता तदा 'प्रेरणे'त्युच्यते, अन्यादृक् तु 'निमन्त्रणा'दिपदव्यपदेश्या, तथाच स्वाभिलपितोपायाऽज्ञानादप्रवृत्ताऽप्रकृष्टप्रयोज्यस्योपायविषयकप्रवृत्त्यनुकूलो व्यापारः 'प्रेरणे'ति पर्यवस्यतीति, अधिकमग्रे वक्ष्यते, तत्र वैदिकमुदाहरणं,—'स्वर्गकामो यजेते'त्यादि, 'स्वर्गकामाऽभिन्नकर्तृकयागभावना स्वर्गादीष्टसाधन'मिति वैयाकरणमते बोधः। भावनायामिष्टसाधनत्वं तु—प्रत्यासत्त्या स्वर्गकामस्यैव, तादृशश्चाहमिति अभिसन्धाय यागादौ नियोज्यस्य प्रवृत्तिर्निर्वहति, लौकिके तु 'जलमाहरे'त्यादिबोधः स्वयमूह्यः। नियोगकरणमिति। 'विप्रं निमन्त्रयत' इत्यादितो विप्राश्रयकप्रवृत्तिजनकभावनाबोधेन प्रकृते 'विनियोग'पदार्थः—प्रवृत्तिस्तत्करणं = तदनुकूलो व्यापार इत्यर्थः। आवश्यक इति। श्राद्धभोजनादिश्च तथा, प्रेरणेति। प्रवर्त्तनेत्यर्थः, अस्य 'दौहित्रादे'रित्यादिः, तत्राप्रवृत्तस्य प्रवृत्त्यनुकू-

❀ काशिका ❀

भृत्यादेरिति निकृष्टोक्तिः—स्वसमानोत्तमयोः प्रवर्तनायामतिव्याप्तिवारणाय। अज्ञप्यत्वेन निकृष्टत्वं विवक्षितमिति बोधयितुं—भृत्यादेरिति। अत एव स्वापेक्ष्याधिकवयस्कभृत्यादिप्रेरणायाः संग्रहः। प्रवर्तनं च प्रेरयितृभिलपितविषयकं बोध्यम्। इयमेवाज्ञेत्युच्यते। अप्रवृत्तप्रयोज्यस्य तदभिलपिताज्ञातोपायप्रवर्तनमुपदेशः। यथा 'स्वर्गकामो यजेत' यथा वा 'अनेन पथा याहि' इति। आद्ये स्वर्गोऽभिलुषितः। अन्त्ये काश्यादिप्राप्तिः। आवश्यके इत्यस्य 'श्राद्धभोजनादा'विति शेषः। कामचारेति। स्वाभिलषिते कामचारेण प्रवर्त्यप्रवर्तनम्, कामचारश्च प्रवर्त्यस्यैव[१]। प्रवृत्तस्य प्रयोज्यस्य निवृत्तिप्रतिबन्धद्वारा तद्धिते प्रवृत्तिप्रयोजिकोक्तिरनुज्ञा,—आरब्धं कुर्वेवेत्येवमात्मिका। 'तथा कुरुष्व यथा हितम्' इत्युक्तिरप्यनुज्ञैव। एतत् सर्वमामन्त्रणपदेनोपलक्ष्यते।

१ इतोऽग्रे—'एवैव च कामचारानुज्ञेति गम्यते' इति पाठोऽधिकोऽस्मत्पुस्तके।

=कामचारानुज्ञा । अधीष्टः = सत्कारपूर्वको व्यापारः[1] ।

❀ दर्पणः ❀

लव्यापार इति यावत्, यथे'ह भुञ्जीत भवान्' इत्यादि । **कामचारानुज्ञेति** । स्वेच्छया प्रवृत्तस्येतरत्रप्रवृत्तिप्रतिबन्धफलकस्वाभिलषितविषयकप्रवृत्त्यनुकूलो व्यापार इत्यर्थः । यथे'हासीताऽऽरब्धं कुरुत', 'तत्कुरुष्व यथाहित'मित्यादि । उपवेशनादिव्यापारे इष्टसाधनताज्ञानात् प्रवृत्तावितरत्राऽप्रवृत्तिरर्थतः फलति ।

सत्कारपूर्वको व्यापार इति । अध्यापनादिव्यापारे सम्मानपूर्वकप्रवृत्त्यनुकूलो व्यापारोऽधीष्टपदार्थ इत्यर्थः, अयमेवा'ऽभ्यर्थने'त्युच्यते, उक्तेष्विष्टसाधनत्वे—अनुकूलत्वं च प्रवृत्तिजनकतावच्छेदककोटिप्रविष्टतया बोध्यम् । **सम्प्रधारणमिति** । उपस्थितक्रिययोर्मध्ये एकतरक्रियाधर्मिकेष्टसाधनत्वनिर्णयेच्छेत्यर्थः । यथा,—'किं भो वेदमधीयीय उत तर्क'मिति, स्वोद्देश्यकत्वसम्बन्धेन सम्बोध्यविशिष्ट मन्निष्ठा च वेदाध्ययनतर्काध्ययनान्यतरभावना-इष्टसाधनत्वप्रकारकनिर्णयेच्छाविषय इति बोधः । एवमग्रेऽपि । **विधिः प्रेरणमिति** । प्रेरणं प्रवर्त्तनमित्यर्थः । अप्रवृत्तप्रयोज्यस्याऽज्ञातस्वाऽभिलषितोपाये इष्टसाधनताबोधनमिति यावत्, अपकृष्टोद्देश्यकताहशेष्टसाधनत्वबोधविषयाऽप्रयुक्तं लिङादिघटितं वाक्यमेव आज्ञोपदेशपदाभ्यां व्यपदिश्यते, तदेवाऽऽह—**भृत्यादेरिति** । आदिना शिष्यादिपरिग्रहः, तत्र लौकिकमुदाहरणं,—'भवाञ्जलमानये'दित्यादि, वैदिके 'स्वर्गकामो यजेते'त्यादि । **नियोगकरणमिति** । निमन्त्र्यते नियुज्यतेऽनेनेति व्युत्पत्त्या नियोगानुकूलो व्यापारो 'निमन्त्रण'पदार्थ इत्यर्थः । **आवश्यक इति** । श्राद्धभोजनादावित्यर्थः । 'प्रेरणे'त्यस्य 'दौहित्रादे'रित्यादिः, तथा चावश्यके श्राद्धभोजनादौ दौहित्रादेरिष्टसाधनताबोधनं निमन्त्रणमिति फलितम् । यथे'ह भुञ्जीत भवा'निति । **कामचारेति** । स्वाभिलषिते कामचारेण प्रवृत्तस्येष्टसाधनताबोधनमित्यर्थः, यथे'हासीते'ति । अनुज्ञा तु प्रवृत्तप्रयोज्यस्येतरप्रवृत्तिप्रतिबन्धेनैतत्प्रवृत्तिविषये इष्टसाधनताबोधनम् । यथा'रब्धं कुरुत', 'तत्कुरुष्व यथा हित'मिति च । एतदादि सर्वोपलक्षणमामन्त्रणं । **सत्कारपूर्वको व्यापार इति** । सम्मानपूर्वमध्यापनादिव्यापार इष्टसाधनताबोधनमित्यर्थः, अयमेव चाऽभ्यर्थनेति व्यवह्रियते, उदाहरणं—'माणवकमध्यापयेद्भवा'निति । सम्प्रश्नः = सम्प्रधारणम्, प्रार्थना तु—स्वाऽभिलषितवस्तुदानादौ स्वीयेच्छाबोधनम्, यथा 'भोजनं लभेये'

❀ काशिका ❀

सत्कारपूर्वको व्यापार इति । यथा 'मां पाठय' इति । एषैवाभ्यर्थनेति गीयते । प्रार्थना

१ सत्कृत्य क्वचनोचिते महति कर्मणि प्रवर्तनम् ।

एतच्चतुष्टयानुगतप्रवर्त्तनात्वेन वाच्यता, लाघवात् । उक्तञ्च—

अस्ति प्रवर्त्तनारूपमनुस्यूतं चतुर्ष्वपि ।
तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया ॥
'न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथाऽपि वा ।
विध्यादीनामुपादानं चतुर्णामादितः कृत'मिति ॥

❀ दर्पणः ❀

ति । **एतच्चतुष्टयेति** । विध्यादिचतुष्टयेत्यर्थः । **लाघवादिति** । तस्य शक्यताऽवच्छेदकत्वकल्पने लाघवादित्यर्थः विधिवाक्याद्विध्यादीनां बोधस्य सर्वसिद्धत्वेऽपि तत्तद्रूपस्य शक्यतावच्छेदकत्वकल्पने गौरवादुक्ताऽनुगतरूपस्यैव शक्यतावच्छेदकत्वमुचितमिति भावः । तत्र हरिसम्मतिमाह—**उक्तञ्चेति** । **किम्भेदस्येति** । तत्तद्रूपेण पार्थक्यस्येत्यर्थः, तत्तद्रूपेण शक्तेरनङ्गीकारादिति भावः, तर्हि तथोपादानं सूत्रकृता किमिति कृतमत आह—**न्यायेति** । न्यायः = शक्तिः, तद्व्युत्पत्तये = तद्ग्रहायेत्यर्थः । ननु प्रवर्त्तनात्वेन प्रवर्त्तनायां शक्तिग्रहो विध्यादिसमस्तधर्मिक एवेत्यत आह—**प्रपञ्चार्थमिति** । प्रवर्त्तनं—प्रवर्त्तनेति व्युत्पत्तेर्ण्यन्ताद्

❀ काशिका ❀

तु स्वाभिलपितवस्तुदानादिप्रवर्तिकोक्तिः । **एतच्चतुष्टयेति** । अधीष्टान्तचतुष्टयानुगतं यत् प्रवर्तनात्वं तेनेत्यर्थः । स्वाभिलपितदानादिविपयकेच्छा प्रार्थनं, तच्च न प्रवृत्तिजनकमन्यथासिद्धत्वादित्यभिप्रेत्य—**चतुष्टयेत्युक्तम्** । वक्ष्यमाणहरिकारिकायां चतुर्णामित्यप्येवमेव, पूर्वोक्तस्वरूपत्वे तु पञ्चानुगतेति बोध्यम् । एवं कारिकास्थचतुर्णामित्यपि प्रार्थनस्योपलक्षणं बोध्यम् ।

प्रवर्तनेति । प्रवर्तनाया रूपं—प्रवर्तनात्वमित्यर्थः । **तत्रैव** = प्रवर्तनात्ववत्येव । प्रवर्तनात्वमखण्डोपाधिः । आकृत्यधिकरणन्यायेन धर्ममात्रशक्तिरिति मते तु यथाश्रुतमेव साधु । अथवा **तत्रैव** = तस्मिन् सत्येव । एवं च तद्विशिष्टे[1] विधानलाभः । **न्यायेति** । विधिपदार्थविवरणार्थमित्यर्थः । यद्वा विध्याद्यनुगतप्रवर्तनात्वरूपेण वाच्यतेति बोधनार्थमित्यर्थः । ननु लोकव्युत्पत्त्यैव तदवगमो भविष्यतीत्यत आह—**प्रपञ्चार्थमिति** । **आदित**—आदावित्यर्थः । आद्यादित्वात्तसिः । तथा च 'प्रवर्तनासंप्रश्नयोर्लिङ्' इति सूत्रं कर्तव्यमिति भावः । **प्रवृत्तिजनकेति** । प्रवृत्तिजनकं यज्ज्ञानं तद्विपयतावच्छेदकमित्यर्थः । भवति हि यागो मदिष्टसाधनमिति ज्ञानं प्रवर्तकं,–तदीययागनिष्ठविशेष्यतात्मकविषयतानिरूपकत्वरूपं तदवच्छेदकत्वमिष्टसाधनत्वस्येत्यर्थः । तादृशज्ञानीयविशेष्यतानिरूपितप्रकारतालाभार्थं विपयत्वमपहाय विषयतावच्छेदकत्वानुसरणम् । एतेनेष्टसाधनत्वे तादृशज्ञानविषयतायीः स्वरूपसंबन्धरूपावच्छेदकत्वं न संभवति,

१ विध्यादौ शक्तिग्रहाय।

प्रवर्त्तनात्वञ्च,—प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वम्, तच्चेष्ट-साधनत्वस्यास्तीति तदेव विध्यर्थः ।

※ दर्पणः ※

युचि निष्पन्नप्रवर्त्तनाशब्दात् प्रवृत्त्यनुकूलव्यापारलाभ इत्याह—तच्चेति । निरुक्ताऽवच्छेदकत्वं चेत्यर्थः । **तदेवेति** । इष्टसाधनत्वमेवेत्यर्थः । 'एव'कारेण कृतिसाध्यत्वादिव्यवच्छेदः,—इष्टत्वं च समभिव्याहृतपदोपस्थापितकामनाविषयत्वं,–'स्वर्गकामो यजेते'त्यत्र स्वर्गकामपदोपस्थापितकामनाविषयत्वस्य स्वर्गे सत्त्वादिष्टत्वं तस्याऽक्षतं, तेनैव च स्वर्गादीष्टानामनुगमः,—यदि च सामान्यत इष्टसाधनत्वज्ञाने प्रवृत्त्यनुदयात् तत्तद्रूपेण स्वर्गत्वादिना स्वर्गसाधनताज्ञानं तथा वाच्यं, तथाच तेन रूपेणेष्टसाधनत्वस्य श्रुतेरनवगमाद्विधिवाक्यात् कथं प्रवर्त्तकज्ञाननिर्वाह इति विभाव्यते–तर्हीष्टतावच्छेदकत्वेन स्वर्गत्वादीननुगमय्य तदवच्छिन्नसाधनत्वे विधेः शक्तिरुपगन्तव्या, एवञ्च न विधेर्नानार्थत्वमपि,—तदादिवत्, इष्टताऽवच्छेदकत्वस्योपलक्षणत्वोपगमाच्च न स्वर्गत्वादीनां तद्रूपेण भानापत्तिः । अथ 'स्वर्गकामो ज्योतिष्टोमेन यजेते'त्यत्र श्रुत्या स्वर्गसाधनत्वं ज्योतिष्टोमे बोधनीयम्, तच्च न सम्भवति, वाजपेयादपि स्वर्गोत्पत्तेर्व्यभिचाराद्, वैजात्यस्य चोत्तरकालकल्प्यत्वेन पूर्वमनुपस्थितत्वादिति चेन्न, 'घटं द्रव्यत्वेनैव जानाती'त्यादौ घटत्वोपलक्षितव्यक्तिविशेष्यकद्रव्यत्वप्रकारकज्ञानाऽवगमवत् स्वर्गत्वाश्रययत्किञ्चिद्व्यक्तिसमानाधिकरणाऽभावाऽप्रतियोगित्वमेव श्रुत्या यागेऽवगम्यते, अथवा यागाऽनुत्तरकालाऽवृत्तित्वमेव स्वर्गत्वसामानाधिकरण्येनेति न कश्चिद्दोषः, अत एव साध्येष्टकरत्वस्य विध्यर्थत्वमामनन्ति, अन्यथासिद्धत्वं तु विधेः प्रवृत्तितात्पर्य्यकत्वाऽवधारणादुत्तरकालकल्प्यम्; इत्थञ्च ग्रहणश्राद्धादौ नित्यत्वनैमित्तिकत्वयोरिव नित्यश्राद्धसन्ध्यादौ नित्यत्वकाम्यत्वयोरप्यविरोधाल्लाघवाद्रात्रिसत्रन्यायेन—

※ काशिका ※

यागविशेष्यताया इष्टसाधनत्वप्रकारतानिरूपिताया इष्टसाधनत्वानवच्छेद्यत्वादिति दूषणं निरस्तम् । **तच्च** = उक्तविधिप्रवर्तनात्वं च । **तदेव** = इष्टसाधनत्वमेव, तादृशप्रवर्तनात्वप्रकारेण बोधाननुभवे तूपलक्षणीभूय वाच्यतावच्छेदकत्वं तस्येति बोध्यम् । अन्यथा पुनर्विशेषणीभूय तदवच्छेदकत्वं बोध्यम् । मीमांसकानां पुनर्विशेषणत्वपक्षे निर्भरो दृश्यते । ननु कृत्यसाध्यतानिश्चयविषयसुमेर्वानयनादौ प्रवृत्तिवारणाय कृतिसाध्यताज्ञानस्यापि प्रवृत्तिहेतुत्वमभ्युपेयम् । न च कृत्यसाध्यतानिश्चयस्य प्रतिबन्धकत्वकल्पनयैवोपपत्तावलं कृतिसाध्यताज्ञानस्य हेतुतयेति वाच्यम् ।

❀ दर्पणः ❀

'दद्यादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन् ॥'

'सन्ध्यामुपासते ये तु सततं संशितव्रताः ।

विधूतपापास्ते यान्ति ब्रह्मलोकमनामय'मित्याद्यर्थवादोपस्थितपितृतृप्तिब्रह्मलोकाऽवाप्त्यादिकमेव फलं कल्प्यते, यद्यप्यन्यत्र समवायघटितसामानाधिकरण्येनैव यागस्वर्गयोः कार्यकारणभावः क्लृप्तस्तथाप्युक्तवाक्यप्रामाण्याच्छ्राद्धपितृप्त्योरुद्देश्यत्वसमवायघटितसामानाधिकरण्येन स कल्पनीयः, कर्तृनिष्ठाऽदृष्टस्य तु न पितृतृप्तिजनकत्वं, व्यधिकरणत्वात्, श्राद्धानन्तरकृतकर्मनाशाजलस्पर्शादिना तन्नाशेन पित्रादिस्वर्गाऽनापत्तेश्च, पितृणां मुक्तत्वेऽप्यनुष्ठातर्येव तत्कल्प्यताम्, अत एव 'शास्त्राऽऽदेशितं फलमनुष्ठातरी'त्युत्सर्ग' इति वृद्धाः । स्वतः पुरुषार्थः दुःखप्रागभावः, प्रत्यवायाऽनुत्पादो वा तथा कल्पनीयः, तत्साधनत्वं च योगक्षेमसाधारणम्, नित्ये कृते प्रत्यवायाऽनुत्पादनियमात्, तत्सत्त्वे दुःखप्रागभावाऽवश्यम्भावाच्च, तथाच 'सर्वशक्तौ प्रवृत्तिः स्यात् तथाभूतोपदेशा'त् इति सर्वशक्त्यधिकरणपूर्वपक्षसूत्रपुरुषार्थस्य भाव्यस्योभयत्र तौल्येन यथाकाम्यं फलायालं, तथा नित्यमपीति व्याख्यातं भट्टैः ।

नन्विष्टसाधनत्वस्य विध्यर्थत्वे साधनत्वस्याऽऽख्यातेनाऽभिधाना'ज्ज्योतिष्टोमेने'त्यत्र तृतीयाऽनुपपत्तिरिति चेन्न, 'द्रव्यं कारक'मिति पक्षे शङ्काऽनवकाशात्, 'शक्तिः कारक'मिति पक्षेऽपि यज्यर्थव्यापारनिष्ठभावनाभाव्यनिर्वर्त्तकत्वरूपकरणत्वस्याभिधानेऽपि यागनिष्ठस्य तस्याऽनभिधानेन तत्समानाधिकरणज्योतिष्टोमपदात्तदुपपत्तेः,

'न कलञ्जं भक्षये'दित्यादेर्निषेधविधित्वोपपत्तये नञ्समभिव्याहारे विधेरनिष्टसाधनत्वे शक्तिरुपगन्तव्या, । तस्याऽपि धात्वर्थेऽन्वयः, नञ् तात्पर्यग्राहकः, कलञ्जकर्मकभक्षणमनिष्टसाधनमिति बोधः । यद्वा—नञर्थाभावविशेष्यक एव बोधः, तेन च स्वप्रतियोगिन्यनिष्टसाधनत्वाक्षेपात्ततो निवृत्त्युपपत्तिरिति भावः । बलवदनिष्टाजनक इष्टसाधने—चन्द्रमण्डलानयने, बलवदनिष्टानुबन्धिनि साध्ये निष्फले, तृप्तिरूपेष्टसाधने कृतिसाध्यमधुविषसंपृक्ताऽन्नभोजने च प्रवृत्त्यदर्शनात् प्रवर्त्तकज्ञाने विषयतावच्छेदककोटौ तेषां निवेशस्याऽवश्यकतया विधिवाच्यत्वं श्रुतेः प्रवर्त्तकत्वनिर्वाहार्थमावश्यकमिति नैयायिकमतं निराकर्तुमाशङ्कते—

❀ काशिका ❀

तादृशनिश्चयाभावत्वेन कारणत्वापेक्षया कृतिसाध्यताज्ञानत्वेन कारणत्वे लाघवात् तत्कल्पनस्यैवोचितत्वादित्याशङ्क्य निराचष्टे—यद्यपीत्यादिना । एतत् = प्रवर्तनात्वम् । लोकत एवा-

यद्यप्येतत् कृतिसाध्यत्वस्यापि, तज्ज्ञानस्यापि प्रवर्त्तकत्वात्, तथापि यागादौ सर्वत्र तल्लोकत एव गम्यत इत्यन्यलभ्यत्वान्न तच्छक्यम्।

ॐ दर्पणः ॐ

यद्यपीति। एतत् = प्रवर्त्तकज्ञानविषयताऽवच्छेदकत्वं, तत्सत्त्वे युक्तिमाह—**तज्ज्ञानस्येति।** कृत्यसाध्येऽपि तज्ज्ञानात् प्रवृत्तिदर्शनादिति भावः। निराचष्टे—**तथापीति। लोकत एवेति।** लौकिकप्रमाणादेवेत्यर्थः, 'अनन्यलभ्यो हि शब्दाऽर्थः' इति न्यायादिति भावः। वस्तुतस्तु उक्तन्यायस्य पदान्तरलभ्यैव शक्तिरन्यथा कस्यापि पदस्य शक्तिर्न सिद्धयेत्, सर्वस्यापि शब्दातिरिक्तप्रमाणगम्यत्वात्। किञ्च,—इष्टसाधनत्वादीनां स्वातन्त्र्येण यदि शक्यत्वं स्यात् तदा स्यादप्युक्तरीतिर्निराकरणक्षमा, किन्तु प्रवर्त्तकज्ञानविषयतावच्छेदकत्वोपलक्षणानुगतीकृतेषु तेषु सा, उपलक्षणस्य च कृतिसाध्यत्वसाधारणतया तत्रापि सिध्यन्ती शक्तिः केन प्रतिषेद्धयेति सन्त एवाऽवधारयन्तु।

यत्तु कृतिसाध्यत्वे वेदादवगतेऽप्यशक्तस्य यागादौ प्रवृत्त्यनुदयात् मदंशविशिष्टतज्ज्ञानस्यैव प्रवृत्तिहेतुत्वं वाच्यं, तस्य च 'यागो मत्कृतिसाध्यो, मत्कृतिसाध्यत्वविरोधिधर्माऽनधिकरणत्वात्, मत्कृतिसाध्यपाकव'दित्यनुमानेनैवाऽवगमान्नास्य शक्यत्वमित्याशय इति, तन्न, इष्टसाधनताज्ञानस्याऽपि मदंशविषयकस्यैव प्रवर्त्तकतया तस्य विधिवाक्यादलाभेनेष्टसाधनत्वे शक्त्यभ्युपगमेऽपि प्रवर्त्तकत्वानुपपत्तेरपरीहारात्, यदि तु प्रतिपुरुषं विधेरावृत्त्या बोधकत्वात्तेनैव तत्पुरुषीयेष्टसाधनताबोधकत्वात्प्रवर्त्तकत्वोपपत्तौ नानुमानावश्यकत्वमिति विभाव्यते—तदा कृतिसाध्यत्वेऽपि तुल्यमिति। बलवदनिष्टाऽननुबन्धित्वस्य विध्यशक्यत्वे—'न

ॐ काशिका ॐ

वगम्यत इति। यागो मत्कृतिसाध्यः, मत्कृतिसाध्यत्वविरोधिधर्मानधिकरणत्वादित्याद्यनुमानेनेत्यर्थः। स्वर्गादीष्टसाधनत्वं तु न लोकतोऽवगन्तुं शक्यते अपि तु वेदेनैवेति—तत्र शक्तिकल्पनावश्यकीति भावः। अन्ये तु कृतिसाध्यताज्ञानं न प्रवर्तकं, तदसाध्यत्वेन निश्चिते प्रवृत्तिस्तु न, तत इष्टाभावेन वृथा श्रमजनकत्वेन द्वेषात्। 'चिकीर्षानुरोधेन तत्र शक्तिकल्पनमावश्यकमन्यथा कृतिसाध्यताज्ञानविरहेण कृतिसाध्यत्वप्रकारकेच्छात्मकचिकीर्षानुपपत्ते'रिति तु न शङ्क्यम्, लोकत एव तदनुगमेन चिकीर्षोपपत्तेः। न चानिष्टजनके उदासीने च 'कष्टं कर्मे'ति न्यायेन वृथा श्रमजनकत्वेन द्वेषादेवाप्रवृत्त्युपपत्ताविष्टसाधनताज्ञानस्यापि प्रवृत्तिहेतुतानापत्तिरिति वाच्यम्, इष्टाजनके आन्तरालिकश्रमे द्वेषाभावदशायामप्रवृत्तेः सर्वसिद्धतया तदनुरोधेन तज्ज्ञानस्य तद्धेतुत्वादित्याहुः। ननु मधुविषसंपृक्तान्नभोजनादौ प्रवृत्तिवारणाय बलवदनिष्टाजनकत्वज्ञानस्यापि प्रवृत्तिहेतुत्वं कल्पनीयं, तथा च तत्रापि शक्तिरावश्यकीत्याशङ्क्य

बलवदनिष्टाननुबन्धित्वज्ञानं च न हेतुः, द्वेषाभावेनान्यथासिद्धत्वात्,

❀ दर्पणः ❀

कलञ्जं भक्षये'दित्यत्र 'भक्षये'दित्यस्य भक्षणेऽनिष्टसाधनत्वाऽबोधकतया निषेधविधित्वानुपपत्तिरिति 'तत्रापि विधिशक्तिरभ्युपेया, अनिष्टे बलवत्त्वं चेष्टोत्पत्तिनान्तरीयकदुःखातिरिक्तत्वं, तेन नाऽऽयाससाध्ये कर्मणि प्रवृत्त्यनुपपत्तिः, 'कष्टं कर्मे'ति न्यायेन सुखमात्रजनककर्माऽसम्भवाच्च नोक्ताऽर्थस्य सिद्धिः, यदि च कदाचित्तत्सम्भवस्तदेष्टोत्पत्त्यनान्तरीयकत्वमेव तद्वाच्यम्, एतेन 'बलवदनिष्टाऽननुबन्धित्वज्ञानस्य प्रवर्त्तकत्वमेव न, बह्वायाससाध्ये कर्मणि प्रवृत्त्यनापत्तेः, बहुतरदुःखस्य तत्र जायमानत्वादल्पदुःखस्यापि कुतश्चिद् बलवत्त्वेनानुगतबलवत्त्वस्य निर्वक्तुमशक्यत्वाच्चेति क्व तस्य विधिशक्यत्वसम्भावने'ति केषाञ्चित् प्रलपितं प्रत्युक्तम्।

अथोक्तयुक्त्याऽनिष्टत्वेनाऽनिष्टसाधनत्वाऽभावज्ञानस्य न प्रवर्त्तकत्वं, किन्तु 'अगम्यां न गच्छेत्' 'शाकं न भुञ्जीते'त्यादिवाक्यानां प्रामाण्योपपत्तये विशिष्य नरकत्वादिरूपेण तदसाधनत्वस्य तथात्वं वाच्यं, तथाच शक्त्यानन्त्यं, शक्तिग्रहाऽनुपपत्तिश्चेति चेन्न, द्वेषविषयताऽवच्छेदकत्वोपलक्षितनरकत्वाद्यवच्छिन्नसाधनतात्वावच्छिन्नाऽभावकूटे तादृशाऽभावत्वेनाऽनुगते एकैव विधिप्रत्ययस्य शक्तिः, उपलक्षणत्वादेव च द्वेषविषयताऽवच्छेदकत्वं परित्यज्य—नरकत्वाद्यवच्छिन्नाऽसाधनत्वमात्रं प्रतीयते, क्वचिच्च नरकासाधनत्वं, क्वचिद्रोगाऽसाधनत्वं प्रतीयते इत्यत्र तात्पर्यमेव नियामकम्; नचाऽतिप्रसक्तस्योपलक्षणत्वाभ्युपगमे प्रमेयत्वस्यैव तथात्वमस्तु, साम्यादिति वाच्यं, सुखाद्यसाधनत्वस्य विध्यर्थताविरहेण तत्साधारणप्रमेयत्वस्योपलक्षणत्वासम्भवात्, अत्यन्ताऽजनकसाधारणरूपस्य कारणतावच्छेदकत्ववद् अद्विष्टसाधारणरूपस्यापि द्विष्टोपलक्षणताकल्पनानौचित्यात्, तात्पर्याऽभावादेव सुखाद्यसाधनताबोधानापत्तौ तस्य विध्यर्थत्वेऽपि न क्षतिरिति तु न युक्तं, तथा सति उक्ततात्पर्येणाधुनिकानां 'न भुञ्जीते'ति प्रयोगापत्तेः, तस्माद् द्वेषविषयतावच्छेदकत्वोपलक्षितनरकत्वाद्यवच्छिन्नसाधनतात्वाच्छिन्नप्रतियोगिताकाभावत्वेनानुगते तादृशाभावे विधिप्रत्ययस्य शक्तिरिति परिष्कृतं प्राचीननैयायिकमतं नव्यरीतिमवलम्ब्य दूषयति—बलवदनिष्टेति। निरुक्तबलवदनिष्टाऽजनकत्वज्ञानं चेत्यर्थः। न हेतुः= न प्रवृत्तिहेतुः, क्वचित् तथैव पाठः। तथाच न तद्विषयस्य विधिवाच्यत्वमिति भावः। तस्य प्रवृत्त्यजनकत्वे हेतुमाह—द्वेषाभावेनेति। मधुविषसंपृक्तान्न-

❀ काशिका ❀

निराकुरुते—बलवदिति। बलवत्तया याःपाकादेरपि नान्तरीयकाल्पदुःखजनकतया यागादौ प्रवृत्त्यनापत्तिर्निरस्ता। द्वेषाभावेनेति। बह्वायाससाध्ये बहुतरदुःखजनकतया प्रवृत्त्यनापत्त्या

आस्तिककामुकस्य नरकसाधनताज्ञानदशायामप्युत्कटेच्छया द्वेषाभाव-दशायां प्रवृत्तेर्व्यभिचाराच्च ।

❀ दर्पणः ❀

भोजने द्विष्टसाधनताज्ञानाद् द्वेषविषये प्रवृत्तिवारणाय 'तद्विषयकप्रवृत्तिं प्रति तद्विषयकद्वेषस्य क्लृप्तप्रतिबन्धकतया प्रतिबन्धकाभावविधयावश्यक्लृप्तनियत-पूर्ववर्त्तिताकद्वेषाभावेनैवोपपत्तौ बलवदनिष्टासाधनत्वज्ञानस्य न हेतुत्वं, तेना-न्यथासिद्धेरित्यर्थः। नन्वन्वयव्यतिरेकसहचारज्ञानस्य कारणताग्राहकस्योभयत्र साम्यात् तेनैवास्यान्यथासिद्धिर्दुर्वारेत्यत आह—आस्तिकेति। स च परलोका-ऽङ्गीकारवान्, तदनङ्गीकर्त्तुर्नरकसाधनताज्ञानासम्भवात्तद्विशेषणमुपात्तम्, आस्तिकस्य नरकसाधनताज्ञानेन तत्र द्वेषावश्यम्भावेन प्रवृत्त्यसम्भवादाह—कामुकेति। तत्त्वञ्चोत्कटरागवत्त्वम्, रागे उत्कटत्वं जातिविशेषो, विषयताविशेषो वा, 'प्रवृत्ते'रित्यस्याऽ'गम्यागमने' इत्यादिः। 'द्वेषाभावदशाया'मित्यनेन—'द्वेषसामग्रीवैकल्यं दर्शितं, तच्च विषयतया द्वेषं प्रति उत्कटेच्छासामग्रीविरहविशिष्टद्विष्टसाधनताज्ञानस्य हेतुतया तादृशसामग्र्याः स्वातन्त्र्येण प्रतिबन्धकतया बोध्यम्। व्यभिचाराच्चेति। 'न हेतु'रिति पूर्वेणान्वितम्। अत एव—'श्येनेनाभिचरन् यजेते'त्यत्र न विध्यर्थ बाधः, बलवदनिष्टाननुबन्धित्वज्ञानस्याप्रवर्त्तकत्वेन तद्विषयस्य तस्य विध्यर्थत्वस्यैवा-

❀ काशिका ❀

बलवदनिष्टाजनकत्वज्ञानं न प्रवृत्तिहेतुः, अपि तु तज्जन्यदुःखविषयकद्वेषप्रयुक्तस्तद्विषयकद्वेषस्तत्र प्रवृत्तौ प्रतिबन्धकस्तदभावो हेतुरित्यवश्यमाश्रयणीयम्। यागादिजन्यस्वर्गादिफले रागौत्कट्येन यागादिजन्यदुःखे द्वेषानुत्पादेन तत्र प्रवृत्तिर्निष्प्रत्यूहैव, एवं च तदभावादेव मधुविषसंपृक्तान्न-भोजने प्रवृत्तिनिर्वाहे—तेनान्यथासिद्धं बलवदनिष्टाजनकत्वज्ञानं—न प्रवृत्तिहेतुरित्यर्थः। ननु नान्तरीयकदुःखाधिकदुःखाजनकत्वं—बलवदनिष्टाजनकत्वं, तज्ज्ञानस्य हेतुतया न बह्वायाससाध्ये प्रवृत्त्यनापत्तिस्तज्जन्यबहुतरदुःखस्यापि बलवत्त्वाभावात्, न चावश्यकद्वेषाभावेन तस्यान्यथा-सिद्धिरिति वाच्यम्, स्वतन्त्रान्वयव्यतिरेकशालितयोक्तज्ञानस्य हेतुत्वावश्यकत्वात्। द्वेषाभाव-दशायां तथाविधज्ञानं विना प्रवृत्त्यापत्तेश्चेत्याशङ्क्य व्यभिचारान्न हेतुत्वं तस्येत्याह—आस्तिके-त्यादिना। आस्तिकत्वोत्कीर्तनं परकीयसुन्दरीगमने नरकसाधनताज्ञानसत्त्वावश्यकत्वसूचनाय, तेन तथाविधज्ञानविधुरनास्तिकस्य परकीयकामिनीप्रवृत्तौ न व्यभिचारस्तस्य बलवदनिष्टाजनकत्व-ज्ञानस्यापि संभवादिति शङ्काव्युदासः।

'दशाया'मित्यन्तेन तदभावदशायां प्रवृत्तौ नरकाजनकत्वज्ञानस्य भ्रमरूपस्य संभवेन तस्य व्यभिचाराभावेऽपि न क्षतिरिति सूचितम्। व्यभिचारात्=व्यतिरेकव्यभिचारात्। तथा च नियतान्वयव्यतिरेकावसिद्धौ, काचित्कान्वयव्यतिरेकौ त्वकिंचित्करौ, तादृशज्ञानं विना-

तस्मादिष्टसाधनत्वमेव प्रवर्त्तना । उक्तञ्च मण्डनमिश्रैः—

"पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्त्तकः ।
प्रवृत्तिहेतुं धर्म्मञ्च प्रवदन्ति प्रवर्त्तनाम्" ॥

❀ दर्पणः ❀

ऽभावादिति भावः । उपसंहरति—तस्मादिति । 'इष्टसाधनत्वमेवे'त्येवकारेण कृतिसाध्यत्वबलवदनिष्टाऽननुबन्धित्वयोर्व्यवच्छेदः, आद्यस्य लौकिकप्रमाणेनैवाव-गमादन्त्यस्य प्रवर्त्तकज्ञानाविषयत्वादिति भावः । प्रवर्त्तनेति । लिङाद्यर्थ इत्यर्थः।

इष्टाऽभ्युपायत्वादित्यादि । इष्टसाधनत्वादन्यः—कृतिसाध्यत्वादिः, क्रियासु = यागादिरूपासु, पुंसां प्रवर्त्तको न = ज्ञाननिष्ठप्रवृत्तिजनकतायां विषयतयाव-च्छेदको नेत्यर्थः । 'यजेते'त्यादिवाक्यान्तर्गतलिङादिशक्यो नेति यावत्, चो हेतौ—यतः प्रवृत्तिहेतुं तद्धेतुतावच्छेदकमेव प्रवर्त्तनापदेन व्यपदिशन्तीत्यर्थः ।

परे तु—"बलवदनिष्टाननुबन्धित्वज्ञानस्य द्वेषाभावेनान्यथासिद्धतयाऽप्रव-र्त्तकत्वेऽपि कृतिसाध्यताज्ञानस्य प्रवर्त्तकतायाः सर्वसिद्धत्वेन तद्विषयस्य तस्य विध्यर्थत्वमावश्यकं, नच तद्धेतुतायामेव मानाभावः, कृत्यसाध्ये प्रवृत्तिस्तु कृत्य-साध्यताज्ञानस्य प्रतिबन्धकतया तत्र तदभावादेव नेति वाच्यं, कृत्यसाध्यता-

❀ काशिका ❀

द्वेषाभावदशायां प्रवृत्ताविष्टापत्तिश्चेति भावः । उपसंहरति—तस्मादिति । कृतिसाध्यत्वस्य लोकावगतत्वात्, बलवदनिष्टाननुबन्धित्वस्य च प्रवृत्त्यनुपयोगादित्यर्थः । इष्टेति । इष्टसाधनत्व-मेवात्र प्रवर्तनात्वेन वाच्यमित्यर्थः, यथाश्रुतं तु न संगच्छते, कृतिसाध्यत्वस्यापि प्रवर्तनात्वात् । कृतिसाध्यताज्ञानस्य हेतुत्वाभावाभिप्रायको वायं ग्रन्थः । पुंसामिति । पुंसां = प्राणिनाम् । इष्टाभ्युपायत्वात्—इष्टाभ्युपायत्वम् = इष्टसाधनत्वं—तस्मात् । अन्यः प्रवर्तको न = प्रवर्तकज्ञानविषयो न, अपि त्विष्टसाधनत्वमेव तथेत्यर्थः । कृतिसाध्यताज्ञानन्त्वन्येतुमतरीत्या प्रवृत्तिहेतुरेव नेति भावः । ननु कथं तस्य प्रवर्तनापदव्यवहार्यत्वमत आह—प्रवृत्तीति । प्रोपसृष्टवृतेर्हेतुमण्णिजन्ताद् भावे युचि निष्पन्नप्रवर्तनापदं प्रवृत्तिप्रयोजकव्यापारपरमिति भावः । अत एव 'सर्वं इमे स्वभूत्यर्थं यतन्ते' इति 'हेतुमति च' इति सूत्रे भाष्ये उक्तम् । अत्रेदं बोध्यम्—'ज्योतिष्टोमेन स्वर्गकामो यजेते'त्यादौ देवतोद्देशेन द्रव्यत्यागो यज्यर्थः फलं तस्य तदर्थकृत्यादिरूपभावनां प्रति करणत्वेनान्वयः, तस्यामेवेष्टसाधनत्वान्वयः, एवं च भावना-गतस्येष्टकरणत्वस्य लिङाभिधानेऽपि भावनाभाव्यनिवर्तकत्वरूपभावनानिरूपितयागनिष्ठकरणत्व-स्यानभिहिततया तत्समानाधिकरणज्योतिष्टोमादिपदात् तृतीयासिद्धिः, ज्योतिष्टोमादिनाम-धेयमपि यागस्यैव, तद्घटितकर्मक[illegible] तथा व्यवहारस्तु गौणस्तस्य स्वर्गकरणत्वव्यवहारो-

❀ दर्पणः ❀

ज्ञानस्य प्रतिबन्धकत्वे कृतिसाध्यत्वाऽभावतद्व्याप्यतदवच्छेदकधर्मदर्शनादीनां प्रतिबन्धकत्वस्य वक्तव्यतया तावदभावानां प्रवृत्तिं प्रति हेतुताकल्पनापेक्षया कृतिसाध्यताज्ञानत्वेन हेतुतायां लाघवस्य स्फुटतरत्वात्, कृतिसाध्यताज्ञानाऽभावस्य सर्वदा सत्त्वेन प्रवृत्त्यापत्तेश्च, अपि च कृतिसाध्यताज्ञानस्य प्रवर्तकत्वे कृतिसाध्यत्वप्रकारकपाकविशेष्यकज्ञानत्वावच्छिन्नाभावमानसं प्रति पाकादिगोचर-प्रवृत्तिसामग्र्याः प्रतिबन्धकत्वं न कल्प्यते इति लाघवं, तादृशप्रवृत्तिसामग्रीकाले पाकविशेष्यककृतिसाध्यत्वप्रकारकनिर्णयस्याऽऽवश्यकत्वेन—तस्य च स्वरूपसत एवोक्तज्ञानाऽभावमानसे क्लृप्तप्रतिबन्धकतयैवोपपत्तेः। भवन्मते तादृशमानसे तादृशप्रवृत्तिसामग्र्याः, प्रतिबन्धकत्वकल्पनेन गौरवं स्पष्टमेव। एवमप्रामाण्य-विशिष्टपाकविशेष्यककृतिसाध्यत्वप्रकारकज्ञानवानहमिति—मानसे पाकगोचर-प्रवृत्तिसामग्र्याः प्रतिबन्धकत्वाऽकल्पनेनापि लाघवं, तादृशविशिष्टविषयिता-शालिमानससामग्रीकाले अप्रामाण्यज्ञानास्कन्दितोक्तज्ञानस्यावश्यकत्वेनाप्रामाण्य-ज्ञानानास्कन्दितपाकादिविशेष्यककृतिसाध्यत्वप्रकारकज्ञानघटिततादृशप्रवृत्तिसाम-ग्री-तादृशमानससामग्र्योर्मेलनस्यैवाऽभावात्, भवन्मते कृतिसाध्यत्वाऽभावप्रका-रकपाकादिविशेष्यकज्ञानाभावघटिततादृशप्रवृत्तिसामग्रीतादृशमानससामग्र्योर्मे-

❀ काशिका ❀

ऽप्येवमेवेति। अयं भावः—इष्टसाधनत्वज्ञानस्य प्रवृत्तिसामान्ये हेतुत्वात् तस्यैव विधिप्रत्ययार्थ-त्वमुचितं, न तु लिङादिघटितप्रयोगादिरूपप्रवर्तनायाः, तस्या वाच्यत्वपक्षेऽपि आप्तोक्त्या तया इष्टसाधनत्वमनुमायैव प्रवृत्तिरित्यवश्यमभ्युपेयम्, तथा च यजेतेत्यादिवाक्यजन्यबोधोत्तरं सर्वत्र तदनुमितितत्साधनसामग्रीकल्पनायामतिगौरवं, व्याप्त्यादिमतिविधुराणामनुभवसिद्धप्रवृत्त्यनिर्वाहश्च,

न चैतन्मते बहुवित्तायाससाध्यज्योतिष्टोमादौ 'ज्योतिष्टोमेने'त्यादिवाक्यात् प्रवर्तकज्ञानानिर्वाहः, विशिष्य स्वर्गादिरूपफलसाधनताज्ञानस्यैव तत्रापेक्षितत्वात्, यजेतेत्यादितश्चेष्टसाधनं यागो याग-विषयिणी प्रवर्तनेत्यादिबोधस्यैवोत्पत्तेः, स्वर्गत्वाद्यवच्छिन्नसाधनत्वशक्तौ शक्त्यानन्त्यमिति वाच्यं, तदादिन्यायेनेच्छाविषयत्वावच्छेदकत्वेनोपलक्षणीभूतेन स्वर्गत्वादीननुगमय्य तदवच्छिन्ने साधनत्वे शक्तिस्वीकारेणादोषात्, चिकीर्षादिनान्यथासिद्धिस्तु न, व्यापारेण व्यापारिणोऽन्यथासिद्धत्वा-भावात्, अन्यथा संनिकर्षेणेन्द्रियस्यापि प्रत्यक्षं प्रत्यन्यथासिद्ध्याऽकारणत्वापत्तेः, स्वतन्त्रान्व-यव्यतिरेकितयेन्द्रियं नान्यथासिद्धमिति चेत्, प्रकृतेऽपि तुल्यम्, नन्विदं 'नेष्टसाधनं' तस्मात् त्वं कुर्वि'ति प्रयोगानुपपत्तिः, पौनरुक्त्यापत्तेः। न चेदं पौनरुक्त्यमेकान्ततः इष्टसाधनत्वबोधनाय, किं च प्रवर्तनात्वेनेष्टसाधनत्वस्य लिङादिवाच्यतया न पौनरुक्त्यमेवेति वाच्यं, तस्मादित्यस्या-नन्वयापत्तेः, अभेदे हेतुहेतुमद्भावासंभवादिति चेन्न, कुर्वित्यस्यावश्यकर्तव्यार्थकतयाऽदोषात्, परमतेऽप्य'त्र मया प्रवर्तितोऽतस्त्वमिदं कुर्वि'त्यत्रेत्थमेव ... त्याद्याच्च, न च 'राज्ञा प्रवर्तितोऽह-

❀ दर्पणः ❀

लने बाधकाभावेन तादृशमानसे तादृशप्रवृत्तिसामग्र्याः प्रतिबन्धकत्वस्यावश्य-कल्पनीयत्वेन गौरवस्यातिस्फुटत्वाद्, अनयैव दिशानिष्टसाधनत्वज्ञानाभावादीनामपि हेतुता निरसनीये'त्याहुः ।

गुरवस्तु—नेष्टसाधनत्वं विध्यर्थः, क्षणिकतयावगते यागे तस्य बोधयितु-मशक्यत्वात्, एवं परम्परासाधनत्वमपि, तथा, द्वाराऽनुपस्थितेः शाब्दबोधप्रयोजका-न्वयप्रयोजकरूपवत्त्वयोग्यतायास्तत्राऽभावात्, साधनतासामान्यबोधस्त्वेकविशेष-बाधे तदितरप्रकारकत्वनियमादसम्भवदुक्तिकः, किञ्च,–यागो न कर्त्तव्यतया प्रतीयते, काम्यादन्यत्काम्याव्यहितपूर्ववर्त्तिसाधनमेव कामी कर्तव्यतयाऽवैतीत्य-स्यान्यत्र क्लृप्तत्वात्, तस्माद् द्वारीभूतं काम्याऽव्यवहितपूर्ववर्तिसाधनमपूर्वमेव कार्य्यत्वेन शक्यम्, कार्य्यत्वं च कृत्युद्देश्यत्वं, तत्र विशेषणीभूतकृतेराश्रयविषय-योराकाङ्क्षायां विषयतया यागः, आश्रयतया स्वर्गकामः—सम्बद्ध्यते, सुखदुःखा-भावादेर्लौकिकप्रमाणेनेवापूर्वस्यापि वेदेन कृत्युद्देश्यत्वबोधनादपौरुषेये तस्मिन्न-प्रामाण्यशङ्कानवकाशात्तस्य तत्त्वम्, तथाच 'स्वर्गकामो यजेते'त्यत्र स्वर्गकाम-कृत्युद्देश्यो यागविषयको नियोग इति बोधः, अत्रापूर्वस्य यागविषककृत्युद्देश्यत्व-

❀ काशिका ❀

मित्यादिव्यवहारात्—प्रवर्तना प्रवर्तकपुरुषनिष्ठा—सैव विधिप्रत्ययेनोच्यते, अत एव 'विधिर्नियोग' इति वात्स्यायनोऽप्याह, इष्टसाधनत्वन्तु न प्रवर्तकपुरुषनिष्ठमिति न तल्लिङादिवाच्यमिति वाच्यम्, इष्टसाधनत्वस्यापि स्वज्ञापनवत्त्वसंबन्धेन प्रवर्तकनिष्ठत्वादिष्टसाधनताज्ञानस्यापि तन्निष्ठत्वात्, प्रवर्त्येष्टसाधनत्वं ज्ञात्वैव वाक्यप्रयोगकरणात्, लिङाद्यन्तप्रयोगरूपव्यापारस्यापि 'ज्योतिष्टोमेने'-त्यादिप्रवर्तकवेदनिष्ठत्वात्तदभावाच, तद्बोधाननुभवाच्च, लाघवात्प्रवृत्त्यनुकूलधर्मस्यैव प्रवर्त्तना-पदार्थत्वं, न तु प्रवर्त्तकनिष्ठत्वस्य तत्रान्तर्भाव इत्यस्यापि वक्तुं शक्यत्वाच्च, न च तथा 'हेतुमति च' इति सूत्रे भाष्ये—'पृच्छतु मा भवानित्यत्र णिच् कस्मान्न भवति' इति प्रश्ने,—उत्तरम्—'अकर्तृत्वात्' इति । क्रियाविशिष्टप्रेरणायां णिच्, 'हेतुमति च' इति सूत्रेण हेतुव्यापारे णिज्वि-धानात्, कर्तुः प्रयोजकस्य हेतुत्वान्निष्क्रियद्रव्यमात्रप्रेरणायां लोड्विधानादिति तदाशयः, तदुक्तम्— 'द्रव्यमात्रस्य तु प्रैषे पृच्छयादेर्लोड् विधीयते ।

सक्रियस्य प्रयोगस्तु यदा स विषयो णिचः ॥' इति ।

प्रयोजनं = प्रयोगः, प्रेरणमिति यावत्, न च सक्रियस्य प्रेरणा निरर्थकेति वाच्यम्, आलस्यादिना विरामाभावशङ्कया तत्सार्थक्यात्, ननु संभाविततत्तत्क्रियाकर्तृत्ववानेव प्रेष्यते, तत्र णिच् प्रत्यय इष्यते, 'तत्प्रयोजक' इत्यत्र तत्पदेन व्यापाराविष्ट एव गृह्यते इत्यत्र नाग्रह इत्याशयेन 'अथापि कथंचित् कर्ता स्यादेवमपि न दोषः, लोटोक्तत्वादस्मिन्न भविष्यति' इति द्वितीयमुत्तरमुक्तं तद्विरोधः, इष्टसाधनत्वस्य लोटोक्तत्वेऽपि तत्र णिजर्थत्वाभावेन तदसंमतेः

❀ दर्पणः ❀

मेव यागविषयकत्वम्, यागस्य तादृशकृतिविषयत्वे पुरुषस्याश्रयत्वे चान्वयितावच्छेदकमपूर्वकारणत्वम्, सैव योग्यता, यथा 'घटेन जलमाहरे'त्यत्र छिद्रेतरघटत्वं, योग्यतावच्छेदकोपस्थितिर्घटेनेत्यादावर्थाध्याहारात्, प्रकृते चौपादानिकप्रमाणवशात्तच्छक्त्यैव, तच्छक्त्यैवाशक्योपस्थित्यभ्युपगमे लक्षणोच्छेद इति न सांप्रतं, स्वशक्त्यान्वयबोधकस्यैव स्वोपपादकसकलपदार्थबोधकत्वोपगमात्। न च 'गङ्गायां घोष' इत्यादौ गङ्गादिपदानां स्वशक्त्यान्वयबोधकत्वं, येन तदुपपादकसकलपदार्थबोधनायौपादानिकप्रमाणाऽवकाशः स्यात्, अजहत्स्वार्थलक्षणा तु नाऽस्मन्मतसिद्धा, तथाच स्वीयत्वेन कार्यबोद्धा नियोज्यः समभिव्याहृतपदोपस्थापितफलकामश्च तथेति काम्ये स्वर्गकामो नियोज्यः, एवञ्च वेदबोधितमपूर्वमुद्दिश्य पुरुषप्रवृत्त्युपपत्तौ नेष्टसाधनत्वं विध्यर्थः, इच्छाविषयसाधनतात्वेन तत्र शक्तौ प्रवर्त्तकज्ञानानिर्वाहः, स्वर्गजनकतात्वेन शक्तौ नानार्थतापत्तेरिति तन्मतस्य विकल्पग्रस्तत्वाच्च।

अपि च नित्यनैमित्तिकस्थले 'शुचितत्कालजीविनो राहूपरागवतश्च मम सन्ध्यास्नानविषयको नियोग' इति बोधान्न फलाऽपेक्षा, भवन्मते तु 'चन्द्रसूर्यग्रहे स्नाया'द'हरहः सन्ध्यामुपासीते'त्यादौ फलाश्रवणाद्विध्यर्थबाधः प्रसज्ज्येत, मम

❀ काशिका ❀

स्पष्टत्वादिति वाच्यं, लोटा प्रवर्तनात्वेन रूपेण प्रवर्तनासामान्यस्योक्तेरित्याशयात्, यद्वा लोटोक्तत्वं गम्यमानं, तथा च लोडन्तप्रयोगेण शाब्दबोधोत्तरं प्रेरणायाः प्रतीयमानत्वान्न णिजितितात्पर्यादित्याहुर्मण्डनमिश्रानुयायिनः।

अन्ये तु मीमांसकाः शाब्दिकाश्चोक्तभाष्यादिबलात् प्रवर्तनेष्टसाधनत्वातिरिक्तैव लिङाद्यर्थ इति प्रतिपन्नाः, सा च द्योत्यैव, पचेनेत्यादितो विनापि प्रत्ययं तत्प्रतीतेः, अत एव तस्या धात्वर्थविशेषणत्वं, द्योत्यत्वेऽपि तस्या विशेष्यत्वमिति तु न, द्योत्यार्थानां विशेषणताया एव 'हेतुमति च' इति सूत्रभाष्यसिद्धत्वेन युक्तत्वात्, किं च तस्या विशेष्यत्वे प्रवर्त्यस्य प्रधानधात्वर्थव्यापाराश्रयतयाऽकर्तृत्वे तत्र पचेतेत्याद्यनुपपत्तिः, किं च 'स्वाध्यायोऽध्येतव्य' इत्यादिवाक्यात् प्रवर्तनाविशेषणकस्यैव बोधस्योत्पादेन सर्वत्र तस्या विशेषणत्वस्वीकारस्यैवोचितत्वाच्चेति प्राहुः।

यत्तु, प्राभाकराः—आशुतरविनाशिनो यागादेः कालान्तरभाविस्वर्गादिसाधनत्वस्य ग्रहीतुमशक्यत्वान्नेष्टसाधनत्वं विध्यर्थः, द्वारानुपस्थित्या च न परंपरया साधनत्वस्यापि ग्रहः संभवति, योग्यताज्ञानस्य शाब्दबुद्धिहेतुत्वात्, सा-चान्वयप्रयोजकरूपवत्त्वं, यथा 'घटेन जलमाहरे'त्यत्र सच्छिद्रेतरघटत्वं, न चैवमपि साधनत्वसामान्येन बोध उपपद्यत एवेति वाच्यं, एकविशेषबाधे सामान्यज्ञानस्य तदितरप्रकारकत्वनियमात्, तस्मात् कार्यत्वरूपेणापूर्वं लिङादिशक्यं, कार्यत्व-

ॐ दर्पणः ॐ

तु वैदिके कर्मणि वेदबोधितमपूर्वमुद्दिश्यैव पुरुषः प्रवर्त्तते, तस्यैव वेदेन पुरुषार्थत्वबोधनात्, काम्ये फलावाप्तिरानुषङ्गिक्येव, अत एव नित्येऽपि तदुद्देशेन प्रवृत्तिरुपपद्यते'' इत्याहुः ।

तदपरे न क्षमन्ते—लोके प्रवर्त्तकत्वेन सर्वसम्मतं यदिष्टसाधनत्वज्ञानं तद्विषयेष्टसाधनत्वे विधिशक्तिकल्पनयैव विधेः प्रवर्त्तकत्वोपपत्तौ नियोगस्य विधिवाच्यत्वे मानाऽभावात्, वेदबोधितस्वर्गसाधनत्वानुपपत्त्या हि तत्कल्पनं, न च तस्य पूर्वमुपस्थितिरस्ति येन तत्र शक्तिग्रहः, एकविशेषबाधे सामान्यज्ञानस्य तदितरप्रकारकत्वनियमेऽपि साक्षात्साधनतातिरिक्तसाधनतात्वेन बोधे बाधकाभावात्, तादृशसाधनत्वे योग्यतावच्छेदकं च परम्पराघटकमपूर्वं, तथा च स्वर्गसाधनत्वशक्त्यैव निर्वाहे औपादानिकप्रमाणवशादपूर्वोपस्थितावपि न तद्वाच्यम्, अपूर्वानुपस्थितौ परम्परासाधनत्वमपि कथ वेदो बोधयेदिति त्वनुपस्थितेऽपूर्वे कथं शक्तिग्रह इत्यनेन तुल्ययोगक्षेमम्, एवं 'काम्याऽव्यवहितपूर्वसाधनं कामी कर्त्तव्यतयाऽवैती'त्यपि न, काम्यसाधनताज्ञानस्यैव प्रवर्त्तकत्वान्न तु तत्राऽव्यवहितत्वनिवेशोऽपि, गौरवान्मानाऽभावाच्च, दृश्यते च तृप्त्यर्थिनस्तत्प्रयोजके जलाहरणादौ प्रवृत्तिः, इष्टसाधनत्वे यथा शक्तिग्रहस्तथोक्तम्, अपूर्वस्याशक्यत्वेऽपि यथा

ॐ काशिका ॐ

रूपेण घटादौ शक्तिग्रहात् योग्यतावशादपूर्वव्यक्तिलाभः, न हि यागविषयकं कार्यमपूर्वादन्यत् संभवति, न च ज्ञानादिकं तादृशं संभवत्येवेति वाच्यं, कार्ये स्वर्गकामस्य नियोज्यनियोजकभावलक्षणान्वयाङ्गीकारेणादोषात्, तथा हि कामी नियोज्यो, नियोजकं कार्यं, नियोजकत्वं तत्कामिकार्यतया प्रतीयमानत्वम्, अत्र चान्वयप्रयोजकं काम्यसाधनत्वं, न हि कामी काम्यादन्यत् काम्यासाधनत्वेन ज्ञातं कार्यतयावैति । यागविषयकज्ञानादिकं न काम्यस्वर्गादिसाधनमतो योग्यतावलाद्यागविषयकं कार्यं स्वर्गकामीयं, स्वर्गकामो यागविषयककार्यवानिति वा शाब्दानुभवो जायमानोऽपूर्वालम्बनो भवति, एवं च काम्ये क्लृप्तशक्तिलिङादिर्नित्यनैमित्तिकयोर्निषेधे चाऽपूर्ववाचकः, फलाश्रवणाच्च तत्र फलालाभः, वैदिककर्मण्युद्देश्यत्वेन बोधितापूर्वमुद्दिश्यैव हि प्रवर्तते, एवं च काम्ये फलावाप्तिरानुषङ्गिकी, नित्येऽप्यपूर्वस्योद्देश्यस्य सत्त्वात् प्रवृत्तिः, तस्मात् कृत्युद्देश्यरूपं कार्यमेव शक्यमिति प्रोचुः ।

अत्र तार्किकादयः प्रत्यवतिष्ठन्ते,—अपूर्वस्य वाच्यत्वे मानाभावः, न चोक्तानुपपत्तिरेव मानम्, एकविशेषबाधेऽपि सामान्यरूपेणैव तदितरबोधः, 'घटेन जलमाहरे'त्यत्र हि योग्यतया वस्तुतो यश्छिद्ररहितो घटः स घटत्वेनैव बोधविषयो भवति, न तु सच्छिद्रेतरत्वविशिष्टघटत्वेन, तदुपस्थापकाभावात्, न च लक्षणया घटपदेनैव तेन रूपेणोपस्थितिर्मानाभावात्, न चान्वयप्रयोजकरूपवत्त्वरूपयोग्यताज्ञा[?]स्य हेतुतया तदुपस्थितिरावश्यकीति वाच्यं, वृत्त्या पदजन्यपदार्थो-

❀ दर्पणः ❀

नित्यनैमित्तिके प्रवृत्तिस्तथोपपादितं, प्रत्युत तत्र तवैव सा दुरुपपादा, निष्फलत्वात्; दुःखैकफलत्वाच्च, प्रवृत्तिमात्र इष्टसाधनताज्ञानस्य हेतुत्वावधारणात्, प्रवृत्तिविषयसाध्यत्वे सतीष्टत्वरूपसाध्यत्वमपि नाऽपूर्वस्य, येन तदुद्देशेनापि प्रवृत्तिः सम्भाव्येत, निष्फलतयावगते प्रवृत्तिस्तु—श्रुतिसहस्रेणाप्युत्पादयितुमशक्येति वेदबोधितत्वान्नित्ये प्रवृत्तिरिति—छात्रप्रतारणामात्रम्, अत एव 'यज्ञो दानं तपः कर्मे'त्यादिनाऽनिर्दिष्टोऽपि प्रत्यवायपरीहारः स्वर्गादिफलमनुद्दिश्य क्रियमाणानामेषां फलं भवतीत्यर्थकेनाऽष्टादशाध्याये भगवद्गीतासु पावनत्वमुक्तम्। किञ्च,—'पचेते'त्यादिलौकिकविधेरिष्टसाधनत्वबोधकत्वेन प्रवर्त्तकत्ववद् वैदिकविधेरपि तच्छक्त्यैव प्रवर्त्तकज्ञाननिर्वाहे तस्यानुपस्थितापूर्वे शक्तिकल्पनं निष्प्रमाणकमेवे"ति।

परेतु—"लिङादिश्रवणेऽयं मां प्रेरयतीति नियमेन प्रतीतेरभिधानात्मकः प्रेरणापरपर्य्यायो व्यापारो लिङादिवाच्यः, सा च लिङ्गसंख्यानन्वयित्वाद् व्यापारपदेन-प्रवर्त्तकनिष्ठत्वात्-प्रवर्त्तनापदेन च व्यवह्रियते, प्रेरणात्वेन तस्याः सविषयत्वमपि, शक्यतावच्छेदकं च प्रेर्य्यादिधात्वर्थतावच्छेदकतया सिद्धं प्रेरणात्वमखण्डोपाधिः, स च व्यापारः, सम्भवाल्लोके प्रवर्त्तकपुरुषनिष्ठोऽभिप्रायविशेष

❀ काशिका ❀

पस्थितेरेव. शाब्दबोधहेतुतया तेन रूपेण भानासंभवात्, उपस्थितावाधितपदार्थान्तरभानप्रसङ्गाच्च, एवं च साधनत्वसामान्यबोधानुपपत्तिः, ननु तथाप्याशुतरविनाशिनः कालान्तरभाविफलजनकत्वे फलसमयस्यापि व्यापारजनकत्वस्य योग्यतयाऽपूर्वानुपस्थितौ तादृग्योग्यताज्ञानासंभवाद्यागादावपीष्टसाधनत्वं ग्रहीतुमशक्यमेवेति चेन्न, द्रवद्रव्यत्वस्य करकात्मकजलेऽपि सत्त्वेन तदभिप्रायक'पयसा सिंचती'तिवाक्यस्यापि योग्यत्वापत्त्या तज्ज्ञानदशायां 'सेको नैतज्जलकरणक' इति बाधकप्रमासमयेऽपि तज्जलकरणकशाब्दबोधापत्त्या चान्वयप्रयोजकरूपवत्त्वस्य योग्यतात्वानभ्युपगमात्, अपि तु तत्पदार्थे तत्पदार्थवत्त्वस्यैव तत्त्वाभ्युपगमात्, संशयनिश्चयसाधारणतज्ज्ञानस्यैव कारणतया तन्निश्चयासंभवेऽपि संशयात्मकतज्ज्ञानस्य संभवात्, कार्यताज्ञानस्य लोके प्रवर्तकत्वदर्शनात्, कार्यत्वेनापूर्वमेव विध्यर्थ इत्यपि न युक्तं, कृतिजन्यत्वरूपस्य धात्वर्थनिष्ठस्यैव प्रवर्तकत्वादपूर्वस्य तथात्वसंभावनापि न, तादृशस्य लोकत एव संभवाच्चेत्याद्युक्तमेवेति। यत्तु—निष्फले सन्ध्यावन्दनादौ बाधादिष्टसाधनत्वं न विध्यर्थ इति, तन्न, प्रवृत्तिमात्रे इष्टसाधनताज्ञानस्य हेतुतया तत्र प्रवृत्त्यनुपपत्तेः। न च वेदबोधितापूर्वोद्देशेनैव प्रवृत्तिरिति वाच्यं, तद्रूपमेवेष्टमादायेष्टसाधनत्वस्य विध्यर्थत्वोपपत्तेः। वस्तुतः—सुखदुःखाभावान्यतररूपत्वाभावेनेष्टसाधनत्वाभावेन च तदुद्देशेन प्रवृत्तिर्न संभवत्येव, न च वेदबोधितत्वान्निष्फलेऽपि प्रवृत्तिः, निष्फलत्वज्ञानदशायां वेदबोधितत्वज्ञानेऽप्यप्रवृत्तेः, तदुक्तं 'प्रयोजन-

॥ दर्पणः ॥

एव, तत्प्रवर्तकत्वं च लिङाद्युच्चारयितृत्वं, वेदे तु प्रयोक्तुरसम्भवाल्लिङाद्यन्तशब्दस्वरूप एव तत्वे सति स्वतन्त्रत्वम्। राजादिप्रेरितपदातेर्लिङाद्युच्चारयितृत्वेऽपि प्रवर्त्तकत्वेनाव्यवह्रियमाणत्वात् 'स्वतन्त्रे'ति, अद्विष्टयाऽऽप्तोक्तया च तया स्वविषये इष्टसाधनत्वानुमानं, ततश्च प्रयोज्यप्रवृत्तिः, शत्रूक्तात्'विषं भुङ्क्ष्वे'त्यतो विषभोजने इष्टसाधनत्वानवगते'राप्तोक्तये'ति। आप्तोक्तयापि,—'विषं भुङ्क्ष्व मा चास्य गृहे भुङ्क्था' इत्यादिकयापि तस्मिन्निष्टसाधनत्वाननुमाना'दद्विष्टे'ति। तत्र विषभोजनविषयकाऽभिप्रायस्य तदीयद्वेषविशिष्टत्वान्न व्यभिचारः, भवतु वा लिङादिसमभिव्याहारे व्यापारान्तरस्याननुभवात् सर्वत्र लिङाद्यन्तशब्दस्वरूपैव सा, अत एव,—'हेतुमति चे'ति सूत्रे भाष्ये—लिङादिशब्दप्रयोगरूपप्रयोजककर्तृव्यापारस्य सत्त्वादित्याशयेन, 'पृच्छतु मां भवा'नित्यत्र णिच् कस्मान्न भवतीति प्रश्ने,—अकर्त्तृत्वादित्युत्तरम्,। 'सक्रियप्रेरणायां णिच्, निष्क्रियप्रेरणायां लोडादि, 'तत्प्रयोजक' इत्यत्र तत्पदेन व्यापाराविष्टः कर्त्तोच्यते' इति तद्भावः। 'अथापि कथञ्चित् कर्त्ता स्यादेवमपि न दोषो, लोटोक्तत्वात् प्रेषणस्य णिज् न भविष्यती' त्युक्तम्। तत आहत्यैव प्रेरणाया विध्यर्थत्वं लभ्यते। 'विधिनिमन्त्रे'ति सूत्रभाष्येऽपि,—'विधिः प्रेरण'मित्युक्तेश्च, तस्मान्नेष्टसाधनत्वादि विध्यर्थः, किञ्चे'दं ते

॥ काशिका ॥

मनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति, तस्मात् प्रत्यवायपरिहारः फलं नित्येऽपि भवति। न च—

'अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः॥'—

—इति भगवद्गीताविरोध इति वाच्यम्।

'यज्ञो दानं तपः कर्म पावनानि मनीषिणाम्।
एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च॥
कर्तव्यानीति मे पार्थ! निश्चितं मतमुत्तमम्॥'—

—इत्यष्टादशाध्याये पावनत्वोक्तेः। सङ्गः = कर्तृत्वाभिमानः, तथा चानुद्दिष्टस्यापि प्रत्यवायपरिहारस्य फलत्वेन फलानुसंधानं विनापि क्रियमाणस्य पावनत्वं भवतीति भावः। अत एव नित्यज्योतिष्टोमादेः स्वर्गादिसिद्धये करणेऽपि नित्यप्रयोगसिद्धिरिति सिद्धान्तः संगच्छते। नित्यस्य सर्वथा निष्फलत्वनियमे तु तदसंगतिः स्पष्टैव, किं चार्थवादिकमपि फलं रात्रिसत्रन्यायेन तत्र वक्तुं शक्यं, रात्रिसत्रे हि 'ज्योतिर्ज्योति'रित्यादिकफलशून्यवाक्यबोधिते 'प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्ती'त्यर्थवादोक्तं प्रतिष्ठात्मकं फलं स्वीकृतं, तद्वदत्रापि,—

'सन्ध्यामुपासते ये तु सततं संशितव्रताः।
विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम्॥'—

※ दर्पणः ※

इष्टसाधनं, तस्मात् त्वं कुर्विति स्वारसिकव्यवहारादपि न तस्य विध्यर्थत्वं, पौनरुक्त्यापत्तेः, पौनरुक्त्यस्य सर्वथेष्टसाधनत्वबोधनतात्पर्य्यकत्वेऽपि 'तस्मा'दित्यस्यानन्वयापत्तेश्चेत्याहुः।

तच्च प्रायशो भट्टमताऽनुवाद एव, यतो भट्टमते लिङर्थोऽभिधाख्यो व्यापारः, स च लोके प्रयोक्तृपुरुषनिष्ठोऽभिप्रायविशेष एवेत्यादि प्राग्वत्, वेदे त्वन्यस्याऽसम्भवाल्लिङाद्यन्तशब्दनिष्ठ एव सः, समवेतश्च, अत एव सा 'शाब्दी भावने'ति व्यवह्रियते, भावनाया शब्दार्थभेदेन द्वैविध्यादाख्यातवाच्या'ऽऽर्थी'ति व्यवह्रियते, भावनात्वेन लिङर्थशाब्दभावनायाः सविषयत्वमपि, भावनाया भाव्यकरणेतिकर्त्तव्यतारूपांशत्रयविशिष्टत्वादभिधाभावनायाः सविषयकत्वेनावगतायाः किं भावयेदिति भाव्याकाङ्क्षायां समानप्रत्ययोपात्तत्वप्रत्यासत्त्याऽशत्रयविशिष्टा स्वविषयप्रवृत्तिरूपाख्यातवाच्यार्थी भावना विषयत्वेनोपतिष्ठते, इयमेव 'साध्याकाङ्क्षे'ति व्यवह्रियते, साध्यताख्यविषयतयैव तस्याः सविषयत्वात्, एवञ्च तस्याः साध्यत्वेऽवगते, केनेति करणाकाङ्क्षायां लिङादिपदज्ञानं करणत्वेनाऽन्वेति, करणत्वं च भावनाभाव्यनिर्वर्त्तकत्वमेव, कुठारादेरपि पुरुषव्यापारनिर्वर्त्यच्छिदानिर्वर्त्तकत्वेनैव करणत्वात्, इयमेव भावना 'करणाकाङ्क्षे'त्युच्यते, 'कष्टं कर्मे'ति न्यायादुपाये

※ काशिका ※

—इत्यर्थवादोक्तफलसंभवः, अन्यथा एतस्य—

'एतत् सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितम्।
यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते ॥'—

—इत्यस्य वचनस्य च वैयर्थ्यापत्तिः। न च स्तावकत्वमात्रेणोपयोग इति वाच्यं, 'सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ, सर्वेभ्यः कामेभ्यो ज्योतिष्टोम' इत्येतयोरपि तथात्वापत्तेः, न च चतुर्थीसाचिव्येन फलबोधकत्वम्, 'ऊर्जोऽवरुध्यै' इत्यत्रेवार्थवादत्वेनैवोपपत्तेः, किं च स्तावकत्वेनोपयोगेऽपि स्तुतिवैयर्थ्यं दुर्वारमेव, प्ररोचनार्था सेति न शक्यं, प्ररोचनाया एव निष्फलत्वापत्तेः, 'बहुदुग्धेयं धेनु'रिति वाक्याप्रामाण्यज्ञानसत्त्वे तद्वाक्यादिव, अर्थवादानामप्रामाण्यं जानतः प्रवृत्त्यसमवेतप्रवृत्तिफलकताया स्वीकर्तुमशक्यत्वात्, ननु स्वर्गाद्यर्थकतायामप्रामाण्येऽपि तत्तात्पर्यविषयीभूतप्राशस्त्ये प्रामाण्यं संभवत्येवेति चेन्न, तत्तत्फलसाधनत्वातिरिक्तप्राशस्त्यस्य कुत्राप्यकल्पनात्, तज्ज्ञानस्य प्रवृत्त्यनुपयोगाच्च, तस्मात् स्वार्थे एवैषां प्रामाण्यमभ्युपगन्तव्यम्, एवं च 'सन्ध्यामुपासीते'ति विधित इष्टावगमेऽपि अवान्तररूपेण बोधनद्वारा शीघ्रोत्पत्तिप्रत्यायनद्वारा वा प्रवृत्तिविशेषसंपत्तिफलका अर्थवादा इति ध्येयम्। अत एव 'सर्वशक्तौ प्रवृत्तिः स्यात्तथाभूतोपदेशात्' इति सर्वशक्त्यधिकरणपूर्वपक्षसूत्रे 'काम्यं यथा फलायोपदिष्टं तथा नित्यमपि' इत्युक्तं भट्टाचार्यैः। न च नित्येऽपि फलजनकत्वस्वीकारे नित्यत्वहानिरिति वाच्यं, प्रत्यवाय-

❀ दर्पणः ❀

द्वेपेणाऽऽलस्यादिना वा अप्रवर्त्तमानं पुरुषं प्रति प्रशस्तफलवत्ताबोधनेन द्वेपाद्य-पसारणेनाऽर्थवादवाक्यजन्या प्राशस्त्यरूपा स्तुतिः सहकारि कारणमितीय'मिति-कर्त्तव्यते'त्युच्यते । एवमार्थीभावनाया अप्यंशत्रयवैशिष्टयेन तदवगतौ—किं भावयेदित्याकाङ्क्षायां—'स्वर्गकामा'दिपदसन्निधानात् स्वर्गो भाव्यतयाऽन्वेति—'स्वर्गं भावये'दिति । यद्यपि स व्यापारस्त्यागविषयोऽपि तथाऽपि तस्याऽसुखरूप-तयाऽपुरुषार्थत्वेन करणत्वेनैवोपस्थित्या च न भाव्यत्वम्, अत एव तत्समाना-धिकरणज्योतिष्टोमादिपदात्तृतीया, केनेत्याकाङ्क्षायां यागः करणत्वेनाऽन्वेति, करणत्वं तूक्तमेव । सहकार्याकाङ्क्षारूपे कथंभावाकाङ्क्षायां च 'समिधो यजती'त्यादिवाक्यावगतसमिन्नामकयागादिक्रियाजातमितिकर्तव्यतयाऽन्वेतीत्यधिकमन्य-तोऽवधार्य्यम् । तदुक्तम्—'अभिधांभावनामाहुरन्यामेव लिङादयः ।

अर्थात्मभावना त्वन्या सा चाख्यातस्य गोचरः ॥'

लिङोऽभिधा सैव च शब्दभावना भाव्या च तस्याः पुरुपप्रवृत्तिः ।

सम्बन्धबोधः करणं तदीयं प्ररोचना चाऽङ्गतयोपयुज्यते ॥' इति ।

उक्तोऽर्थः, तत्र पूर्वोक्तमते भट्टमतादियान् विशेषो—यद्भट्टमतेऽभिधाख्यो वैदिक-

❀ काशिका ❀

परिहारातिरिक्तफलाजनकत्वरूपस्य, प्रत्यवायकारणीभूताभावप्रतियोगित्वरूपस्य वा नित्यत्वस्या-घातत्वात् । काम्यत्वमपि स्यादित्यपि न, इष्टापत्तेः, प्रत्यवायपरिहारातिरिक्तफलजनकत्वम्, उक्तनित्यभिन्नत्वविशिष्टफलजनकत्वं काम्यत्वमित्यभ्युपगमाद्वा । [1]ननु यत्रार्थवादिकं फलं नास्ति तत्र प्रत्यवायपरिहारस्य फलत्वं न युक्तं, दुरितध्वंसरूपस्य तस्य सुखदुःखाभावान्यत्वादिष्टा-जनकत्वाच्चेच्छाविषयत्वाभावात्, न च प्रत्यवायपरिहारस्य दुःखानुत्पादफलकत्वादिष्टत्वमिति वाच्यं, प्रागभावरूपस्य तस्योक्तक्रमेणेच्छाविषयत्वरूपफलत्वाभावात् । न च दुःखात्यन्ताभाव एव फलतामाप्नोत्विति वाच्यम्, प्रागभावात्यन्ताभावयोर्विरोधेन तदा तस्य तत्रासत्त्वादिति चेन्न, तयोर्विरोधस्य दीधितिकारेणैव तिरस्कृतत्वात्, न च तथापि तस्य नित्यतया तज्जनकत्वासंभवः स्वस्वव्याप्येतरयावत्कारणसत्त्वे यत्सत्त्वे यदव्यवहितोत्तरक्षणे यत्सत्त्वं यदसत्त्वे यदसत्त्वमित्येवं-रूपस्य योगक्षेमसाधारणजन्यजनकभावस्य संभवादित्यलं पल्लवितेन । [[1]अत एवान्तरा श्यामदशा-यामत्यन्ताभावविषयको 'रक्तं रूपं नास्ती'ति प्रत्यय उपपद्यते, ध्वंसाद्यवलम्बन एवासाविति चेन्न, मध्ये रक्तेऽपि तथाप्रत्ययप्रसङ्गादिति दिक् ।]

'न कलञ्जं भक्षये'दित्यादौ नञ्समभिव्याहृतलिङादेरनिष्टसाधनत्वमर्थो, नञ् तात्पर्यग्राहको, न त्वभावार्थकः, कलञ्जभक्षणादावपि तृप्त्यादिरूपेष्टसाधनत्वसत्त्वेन तदभावस्य बोधयितुम-शक्यत्वात्, नापि कलञ्जभक्षणाभाव इष्टसाधनमिति बोधः स्वीकर्तुं युक्तः, प्रत्ययार्थप्रकृत्यर्थ-

१. लिखितपुस्तके तु [ ] एतदन्तर्गतः पाठः 'ननु' इत्यतः पूर्वमेव दृश्यते ।

❀ दर्पणः ❀

लिङर्थो व्यापारः शब्दसमवेतस्तदतिरिक्तश्च, तस्मिंस्तु लिङाद्यन्तशब्दात्मक एव लोकवेदसाधारणश्च । सविषयकत्वं तु मतद्वयेऽप्यविशिष्टमिति ।

अत्र वदन्ति—"अभिधा लिङादिनिरूपिता शक्तिरेव, न तु तदतिरिक्तः कश्चन शब्दसमवेतो व्यापारः, मानाऽभावात्, विधेः प्रवर्त्तकत्वस्य पूर्वमुपपादनात् तदनुपपत्तेरप्यभावात्, अन्यथा स्पन्दाऽतिरिक्तः शब्दसमवेत एको व्यापारः कल्पनीयः, तस्य च स्वप्रवृत्तौ परप्रवृत्तौ वा कारणत्वेनाऽक्लृप्तस्य तत्त्वेन कारणत्वं, प्रवर्त्तनात्वेन परनिष्ठव्यापारबोधकत्वेन क्लृप्तस्य शब्दस्य स्वनिष्ठव्यापारबोधकत्वं, सविषयकत्वं च कल्पनीयमिति गौरवस्य स्फुटत्वाच्च । प्रेरणाया विध्यर्थत्वेऽपि सामान्यस्य विशेषे पर्य्यवसानात्, कोऽसौ व्यापार इति विशेषगवेषणायां—समीहितसाधनत्वमेव स इत्येव वक्तुमुचितम्, लिङस्तदर्थकत्वं विना प्रवर्त्तकत्वस्यैवाऽसम्भवात्, प्रेरणाविषयः पाक इति बोधस्येष्टसाधनत्वाद्यविषयकस्य प्रवर्त्तकत्वं लोकविरुद्धमेव, मखकरणस्य स्वनिष्ठव्यापारद्वारैव फलजनकत्वमिति नियमस्तु नास्त्येव, व्याप्तिज्ञानादौ व्यभिचारात्, तस्माल्लिङादिजन्यबोधविषयाऽभिधाया इष्टसाधनत्वादिज्ञाननिरपेक्षायाः प्रवर्त्तकत्वं निर्युक्तिकमेव, शब्दरूपप्रेरणावादिनाऽपि तद्विषय इष्टसाधनत्वानुमितिद्वारैवोक्तयुक्त्या प्रवर्त्तकत्वं वाच्यं,

❀ काशिका ❀

योरन्तरा पदार्थान्तरप्रवेशस्याव्युत्पन्नत्वात्, 'नानुपमृद्य प्रादुर्भावा'दित्यादावप्यारोपितप्रादुर्भावहेतुकत्वबोधस्यैव शब्दतोऽङ्गीकारेण न प्रकृतिप्रत्ययार्थमध्यनिवेशो नञर्थाभावस्येति बोध्यम् । प्रादुर्भावाभावहेतुकत्वबोधस्तु मानसः, किं च तथाबोधाङ्गीकारे कलञ्जभक्षणादेर्निवृत्तिजनकज्ञानानुत्पादनेन नञ्घटिततादृशवाक्यस्य निवर्तकत्वानुपपत्तिः, न च यदभावो यस्येष्टसाधनतया बोध्यते तत्तस्यानिष्टसाधनमिति व्याप्त्या कलञ्जभक्षणेऽनिष्टसाधनत्वानुमानान्नोक्तदोष इति वाच्यम्, अप्रयोजकत्वात्, ग्रीष्मसमये सूक्ष्मकम्बलाद्यभावस्य सुखविशेषजनकत्वबोधेऽपि तस्यानिष्टसाधनत्वाभावात्, सूक्ष्मकम्बलादेः शीतसमयेऽनिष्टजनकत्वाभावेऽपि ग्रीष्मकाले दुःखात्मकानिष्टजनकत्वस्यानुभूयमानतयोक्तव्याप्तेः सुस्थत्वमिति चेत्तथापि वाक्यस्य साक्षान्निवर्तकज्ञानजनकत्वानिर्वाहः, तथाविधव्याप्तिप्रतिसंधानशून्यस्यानुमित्यनुपपत्तिश्च, किं च विधिनिषेधवाक्ययोस्तथा सत्येकार्थत्वमेव स्यात्, तच्च न युक्तम्—

'अन्तरं यादृशं लोके ब्रह्महत्याश्वमेधयोः ।
दृश्यते तादृगेवेदं विधानप्रतिषेधयोः ॥ इति ।'

यन्मते इष्टसाधनत्वातिरिक्तप्रवर्तना लिङाद्यर्थः, तन्मते निवृत्त्यनुकूलव्यापाररूपनिवर्तनां लिङादिः प्रतिपादयति, नञ् द्योतकः, नञः स्वसंबन्धिप्रतिपक्षबोधकत्वस्वभावात्, अत एवास्तीत्यनेन संबध्यमानो नञ् सत्त्वप्रतिपक्षभूतमसत्त्वं गमयति ।

❁ दर्पणः ❁

तच्च वैदिकविधिस्थले न सम्भवति 'तस्यैव महाभूतस्य निश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेद' इति श्रुत्युपष्टम्भेन निःश्वसितवद्वेदे तैर्जन्यत्वाऽङ्गीकारेण यथार्थ-ज्ञानवदुच्चरितत्वरूपाऽऽप्तोक्तत्वरूपविशेषणवैकल्येनोक्तानुमानाप्रवृत्तेः, एवं सवि-षयत्वसप्यात्मविशेषगुणाऽतिरेकिण्यास्तस्या सर्वतन्त्रविरुद्धम्, न च प्रेरणैव स्वातन्त्र्येण प्रवृत्तिहेतुः, स्वतन्त्रप्रवृत्तौ व्यभिचारात्, 'सर्वं इमे स्वभूत्यर्थं प्रवर्त्तन्त' इति समीहितसाधनताज्ञानप्रवर्त्तकताप्रतिपादकहेतुमतिचेतिसूत्रभा-ष्यविरोधाच्च, कः प्रयोज्यस्य प्रेरणयाऽर्थो ? यदभिप्रायेपु सज्जत इति तत्सूत्रस्थ-भाष्येण णिजर्थप्रेरणाया अपि स्वातन्त्र्येणाप्रवर्त्तकत्वबोधनाच्चेति वैदिकविधेः प्रेरणाऽर्थकत्वासम्भवेन प्रवर्त्तकत्वानुपपत्त्येष्टसाधनत्वाऽर्थकत्वमेवाऽङ्गीकरणीयम्, एवञ्च लौकिकविधेरपि तच्छक्त्यैव प्रवर्त्तकत्वोपपत्तौ तदर्थोऽपि साऽभिप्राय एव।

तत्र विध्यर्थ इति कल्पस्तु वक्ष्यमाणाऽऽचार्यमतनिरासेनैव निरस्तः, विधिः प्रेरणमिति भाष्यं तु 'प्रेर्यन्ते प्रवर्त्यन्तेऽनेने'ति व्युत्पत्त्या प्रवर्त्तकज्ञानविपयेष्ट-साधनत्वपरम्, ज्ञानस्य तद्विपयकत्वेनैव प्रवर्त्तकत्वात्, यदपि तदुपष्टम्भकतया— 'पृच्छतु मां भवा'नित्यादिभाष्योपन्यसनं, तदपि नाऽस्माकं प्रतिकूलम्, यतस्तेन प्रवर्त्तकज्ञानजनकत्वेन प्रवर्त्तनापदव्यपदेश्याया लोडाद्यन्तशब्दप्रयोगरूपायाः

❁ काशिका ❁

परे तु 'न कलञ्ज'मित्यादावारोपितं कलञ्जभक्षणं प्रवर्तनाविपय इति वाच्योऽर्थः, कलञ्ज-भक्षणाभावः प्रवर्तनाविपय इत्युदीच्यो मानसबोधः, 'तत्तु समन्वयात्' इति सूत्रभाष्ये शङ्करा-चार्या अपि—'न ब्राह्मणं हन्या'दित्यादौ हन्त्यर्थानुराग्येप नञ्, एप एव च नञ्स्वभावो यत् स्वसंबन्धिनोऽभावबोधनं, निपेध्याभावबुद्धिश्च निपेध्यविपयौदासीन्ये कारणमित्याहुः। औदासीन्यं = निवृत्तिः। प्रवृत्त्यभावसमानाधिकरणो 'निवर्तते' इति पदगम्यः क्रियाविशेपो निवृत्तिर्न तु प्रवृत्त्यभावरूपा, निवृत्त्यभावस्य प्रवृत्तिरूपतापत्तेः, विनिगमनाविरहात्, तस्मात् प्रवृत्तिवन्निवृत्तिरपि पदार्थान्तरमेवेति प्राहुः।

अन्ये तु—पूर्वमुपवर्णितमुदीच्यबोधमेव वाक्यार्थबोधमङ्गीचक्रुः, एतन्मते नानुपसृष्य प्रादुर्भावात्'पटो न दण्डा'दित्यादाविव व्युत्पत्तिवैचित्र्येण प्रकृतिप्रत्यययोरन्तरा नञर्था-भावस्य प्रवेशाङ्गीकारान्नानुपपत्तिरितिध्येयं। ननु गङ्गास्नानादितोऽपि स्वर्गोत्पत्तेः पुराणप्रसिद्धतया 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते'त्यादिश्रुत्या दर्शपूर्णमासादेरपि स्वर्गसाधनत्वबोधनेन तद्व्यभिचारेण ज्योतिष्टोमादौ तत्साधनत्वबाधात् कथं तद्बोधनीयमिति चेदत्राहुर्भूषण-कारादयः,—विजातीयस्वर्गसाधनत्वे एव शक्तया तादृशस्वर्गसाधनत्वमेव तेन वाक्येन बोध्यते, तच्च तत्राबाधितमेव, यद्यपि 'स्वर्गकामे'ति समुदायान्तर्गत—'स्वर्ग'-पदसमुत्थापितस्वर्गसाधनत्वमेव प्रेयोसत्तिन्यायेन लिङ्शक्यमित्यनुमन्यन्ते निबन्धकृतः,

ॐ दर्पणः ॐ

प्रेरणाया णिजर्थत्वं प्रतिपाद्यते, न तु विध्यर्थत्वमपि, अर्थभेदस्य दर्शितत्वात्, 'अकर्तृत्वा'दित्यनेनाऽपि गमयत्यादेर्गच्छन्तं प्रेरयतीतिवत्, पृच्छत्वित्यस्य पृच्छन्तं प्रेरयतीति विग्रहस्याऽदर्शनेन कर्त्रसम्बद्धधात्वर्थविषयकप्रवृत्तिजनकज्ञानाऽनुकूलायास्तस्या णिजर्थत्वाऽभावप्रतिपादनात् तद्विरोधाभावात्, 'अथाऽपी'त्याद्युक्तिस्त्वेकदेशिनः, विध्यर्थप्रत्ययप्रकृत्यर्थस्य स्वाभाव्येन भविष्यत्तयैव प्रतीतेः, तदानीं प्रयोज्यस्य निर्व्यापारत्वेन कर्तृत्वासम्भवात्, एवं लोटा प्रेषणस्य धात्वर्थविशेषणतयैव भानात्, तद्विशेष्यतया प्रेरणविवक्षायां णिचो दुर्वारत्वात्, लोडन्ताद्धात्वर्थविशेष्यतया प्रेरणाया अप्रतीतेः पूर्वपक्षस्यैव निर्दलतापत्तेश्च। 'इदं ते इष्टसाधन'मित्याद्युक्तिस्तु सर्वथेष्टसाधनत्वबोधनपरैव, 'इष्टसाधनत्वस्य प्रवर्त्तनात्वेन विधिवाच्यत्व'मिति पक्षे पौनरुक्त्यासम्भवात्, नैयायिकमते कृत्यात्मकव्यापारस्य पच्याद्यर्थत्वाभावेन तन्मते इष्टसाधनतात्वेनेष्टसाधनत्वस्य विध्यर्थत्वे पौनरुक्त्यापादानानवकाशाच्चेति। वस्तुतस्तु भाष्ये बहुषु स्थलेषु प्रेरणाया विध्यर्थत्वकथनात् प्रामाण्याल्लिङाद्यन्तशब्दप्रयोगरूपाया एव तस्या विध्यर्थत्वमुचितम्, श्रुतेस्तु—'तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे' इत्यादिश्रुतिबलात् पौरुषे-

ॐ काशिका ॐ

स्वर्गपदं च स्वर्गत्वेनैव बोधकं न तु विजातीयस्वर्गत्वेनेति नोक्तरीत्या विजातीयस्वर्गसाधनत्वे शक्तिसंभवस्तथापि वाक्यान्तरपर्यालोचनसाचिव्येन विजातीयस्वर्गसाधनत्वे मनसोपस्थिते शक्तिग्रहसंभवेन नानुपपत्तिः, हर्यादिपदवन्नानार्थत्वमिष्टमेवेति। **रामकृष्णभट्टाचार्यास्तु**—न वैजात्यान्तर्भावेण शक्तिरपि तु स्वर्गसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेऽभावे च खण्डशः शक्तिस्तादृशावच्छेदकत्वस्य विजातीयस्वर्गसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन लिङ्पदार्थेऽभावेऽन्वयः,—तेन वैजात्यस्य पूर्वमनुपस्थितावपि न क्षतिः, उक्तसंबन्धेन स्वर्गसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावश्च तादृशावच्छेदकत्वविशेषाभावो न तु तत्सामान्याभावः, स च ज्योतिष्टोमत्वादावबाधित एव, तादृशावच्छेदकत्वाभावस्य स्वाश्रयज्योतिष्टोमत्ववत्त्वसंबन्धेन ज्योतिष्टोमादावन्वय इति न 'पदार्थः, पदार्थेने'त्यादिव्युत्पत्तिविरोधः। गुरुधर्मस्य प्रतियोगितावच्छेदकत्वपक्षे 'कम्बुग्रीवादिमान्नास्ती'ति वाक्याद्घटत्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन नञर्थाभावेऽप्यन्वयबोधस्याभ्युपगमात्, अत एव यत्किंचिद्घटवति न तादृशवाक्यप्रयोगः प्रामाणिकः, अपि चान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वव्युत्पत्तिर्नञ्समभिव्याहारविषयेति न तद्विरोध इति—**समादधिरे।**

नव्यतार्किकास्त्वन्यथासिद्धिनिरूपकतानवच्छेदकनियतोत्तरवर्तितावच्छेदकधर्मवत्स्वर्गकत्वमेव स्वर्गकारणत्वं, तादृशधर्मश्चोत्तरकाले कल्प्यो जातिविशेषः,—शाब्दबुद्धौ नियतोत्तरवर्तितावच्छेदकत्वात्मकसामान्यधर्मेण भासते, तादृशं स्वर्गकारणत्वं च यागेऽबाधितमेव, नियतोत्तर-

❀ दर्पणः ❀

यत्वमभ्युपेत्यैकरूपेणैव लोकवेदयोस्तद्विषये इष्टसाधनत्वाऽनुमानेन विधेः प्रवर्त्तकत्वं निर्वाह्यमिति सर्वं चतुरस्रमिति ।

आचार्यास्तु—आप्ताऽभिप्रायो विध्यर्थः, 'पाकं कुर्याः,' 'पाकं कुर्या'मिति मध्यमोत्तमपुरुषयोर्लिङ इच्छाविशेषात्मकाज्ञाध्येषणानुज्ञाप्रश्नप्रार्थनार्थकतया प्रथमपुरुषेऽपीच्छायामेव शक्तेरुचितत्वात् । तत्र भयजनिकेच्छा आज्ञा, अध्येषणीये प्रयोक्तुरनुग्रहद्योतिका साऽध्येषणा, निषेधाभावव्यञ्जिकेच्छा—ऽनुज्ञा, उत्तरप्रयोजिका तु—प्रश्नः, प्राप्तीच्छा—प्रार्थनेति विवेकः । तथाच 'स्वर्गकामो यजेते'त्यत्र यागः स्वर्गकामनिष्ठतयाप्तेच्छाविषय इति बोधः, यद्वा कर्त्तव्यत्वेनेच्छैव विध्यर्थः, तया चेष्टसाधनत्वाऽनुमानं, तद्यथा—"स्वर्गकामस्य मम याग इष्टसाधनं, कर्त्तव्यत्वेनाऽऽप्तोक्तलिङ्बोध्येच्छाविषयत्वात्, मत्पित्रेष्यमाणमद्भोजनवत्," विषभोजनादेरपि कस्यचित्कृतिसाध्यतया कर्त्तव्यत्वेनेश्वररूपाप्तेच्छाविषयत्वेन तत्रेष्टसाधनत्वरूपसाध्याभावाद् व्यभिचारवारणाय—'लिङ्पदबोध्ये'ति । आप्तस्तु वैदिकस्थले ईश्वर एव, तस्मिन् विधिरेव तावत् कुमार्या गर्भ इव पुंयोगे मानमित्याहुः ।

तदपि न, कृत्यसाध्यनिष्फलाऽनिष्टे प्रवृत्तिवारणायेष्टसाधनतादिज्ञानहेतुताया आवश्यकत्वेन तद्विषयेष्टसाधनत्वादीनां विध्यर्थत्वोपगमेनैव प्रवृत्तिनिर्वाहे आप्ता-

❀ काशिका ❀

वर्तितावच्छेदकत्वं च—हेतुतावच्छेदकधर्मावच्छिन्नतद्व्यापारान्यतराभावाधिकरणताविशिष्टोत्पत्तिक्षणावच्छिन्नाधिकरणतानिरूपकतानवच्छेदकत्वम्, अधिकरणतावैशिष्ट्यं च—'स्वावच्छेदकक्षणाव्यवहितोत्तरक्षणावच्छिन्नस्वाश्रयनिष्ठत्व'संबन्धेन । भवति ह्येतादृशं दण्डनियतोत्तरवर्तितावच्छेदकत्वं घटत्वे उत्पत्तिक्षणावच्छिन्नकपालनिष्ठघटाधिकरणतायां दण्डत्वावच्छिन्नतद्व्यापारान्यतराभावाधिकरणतावैशिष्ट्येनोक्तसंबन्धेनापि तूत्पत्तिक्षणावच्छिन्नघटाद्यधिकरणतायामेव तन्निरूपकतानवच्छेदकत्वस्य घटत्वे सुस्थत्वात् । अथवा स्वर्गनिष्ठधर्मावच्छिन्ननियतपूर्ववर्तितावच्छेदकधर्मवत्त्वमेव स्वर्गकारणत्वम्, नियतपूर्ववर्तितावच्छेदकत्वं च स्वर्गनिष्ठधर्मावच्छिन्नाव्यवहितपूर्वकालावच्छेदेन तदधिकरणनिष्ठाभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपदैशिकव्यापकतायाः स्वाश्रयत्व—स्वाश्रयनिरूपितव्यापारत्वान्यतरसंबन्धेनावच्छेदकत्वम्, अन्यतरसंबन्धेन तथाविधव्यापकतावच्छेदकत्वं च तेन संबन्धेन तथाविधव्यापकतानतिरिक्तवृत्तित्वादिरूपं बोध्यम् । ज्योतिष्टोमत्वादेः स्वाश्रयनिरूपितव्यापारत्वसंबन्धेनादृष्टात्मकव्यापारगततादृशव्यापकतावच्छेदकत्वसत्त्वात् स्वर्गनिष्ठधर्मावच्छिन्ननिरूपितनियतपूर्ववर्तितावच्छेदकत्वं निराबाधमेव, एतेन नियतोत्तरत्वाद्युक्तकारणत्वस्य विध्यर्थतामते यागधर्मिकतादृशकारणताग्रहस्य प्रवृत्तिहेतुताभ्युपगन्तव्या । तदपेक्षया तद्घटकनियतोत्तरवर्तितावच्छेदकधर्मवत्त्वात्मकयागसाध्यत्वप्रकारकस्वर्गधर्मिकज्ञानस्य हेतुत्वे तादृशसाध्यत्वस्य विध्यर्थत्वे च लाघवमितीष्टसाधनत्वस्य विध्यर्थत्वं,

प्रपञ्चितं चतद् वैयाकरणभूषणे । आदिना—'हेतुहेतुमतोर्लिङ्' 'आशिषि लिङ्लोटौ' इति सूत्रोक्ता हेतु-हेतुमद्भावादयो गृह्यन्ते । 'यो ब्राह्मणायावगुरेत्तं शतेन यातये'दिति यथा ।

❀ दर्पणः ❀

भिप्रायस्य विध्यर्थत्वे मानाभावात्, न हीष्टसाधनत्वज्ञानमन्तरेणाप्तेच्छाविषयत्वज्ञानमात्रात् प्रवृत्तिः कस्याऽपि दृश्यते, स्वतन्त्रप्रवृत्तौ व्यभिचारेणाप्ताऽभिप्रायज्ञानस्य प्रवर्त्तकत्वाऽसम्भवाच्चेत्यलम् । प्रकृतमनुसरामः—

प्रपञ्चितञ्चैतदिति । बलवदनिष्टाऽननुबन्धित्वज्ञानस्य प्रवर्त्तकतानिराकरणमिष्टसाधनताज्ञानस्य प्रवर्त्तकत्वाऽवधारणं चेत्यर्थः । प्रपञ्चस्तूक्तप्रायः ।

आदिनेति । 'प्रेरणादौ चे'त्यत्रोपात्तादिशब्देनेत्यर्थः । **यो ब्राह्मणायाऽवगुरेदिति** । यत्कर्तृको ब्राह्मणोद्देश्यको वधोद्यमस्तत्कर्मिका तादृशवधोद्यमजन्या शतसंवत्सरयातनेति बोधः । 'हेतुहेतुमतोर्लिङि'त्यनेन प्रकृत्यर्थयोर्भावे लिङो विधानात्, प्रवर्त्तकत्वेन निवर्त्तकत्वेन वा वेदस्य प्रामाण्यात्तेन वधोद्यमनिवृत्तिपरत्वग्रहे तस्मान्नावगुरितव्यमिति विधिः कल्प्यत इति भावः । 'मात्र'पदं

❀ काशिका ❀

प्रवृत्तिप्रयोजकत्वं च भज्येतेति दूषणं निरस्तम्, व्यापकताघटितकारणतायाः साध्यताऽघटिततया लाघवेन प्रवर्तकत्वादिसंभवात् तादृशसाधनताशरीरे व्यापकतावच्छेदकत्वेनैव कारणतावच्छेदकस्य प्रवेशात्, यत्र तस्य विशिष्यानुपस्थितिः कारणं च न्यूनवृत्तिनातिप्रसक्तेन वा धर्मेणोपलक्षितं, तत्र शब्दात् कारणत्वग्रहानुपपत्तिर्न, ननु तथापि तद्धर्मप्रकारकेच्छाधीना प्रवृत्तिस्तद्धर्मावच्छिन्ननिरूपितसाधनताधीप्रयोज्येति 'ज्योतिष्टोमे'त्यादिवाक्यात् स्वर्गत्वोपलक्षितवैजात्यावच्छिन्ननिरूपितसाधनताज्ञानसत्त्वेऽपि—स्वर्गत्वावच्छिन्ननिरूपितसाधनताज्ञानविरहेण स्वर्गत्वप्रकारकेच्छाधीनप्रवृत्त्यनुपपत्तिरिति चेन्न, वह्नित्वादिप्रकारकेच्छातोपि—तृणादिसमवधानेऽभ्रान्तप्रवृत्तेरानुभविकत्वाद् भूयः सुखार्थिनामपि भ्रान्तिरहितानां क्रियाविशेषे प्रवृत्तेश्च, तद्धर्मप्रकारकफलेच्छाधीनप्रवृत्तौ तद्धर्मप्रकारेण भासमाननिरूपितसाधनताज्ञानस्यैवापेक्षितत्वात्; न हि वह्नित्वादिकं तृणादिजन्यतावच्छेदकं, तृणादिकं विनापि जायमाने वह्नौ सत्त्वात्, भूयस्त्वादिकमर्थवशसंपन्नतया न कस्यापि जन्यतावच्छेदकं, घटत्वावच्छिन्नार्थी तन्त्वादावपि प्रवर्त्तेत, तन्त्वादेरपि घटत्वाद्युपलक्षितजन्यसत्त्वादिविशिष्टनिरूपितद्रव्यत्वावच्छिन्नसाधनतावत्त्वादिति न शङ्क्यं, फलानुपधाननिश्चयस्य स्वातन्त्र्येण प्रतिबन्धकत्वात्, फलोपधायकतात्मकसाधनत्वस्य लिङादिशक्यतया न घटकामस्तन्तुमुपाददीतेति प्रयोग इति प्राहुरिति कृतं पल्लवैः ।

'हेतुहेतुमतोर्लिङ्' इत्यस्योदाहरणमाह—**यो ब्राह्मणायेति** ।। अवगोरणं = हननार्थं दण्डाद्युद्यमनम् । 'ब्राह्मणाये'ति—'पत्ये शेते' इतिवत् संप्रदानत्वाच्चतुर्थी, तथा च यत्कर्तृकं ब्राह्मणोद्देश्यकं दण्डाद्युद्यमनं तद्धेतुकतादृशपुरुषकर्मकयमदूतकर्तृकशतयातना इति वाक्यार्थबोधः । कार-

लुङर्थमाह—भूतमात्र इति । भूतसामान्ये इत्यर्थः । 'भूते' [इत्यधिकृत्य[1]] 'लुङि'ति सूत्रात् । अत्र वर्त्तमानध्वंसप्रतियोगित्वं—भूतत्वम्, तच्च क्रियायां निर्बाधमिति विद्यमानेऽपि घटे—'घटोऽभू'दिति प्रयोगः, विद्य-

❀ दर्पणः ❀

कृत्स्नार्थकमित्यभिप्रायवानाह—भूतसामान्य इति । तेन विशेषविवक्षायां लङादीनामवकाशं सूचयति । भूते लुङिति । 'भूते' इत्यधिकृत्य, 'लुङ्' इति सूत्रादित्यर्थः । ननु वर्त्तमानध्वंसप्रतियोग्युत्पत्तिकत्वं भूतत्वम्, अत एव नाशस्य विद्यमानतादृशायामपि 'विनष्टो घट' इति प्रयोगः, तदुत्पत्तेर्वर्त्तमाननाशप्रतियोगित्वात्, तथाच यत्रोत्पत्तिरेव धात्वर्थस्तत्रोत्पत्तेर्द्वैधाभानप्रसङ्गोऽत आह—अत्रेति । भूत इति सूत्रे इत्यर्थः । वर्त्तमान इत्यादि । नचोक्तदोषः—अस्मन्मते नश्यत्यादेर्नाशाऽनुकूलव्यापाराऽर्थकतया कालाऽन्वयस्याऽपि व्यापार एव समर्थितत्वेन च तदप्रसक्तेरुत्पत्त्यघटितत्वेन द्वैधाभानाऽसम्भवाच्च । क्रियायामिति । फलानुकूलायां तस्यामित्यर्थः । 'विद्यमानेऽपी'त्यपिना समानप्रत्ययोपात्तत्वप्रत्यासत्त्याऽऽख्यातार्थकारके कालान्वयोपगमे उक्तप्रयोगानुपपत्तिः सूच्यते ।

नैयायिकास्तु—"उत्पत्तिघटितत्वेन लाघवादुक्तार्थ एव भूतपदस्य शक्तिः । परन्तु नश्यत्यादौ नाशातिरिक्तस्य व्यापारान्तरस्याननुभवात्तत्रोत्पत्तिघटिते प्रत्ययस्य लक्षणावश्यकी"त्याहुः ।

❀ काशिका ❀

विशिष्टतादृशक्रियाया यातनारूपक्रियायां हेतुहेतुमद्भावसंबन्धेनान्वयो न तु हेत्वाद्यर्थकत्वं लिङः, हेतुहेतुमद्भूतक्रियार्थकधातोर्लिङिति सूत्रार्थात्, तेन संबन्धेनान्वयबोधे तात्पर्यग्राहकत्वेनैव सूत्रस्य सार्थक्ये तत्र शक्तिकल्पनायोगात् ।

भूतमात्रे इति । मात्रशब्दोऽवधारणे इत्यभिप्रेत्याह—भूतसामान्य इति । भूतत्वरूपसामान्यधर्मेण विवक्षायां, न तु विशेषरूपेण विवक्षायामित्यर्थः । तत्र मानमाह—भूते इत्यधिकृत्येति । क्रियाया'मित्युपलक्षणं, क्रियाधिकरणासमये इत्यपि बोध्यम् । भूतत्वस्य प्रत्ययार्थत्वपक्षे तु पूर्वोक्तस्थले'अभूद् घट'इत्युत्पत्त्यर्थकप्रयोगनिर्वाहेऽपि विद्यमानत्वे सत्तार्थकतादृशप्रयोगोऽपि स्यात्, वर्तमानत्वं सप्रतियोगिसमयवृत्तित्वस्य तदानीं घटे सत्त्वात्, क्रियायां तदन्वये तु न दोषः, घटकर्तृकात्मधारणानुकूलयावद्द्रव्यव्यापारसमूहे तस्यासत्त्वात्, तादृशभूतत्वस्य बुद्धिस्थधातुवाच्ययावदवयवसमूहे एवाधाराधेयभावसंबन्धेनान्वयाभ्युपगमात् । उत्पत्तेस्तात्पर्यविषयत्वेऽप्युत्पत्त्यव्यवहितोत्तरक्षणे 'घटोऽभू'दिति प्रयोगानुपपत्तिर्द्रष्टव्या कर्त्रादावन्वयाभ्युपगमे ।

१ [ ] एतदन्तर्गतः पाठः काशिकासम्मतोऽपि दर्पणासम्मतः, दर्पणे एवोपलम्भात् ।

मानध्वंसप्रतियोगी घटाभिन्नाश्रयक उत्पत्त्याद्यनुकूलो व्यापार इति बोधः।

अयमत्र संग्रहः—"कालो द्विविधः, अद्यतनोऽनद्यतनश्च, आद्यस्त्रिविधः- भूतभविष्यद्वर्त्तमानभेदात्, अन्त्यो द्विविधः, भूतो भविष्यंश्च, तत्र वर्त्तमानत्वे लट्, भूतत्वमात्रे लुङ्, भविष्यत्तामात्रे लृट्, हेतुहेतुमद्भावाद्यधिकार्थविवक्षायामनयोर्लृङ्, अनद्यतने भूतत्वेन विवक्षिते लङ्, तत्रैव परोक्षत्वविवक्षायां लिट्, तादृशे भविष्यति लुट्" इति द्रष्टव्यः।

लृङर्थमाह—**सत्यामिति**। क्रियाया अतिपत्तिः = अनिष्पत्तिस्तस्यां गम्यमानायाम्, भूते भाविनि हेतुहेतुमद्भावे[1] सति लृङित्यर्थः, 'लिङ् निमित्ते लृङ् क्रियातिपत्तौ' विति सूत्रात्, लिङो निमित्तं हेतुहेतुद्भावादि, यथा 'सुवृष्टिश्चेदभविष्यत् सुभिक्षमभविष्यत्' 'वह्निश्चेत् प्राज्वलिष्यद्

❀ दर्पणः ❀

भूते भाविनीति। कार्यकारणभावापन्नप्रकृत्यर्थयोर्भूतत्वे भविष्यत्त्वे वा गम्यमान इत्यर्थः। **हेतुहेतुमद्भावादीति**। आदिना—शक्त्यादिपरिग्रहः। तत्र भविष्यदर्थे उदाहरणमाह—**सुवृष्टिश्चेदिति**। अत्रैकस्यैव धात्वर्थस्य कर्तृरूपोपाधिभेदेन कार्य्यकारणभावाऽवगतिरुत्तरत्र तु स्वरूपतो भिन्नयोस्तयोरिति विशेषः।

❀ काशिका ❀

इति बोध इति। तादृशसमयवृत्तित्वं भूतत्वमिति पक्षे विद्यमानध्वंप्रतियोगिसमयवृत्तिरित्याद्याकारको बोधोऽवसेयः। अयमत्रेति। अयं = बुद्धिस्थो वक्ष्यमाणः। 'संग्रह'—इत्यस्य 'द्रष्टव्य'—इत्यनेन संबन्धः। आद्य इति। अद्यतन इत्यर्थः। भेदादिति। तथा चाद्ये 'अपाक्षीद् देवदत्तः' 'पचति' 'पक्ष्यती'ति त्रिविधप्रयोगोऽपि दृश्यते। अन्त्यो = अनद्यतनः।

अनयोः = भूतभविष्यत्कालयोः। लृङिति। 'लिङ्निमित्ते—'इति सूत्रेण भविष्यति भूते च तादृशे लृङ्विधानात्। तत्त्वेन विवक्षिते इति। भूतत्वेन विवक्षिते इत्यर्थ इति केचिद् ब्रुवते। वस्तुतस्तु भूतत्वस्येवानद्यतनत्वस्यापि बोधस्यानुभवसिद्धतयानद्यनभूतत्वेन विवक्षित इत्येव व्याख्योचिता, अन्यथा भूतत्वेऽपि शक्तिर्न सिध्येत्, वस्तुगत्या तादृशभूतकालवृत्तिर्या क्रिया तदर्थकधातोर्लङ् इत्यर्थस्वीकारे नैवातिप्रसङ्गाभावात् युक्त्यन्तरमिति प्रागुक्तमनुसंधेयम्। तत्रैव = अनद्यनभूतत्वे विवक्षिते सत्येव। तादृशे भविष्यतीति। अनद्यतनभविष्यतीत्यर्थः।

भूते भाविनीति। हेतुहेतुमद्भावे = हेतुहेतुमद्भावादौ सति, भूतकाले भविष्यत्काले इत्यर्थः। तत्र प्रमाणमाह—'लिङ्निमित्ते' इत्यादिना। सुवृष्टिरिति। सुवृष्टिभवनं सुभि-

१ हेतु—हेतुमद्भावापन्नयोः सत्ताद्यर्थयोर्भूतत्वे भविष्यत्त्वे च गम्यमाने—इत्यर्थः।

ओदनमपक्ष्य'दित्यादौ । अत्र वह्न्यभिन्नाश्रयकप्रज्वलनाऽनुकूलव्यापारा-

❀ दर्पणः ❀

व्यापाराभाव इति । धात्वर्थयोर्भविष्यत्त्वप्रदर्शनार्थं परमभावविशेष्यकबोधो-त्कीर्तनम्, वह्न्यभिन्नाश्रयकभाविप्रज्वलनजन्यौदनाऽऽश्रयकविक्लित्त्यनुकूलव्यापार

❀ काशिका ❀

क्षभवनस्य हेतुः, सुभिक्षभवनं हेतुमदिति तत्समर्पकाभ्यामुभाभ्यामपि धातुव्यक्तिभ्यां लृङ्। हेतुहेतुमद्भावः स्वरूपसन्निमित्तं, न तु तत्रापि शक्तिः, शाब्दबोधेऽभानात्। एवं क्रिया-निष्पत्तिरपि मानान्तरगम्या, न तु वाच्या। ननु सुवृष्टिभवनसुभिक्षभवनयोः साधनवैकल्यान्नि-यतानुत्पत्तिः स्वयमवगत्य प्रतिपाद्यते तत्र भविष्यत्वादेवानुत्पत्तिः, उत्पन्न एव सत्त्वादिक्रमेण भूत इत्युच्यते, सामग्रीसमवधाने संभावितोत्पत्तिकश्च भविष्यन्नित्युच्यते, अत च साधना-भावात् संभावितापि न तदुत्पत्तिरिति चेन्न, अभूते अभविष्यति इत्यपि भूतत्वभविष्यत्त्वे, आरोप्येते निषेधप्रतियोगित्वायेति दोषाभावात्, सुभिक्षभवने हेतुं सुवृष्टिभवनं संभावयत एव हि तदुक्तिः, एवं हि क्रियानिष्पत्तिः प्रतिपादिता भवति । अत्र भूतत्वाद्यभावनिश्चयसत्त्वेऽपि भूतत्वादिप्रकारकबोध आहार्यारोपात्मक एवावश्यमभ्युपेतव्यः । अन्यथा गते बाधनिश्चयस्य शाब्दबोधं प्रत्यप्रतिबन्धकत्वे त्वनाहार्यारोपात्मकोऽपि संभवति, युक्तं चैतत्, अन्यथा 'मुखं चन्द्र' इत्याद्यभेदरूपकादौ, प्रहसनादौ च बाधनिश्चयसत्त्वेऽप्यनुभवसिद्धशाब्दबोधापलापापत्तिः, कलहादौ मिथ्याभिलापवचनाच्छाब्दबोधानुपपत्तिश्च, तत्र शाब्दबोधानुगमे क्रोधानुपपत्तिः, एवम्—'एष वन्ध्यासुतो याती'त्यादिवाक्याच्छाब्दबोधानुपगमे सहृदयाह्लादानुपपत्तिः, ननु 'मुखं चन्द्र' इत्यादौ चन्द्रादिपदं चन्द्रादिसदृशे लाक्षणिकं, तस्य चाभेदोऽबाधित एव मुखे बुध्यते, एवं मिथ्याभिशापस्थले 'एष वन्ध्यासुत' इत्यादौ च शब्दात् पदार्थोपस्थितौ मानसो विशिष्ट-बोधस्तेन क्रोधादेर्नानुपपत्तिरिति चेन्न, एवं हि 'चन्द्रसदृशं मुखं' 'चन्द्रो मुख'मिति वाक्य-योरनुभवसिद्धविलक्षणबोधजनकत्वानुपपत्तिः, अभिशापवचनादिस्थले मानसबोधाङ्गीकारे सर्वत्रैव तथात्वापत्तौ शब्दप्रामाण्योच्छेदापत्तेश्च, अत एव खण्डनकृताप्युक्तम्—

'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति च ।' इति ।

न चैवं योग्यताज्ञानस्य शाब्दबोधहेतुत्वानुपपत्तिः, इष्टापत्तेः, । न चैवं 'सेको वह्निकरणकः' इति बाधनिश्चयसत्त्वेऽपि शाब्दबोधापत्तिः, इष्टापत्तेः, शाब्दबोधं प्रति बाधनिश्चयस्य प्रति-बन्धकत्वमनङ्गीकुर्वद्भिर्योग्यताज्ञानस्य हेतुतां स्वीकुर्वद्भिः परैरप्याहार्ययोग्यताज्ञानात् शाब्द-बोधाङ्गीकाराच्च, न चैवं सति प्रवृत्तिरापादनार्हा बाधनिश्चयेन तत्र बोधेऽप्रामाण्यज्ञानजनने-नागृहीताप्रामाण्यकज्ञानस्यैव प्रवृत्तिजनकत्वादित्यलं पल्लवितेन । लृङ्समभिव्याहारे धातोर्लृङो वाभावोऽप्यर्थः, अभावे धात्वर्थव्यापारस्यान्वयः, अभावयोश्च प्रयोज्यप्रयोजकभावसंबन्धेनान्वय इत्यभिप्रेत्याह—अत्र वह्न्यभिन्नेति । अर्थान्तरेऽपीति । यथा 'लट् स्मे' इत्यादिना भूता-

भावप्रयोज्य ओदनाभिन्नाश्रयकविक्लित्त्यनुकूलव्यापाराभाव इति शाब्द-बोधः, एवं रीत्या द्रष्टव्यम्। अयञ्च अर्थनिर्देश उपलक्षणम्,। अर्थान्तरेऽपि बहुशो विधानदर्शनात्, प्रसिद्धत्वादेष्वेवार्थेषु शक्तिरन्यत्र लक्षणेति 'मतान्तररीत्या चोक्तम्, एतेषां क्रमनियामकश्चानुबन्धक्रम एव, अत एव 'पञ्चमो लकार' इत्यनेन मीमांसकैर्लेट् व्यवह्रियत इति दिक् ॥२३॥

❀ इति वैयाकरणभूषणसारे लकारार्थनिरूपणम् ॥२॥ ❀

❀ दर्पणः ❀

इति शाब्दबोधस्तूचितः। **प्रयोज्य इति**। व्यापाराभावान्वयिप्रयोज्यत्वोत्कीर्त्तनं च वह्निप्रज्वलनौदनपाकयोः कार्य्यकारणभावप्रदर्शनाय, 'यदभावो यदभावप्रयोज्यः स तज्जन्य' इति नियमात्। तथा च प्रकृत ओदनपाकाभावे वह्निप्रज्वलनाभाव-प्रयोज्यत्वेऽवगते तत्प्रतियोगिनोस्तयोः कार्य्यकारणभावः सुबोधो भवतीति भावः। एवं भूते,—"परस्परेण स्पृहणीयशोभं न चेदिदं द्वन्द्वमयोजयिष्यत्।

अस्मिन् द्वये रूपविधानयत्नः पत्युः प्रजानां विफलोऽभविष्यत्।"

'यदि देवदत्तो नाऽभविष्य'दित्यादि बोध्यमित्याह—**एवं रीत्येति**। **अयञ्चेति**। 'वर्त्तमाने ल'डित्यादिनोपात्त इत्यर्थः। **अर्थान्तरेऽपि**। अर्हप्रशंसाप्राप्तकालाद्यर्थेऽपीत्यर्थः। एषु = वर्त्तमानत्वादिषु = शक्तिः सङ्केतरूपा पदार्थान्तररूपा वा, अन्यत्र = अर्हाद्यर्थे। **मतान्तररीत्या चेति**। 'बोधकत्वमेव शक्ति'रिति वदतामस्माकं तु केषाञ्चित् प्रयोगोपाधित्वमितरेषां शक्यत्वमेवेति भावः। **अनुबन्धक्रम इति**। अकाराद्यनुबन्धक्रम इत्यर्थः। ननु यत्र प्रत्ययस्य तिपादेरदर्शनं तत्र द्योतकत्वं, वाचकत्वं वेति पक्षद्वयेऽप्यनुपपत्तिः, वाचकस्य द्योतकस्य वाऽसत्त्वेन वर्त्तमानत्वादिबोधस्योपपादयितुमशक्यत्वादत आह—**दिगिति**। तदर्थस्तु 'पदं

❀ काशिका ❀

दावपि लडादेर्दर्शनादित्यर्थः। दर्शनान्तररीत्येति। स्वमते तु सर्वस्मिन्नुक्तेऽर्थे शक्तिरेव, न तु लक्षणेति बोधयितुं 'दर्शनान्तररीत्ये'त्युक्तम्। प्रसङ्गाल्लडादिक्रमनियामकमाह—एतेषामिति। एतेषां = लकाराणाम्। अनुबन्धक्रम एवेति। अनुबन्धानाम् = अकाराद्यनुबन्धानाम्। उक्तेऽर्थे मीमांसकव्यवहारमपि प्रमाणयति—अत एवेति। ङित एवादौ तु न गणिताः, 'वर्तमाने लट्' इत्यादिना पाणिनिना प्राक् टितामेव निर्देशात्। लकारेति। लकारविशेषाणां लडादीनामर्थ इत्यर्थः॥ २३ ॥

इति श्रीवैयाकरणभूषणसारव्याख्यायां लकारविशेषार्थनिरूपणं समाप्तम् ॥

---

१ 'दर्शनान्तरीयरीत्ये'ति काशिकासम्मतः पाठः।

❀ अथ सुबर्थनिर्णयः ❀

सुबर्थमाह—

आश्रयोऽवधिरुद्देश्यः, सम्बन्धः, शक्तिरेव वा ।
यथायथं विभक्त्यर्थाः 'सुपां कर्मे'ति भाष्यतः ॥ २४ ॥

द्वितीया-तृतीया-सप्तमीनामाश्रयोऽर्थः, तथाहि—'कर्मणि द्वितीया', तच्च 'कर्त्तुरीप्सिततमम्',—क्रियाजन्यफलाश्रय इत्यर्थः,—

❀ दर्पणः ❀

वाचक'मिति पक्षे प्रकृतिप्रत्ययविभागकल्पनया वाचकत्वं तत्रारोप्य पदशक्तिरेव व्युत्पाद्यते, यत्र प्रत्ययस्य प्रकृतेर्वा अश्रूयमाणत्वं तत्र श्रूयमाणस्यैव तदर्थकत्वं कल्प्यते, तदाहुः—'शिष्यमाणं लुप्यमानाऽर्थाभिधायी'ति । अत एव,—व्यतिसे, इरियानित्यादौ प्रत्ययमात्रात्प्रकृत्यर्थविषयको बोध इत्यादिः ॥२३॥

❀ ॥ इति भूषणसारदर्पणे लडाद्यर्थनिर्णयः ॥२॥ ❀

अवसरसङ्गत्या सुबन्तार्थे निरूपणीये प्रातिपदिकार्थविशेष्यत्वात् क्रियाकाङ्क्षितत्वाच्चादौ विभक्त्यर्थनिरूपणमित्यभिप्रायवानाह—**सुबर्थमिति । आश्रयोऽर्थ इति ।** किञ्चिद्धर्मानवच्छिन्नाश्रयतावानित्यर्थः, तेन चतुर्थीपञ्चम्योरर्थयोरुद्देश्याऽवध्योराश्रयात्मकत्वेऽपि न क्षतिः । तत्र द्वितीयाया आश्रयार्थकत्वे मानमाह—**तथाहीत्यादिना ।** ननु यथाश्रुते 'कर्त्तुरीप्सिततम'मित्यनेन कर्तृसम्बन्धिप्राप्तीच्छा विशेष्यस्यैव कर्मत्वं प्रतिपाद्यते, न तु क्रियाजन्यफलाश्रयस्येत्यत आह—**क्रियाजन्यफलाश्रयत्वेनेति ।** अयं भावः—सूत्रे ईप्सिततमशब्द आप्नोतेरिच्छासन्नन्तात् कर्मक्तान्तात् प्रकृत्यर्थाऽतिशयद्योतके तमपि निष्पन्नः, तद्योगाच्च—कर्तृशब्दात् 'क्तस्य

❀ काशिका ❀

सुबर्थमाहेति । पदत्वप्रयोजकतिङर्थनिरूपणानन्तरं तत्प्रयोजकसुबर्थनिरूपणमिति भावः । ननु द्वितीयादीनां 'कर्मणि द्वितीया' इत्याद्यनुशासनबलात् कर्मादीनां तदर्थत्वलाभो नाश्रये विध्यभ.वादित्याशङ्कामपनिनीपुराह—तथा हीत्यादिना । तच्चेति । तत् = कर्म । चकारस्त्वर्थे ।

कर्तुरीप्सिततममिति । 'कर्तुरीप्सिततमम्—' इति सूत्रेण तस्य कर्मसंज्ञाविधानात् । नन्वभिप्रेतरूढेप्सितशब्दात्तमप्यतिशयिताभिप्रेतरूपार्थ एव लभ्यते, नाश्रय इत्याशङ्क्याह—क्रियाजन्येति । तथा चाप्नोतेः संबन्धार्थकात् सन्नन्तात् कर्मणि वर्तमानकाले 'मतिबुद्धिपूजार्थेभ्यश्चे'ति क्तान्त ईप्सितशब्दः क्रियाशब्दं उपात्तो नाभिप्रेतार्थको रूढशब्दः, तथा सति 'पयसौदनं

—'क्रियाजन्यफलवत्त्वेन कर्मण एव कर्त्तुरीप्सिततमत्वात् ।

❀ दर्पणः ❀

च वर्त्तमाने' इति कर्त्तरि षष्ठी, तथा च कर्त्रोपस्थितत्वात् स्वीयव्यापारेण व्याप्तुमिष्यमाणतमं = व्यापारजन्यफलसम्बन्धित्वप्रकारककर्त्तृनिष्ठोत्कटेच्छाविषयः कर्मेति पर्य्यवसानात्—क्रियाजन्यफलाश्रयस्य कर्मतालाभ इति । न चेच्छाकर्मीभूतार्थधातोरेव 'धातोः कर्मण' इति सूत्रेणेच्छायां सनो विधानाद्,—व्याप्तीच्छार्थकसन्नन्तधातुना व्याप्तिरूपकर्मोपसंग्रहाज्जीवत्यादिवदकर्मतया ततः कथं कर्मक्तोपपत्तिरिति वाच्यं, 'धात्वर्थोपसङ्गृहीतकर्मत्व'मित्यत्र कर्मणा तद्धात्वर्थीयकर्मान्तरानाकाङ्क्षत्वविशेषेण सन्प्रकृतिधात्वर्थकर्मणः कर्मान्तरसाकाङ्क्षत्वेनोक्ताऽकर्मकत्वस्य सन्नन्ते असम्भवात्, एवं सन्नन्तस्य वृत्तितया तद्घटककर्माऽऽदाय कर्म्मसंज्ञकान्वय्यर्थकत्वरूपसकर्मकत्वाभावेऽपि तद्बहिर्भूतकर्मान्वयित्वमादायैव सकर्मकत्वं बोध्यम् । एवं फलतावच्छेदकसम्बन्धेन तद्धात्वर्थफलव्यधिकरणव्यापारवाचकत्वरूपं तदपीति नेप्सत्यादितः कर्मप्रत्ययानुपपत्तिः, जिघ्रतेरपि स्वार्थाऽन्तर्भूतकर्मणस्तदीयपुष्पादिकर्मान्तरसाकाङ्क्षत्वमस्त्येव, गन्धनिरूपितलौकिकविषयतायां पुष्पादेराधेयत्वीयसांसर्गिकविषयतानिरूपितप्रकारतानिरूपकत्वेनाऽन्वयेनाऽकर्मकत्वात् । 'कृष्णाय राध्यती'त्यस्य कृष्णस्य शुभाऽशुभं पर्यालोचयतीत्यर्थान्न—धात्वर्था

❀ काशिका ❀

भुङ्क्ते' इत्यादौ पयआदेरपि कर्मसंज्ञापत्तिः, विशिष्टभोजनस्याभिप्रेतत्वेन तस्यानभिप्रेतत्वस्य वक्तुमशक्यत्वात्, अत एव कृतभोजनोऽपि पयोलाभेच्छया भोजने प्रवर्तत इति लोकसिद्धम्, एवं—क्रियाशब्दादरे तु प्रकृष्टोपकारकत्वमात्रविवक्षायां क्रियाजन्यफलाश्रयत्वेऽपि तत्त्वेनानुद्देश्यतया न कर्मत्वापत्तितादवस्थ्यम्, स्पष्टं चेदं प्रकृतसूत्रभाष्यादौ । 'वारणार्थानाम्—' इति सूत्रभाष्ये चायं क्रियाशब्द इति स्पष्टम् । 'कर्तुरीप्सिततमम्—' इत्यत्र 'कर्तु'रिति, 'क्तस्य च वर्तमाने' इति कर्तरि षष्ठी, तथा च कर्तुः समभिव्याहृतधात्वर्थव्यापाराश्रयस्याप्तुं = संबद्धुमिष्टतमं कारकं कर्मसंज्ञमिति सूत्रार्थः, कर्तुः संबन्धश्च कर्तृपदार्थविशेषणीभूतक्रियाद्वारक एव ग्रहीतुमुचितः, उपस्थितत्वात्, स च तज्जन्यफलाश्रयत्वरूपः, तथा चेप्सिततमत्वं = तादृशव्यापारप्रयोज्यसमभिव्याहृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वं पर्यवसन्नम्, 'प्रयोज्यत्व'निवेशो दुह्यादेर्विभागाद्यनुकूलव्यापारानुकूलव्यापारार्थकत्वे पयआदेः कर्मत्वसिद्धिफलक इत्यन्यत्र विस्तरः ।

ननु क्रियाघटितक्रियाप्रयोजकत्वादिसंबन्धस्य कारकान्तरेऽपि सत्त्वे कथं तथाविधफललाभोऽत आह—क्रियाजन्येति । संज्ञान्तरविधानादिष्टानुरोधाच्चोक्त संवन्ध एव गृह्यते इति भावः । अथवा—'ननु सना इच्छाया बोधनादीप्सिततमपदेन' तादृशफलवत्त्वेनोद्देश्यस्यैव लाभात् क्रिया-

१ ननु कर्त्तृसम्बन्धिप्राप्तीच्छाविशेष्यस्यैव कर्मत्वं, न तु क्रियाजन्यफलवत इत्यत आह—क्रियेति ।

'तथा युक्तञ्चानीप्सित'मित्यादिसंग्रहाच्चैवमेव' युक्तम्, ईप्सितानीप्सितत्वयोः शाब्दबोधे भानाभावेन संज्ञायामेव तदुपयोगो, न तु वाच्यकोटौ

❀ दर्पणः ❀

न्तर्भूतशुभकर्मणः कर्मान्तरसाकाङ्क्षत्वमिति न तत्रातिप्रसङ्गः। 'बुभूष'त्यादीनां तु भवनादिकर्मणः कर्मान्तरानाकाङ्क्षस्य धात्वर्थतावच्छेदककोटिप्रविष्टत्वादकर्मकत्वं व्यक्तमेव। एवं 'स्वर्यंत'इति भाष्यप्रयोगस्थस्वरवद्रूपविकृतिकर्मणः सन्निहितशब्दरूपप्रकृतिकर्मसाकाङ्क्षतया करोत्यर्थणिजन्तात् कर्मप्रत्ययोपपत्तिरिति बोध्यम्। केचित्तु—सनाद्यन्तस्य धात्वर्थोपसङ्गृहीतत्वेनाऽकर्मकत्वेऽपि तत्प्रकृतेः सकर्मकत्वमादाय तस्मात् कर्मप्रत्ययोपपत्तिमाहुः। ननु तथापीष्टाऽघटितस्य भवदुक्तस्य कथं कर्मलक्षणत्वमत आह—**तथा युक्तमिति**। कर्मव्यवहारस्य द्वेषोदासीनयोरप्यविशिष्टत्वात्तत्साधारणस्यैव लक्षणत्वमुचितम्, इच्छाघटितस्यैव तस्य लक्षणत्वे तु द्वेष्यादिकर्मण्यव्याप्तिः स्यात्, तथाच तत्साधारण्यायेदमेवाश्रयितुं युक्तमिति भावः। **एवमेवेति**। इत्थमेवेत्यर्थः। ननु द्वितीयाया उक्तकर्मार्थकत्वे—'हरिं भजती'त्यादौ हर्य्यादेरीप्सिततत्वादिना भानाऽनुपपत्तिरत आह—**ईप्सितानीप्सितत्वयोरिति**। **भानाऽभावेनेति**। सार्वजनीनतयानुभवादिति भावः। ननु तर्हि 'क्रियाजन्यफलाश्रयः कर्मे'त्येव सूत्र्यतामत आह—**संज्ञायामेवेति**। अयमाशयः—'क्रियाजन्यफलाश्रयः कर्मे'ति सूत्रप्रणयने यद्यपीप्सितानीप्सितयोरविशेषेण संज्ञा सिद्धयति, तथाप्य'ग्नेर्माणवकं वारयती'त्यादौ क्रियाजन्यफलभागित्वेनेष्टस्य माणवकस्याऽपि विशेषविहितेन 'वारणार्थाना'मित्यनेनापादानसंज्ञा प्रसज्ज्येत, सूत्रं तु 'हरिं भजती'त्यादौ चरितार्थम्। तत्परिहारायेप्सिततमत्वस्य संज्ञिकोटौ निवेशोऽप्राप्तद्वेष्योदासीनसंज्ञाविधानार्थमुत्तरसूत्रमिति तथा नोक्तमिति। ननु तथापि पञ्चम्या इव न द्वितीयाया

❀ काशिका ❀

जन्यफलाश्रयमात्रोक्तिरसंगतेत्याशङ्क्याह—**क्रियाजन्येति**। **कर्मण एव** = तादृशफलाश्रयस्यैव। तथा च तादृशफलवत्त्वेन कर्तुरुद्देश्यत्वं तादृशसंज्ञायामेवोपयोगि, न तु वाच्यकोटौ तस्यान्तर्भाव इति भावः। तत्र युक्तिमाह—'तथा युक्तं च—' इति। इत्यादी-त्यादिपदाद् 'गतिबुद्धि—' इत्यादेः परिग्रहः, एतत्सूत्रविहितकर्मसंज्ञासाधारण्यार्थं तादृशफलाश्रय एव द्वितीयादेः शक्तिरिति भावः। **संग्रहादिति**। फलस्यापि हेतुत्वेन विवक्षायां पञ्चमी। **एवमेव** = द्वितीयादेरुक्तार्थकत्वकल्पनमेव। ईप्सादेः शाब्दबोधे भानेनैवमेव युक्तमित्ययुक्तमित्याशङ्क्याह—**ईप्सितेति**। ईप्सितत्वानीप्सितत्वयोरित्यर्थः। ननु तथापि क्रियाजन्यफलविशिष्ट एवाश्रये

१ ईप्सितपदाघटितं लक्षणमेव।

तत्प्रवेशः, तथाच क्रियायाः फलस्य च धातुनैव लाभादनन्यलभ्य आश्रय एवार्थः, तत्त्वञ्चाखण्डशक्तिरूपमवच्छेदकम्, 'ओदनं पचती'त्यत्र विक्लि-

❀ दर्पणः ❀

अप्याश्रयमात्रार्थकता, किन्तु विशिष्टस्यैवेत्यत आह—तथाचेति। 'आश्रय एवे'त्येवकारेण विशिष्टार्थस्य शक्यत्वव्यवच्छेदः। नन्वाश्रयत्वस्य तत्तत्स्वरूपात्मकस्य तत्तदाश्रयभिन्नत्वात् कथं तस्य शक्यतावच्छेदकत्वम्, अनुगतधर्मस्यैव तत्त्वादत आह—तत्त्वञ्चेति। आश्रयत्वं चेत्यर्थः। अखण्डशक्तिरूपमिति। शक्तिर्धर्मः, इतरपदार्थाघटितमूर्त्ति[2]कधर्मरूपमिति यावत्। 'आश्रय' इत्यनुगतव्यवहारादाश्रयपदशक्यतावच्छेदकत्वाच्च तत्सिद्धिर्द्रव्यत्वादिवदिति भावः।

नैयायिकास्तु—"आश्रयताया नियतान्यनिरूपितस्वरूपाया अनुगमकत्वाऽसम्भवः, शक्यताच्छेदकत्वस्यापि विभुत्वान्यतरत्वादौ व्यभिचारेण नाऽखण्डत्वसाधकत्वमिति न द्वितीयाया आश्रयोऽर्थः, तस्य प्रकृत्यैव लाभात्, प्रकृत्यर्थभिन्नत्वेन तत आश्रयस्याऽननुभवाच्च, किन्तु फलान्वयिनी वृत्तिरेव तदर्थः, 'कर्मणि द्वितीये'त्यस्य फलनिष्ठाऽऽधेयत्वान्वये प्रकृतितात्पर्ये तदुत्तरं द्वितीयेत्यर्थात् न तद्विरोधोऽपि, अनादितात्पर्यग्राहकत्वेन परम्परया शक्तिग्राहकत्वाच्च न तद्वैयर्थ्यम्, आश्रयत्वं तु न तच्छक्यं, तस्य निरूपकतासम्बन्धेनैव फलाऽन्वयित्वस्याभ्युपगन्तव्यतया निरूपकत्वस्य च वृत्त्यनियामकतयाऽभावप्रतियोगिताऽनवच्छेदकत्वेन, 'विहगो भूमिं गच्छति न महीरुह'मित्यादौ धात्वर्थफले संयोगे महीरुहनिष्ठाश्रयतायास्तेन सम्बन्धेनाभावस्याऽप्रसिद्धतया तन्नाबोधस्याऽसम्भवात्, न च सूत्रस्वरसभङ्गः, 'शक्तिः कारक'मिति पक्षे तदयोगात्, आधेयताया अपि निरूपकतया कारकधर्मत्वाद्—"इत्याहुः[1]।

❀ काशिका ❀

शक्तिर्लभ्यते, न तु केवलाश्रय इत्याशङ्कां निराकरोति—तथा चेत्यादिना। तथा च = क्रियाजन्यफलाश्रयस्य कर्मत्वे च। परे तु तादृशफलाश्रयत्वेनेच्छोद्देश्यत्वस्यापि वाच्यत्वमावश्यकमत एव 'पयसौदनं भुङ्क्ते' इत्यादौ तथाविधफलाश्रयस्यापि पयआदेस्तादृशोद्देश्यत्वविरहान्न कर्मत्वमिति प्राहुः। नन्वाश्रयत्वस्य निरूपकादिभेदाद्भेदेन शक्त्यानन्त्यं स्यादित्यत आह—तत्त्वं चेति। आश्रयत्वं चेत्यर्थः। 'शक्तेर्भेद एवे'ति भाष्यसिद्धान्ते त्वाश्रयतात्वेनाश्रयतानामनुगमो बोध्यः। नव्यमते तु कर्मत्वरूपशक्तिमत्त्वेनाश्रयः शक्य इति ध्येयम्। उत्पत्त्याश्रयत्वादि-

१ गदाधरभट्टाचार्या व्युत्पत्तिवादे द्वितीयाकारकप्रारम्भे—। २ मूर्त्तिः = स्वरूपम्।

त्याश्रयत्वात् कर्म्मता, 'घटं करोती'त्यत्र उत्पत्त्याश्रयत्वात्,—उत्पत्तेर्धात्वर्थ-त्वात्। 'जानाती'त्यत्रावरणभङ्गरूपधात्वर्थफलाऽऽश्रयत्वात्,—अतीताऽ-

❀ दर्पणः ❀

विक्लित्त्याश्रयत्वात् कर्मतेति। कर्मसंज्ञेत्यर्थः। एतेन कर्तृगतप्रकृतधात्वर्थव्यापारप्रयोज्यतद्व्यधिकरणप्रकृतधात्वर्थफलाश्रयत्वं कर्मत्वमुक्तं भवति, यद् वक्ष्यति—'उक्तप्रायत्वा'दिति। 'अग्नेर्माणवकं वारयती'त्यादावग्न्यादावतिव्याप्तिनिरासाय व्यापारे कर्तृगतत्वमुपात्तम्, वारयतेश्च संयोगानुकूलव्यापाराभावानुकूलव्यापारोऽर्थः। 'चैत्रो ग्रामं गच्छती'त्यादौ चैत्रादेर्वारणाय,—'व्यधिकरणे'ति। वैयधिकरण्यं च तदनधिकरणवृत्तित्वं, न तु तदधिकरणावृत्तित्वम्, तस्य संयोगे असत्त्वेन ग्रामादावव्याप्तेः, तादृशवैयधिकरण्यविशिष्टाऽधिकरणतायाश्चैत्रादावसत्त्वान्नातिप्रसङ्गसम्भावनापि, 'माषेष्वश्वं बध्नाती'त्यादौ बन्धनप्रयोज्यभक्षणाश्रयमाषाणां तत्त्ववारणाय 'प्रकृतधात्वर्थत्वं' फलविशेषणम्, प्रकृतत्वं च,—तत्र तत्र विशिष्योपादेयम्। 'पयसौदनं भुङ्क्ते' इत्यादौ तु कर्मत्वाविवक्षणान्न द्वितीया, कृतभोजनस्य पयोलोभेन प्रवृत्तावीप्सिततमत्वस्यापि पयसि सम्भवादिति।

ननु परैः कृञो यत्नमात्राऽर्थकत्वाभ्युपगमात् कथमुत्पत्तेः प्रकृतधात्वर्थत्वमत आह—**उत्पत्तेरिति।** तथाच,—कृञ उत्पत्तिरूपफलार्थकत्वस्य प्रागुपपादनान्नार्थासङ्गतिरिति भावः। 'धात्वर्थत्वा'दित्युक्त्या,—कृञः केवलयत्नार्थकत्वे घटादीनां कर्मत्वानुपपत्तिरपि दोषत्वेन ध्वन्यते। **आवरणभङ्गेति।** प्राचीनमतानुसारेणेदम्। निष्कृष्टमते तु ज्ञानरूपफलस्य विषयतया घटादौ सत्त्वात्कर्मतेति बोध्यम्। न चाकर्मकतापत्तिः, फलतावच्छेदकसम्बन्धेन सामानाधिकरण्याभावात्। नैयायि-

❀ काशिका ❀

त्यादौ 'कर्मते'त्यस्यानुषङ्गेणान्वयः। उत्पत्तेर्धात्वर्थत्वादिति। निरूपितमेतत् प्राक्। जानात्यादेर्ज्ञानादिमात्रार्थकतया घटादेः क्रियाजन्यफलाश्रयत्वाभावात् कर्मत्वानुत्पत्तिरित्याशङ्क्य पूर्वोक्तावरणभङ्गानुकूलव्यापारार्थकतामाश्रित्य परिहरति—जानातीत्यत्रेति। 'घटं जानाती'त्यादावित्यर्थः, 'घटादे'रिति शेषः। अतीतानागतयोः फलाश्रयत्वानुपपत्तिः, असत आश्रयत्वाभात्, न च ज्ञानसमये तज्जन्यावरणभङ्गस्यातीतादिघटेऽसत्त्वेपि तद्घटादिसमयावच्छेदेन तदाश्रयत्वमक्षतमेवेति वाच्यम्। व्यापारस्य स्वशून्योत्तरकालिकफलारम्भकत्वासंभवात्, एवं स्वपूर्वकालिकफलारम्भकत्वासंभवाच्च, कार्याव्यवहितपूर्वक्षणवर्तिन एव फलारम्भकत्वादित्याशङ्क्य परिहरति—अतीतेत्यादिना। कालान्तरे फलारम्भकत्वासंभवेऽपि व्यापारेण स्वाव्यवहितोत्तरकाल एवोत्पादितावरणभङ्गात्मकफलाश्रयता स्वीक्रियते, नैयायिकैरतीतानागतयोर्विषयतया ज्ञानाश्रयता यथाङ्गीक्रियते

नागतादिपरोक्षस्थलेऽपि ज्ञानजन्यस्य तस्यावश्यकत्वात् । अन्यथा 'यथापूर्वं न जानामी'त्यापत्तेः । अतीतादेराश्रयता च विषयतया ज्ञानाश्रयताया नैयायिकानामिव, सत्कार्य्यवादसिद्धान्ताद्वोपपद्यते इति । उक्तञ्च—

❀ दर्पणः ❀

कमते त्वेतादृशस्थले यथा घटादीनां कर्मत्वं तथोपपादितं धात्वर्थनिरूपणावसरे ।

ननु विद्यमानघटे ज्ञानजन्यावरणभङ्गस्य सम्भवेऽपि भाविविनष्टघटे निराश्रयस्य तस्यासम्भवेन तस्य कर्मत्वानुपपत्तिरत आह—**अतीतानागतेति** । तत्राश्रयताङ्गीकारे युक्तिमाह—**अन्यथेति** । विनष्टे तत्रावरणभङ्गास्वीकारे इत्यर्थः । **यथापूर्वमिति**—जानातिक्रियाविशेषणम्, पदार्थानतिवृत्तावव्ययीभावः पूर्वमनतिक्रम्येति पूर्वज्ञानानतिक्रमो यस्मिंस्तथेति । यावत् । घटस्य विद्यमानतादशायां तात्कालिज्ञानस्य तद्घटे आवरणभङ्गजनकतयाऽतीतदशायामाधुनिकज्ञानस्य तदजनकत्वेन पूर्वातिक्रमस्य तत्त्वात् पूर्वानतिक्रान्तज्ञानाभावस्य विषयस्याऽबाधात्तादृशप्रयोगस्य प्रामाण्यापत्तेरित्यर्थः । अतीतघटे आधुनिकज्ञानेनावरणभङ्गोत्पादाभ्युपगमे तु—तेन पूर्वज्ञानानतिक्रमात् तदभावस्य बाधाद्भवति तस्याप्रामाण्यमिति भावः । ननु विनष्टे घटे वास्तवतदाश्रयतैव कथमत आह—**अतीतादेरिति** । आदिना भाविपरिग्रहः । **नैयायिकानामिवेति** । यथाऽनुभवानुरोधेन तस्मिन् विषयतया ज्ञानाश्रयताङ्गीकारस्तेषां तथास्माकमपीति भावः । नन्वतीतो घटो ज्ञानविषय' इति प्रतीतेरस्तु नाम तादृशघटस्य विषयतया ज्ञानाश्रयता, आवरणभङ्गाश्रयतायां तु न तथा साधकोपलब्धिरत आह—**सत्कार्य्येति** । तमेव दर्शयति—**उक्तञ्चेति** । 'सदेव सोम्येदमग्र आसी'दिति श्रुतेः कार्य्यजातं सूक्ष्मरूपेण प्रागवस्थितमेव, परमते जनकत्वेनाभिमतसामग्रीसमवधानात्तु तद-

❀ काशिका ❀

तथेति भावः । अन्यथा 'यथापूर्वं न जानामी'त्यस्य मतद्वयेऽप्यापत्तिः, तदानीं तत्रावरणभङ्गस्य ज्ञानस्य च स्वरूपविषयतासंबन्धावच्छिन्नप्रतियोगिताकाभावसत्त्वात् । आवरणभङ्गे ज्ञाने चाधेयत्वविषयितासंबन्धावच्छिन्नस्यातीतघटादेर्भावस्य सत्त्वाच्च । नञा कारकविशिष्टक्रियाभावप्रतिपादनमिति स्वमते आवरणभङ्गाद्यभावबोधसंभवेऽपि तदभावप्रयुक्तकारकविशिष्टक्रियाया अभावस्य आरोपितक्रियाया बोधसंभवात् तादृशप्रयोगापत्तिः । तत्र विषयतासत्त्वेऽपि विषयतया ज्ञानाश्रयत्वे विवादादाह—**सत्कार्येति** । अत एव 'घटो जायते' इत्यत्र घटस्य क्रियाजनकत्वरूपं कारकत्वं, कर्तृत्वं चोपपद्यते, अन्यथासतस्तदनुपपत्तिः । तत्र भर्तृहरिसंमतिमाह—उक्तं चेति ।

१ पूर्वं घटस्य विद्यमानत्वात्तात्कालिकज्ञानस्यावरणभङ्गजनकत्वेऽपि इदानीं घटस्याविद्यमान-

'तिरोभावाभ्युपगमे भावानां सैव नास्तिता।
लब्धक्रमे तिरोभावे 'नश्यती'ति प्रतीयते—– इति ॥'

ननु 'चैत्रो ग्रामं गच्छती'त्यत्र ग्रामस्येव चैत्रस्यापि क्रियाजन्यग्रामसंयोगरूपफलाश्रयत्वात् कर्म्मतापत्तौ,–चैत्रश्चैत्रं गच्छती'त्यापत्तिः, प्रयागतः काशीं गच्छति चैत्रे–'प्रयागं गच्छती'त्यापत्तिश्च, क्रियाजन्यसंयोगस्य काश्यामिव,–विभागस्य प्रयागेऽपि सत्त्वादिति चेन्न, ग्रामस्येव चैत्रस्यापि फलाश्रयत्वेऽपि–तदीयकर्तृसंज्ञया कर्मसंज्ञाया बाधेन 'चैत्र-

ॐ दर्पणः ॐ

भिव्यक्तीभवति, कारणे सूक्ष्मरूपेणाऽवस्थानमेव तत्प्रागभावः, तस्यामेवावस्थायां 'स भविष्यती'ति व्यवह्रियते, ततः प्रच्युतमभिव्यक्तिलक्षणं धर्ममप्राप्तं जायत इति, प्राप्ताभिव्यक्तिस्त्वस्तीति। ननु सर्वदैव सति तस्मिन् कथं 'नाऽस्ति' 'नश्यती'ति व्यवहारोऽत आह—तिरोभावाभ्युपगम इति। तिरोभावाभिव्यअक्रसामग्र्या तिरोभावेऽभिव्यञ्जिते सति 'नाऽस्ति' 'नष्ट' इति व्यवहारः, लब्धक्रमायां तु तस्यां 'नश्यती'ति सत्कार्यवादसिद्धान्तः, प्रकृते घटस्य तिरोधानेऽपि सूक्ष्मरूपेण सत्त्वात्तत्रावरणभङ्गफलाश्रयत्वं सुलभमिति भावः। उक्तनिष्कृष्टकर्मत्वं विशदीकर्तुमाशङ्कते—नन्विति। 'विभागस्ये'त्यस्य,—'क्रियाजन्ये'त्यादिः।

ननु कर्मसंज्ञायाः परया कर्तृसंज्ञया बाधनेपि वास्तवकर्मत्वस्य तत्राऽबाधात् स्यादेव तादृशप्रयोगोऽत आह—द्वितीयोत्पत्ताविति। इदं च प्रकृताऽभिप्रायेण, कारकविभक्त्युत्पत्तिमात्रस्यैव तन्नियम्यत्वात्। अन्यथेति। संज्ञाया अनियाम-

ॐ काशिका ॐ

सैव = तिरोभावरूपैव। नास्तिता = नष्टता। लब्धेति। लब्धः क्रमो येन तादृशे तिरोभावे सतीत्यर्थः तदुत्पत्तिगतवर्त्तमानत्वनिबन्धनो नश्यतीति व्यवहारः, तदनन्तरम्-अनष्टेति तदर्थः। लब्धक्रम इत्यनेन व्यापाररूपतावेदिता। प्रतीयत इत्यनेन प्रतीतिः प्रमाणत्वेनोक्ता। तिरोभावो नाम सूक्ष्मरूपेणावस्थानमेवं च तत्रावरणभङ्गाश्रयत्वस्य नानुपपत्तिः, एवमनागतेऽपि द्रष्टव्यम्।

फलाश्रयत्वादिति। तदाश्रयत्वेनोद्देश्यत्वादित्यपि बोध्यम्। विभागस्य प्रयोगेऽपीति। फले धातूपात्तत्वानिवेशाद् विभागरूपफलशालित्वात् प्रयोगस्यापि कर्मत्वापत्तिरिति भावः। कर्मसंज्ञाया बाधेनेति। परत्वाद् बाधेनेत्यर्थः। आकडारीयत्वात् संज्ञयोरपि बाध्यबाधकभाव इति भावः। ननु फलाश्रयत्वकर्मसंज्ञयोर्मध्ये संज्ञाया एव नियामकत्वमित्यत्र किं बीजं, किं च संज्ञानियामकत्वेनावश्यकतादृशफलाश्रयत्वस्यैव द्वितीयानियामकत्वमस्त्वित्याशङ्क्याह—

१ —त्वादावरणभङ्गजनकत्वासम्भवात् 'घटं यथापूर्वं जानामी'ति प्रयोगो न स्यादित्यर्थः।

श्चैत्र'मिति प्रयोगासम्भवात्, '[1]द्वितीयोत्पत्तौ संज्ञाया एव नियामकत्वात्, 'गमयति कृष्णं गोकुल'मित्यत्रेव 'पाचयति कृष्णेने'त्यत्रापि कृष्णपदाद् द्वितीयापत्तेः। शाब्दबोध'श्चैत्रश्चैत्र'मित्यत्र स्यादिति चेन्न, तथा व्युत्पन्नानामिष्टापत्तेः, उच्यतां वा—'प्रकारतासम्बन्धेन धात्वर्थफलविशेष्यकबोधं प्रति धात्वर्थव्यापारानधिकरणाश्रयोपस्थितिर्हेतु'रिति कार्य्यकारणभावान्त-

❀ दर्पणः ❀

कत्वे इत्यर्थः। **द्वितीयापत्तेरिति।** 'गमयति कृष्णं गोकुल'मित्यत्र णिच्प्रकृत्यर्थव्यापारजन्यसंयोगानुकूलव्यापाररूपधात्वर्थफलाश्रयत्वस्येव 'पाचयति कृष्णेनौदन'मित्यत्रापि तादृशव्यापारजन्यविक्लित्त्यनुकूलव्यापाराश्रयत्वस्य तत्र सत्त्वादिति भावः। **शाब्दबोध इति।** 'चैत्रनिष्ठसंयोगानुकूलश्चैत्रकर्तृको वर्त्तमानो व्यापार' इति शाब्दबोध इत्यर्थः, तद्विषयस्याऽबाधादिति भावः। **तथा व्युत्पन्नानामिति।** सामान्यतो धात्वर्थफलविशेष्यतानिरूपितप्रकारतासम्बन्धेन शाब्दबोधे आश्रयोपस्थितेर्हेतुत्ववादिनामित्यर्थः, बोधस्य स्वस्वव्युत्पत्त्यनुसारित्वादिति भावः। चैत्रकर्मकचैत्रकर्तृकव्यापारशाब्दबोधस्य 'चैत्रो ग्रामं गच्छती'त्यादावननुभवादाह— **उच्यतां वेति। कार्य्यकारणभावान्तरमिति।** सामान्यतः कार्यकारणभावकल्पने उक्ताऽतिप्रसङ्गेनाश्रयं प्रकृतधात्वर्थव्यापारानधिकरणत्वेन विशेष्य तादृशा-

❀ काशिका ❀

द्वितीयोत्पत्ताविति। फलाश्रयत्वस्य नियामकत्वे दूषणमाह—अन्यथेति। कृष्णपदाद् द्वितीयापत्तेरिति। कृष्णस्य पाचयतिधात्वर्थव्यापारप्रयोज्यविक्लित्त्यनुकूलव्यापारात्मकफलाश्रयत्वाद् द्वितीयान्तस्य साधुत्वं स्यादित्यर्थः। अणिजन्तधात्वर्थव्यापारप्रयोज्यफलाश्रयत्वस्यैव द्वितीयानियामकत्वाभ्युपगमान्नेयमापत्तिरिति शङ्कानिराकरणाय 'गमयति कृष्णा'मित्यादिदृष्टान्ताभिधानम्। तथा च पूर्वोक्तरीत्यभ्युपगमे 'गमयति कृष्णा'मित्यत्रापि द्वितीयान्तस्य साधुत्वं न स्यादिति भावः। ननु नोक्तस्थले द्वितीयान्तस्य साधुत्वमापादयामि, किं तु तादृशप्रयोगाच्छाब्दबोधमित्याशङ्कामिष्टापत्त्यापहरति—**शाब्दबोध इति। शाब्दबोधः**=चैत्रकर्तृकं चैत्रकर्मकं गमनमित्याद्याकारकः शाब्दबोधः। **चैत्रश्चैत्रमित्यत्रेति।** चैत्रश्चैत्रं गच्छतीत्यत्रेत्यर्थः। **तथा-व्युत्पन्नानामिति।** तस्मिन् वाक्ये तादृशबोधजनकत्वग्रहवतामित्यर्थः। तादृशवाक्यादुक्तः शाब्दबोधो नानुभवसिद्ध इत्यत इष्टापत्तिरयुक्तेत्याशङ्क्य परिहरति—**उच्यतां वेति।** स्वीक्रियतामित्यर्थः। **प्रकारतासंबन्धेनेति।** प्रकारतासंबन्धः कार्यतावच्छेदकः, कारणतावच्छेदकसंबन्धस्तु धात्वर्थव्यापारानधिकरणाश्रयनिष्ठविशेष्यता। तथा च 'प्रकारतासंबन्धेन तादृशफलबोधे

१ कर्तृसञ्ज्ञया कर्मसञ्ज्ञाबाधेऽपि वास्तवं कर्मत्वमादाय कथं न द्वितीयेत्यत आह—द्वितीयेति।

रम्, प्रकृते चैत्रस्य व्यापारानधिकरणत्वाभावान्न दोषः, प्रयागस्य कर्म्मत्वन्तु सम्भावितमपि न, समभिव्याहृतधात्वर्थफलशालित्वस्यैव क्रियाजन्येत्यनेन विवक्षणस्य उक्तप्रायत्वात्।

'नैयायिकास्त्वाद्यदोषवारणाय 'परसमवेतत्वं', द्वितीयदोषवारणाय—

❀ दर्पणः ❀

श्रयोपस्थितेर्हेतुत्वस्य कल्पनान्न तादृशशाब्दबोधापत्तिरिति भावः। **समभिव्याहृतेति**। प्रकृतेत्यर्थः। **उक्तप्रायत्वादिति**। 'धात्वर्थविक्लित्त्याश्रयत्वात् कर्मतेत्यादिग्रन्थने'त्यस्यादिः। गमेस्तत्र पार्थक्येनाऽनुपादानादुक्तं,—'प्राये'ति। वस्तुतस्तु—'फलव्यापारयो'रित्यत्र फलत्वस्य तद्धात्वऽर्थजन्यत्वे सति तद्धातुजन्योपस्थितिविषयत्वरूपस्य निर्वचनाद्व्यापारव्यधिकरणफलाश्रयत्वरूपकर्मत्वोक्त्यैवानतिप्रसङ्गे नोक्तविशेषणस्य पार्थक्येन निवेश इति ध्येयम्।

नैयायिकमतं दूषयितुमुपन्यस्यति—**नैयायिकास्त्विति**। **आद्यदोषेति**। 'चैत्रश्चैत्रं गच्छती'ति प्रयोगापत्तिरूपेत्यर्थः। **द्वितीयेति**। 'प्रयागात् काशीं गच्छ-

❀ काशिका ❀

तादृशविशेष्यतासंबन्धेन विभक्तिजन्योपस्थितिः कारण'मिति कार्यकारणभावः पर्यवसन्नः, 'धात्वर्थव्यापारानधिकरणे'त्यादिग्रन्थश्चोक्तसंबन्धप्रदर्शक एव, 'चैत्रो ग्रामं गच्छती'त्यत्र ग्रामरूप आश्रये तादृशविशेष्यतासंबन्धेन द्वितीयाजन्योपस्थितिरस्ति, अतस्तत्र धात्वर्थसंयोगरूपफलस्य प्रकारतासंबन्धेन बोधनिर्वाहः, उपस्थितौ विभक्तिजन्यत्वनिवेशाद् 'गम्यमानो ग्राम' इत्यत्र नान्वयव्यभिचारः, 'चैत्रश्चैत्र'मित्यत्रातिप्रसङ्गव्यावृत्तिं दर्शयति—**प्रकृते चैत्रस्येति**।

उक्तप्रायत्वात्—क्रियाजन्यफलाश्रयस्येत्यनेनोक्तप्रायत्वात्। तत्र 'धात्वर्थफले'त्यनुक्तत्वात् 'प्रायः'पदोपादानम्, अत एव यदा पुष्ट्यर्थं मापभक्षणाय मापक्षेत्रेऽश्वो बध्यते तदा 'मापेष्वश्वं बध्नाती'त्यत्र बन्धनप्रयोज्यभक्षणरूपफलाश्रयत्वेऽपि मापाणां न कर्मत्वम्। प्रयागस्य कर्मत्वसंभावनाऽसंभवोक्तिर्विभागो गच्छत्यर्थो न भवतीत्यभिप्रेत्य। अपादानप्रकरणे वक्ष्यमाणरीत्या तस्य तदर्थत्वे त्ववधिनिष्ठसंबन्धस्य फलतानवच्छेदकतयोक्तदोषपरिहारोऽवसेयः।

प्रकारान्तरेण स्थलद्वये दोषं वारयतां नैयायिकानां मतं दूषयितुमुपन्यस्यति—**नैयायिकास्त्विति**। **परसमवेतत्वमिति**। आद्यदोषवारणाय परसमवेतत्वं द्वितीयावाच्यमुपाददते = स्वीकुर्वन्तीत्यन्वयो, द्वितीयदोषवारणाय धात्वर्थतावच्छेदकत्वं फले विशेषणमुपाददत इत्यपरोऽन्वयः। विभागस्य गमधात्वर्थतावच्छेदकत्वाभावान्न 'प्रयागात् काशीं गच्छती'त्यत्र प्रयागेऽतिप्रसङ्गः। धात्वर्थतावच्छेदकं च धातुशक्यांशे विशेषणतापन्नत्वम्, द्वितीयावाच्यपरसमवेतत्वस्य

---

१ तदेवं तन्मते—'परसमवेतक्रियाजन्य—धात्वर्थतावच्छेदक—फलशालित्वं तत्त्व'मित्यर्थः।

'धात्वर्थतावच्छेदकत्वं' फले विशेषणं द्वितीयावाच्यमित्युपाददते । परसमवेतत्वं धात्वर्थक्रियायामन्वेति, तथैव कार्यकारणभावान्तरकल्पनात् ।

❀ दर्पणः ❀

ती'ति प्रयोगापत्तिरूपेत्यर्थः । **धात्वर्थतावच्छेदकत्वमिति** । फलावच्छिन्नव्यापारस्य धात्वर्थत्वमिति वादिनां मतेनेदम् । तथाच तन्मते धात्वर्थताऽवच्छेदकफलशालित्वं कर्मत्वं द्वितीयाऽर्थः पर्यवस्यति । **कार्य्यकरणभावेति** । द्वितीयाऽर्थ-

❀ काशिका ❀

फले तदाश्रयादावन्वयेऽपि नोक्तदोषवारणसंभवः, संयोगग्रामादौ चैत्रभिन्नसमवेतत्वसत्त्वादित्यत आह—**परसमवेतत्वमिति** । **धात्वर्थक्रियायामन्वेतीति** । फलजनकसमभिव्याहृतधात्वर्थक्रियायामन्वेतीत्यर्थः । स्वपदं यत्फलव्यक्तिमत्त्वेन कर्मत्वमभिमतं तद्व्यक्तिपरम्, तेन 'पचन्तं चैत्रं मैत्रो गच्छति' 'गच्छन्तं चैत्रं मैत्रो गच्छती'त्यत्र च पाकक्रियायां चैत्रसमवेतायां संयोगानुकूलक्रियायां च चैत्रभिन्नसमवेतत्वाभावेऽपि न चैत्रपदाद् द्वितीयानुपपत्तिः । द्वितीयस्थले समभिव्याहृतगम्युपात्तसंयोगजनकक्रियायां स्वसमवेतायां स्वभिन्नसमवेतत्वाभावेऽपि मैत्रप्रतियोगिकचैत्रानुयोगिकसंयोगव्यक्तिजनकक्रियायां तस्याक्षतत्वान्नानुपपत्तिः । परो = भेदवान्, तत्समवेतत्वमित्यर्थः, 'चैत्रो ग्रामं गच्छती'त्यत्र व्युत्पत्तिवैचित्र्येण भेदवत्समवेतत्वैकदेशे भेदे द्वितीयाप्रकृत्यर्थग्रामस्य प्रतियोगितानिरूपितानुयोगितासंबन्धेनान्वयः, ससंबन्धिकत्वाच्च पदार्थैकदेशेऽपि भेदे 'देवदत्तस्य पिते'त्यादौ देवदत्तनिरूपितत्वस्य पितृपदार्थैकदेशे जनकत्वे इवान्वयो नानुपपन्नः, तदन्वितभेदवत्समवेतत्वस्य क्रियायामाश्रयत्वसंबन्धेनान्वयः, 'चैत्रेण गम्यते ग्राम' इत्यत्राख्यातार्थः परसमवेतत्वं, यत्र फलाश्रये कर्मणि प्रत्ययस्तस्य तद्घटकभेदे ग्रामादेः प्रतियोगितयान्वयः, न च चैत्रेऽपि द्वित्वादिना चैत्रभेदसत्त्वा'च्चैत्रश्चैत्रं गच्छती'ति दुर्वारमेव, प्रकृत्यर्थतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेन प्रकृत्यर्थस्य द्वितीयार्थभेदेऽन्वयाङ्गीकारे 'देवदत्तो द्रव्यं गच्छति' 'मल्लो मल्लं गच्छती'त्याद्यनुपपत्तिः, देवदत्ते द्रव्यत्वावच्छिन्नप्रतियोगिताकभेदस्य, मल्ले मल्लत्वावच्छिन्नप्रतियोगिताकभेदस्य चासत्त्वात्, न च वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगितात्वस्यैव संबन्धताङ्गीकारान्न 'चैत्रश्चैत्रं गच्छती'त्यस्यापत्तिरिति वाच्यं, तादृशी प्रतियोगिता प्रकृत्यर्थतावच्छेदकावच्छिन्नैव संभवतीति देवदत्तो द्रव्यमित्यादावनुपपत्तितादवस्थ्यादिति चेन्न, तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन 'प्रकृत्यर्थस्यान्वयाङ्गीकारादुक्तदोषाभावात् । एवं 'चैत्रेण ग्रामो गम्यते' इत्यत्र परसमवेतत्वमाश्रयश्च कर्माख्यातार्थः, तार्किकमते आश्रयत्वं च कर्माख्यातार्थ इति बोध्यम्, परसमवेतत्वघटकभेदे ग्रामादिकर्मणस्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेनान्वयः, तेन 'चैत्रश्चैत्रेण गम्यत' इत्यस्य नापत्तिः, न वा 'चैत्रेण द्रव्यं गम्यते' 'मल्लो मल्लेन गम्यत' इत्यस्यानुपपत्तिः, अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्यैव संसर्गत्वमिति व्युत्पत्तिस्तु नञुपस्थाप्याभावशाब्दबोध-

परत्वञ्च द्वितीयया स्वप्रकृत्यर्थापेक्षया बोध्यते। तथाच–'चैत्रस्तण्डुलं पचती'त्यादौ तण्डुलान्यसमवेतव्यापारजन्यधात्वर्थतावच्छेदकविक्लित्तिशालित्वात् तण्डुलस्य कर्म्मता'। शाब्दबोधस्तु तण्डुलसमवेतधात्वर्थता-

---

❀ दर्पणः ❀

परसमवेतत्वस्य स्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धिं प्रति भावनात्वावच्छिन्नविशेष्यतासम्बन्धेन धातुजन्योपस्थितेर्हेतुत्वान्तरकल्पनादित्यर्थः।

ननु भेदस्य केवलाऽन्वयितया सर्वस्यैव परत्वेन चैत्रक्रियाया अपि मैत्राऽन्यसमवेतत्वात् तद्वाच्यताङ्गीकारेऽप्युक्तदोषतादवस्थ्यमत आह—**परत्वञ्चेति**। व्युत्पत्तिवैचित्र्यात्तु पदार्थैकदेशेऽपि प्रतियोगितया प्रकृत्यर्थाऽन्वयः, प्रकृते चैत्रसंयोगजनकक्रियायां चैत्रभिन्नसमवेतत्वबाधान्न 'चैत्रश्चैत्रं गच्छती'ति प्रयोगः, यत्र चोभयकर्मभ्यां मल्लयोः संयोगस्तत्र मल्लाऽन्तरक्रियायाः स्वनिष्ठसंयोगजनिकायाः स्वभिन्नसमवेतत्वेऽपि तादृशक्रियायाः स्वस्मिन् बाधान्न 'मल्लः स्वं गच्छती'ति प्रयोगः,

❀ काशिका ❀

विपर्ययिणोति भावः। न चोभयकर्मजसंयोगस्थले चैत्रानुयोगिकसंयोगजनकमैत्रवृत्तिक्रियायां चैत्रभिन्नसमवेतत्वस्य निराबाधतया तद्दोषस्तदवस्थ इति वाच्यम्, अन्यनिष्ठक्रियायां चैत्रभिन्नसमवेतत्वसत्त्वेऽपि चैत्रनिष्ठसंयोगजनकचैत्रभिन्नसमवेता याऽन्यनिष्ठक्रिया तदाश्रयत्वस्य चैत्रेऽसत्त्वात्'चैत्रश्चैत्रं गच्छती'त्यस्य चैत्रकर्तृकक्रियायां चैत्रान्यसमवेतत्वाभावाच्चैत्रान्यसमवेतक्रियाजन्यसंयोगवत्त्वस्य चैत्रेऽसत्त्वा'च्चैत्रेण गम्यत' इत्यस्यापत्तेरयोगादित्यन्यत्र विस्तरः। यद्वा–भेद आधेयत्वं चार्थः, तत्र भेदे प्रकृत्यर्थस्य पूर्ववदेवान्वयः, भेदस्य सामानाधिकरण्यसंबन्धेन व्यापारे, आधेयत्वे च प्रकृत्यर्थस्य, एवं च 'ग्रामं गच्छति चैत्र' इत्यतो ग्रामवृत्तिसंयोगजनको ग्रामप्रतियोगिकभेदसमानाधिकरणो यो व्यापारस्तदाश्रयश्चैत्र इति बोधः। 'चैत्रेण ग्रामो गम्यत' इत्यतश्चैत्राश्रयकग्रामभेदसमानाधिकरणव्यापारप्रयोज्यसंयोगाश्रयो ग्राम इति बोधः।

ननु परसमवेतत्वस्य फलादावेवान्वयः स्यात्, तथा चातिप्रसङ्गतादवस्थ्यमत आह—**तथैव कार्येति**। विशेष्यतासंबन्धेन द्वितीयाद्यर्थपरसमवेतक्रियानिष्ठबोधं प्रति स्वविशेष्यतासंबन्धेन धातुजन्योपस्थितिः कारणमिति कार्यकारणभाव इत्यर्थः। द्वितीययेत्युपलक्षणं सुब्विभक्तेः, तेन 'चैत्रो ग्रामाय गच्छती'तिवच्चैत्रश्चैत्राय गच्छति' 'चैत्रेण ग्रामस्य गमन'मितिवच्चैत्रेण चैत्रस्य गमन'मित्यादिर्न प्रयोगः, तथा च परसमवेतक्रियाजन्यफलशालित्वं कर्मत्वमेतन्मते पर्यवसन्नमित्याशयेन तदुपादयति—**तथा च चैत्रस्तण्डुलमिति**। 'धात्वर्थतावच्छेदके'त्युक्तिर्विक्लित्तेर्धात्वर्थतावच्छेदकत्वसत्त्वप्रकटनाय, न तु तेन रूपेण शाब्दबोधे भानं,

---

१ 'चैत्रश्चैत्र'मित्यत्र तु द्वितीयाप्रकृतिचैत्रवृत्तिसंयोगानुकूलक्रियायाश्चैत्रान्यावृत्तित्वान्न तथाप्रयोगः।

❀ दर्पणः ❀

स्वनिष्ठसंयोगजनकस्वक्रियायां स्वभिन्नसमवेतत्वस्यायोग्यत्वेनाभानेऽप्यबाधित-संयोगजनकत्वं विषयीकृत्य 'अभिचरन् यजेते'त्यादाविव शाब्दबोधसम्भवात् तदर्थतात्पर्येण 'स्वं गच्छती'ति प्रयोगो दुर्वार इति तु न आशङ्कनीयम्, परसमवेतत्वांशाऽविषयकस्य द्वितीयाऽधीनफलजनकत्वबोधस्य क्वाप्यनभ्युपगमेन तादृशबोधे तज्ज्ञानसामग्र्या अप्यपेक्षणात्, तस्याश्च प्रकृतेऽसत्त्वात्। अथ स्वस्याऽपि द्वित्वाऽवच्छिन्नभिन्नत्वात् 'स्वं गच्छती'ति प्रयोगवारणाय 'द्वितीयाप्रकृत्यर्थस्य प्रकृत्यर्थतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनाऽन्वयो वाच्यः, तथाच— 'चैत्रो द्रव्यं गच्छति' 'मल्लो मल्लं गच्छती'त्यादिवाक्यानामप्रामाण्यापत्तिः, चैत्रमल्लादिनिष्ठक्रियाया द्वितीयाप्रकृत्यर्थताऽवच्छेदकद्रव्यत्वमल्लत्वावच्छिन्नाभिन्नाऽसमवेतत्वात्—तद्व्यक्तित्वानुपस्थितावपि शाब्दबोधस्याऽनुभवसिद्धतया तत्तद्व्यक्तित्वोपस्थापकत्वाऽवच्छिन्नप्रतियोगितयान्वयासम्भवात्, तद्व्यक्तित्वोपस्थापकत्वाऽभावाच्च, एकधर्मावच्छिन्नप्रतियोगिताया अन्यधर्मावच्छिन्नसंसर्गत्वे मानाभावाच्च, प्रतियोगिविशेषिताभावबुद्धिविशिष्टवैशिष्ट्याऽवाहित्वनियमात्। तदुक्तं दीधितिकृता—"प्रतियोगिविशेषिताभावभानं तु विशिष्टवैशिष्ट्यमर्यादां नातिशेत" इतीति चेत्—तर्हि क्रियान्वयिभेदप्रतियोगितावच्छेदकत्वं द्वितीयार्थः, भेदे प्रकृत्यर्थस्याधेयतयान्वयान्न पूर्वोक्तापत्त्यनुपपत्ती, नञ्समभिव्याहारे च—नञा तात्पर्यवशात् 'चैत्रश्चैत्रं न गच्छती'त्यादौ द्वितीयाप्रकृत्यर्थवृत्तित्वविशिष्टतदपरार्थभेदप्रतियोगितावच्छेदकत्वाभावः, क्वचिच्च 'चैत्रो ग्रामं न गच्छती'त्यादौ द्वितीयाऽर्थवृत्तित्वविशिष्टधात्वर्थसंयोगजनकत्वाभावः क्रियायां बोध्यते, ये तु प्रकृत्यर्थवृत्तित्वविशिष्टसंयोगादिरूपफलस्यैव जनकत्वस्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकत्वोभयसम्बन्धेन क्रियायामन्वयोपगमाद् भेदप्रतियोगितावच्छेदकत्वस्य द्वितीयार्थत्वमन्तरेणाप्युक्तापत्तिमुद्धरन्ति, तन्मते वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकतयोक्तस्थले उक्तसम्बन्धे नञा संयोगाभावबोधाऽनुपपत्तिः, 'परसमवेतत्वं द्वितीयार्थ' इति दीधितिविरोधश्च, एवञ्च 'चैत्रो ग्रामं गच्छती'त्यत्र ग्रामवृत्तिसंयोगजनिका ग्रामवृत्तिभेदप्रतियोगितावच्छेदिका च या क्रिया तदनुकूलकृतिमाँश्चैत्र' इति नैयायिकमतपरिष्कारः।

अत्र प्रत्यवतिष्ठन्ते"नञर्थप्रसज्यप्रतिषेधस्य प्रतियोगितया क्रियाऽन्वयित्वमिति व्यवस्थापनात् कथं 'चैत्रो ग्रामं न गच्छती'त्यादौ नञः संयोगजनकत्वाभावबोधकत्वम्। उक्तञ्च—

पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्।
प्रसज्यप्रतिषेधस्तु क्रियया सह यत्र नञ्॥' इति।

वच्छेदकविक्लित्त्यनुकूलतण्डुलान्यसमवेतक्रियाजनककृतिमाँश्चैत्र' इत्याहुः,

❀ दर्पणः ❀

यत्र नञर्थाभावः क्रियया धात्वर्थव्यापारेण प्रतियोगितया सम्बद्धो भवतीत्युत्तरार्द्धाऽर्थः । तस्मात् तिङन्ते नञ्समभिव्याहारे क्रियाप्रतियोगिकाऽभावबोध एव ज्यायो, न तु क्रियायां फलाभावस्य, विभक्त्यर्थाभावस्य वा, प्रथमान्तार्थे वा तिङर्थाऽभावस्य, क्लृप्तकारणविरहा"दिति । अत्र वदन्ति—"यद्धर्म्माऽवच्छिन्ने यद्धर्म्माऽवच्छिन्नत्वं येन संसर्गेण नञ्समभिव्याहारे प्रतीयते तद्धर्म्मावच्छिन्ने तद्धर्म्मावच्छिन्नस्य तत्संसर्गावच्छिन्नप्रतियोगिताकाभावो नञ्समभिव्याहारे बुद्ध्यते' इति सकललोकानुभवसिद्धोऽयमर्थः, 'प्रतियोग्यभावाऽन्वयौ तुल्ययोगक्षेमा'विति वदता दीधितिकृतोपनिबद्धः,—एवञ्च 'चैत्रो ग्रामं गच्छती'त्यत्र नञ्समभिव्याहारे क्रियायां द्वितीयाऽर्थवृत्तित्वविशिष्टसंयोगजनकत्वस्य बोधात् तत्समभिव्याहारे तत्र तदभावस्य बोधो जायमानः केन वारणीयः, न च कारणाभावः, नञर्थाभावप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधे प्रतियोग्यन्वययोग्याऽर्थोपस्थितेर्हेतुतया तस्याश्च क्रियायां सत्त्वात्, न तु नञर्थनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन बोधे धातुजन्यभावनोपस्थितेर्हेतुता, 'चैत्रश्चैत्रं न गच्छती'त्यादिवाक्यानामप्रामाण्यापत्तेः, चैत्रकर्मकचैत्रकर्तृकगमनक्रियारूपप्रतियोगिनोऽप्रसिद्ध्या नञा तदभावस्य बोधयितुमशक्यत्वात् । मन्मते तु चैत्रकर्तृकक्रियायां चैत्रवृत्तिसंयोगजनकत्वेऽपि चैत्रवृत्तिभेदप्रतियोगितावच्छेदकत्वस्य तस्यामसत्त्वेन नञा तदभावस्य प्रत्यायनात् प्रामाण्योपपत्तेः, अत एव परसमवेतत्वस्य द्वितीयार्थत्वमप्यावश्यकम्, नच त्वन्मतेऽपि चैत्रस्याकर्मत्वात् कथं तद्वाचकाद् द्वितीयोपपत्तिरुक्तस्थले इति वाच्यं, 'मैत्रो गच्छति चैत्रं, न चैत्र' इत्यत्र मैत्रक्रियावच्छिन्नप्रतियोगिताकभेदवत्त्व[illegible]र्थयोरबाधेन तदुपपत्तेः, अधिकम[illegible]त । तस्मा'च्चैत्रो गच्छती'त्य[illegible] चैत्रो न कर्मेति व्यवहाराच्च, [illegible] कर्तृव्यावृत्तं धात्वर्थव्यापारप्रयोज्यतद्व्यधिकरणधात्वर्थफलाश्रयत्वं [illegible] निर्वाच्यम्, तत्र फलव्यापारयोर्धातुलभ्यत्वेऽपि वृत्तित्वे भेदप्रतियोगितावच्छे[illegible]पर्य्यवसिते वैयधिकरण्ये च द्वितीयादेः शक्तिरनन्यलभ्यत्वात् स्वी[illegible] इति । प्रकृतमनुसरामः—

विक्लि[illegible]ले स[illegible]कूलेति—तण्डुलाऽन्यसमवेतक्रियाऽन्वयि । यथाश्रुतं दूष-

❀ काशिका ❀

तदवच्छिन्ने २ [illegible] वात्तेन रूपेण बोधानुभवाच्चेति बोध्यम् । नन्वतिप्रसङ्गनिरासाय

१ तण्डुलान्यपाचकचैत्रादिनिष्ठव्यापारानुकूलकृत्याश्रयः पाचकचैत्र इत्यर्थः । आहुः=तार्किकाः ।

'तन्न रोचयामहे—परसमवेतत्वादेर्गौरवेणावाच्यत्वात्, अतिप्रसङ्गः किं द्वितीयायाः, ? शाब्दबोधस्य वा ?, नाद्यः, तावद्वाच्यकथनेऽपि तत्ताद्-वस्थ्यात्, 'गमयति कृष्णं गोकुल'मितिवत् 'पाचयति कृष्णं गोप' इति द्वितीयापत्तेः, 'तण्डुलं पचति चैत्र' इतिवत्, 'तण्डुलं पच्यते स्वय-मेवे'त्यापत्तेश्च, विक्लित्त्यनुकूलतण्डुलाऽन्यसमवेताग्निसंयोगरूपधात्वर्थाश्र-

❀ दर्पणः ❀

यति—**तन्न रोचयामहे** इत्यादिना। ननु परसमवेतत्वस्य द्वितीयार्थत्वं विना-ऽतिप्रसङ्गाऽनिरासाद् गौरवं न दोषायेत्यत आह—**अतिप्रसङ्गः किमिति।**

तावदिति। परसमवेतक्रियाजन्यधात्वर्थताऽवच्छेदकफलशालित्वरूपकर्मत्वस्य द्वितीयार्थत्वस्वीकारेऽपि द्वितीयातिप्रसङ्गस्य तादवस्थ्यादित्यर्थः। तमेवाह—**'गम-यति कृष्ण'**मित्यादिना। **द्वितीयापत्तेरिति।** द्वितीयोत्पत्तावुक्तकर्मत्वस्य तन्त्रत्वे, 'गमयति गोकुलं कृष्ण'मित्यत्र णिजर्थनिरूपितनिरुक्तकर्मत्वस्येव पचिप्रकृति-कणिजर्थकर्मत्वस्य कृष्णे सत्त्वेन पाचयत्यादिप्रयोगेऽपि प्रयोज्यकर्तृवाचकाद् द्वितीयापत्तेरतः संज्ञाया एव द्वितीयोत्पत्तौ प्रयोजकताऽङ्गीकरणीया, एवञ्च तत एवा-तिप्रसङ्गभङ्गे कृतं तत्र द्वितीयाशक्त्येति भावः। ननु तादृशकर्मत्वमेव द्वितीयानिया-मकम्, निरुक्तस्थले कृष्णे तत्सत्त्वेऽप्युपात्तगत्यर्थकाद्यतिरिक्तणिजन्तधातुयोगे 'गतिबुद्धी'तिसूत्रेण तदविवक्षाबोधनान्नोक्तापत्तिः, विवक्षाया एव विभक्त्युत्पत्तौ नियामकताया वक्ष्यमाणत्वादत आह—**तण्डुलं पच्यत इति।** तण्डुले भवदु-क्तद्वितीयानियामककर्मत्वस्य सत्त्वात्तदापत्तिः मन्मते तु कर्तृसंज्ञया कर्मसंज्ञाया बाधान्न तदापत्तिरिति भावः। 'तण्डुलान्यसमवेते'त्यनेन परसमवेतक्रियाजन्यत्व

❀ काशिका ❀

त्रमन्तरेणाप्यु[illegible]न् तन्मत [illegible]
गुरु[illegible] [illegible]समवेतत्व शक्तिः कल्पन[illegible] [illegible]आह—अतिप्रसङ्ग इति। तत्ताद्व-स्थ्यात्=अनिष्टस्थले द्वितीयातिप्रङ्गतादवस्थ्यात्। [illegible]संयोगा[illegible] 'चैत्रश्चैत्रं गच्छती'त्यतिप्रसङ्गस्यो-क्तरीत्याऽसंभवादन्यत्रातिप्रसङ्गमाह—पाचयति कृष्णमिति [illegible] इत्यापत्तेरिति। प्रयोज्ये कृष्णे स्वभिन्नप्रयोजकसमवेतक्रियाजन्यणिजन्तधात्वर्थतावच्छेदकीभूत[illegible]र्थक्रियात्मकफलशालित्व-रूपकर्मत्वसत्त्वाद् द्वितीयापत्तिरित्यर्थः, दृष्टान्तोपादानं पूर्ववत्। [illegible] द्वितीयातिप्रसङ्ग-मुपपादयति—विक्लित्त्यनुकूलेति। विक्लित्त्यनुकूलस्तण्डुलान्यसमवेतोऽ[illegible] [illegible]रूपो धात्वर्थः—पचधात्वर्थस्तज्जन्यफलेत्यर्थः, अत्राग्निसंयोगो धात्वर्थतया विवक्षत[illegible] संयो[illegible]त्येदं दूषणम्। 'कर्मकर्तरि फलमात्रस्य धात्वर्थत्वं, विक्लित्यनुकूलतण्डुलमात्रवृत्तिव्याप[illegible] धात्वर्थत्व'मिति

१ तार्किकमतं खण्डयति—तन्नेति।

यत्वात्, शाब्दबोधातिप्रसङ्गोऽप्युक्तरीत्यव निरस्तः, परसमवेतत्वस्य शक्यत्वेऽपि परत्वस्य, परसमवेतत्वस्य च इष्टाऽन्वयलाभायाऽनेकशः कार्य्यकारणभावाऽभ्युपगमे गौरवाऽन्तरत्वादिति स्पष्टं भूषणे।

एतच्च[1] सप्तविधम्—

ॐ दर्पणः ॐ

विक्लित्तावस्तीति बोधितम्, 'धात्वर्थाश्रयत्वा'दित्यनेन कर्तृसंज्ञासत्त्वमावेद्यते, उक्तरीत्यैवेति। 'तथा व्युत्पन्नाना'मित्याद्युक्तरीत्यैवेत्यर्थः। धात्वर्थव्यापाराऽनधिकरणाश्रयोपस्थितिरूपहेत्वभावादिति भावः। ननु नाऽस्मन्मतेऽप्युक्तप्रयोगापत्तिस्तत्र व्यापारत्वेन फलस्यैव भानाऽङ्गीकारेण तण्डुलस्य धात्वर्थताच्छेदकफलशालित्वाऽभावात्, निष्कृष्टभवन्मतेऽपि व्यापारगतपौर्वापर्य्यारोपेण फलस्य व्यापारतायाः स्वीकाराच्चेत्यतो दूषणाऽन्तरमाह—परसमवेतत्वस्येति। इष्टाऽन्वयेति। इष्टस्य = प्रकृत्यर्थस्य, प्रतियोगितासम्बन्धेन परसमवेतत्वस्यैकदेशे परत्वे, परसमवेतत्वस्य चाश्रयतया क्रियायामन्वयस्य—लाभाय = भानायेत्यर्थः। अनेकश इति। 'प्रकृत्यर्थप्रकारकशाब्दबुद्धिं प्रति द्वितीयाऽधीनाधेयत्वोपस्थितेरिव तदधीनपरसमवेतत्वोपस्थितेः प्रकारतासम्बन्धेन', एवं—'परसमवेतत्वप्रकारकबुद्धिं प्रति धातुजन्योपस्थितेर्व्यापारत्वावच्छिन्नविशेष्यतासम्बन्धेन'—हेतुत्वकल्पने चातिगौरवादित्यर्थः। सन्मते तु—'फलप्रकारकशाब्दबोधक्लृप्तहेतुताकव्यापारोपस्थितिविषयव्यापारांशे द्वितीयाप्रकृत्यर्थावृत्तित्ववैशिष्ट्यनिवेशेनैव नातिप्रसङ्ग इति भावः।

ननु 'चैत्रो मैत्रश्च परस्परं गच्छत' इत्यादौ धात्वर्थव्यापारस्य द्वितीयाप्रकृत्यर्थवृत्तित्वात्तत्फलानन्वयप्रसङ्गोऽत आह—स्पष्टमिति। तथाच 'द्वितीयाप्रकृत्यर्थावृत्ती'त्यनेन द्वितीयाप्रकृत्यर्थवृत्तिभेदप्रतियोगिताऽवच्छेदकत्वस्याविवक्षणात्, 'परस्परं गच्छत' इत्यादौ क्रियायाः परसमवेतत ... करणशक्ति ... प्रतियोगितावच्छेदकत्वस्याऽबाधान्न ... नुपपत्तिरित्यादि तत्रोक्तमिति। ... भूरंक्तं कर्मविभागमाह—'तच्चेति' विवक्षितक्रियाजन्यफलाऽऽश्रयरूपं कर्मेत्यर्थः।

ॐ काशिका ॐ

पक्षे नेदं दूषणमिति ... पर्। इष्टान्वयेति। परत्वं द्वितीयादिप्रकृत्यर्थप्रतियोगिकमेव बुध्यते, नान्यप्रतियोगिकं, करणे ... तत्वस्य तादृशक्रियायामेवान्वयो न त्वन्यत्रेति द्विविधनियमनिवाहाय। तत्तत्कार्यकारणभावे स... गौरवाधिक्यादित्यर्थः।

सामान्य... ज्ञानव्य...नस्य विशेषरूपेण जिज्ञासाहेतुत्वाद्विशेषरूपेण ज्ञानेच्छायां सत्यां प्रसङ्गसङ्गत्या कर्म वि... शस्ति—एतच्च सप्तविधमिति। निर्वर्त्यमिति। तदीप्सिततमं कर्म निर्वर्त्यं

१ 'तच्चे'ति दर्पणसम्मतः पाठः। परं 'परीक्षा'दौ 'एतच्चे'त्येवं दृश्यते।

'निर्वर्त्त्यञ्च, विकार्य्यञ्च, प्राप्यञ्चेति त्रिधा मतम् ।
तच्चेप्सिततमं कर्म्म, चतुर्द्धाऽन्यत्तु कल्पितम् ॥
औदासीन्येन यत् प्राप्यं, यच्च कर्त्तुरनीप्सितम् ।
संज्ञान्तरैरनाख्यातं यद्, यच्चाप्यन्यपूर्वकम् ॥' वाक्यपदीयात्—
'यदसज्जायते सद्वा जन्मना यत्प्रकाशते ।
तन्निर्वर्त्यं, विकार्यं तु द्वेधा कर्म्म व्यवस्थितम् ॥

ॐ दर्पणः ॐ

यदसज्जायत इति—असत्कार्य्यवादमवलम्ब्य, 'सद्वे'त्यादि तु सांख्य-मतेन । 'प्रकाशते' इत्यनन्तरं—'प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा, तन्निर्वर्त्य'मित्येव वाक्यपदीयपाठः । अन्यथा—सामान्यधर्मेण अलक्षितस्य विकार्य्यस्य विशेष्यरूपेण प्रदर्शनेऽर्थान्तरतापत्तेः, तदर्थस्तु कैश्चित् प्रसिद्धैराचार्य्यैः—प्रकृतिविवक्षायां निष्पाद्य विकार्य्यमित्युच्यते, अन्यथा तदविवक्षायां तन्निष्पाद्यं निर्वर्त्यमिति तदर्थः, तत्र 'घटं करोती'त्यादौ सत्या अपि मृदादिप्रकृतेः परिणामित्वेनाविवक्षा, 'भस्म करोती'त्यादौ त्वसत्या एव तस्यास्तत्त्वेन सा,

यद्यपि 'निर्वर्त्यते = निष्पाद्यते' इति व्युत्पत्त्या निर्वर्त्त्यत्वं—'तण्डुलानोदनं पचती'त्यादावोदनादौ विकार्य्यकर्म्मण्यप्यस्ति, तथापि प्रकृतिवाचकपदासमभिव्याहृतपदोपस्थाप्यत्वे सति निष्पाद्यत्वरूपपारिभाषिकनिर्वर्त्यत्वस्य विवक्षणान्न दोषः, तदुक्तं—'सती वा विद्यमाना वा प्रकृतिः परिणामिनी ।
'यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते ।' इति ।

यस्य विकृतिकर्म्मणो, नाश्रीयते = न प्रयुज्यते, न विवक्ष्यत इति यावत्, अन्[illegible]र्थम् । विकार्य्यं [illegible] । तल्लक्षणं तु—'प्रतीयमानप्रकृतिविकृतिभाव-कत्वे [illegible] क्रियानिर्वाह्यविशिष्टासंस्व[illegible] संयोगा[illegible]फलवत्त्व'म्, 'घटं करोती'त्यादि-निर्वर्त्यं क्रियानिर्वाह्योत्पत्तिमत्यपि प्रकृतिविकृति[illegible] 'ङ्ग्रातिप्रसङ्गः, प्रकृतिकर्मण-

त्रमन्तरेणाप्यक्ता[illegible]न्त्, तन्मत[illegible]

ॐ काशिका ॐ

विकार्यं प्राप्यं चेति त्रिधा मतमिति योजना । अन्यत्तु = ईप्सिततमभि[illegible] चतुर्विधत्वमाह—औदासीन्येनेति—ईप्सितत्वाभावे द्वेष्यत्वाभावे च सति यत् प्राप्यं क्रि[illegible] क्रि[illegible]लाश्रय इत्यर्थः । अनीप्सितम् = द्वेष्यम्, संज्ञान्तरैः = अपादानादिसंज्ञाभिः, अनाख्यातम्[illegible] संयो[illegible]विक्षितम्, तथा चाकथितमितिसूत्रेण कर्मसंज्ञकमिति । अन्यपूर्वकमिति । अन्यसंज्ञापूर्व[illegible] 'क्रूरमभिक्रुध्यती'त्यत्र 'क्रुधद्रुहेर्ष्या—' इति संप्रदानसंज्ञा प्राप्ता । निर्वर्त्यादित्रयस्य लक्षणम्[illegible] यदसदिति ।

१ असत् = अपूर्वं, प्रकाशते = जनकत्वेनाभिमतकारणसत्त्वे व्यज्यते ।

प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत् ।
किञ्चिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ॥

ॐ दर्पणः ॐ

स्तादृशविशिष्टासत्त्वाद्, विकृतिकर्मणश्च तादृशोत्पत्त्याश्रयत्वाल्लक्षणसङ्गतिः; ईदृशस्थले फलद्वयप्रयोजकव्यापारार्थकत्वं धातोरावश्यकम्, उक्तञ्च भाष्ये,—'द्व्यर्थः पचि'रिति, अन्यथैकफलैकव्यापारार्थकत्वस्याकर्मकेष्वपि सत्त्वाद् विशेषोपादानानर्थक्यप्रसङ्गात् ।

परे तु—'द्व्यर्थः पचि'रिति भाष्याद्—विक्लेदनं निर्वर्त्तनं च पचेरर्थः, 'तण्डुलानोदनं पचती'त्यस्य तण्डुलान् विक्लेदयन्नोदनं निर्वर्त्तयती'ति विवरणात्, तथा च प्रकृते 'तण्डुलाश्रयविक्लित्त्यनुकूलव्यापाराश्रयाश्रयक ओदनाश्रयकोत्पत्त्यनुकूलो व्यापार इति बोधः । एवं 'काष्ठं भस्म करोती'त्यादावप्यूह्यमित्याहुः, तदसत्, भावनाप्रकारकबोधे हेतुत्वेन क्लृप्तायाः कृद्धात्वन्यतरजन्योपस्थितेर्विशेष्यतासम्बन्धेनाख्यातार्थेऽभावेन तादृशबोधासम्भवात्, एकयैव क्रियया फलद्वयोत्पत्तिसम्भवेन तद्वाक्यजन्यबोधस्य व्यापारद्वयविषयकत्वकल्पनानौचित्यात्, 'आख्यातशब्दान्निवृत्तभेदाया एव क्रियया अवगमा'दिति रूपप्सूत्रीयकैयटाच्च । किञ्च—पचेर्व्यापारद्वयार्थकत्वे नव्यमते क्रियायां द्वित्वाबाधेन द्विवचनापत्तिर्दुर्वारा, वस्तुतस्तु विक्लेदनं विक्लित्तिर्निर्वर्त्तनमुत्पत्तिरेवोक्तपदयोर्भावल्युडन्तत्वात्, तथा च फलद्वयाऽनुकूल एक एव व्यापारो धात्वर्थतया भाष्यकृत्सम्मतः, व्यापारद्वयार्थकत्वोक्तिस्तु केषाञ्चित् तत्पदयोर्णिजन्तप्रकृतिकल्युडन्तत्वभ्रमनिबन्धनैवेत्यवधेयम् ।

यद्यपि विकार्य्यं द्वेधा—प्रकृतिर्विकृतिश्चेत्येव वक्तुमुचितं, तथापि [illegible] द्वैविध्येऽवगते प्रकृतावपि विकार्यत्वं ज्ञातप्रायं भवतीत्याशयेन तदनुक्त्वै[illegible] कर्म विभजते—प्रकृत्युच्छेदेति [illegible] क्रियानिर्वाह्याऽभाव[illegible]ताऽवच्छेदकधर्मवत्त्वं प्रकृतिक[illegible]ति ध्वनितम् । 'काशान् कटं करोति', [illegible]सुमानि स्रजं करोति', 'सुवर्णं [illegible]डलं करोति', 'मृदं घटं करोति', 'काष्ठं भस्म करोति', 'तण्डुलानोदनं प[illegible]त्यादौ क्रियानिर्वाह्यो यः पूर्वभावविशिष्टकाष्ठकाशादिप्रतियोगिकाभावो [illegible]ष्टाऽसत्त्वरूपस्तत्प्रतियोगितावच्छेदकवैशिष्ट्यवत्त्वं काशकाष्ठादेरिति—त[illegible]ौ लक्षणसङ्गतिः, सर्वत्र विशिष्टाभावप्रतियोगिनि तादृशप्रतियोगितावच्[illegible]शिष्ट्यसत्त्वादतिप्रसङ्गवारणाय—'क्रियानिर्वाह्ये'ति प्रकृतधात्वर्थव्यापारनि[illegible]कम्, क्वचित् काष्ठतण्डुलादिधर्मिनाशादेव विशिष्टाऽभावो भस्मौद-

ॐ काशिका ॐ

प्रकृत्युच्छेदेति । प्रकृतिभूतस्यात्मन उच्छेदं—संभूतं = प्राप्तम्, भू प्राप्तावित्यस्मात्

❀ दर्पणः ❀

नादिसम्पादकः, क्वचिद्धर्मिणः सत्त्वेऽपि कटस्रगादिसन्दर्भविशेषविरहरूपपूर्वभाव-विशिष्टाऽसत्त्वं कटसन्दर्भादिनिष्पादकं क्रियातो निर्वहति। **सम्भूतमिति**। प्रकृति-नाशप्रयोज्योत्पत्तिमदित्यर्थः। इदं च 'भस्मव'दित्यन्वयि, 'काष्ठादी'ति पृथक् पदम्, अन्यथा काष्ठसुवर्णादेस्तुरीयतापत्तेः। **भस्मवदिति**। तत्तौल्येन वर्त्त-मानमन्यदपि विकारजातमित्यर्थः, सादृश्यं च प्रकृतिनाशप्रयोज्योत्पत्तिमत्त्वेनैव, एवमग्रेऽपि, तथाच प्रकृतिविकृतिभावापन्नकाष्ठभस्मादि विकार्य्यमित्यर्थः पर्य्यव-स्यति, एवञ्च 'काष्ठं भस्म करोती'त्यत्र करोतेर्नाशः, उत्पत्तिश्च फलद्वयं, तदनुकूल-व्यापारश्चाऽर्थः, नाशे प्रतियोगितया काष्ठस्योत्पत्तौ भस्मन आधेयतया काष्ठप्रति-योगिकनाशानुकूलो भस्मोत्पादको वर्त्तमानो व्यापार इति बोधः। एवं 'तण्डुला-नोदनं पचती'त्यादावपि।

नैयायिकास्तु—"तण्डुलानोदनं पचती"ति विकार्य्यस्थले प्रकृतिकर्मोत्तर-द्वितीयाया नाशकत्वमर्थः, विकृतिकर्मोत्तरद्वितीयायाश्चोत्पादकत्वम्, तण्डुलाद्य-न्वितं नाशकत्वं च पाकेऽन्वेति। ओदनाऽन्वितोत्पादकत्वस्य नाशकत्वविशिष्टे पाकेऽन्वयः नाशे चोत्पत्तेः प्रयोजकत्वमुद्देश्यविधेयभावमहिम्ना भासते, तेन पाकस्य तण्डुलारम्भकसंयोगनाशकत्वेऽपि 'संयोगमोदनं पचती'ति न प्रयोगः, तण्डुला-रम्भकसंयोगनाशस्यौदनोत्पत्तौ तण्डुलनाशेनाऽन्यथासिद्धतया अप्रयोजकत्वात्।

वस्तुतस्तु विकृतिकर्माऽसमभिव्याहृते 'तण्डुलं पचती'तिवत् 'संयोगं पचती'ति प्रयोगवारणाय—नाशद्वारा नाशकत्वमेव द्वितीयाऽर्थो वाच्य इति प्रकृते—प्रयोज्य-प्रयोजकभावाऽभानेऽपि न क्षतिः, तथाच तण्डुलनाशक ओदनोत्पादको यो व्यापा-[illegible]नुकूलकृतिमानिति बोधः, ईदृशस्थले च कर्माख्यातेन प्रकृतेः कर्मत्वमेवाऽ-[illegible] अत एव 'काष्ठानि भस्मराशिः क्रियन्त' इत्यादौ काष्ठपदसमानवचन-त्वम[illegible] न तु भस्मादावक[illegible]समानवचनत्वम्, भावनाऽन्वयिनि संख्या[illegible] नियमात्। ननु प्रधानाऽप्रधानक[illegible]कर्मपदसमभिव्याहृत—नी—वहादि—दुहादिप्रकृतिककर्माख्यातस्यैव 'प्रधाने [illegible] [illegible]वहा'मित्यनुशासनात् कर्मत्वद्वयाऽनभिधायकत्वाऽनियमेन प्रकृते कर्मत्वद्वयस्यैव तु[illegible] विकृतिगतकर्म-त्वस्यापि लकारेणाभिधाने बाधकाभावः।

आख्यातस्य विकृतिसमानवचनत्वप्रसङ्गस्तु,—'गृह्णाति वा[illegible]ख्यां प्रकृते-र्विकृतेर्न ही'त्यनुशासनसिद्धविकृतिसंख्यान्वयबुद्धिं प्रति प्रकृति[illegible]परत्वेना-ऽगृह्यमाणख्यातजन्योपस्थितेर्हेतुत्वकल्पनया निरसनीयः, कथमन्यथ[illegible]मीभवन्ति काष्ठानी'त्यादिप्रयोगा इति चेन्न, 'घटपटौ दृश्येते' इत्यत्र द्वित्वस्यै[illegible]साधारण-विशेष्यतावच्छेदकाऽपरिचयेन विकारविकारिणोर्द्वयोरेवाख्याताऽर्थविशेष्यत्वे वा[illegible]

❀ दर्पणः ❀

वाक्यभेदापत्तेः, न चेष्टाऽऽपत्तिः, तथा सति 'काष्ठं नाश्यते' 'भस्म क्रियते' इति वाक्यजबोधस्येव, 'काष्ठं भस्म क्रियत' इति वाक्यजबोधस्यापि 'भस्म काष्ठविकृतिरन्यविकृतिर्वे'ति संशयनिवर्त्तकत्वानुपपत्तेः, समूहालम्बनजनकत्वाविशेषेण काष्ठभस्मनोः प्रकृतिविकृतिभावस्योक्तवाक्यादलाभात्, सत्यामेवैकवाक्यतायां कर्त्तृप्रत्यये प्रयोज्यप्रयोजकभावस्य विशिष्टाऽन्वयविवक्षानियमेन लाभ इव कर्मप्रत्ययस्थलेऽपि तथा विवक्षाया नियमवशादेव कर्माऽऽत्मनेपदेन भस्मनि काष्ठोच्छेदप्रयोज्योत्पत्तिकत्वरूपकाष्ठविकृतित्वस्य लाभात्, न च विकृतिवाचकाद् द्वितीयापत्तिः, लकारेण विकृतिकर्मत्वस्यानभिधानेऽपि कर्मत्वान्तरविशेषणतापन्नक्रियायां तस्य विकृत्यर्थसंसर्गत्वाऽभ्युपगमेनैव द्वितीयापत्त्यसम्भवात्, प्रातिपदिकार्थविशेष्यतया कर्मत्वादिविवक्षायामेव द्वितीयाद्यवसरात्, न चैवं 'घटः करोती'त्यापत्तिः, कर्मत्वान्तरविशेषणतानापन्नक्रियायां क्रियान्तरकर्त्तृत्वविशेष्यतापन्नाऽर्थकस्यैव कर्मतासंसर्गेण भानाभ्युपगमात्, अत एव 'काष्ठं भस्मराशिः करोती'ति न प्रयोगः, भस्मराशेः क्रियान्तरकर्त्तृत्वविशेष्यतानापन्नत्वात्, उपपद्यते च 'पश्य मृगो धावती'त्यादिः। प्रकृते च 'नीलो घटो भवती'त्यादावसाधारणधर्मरूपभवने नीलादेराधेयत्वरूपकर्त्तृतासम्बन्धेनान्वयवद् व्युत्पत्तिवैचित्र्येण प्रकृतिकर्मत्वविशेषणतापन्नायां कृधात्वर्थकृतौ भस्मादिरूपविकृतिकर्मणः कर्मतासम्बन्धेनान्वयोपगमेन एकवाक्यत्वोपपत्त्योक्तसंशयनिवर्त्तकत्वोपपत्तेः, तथाचोत्पादकत्वेन भस्मसम्बन्धिकृतिप्रयोज्यनाशप्रतियोगीनि काष्ठानीति— 'काष्ठं भस्मराशिः क्रियत' इति वाक्यजो बोधः, सम्बन्धस्य प्रातिपदिकार्थविशेष्यतया अविवक्षणादेव न तत्र षष्ठ्यपि, एवं 'मृदोनमो घटो ने' ? त्यत्रापि प्र[illegible]कृतिभावस्थले कर्मत्वान्तरविशेषणतानापन्नधात्वर्थान्वय्यर्थबोधने [illegible] साधुत्वमिति नियमोपगमे नोक्त[illegible]प्रसङ्गः, नापि [illegible]मित्यादौ तदनुपपत्तिः, [illegible]त्वावच्छिन्ने द्वित्वावच्छिन्नारोपस्थलेऽ[illegible] द्वौ ज्ञायते' इत्यादौ [illegible]यविशेष्यवाचकसमानवचनत्वमाख्यातस्य, प्र[illegible]ते च कवयः, 'एकोऽपि [illegible] इव भाति कन्दुकोऽय'मिति, न च तत्राऽपि 'भान्ती'त्येव पाठः, कथमन्[illegible]अमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुराःशिरःस्थित'मित्यत्राऽऽरो[illegible]ायशोयुगसमानवचनम'मानी'त्याख्यातं प्रयुक्तं श्रीहर्षेणेति वाच्यं, त[illegible]र्द्धसमर्थितायशोयुगस्य वास्तवत्वेन तस्मिन् फालद्वयबद्धचिकुराणामेव र[illegible]रोप्यत्वेन कवेरुत्प्रेक्षितत्वात्, अत एव, न तत्राऽविमृष्टविधेयांशतादोपावका[illegible] इत्याहुः।

अत्र केचित्—'पुनरावृत्तः सुवर्णपिण्डः पुनरपरयाऽऽकृत्यायुक्तः खदिराङ्गार-

'क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते।'—इति च तत्रैवोक्तम्।

❀ दर्पणः ❀

सवर्णे कुण्डले भवत' इति महाभाष्यप्रयोगादाख्यातस्य विकृतिसमानवचनत्वमेव, 'गृह्णाति वाचकः संख्यां प्रकृतेर्विकृतेर्न ही'ति तु च्विप्रत्ययमात्रविषयकम्, एवञ्च 'काष्ठानि भस्मराशिः क्रियन्त' इत्यादिप्रयोगाणामसाधुत्वमेवेति।

अपरे तु—"खदिराङ्गारसवर्णे इति विशेषणेन तत्र कुण्डलयोः प्रकृतित्वं गम्यते, सिद्धाया विकृतेः पाकानपेक्षणात्, पुनरपरयाऽऽकृत्या युक्त इति विशेषणेन तु सुवर्णपिण्डस्य विकृतित्वम्, आकृत्यन्तरयोगस्य प्रकृतित्वाप्रयोजकत्वात्। युज्यते चैतत्, 'मृत्तिकेत्येव सत्य'मितिवत् संहृतिमुखेन पुनरावृत्त इति विशेषणेनापि सुवर्णपिण्डस्य विकृतित्वं गम्यते, तथाहि—पूर्वोपक्रान्ताऽऽकृतिपरम्परायास्तत्पर्य्यवसायित्वेन सिपाधयिषितसुवर्णनित्यत्वस्य सिद्धेः, तस्मात् पूर्वनिर्दिष्टाऽऽकृतिविशिष्टसुवर्णस्य कुण्डलादिप्रकृतेरप्यनिर्दिष्टाऽपराकृतिविशिष्टस्य तस्य विकृतित्वमेव भाष्यकृत्तात्पर्यविषय इत्यस्यापि वक्तुं शक्यतया न तन्निर्देश आख्यातस्य विकृतिसमानवचनत्वे उपष्टम्भक" इति।

अत्रेदमाभाति—"वैयाकरणमते प्रकृते प्रकृतिविकृत्योर्द्वयोरपि कर्तृत्वेनाख्यातेन विरुद्धसंख्यावतोस्तयोः संख्याया अभिधातुमशक्यतया भगवता,—'कुण्डले भवत' इति विकृतिसंख्यैवोक्ता, न तु 'प्रकृतिगता, नाख्यातप्रतिपाद्ये'ति मुनित्रयस्याऽऽज्ञाऽस्ति, एवञ्च प्रयोगवशेन पर्य्यायेणाऽन्यतरसमानवचनत्वमाख्यातस्य [illegible]"मिति। क्रियाकृतेति। क्रियाप्रयोज्याऽसाधारणधर्मप्रकारकप्रतीति[illegible]नाश्रयत्वे सति फलाश्रयत्वम्। निर्वर्त्यादावतिव्याप्तिवारणाय सत्यन्तम्, अन्[illegible]त्वमन्तरेणा[illegible]न्तु, त[illegible]प्रतीतिविषयतानाश्रयत्वस्याऽसाधारणधर्मघ[illegible] वा तस्य 'घटं जानाती'त्याद। संयोग[illegible]सम्भव इति 'प्रयोज्या'न्तं धर्मवि[illegible]म्, तत्रैव क्रियाप्रयोज्यसाधारणधर्मसंयो[illegible]तीतिविषये ग्रामादिकर्मण्यव्याप्तिनिरासाया'ऽसाधारणे'ति, क्रियाजन्यफलानाश्रये[illegible]तिप्रसक्तिनिरासाय विशेष्यम्, न च 'घटं जानाती'त्यादौ क्रियाजन्यफलाऽभावात् [illegible]न्यलक्षणस्याऽव्याप्तिः, तद्वारणाय तत्राऽऽवरणभङ्गाऽभ्युपगमे तु तस्यैव क्रि[illegible]ज्याऽसाधारणधर्मतया'ऽयं घट एतेन ज्ञात' एतद्व्यवहारविषयत्वा'दित्यनुम[illegible] संयो[illegible]मविषयत्वेन सत्यन्ताभावाद्विशेषलक्षणाऽव्याप्तिरिति वाच्यं, कर्तृभिन्नत्वे [illegible]कर्तृकर्मोभयसाधारणक्रियाजन्यफलाश्रयत्वे उक्तलक्षणवाक्यतात्पर्याद्विषयत[illegible]रूपफला-

१. दर्शनादिक्रियाकृतो विशेषो यत्र दर्शनादिना न प्रतीयते, इत्यर्थः। यथा—'हरिं भजति'।

'घटं करोती'त्याद्यम्, 'काष्ठं भस्म करोती'ति, 'सुवर्णं कुण्डलं करोती'ति च द्वितीयम्। 'घटं पश्यती'ति—तृतीयम्। 'तृणं स्पृशती'-

ॐ दर्पणः ॐ

श्रयत्वाच्च न सामान्यलक्षणाऽव्याप्तिरावरणभङ्गफलमादाय जानात्यादिकर्म्मणि लक्षणसङ्गमनेऽपीच्छत्यादिकर्मण्यव्याप्तिवारणायोक्तरीतेरेवानुसर्तव्यत्वादिति।

निर्देशक्रमेणोदाहरणान्याह—**घटमिति**। **आद्यमिति**। निर्वर्त्यमित्यर्थः।

ॐ काशिका ॐ

कर्तरि क्तः, प्रकृतेः = काष्ठादेः। क्रमेणोदाहरणान्याह—**घटं करोतीति**। **आद्यम्** = निर्वर्त्यम् = घटस्यासत एवोत्पत्तिर्नैयायिकमते। सांख्यादिमते स्वमते च सत एव, तदुक्तं हरिणा—

'उत्पत्तेः प्रागसद्भावो बुद्ध्यवस्थानिबन्धनः।
अविशिष्टः सताऽन्येन कर्ता भवति जन्मनः॥
कारणं कार्यभावेन यदा वा व्यवतिष्ठते।
कार्यशब्दं तदा लब्ध्वा कार्यत्वेनोपजायते॥
यथाऽहेः कुटिलीभावो व्यग्राणां वा समग्रता।
तथैव जन्मरूपत्वं सतामेके प्रचक्षते॥' इति।

प्राप्यलक्षणमाह—**क्रियाकृतेति**। **दर्शनादिति**। प्रत्यक्षात्। निर्वर्त्ये स्वरूपलाभात्मको विशेषः प्रत्यक्षगम्यः, विकार्येऽपि क्वचित् स्वरूपलाभः, क्वचिद्गुणान्तरात्मकः, अनुमानाद्यथा पुत्रः सुखमनुभवति, अत्र हि मुखप्रसादेन सुखानुमानं भवति, स्पष्टं चेदं 'कर्मण्यण' इति सूत्रे कैयटादौ। **द्वितीयम्** = विकार्यम्। अत्र काष्ठसुवर्णयोरेव विकार्यता, भस्मकुण्डलयोस्तु—काष्ठसुवर्णयोः परिणामित्वविवक्षाऽविवक्षयोरपि निर्वर्त्यतैवेति बोध्यम्। केचित्तु— [illegible] र्क च

'सती वा विद्यमाना वा प्रकृतिः परिणामिनी। [illegible] प्राहार [illegible]
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते॥'
'प्रकृतेस्तु विवक्षायां [illegible] [illegible] [illegible]था। [illegible] विवक्षि-
निर्वर्त्यं च [illegible] च कर्म शास्त्रे प्रदर्शितम्॥' [illegible] द्भूततर

—इति वाक्यपदी[illegible] 'घटं करोती'त्यत्र घटस्य प्रकृतिः सत्यपि परिणामित्व[illegible] विवक्षितेति घटस्य निर्वर्त्य[illegible] 'भस्म करोती'त्यत्र भस्म प्रकृतिः—काष्ठरूपा-भस्मदशायामविद्यमाना विवक्षितेति भस्म[illegible]र्त्यतैव, 'एवं मृदं घटं करोती'त्यत्र प्रकृतेः परिणामित्वाविवक्षायाम्। ['एवं विकार्यतैवेति [illegible]]। 'काष्ठं भस्म करोति' 'सुवर्णं कुण्डलं करोती'त्यादौ कृधातोर्विकारानुकूलव्यापार[illegible]त्यनुकूलव्यापारोऽर्थः, 'काष्ठं विकुर्वन् भस्मोत्पादयती'ति प्रतीतेः, अत उभयोरपि क[illegible]र्महः, आद्ये उच्छेदरूपो विकारः, अन्त्ये आकारविशेषात्मकः[1] स घटस्य।

१ अस्मल्लिखितपुस्तके '—विशेषात्मकः' इत्यनन्तरम् एव 'विकार्यतैवेति स्वीचक्रु'रिति पाठः, न पूर्वमिति ध्येयम्।

त्युदासीनम् । 'विषं भुङ्क्ते' इति द्वेष्यम् । 'गां दोग्धी'ति संज्ञान्तरैरनाख्यातम्, 'क्रूरमभिक्रुद्ध्यती'त्यन्यपूर्वकम् ।

❀ दर्पणः ❀

एवमग्रेऽपि । **संज्ञान्तरैरनाख्यातमिति** । अपादानत्वादितत्तद्रूपविशेषैरविवक्षितमित्यर्थः, 'अकथितञ्चे'त्यत्राऽकथितशब्दोऽविवक्षितपरो, न त्वप्रधानपरः, तथा सति 'पाणिना कांस्यपात्र्यां दोग्धी'त्यत्र करणाधिकरणयोः कर्मसंज्ञा प्रसज्येतेति, दुहादीनां परिगणनात् तत्संज्ञयोः करोत्यादियोगे सावकाशत्वादिति भावः । तथा च पूर्वविधिप्रसक्तिपूर्वकं तदविवक्षायां, सर्वथा पूर्वविधेरप्रसक्तौ च तत्प्रवृत्तिरिति बोध्यम्, यद्यपि विभागानुकूलव्यापारानुकूलव्यापारस्याऽपि दुह्यर्थत्वेन 'कर्त्तुरीप्सिततम'मित्यनेनैव कर्मसंज्ञा सिध्यति, कर्त्तृनिष्ठव्यापाराविशेषणफलाश्रयतया गोः प्रधानकर्मतया न तत्र लाद्यनुपपत्तिः, पयोनिष्ठविभागानुकूलगोनिष्ठव्यापारानुकूलव्यापारस्य शब्दतः प्राधान्यादन्यथासिद्धप्रयोजनकमेतत्सूत्रमित्याभाति, तथापि विभागानुकूलव्यापार एव यदि धात्वर्थस्तदाऽपादानत्वाद्यविवक्षायामन्यसूत्राप्राप्तकर्मत्वार्थमिदमावश्यकम् । एतस्मिन्नर्थे 'त्वप्रधाने दुहादीना'मित्यनुशासनाद्द्रवादावेव लादयः । अप्रधानकर्मत्वं चोक्तकर्मभिन्नत्वम्, तच्चोक्ताऽर्थे गवादीनामक्षतम्, धात्वर्थफलानाश्रयत्वात् । तथाचैतत्कल्पे अन्तःस्थित—

द्रवद्रव्यनिष्ठविभागानुकूलव्यापारो दुहेरर्थः, तत्र गोरपादानत्वाऽविवक्षायामनेन कर्मत्वम्, तद्विवक्षायां पञ्चमी, गोः पयस्यन्वये तु षष्ठी, एवञ्च गोकर्मकपयो-[illegible]भागानुकूल एककर्त्तृको व्यापार इति बोधः, विभागावधित्वमेव गोः [illegible] आद्यकल्पे तु पयोनिष्ठविभागाऽनुकूलगोनिष्ठव्यापाराऽनुकूल एककर्त्तृको अन्[illegible]ापार इति, तत्र विभागाश्रयत्वात् पयसः कर्मता, तदनुकूलव्यापारा-[illegible]त्वमन्तरेणा[illegible] तु विभागाश्रय[illegible] [illegible]विभागीयसम्बन्धस्यैव फलताव-[illegible]संयोगो[illegible] च्छेद[illegible]त्रिमन्यत्राप्यूह्यम् ।

अ[illegible]पूर्वकमिति । अन्यसंज्ञाबाधनपूर्वं शास्त्रबो[illegible]मित्यर्थः । 'क्रूरमभिक्रुध्यती'त्यत्र,—'क्रुधद्रुहेर्ष्ये'तिप्रसक्तसम्प्रदानसंज्ञायाः, [illegible]धद्रुहोरुपसृष्टयोः कर्मे'ति बाधनात् । एवं 'वैकुण्ठमधिशेत' इत्यादावपि बोध्यम्, [illegible] ग्रामं गमयति 'शिष्यं शास्त्रं बोधयति' 'ब्राह्मणमन्नं भोजयति, 'यजमानं म[illegible]यति,' 'घटं जनयति' 'नाशयती'त्यादौ 'गतिबुद्धी'ति सूत्रेण गम्यादिधात्व[illegible] कर्मसंज्ञाविधानात् गम्यादिप्रकृतिकणिजन्तधातुसमभिव्याहृतद्वितीयाया [illegible]श्रयोऽर्थः ।

यद्यपि णिजन्तधात्वर्थप्रेरणजन्यव्यापाररूपफलाश्रयत्वादजादीनामपि कर्मत्वं 'कर्त्तुरीप्सिततम'मित्यनेनैव सिद्धं, तथापि णिजन्तेन आप्यमानस्य चेद्भवेति

❀ दर्पणः ❀

गत्याद्यर्थव्यापाराश्रयस्यैवेति नियमार्थं सूत्रम्. तेन 'पाचयत्योदनं देवदत्तेने' त्यादौ न। तदुक्तम्—

गुणक्रियायां स्वातन्त्र्यात् प्रेषणे कर्मतां गतः।
नियमात् कर्मसंज्ञायाः स्वधर्मेणाभिधीयते—इति।

वाचकतासम्बन्धेन स्वनिष्ठया तृतीययेत्यर्थः। यद्यपि कर्तृसंज्ञायाः परत्वा-'द्धेतुमति चे'त्यनुशासनात् स्वकारकविशिष्टक्रियायाः णिजर्थसम्बन्धाऽवगतेरन्तरङ्गत्वाच्च कर्मसंज्ञायास्तया बाध एवोचितस्तथाप्यन्यानधीनत्वलक्षणाऽर्थप्राधान्य-शाब्दप्राधान्ययोः प्रयोजकव्यापारे सत्त्वेन प्रधानकार्य्यस्य च सर्वतो बलवत्त्वस्या-ऽऽकडारसूत्रे कैयटेनोक्तत्वाद्धेतुमति चेति सूत्रस्थभाष्यप्रामाण्याच्च तदनुरोधिकर्म-त्वस्याऽन्तरङ्गादपि कर्तृत्वाद् बलवत्त्वाऽनियमत्वमेव साम्प्रतम्।

परे तु—"हेतुमति चेत्यनुशासनादन्यनिष्ठकर्तृत्वनिर्वाहकव्यापाररूपा स्वतन्त्र-प्रेरणा णिजर्थः, कर्तृत्वं च क्वचित् प्रयत्नः, क्वचिदाश्रयत्वादिः, यादृशधातूत्तराख्या-तेन यादृशं कर्तृत्वमभिधीयते तादृशधातूत्तरणिच्प्रत्ययेन तादृशकर्तृत्वनिर्वाहको व्यापारोऽभिधीयते, निर्वाहकत्वं च स्वरूपसम्बन्धविशेषो, नाऽतो 'नाशयती'त्या-दावन्वयाऽनुपपत्तिः, एवञ्च पाकादिकर्तुस्तत्कर्मत्वविरहेऽपि ण्यन्तधातुप्रतिपाद्यताऽ-वच्छेदककर्तृत्वस्य फलत्वेन तदाश्रयत्वात् पाकादिकर्तुः कर्मत्वं, तादृशकर्तृत्वविशेष-णतया सहायादिरूपस्वतन्त्रकर्तृवृत्तित्वविवक्षायां 'पाचयत्योदनं सहाय'मित्यपि प्रयोगः साधुरेव, अत एव 'अजिग्रहत्तं जनको धनुस्त'दिति भट्टिप्रयोगः स्वरसतः सङ्गच्छते, ग्रहेर्ज्ञानलाक्षणिकतया तदुपपादनं त्वगतिकगतिः, यदा तु णिच्प्रकृ[illegible] च व्यापारे स्वतन्त्रकर्तृवृत्तित्वस्य विशेषणतया विवक्षा तदा 'सहाये[illegible]-'गतिबुद्धी'ति सूत्रं,—गत्याद्यर्थकधातुयोगे तादृशकर्तृत्वविशेषणतया स्व[illegible] वृत्तित्वविवक्षा नियता नाऽन्यत्रेत्यर्थ[illegible] तत्र कर्तृ प्रत्ययाऽसा[illegible]विवक्षि-तेन 'पाचयत्योदनं सहायेने'[illegible]जया ग्रामं गमयती'ति न, एवञ्च '[illegible] गमयती'त्यत्र ग्रामनि[illegible]गाऽनुकूलव्यापारस्य यदजानिष्ठं कर्तृत्वं नि[illegible]-सम्बन्धेन तद्विशि[illegible] व्यापारस्तदनुकूलकृतिमानिति बोधः, 'पाचय[illegible] सहायेने'त्यत्र [illegible]कर्तृको यो विक्लित्यनुकूलो व्यापारो, निर्वाहकत्वसम्बन्धेन तत्कर्तृत्वसम्[illegible]तत्कर्तृत्वविशिष्टव्यापारानुकूलकृतिमानिति बोधः।

'चैत्रेण[illegible]गम्यतेऽजे'त्यत्र कर्माख्याते तु तादृशव्यापारनिर्वाह्यकर्तृकव्या-पारनिर्वाह्य[illegible]निरूपकं यद् ग्रामवृत्तिसंयोगानुकूलं गमनं तत्कर्म्यजेति बोधः, 'सहायेन प[illegible]ते तण्डुलश्चैत्रेणे'त्यत्र तु चैत्रकर्तृकप्रेरणानिर्वाह्यकर्तृत्वनिरूपको-ऽर्थः सहायरूपस्वतन्त्रकर्तृवृत्तिव्यापारस्तज्जन्यविक्लित्त्याश्रयस्तण्डुल इति बोधः,

कर्तृतृतीयाया आश्रयोऽर्थः, तथाहि—'स्वतन्त्रः कर्त्ता'। —स्वातन्त्र्यञ्च'—धात्वर्थव्यापाराश्रयत्वम्,

❀ दर्पणः ❀

अर्थविवेकः स्वयमूह्यः। ये त्वनुकूलव्यापार एव णिजर्थस्तदन्वयिनी गमनादिक्रियैव धात्वर्थतावच्छेदकं फलं, तच्छालितयाऽजादीनां प्राप्तमेव कर्मत्वं गतिबुद्धीति सूत्रेण नियम्यत इति वदन्ति, तेषां मते 'पाचयत्योदनं सहायेने'त्यादौ द्वितीया-तृतीययोर्नियामकाऽलाभोऽधिकमन्यत्राऽनुसन्धेयमि'त्याहुः।

'वैकुण्ठमधितिष्ठती'त्यादावपि द्वितीयाया आधार एवाऽर्थः, अध्याद्युपसृष्टशीङा-दियोगे'ऽधिशी'ङित्यादिसूत्रैराधारस्य कर्मसंज्ञाविधानात्, यदपि कृदर्थव्यापारान्त-र्भावेणाऽध्याद्युपसृष्टशीङादीनां लक्षणामुपगम्य 'कर्त्तुरीप्सिततम'मित्यनेनैव कर्म-संज्ञा सुसाधा, तथापि मुख्याऽर्थकतद्योगेऽपि कर्मप्रत्ययसाधुत्वबोधनार्थमधि-शीङ्स्थासामित्यादिसूत्राणामप्यावश्यकतेति। कर्मप्रवचनीययोगविहितविभक्ते-स्तु यथायथं—लक्ष्यलक्षणभावादिः सम्बन्धो द्योत्य इति वक्ष्यते। उपपदविभक्तीनां तु षष्ठ्यपवादकत्वात् सम्बन्ध एवाऽर्थः। 'कालाऽध्वनोरत्यन्तसंयोगे' इति विहित-द्वितीयाया व्यापकत्वमर्थः, 'मासमधीत' इत्यादौ मासव्यापकाऽध्ययनमिति बोधात्, द्वितीयादीनामाश्रयोऽर्थ इत्यत्र विभक्तिपदस्य कारकविभक्तिपरत्वेन तद-विरोधादित्यन्यत्र विस्तरः।

क्रमप्राप्तं तृतीयार्थं निरूपयति—**कर्तृतृतीयाया इति**। करणतृतीयाया [illegible]पाराऽर्थकत्वस्यापि वक्ष्यमाणत्वादुक्तं—'कर्त्रि'ति। **आश्रय इति**। आश्रय-[illegible]यर्थः। आश्रयार्थकत्वे मानमुपन्यस्यति—**तथाही**त्यादिना। ननु स्वा-[illegible]रव्यापारानधीनव्यापारवत्त्वम्, तच्च 'काष्ठं पचती'त्यादौ काष्ठादावप्रसक्तं, [illegible]त्वमन्तरेणा[illegible]—**स्वातन्त्र्यञ्चेति**। व्यापाराश्रय-[illegible], धात्वर्थाश्रयत्वस्य कर्मण्यतिप्र[illegible]र्थ, तद्व्यावृत्तये क्रमेणोभयम्।

❀ काशिका ❀

स्व[illegible]येतरानधीन-त्वरूपस्याश्रयणे 'देवदत्तेन पाचयति मित्रद[illegible]गादौ प्रयोजकाधीनतया कर्[illegible]नापत्तिरित्याशङ्कापनोदार्थं विवक्षितार्थमाह—स्वातन्त्र्यं चेति [illegible]त्तेति[1]। प्रकृत-धातूपात्तेत्यर्थः, यत्किञ्चिद्धातूपात्तस्याव्यावर्तकत्वात्। व्यापारश्च प्रधानीभू[illegible]:, तेन नयतेः, संयोगानुकूलव्यापारानुकूलव्यापारार्थकत्वे 'देवदत्तो ग्राममजां नयतो'त्य[illegible]स्येन कर्तृत्वम्। न च कर्मसंज्ञया बाधान्न तदापत्तिरिति वाच्यं, 'कर्तुरीप्सिततमम्—पूर्व[illegible] कर्मसंज्ञाया-'श्चैत्रस्तण्डुलं पचती'त्यादौ तण्डुलादौ लब्धावकाशतया ऽपवादत्वाभावात्, [illegible]णः[illegible]भावाच्च, प्रत्युत

१ 'धातूपात्ते'ति काशिकासम्मतः पाठः।

—'धातुनोक्तक्रिये नित्यं कारके कर्त्तृतेष्यते' इति वाक्यपदीयात्। अत एव 'यदा यदीयो व्यापारो धातुनाऽभिधीयते तदा स कर्तेति-

ॐ दर्पणः ॐ

अन्ये तु—कर्तृप्रत्ययसमभिव्याहारे व्यापारतावच्छेदकसम्बन्धेन धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयतद्धात्वर्थाश्रयत्वं स्वातन्त्र्यम्, तदेव च कर्तृत्वम्। कालिकसम्बन्धेन व्यापाराश्रयेऽतिप्रसङ्गवारणाय—'व्यापारतावच्छेदकसम्बन्धेने'ति। 'ग्रामं गच्छती'त्यादावुत्तरसंयोगात्मके फले तादृशधात्वर्थत्वाभावान्न तदाश्रयेऽतिप्रसङ्गः। 'पक्वस्तण्डुलो देवदत्तेने'त्यादौ फलस्य विशेष्यत्वेन देवदत्तेऽव्याप्तिपरिहाराय—'कर्तृप्रत्ययसमभिव्याहार' इति। सामग्रीसाध्यायां क्रियायां सर्वेषां स्वस्वव्यापारे स्वातन्त्र्येऽप्युक्तस्वातन्त्र्यस्य युगपत्सर्वेष्वभावान्न सूत्राऽनर्थक्यमिति। तत्तु कर्मप्रत्ययसमभिव्याहृतकर्तृव्यावृत्तत्वाद्धात्वर्थव्यापाराश्रयत्वस्यैव सम्यक्त्वे गुरुविशेषणस्याऽनतिप्रयोजनकत्वाच्चोपेक्ष्यम्, कर्मकर्त्तरि तु नव्यमते फले व्यापारत्वाऽऽरोपान्नाऽव्याप्तिः, व्यापारत्वेन कृतेरपि सङ्ग्रहान्न तदनाश्रयेऽचेतने स्वरसतः कर्तृव्यवहारः, तदतिरिक्तव्यापारस्य धातुना विवक्षायां तु क्वचित् कर्तृत्वव्यवहारोऽपि। वक्ष्यति च—'यदा यदीयो व्यापार' इत्यादि। एवमेव, 'मत्तो भूतं न तु मया कृत'मित्याद्युपपाद्यमिति भावः। तत्र हरिवाक्यं प्रमाणयति—**धातुनेति**। 'उक्तक्रिय' इति विशेषणादस्मदुक्तमेव स्वातन्त्र्यं हरिसम्मतमिति सूचयति।

अत एवेति। उक्तस्वातन्त्र्यस्य कर्त्तृत्वादेवेत्यर्थः। **सङ्गच्छते इति**। कृत्याश्रयत्वादेस्तत्त्वे तु तदसङ्गतिरिति भावः। उक्तविवक्षायाः प्रयोगनियामकत्वं [illegible]मिकं च

ॐ काशिका ॐ

परत्वात् कर्तृसंज्ञैव बाधिका स्यात्, कर्तृत्वविवक्षायां च न 'अकथितम्—' इत्यस्य प्रा[illegible]

'दुहियाचिरुधिप्रच्छभिक्षिचि[illegible] [illegible]नूर्वावधी।

ब्रुविशासिगुणेन च [illegible] तदकीर्तितमाचरितं कविना॥'

—इति परिगणनवार्तिके नय[illegible]ठाच्च, प्राधान्यं च कर्तृप्रत्ययसमभिव्याहृततत्तद्धातु[illegible] तत्तद्धात्वर्थनिष्ठविशेष्यता[illegible]तप्रकारतानाश्रयत्वम्, 'पक्वस्तण्डुलो देवदत्तेने'त्यत्र [illegible] फलं प्रति विशेषण[illegible]तस्य कर्तृत्वानापत्तिरिति 'कर्तृप्रत्ययसमभिव्याहारे' इति। [illegible] पदस्य निरुक्तार्थ[illegible]नमाह—**धातुनोक्तेति**। 'धातुनोक्तक्रिये कारके कर्तृता नित्यमिष्यते' इति योजना। [illegible]शस्वातन्त्र्याश्रयणे 'स्थाल्यां पचती'त्यादावपि स्थाल्यादेः कर्तृत्वापत्तिः, पच्धातूपात्तधा[illegible]कव्यापाराश्रयत्वादित्यत आह—**अत एव यदेति**। अत एव उक्तस्थले स्थाल्याद[illegible]सञ्ज्ञादेव। नच निरवकाशाभिरधिकरणादिसंज्ञाभिः कर्तृसंज्ञाया बाध इति वाच्यम्, कर्तृसंज्ञाविषयेऽप्यधिकरणसंज्ञा प्राप्ता तस्या अपि निरवकाशतया पर्यायतापत्तिरित्या-

'स्थाली पचति' 'अग्निः पचति,' 'एधांसि पचन्ति', 'तण्डुलः पच्यते स्वयमेवे'त्यादि सङ्गच्छते। नन्वेवं 'कर्मकर्त्तृव्यपदेशाच्चे'ति सूत्रे, 'मनोमयः प्राणशरीर' इति वाक्यस्थमनोमयस्य जीवत्वे–वाक्यशेषे तस्य—'एतमितः प्रेत्याभिसम्भवितास्मी'ति प्राप्तिकर्म्मत्वकर्त्तृत्वव्यपदेशो विरुद्ध इति भगवता व्यासेन निर्णीतं कथं सङ्गच्छताम् ?, उच्यते—

—जीवस्यैव ज्ञेयत्वे प्राप्तिकर्म्मत्वमपि वाच्यं, कर्तृत्वञ्च तस्य आख्या-

❀ दर्पणः ❀

पृच्छति—नन्वेवमिति। एवं = विवक्षाया एव प्रयोगनियामकत्वे। मनोमयस्य = मनोमयशब्दप्रतिपाद्यस्येत्यर्थः, जीवत्वे = संकल्पकर्त्तृरूपत्वे, ब्रह्मभिन्नत्वे[1] इति यावत्, 'एतमित' इत्यादेरितः = शरीरात्, प्रेत्य = निःसृत्य, एतच्छरीरं परित्यज्येति यावत्, एतं = स्वप्रकाशत्वादिगुणविशिष्टं पूर्वोक्तमात्मानम्, अभिसम्भवितास्मि = प्राप्तास्मीत्यर्थः। **कथं सङ्गच्छतामिति।** भवन्मते वैवक्षिकयोः कर्त्तृत्वकर्मत्वयोरेकस्मिन्नपि सम्भवादिति भावः। संज्ञानिबन्धनविरोधं समर्थयन् कर्त्तृत्वकर्मत्वयोर्वास्तवाविरोधं दर्शयति—**उच्यते** इत्यदिना। **जीवस्यैव ज्ञेयत्वे इति।** 'स क्रतुं कुर्वीते'त्यनेन जीवस्यैवोपास्यत्वबोधने इत्यर्थः। **प्राप्तिकर्मत्वमिति।** अन्योपासनाया अपरप्राप्त्यफलकत्वादिति भावः। **आख्या-**

❀ काशिका ❀

...ख्यात्। यदा यो धातूपात्तव्यापाराश्रयः स तदा कर्तेति स्वीकारे एकस्य कर्तृत्वकर्मत्वयोः ...राऽथकत्वरू... 'कर्तृकर्मव्यपदेशा'दित्यधिकरणविरोधमाशङ्क्य परिहरति—नन्वेवमिति। एवम् = एकस्य ...यर्थः। आश्र... र्त्वोभयाङ्गीकारे। तस्येति। तस्य = मनोमयत्वादिगुणयुक्तस्य, एतमितइत्यादिश्रुतौ ...रव्यापारानध... ...देशो विरुद्ध ... एतमिति। प्रकृतं मनोमयत्वादिगुणकमुपास्यमान- ...र्मान्तरेणाप्... —स्वात... ...त्वेन प्राप्तिकर्मत्वेन व्यपद... ...सभवितास्मीति। शारीरमुपासकं ..., धात्वर्थाश्रय ...यावृङ्क्य... प्राप्तिकर्तृतः, 'अभिसंभवितास्मी'त्यस्य 'प्राप्ति... ...र्थात्। 'न च सत्यां गतावेकस्य ...धीन-त्वरू... पदेशो युक्त' इति शङ्करभाष्यम्, अत्राभिसंभवित... ...जका... 'कर्तृत्वेने'त्यत्र व्यपदि- ...राशङ्का... ...यानुषङ्गेणान्वयः, सत्यां गतावित्यादिनात्मानमा'त्मना ... ।प्रकृ... ...'त्यादिवदौपाधिकभेद- कल्पनागतिकरूपा न युक्तेति सूचितम्, 'संभवितास्मी'ति समुपसृष्टात् नयतेः ...र्थकाद्भवतेरात्मने- पदिनो व्यत्ययेन लुटः स्थाने परस्मैपदम्, एकस्य समयभेदेन संज्ञाद्व... र्तृत्वम्। ...'पि न युगपत्, प्रकृतश्रुतौ तु युगपदेव संज्ञाद्वयप्रयुक्तकार्यद्वयोपलम्भो विरुद्ध इत्याशये... ...संज्ञाया- ...यते—उच्यत इत्यादिना। ज्ञेयत्वे = 'मनोमय' इत्यादिना ज्ञेयत्वेन बोधितत्वे। क... ...त्युत वाच्यमिति।

[1] सङ्कल्पकर्त्तृत्वेन ब्रह्मभिन्नत्वे।

तेनोक्तम्, न चैकस्यैकदा संज्ञाद्वयं युक्तम्, कर्तृसंज्ञया कर्म्मसंज्ञाया बाधात्[1], तथा'चैत'मिति द्वितीया न स्यात्, कर्म्मकर्तृतायाञ्च यगाद्यापत्तिरिति शब्दविरोधद्वारा भवति स भेदहेतुः ।

❀ दर्पणः ❀

तेनेति । 'अभिसम्भविताऽस्मी'त्येतद्घटकेनेत्यर्थः । **बाधादिति ।** संज्ञयोराकडारीयतया समावेशाऽसम्भवेन परया कर्तृसंज्ञया बाधादित्यर्थः । **यगाद्यापत्तिरिति**—अभ्युच्चयवादः, प्राप्ये कर्मणि कर्मवद्भावाऽप्रसक्तेः । **शब्दविरोधद्वारा** = एकदा संज्ञाद्वयप्रयुक्तकार्य्याऽनुत्पत्तिद्वारा, सः = संज्ञाद्वयविरोधस्तत्र कर्तृकर्मत्वव्यवहारभेदहेतुरित्यर्थः, न तु कर्तृत्वकर्मत्वयोः पारमार्थिकं भेदमादायेति भावः ।

❀ काशिका ❀

'एत'मित्यनेन कर्मत्वं वाच्यमेतच्छब्दस्योपक्रान्तपरामर्शकत्वादिति भावः । **बाधादिति ।** परत्वादिति भावः । कर्मणः कर्तृत्वे दूषणान्तरमप्याह—**कर्मकर्तृतायामिति ।** 'संभवितास्मी'ति न शुद्धे कर्तरि लकारः, अपि तु कर्मकर्तरीति भावः । तथा च—एतमितः प्रेत्येति पूर्ववाक्ये कर्मतया निर्दिष्टस्य कर्तृत्वमिति न युगपत्संज्ञाद्वयमिति यगाद्यापत्तिरिति । **यगाद्यापत्तिरिति ।** 'आदि'पदग्राह्यात्मनेपदापत्तिरिति भावः । व्यत्ययं विनैव निर्वाहे तदभ्युपगमो न युक्त इत्याशयः । **भेदहेतुरिति ।** जीवपरमात्मनोर्भेदहेतुरित्यर्थः । तथा च 'मनोमय' इत्यादिपदेन परमात्मैव निर्दिष्ट इति सिद्धमिति नोक्ताधिकरणविरोध इति तात्पर्यार्थः । **एवं च** = धातूपात्तव्यापाराश्रयत्वस्य कर्तृत्वे च । अत एव 'घटो भवती'त्यत्र घटीयव्यापारस्य धातूपात्तत्वाद् घटस्य कर्तृत्वमुपपद्यत इति **भामत्यां** वाचस्पतिमिश्रैरभिहितं, 'धातूपात्तव्यापाराश्रयः कर्तेति कर्[illegible] लक्षणयोगाद् घट एव कर्तेति **कल्पतरुकारै**रुक्तं च संगच्छते । अत एव बाधलक्षणे [illegible]मकं च 'क्रत्वर्थं तु क्रियते गुणभूतत्वात्' इति क्रत्वर्थाभ्युच्चयाधिकरणे न चैतन्यापेक्षं कर्तृत्वं [illegible]याहार[illegible] नामपि ज्वलनादौ कर्तृत्वाद्, यस्यैवान्यापेक्षयाख्यातोपात्तव्यापाराश्रयः स कर्ता [illegible] क्रान्वारम्भणादिकर्मास्थिभिः कर्तव्यमिति [illegible] । 'शुक्रं यजमानोऽन्वारभे[illegible]भूततया प्र[illegible] यजमानो गुणभूतस्तत्कर्म [illegible] मध्ये कश्चिन्मृतस्तदस्थिभिः सहेतरैर्जीव[illegible]णैव प्रती[illegible] कर्तव्यमुक्तस्वातन्त्र्यरूपकर्तृ[illegible] तत्रापि संभवादिति तत्रत्यसिद्धान्ताशयः । पू[illegible]यतात्वन्य दशमाध्याये प्रथमच[illegible]पष्टमिदम् । **कारकचक्रेति ।** समभिव्याहृतधात्वर्थव्यापार[illegible]त्म्य[illegible]त्यर्थः, तच्च 'देवद[illegible]ष्ठै स्तण्डुलं स्थाल्यां पचती'त्यादौ देवदत्तस्यैवेति तस्मिन्नेव [illegible] ।

उक्तापेक्ष[illegible]त्वे स[illegible]मभिप्रेत्याह—**कृतीति ।** प्रकृतधात्वर्थव्यापारानुकूलकृत्याश्रयत्वं तद्धात्वर्थकर्तृत्वमित्यर्थः [illegible]ज्ञानव्या[illegible]व्यापारानुकूलकृतिमादाय नातिप्रसङ्गः, आश्रयत्वं समवायेन ग्राह्यम्, तेन पाकानुकूलकृते[illegible]लिकसंबन्धेनाश्रयत्वस्य [illegible]दे सत्त्वेऽपि न 'घटः पचति' 'घटेन पच्यत'

१ आकडारीयतयापरया कर्तृसञ्ज्ञया बाधात् ।

एवञ्च व्यापारांशस्य धातुलभ्यत्वादाश्रयमात्रं तृतीयार्थः, कारकचक्रप्रयोक्तृत्वं,—कृत्याश्रयत्वं वा,—'दण्डः करोती'त्यत्राव्याप्तम् ।

ॐ दर्पणः ॐ

ननु विशिष्टाश्रयस्य तावता तृतीयाऽर्थत्वमायातमत आह—**एवञ्चेति ।** धातूपात्तव्यापाराश्रयस्य कर्तृत्वे चेत्यर्थः । **आश्रयमात्रमिति ।** अनन्यलभ्यत्वादिति

ॐ काशिका ॐ

इत्यादेरापत्तिः । अव्याप्तमिति । कारकचक्रप्रयोजकत्वरूपप्रयोक्तृत्वस्य, कृतिमत्त्वस्य चाचेतने दण्डादौ बाधादित्यर्थः । अत्र 'कृतिमत्त्वं कर्तृत्व'मिति मते आश्रयांशस्य देवदत्तादिशब्दलभ्यतया कृतिमात्रं विभक्त्यर्थ इति स्वीकारे कृतेर्धातुत एव लाभान्न तत्र विभक्तिशक्तिसंभव इति दूपणं संभवदपि नोट्टङ्कितम्, फलानुकूलकृतेर्धातुतो लाभेऽपि व्यापारानुकूलाया अलाभात् तत्र विभक्तिशक्तिसंभवात्, 'तदनुकूलकृतिर्न भासत' इत्यस्य शपथनिर्णेयत्वात् । अथवा कृतेर्धातुलभ्यतया आश्रयत्वमेव वा तृतीयाद्यर्थ इति स्वीकारे उक्तदूषणासंभवेनेदमेव दूषणमभिहितम् । परे तु कारकचक्रप्रयोक्तृत्वमेव स्वातन्त्र्यं भाष्यसंमतं, तच्च देवदत्तादावनारोपितं, घटादावारोपितं, प्रयोजकत्वस्यारोपादेव'भिक्षा वासयती'त्यादिप्रयोगनिर्वाहः, तदुक्तं 'कारके' इति सूत्रभाष्ये— 'प्रधानेन समवाये स्थाली परतन्त्रा, किं पुनः प्रधानम् ? कर्ता, कथं ज्ञायते कर्ता प्रधानमिति ?, यत् सर्वेपु साधनेपु संनिहितेपु कर्ता प्रवर्तयिता भवति' इति । एवं स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वमपि स्वातन्त्र्यम्, तच्च प्रयोजकसांनिध्येऽपि स्वार्थसत्त्वासत्त्वयोः प्रवृत्तिनिवृत्तिभ्यां प्रयोज्यस्य संभवति, एतच्च 'स्वतन्त्रः कर्ता' इति सूत्रे भाष्ये स्पष्टम् । इदमपि घटादावारोपितं, देवदत्ता...नारोपितम्, प्रधानधात्वर्थव्यापाराश्रयत्वमेव न तत्, तत्र स्वतन्त्रपदस्यापरिभाषणाल्लोके... कर्तृत्वेरेव तत्पदप्रवृत्तेश्च, अत एव प्रयोज्यस्यास्वातन्त्र्यात् कर्तृत्वानुपपत्तिशङ्कायां स्वेच्छा...त्वोर्शनिवृत्तिकत्वरूपं साधितम्, एतादृशस्वातन्त्र्याश्रयनिष्ठो व्यापारो धातुनोच्यते, तद... एतत्ति न तद्विरोधः, अत एव—

'प्रागन्यतः शक्तिलाभान्य......सम्भवदपि ।
तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्तनात् ॥
अदृष्टत्वात् प्रतिनिधेः प्रविवेके च दर्शनात् ।
आरादप्युपकारित्वात् स्वातन्त्र्यं कर्तुरुच्यते ॥'

—इति वाक्यपदीये उक्तम् । तदर्थस्तु करणादितः प्रागेवान्...र्थक्यादेरेव निमित्तात् कर्ता प्रवर्तते, करणादिकं तदधीनप्रवृत्तिनिवृत्तिकम्, किं च करण... पि प्रतिनिधिर्दृश्यते व्रीह्यभावेऽपि यागकरणात्, कर्तुः स नास्ति, तद्भेदे क्रियान्तरमेव... सिद्धेः, अपि च कारकान्तरानुपादानेऽप्यसौ दृश्यत इत्येतद्ग्रन्थस्यात्रैव तात्पर्यमिति प्राहुः । वस्तुतस्त्विदं बोध्यम्— सर्वेषां कारकाणां स्वस्वावान्तरक्रियाद्वारा प्रधानक्रियानिर्वर्तकत्वमत एव तेषां भावनाया-

❀ दर्पणः ❀

भावः । मतान्तरं दूषयति—कृत्याश्रयत्वमित्यादिना । अव्याप्तमिति । अचेतने तस्मिंस्तद्बाधादिति भावः ॥

अत्र वदन्ति—"दण्डादिनिष्ठव्यापारस्य धात्वर्थत्वविवक्षया भवदुक्तस्वातन्त्र्यवत् 'वास्तवकारकचक्रप्रयोक्तृत्व'स्य दण्डादावभावेऽपि, तदारोपात्कर्तृत्वव्यवहारस्तस्मिन् सूपपादः, अत एव हरिणा—

'प्रागन्यतः शक्तिलाभान्न्यग्भावाऽऽपादनादपि ।
तदधीनप्रवृत्तत्वात् प्रवृत्तानां निवर्त्तनात् ॥
अदृष्टत्वात्प्रतिनिधेर्व्यतिरेके च दर्शनात् ।
आरादप्युपकारित्वे स्वातन्त्र्यं कर्त्तुरिष्यते' ॥इत्यनेन,—

—करणादिव्यापारात् पूर्वं करणादिसम्पादकशक्तिमत्त्वेन, करणादीनामात्माधीनत्वसम्पादनेन च, तदायत्तव्यापारत्वेनाऽतिप्रवृत्तानां निवर्त्तनेन, कर्त्तुः फलप्राप्तौ स्वत एव निवृत्त्या प्रतिनिध्यभावेन, कारकान्तराभावेऽप्यस्त्यादौ कर्त्तुर्दर्शनेन च दूरादप्युपकारित्वे स्वातन्त्र्यमित्यर्थकेन,—कारकचक्रप्रयोक्तृत्वमेव स्वातन्त्र्यमभिहितम् । 'वस्तुत एषां धर्माणामभावेऽपि शब्देन यस्यैते प्रतिपाद्यन्ते स कर्त्ते'ति तदाशयः, 'पाचयति चैत्रेण मैत्र' इत्यादौ प्रयोज्यस्य प्रयोजकव्यापाराधीनत्वेऽपि णिच्प्रकृत्यर्थसाधनान्तरविषये उक्तस्वातन्त्र्यस्य सत्त्वात् कर्तृत्वोपपत्तिः, धातुवाच्यक्रियाकृतस्वातन्त्र्यस्यैव विवक्षणात् कर्तृपरतन्त्रकरणादेर्न स्वव्यापारमादाय कर्तृत्वं, प्रयोज्यस्य स्वार्थसिद्ध्यर्थमपि प्रवृत्त्या करणादीनां कर्त्रधीनत्ववत् प्रयोज्यस्य प्रयोजकाऽनधीनत्वाच्च, न हि फलोद्देशाऽधीना करणादीनां व्याप... ...थामकं च प्रयोज्यस्य तु तादृशप्रवृत्तौ–'सर्वे इमे स्वभूत्यर्थं प्रवर्त्तन्त' इति 'हेतुम... ...याहार... सूत्रस्थं भाष्यमनुभवश्च सार्वजनीनः प्रामाण"मित्याहुः ।

❀ कु... ❀

...मूर्ततया प्र...

मेवान्वयः क्रियाजनकमिति ज्ञाने ...काङ्क्षानियमेन तत्रैवान्वयौचित्यात्, ...मेणैव प्रती... शब्दकर्तृशब्दयोरैकार्थ्यात् ...क्षि... करणमिति व्यवहारः कर्ता कारकमितिवद् ...यतात्वन्यव- कारकमिति च पौनरु... स्यादिति वाच्यम्,— ...प्रदात्यस्य ...

'...निष्पत्तिमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके ।
...करणे व्यापारभेदापेक्षायां करणादित्वसंभवः ॥'—

—... ...त्येनैव समाधानात्, सर्वेषां स्वातन्त्र्येणैव स्वस्वव्यापारद्वारा प्रधानक्रियानिष्पादकत्व... ...वात् कारकत्वम्, तेन 'करणं कारक'मिति व्यवहार उपपन्नः, विशेषे कारकत्वरूप... ...धर्मस्य सत्त्वात्, एवमीदृशे स्थले कर्मादीनामिवापादानस्य कर्तृत्वेऽपि

१ 'ग्राम आगच्छती'ति प्रयोगो नानभिधानात्, कारणत्वाद्यवस्थायां कर्तृसंज्ञाया असत्त्वान्न करणं

❀ दर्पणः ❀

'कृत्याश्रयत्वं दण्डादावव्याप्त'मित्युक्त्या नैयायिकोक्तकर्तृत्वस्योपेक्षणीयत्वमावेदितम्, तेषां त्वयमाशयः—कर्तृत्वं मुख्यं पूर्वोक्तमेव, आश्रयप्रतियोगित्वादिरूपं तु गौणम्, उभयमपि कर्तृतृतीयया प्रतिपाद्यते, तथाहि—'चैत्रेण पच्यत' इत्यादौ कृतिमदभेदेन तज्जन्यत्वं वा क्रियाविशेषणतया तृतीययाऽभिधीयते, अचेतनकाष्ठादेरपि कर्तृत्वविवक्षायां तु 'काष्ठं पचती'तिवत् 'काष्ठेन पच्यते तण्डुल' इत्यपि प्रयोगाद् व्यापाररूपे कर्तृत्वे, तज्जन्यत्वरूपे सकर्तृकत्वे वा तस्य लक्षणा, एवं 'चैत्रेण ज्ञायते' इत्यादावाश्रयत्वरूपे कर्तृत्वे, आधेयत्वरूपे कर्तृमत्त्वे वा, 'नश्यते घटेने'त्यादौ प्रतियोगित्वात्मककर्तृत्वेऽनुयोगित्वरूपकर्तृमत्त्वे वा लक्षणा, 'चैत्रः पचती'त्यादावुक्तस्थले कर्तृत्वमेव मुख्यं, गौणं वा क्रियाविशेष्यतयाऽऽख्यातेन बोध्यते, अचेतने स्वरसतः कर्तृव्यवहाराभावेन तत्र कर्तृपदमपि भाक्तमेव, नच यत्नवत एव मुख्यकर्तृत्वे तदादायैव 'कर्तृकरणयो'रित्यादेश्चारितार्थ्ये गौणकर्तृत्वे तृतीयाद्यनुपपत्तिरिति वाच्यं, तत्सूत्रस्थकर्तृपदस्य पारिभाषिककर्तृपरत्वात्, तत्सूत्रप्रणयनस्यैव तत्परत्वे मानत्वात्, सूत्रे स्वातन्त्र्यं च—'समभिव्याहृतकारकान्तराऽनधीनत्वे सति कारकत्व'म्। पुरुषव्यापाराऽधीनक्रियाऽनुकूलव्यापारवतामेव काष्ठादीनामन्यानधीनत्वविवक्षया, 'काष्ठं पचती'त्यादौ कर्तृत्वम्, अनधीनत्वान्तविशेषणं च,—'चैत्रः काष्ठैः स्थाल्यां पचती'त्यत्र 'चैत्रः, काष्ठानि, स्थाली—पचन्ती'ति प्रयोगवारणाय। 'चैत्रः पचति', 'स्थाली पचती'त्यादौ यत्र कारकान्तराप्रसिद्धिस्तत्रानधीनान्तविशेषणं न प्रतीयत एव। [illegible]स्थात् [illegible]हश्च स्वतन्त्रशक्तिकल्पनात्, विशिष्टशक्तेर्विशेषणाविषयकविशेष्यबोधा-[illegible]यर्थः। आश्र[illegible]कर्तृत्वे, विशिष्टशक्त्याऽनिर्वाहात्, 'चैत्रेण पाचयती'त्यादौ हेतुकर्तृसमभि[illegible]व्यापारानधी[illegible]त्वे [illegible]योज्यस्य हेतुकर्त्रधीनत्वेऽपि ण्यन्तप्रतिपाद्यपाचनादिक्रियायामेव प्रयोज[illegible]देशो [illegible]। एत[illegible]काऽनधीनतया अवैकल्येन न तद्वा[illegible], धात्वर्थाश्रयत्वे तृतीयानुपपत्तिः, स्वतन्त्रकर्तृ[illegible]पारस्य तण्डुलक्रयणादिवत् प्रा[illegible]गसिद्धत्वादकारणत्वेन तस्य पाकादिप्रयो[illegible]र्थात् [illegible]पारवत्त्वेऽपि तत्क्रिया-[illegible]स्वरूप[illegible]त्वाच्च। अत एव,—'चैत्रेण मैत्रः पाचयती'त्यत्र [illegible] पचती'ति न।

❀ काशिका ❀

[illegible]त्याद्व्यवहारापत्तिः, कारकपदानुवृत्त्यैव स्वातन्त्र्ये लब्धे पुनः स्वतन्त्र[illegible]य स्वातन्त्र्यमेव विवक्षितं न तु पारतन्त्र्ययुक्तस्वातन्त्र्यं तस्यैवेत्यर्थलाभार्थमतो न [illegible]। [illegible]स्थायां सा, कारकसंज्ञा तु वस्तुसत्स्वातन्त्र्यस्य स्थितिमात्रेण करणादीनां विधानसाम[illegible]वर्तते, यद्वा ज्वलनादिरूपस्वस्वव्यापारे स्वातन्त्र्यात् तेषां व्यापाराणां धातुवाच्यत्वे 'एधाः [illegible]न्ती'त्यादिप्रयोगदर्शनात् तात्कालिकं कर्तृत्वमादाय कारकत्वम्, स्वस्वव्यापारद्वारा प्रधानक्रियानिष्पाद-

❀ दर्पणः ❀

नन्वस्तूपदर्शितरीत्या चैत्रादेः स्वतन्त्रकर्तृतानिर्वाहस्तथापि तद्वाचकपदोत्तरं तृतीयाऽनुपपत्तिः, कर्तृत्वनिर्वाहकव्यापारस्य णिजर्थत्वेन स्वतन्त्रनिष्ठस्य तस्य णिचाऽभिधानादिति चेन्न, कर्तृत्वनिर्वाहकत्वसम्बन्धेन पाकाद्यन्वितहेतुकर्तृव्यापारस्य णिजर्थतापक्षेऽदोषात्, 'कर्तृत्वरूपफलाऽवच्छिन्नव्यापारस्य णिजर्थता'-मतेऽपि—तदुपरक्ताश्रयस्याऽन्यतो भानाऽनिर्वाहेणाऽनभिधानस्याऽक्षतत्वात्, अबोधनस्यैव तत्राऽनभिधानपदार्थत्वादभिधानस्य तिङ्कृत्तद्धितसमासैरिति परिगणनाच्च। आख्यातस्य धर्म्यवाचकत्वेऽपि कृत्यादिविशिष्टकर्तृबोधकत्वरूपाऽभिधानस्य तत्र सत्त्वान्न 'चैत्रः पचती'त्यादौ तृतीयाऽऽपत्तिः। मुख्यविशेष्यतया तद्विवक्षायां "चैत्रेण पचती'त्यादिप्रयोगापत्तिरित्यपि न, आश्रयातिरिक्ते विशेषणतया कृतिबोधनस्यैवाऽनभिधानपदार्थत्वात्, तथाऽभिधानं च,—लकृत्तद्धितसमासैरेवेति त एवाभिधायकतया वृत्तिकृतोपात्ताः, यद्यपि स्वतन्त्रव्यापार एव तृतीयादेरनुशासनं, तथापि कृतिरूपकर्तृत्व एव लाघवाच्छक्तिर्व्यापारादौ तु लक्षणेत्युक्तम्, अनुशासनस्याऽनादितात्पर्य्यमात्रग्राहकत्वाल्लाघवसहकृतस्यैव तस्य शक्तिकल्पकत्वात्, व्यापारे तत्सत्त्वेऽपि गौरवेण तदसिद्धेः, एवञ्च कृतिरूपकर्तृत्वबोधस्थले कारकान्तरव्यापारानधीनत्वं न प्रतीयत एवेति न तदन्तर्भावेण शक्तिः, प्रमाणाऽभावात्, व्यापारलाक्षणिककर्तृप्रत्ययेन लक्षणया तदन्तर्भावेण व्यापारबोधनादेव पूर्वोक्तातिप्रसङ्गस्य वारणात्, अन्यथा तदन्तर्भावेण कृतौ शक्तावपि पूर्वोक्तातिप्रसङ्गस्य दुष्परिहरत्वात्, 'घटो जायते' 'ओदनः सिध्यती'त्यादौ घटादेः कारकत्वेऽन... कर्तृत्वं च सत्कार्यवादमवलम्ब्यैवोपपादनीयम्, मुख्यं क्रियाकर्तृत्वं ...यामकं च तदनुकूलकृतिमात्रम्, एकक्रियाविषयककृतेर्यत्र नान्तरीयकक्रियानिर्वाहस्तत्र ...याहार... याकर्तृत्वाऽव्यपदेशात्, किन्तु तत्क्रियाविषयकत्वे सति तदनुकूलकृतिकर्तृ... गुरुतरभारोत्तोलनादौ तु यत्र क्रिया... ...स्तत्र गतिरुक्तव, ...भूततया प्र... नाराचक्षेपाद् यत्र ब्राह्मणवधस्... ...र्णोऽनुकूलनाराचक्षेपरूपव्यापारस्य ...मेणैव प्रती...

❀ काशिका ❀

...त्वयतात्वन्यव-कत्वेन च करणवादि, ...नापादानयोरपि स्वव्यापारे स्वातन्त्र्यमादायैव कारकत्वं ... प्रदात्यस्य ... ददाति ग्राम आगच्छत... ...योगाभावेऽपि संपद्यते, तदुक्तं भाष्ये—'पर्याप्तं करणाधिकरण... कर्तृत्वं निदर्शितमप... ...त्वनिदर्शनाय' इति,—'वृक्षोऽवधिभावमुपगच्छति विप्रोऽनुमन्यत'-इत्यादौ स्वस्वव्या... ...तयोरपि कर्तृत्वं दृश्यते, तद्व्यापारस्य पतिदाधातुवाच्यता नानभिधानादिति ध्येयः ...ारकत्वं चोपलक्षणं सदेव तत्तत्संज्ञोपयोगि, स्पष्टं चेदं भाष्ये। अथवा धातूपात्तव्यापारत्वरू... ...तन्त्र्यं न करणत्वाद्यवस्थायामिति नातिप्रसङ्गः, कारकत्वं पूर्ववद्बद्ध्वत्येवेत्यलं विस्तरेण।

अयञ्च त्रिविधः—शुद्धः, प्रयोजको हेतुः, कर्म्मकर्त्ता च।
'मया हरिः सेव्यते', 'कार्य्यते हरिणा', 'गमयति कृष्णं गोकुलम्'[1]।
'मद्भिन्नाश्रयको हरिकर्म्मकसेवनाऽनुकूलो व्यापारः' 'हर्य्यभिन्नाश्रयक उत्पादनानुकूलो व्यापारः' 'गोकुलकर्मकगमनाऽनुकूलकृष्णाश्रयकतादृशव्यापाराऽनुकूलो व्यापार'इति शब्दबोधाः[2]।

ॐ दर्पणः ॐ

षयत्वेऽपि हिंसालक्षणस्योद्देश्यताघटिततया तस्य विप्रमरणानुकूलव्यापारत्वेनानभिसंहितत्वात्तेन रूपेण कृतिविषयत्वस्य तादृशव्यापारे असत्त्वेन न ब्राह्मणत्वविशिष्टवधकर्तृत्वं तादृशव्यापारकर्त्तुरिति न सम्पूर्णं प्रायश्चित्तं तस्येति।

कर्तृविभागमाह—**अयञ्चेति**। अनुपदं तृतीयार्थत्वेन निरुक्तः कर्त्तेत्यर्थः। **शुद्ध इति**। हेतुत्वकर्मकर्तृत्वानधिकरणमित्यर्थः, प्रेरणार्थकणिच्प्रकृतिधातूपात्तव्यापाराश्रय इति यावत्। **हेतुरिति**। णिजर्थप्रेरणाश्रय इत्यर्थः। **कर्मकर्त्तेति**। धातूपात्तव्यापाराऽऽश्रयत्वे सति णिजर्थव्यापारेणाऽऽप्यमानत्वेन विवक्षित इत्यर्थः।

क्रमेणोदाहरणान्याह—**मया हरिः सेव्यत** इत्यादिना। अत्र व्यापारविशेष्यकबोधोत्कीर्त्तनं तु कैयटाद्यनुसारेण, तत्त्वं तु प्रागेवाऽवोचाम। **आश्रयव्यापाराविति**। ननु व्यापारस्य धातुनैव लाभात् तत्र शक्तिकल्पनमपार्थमित्याशङ्क्यैकस्य कर्तृनिष्ठव्यापारस्य धातोर्लाभेऽप्यनुभूयमानकरणनिष्ठव्यापारस्य पदार्थत्वमन्तरेण [illegible]विषयताऽनुपपत्त्या शक्तिरावश्यकी, आख्यातान्निवृत्तभेदाया एव क्रियाया

ॐ काशिका ॐ

[illegible]रं विभजति—अयं चेति। त्रिविधः = धर्मत्रयवान्। क्रमेणोदाहरणान्याह—मयेति।[illegible] कर्मत्वा[illegible]कर्तृत्ववानयम्, प्रयोजकत्वकर्मत्वे तत्तद्धात्वर्थनिरूपिते[illegible]ऽप्रसिद्धिः, अथवा कर्मत्वप्र[illegible]समानकालिकविवक्षाविषयकर्तृत्वं शुद्ध[illegible]र्यत इति। करोतेर्णिजन्तात् कर्मणि लट्, [illegible]त्र हरिः प्रयोजककर्ता। गमयति[illegible]। अत्र कृष्णस्याऽणौ कर्तुर्ण्यन्ते 'गतिबुद्धि—' इति [illegible]ण कर्मसंज्ञाविधानात् कृष्णः [illegible], तथा च कर्म चासौ कर्तेति कर्मधारयः, कर्मसंज्ञया क[illegible]त्या बाधात् तदभावेऽपि [illegible]तधातूपात्तव्यापाराश्रयत्वरूपकर्तृत्वस्य न क्षतिः। सेवनानुकूल[illegible]र इति। सेवा = पादसंवाहनादिकं, प्रीतिर्वा, नव्यमते तु मद्भिन्नाश्रयकव्यापारजन्या हरि[illegible] इत्यादिः शाब्दबोधोऽवसेयः। एवं 'कार्यते हरिणे'त्यत्रापि तादृशव्यापारजन्योत्पादनेति [illegible]संधेयः।

नन्वाश्रयव्यापारयोः करणतृतीयावाच्यत्वे प्रमाणाभावः, साधकतमस्यैव [illegible]संज्ञाविधानादित्यत

१ 'इतोमान्युदाहरणानी'ति शेषः। २. 'पूर्वोक्तोदाहरणत्रये बोध्या' इति शेषः।

करणतृतीयायास्त्वाश्रयव्यापारौ वाच्यौ, तथाहि—साधकतमं करणम्', 'तमबर्थः—प्रकर्षः, स चाव्यवधानेन फलजनकव्यापारवत्ता,—
—तादृशव्यापारवत्कारणञ्च करणम्। उक्तञ्च वाक्यपदीये—

❀ दर्पणः ❀

अवगमाद्, व्यापारद्वयस्य धात्वर्थत्वासम्भवाच्चेत्यभिप्रेत्य स्वोक्तार्थस्य सप्रमाणतां दर्शयितुं करणसंज्ञाप्रतिपादकं सूत्रमुपन्यस्यति—तथाहीत्यादिना। 'साधकतम'-मिति सूत्रस्य कारकाधिकारीयत्वात् सूत्रोपात्तसाधकशब्दादेव प्रकर्षलाभेऽपि गौणाधाराऽधिकरणसंज्ञाफलकस्य,—'कारकप्रकरणे शब्दसामर्थ्यगम्यः प्रकर्षो नाश्रीयत' इत्यर्थस्य बोधनाय तमब्ग्रुपादानमिति सूचयन्नाह—तमबर्थः प्रकर्ष इति। प्रकर्षश्च कारकान्तरापेक्षो, न तु करणान्तरापेक्षः, कारकसामान्यवाचिसाधकशब्दादुत्पन्नेन तमपा तदवधिकप्रकर्षस्यैव द्योतनात्, तेना'श्वेन दीपिकया व्रजती'ति प्रयोगोपपत्तिः, अन्यथा करणान्तराऽपेक्षिकप्रकर्षस्य करणान्तरे अभावेन तदनुपपत्तेः। तादृशेति। फलोत्पत्त्यव्यवहितपूर्ववर्त्तीत्यर्थः।

परे तु—'फलायोगव्यवच्छिन्नकारणत्वं करणत्वम्, 'स्वव्याप्येतरयावत्कारणसमवधाने सति यदव्यवहितोत्तरक्षणे फलनिष्पत्तिस्तत्त्व'मिति यावत्, स एव तृतीयार्थः, सत्यन्तनिवेशाच्चक्षुपोऽन्धकारे फलाऽयोगेऽपि न तत्राऽप्रसङ्गः, प्रयोजकेऽतिप्रसङ्गनिरासाया'ऽव्यवहिते'ति वदन्ति।

तत्र हरिसम्मतिमप्याह—उक्तञ्चेति। 'अत्र क्रियापदं फलपरम्, [illegible]नाऽभावेन, हत' इत्यत्र बाणव्यापाराव्यवहितोत्तरक्षणे प्राणवियोगरूपफलाऽवश्यम्भ[illegible]यामकं च समन्वयः। 'विवक्ष्यते'—इत्यनेन विवक्षैव विभक्तौ प्रयोजिका, न वास्त[illegible]याहार[illegible] दिसत्त्वेत्युक्तम्। अत एव दात्रानादरेणुक्तत्वात् [illegible]

❀ काशिका ❀

आह—तथा हीति। अव्यवक्षितंननेति। अव्यवधानेन फलजनको यो व्या[illegible]ति 'अव्यवधानेने'ति तृती[illegible]न [illegible]शिष्टत्वमर्थः, तथा च तद्विशिष्टकाल इत्यर्थः, तस्य [illegible]त्वतात्वव्यव-क्रियायाः = फलाव्य पत्त्यर्थफलस्य साध्यतया प्रतीयमानत्वात् क्रियात्वेन व्यवह[illegible]दात्म्यस्य [illegible] कर्मणा तुल्यकरणे इत्यत्र यथा, तथा चाश्रयव्यापारयोः शक्यत्वे 'साधकतम[illegible] प्रमाणमिति[illegible]त्वे सत्य एवं च मूले 'आश्रय' इति व्यापारस्याप्युपलक्षणमिति तात्पर्यम्, 'बाणेन हतो वाली' [illegible]ज्ञानव्याणिस्य प्रकृत्यर्थस्याभेदेन तृतीयार्थाश्रयेऽन्वयः, तस्य च व्यापारेऽपरतृतीयार्थे आधेयतया, शक्ति च जन्यत्वसंबन्धेन धात्वर्थव्यापारे फले वा प्राणवियोगात्मनि। अन्ये तु—

१. अत्र = 'क्रियायाः परिनिष्पत्तौ'ति हरिकारिकायाम्। २. तत्त्वं = करणत्वम्।

"क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम् ॥
वस्तुतस्तदनिर्देश्यं, न हि वस्तु व्यवस्थितम् ।
'स्थाल्या पच्यत' इत्येषा विवक्षा दृश्यते यतः ॥" इति

'विवक्ष्यत'इत्यनेन सकृदनेकेषां तदभावाद् द्वितीयासप्तम्यादेरवकाशं

॥ दर्पणः ॥

प्रयोगः । **वस्तुत इति** । 'यत इदमेव वस्तु करण'मिति न नियमोऽत एव निश्चिताऽधिकरणत्वाऽपि स्थाली तनुतरकपालत्वाद्वैवक्षिककरणत्ववतीत्यर्थः ।

अवकाशमिति । 'तण्डुलं स्थाल्यां पचती'त्यादौ करणत्वाऽविवक्षायां न तत्संज्ञाप्रयुक्तद्वितीयादेरवकाशमित्यर्थः । तथाच,--'काष्ठैः पचती'त्यादौ शक्त्यर्थ-काष्ठादेरभेदेनाश्रयरूपतृतीयाऽर्थेऽन्वयः, तस्य च व्युत्पत्तिवैचित्र्येण समानप्रत्ययो-पात्तत्वप्रत्यासत्त्या व्यापाररूपतदर्थान्तरे आधेयतासम्बन्धेन फलोपहितत्तादृश-व्यापारस्य चानुकूलतासम्बधेन विक्लित्यनुकूलव्यापारे, एवञ्च 'काष्ठाऽभिन्नाश्रयको यः फलोपहितव्यापारस्तद्विशिष्टो विक्लित्यनुकूल एकाश्रयको वर्त्तमानो व्यापार इति बोधः, वैशिष्ट्यं च जन्यजनकभावसम्बन्धेन बोध्यम् । अत्र च "यत्सन्नि-हितेषु सर्वेषु कारकेषु कर्त्ता प्रवर्त्तयिता भवती"ति सकलकारकव्यापारस्य कर्त्रधीनत्वप्रतिपादकं 'कारक' इतिसूत्रस्थं भाष्यं प्रमाणम् ।

अपरे तु—"क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तर'मिति वाक्यस्थाऽन-न्यकर्तृस्थात् [illegible]हारस्यात् तृतीयार्थव्यापारस्य जन्यतासम्बन्धेन फलेऽन्वयः, तथा च [illegible]यर्थः । आश्र[illegible]कर्तृ[illegible]न्धेन काष्ठाश्रयकव्यापारविशिष्टफलानुकूलो व्यापार इति बोध"माहुः । [illegible]रव्यापारानधी[illegible]त्वेऽप्यर्थकरणत्वस्य व्यापार एवाऽन्वयः, शब्दशक्तिस्वभात्, न फलांशे, अत [illegible] सामादिपदस्य [illegible] सिद्धान्तितम्, अन्यथा व्यापारं [illegible], धात्वर्थाश्रयल[illegible]लान्विते फलांशे करणत्वेनाऽन्वया[illegible] लक्षणाया अप्रसङ्ग एव, [illegible]प्रोमेन यजेते'त्यत्र मत्वर्थलक्षणेति मीमांसक[illegible]त्यन्ये । वस्तुतस्त्वा-[illegible]स्वरूप[illegible]

॥ काशिका ॥

[illegible] शक्तिराश्रयस्यैव तृतीयार्थस्य स्ववृत्तिव्यापारजन्यत्वादिसंबन्धेना[illegible]त्याहुः । परे तु [illegible]शक्तिमानर्थः, अन्वयः पूर्ववदित्याहुः । 'विवक्ष्यत' इत्यस्य [illegible] [illegible]नं कारिकया स्पष्टयति—वस्तुत इति । तत् = करणत्वं, वस्तुतो = वस्तुविशेषनिष्ठत्वेनानिर्देश्[illegible] । [illegible]ष्टुमशक्यम्, तत्र हेतुमाह—न हीति । हि = यस्माद्धेतोस्तन्न वस्तुव्यवस्थितं गोत्वादिव[illegible] [illegible]तुविशेषमात्र-निष्ठम् । वस्तुविशेषमात्रानिष्ठत्वे हेतुमाह—स्थाल्येति । अधिकरणत्वनिश्चयविषयीभूतापि

१. सकृद् = एकदैव, अनेकेषां = तण्डुलस्थाल्यादीनां, तदभावात् = करणत्वविवक्षाऽभावात् ।

सूचयति। न चैवं 'कर्त्ता शास्त्रार्थवत्त्वा'दित्युत्तरमीमांसाधिकरणे 'शक्तिविपर्य्यया'दिति सूत्रेणाऽन्तःकरणस्य कर्तृत्वे करणशक्तिविपर्य्ययापत्तिरुक्ता न युज्येतेति वाच्यं, 'तदेतेषां प्राणानां विज्ञानेन विज्ञानमादाये'ति

❀ दर्पणः ❀

श्रयोऽवधिरुद्देश्य' इतिमूलस्वारस्यात् करणतृतीयाया अप्याश्रयमात्रमर्थः, प्रकृत्यर्थान्वितस्य स्वनिष्ठव्यापारजन्यत्वसम्बन्धेन धात्वर्थव्यापारेऽन्वय इत्येव न्यायः।

नैयायिकास्त्वसाधारणं कारणं करणम्, कारणे असाधारण्यं च—व्यापारवत्त्वमेव, न तु फलाऽयोगव्यवच्छिन्नत्वम्, तस्य यावत्कारणघटिततया गौरवेण तद्धर्माऽवच्छिन्ने शक्त्यसिद्धेः, स एव च प्रकर्षस्साधकतममिति तमपा बोध्यते, व्यापारश्च तज्जन्यत्वे सति तज्जन्यजनकरूपः, एवञ्च जनकत्वस्याऽव्यवधानघटितत्वेन तल्लाभस्य नान्तरीयकत्वान्न तत्र पृथक् शक्तिरिति व्यापारमात्रं करणतृतीयार्थः, तस्मिन् प्रकृत्यर्थस्याधेयतासम्बन्धेनाऽन्वयः, शेषं पूर्ववदित्याहुः। **एवमिति।** एकस्मिन्नपि धर्मिणि कर्त्तृत्वकरणत्वयोरङ्गीकारे कर्त्तृकरणशक्त्योरविरोध इति यावत्। **शक्तिविपर्ययादिति।** 'एष हि द्रष्टा श्रोताऽनुमन्ता बोद्धा विज्ञानाऽऽत्मा पुरुष' इत्यादीनां, तथा कर्त्तुः कर्त्तव्यविशेषप्रतिपादकानां 'यजेत' 'जुहुया'दित्यादीनां च सार्थक्याय जीवस्य 'कर्त्ता शास्त्रार्थवत्वा'दित्यनेन कर्तृत्वे बोधिते बुद्धिपदव्यवहार्य्यं विज्ञानमेवाऽस्तु कर्त्रित्याशङ्कायां—विज्ञानशब्दवाच्यबुद्धेः कर्त्तृत्वाऽभ्युपगमे लोके समर्थस्याऽपि कर्त्तुः सर्व[illegible] नाऽभा[illegible] करणान्तरसापेक्षस्यैव कार्य्यकारित्वदर्शनेन विज्ञानपदव्यपदेश्यत्वबुद्धेः [illegible] यामकं च[illegible] क्तिहान्यापत्तिरतस्तदतिरिक्तजीवस्यैव कर्तृत्वमुचितमित्यर्थप्रतिपादकेन, ति[illegible] याहार[illegible] पय्यया'दिति सूत्रेणेत्यर्थः। **न युज्येतेति।** कर्तृकरणशक्त्यो[illegible]

❀ काशिका ❀

[illegible] मूर्ततया प्रती[illegible] मेणैव प्रती[illegible] स्थाली तनुतरकपालतया वैवक्षिकं करणत्वं भजति, उक्तरीत्या सर्वेषां करणत्व[illegible] सर्वेषां करणत्वविवक्षेति न सर्वत्र तृतीयापत्तिरिति ध्येयम्। सर्वेषां विवक्षया करण[illegible]तात्वव्यवधिकरणविरोधमुद्भाव्य परिहरति—न चैवमित्यादिना। **मीमांसाधिकरण इति।** द्वि[illegible] प्र[illegible]दात्म्यस्य [illegible]पेत[illegible] तृतीयपादस्थाधिकरणे 'जीवः कर्ता शास्त्रार्थवत्त्वात्', एवं हि यजेत जुहुयादित्यादिशास्त्र[illegible] र्थः भवति, कर्तृत्वे सत्येव यागादिकमुपदेष्टुं शक्यते नान्यथेति सूत्रार्थः। 'शक्तिविपर्ययात्' इतीति। विज्ञानव्यतिरिक्तो जीवः कर्ता भवितुमर्हति, यदि पुनर्विज्ञानशब्दवाच्या बुद्धिरेव कर्त्री स्यात् ततः शक्तिविपर्ययः स्यात्, करणशक्तिर्बुद्धेर्हीयेत कर्तृशक्तिश्चापद्येत, सत्यां च बुद्धेः कर्तृशक्तौ तस्या एवाहंप्रत्ययविषयत्वं स्यादित्यादि—शंकरभाष्ये प्रतिपादितम्।

अन्तःकरणस्येति। अन्तःकरणं = बुद्धिपरिणामः, परिणामपरिणामिनोरभेदान्न भाष्यविरोधः।

श्रुत्यन्तरे करणतया क्लृप्तस्य कर्तृतां प्रकल्प्य शक्तिविपर्य्ययापत्तिर्निष्प्रमाणा कल्प्येतेत्यभिप्रायात्। वस्तुतस्तु अन्वाचयमात्रमेतदिति,—'यथा च तक्षोभयथा' इत्यधिकरणे भाष्य एव स्पष्टमित्यादि प्रपञ्चितं भूषणे।

❀ दर्पणः ❀

भवद्भिरभिधानादिति भावः। **तदेतेषामिति**। प्राणानाम् = इन्द्रियाणां, विज्ञानं ग्रहणशक्तिं, विज्ञानेन = विज्ञानशब्दवाच्येन मनसा, तज्जन्यबुद्ध्यात्मकवृत्त्येति यावत्, आदाय = गृहीत्वा हृदयं स्वापे गच्छतीति श्रुत्यर्थः। **करणतयेति**। 'विज्ञानेने'त्यत्र करणतया क्लृप्तस्येत्यर्थः। 'निष्प्रमाणे'त्यादेः कर्त्तरि करणशक्तिस्वीकारेऽपि द्वयोः शक्त्योरेकदा विवक्षायामसम्भवेन 'विज्ञानं यज्ञं तनुते' इत्यादौ कर्तृत्वविवक्षायां करणशक्तिविवक्षाप्रयुक्त'विज्ञानेने'ति तृतीयान्तनिर्देशापादनासम्भवेन तद्विपर्ययप्रसङ्गाभावादित्याशयादित्यर्थः। नन्विदमयुक्तम्, आपादनप्रतिपादकग्रन्थस्यैवापत्तावप्रामाण्यप्रतिपादकत्वाऽसम्भवात्, आपत्तेः प्राक्तनसूत्राद् प्रक्रान्तत्वाच्चेत्यत आह—**वस्तुतस्त्विति**। **अन्वाचयमात्रमेतदिति**। एतत् = शक्तिहान्यापत्तिरूपं दूषणम्, मात्रपदेन तात्पर्यविषयत्वस्य व्यवच्छेदः। अन्वाचयत्वं च तात्पर्य्यज्ञानविषयाऽर्थसन्निहितत्वम्, उपेक्षाविषयत्वं वा, तच्च बुद्धेः करणशक्तिविपर्ययेऽस्ति, दृष्टान्तप्रतिपादकसूत्राद् बुद्धेः कर्तृत्वनिरासस्यैव मुख्यत्वावगतेरिति भावः। भूषणे तु,—'तदेतेषा'मित्याद्य'भिप्राया'दित्यन्तः पाठो नास्त्येव।
…त्वस्य …स्यात्। …कर्त्रेत्यादि—न युज्येतेति चेत् सत्यम्, अन्वाचयमात्रमेतद्" इति पाठः।
…र्थः। आश्रय 'कर्तृ …ाचयेति। विज्ञानशब्दार्थस्य जीवत्वे शक्तिविपर्य्ययापत्तिः सम्भाव्यते,
…रव्यापारानधीन …त्व …रस्तत्रेत्यर्थः, उपाधिवशेन परमात्मन्येव तत्सम्भवादिति भावः। तदेव
… …यथा चेति। सूत्रे 'च' शब्दस्त्वर्थे, पराऽभिमतबुद्धिकर्तृत्वनिरासाऽर्थः,
…, धात्वर्थाश्रयत्व… प्रा… मनोऽन्यो जीवो नाम कर्त्ता भोक्ता वा सम्भवति, नित्यशुद्ध-बुद्ध-मुक्ता-

❀ काशिका ❀

…स्वरूप… …येति। तथा च करणत्वं सर्वेषां न वैवक्षिकमित्यभिप्रायकं न सूत्रभाष्यादिकम्, अपि
…पने… …श… करणत्वस्य क्लृप्तस्य हानिरक्लृप्तकर्तृशक्तिश्चापद्येतेत्येतदभिप्रायकमिति भावः। एकत्र
…शक्ति… स्पष्टयति …णतया क्लृप्तत्वेऽप्यन्यत्र कर्तृत्वविवक्षायां न किंचिद्‌ बाधकं युगपदुभयविवक्षाया एव विरुद्धत्वादित्याशङ्क्याह—वस्तुतस्त्विति। भाष्य एवेति। शास्त्रार्थवत्त्वादिहेतुभिः साधितं जीवस्य कर्तृत्वं न स्वाभाविकमपि त्वौपाधिकम्, तस्य स्वाभाविकत्वे मुक्तिर्न स्यात्, कर्तृत्वस्य दुःखस्वरूपत्वात्, तस्य स्वभावत्वे हि अग्नेरिवौष्ण्यादात्मनः कर्तृत्वाद्वियोगासंभवात्। तदेतदाचार्यः—'यथा च तक्षोभयथा' इति। च शब्दस्त्वर्थः, यथा—तक्षा वास्यादिकरणहस्तो दुःखीभवति तद्रहितस्तु सुखी संपद्यते, अनेन दृष्टान्तेन कर्तृत्वमौपाधिकमेवेति स्पष्टमिति

सप्तम्या अप्याश्रयोऽर्थः । 'सप्तम्यधिकरणे चे'त्यधिकरणे सप्तमी, तच्च 'आधारोऽधिकरण'मिति सूत्रादाधारः, तत्त्वञ्चाश्रयत्वम्, तत्राश्रयांशः शक्यः, तत्त्वमवच्छेदकम्, नचाश्रयत्वमात्रेण कर्म्मकर्तृकरणानामाधारसंज्ञा स्यात्, स्यादेव, यदि ताभिरस्या न बाधः स्यात्, 'कारके'

❀ दर्पणः ❀

त्मनः कर्तृत्वाऽऽद्यसम्भवादनिर्मोक्षप्रसङ्गाच्च, किन्तु 'ध्यायतीव लेलायती'वेति श्रुतेरध्यस्तं तत्तत्र वाच्यम्, अविद्योपस्थापितं तत् परस्यापि सम्भवति, 'यत्र हि द्वैतमिव भवति, तदितर इतरं पश्यतो'ति, श्रुतेः। विद्याऽवस्थायां तु—तदभावो–'यत्र तु सर्वमात्मैव स्यात्तत् किं केन पश्ये'दिति श्रुतेः, यथा तक्षा वास्यादिकरणहस्तः कर्त्ता दुःखी भवति, स एव गृहस्थो विमुक्तवास्यादिर्निर्व्यापारः सुखी भवतीति तदर्थः। तथाच 'शक्तिविपर्यया'दित्यस्य पराभ्युपगतबुद्धिकर्तृत्वनिरासे तात्पर्यं, न तु बुद्धेः कर्तृत्वेन करणशक्तिपरित्याग इति न तद्विरोध इति भावः।

सप्तम्यर्थन्निरूपयति—**सप्तम्या अपीति**। ननु तावता सूत्रादाधारस्य वाच्यत्वं लभ्यते, नाश्रयस्येत्यत आह–**तत्त्वञ्चेति**। आधारत्वं चेत्यर्थः। **आश्रयत्वमिति**। आश्रयत्वविशिष्टत्वमित्यर्थः, विशिष्टे सूत्रेण शक्तिबोधनेऽप्याश्रयांऽश एव सा, न तु विशेषणीभूताश्रयत्वेऽपि, तत्प्रकारकशाब्दबोधे आश्रयशक्तिज्ञानस्य हेतुताकल्पनयैव तद्भानोपपत्तेरित्याशयेनाह–**तत्राश्रयांशः शक्य इति**। यद्वा—ननु तावता परम्परया क्रियाश्रयस्य सप्तम्यर्थत्वं लब्धं, नाऽऽश्रयमात्रस्येत्यत आह—**आश्रयांश इति**। पूर्वोक्तरीत्या क्रियाया धातोरेव लाभादनन्यलभ्याश्रय एव शक्यं [illegible]यामकं च [illegible] तत्त्वम् = आश्रयत्वम्। **आश्रयत्वमात्रेणेति**। शक्यताऽवच्छेदकस्य मिति[illegible] याहार[illegible]रण्यात् करणतृतीयायाश्च 'व्यापारोऽपी'त्यपिना आश्रयार्थकत्वप्रतिपादनात्र देवदत्त[illegible] [illegible]भूततया प्र[illegible]

❀ काशिका ❀

[illegible]णैव प्रती[illegible]

शङ्करभाष्ये उक्तम्। एवं च पूर्वोक्तशक्तिविपर्ययस्याभ्युच्चयरूपत्वं स्पष्टमेवेतिधा[illegible] अधिकरणसंज्ञं च। नन्वाधारस्य सप्तम्यर्थत्वेऽप्याश्रयः कथं सप्तमीशक्यः, आ[illegible]तात्वव्यवदित्याशङ्क्याह–तत्त्वं चेति। आधारत्वं चेत्यर्थः। आश्रयत्वमिति। आधति। प्रदात्म्यस्य [illegible] मानाभावात्, तथा च नाभि भेदो न वस्तुनीति भावः। आश्रयत्वमात्रेणेति। [illegible] पुरस्कारेण विहितेत्यर्थः। आधारसंज्ञेति। आधारस्य संज्ञा = अधिकरणसंज्ञेत्यर्थः। [illegible]त्वना-अविधानाद्यथाश्रुतेऽसंगतेः, न चाधारसंज्ञैवाधिकरणस्य विधीयत इति वाच्यम्, तस्य प्राङ्निर्दिष्टत्वात् पश्चान्निष्ठस्यैव संज्ञात्वात्, स्पष्टं चेदं वृद्धिसूत्रे भाष्ये। 'सप्तम्यधिकरणे' इत्यादेरसंगत्यापत्तेश्च। ताभिः = कर्मादिसंज्ञाभिः। बाधः स्यादिति। तथा च निरवकाशाभिस्ताभिर-

१. 'स्या'दित्यनन्तरम्–'इति वाच्य'मिति शेषः।

इत्यधिकृत्य विहितसप्तम्याः क्रियाश्रय इत्येव यद्यपि तात्पर्य्यं, यथाप्यत्र कर्त्तृकर्म्मद्वारा तदाश्रयत्वमस्त्येव स्थाल्यादेर्भूतलकटादेश्चेति,— 'स्थाल्यां पचति', 'भूतले वसति', 'कटे शेते' इत्याद्युपपद्यते। उक्तञ्च वाक्यपदीये—

कर्त्तृकर्मव्यवहितामसाक्षाद्धारयत् क्रियाम्।
उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्॥'

एतच्च त्रिविधम्—औपश्लेषिकं, वैषयिकम्, अभिव्यापकञ्च,

ॐ दर्पणः ॐ

कर्त्तृकर्मद्वारेति। एतादृशाऽर्थलाभश्च तत्सूत्रसामर्थ्यादेव, तथाहि-कारकाधिकारीयेणैतेन क्रियाऽन्वय्याधारस्याऽधिकरणसंज्ञा विधीयते, क्रिया च धात्वर्थः, साक्षात्तदाधारयोः पराभ्यां कर्त्तृकर्मसंज्ञाभ्यामाक्रान्तत्वादिदं सूत्रमनवकाशं सत् परम्परया धात्वर्थाश्रयस्याऽधिकरणसंज्ञाविधानेन चरितार्थम्, परम्पराघटके च कर्तृकर्मणी एवेति परया कर्मसंज्ञया बाधादेव 'मोक्षे इच्छास्ती'तिवन्'मोक्षे इच्छति भवती'ति न प्रयोगः। **औपश्लेषिकमिति।** सामीप्यसम्बन्धनिबन्धनमित्यर्थः, सामीप्यस्याऽपि संयुक्तसंयोगरूपतया संयोगपदेन तस्याऽपि सङ्ग्रहाद् आधेयव्याप्यताऽवच्छेदकयत्किञ्चिदवयवकमिति यावत्। **वैषयिकमिति।** विषयतासम्बन्धनिरूपकमित्यर्थः। **अभि-व्यापकमिति।** आधेयव्याप्यतावच्छेदकयावदवयवकमित्यर्थः। तत्राद्यस्य— 'गुरौ वसती'त्युदाहरणे, द्वितीयस्य—'मोक्षे इच्छास्ती'ति,

ॐ काशिका ॐ

...वाध उचित एवेति न कर्मादीनामधिकरणसंज्ञापत्तिरिति भावः। क्रियाश्रय ... धात्वर्थाश्रयत्... क्रियाश्रय इत्यर्थः, एवेन चैत्राद्याश्रयकटादेर्व्यावृत्तिः, तथा च तादृशस्य ... फलाश्रयकर्मणोऽपि वा स्यात्, न तु कटादेरिति तात्पर्यार्थः। साक्षात् ...त्वरूप... कर्मसंज्ञाविधानात्। परिशेषात् साक्षात् क्रियाश्रयद्वारा क्रियाश्रयस्य ग्रहण-... ...ति—तथाप्यत्रेति। अत्र कारकाधिकारात् क्रिया लब्धा सा च फलरूपापीत्या-... कर्मद्वारेति। तदाश्रयत्वमिति। कर्त्तृकर्मगतव्यापारफलात्मकक्रियाश्रयत्व-... उक्तेऽर्थे हरिसंमतिमाह—कर्त्तृकर्मव्यवहितामिति। स्वाश्रितकर्त्राद्याश्रितामित्यर्थः। उपकुर्वदिति। स्वीयया क्रियया प्रधानक्रियानिर्वर्तकम्। इदं च 'कारके' इत्यधिकारलब्धम्।

औपश्लेषिकमिति। उप = समीपे श्लेषः = संबन्धस्तत्कृतमौपश्लेषिकम्। एकदेशावच्छेदेन श्लेषेऽप्यौपश्लेषिकम्। तत्रापि श्लेषस्य समीपमुपश्लेषं तत्कृतमिति व्युत्पत्तिसंभवात्, तत्राद्यम् 'इको यणचि' इत्यादाविति 'संहितायाम्' इति सूत्रभाष्ये स्पष्टम्। यन्मासेऽतिक्रान्ते दीयते तस्य

'कटे शेते', 'गुरौ वसति', 'मोक्षे इच्छास्ति' 'तिलेषु तैल'मिति । एतच्च 'संहिताया'मिति सूत्रे भाष्ये स्पष्टम् ।

❀ दर्पणः ❀

अन्त्यस्याऽन्त्यम् । 'कटे शेते' इत्यत्र परम्परया कटाभिन्नाश्रयकः शयनाऽनुकूलो व्यापार इति बोधः, । एवमन्यत्राप्यूह्यम् । भाष्ये स्पष्टमिति । तत्र हि संहिताधिकारखण्डनाय—"संयोगः शक्योऽवक्तुम्, अधिकरणं नाम त्रिप्रकारं—व्यापकमौपश्लेषिकं, वैषयिकमिति, इक्शब्दस्याऽच्छब्देन कोऽन्योऽभिसम्बन्धो भवितुमर्हत्यन्यदत उपश्लेषात्, 'इको यणचि', 'उपश्लिष्टस्ये'ति, तत्राऽन्तरेण संहिताग्रहणं संहितायामेव भविष्यती"त्युक्तम्, अत्रोपश्लिष्टपदाऽध्याहारेण सप्तमीत्यर्थे इदमेव भाष्यं मानम्, संहितायामित्युपलक्षणम्, 'तत्र च दीयते कार्यं भवव'दित्यादिसूत्रस्थभाष्यस्यापि, तत्राऽधिकरणत्रैविध्यप्रतिपादनादिति ।

नैयायिकास्तु—"संयोगेनाधारः समवायेनाधार इत्याद्यनुगतप्रतीतिबलादाधारत्वमखण्डोपाधिः, संयोगादिरूपं तु न तत्, कुण्डसंयोगिनो बदरादेरपि कुण्डाधारतापत्तेः, ननु बदरप्रतियोगिकत्वविशिष्टसंयोगानुयोगितायाः कुण्डाधारताव्यवहारनियामकत्वाऽभ्युपगमान्नोक्तदोषो, न वा कुण्डे कुण्डसंयोगाऽनुयोगितासत्त्वेऽपि, 'कुण्डे कुण्ड'मिति प्रतीत्यापत्तिः, कुण्डप्रतियोगिकत्वविशिष्टसंयोगानुयोगितायास्तत्र विरहादिति चेदेवमपि मल्ले मल्लाऽन्तरसंयोगसत्त्वे उक्तानुयोगिताश्रौव्या'न्मल्ले मल्ल' इति व्यवहारापत्तेरशक्यवारणत्वेनोक्तप्रकारस्यैवाऽनुसर्त्त
तथाच तादृशमाधारत्वमाधेयत्वं वा सप्तम्यर्थः, कस्याधारत्वे ? इत्य
क्रियानिरूपितस्य तस्य बाधादुपस्थितत्वात् कर्त्तृकर्मणोराधार एव सो
तदन्वयः । 'भूतले घट' इत्यादौ न यत्र क्रियाश्रवणं तत्राऽपि कारक
तदध्याहारस्यावश्यकता, ईदृशस्थले परम्परासम्बन्धस्याऽपि क्रिया

❀ काशिका ❀

दानस्य स मास औपश्लेषिकमधिकरणमिति 'तत्र च दीयते—' इत्यत्र
'तदस्मिन्नधिकम्'–इति सूत्रे च भाष्ये स्पष्टमिदम् । वैषयिकमिति । औपश्ले
भिन्नाधिकरणमित्यर्थः । अभिव्यापकमिति । सर्वावयवावच्छेदेनाधेयसंबन्धाश्रय
यथा 'तिलेषु तैलं' 'दध्नि सर्पि'रिति । अत्र यावत्तिलदध्यवयवावच्छेदेन तैलसर्पिःसंबन्धस्य सत्त्वेनाभिव्यापकाधारतानिर्वाहः । इदमेव मुख्यमधिकरणं, तद्भिन्नं सर्वं गौणमिति 'स्वरितेन—' इति सूत्रभाष्ये स्पष्टम् । गुरौ वसतीति । गुर्वधीनत्वविवक्षायां गुरौ वसतीति । परे तु तादृशावधित्वसमानाधिकरणापादानत्वशक्तिस्तद्वान् पञ्चम्यर्थ इत्याहुः । इदं, 'मोक्ष इच्छास्ती'ति च वैषयिकोदाहरणम् ।

अवधिः पञ्चम्यर्थः, 'अपादाने पञ्चमी'' तच्च—'ध्रुवमपायेऽपादान'-मिति सूत्राद्—'अपायो विश्लेषस्तज्जनकक्रिया, तत्रावधिभूतमपादान'—मित्यर्थकादवधिभूतमिति भावः। उक्तञ्च वाक्यपदीये—

अपाये यदुदासीनं चलं वा यदि वाऽचलम्— ।
ध्रुवमेवाऽतदावेशात्तदपादानमुच्यते ॥
पततो ध्रुव एवाऽश्वो, यस्मादश्वात् पतत्यसौ ।
तस्याऽप्यश्वस्य पतने—कुड्यादि ध्रुवमुच्यते ॥
उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्म्मके— ।
विभागे,—प्रविभक्ते तु क्रिये तत्र व्यवस्थिते ॥

❀ दर्पणः ❀

कारकत्वघटकता, शास्त्रप्रामाण्यात्, अत एवा'ऽक्षशौण्ड' इत्यादौ सामर्थ्योपपत्तिः, एवञ्च 'भूतले घटोऽस्ती'त्यत्र भूतलवृत्तिर्घटो वर्त्तमानसत्ताऽऽश्रय इति बोधः, नञ्समभिव्याहारे तु तादृशसम्बन्धर्थाऽभावो घटांऽशे भासते''—इत्याहुः।

पञ्चम्यर्थं निरूपयति—**अवधिः पञ्चम्यर्थ इति। विश्लेष इति।** विभाग इत्यर्थः, अवधित्वं च,—प्रकृतधात्वर्थविभागजनकतत्क्रियाऽनाश्रयत्वे सति प्रकृतधात्वर्थविभागाश्रयत्व, करणादिकारकेऽतिव्याप्तिवारणाय विशेष्यं, यत्कि-[illegible]याजन्यविभागस्य तत्राऽपि सत्त्वादतिप्रसङ्गतादवस्थ्यमतस्तद्विशेषणं—[illegible]मिति। एवञ्च—'वृक्षात् पतती'त्यादौ विभागजनकक्रिया पतत्यर्थः, यद्वक्ष्यति—[illegible]यर्थः। आ[illegible] ॥ गतिर्निर्दिश्यते तन्निर्दिष्टविषय'मिति, अधिकं हरिपद्यव्याख्याऽवसरे [illegible]रव्यापारान[illegible] स्फुटीकरिष्यते। उदासीनं = विभागजनकक्रियानाश्रयः। तद्द्वैविध्य-[illegible]त्यादि। चलोऽश्वादिः, अचलो ग्रामादिः। तत्क्रियानाश्रयत्वादिति।

❀ काशिका ❀

[illegible]म्यर्थत्वे सूत्रं प्रमाणयति—'अपादाने पञ्चमी' इति। ननु सूत्रेणापादानस्य [illegible]ऽप्यवधेः कथं तदर्थत्वलाभ इत्यत आह—तच्चेति। तच्च = अपादानं चेत्यर्थः। [illegible]पादानम्' इति सूत्रादवधिभूतमिति योजना। तथा चोक्तसूत्रेणावधेः संज्ञाविधाना-[illegible]मिति तात्पर्यम्। परे तु तादृशावधित्वसमानाधिकरणापादानत्वशक्तिमान् पञ्चम्यर्थ इत्याहुः। 'भीत्रार्थानाम्—' इत्यादिसूत्रे हेत्वादीनामपादानसंज्ञाविधानेऽपि वाच्यत्वमितरत्र लक्षणेति भावः। वस्तुतस्तु 'भीत्रार्थानाम्—' इत्यादिसूत्राणां भाष्यकारेण प्रत्याख्यानादपादानसंज्ञावधेरेव, तथा च कारकपञ्चम्यर्थोऽवधिरेवेत्यभिप्रायकमिदम्, तेनान्यादिशब्दयोगे विहिताया 'विभाषा गुणे'—

१ 'इतिसूत्रा'दिति शेषः। यद्वा—'अपादाने हि पञ्चमी भवती'ति योज्यम्।

मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक् ।
मेषयोः स्वक्रियापेक्षं कर्तृत्वञ्च पृथक् पृथक् ॥' इति ।

'अस्यार्थः—अपाये = विश्लेषहेतुक्रियायाम्, उदासीनम् = अनाश्रयः, अतदावेशात् = तत्क्रियानाश्रयत्वात्, एवञ्च 'विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वं' फलितम्, 'वृक्षात् पर्णं पतती'त्यत्र पर्णस्य तद्वारणाय सत्यन्तम्, 'धावतोऽश्वात् पतती'त्यत्राऽश्वस्य क्रियाश्रयत्वा'द्विश्लेष-

❀ दर्पणः ❀

तद्विभागजनकतत्क्रियाऽनाविष्टत्वादित्यर्थः । **क्रियाश्रयत्वादिति** । तथाचाऽन्या-

❀ काशिका ❀

इति विहितायाश्च तस्याः संबन्धहेत्वर्थकत्वेऽपि न क्षतिः । **अपायो विश्लेष इति** । विश्लेषो विभागः । अपायपदमपायजनकक्रियापरमित्यभिप्रेत्याह—**तज्जनकक्रियायामिति** । अवधिभूतोऽयं ध्रुवपदार्थ उक्तः । ध्रुवं = स्थिरं, तच्च क्रियानाश्रयः, सा च प्रत्यासत्त्या प्रकृतधातूपात्ता, एवं चेदमवधिभूतमेवेति भावः । **वाक्यपदीयकारिकायामुभयकर्मक इति पाठे**—उभे कर्मणी जनके यस्येति बहुव्रीहिर्बोध्यः, उभयकर्मजन्य इत्यर्थः । **उभयकर्मज इति**—पाठस्तु ऋजुरेव ।

अपाये यदुदासीनमित्यत्रापाये इति—विभागजनकक्रियापरं लक्षणयेत्याशयेन व्याचष्टे—**विश्लेषहेत्विति** । ध्रुवपदार्थ **उदासीनपदेनोक्तः** । औदासीन्यं = तदनाश्रयत्वमित्यभिप्रेत्याह—**उदासीनमनाश्रय इति** । फलितार्थमाह—**एवं चेति** । अपाये ध्रुवमित्यनेन विश्लेषजनकक्रियौदासीन्यविवक्षणे चेत्यर्थः । **विश्लेषाश्रयत्वमिति** । धात्वर्थविभागाश्रय[illegible] वायं [illegible] यामक एतदप्यर्थाल्लब्धम् । एतन्निवेशनं तु 'देवदत्तो ग्रामात् काशीं याती'त्यादौ काश्य[illegible]त्वमिति [illegible] याहार[illegible] वारणाय । यद्यपि कर्मादिसंज्ञाभिः परत्वेन बाधादपादानसंज्ञातिप्रसङ्गो नेति [illegible] त्यत्र देवदत्त[illegible] विभागसमानाधिकरणैवापादानशक्तिरिति बोधनाय तदिति भावः । **तद्वारणाय** [illegible] भूततया प्र[illegible] संज्ञावारणाय । **सत्यन्तमिति** । इदं च ध्रुवत्वपदार्थः । तदनुपादाने क[illegible] बाधा [illegible] णैव प्रती स्यात्, अपायविषये यत् कारकमुक्तापायरूपक्रियाश्रयरूपमपादानमित्यर्थसंभव[illegible] रवेणा[illegible]तात्वन्यव-यास्तु 'पचति चैत्र' इत्यादिरवकाश इति भावः । एतेन परत्वात् कर्तृसंज्ञया [illegible] मपीति । प्रद्वात्यस्य [illegible] मित्यपास्तम् । नन्वपायशब्दो विभागार्थक एवास्तु, सति सप्तमी—अपाय इति, कार[illegible] वर्थानाश्रय[illegible] तुलाभः । तथा च प्रकृतधात्वर्थविभागाश्रयत्वे सति यत् कारकं तदपादानमिति सू[illegible]पीति बोध्यम् । नेयं संज्ञा कर्तृसंज्ञापवादिका, ग्रामादौ चरितार्थत्वात्, इत्थं च परया कर्तृसंज्ञया बाधान्न कर्तर्यतिप्रसङ्ग इति चेत्, पूर्वोक्तार्थस्यापि संभवात् स्पष्टार्थमेव तदित्याहुः । ननु प्रकृतधातूपात्त-क्रियानाश्रयत्वविवक्षणेन कर्तर्यतिप्रसङ्गवारणे अलं विश्लेषहेतुत्वनिवेशनेनेत्यत आह—धावत

---

१ अस्य = हरिग्रन्थस्य । 'अपाये' इत्यारभ्य—'ध्रुवत्वमिती'त्यन्तं हरिकारिकार्थो बोध्यः ।

हेत्वि'ति । 'कुड्यात् पततोऽश्वात् पतती'त्यत्राऽश्वस्य विश्लेषजनकक्रियाश्रयत्वेऽपि तन्न विरुद्धमित्याह—यस्मादश्वादिति । 'तद्विश्लेषहेतुक्रियानाश्रयत्वे सती'ति विशेषणोयमिति भावः, एवमश्वनिष्ठक्रियानाश्रयत्वात् कुड्यादेरपि ध्रुवत्वमित्याह—तस्यापीति । उभयकर्म्मजविभागस्थले विभागस्यैक्यात् तद्विश्लेषजनकक्रियानाश्रयत्वाभावात् 'परस्परान्मेषावपसर' इति न स्यादित्याशङ्क्या समाधत्ते—उभावपीति । मेषान्तरेति । यथा निश्चलमेषादपसरद्द्वितीयमेषस्थले निश्चलमेषस्या-

❀ दर्पणः ❀

स्तिरिति भावः । **विशेषणोयमिति** । तथा च विभागस्तत्तद्व्यक्तित्वेन निवेशनीय इति भावः । समाधत्ते—**प्रविभक्ते त्वित्यादिना** । तत्तन्मेषवृत्तित्वविशिष्टत्वेन भिन्नतयाऽवगत इत्यर्थः । **व्यवस्थिते इति** । तत्तन्मेषवृत्तित्वविभागजनकक्रिये तत्तन्मेषानाश्रिते भवत एवेत्यर्थः, तदेवाऽऽह—**मेषान्तरक्रियापेक्षमित्यादि** । 'परस्पर'पदोपात्तयोरपादानत्वं,—तत्तत्क्रियाश्रयत्वान्मेषपदोपात्तयोः कर्त्तृत्वञ्चोपपद्यत इत्यर्थः । तत्तद्व्यक्तित्वेनाऽपि धात्वर्थक्रियाविशेषणीयेत्याह—

❀ काशिका ❀

इति । 'अश्वात् पतती'त्युक्ते क्रियानाश्रयत्वदशायामेव तादृशप्रयोगोपपत्तिरित्याशङ्क्येत, अतस्तद्व्यावृत्तये—**धावत** इति विशेषणोपादानम् । तथा चोक्तविवक्षायां प्रकृतधातूपात्तधावन-[illegible]त्वेनैव तादृशप्रयोगानुपपत्तिर्दृढैवेति भावः । धावनं तु व्यभिचारादन्यथासिद्धित्वाच्च [illegible]रेति नोक्तदोषत्वादवस्थ्यम् । एतदर्थमेव च **अपाये** इति सूत्रे उपात्तम् । अन्यथा [illegible]रस्यैव लाभापत्त्योक्त प्रयोगानुपपत्तिप्रसङ्गः । **विश्लेषजनकेति** । अश्वकुड्ययोः [illegible]पतनाश्रयत्वेऽपीत्यर्थः । विश्लेषसामान्योपादाने उक्तस्थलेऽश्वस्यापादानत्वानुपपत्ति-[illegible] 'विशेषोपादाने न दोषः । अश्वनिष्ठपतनस्याश्ववदेव तद्विभागाजनकत्वादिति [illegible]म्यर्थत्वे सूत्रं प्र[illegible] **तद्विश्लेष** इति । यद्विश्लेषावधित्वं तद्विश्लेषव्यक्तीत्यर्थः । **अश्वनिष्ठेति** । [illegible]ऽप्यवधेः कथं त[illegible]नकाश्वनिष्ठक्रियेत्यर्थः । **क्रियानाश्रयत्वाभावादिति** । मेषद्वयस्यापि तद्वि-[illegible]पादानम्' इति [illegible]श्रयत्वादिति भावः । अन्यतरकर्मजविभागस्थले तद्विभागजनकक्रियानाश्रयत्वस्या-तात्पर्यम् । [illegible] संभवान्मेषो मेषादपसरतीत्यस्य नानुपपत्तिरित्येतेन सूचितम् । **उभावप्यध्रुवावि**-त्यादिना विभाग इत्यन्तेन शङ्का, **प्रविभक्ते तु क्रिये तत्र व्यवस्थिते** इति समाधानम् । तदेव **मेषयोरित्यादिना** स्पष्टीकृतमिति बोध्यम् । तत्रान्यतरकर्मजविभागस्थलीयमनुरूपं दृष्टान्तमाह—**यथा निश्चलेति** । निश्चलो विभागजनकक्रियानाश्रयो यो मेषस्तस्मादित्यर्थः । **अपसरदिति** ।

१ यत्रैको मेषो निश्चलं स्थितस्तस्मान्मेषाच्चापरो मेषोऽपसरति तत्रेत्यर्थः ।

पसरन्मेषक्रियामादाय ध्रुवत्वम्, तथात्रापि विभागैक्येऽपि क्रियाभेदादेकक्रियामादाय परस्य ध्रुवत्वमिति। 'तथाच'[1]विश्लेषाश्रयत्वे सति तज्जनकतत्क्रियानाश्रयत्व'—तत्क्रियायामपादानत्वं वाच्यं, क्रिया चात्र धात्वर्थो न तु स्पन्दः, तेन वृक्षकर्मजविभागवति वस्त्रे 'वृक्षाद् वस्त्रं पतती'ति सङ्गच्छते।

❀ दर्पणः ❀

क्रिया चेति। वृक्षकर्मजविभागवति 'वस्त्रे' इत्युक्त्या वस्त्रद्वारकसम्बन्धेन क्रियान्वयित्वं वृक्षस्य सूच्यते, 'क्रियाजनकत्वं कारकत्व'मिति मते तु—तत्र वृक्षस्याऽपादानत्वं दुरुपपादमेव। सङ्गच्छत इति। तादृशवृक्षनिष्ठक्रियायाः प्रकृतपतधात्वर्थत्वाऽभावेन तद्वति वृक्षे नाऽव्याप्तिरिति भावः। अत्र वदन्ति—"पञ्चम्या आश्रय इव विभागोऽप्यर्थोऽविभागार्थकपतत्यादिसमभिव्याहारे करणतृतीयाया व्यापार इव अनेकधातूनां विभागे शक्तिकल्पनाऽपेक्षया एकस्याः पञ्चम्यास्तत्र शक्तिकल्पनायां लाघवात्, विभागस्य धात्वर्थत्वे द्वितीयादिस्थले इव विभागस्य धातुना लाभादाश्रयमात्रं पञ्चम्यर्थ इत्येव ब्रूयात्, अवधेराश्रयात् पृथगुपादानवैयर्थ्यात्, त्यजिपत्योः पर्यायतापत्तेश्च, प्रकृतेऽधोदेशसंयोगाऽनुकूलक्रियैव पतत्यर्थः,

❀ काशिका ❀

अपसरंस्तादृशक्रियाश्रयो यो द्वितीयमेष इत्यर्थः। तत्तत्क्रियानाश्रयत्वेऽपि तत्तन्मेषस्य तद्विश्लेषजनकक्रियाश्रयत्वावच्छिन्नप्रतियोगिताकाभावासत्त्वादनुपपत्तिर्दुष्परिहरैवेत्याशङ्कापनुत्तये आह—[illegible] चेति। तत्क्रियानाश्रयत्वमिति। तथा च तद्विश्लेषजनकक्रियाव्यक्तिं तद्व्यक्तित्वेनोपादाय [illegible] श्रयत्वनिवेशादेकैकमेषस्य तद्विश्लेषजनकमेषान्तरसमवेतक्रियानाश्रयत्वान्नानुपपत्तिरिति [illegible]

परे तु कर्तृभेदेन क्रियाभेदसत्त्वेऽपि स न प्रतीयते, तिङन्ते निवृत्तभेदाया एव क्रियाया [illegible] स्थानात्, अत एव सरूपसूत्रे 'न वै तिङन्तान्येकशेषारम्भं प्रयोजयन्ति' इत्युक्तम्। एवं च [illegible] नुपपत्तिपरिहारसंभवः, अपि तु शब्दभेदेन वाच्यभेदमाश्रित्य मेषशब्दोपस्थितयोस्तादृश[illegible] कर्तृत्वं, परस्परशब्दोपस्थितयोस्तादृशक्रियानाश्रयत्वेनापादानत्वम्, अन्तःकरणादि[illegible] भेदवच्छब्दभेदेनापि भेदस्य स्वीकर्तुमुचितत्वादिति—संप्रतिपन्नाः। ननु वृक्षकर्मणैव [illegible] नस्थले 'वृक्षाद्वस्त्रं पतती'ति प्रयोगानुपपत्तिः, वृक्षे वृक्षवस्त्रविभागजनकतत्क्रियानाश्रयत्वा[illegible] आह—क्रिया चात्रेति। धात्वर्थ इति। तथा च संयोगानुकूलव्यापारादिरूपपतधात्वर्थाना- श्रयत्वाद्वृक्षस्यापादानत्वसिद्धिः। ननु तादृशधात्वर्थस्य विभागाजनकतया विश्लेषजनकतद्धात्वर्थाप्रसिद्ध्या तदनाश्रयत्वस्य सुतरामसंभव इति चेन्न, तं तं धात्वर्थं तत्तद्व्यक्तित्वेनोपादाय तदनाश्रयत्वमात्रं निवेश्यं, न तु धात्वर्थे विश्लेषहेतुत्वमपि, तावतापि 'धावतोऽश्वात् पतती'त्यत्र पुरुष-

[1] तथा च = हरिकारिकोक्तरीत्या च।

वस्तुतो नैतावत् पञ्चम्या वाच्यम्, किन्तु अवधेर्लक्षणमात्रम्,

❀ दर्पणः ❀

अधोदेशश्च—संयोगांऽशे उपलक्षणं, गम्युपात्तसंयोगफल उत्तरदेशवद् विभागाऽधीनपूर्वदेशसंयोगनाशमन्तरेण क्रियायाः संयोगजनकत्वाऽसम्भवात्—तस्याऽविभागजनकत्वमक्षुण्णमेव, समानप्रत्ययोपात्तत्वप्रत्यासत्त्या व्युत्पत्तिवैचित्र्येऽणाश्रयरूपपञ्चम्यर्थस्य विभागरूपाऽपरतदर्थे आधेयतयाऽन्वयः, तस्य चाऽनुकूलतासम्बन्धेन पतत्यर्थक्रियायाम्, एवञ्च विभागस्य धात्वर्थत्वाभावान्न कर्मताप्रसङ्गलेशोऽपि। यद्वा,—अवधिरित्यनुगतव्यवहारादवधित्वमाश्रयत्वव्याप्यमखण्डोपाधिस्तदवच्छिन्न एव पञ्चम्यर्थः, अत एवाऽवधेराश्रयात् पृथगुपादानम्, तस्य च 'स्वनिष्ठाऽवधित्वनिरूपकविभागजनकत्व'सम्बन्धेन क्रियायामन्वयः।

एवञ्च पूर्वकल्पे,—'वृक्षात् पर्णं पतती'त्यत्र वृक्षाऽभिन्नाश्रयकविभागजनकपर्णाश्रयकसंयोगानुकूलव्यापार इति बोधः, द्वितीये तु—वृक्षाभिन्नाऽवधिविशिष्टा तादृक् क्रियेति—विभागजन्यसंयोगो, विभागजनकक्रिया वा न पतत्यर्थः, 'पत्लृ गता'वित्यनुशासनाद्, गतिशब्दस्य—'गम्लृ गता'वित्यादौ संयोगानुकूलव्यापार एव प्रसिद्धेः; त्यज्यर्थे गतिव्यवहाराभावाच्च, फलाऽवच्छिन्नव्यापारे व्यापारावच्छिन्नफले वा धातोः शक्तिमङ्गीकुर्वतः स्वोक्तफलत्वानाक्रान्तविभागस्य धात्वर्थव्यापारावच्छेदकत्वासम्भवाच्च। "पततेः संयोगरूपफलाऽर्थकत्वे 'ग्रामं गच्छती'तिवद् 'ग्रामं पतती'त्यापत्ति"रिति तु न, शब्दशक्तिस्वाभाव्येन तदुपस्थितसंयोगस्याऽधोदेश एवान्वयात्। ...श्च तत्त्वे तु,—'विहगो ग्रामं पतती'ति त्विष्टमेव, अत एव 'नरकं पतित' इति ...'द्वितीयाश्रिते'ति द्वितीयासमासविधानं सङ्गच्छते। न च वृक्षमजहत्यपि पर्णे ...शति—'वृक्षात् पर्णं पतती'त्यापत्तिः, तदुपस्थाप्यक्रियाजन्यदेशाऽन्तरविभागे ...धत्वानुपगमात्, अन्यथा क्रियाजन्यसंयोगमात्रस्यैव विभागजन्यत्वेन भूमि...स्याऽपि तथात्वात् त्वन्मतेऽपि तादृशप्रयोगस्य दुर्वारतापत्तेः, अत एव,—...र्विना त्ववधिना नाऽपाय इति कथ्यते। 'वृक्षस्य पर्णं पतती'त्येव भाष्ये ...॥' इत्यवध्यन्वययोग्यविभागाऽनुकूलत्वं विना संयोगजनिका क्रिया ...ः, अत एव पर्णविशेषणतया वृक्षविवक्षायामपायस्याविवक्षणाद् 'वृक्षस्य पतती'त्यत्र भाष्ये षष्ठ्युक्तेत्येतदर्थकं हरिणोक्तम्। यत्र च 'गृहादपसरती'त्यादौ विभाग एव धात्वर्थस्तत्राश्रयोऽवधिमात्रं वा पञ्चम्यर्थः, तस्याधेयतया स्वनिष्ठाऽवधित्वनिरूपकत्वेन वा यथायथं विभागेऽन्वयः, 'परस्परस्मान्मेषावपसरत' इत्यादौ तु मेषपदवाच्यत्वावच्छेदेनैव कर्तृत्वविवक्षा, न परस्परवाच्यत्वावच्छेदेनेति न पञ्चम्यनुपपत्तिरिति। उक्ताऽपादानत्वस्य पञ्चमीवाच्यतावच्छेदकत्वे गौरवं मनस्याधायाह—वस्तुत इति। लक्षणमात्रमिति। 'मात्र'पदेन शक्यताऽ-

'द्वितीयाऽर्थोक्तरीत्यां प्रयोगातिप्रसङ्गस्यासम्भवेन वाच्यकोटौ प्रवेशस्य गौरवेणाऽसम्भवादिति तु—प्रतिभाति[2]। न चैवमपि 'वृक्षात् स्पन्दत'इति स्यादिति शङ्क्यम्, 'आसनाच्चलितः', 'राज्याच्चलित' इतिवद्—इष्टत्वात्,

❀ दर्पणः ❀

वच्छेदकत्वव्यवच्छेदः; तथा च व्यावृत्यादिफलकं निरुक्ताऽवधित्वमेव, पञ्चम्यर्थस्तु विभागाश्रयमात्रमेवेति भावः। [1]द्वितीयार्थोक्तरीत्येति। 'चैत्रो ग्रामं गच्छती'-तिव'चैत्रः स्वं गच्छती'ति वारणाय 'परया कर्तृसंज्ञया बाधा'दित्युक्तरीत्येत्यर्थः।

नन्वेवं 'वृक्षात् पर्णं पतती'त्यत्र पर्णेऽपि विभागाश्रयत्वस्याविकल्यात् तदुत्तरं पञ्चम्यापत्तिरत आह—अतिप्रसङ्गस्येति। स्पन्द्यर्थप्रस्रवणजन्यविभागाश्रयत्वस्य वृक्षे सत्त्वादतिप्रसङ्गमाशङ्क्य निषेधति—न चेति। एवमिति। विभागाश्रयत्वमात्रस्याऽपादानसंज्ञानियामकत्वे इत्यर्थः। स्यादिति। प्रस्रवणस्याऽधोदेश-संयोगाऽनुकूलद्रवद्रव्यक्रियारूपतया विभागस्य धात्वर्थाऽभावेन परमते आपत्त्य-सम्भवादित्याशयः। इष्टत्वादिति। चलत्यर्थक्रियाजन्यविभागाश्रयत्वस्येवैतद-र्थक्रियाजन्यविभागाश्रयत्वस्यापि पञ्चमीनियामकत्वे क्षतिविरहादित्यर्थः, चलतेर्ग-त्यर्थकत्वेऽपि,—'राज्याच्चलित' इति प्रयोगे विभागानुकूलक्रियापरत्ववत् स्यन्देरपि

❀ काशिका ❀

निष्पतनानाश्रयतयाश्वस्याऽपादानत्वोपपत्तेरित्याशयात्। अथवा विश्लेपहेतुतत्तद्धात्वर्थाश्रयो यो यस्तत्तद्भेदवत्त्वमर्थो बोध्यः। 'देवदत्तो वृक्षात् पतती'त्यत्र देवदत्तादिरेव निरुक्तधात्वर्थाश्रयः प्रतियोगी प्रसिद्ध इत्याशयोऽवसेयः। उभयकर्मजविभागतात्पर्यकस्तु न पूर्वपक्षः, [illegible]नाऽभावः, स्मान्मेषा'दित्यत्रोक्तरीत्या पूर्वपक्षस्यैवानुत्थितेः। अथवोभयकर्मजविभागतात्पर्यक एवायं [illegible]यामकं च 'परस्परस्मा'दित्यत्रोभयोरवधित्वं कर्तृत्वं च, इह त्वेकस्यावधित्वमपरस्य कर्तृत्वमिति[illegible]याहार[illegible] सूचनायैतद्ग्रन्थोपन्यासः। नन्वनाश्रयत्वान्तदलस्यावाच्यत्वे 'देवदत्तो ग्रामादायाती'त्यत्र दे[illegible] प्रयोगापत्तिर्विश्लेपाश्रयत्वादित्यत आह—द्वितीयार्थोक्त इति। यथा 'देवदत्तो देव[illegible]तया प्र[illegible] प्रयोगस्य परमतेतत्वाद्वाच्यत्वेऽपि नापत्तिः कर्तृसंज्ञया परया कर्मसंज्ञाया बाधा[illegible] प्रतीप[illegible] यापादानसंज्ञाया बाधान्न देवदत्तादिति प्रयोगापत्तिरुक्तस्थले इति भावः। गौरवेणा[illegible]तात्वव्यव-एतदपेक्षयावधित्वशक्तिमत एव वाच्यत्वौचित्यादिति तात्पर्यार्थः। एवमपीति। प्रद्रात्म्यस्य [illegible] देवदत्त'दित्यादिप्रयोगवारणेऽपि। वृक्षात् स्पन्दत इति। तत्रापि तादृशधात्वर्थानाश्रय[illegible] तज्जन्यविभागाश्रयत्वस्य वृक्षे सत्त्वात्। इयमापत्तिः सत्यन्तार्थस्य वाच्यत्वपक्षेऽपीति बोध्यम्। इष्टापत्त्योक्तप्रयोगापत्तिशङ्कां परिहरति—आसनाच्चलित इति। उक्तप्रयोगवारणाय केषांचित्

१ अस्मल्लिखितपुस्तके तु 'प्रयोगातिप्रसङ्गस्य द्वितीयार्थोक्तरीत्ये'ति रीत्या मूले दर्पणे च पाठविपर्यासो दृश्यते। २ प्रतिभाति = रोचते।

एतेन 'पञ्चमीजन्यापादानत्वबोधे सकर्मकधातुजन्योपस्थितेर्हेतुत्व'मिति समाधानाभासोऽप्यपास्तः। नचैवमपि,—'वृक्षात् त्यजती'ति दुर्वारं, कर्मसंज्ञया अपादानसंज्ञाया बाधेन पञ्चम्यसम्भवात्,—भ्रमात् कृते

❀ दर्पणः ❀

तदर्थत्वमुपगम्यापत्तेरिष्टत्वमिति भावः। जलमत्र 'कर्तृ', वृक्षस्यैव कर्तृत्वविवक्षायां तु परया कर्तृसंज्ञया बाधेनोक्तापत्तेरसम्भवादिति भावः। **नचैवमपीति।** एवमपि = धात्वर्थविभागाऽऽश्रयत्वस्याऽपादानसंज्ञानियामकत्वेऽपीत्यर्थः। **दुर्वारमिति।** धात्वर्थक्रियाजन्यविभागाश्रयत्वादिति भावः। **कर्मसंज्ञयेति।** वृक्षस्य त्यज्यर्थव्यापारजन्यविभागाश्रयत्वादिति भावः। पूर्वमतिप्रसङ्गः कर्तृसंज्ञामादाये-

❀ काशिका ❀

समाधानं दूषयितुमुपन्यस्यति—एतेनेति। **अपादानत्वबोधे** = निरूपकतासंबन्धेनापादानत्व-प्रकारकशाब्दबोधे, तेनापादानत्वप्रकारकोपस्थितौ न व्यभिचारः। **हेतुत्वमिति।** विशेष्यता-संबन्धेन हेतुत्वमित्यर्थः। संयोगानुकूलव्यापारार्थलाक्षणिक-शक्तिभ्रमविषय-स्पन्दधातुयोगे तु तादृशप्रयोगे इष्टापत्तिरेवेति भावः। पतधातुरपि सकर्मकः। अधोदेशानुयोगिकसंयोगानुकूल-व्यापारार्थकत्वात्। अत एव 'द्वितीया श्रिता—' इति सूत्रेण कूपपतित इत्यादिसमासः सिध्यति। तेनाश्वात् पततीत्यादिप्रयोगस्य नानुपपत्तिः। अथवा **सकर्मकधातुजन्योपस्थितेरित्यनेन** व्यापारानधिकरणवृत्तिफलावच्छिन्नव्यापारवृत्तिज्ञानजन्योपस्थितिर्हेतुरिति फलविशिष्टव्यापारे शक्तिरिति मते, तयोः पृथक् शक्तिरिति मते संकेतीयबोधनिष्ठविषयतांशे तादृशफलविषयक-। एवञ्च—'वृक्ष-...त्वावगाहिज्ञानजन्योपस्थितिर्हेतुस्तादृशफलविशिष्टव्यापारविषयकलक्षणाग्रहजन्योपस्थितिश्च ... गतिर्निर्दिश...र्थो विवक्षितः। तेनार्थभेदेन शब्दभेदाभावेऽपि न दोष इति दिक्। **अपास्त इति।** स्फुटीकरिष्यते ...पन्दत इति प्रयोगवारणायोक्तहेतुहेतुमद्भावाङ्गीकारे 'आसनाच्चलित' इत्यादिप्रयोगस्येष्ट-...**त्यादि।** नवाह इति तादृशहेतुहेतुमद्भावो नाभ्युपेय इति 'वृक्षात् स्पन्दत' इति प्रयोगेऽपीष्टापत्तिः ...भावः। अत्राहुः—स्पन्दे कम्पनमात्रार्थकतया विभागाप्रतिपादकतयावधित्वाभावेन ...म्यर्थत्वे सूत्रं प्र... त' इति प्रयोगो नोचितोऽपि तु 'वृक्षे स्पन्दत' इत्येव। चलतेस्तु विभागानुकूल-...ऽप्यवधेः कथं त... त्वमासनाच्चलित इति प्रयोगानुरोधात्, स्पन्देरपि तदर्थकत्वं इष्ट एवोक्तप्रयोग इति। ...ादानम्' इति ...स्य नैव तदर्थकत्वमित्याहुः। चलतेरिव कम्पेरपि तदर्थकत्वमभिप्रेत्य तु प्रकृतग्रन्थोऽ-...। **दुर्वारमिति।** विभागावच्छिन्नव्यापारानाश्रयत्वस्य वृक्षे सत्त्वेनापादानसंज्ञायाः प्राप्तेः।

कर्मसंज्ञयेति। फलतावच्छेदकसमवायेन वृक्षे विभागरूपफलाश्रयत्वसत्त्वेन कर्मसंज्ञा। 'ग्रामादागच्छती'त्यादावागच्छतेर्विभागजन्यसंयोगानुकूलव्यापारार्थकतया विभागस्य फलत्वाभावात् कर्तृनिष्ठस्यैव समवायस्य फलतावच्छेदकत्वाच्च न ग्रामादेः कर्मत्वप्रसक्तिः। कर्मसंज्ञया बाधेना-

१ अत्र 'वृक्षात्स्यन्दते'इत्यत्र। एवञ्च दर्पणकृन्मते पूर्वत्र शङ्काग्रन्थे 'वृक्षात्स्यन्दत'इत्येव पाठः।

तथा प्रयोगे यदि बोधाभावोऽप्यनुभवसिद्धस्तर्हि पञ्चमीजन्यापादानत्वबोधे त्यज्यादिभिन्नधातुजन्यबुद्धेर्हेतुत्वं वाच्यम्, 'बलाहकाद् विद्योतत' इत्यादौ 'निःसृत्ये'त्यध्याहार्य्यम्, 'रूपं रसात् पृथ'गित्यत्र तु बुद्धिपरिकल्पितमपादानत्वं द्रष्टव्यम्, 'पृथग्विने'ति पञ्चमी वा।

❀ दर्पणः ❀

वोक्तः, इदानीं तु कर्मसंज्ञामादाय प्राप्तः स निवारित इति बोध्यम्। **अनुभवसिद्ध इति।** वस्तुतो विभागाऽवधित्वस्य वृक्षे अबाधात्तज्जन्यबोधस्य प्रमात्वमिष्टमेव, विभागाश्रयस्यैवाऽवधित्वोक्तेः, त्यज्यतेः पतत्यर्थे लक्षणाग्रहदशायां, 'वृक्षात् पर्णं त्यजती'ति प्रयोगस्य प्रामाणिकत्वेन कारणतावच्छेदककोटौ त्यज्यादिभिन्नत्वस्य धात्वंशे निवेशयितुमशक्यत्वादित्यभिप्रेत्योक्तम्—**यदीति। निसृत्येति।** निःसरणपूर्वके विद्योतने धातोर्वृत्तिमुपगम्य—पञ्चम्युपपाद्येत्यर्थः। अत एवोपात्तविषये[1]ऽस्याऽन्तर्भावो वक्ष्यमाणः सङ्गच्छते। **बुद्धिपरिकल्पितमिति।** बौद्धविभागाऽवधित्वमाश्रित्येत्यर्थः। तादृगपादानत्वाश्रयणे प्रमाणशैथिल्यं मत्वाऽऽह—

❀ काशिका ❀

पादानसंज्ञाया विरहात् पञ्चम्याः साधुत्वाभावेऽप्यपादानसंज्ञाभ्रमेण तत्र तादृशप्रयोगादवध्यन्वयबोधापत्तिरित्याशङ्कां परिहरति—**भ्रमादित्यादिना। बुद्धेः** = उपस्थितेः। **हेतुत्वं वाच्यमिति।** न चैवं त्यजिपत्योः पर्यायत्वभ्रमदशायामपि तथाविधप्रयोगादपादानत्वबोधानुपपत्तिरिति वाच्यम्। इष्टापत्तेरित्याशयात्, पत्यादिपर्यायत्वेनागृहीतत्यज्याद्यजन्योपस्थितित्वेन हेतुत्वमित्यत्र [illegible] ग्रन्थतात्पर्यं कल्प्यं, तेन नोक्तदोषः। विभागानवच्छिन्नव्यापारोपस्थितेर्हेतुत्वं कल्प[illegible]नाऽभावः, [illegible]यामकं च वारणं तु न सम्यक्, गतिजन्यसंयोगार्थकपतियोगे तद्बोधानापत्तेरिति भावः। अत्र [illegible]याहार[illegible] भावोऽनुभवसिद्ध इत्यत्र 'यदि'पदेन तादृशबोध इष्ट एवेति सूचितम्। ननु 'बलाह[illegible]' इत्यत्रापादानत्वानुपपत्तिः, गतेरनुपस्थितेस्तस्या एवापायत्वादत आह—ब[illegible]तया प्र[illegible] **निःसृत्येति। अध्येति।** अत्राध्याहारस्तत्पूर्वकविद्योतने धातोर्वृत्तिः, व[illegible]व प्रतीय[illegible] ग्रन्थकारोऽपि। बलाहको नाम धूमज्योतिःसलिलमरुतां संघातः, तादृशसमुदा[illegible] यवभूतज्योतीरूपविद्युतो भेदविवक्षणात्तस्यावधित्वम्। यदा तु तेजस आधारत्वेनतात्वन्यवतदा 'बलाहके विद्योतते' विद्युदिति सप्तमी। यदा संघातावयवयोरभेदविवक्षा तदा प्रदात्म्यस्य [illegible] मात्रे प्रथमा भवतीति बोध्यम्। स्पष्टं चेदं कैयटादौ। 'रूपं रसात् पृथ'गित्यत्र रूपे [illegible] पूर्वकसंयोगानुकूलव्यापाररूपनिःसरणस्य बाधादित्याशङ्कां निराकर्तुमाह—**रूपमिति। बुद्धिपरिकल्पितमिति।** अयं भावः—'ध्रुवमपाये—' इत्यत्रापायशब्देन भेदस्यापि ग्रहणं 'पञ्चमी विभक्ते' इत्यत्र विभक्तशब्देनेव, पृथक्शब्दार्थोऽपि भेद एव, न तु गुणान्तरमुक्तप्रयोगादेव।

१ उपात्तविषये = तदाख्यापादानविशेषे। अस्य = 'बलाहकाद्विद्योतते' इत्यस्य।

'इदञ्च—'निर्दिष्टविषयं 'किञ्चिदुपात्तविषयं तथा ।
अपेक्षितक्रियञ्चेति त्रिधाऽपादानमुच्यते'—

—इति वाक्यपदीयात् त्रिविधम्, यत्र साक्षाद्धातुना गतिर्निर्दिश्यते तन्निर्दिष्टविषयम्—'यथा'ऽश्वात् पतति', यत्र धात्वन्तरार्थाङ्गं स्वार्थं धातुराह तदुपात्तविषयम्, यथा—'बलाहकाद् विद्योतते'। निःसरणाङ्गे विद्योतने द्युति-

❀ दर्पणः ❀

पृथगिति । **साक्षादिति ।** मुख्यवृत्त्येत्यर्थः । 'धातुने'त्यस्य 'समभिव्याहृते'त्यादिः । **गतिरिति ।** विभागजनकक्रियेत्यर्थः । **उपात्तविषयमिति ।** समभिव्याहृत-धातुनोपात्तो = लक्षितो गतिरूपो विषयो यत्रेत्यर्थः । **अपेक्षितक्रियमिति ।** अनु-

❀ काशिका ❀

भेदज्ञानविषयत्वमपि 'भिदिर् विदारण इति' विदारणशब्देन गृह्यते । एकत्वेनाज्ञातस्य भेदविषयत्वेन ज्ञाने बुद्धिविदारणस्य तत्रापि सत्त्वात् । एवं च 'घटाद् भिन्न' इत्यादावित्यत्राप्यनेन सूत्रेणापादानत्वे 'अपादाने पञ्चमी' इति सूत्रेण पञ्चमी । 'अन्यारात्—' इति सूत्रेऽन्येत्यर्थग्रहणं तु न, इतरशब्दस्य पृथगुपादानात् । भेदविषयबुद्धिविषयत्वरूपबुद्धिविदारणसापेक्षतया बुद्धिपरिकल्पितत्वमुच्यत इति । अत्र पृथक्शब्दस्याक्रियावाचित्वात् कारकत्वानुपपत्तिरिति न शङ्क्यं, भवतीत्यध्याहृत्य धातूनामनेकार्थतया भेदात्मकपृथग्भावस्य तदर्थत्वाङ्गीकारेणादोष इति तात्पर्यात् ।

इमं क्लेशं परिहर्तुं सूत्रान्तरेणाप्यत्र पञ्चमीमाह—'**पृथग्विना—**' इति । परे तु अपाये = [illegible] सति यद् ध्रुवमवधिभावोऽपगमाश्रयत्वे सति तदतिरिक्तस्यावधित्वापयोगिव्यापारस्याना- [illegible] दानमिति सूत्रार्थः । त्रासादेर्वृक्षात् पर्णमित्यादौ व्यभिचारान्नावधित्वोपयोगिता । [illegible] पयोगित्वेऽपि तस्याविवक्षितत्वान्न दोषः । अत एव भाष्ये अश्वौव्यस्याविवक्षया [illegible] इत्यत्र शङ्का समाहिता । 'ध्रुवमपाये'—' इति तु वृक्षस्य पर्णं पततीत्यादौ [illegible] स्य क्रियाजनकतया प्राप्तापादानत्ववारणाय । तत्रापाये इति क्रियाजनकत्वेन [illegible] तात्पर्यमाह । ध्रुवग्रहणं त्वपादानस्यावधिभावोपगम एव व्यापारो न तु [illegible] त्वथो व्यापार इति ज्ञापनायेत्याहुरित्यन्यत्र विस्तरोऽवगन्तव्यः । तद्विभजते— [illegible] त्त्वमिति । अत्र विषयशब्दो निमित्तभूतगतिपर इत्याशयेनाह—**यत्र साक्षादिति ।** [illegible] आहारं विनेत्यर्थः । **धातुना** = गत्यर्थकत्वेन प्रसिद्धधातुना । **निर्दिश्यते** = उपस्थाप्यते । गत्यर्थकधातुर्यत्र निर्दिश्यत इति यावत् । उपात्तविषयं लक्षयति—**यत्र धात्वन्तरेति ।** धात्वन्तरस्य = निःसरत्यादेरर्थो धात्वन्तरार्थः, सोऽङ्गं = विशेषणं यत्रेत्यर्थः । उक्तमर्थं लक्ष्ये संगमयति—**निःसरणाङ्ग** इति । निःसरणं = विभागपूर्वकं गमनं यत्रेति बहुव्रीहिः ।

१ इदञ्च = अपादानञ्च । २ निर्दिष्टः = शक्त्या बोधितो विषयः = निरूपकार्थो यस्य स तथा । ३ अत्र

र्वर्त्तते । अपेक्षिता क्रिया यत्र तदन्त्यम्, यथा 'कुतो भवान्' —?— 'पाटलिपुत्रात्', अत्रागमनमर्थमध्याहृत्यान्वयः कार्य्यः ।

उद्देश्यश्चतुर्थ्यर्थः, तथाहि 'सम्प्रदाने चतुर्थी' । तच्च—'कर्मणा यम-

❀ दर्पणः ❀

पात्तधात्वर्थक्रियासाकाङ्क्षमित्यर्थः। **बलाहकादिति** । धूममरुज्ज्योतिःसमूहो–बलाहकः, ततोऽवयवभूतज्योतिषामेव विभागविवक्षणात् सोऽवधिः, द्युतिश्च लक्षणया निःसरणपूर्वकविद्योतनबोधकः, तथाच बलाहकाऽवधिकनिःसरणोत्तरकालिकं विद्युत्कर्तृकं विद्योतनमिति बोधः । **अध्याहृत्येति**—अर्थाध्याहाराभिप्रायेण, पदाध्याहारवादे तु—आकाङ्क्षितक्रियावाचकपदाऽनुसन्धानेऽप्यनुपात्तत्वरूपविशेषणघटितलक्षणस्याविकल्यं बोध्यम्, प्रमाणं तत्र[1],—'पुष्पेभ्यः स्पृहयती'त्यादौ स्पृहयत्यादियोगे सम्प्रदानादिसंज्ञाविधायकानि—'स्पृहेरीप्सित' इत्यादिसूत्राणि; तैस्तत्तद्धातुयोगे एव तद्बोधनात्, अर्थाध्याहारे तु 'क्रियार्थोपपदस्ये'त्यादिसूत्रं,—'ल्यब्लोप' इत्यादिवार्त्तिकानि च[2]। अन्ये त्विदमित्थं व्याचक्षते—"यत्र विभागस्तज्जनकक्रिया चोभयं धातुनाऽभिधीयते तदाद्यम्[3], यत्र विभागोऽध्याहृतधातुना तथा—तद्द्वितीयम्, यत्र तूभयमप्यध्याहृतधात्वभिधेयं तत्तृतीय"मिति अधिकमन्यतोऽवधार्य्यम् ।

चतुर्थ्यर्थं निरूपयति—**उद्देश्य इति** । ननूद्देश्यत्वं = कामनाविषयत्वं, तच्च 'विप्राय गां ददाती'त्यत्र क्रियाजन्यफलभागितया कामनाविषये ...नाऽभावः, ...तिप्रसक्तमतस्तद्व्यावृत्तं,—तत्सूत्रप्रामाण्येन दर्शयति—**तच्च** कर्म्यामकं च 'कर्मणे'त्यनन्तरम्, 'सम्बन्ध्यु'मिति शेषः, कर्म चाऽत्र पारिभाषिकम् ...याहार... यमभिप्रैती'ति क्रियायाऽऽप्यमानस्य सम्प्रदानसंज्ञाविधानात्, अत एव तत् ... विषयम् । ननु 'ग्रामं गच्छती'त्यत्र ग्रामरूपकर्मजन्यसुखादिफल... र्त्तया प्रा... ...णैव प्रतीय...

❀ काशिका ❀

अपेक्षितेति । आकाङ्क्षितेत्यर्थः । आकाङ्क्षा चानुपादाने सति भवतीत्याशयेः ...श्रयतात्वव्यव- इति। गम्यमानापि क्रिया कारकविभक्तिप्रयोजिकेति भावः। प्रश्नोत्तरवाक्ये द्वे अपि ... तादात्म्यस्य ...तं- बोध्यम्॥ उद्देश्यस्य चतुर्थ्यर्थत्वे मानमाह–**तथा हीति** । सूत्रात् संप्रदानस्य चतुर्थ्यर्थत्वे ...निष्ठ- ...नः । नोद्देश्यस्य तत्त्वसिद्धिरित्याशङ्क्यां निराचष्टे–**तच्चेति** । तच्च = संप्रदानं च । 'कर्मणा यमभिप्रैति

गतिः = विश्लेपजनिका क्रिया, साचात् = ...त्तया, पतधातुना प्रतिपाद्यत इति निर्दिष्टविषयोदाहरणतास्य युक्तैव ।

१ तत्र = पदाध्याहारे । २ 'प्रमाणानी'तिशेषः । ३ निर्दिष्टविषयम् ।

भिप्रैति स सम्प्रदान'मिति सूत्रात्—कर्मणा-करणभूतेन—यमभिप्रैति = ईप्सति तत्कारकं सम्प्रदानमित्यर्थकादुद्देश्यम् ।

ॐ दर्पणः ॐ

कर्त्तरि अतिप्रसङ्गोऽत आह—**करणभूतेनेति**। करणत्वं च सम्बन्धक्रियाऽपेक्षम्, क्रियाव्यवहितव्यापारवत एव करणतया व्यापारे कर्मवृत्तित्वलाभेन तद्वृत्तित्वस्य धात्वर्थतावच्छेदकफल एव सम्भवात्, कर्मवृत्तितजन्यत्वस्य ग्रामजन्यसुखे असत्त्वान्नोक्तातिप्रसङ्ग इति भावः। 'य'मित्यस्यानुपादाने 'योऽभिप्रैती'त्यर्थस्यापि लाभात् प्रथमान्तकर्त्र्यतिप्रसङ्गः स्यादतस्तदुपात्तम्, यद्यपि 'गौर्ब्राह्मणस्य भव'त्वितीच्छाविशेष्यतया गामेवाऽवगाहते, तथापि तस्य सूत्रफलितार्थपरत्वान्न दोषः, तथाच कर्मजन्यतद्वृत्तिफलभागित्वप्रकारको यद्विशेष्यकोऽभिप्रायः स सम्प्रदानमिति सूत्राऽर्थः, तादृशफलसम्बन्धिकप्रकारतानिरूपितविशेष्यताश्रय इति यावत्, 'विप्राय गां ददाती'त्यादौ परस्वस्वजनकस्वस्वत्वध्वंसावच्छिन्नेच्छात्मकस्त्यागो दाधात्वर्थः, उद्देश्यत्वं चतुर्थ्यर्थः, गोरूपकर्मणश्चाश्रयत्वेन स्वत्वरूपफलेऽन्वयः, तथाच गोवृत्तिस्वत्वजनकस्वस्वत्वध्वंसाऽनुकूलो विप्राऽभिन्नोद्देश्यकस्त्याग इति वैयाकरणमते बोधः, उद्देश्यत्वं च विप्रे-गोजन्यस्वत्वभागितयेच्छाविषयत्वमेव, एवं 'वृक्षायोदकमासिञ्चती'त्यत्राप्युदकनिष्ठक्रियाजन्यसंयोगफलभागितयेच्छाविषयत्वात् सम्प्रदानत्वमूह्यम् ।

नैयायिकास्तु—"परस्वत्वेच्छाधीनस्वस्वत्वध्वंसेच्छा त्याग इति मते—स्वस्वत्व-[illegible]कारावच्छिन्नत्यागो ददात्यर्थः, विशेष्यत्वं चतुर्थ्यर्थः, तस्य स्वनिरूपकनिरुक्तेच्छा-[illegible]। एवञ्च—'वृक्ष[illegible]न्धेन ददात्यर्थत्यागे, गोरूपकर्मणस्त्वाधेयतया स्वस्वत्वध्वंसरूपफले। [illegible] गतिर्निर्दिश[illegible]गोवृत्तिस्वस्वत्वध्वंसजनको निरुक्तसम्बन्धेन विप्रनिष्ठविशेष्यताविशिष्टो [illegible] स्फुटीकरिष्यते [illegible]ाश्रयश्चैत्र इति वाक्याद् बोधः। यदि तु 'गौर्विप्रस्य भवतु न ममे'-[illegible]त्यादि। [illegible], स च गवि स्वस्वत्वध्वंसमिव परस्वत्वमप्यवगाहते, तदा स्वस्वत्व-[illegible]त्वोत्पत्त्यवच्छिन्नत्यागो दाधात्वर्थः, एवञ्च उक्तस्थले निरू-[illegible]म्यर्थत्वे सूत्रं प्र[illegible]श्यत्वं चतुर्थ्यर्थः, तस्य च स्वस्वत्वध्वंसेऽन्वयाद् विप्रनिरूपित-[illegible]ऽप्यवधेः कथं त[illegible]विषयगोवृत्तिस्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पत्त्यवच्छिन्नत्यागाऽऽश्रय इति [illegible]दानम्' इति [illegible]जन्यस्वत्वस्य गोवृत्तित्वेऽवगतेऽर्थात्तस्मिंस्तज्जन्यत्वं लभ्यते एवेति

ॐ काशिका ॐ

. स संप्रदानम्' इति सूत्रादुद्देश्य इत्यन्वयः। संप्रदानस्योद्देश्यरूपतागमकतानिर्वाहकं विशेषणमाह—कर्मणेत्यादिना इत्यर्थकादित्यन्तेन। **करणभूतेनेति**। अनेन कर्मणेति सहार्थे तृतीयेति भ्रमम्, असंगता तृतीयेति भ्रमं च निराकरोति। कर्मणः करणत्वं संबन्धविषयकेच्छारूपाभिप्रायघटकसंबन्धघटकसत्त्वादिद्वारा। तथा च गवादिनिष्ठस्वत्वादिरूपफलनिरूपकत्वादिसंबन्धवत्तयोद्देश्यः संप्रदानमिति

❀ दर्पणः ❀

गोजन्यस्वत्वनिरूपकत्वेनेच्छाविषयत्वरूपमुद्देश्यत्वं विप्रस्याऽक्षतम्, 'वृक्षायोदकमासिञ्चती'त्यत्र तु—संयोगाऽवच्छिन्नद्रवद्रव्यक्रियाऽवच्छिन्नव्यापारो धात्वर्थः, वृत्तित्वेनेच्छाविषयत्वं चतुर्थ्यर्थः, स च धात्वर्थताऽवच्छेदकसंयोगाऽन्वयी, द्वितीयार्थवृत्तित्वं तु द्रवद्रव्यक्रियान्वयि, तथाच वृक्षवृत्तित्वेनेच्छाविषयो यः संयोगस्तदवच्छिन्ना योदकवृत्तिर्द्रवद्रव्यक्रिया तदवच्छिन्नव्यापारानुकूलकृतिमानिति बोधः, न चैवं सिचधात्वर्थताऽवच्छेदकद्रवद्रव्यक्रियायां द्वितीयार्थवृत्तित्वान्वये—'पयसा वृक्षं सिञ्चती'ति न स्यात्, तादृशक्रियाया वृक्षावृत्तित्वादिति वाच्यं, तत्र संयोगावच्छिन्नद्रवद्रव्यक्रियाया एव धात्वर्थतया तदवच्छेदकीभूतसंयोग एव वृक्षवृत्तित्वाऽन्वयान्नाऽनुपपत्ति"रित्याहुः।

अपरे तु—"विजातीयत्यागजन्यफलभागितयोद्देश्यत्वं–सम्प्रदानत्वं–चतुर्थ्यर्थः, एवञ्च 'विप्राय गां ददाती'त्यादौ त्यागजन्यफलभागित्वप्रकारकब्राह्मणवृत्त्युद्देश्यताकगोविषयकत्यागाश्रय इति बोधः, 'रुद्राय गां ददाती'त्यत्र रुद्रस्य त्यागजन्यफलभागितयोद्दश्यत्वमस्त्येव, स्वत्वं तु तस्य जायते, न वेत्यन्यत्, त्यागजन्यं फलं तु स्वत्वरूपं ग्राह्यम्, तेन पितृस्वर्गमुद्दिश्य दत्तायां गवि ब्राह्मणस्य सम्प्रदानत्वोपपत्तिः, पितुः स्वत्वरूपं फलं नोद्दश्यं, किन्तु स्वर्गः, 'पितृभ्यो दद्या' दित्यादौ तु—'रुद्राय गां ददाती'तिवत् सम्प्रदानत्वमस्त्येव, त्यागे वैजात्यनिवेशाच्च न क्रेतुः सम्प्रदानत्वम्, 'वृक्षायोदकमासिञ्चती'त्यादौ तु चतुर्थ्यर्थे गौणं सम्प्रदानत्वम्, तत्र सिचेर्द्रवद्रव्यवृत्तिः संयोगाऽनुकूला क्रिया, उदकादिपदसमभिव्याहारे ...नाऽभावः, संयोगाऽनुकूलक्रियामात्रमर्थः, चतुर्थ्यर्थस्तु वृत्तित्वम्, इत्थञ्च ...यामकं च संयोगाऽवच्छिन्नक्रियेत्यादिबोधः, अत्र चतुर्थीद्वितीयाभ्यां तुल्य...याहार...र्थे द्वितीया मा भूदिति सम्प्रदानसंज्ञाऽनुशिष्यते। 'वृक्षं पयसा सिञ्चती'... वृक्षशब्दाद् द्वितीया भवत्येव, तत्र तृतीयाऽर्थोऽभेदस्तस्य ... द्वितीयार्थवृत्तित्वस्य तु संयोगेऽन्वयः, तथाच वृक्षवृत्तिसंयोगा... द्रवद्रव्यक्रियेति बोधः। 'शत्रवेऽस्त्रं मुञ्चती'त्यत्र दुःखोद्देश्यकत्वं चतुर्थ्यर्थः ... विभागावच्छिन्नक्रिया, क्रियानुकूलव्यापारो वा, प्रकृत्यर्थस्य वृत्तिलक्ष्यतात्वन्यवदेशे दुःखेऽन्वयः। एवं 'मित्राय दूतं प्रेषयती'त्यत्र-वार्त्तादानोद्देश्यकत्व...दात्म्यस्य ... धनं प्रेषयती'त्यत्र प्रीत्युद्देश्यकत्वं चतुर्थ्यर्थ इत्याद्यूह्य"मित्याहुः।

तन्न सम्यक्, सम्प्रदाने हि चतुर्थी, न च भवदुक्तसम्प्रदानत्वे किञ्चिन्मानं, येन 'वृक्षाये'त्यत्र चतुर्थी स्यात्, किञ्च संयोगरूपधात्वर्थान्वयित्वाऽविशेषादुदकपदादपि चतुर्थ्यापत्तिः, बाधकं कर्मत्वं तु वृक्षेऽप्यक्षतमिति न किञ्चिदेतत्।

इदमेव शेषित्वम्[1], तदुद्देश्यकेच्छाविषयत्वं च शेषत्वमित्येव पूर्वतन्त्रे निरूपितम्। अत एव—'प्रासनवन्मैत्रावरुणाय दण्डप्रदान'मित्यधिकरणे 'क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छती'ति विहितं दण्डदानं न प्रतिपत्तिः[2], किन्तु चतुर्थीश्रुत्याऽर्थकर्मेति—तत्र निर्णीतम्। 'रजकाय वस्त्रं

❀ दर्पणः ❀

इदमेवेति। निरुक्तोद्देश्यत्वमेवेत्यर्थः। **पूर्वतन्त्रे**—मीमांसायाम्। **अत एवेति।** शेषित्वस्याऽर्थकर्मप्रयोजकत्वादेवेत्यर्थः। **प्रासनवदिति।** ज्योतिष्टोमे श्रूयते—'नीतासु दक्षिणासु चात्वाले कृष्णविषाणं प्रास्यती'ति[3], यदा यजमानेन दत्ता दक्षिणा ऋत्विग्भिर्नीतास्तदा यजमानः स्वहस्ते धृतं कृष्णमृगशृङ्गं चात्वालनामकगर्त्ते प्रक्षिपेदिति तदर्थः। तत्रैवं सन्दिह्यते—किमेतत् प्रासनमर्थकर्म? उत प्रतिपत्तिकर्मेति?। 'अर्थकर्मैव भवितुमर्हति, सप्रयोजनत्वात्, प्रतिपत्तिकर्मतायां तु अपूर्वाभावे निरर्थकमेव स्या'दिति पूर्वपक्षे—'कृष्णविषाणया कण्डूयती'ति श्रुत्या कृताऽर्थस्य प्रतिपत्त्यपेक्षत्वात् प्रतिपत्तिकर्मतैव युक्ता, न चाऽनर्थक्यं, प्रासनक्रियाप्रयुक्तापूर्वाभावेऽपि चात्वाल एवेति नियमापूर्वसद्भावादिति सिद्धान्तितम्, तद्वद्'दण्डदानं न प्रतिपत्ति'रिति योजना।

इत्यधिकरण इति। चतुर्थाध्याय इति शेषः। ज्योतिष्टोमं प्रकृत्यैव—'मैत्रावरुणाय दण्डं प्रयच्छती'ति श्रूयते, तत्र दण्डदानस्याऽर्थ-प्रतिपत्ति-कर्मभावसन्देहे [illegible]णा दीक्षासिद्ध्यै दत्तदण्डस्य आसोमक्रयाद्यजमानधारणेन कृताऽर्थ-[illegible] तस्य दानं प्रतिपत्तिकर्मैवेति पूर्वपक्षे,—'दण्डी प्रैषानन्वाहे'ति [illegible]णस्य प्रैषाऽनुवादेऽवलम्बनाय दण्डोपेऽक्षितः, एवञ्च भविष्य-[illegible]त् प्रतिपत्तिकर्मण उपयुक्तसंस्काररूपादर्थकर्मैवोपयोक्ष्यमाणं-[illegible]स्तम्, उपयोजयितुमेव सर्वत्र संस्कारप्रवृत्तेः, उपयुक्ते तु प्रति-[illegible]ऽसत्कारमात्रपर्य्यवसायित्वेन कार्य्यपर्यवसानाऽभावादप्रशस्त-[illegible]संस्काराय तद्दानमर्थकर्म, तथा सति निरूढपशौ असत्यपि [illegible]सम्पादनस्यैतद्दानं प्रयोजकमिति सिद्धान्तितम्। अर्थकर्मत्वे च

❀ काशिका ❀

[illegible]ऽर्थ इति भावः। इदमेव = उद्देश्यत्वमेव। तत्र मीमांसकसंवादमाह—तदुद्देश्यकेच्छेति। तथा चेच्छीयविषयताविशेष उद्देश्यत्वमिति भावः। **इत्यधिकरण इति।** पूर्वतन्त्रे चतुर्थाध्यायद्वितीयचरणस्थमिदमधिकरणम्। **निर्णीतमिति।** तत्र हि दीक्षितस्य दण्डप्रदानं विधाय

१ तदेवं विप्रे शेषित्वं, गवि शेषत्वं। २ प्रतिपत्तिः = प्रतिपत्तिकर्म। ३ प्रास्यति = प्रक्षिपति।

दद्दाती'त्यपि',–'खण्डिकोपाध्यायः शिष्याय चपेटां ददाती'ति भाष्यो-

❀ दर्पणः ❀

शेषित्वं प्रयोजकम्, तच्च चतुर्थीश्रुत्या मैत्रावरुणस्य बोध्यत इत्याह—चतुर्थी-श्रुत्येति। ननु यत्र दाधातुरधीनीकरणाद्यर्थस्तत्राऽधीनत्वादिरूपफलनिरूपकतयेच्छाविषयत्वरूपसम्प्रदानत्वस्य रजकादावपि सम्भवात् 'रजकाय वस्त्रं ददाति' 'होत्रे उष्ट्रं ददाती'त्यादिप्रयोगाः प्रसज्ज्येरन्नित्याशङ्कामिष्टापत्त्या परिहरति—रजकायेति। तत्र प्रमाणमुपन्यस्यति—खण्डिकोपाध्याय इति। ददातीति। दाधात्वर्थसंयोगसम्बन्धित्वेनेच्छाविषयत्वरूपोद्देश्यत्वस्य तत्र सत्त्वादिति तद्भावः। अस्मिन् प्रयोगे ददातिः संयोगानुकूलव्यापारार्थकः, चपेटापदार्थस्तु प्रसृतकरतलम्। 'न शूद्राय मतिं दद्या' दित्यत्र ददातिर्बोधनार्थकः, मतिपदार्थश्च तज्जनकं वेदादिशास्त्रमिति बोध्यम्।

❀ दर्पणः ❀

पुनराम्नातं 'क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छती'ति, तदेतद्वाक्यविहितं मैत्रावरुणाय दण्डप्रदानं प्रतिपत्तिकर्म, यतो दीक्षितहस्तधारणे कृतार्थो दण्डः प्रतिपत्त्यपेक्षः। द्वितीयया तस्य प्राधान्यं च गम्यते, दानस्यतु न, अतो मैत्रावरुणहस्ते प्रक्षेपोऽस्य कर्तव्य इति पूर्वपक्षयित्वा संप्रदानचतुर्थ्या मैत्रावरुणस्य उद्देश्यत्वलक्षणप्राधान्यावगमान्मैत्रावरुणार्थं दण्डप्रदानं दण्डस्य प्रयोजकं, स्थित्वा प्रैषानुवचने कुर्वतस्तस्यालम्बनतया दृष्टार्थ एव हि दण्डः। अत एवाग्नीषोमीयपशुविकारे निरूढपशौ दीक्षिते सत्यपि मैत्रावरुणार्थत्वेन दण्डोपादानसिद्धिरिति सिद्धान्तितमित्यर्थः। तथा च द्वितीयानिर्दिष्टदण्डापेक्षया चतुर्थीनिर्दिष्टमैत्रावरुणस्य प्राधान्यावगम[illegible]मत-सिद्धिरिति भावः। अत एवाजां ग्रामं नयतीत्यत्र ग्रामस्याजां प्रति शेषित्वाभावा[illegible]नाऽभावः; ग्रामसंस्कारार्थमजानयने तु ग्रामे तत्सत्त्वेऽपि परत्वात् कर्मसंज्ञया बाधान्न दोष[illegible]यामकं च 'रजकाय वस्त्रं ददाती'ति प्रयोगापत्तिस्तत्र दाधातोर्निर्णेजनानुकूलेच्छादिरूपो व्यापाररूपो[illegible] वस्त्रेणाभिप्रेयमाणत्वाद्रजकस्येत्याशङ्क्येष्टापत्त्या परिहरति—रजकायेति। तादृशप्रयो[illegible] मानमाह—खण्डिकेति। बालकोपाध्याय इत्यर्थः। भाष्योदाहरणादिति [illegible]त्या प्र[illegible] संयोगविशेषानुकूलव्यापारार्थतया मुख्यदानार्थकतद्योगे एव संप्रदानत्वाङ्गी[illegible]गौव प्रतीय[illegible] प्रयोगानुपपत्तिः। चपेटा = प्रसृतकरतलम्। न च भाक्तः स प्रयोग इति वाच्यं[illegible] कर्तव्यमिति वचनं खण्डयद्भिर्भाष्यकारैः संप्रदानसंज्ञाया अन्वर्थत्वानङ्गीकारेसतात्वन्यव-रजकायेत्यादिप्रयोगस्य च मुख्यत्वोपगमात्। एवं 'न शूद्राय मतिं दद्या'दित्यप्यत एव [illegible]त्यस्य तत्र ददातिर्बोधनार्थः, मतिशब्दस्तज्जनकवेदादिपरः। 'विप्राय गां ददाती'त्यत्र विप्रसंप्रदानकगोकर्मकं दानमिति बोधः। संप्रदानमित्यस्यान्वर्थतां स्वीकुर्वतां वृत्तिकाराणां मतमाह—

१ 'स्वस्वत्वध्वंसविशिष्टपरस्वत्वानुकूलेच्छारूपदाधात्वर्थस्थल एव सम्प्रदानत्वमिति न नियमः, किन्त्वन्यत्रापि तदित्याह–रजकेति—'परीक्षा'कृतः।

दाहरणादिष्टमेव । वृत्तिकारास्तु—'सम्यक् प्रदीयते यस्मै तत् सम्प्रदानमि'त्यन्वर्थसंज्ञया स्वस्वत्वनिवृत्तिपर्यन्तमर्थं वर्णयन्तो[1] —'रजकस्य वस्त्र'मित्ये'वाहुः ।

ॐ दर्पणः ॐ

स्वस्वत्वनिवृत्तीति । परस्वत्वोत्पत्त्यवच्छिन्नस्वस्वत्वध्वंसेच्छारूपं व्यापारम्,' अर्थं = दाधात्वर्थमित्यर्थः, तथाचोक्ताऽर्थकदाधात्वर्थकर्मनिष्ठफलभागितयेच्छाविषयत्वमेव सम्प्रदानत्वम्—अन्वर्थमहासंज्ञाकरणसामर्थ्यात्, उक्तस्थले च ददातेस्तदर्थकत्वाभावेन 'रजकस्य वस्त्रं ददाती'त्येवेति तेषां[2] माशयः । 'उक्तभाष्यप्रामाण्यादन्वर्थत्वमेवाऽसिद्धम्, महासंज्ञाकरणं तु प्राचामनुरोधादेव, सर्वनामस्थानसंज्ञाव' दित्यस्वरसाद्**आहु**रिति[3] ।

नन्व'जां ग्रामं नयती'त्यत्राजायां निरुक्तसम्प्रदानत्वस्य सत्त्वात्तद्वाचकाच्चतुर्थ्यापत्तिरिति चेत्, स्यादेव, यदि परया कर्म्मसंज्ञया सम्प्रदानत्वस्य न बाध इति ।

'यूपाय दारु'इत्यादौ न सम्प्रदानचतुर्थी, अपि तु तादर्थ्ये, तादर्थ्यं च,—'स एवाऽर्थः प्रयोजनमस्य—तत्त्व'म्, समभिव्याहृताऽर्थे तादर्थ्यविवक्षायां तद्वाचकाच्चतुर्थीति,—'तादर्थ्ये चतुर्थीवाच्ये'ति वार्त्तिकार्थः, प्रयोजनत्वं च न जन्यत्वं, 'दुःखाय पाप'मित्यस्याऽप्यापत्तेः, नाऽपि जन्यतयेच्छाविषयत्वम्, स्वर्गादेः पुण्यादिजन्यतयेच्छाविषयत्वेन 'स्वर्गाय पुण्य'मित्यापत्तेः, नचेष्टापत्तिः, तथा सति 'पक्तुं व्रजती'त्यर्थे—'पाकाय व्रजती'ति प्रयोगनिर्वाहाय,—'तुमर्थाच्चे'तिसूत्रप्रणयनवैयर्थ्यापत्तेः, [illegible] कव्रजनाऽऽर्थतयैव तद्वाचकाद्वार्त्तिकेन चतुर्थ्युपपत्तेः, अपि तु सम[illegible]ाऽर्थनिष्ठव्यापारेच्छानुकूलेच्छाविषयत्वम्, तत्प्रयोजनकत्वरूपं तादर्थ्य[illegible]धीनेच्छाविषयव्यापाराश्रयत्वम्, दारुणो यूपेच्छाधीनेच्छाविषयतक्षणा[illegible]ापारवत्तया यूपाऽर्थत्वात्तद्विवक्षया यूपपदाच्चतुर्थी । तदर्थश्चेच्छाधीने[illegible]राश्रयत्वम्, प्रथमेच्छायां यूपादेः प्रकृत्यर्थस्य विषयित्वेनाऽन्वयः, [illegible] दार्वादौ, एवं—'रन्धनाय स्थाली'त्यादावप्यूह्यमिति केचित्, तन्न [illegible]दर्थ्यस्योक्तरूपत्वे—'मुक्तये हरिं भजती'त्यत्र चतुर्थ्यनुपपत्तेः, न हि [illegible]रीच्छाऽधीनेच्छाविषयव्यापारवत्ता, नाऽपि मुक्तेः सम्प्रदानता, कर्मजन्य[illegible]तयाऽनुद्देश्यत्वात्, तस्मात्तदिच्छाऽधीनेच्छाविषयत्वमेव तत्तादर्थ्यम्, 'स्वर्गाय पुण्य'मित्यादयस्त्विष्यन्त एव, वार्त्तिकं दृष्ट्वा सूत्रकृतोऽप्रवृत्तेर्न 'तुमर्था'दितिसूत्रानुपपत्तिरपीति । नमःस्वस्त्यादिशब्दयोगेऽपि तदर्थविशेषणवाचका'न्नमःस्वस्ती'ति सूत्रेण चतुर्थी विधीयते, तत्र नमःपदार्थस्त्यागो, नतिश्च, तत्र नतिः—स्वाऽप-

१ 'वर्णयन्त' इत्यन्वयः । २ तेपां = वृत्तिकृताम् । ३ 'उक्त'मिति शेषः ।

ॐ दर्पणः ॐ

कर्षबोधनाऽनुकूलो व्यापारः 'हरये नम' इत्यदौ, 'एषोऽर्घः शिवाय नम'इत्यादौ त्यागः । चतुर्थ्या च तत्रोद्देश्यत्वम्प्रत्याय्यते, त्यागश्च यदि 'शिवस्यायं भवत्विति फलेच्छाऽधीनो न ममे'त्याकारकः स्वस्वत्वेच्छाभावरूपस्तदा तदुद्देश्यत्वं—त्यागजनकेच्छायाः स्वत्वभागितया विषयत्वम्, यदि त्यागरूपेच्छैवाऽन्यदीयत्वेन त्यज्यमानगतं स्वत्वमपि विषयीकरोति, तदा स्वत्वभागितया विषयत्वमेव तदुद्देश्यत्वम्, न तु स्वीकाराश्रयत्वम्, शिवादेर्विग्रहवतोऽपि स्वीकाराऽभावात्, तदाऽऽकारकतया ध्यातस्य मन्त्रस्य त्यागोद्देश्यतामते तदभावाच्च, त्यज्यमानोपचारादौ शिवादिनिरूपितस्वत्वाऽभावेऽपि तदीयत्वेन तत्र द्रव्ये स्वत्वाऽवगाहिनीच्छा विसंवादिरूपैवा—अन्यदीयस्वत्वे बाधितं शिवादिनिरूपितत्वं, शिवादिनिरूपितप्रसिद्धस्वत्वान्तरे वा बाधितं तद्द्रव्यसम्बन्धमवगाहते । तत्र प्रथमे स्वत्वप्रकारकेच्छाजन्यत्वं, जन्यतासम्बन्धेन तादृशेच्छावत्त्वं वा चतुर्थ्यर्थः, तत्र प्रकृत्यर्थस्य शिवादेर्विषयताविशेषसम्बन्धेनाऽन्वयः, द्वितीये विषयताविशेष एव सः, तत्र च प्रकृत्यर्थशिवादेर्निरूपितत्वसम्बन्धेनाऽन्वयः, नमःपदार्थत्यागस्य विषयताविशेषसम्बन्धेनाऽर्घादिद्रव्येऽन्वयः, द्रव्यस्यैव वा विशेष्यतया भासमानत्यागेऽन्वयः, 'शिवायोत्सृजती'त्यादाविव नात्रानिराकर्त्तृसम्प्रदानता,[1] नमःपदस्याऽधातुत्वात्, नमःपदेन च स्वप्रयोक्तृपुरुषकर्तृकत्वोपरागेणैव त्यागे, त्यज्यमानद्रव्ये च तदीयत्वसंशयाऽनुदयात्, अत एव तदीयत्वबोधनायाऽहं दद इतिवद्, 'अहं नम' इत्यादि न प्रयुज्यते, ऋत्विजा च यजमानरूपपुरुषान्तरीयद्रव्यत्यागे स्व...नाऽभावः, ...पैव पूजायां नमःपदं प्रयुज्यते, स चारोपस्तस्मिन् विशेषदर्शनदशाया...ग्रामकं च ...पपद्यते, प्रतिनिधिप्रयुक्तदानवाक्यस्येव पूजायां नमःपदघटितवाक्यस्य ग्राहारूपा...कत्वेऽप्यदृष्टजनकत्वं न विरुद्धम्, शास्त्रप्रामाण्यादित्याद्यन्यत्र विस्तरः ।

ॐ काशिका ॐ

वृत्तिकारास्त्विति । स्वस्वत्वनिवृत्तिपर्यन्तमिति । स्वस्वत्वनिवृत्त्य...त्यया प्र...नैव प्रतीय...मित्यर्थः । इदं च दानमात्रेण न परस्वत्वोत्पत्तिरपि तु प्रतिग्रहेणेत्यभिप्रेत्य...ति स्वस्वत्वनिवृत्तिपरमात्रस्वत्वोत्पत्त्यनुकूलव्यापारपर्यन्तमित्यर्थः । संसृष्टिधने ददा...यतात्वन्यवपरमात्रेत्युक्तम् । स्वत्ववति स्वत्वान्तरानुत्पत्त्या यत्रापि स्वत्वविनाशोऽभ्युपेतव्यः । तात्यस्य ...र्थः, स्वत्वोत्पादेऽपि न परमात्रस्वत्वोत्पत्तिरिति नातिप्रसङ्गः । स्वत्वं च दानादिनाश्यं प्रतिग्रहादिजन्यं पदार्थान्तरम् । पितृभ्यः श्राद्धं दद्यादित्यादौ पितृनिरूपितस्वत्वबाधेऽपि दानोद्देश्यत्वस्य पितृष्वक्षततया संप्रदानत्वान्न दोषः । अर्थं वर्णयन्त इति । उक्तदानकर्मणेत्याद्यर्थमित्यर्थः ।

[1] वक्ष्यमाणत्रिविधसम्प्रदानान्तर्गताऽऽद्याऽनिराकर्त्तृसम्प्रदानता ।

इदञ्च—'अनिराकरणात् कर्त्तुस्त्यागाङ्गं कर्मणेप्सितम् ।
प्रेरणानुमतिभ्यां च लभते सम्प्रदानताम् ॥'

—इति वाक्यपदीयात् त्रिविधम्, 'सूर्यायार्घ्यं ददाती'त्याद्यम्', नात्र सूर्यः प्रार्थयते, नानुमन्यते, न निराकरोति । प्रेरकं,—'विप्राय गां ददाति,' अनुमन्तृ,—'उपाध्यायाय गां ददाति' ।

❀ दर्पणः ❀

तद्विजभते—इदमिति । 'कर्मणा यमभिप्रैती'ति सङ्केतितं सम्प्रदानं चेत्यर्थः । 'त्रिविध'मित्यनेनाऽन्वितम् । 'त्यागाङ्गं कर्मणेप्सितं कर्त्तुरनिराकरणादित्रिभ्यः सम्प्रदानव्यपदेशं लभत' इति योजना । स्वनिष्ठोद्देश्यतानिरूपकत्वसम्बन्धेन त्यागे समभिव्याहृतधात्वर्थे विशेषणतया प्रतीयमानत्वं तदङ्गत्वम्, तेन 'वृक्षायोदकमासिञ्चती'त्यादौ न वृक्षादेराधिक्यम् । कर्मणेप्सितमिति । कर्मजन्यफलभागितयेच्छाविषयः, इदं च विशेष्यं । तद्भेदनियामकमाह—अनिराकरणादिति । प्रवृत्तिनिवृत्त्यन्यतराऽनुकूलव्यापारशून्यत्वादित्यर्थः । प्रेरणेति । अप्रवृत्तस्य कर्त्तुस्त्यागादाविष्टसाधनताबोधनं प्रेरणा, जातेष्टसाधनताबोधे अप्रामाण्यशङ्कया शिथिलस्य कर्त्तुस्तादृशशङ्काविधूननक्षमप्रमाणोपन्यासेन प्रवर्त्तनं कर्मनिष्ठस्वत्वादिफलाऽभ्युपगममात्राऽनुकूलव्यापारवत्त्वं वाऽनुमतिस्ताभ्यामित्यर्थः । एवञ्च प्रकृतधात्वर्थकर्मजन्यफलभागितयेच्छाविषयत्वे सति कर्त्तृप्रवृत्तिनिवृत्त्यन्यतराऽनुकूल-[illegible]व्यापारवत्त्वम्-अनिराकर्त्तृत्वम्, निरुक्तविषयत्वे सति कर्त्तृसम्बन्धित्यागादि-[illegible]धनताबोधौपयिकव्यापारवत्त्वं प्रेरकत्वमित्याद्यूह्यम् । सूर्यायार्घ्यं [illegible] । अत्र मतभेदेन दाधातोः परस्वत्वेच्छाधीनस्वस्वत्वाभावच्छारूपः [illegible]गोचरस्वस्वत्वाभावेच्छारूपो वा त्यागोऽर्थः । अन्वयबोधस्तु 'नमःस्वस्ती'

एवञ्च-'वृक्ष[illegible] निर्दिश[illegible] स्फुटीकरिष्य[illegible] [illegible]त्यादि । [illegible]ात् । [illegible] भा [illegible], फ [illegible] ', [illegible]म्यर्थत्वे सूत्रं प्र[illegible] कर्मर[illegible] [illegible]ऽप्यवधेः कथं तद् [illegible] ति- [illegible]दानम्' इति [illegible]

❀ काशिका ❀

[illegible]त्वनम् । तद्बीजं तूक्तमेव । इदं चेति । इदं च = संप्रदानं च, त्रिविधम् ।[2] [illegible]तुमाह—अनिराकरणादित्यादिना वाक्यपदीयादित्यन्तेन । कर्तुः कर्मणा ईप्सि-[illegible]णाद्दानानिराकरणादप्रत्याख्यानात् प्रेरणानुमतिभ्यां च दानविषयकप्रेरणानुमतिभ्यां च त्यागाङ्गं = त्यागनिर्वाहकम्, अनेन कारकत्वमावेदितं तथा च तादृशं कारकं संप्रदानतां लभत इति योजना । अथवा संप्रदानतायामेवानिराकरणादित्यादि त्रयं हेतुत्वेनान्वेति । तथा चानिराकर्तृ प्रेरकमनुमन्तृ चेति त्रिविधमित्यर्थः । नात्र सूर्य इति । सूर्ये प्रार्थनानुमत्योर्निराकरणं तद्रूपाना-

१ आद्यम् = अनिराकर्त्तृ । २ 'इतियोजने'तिशेषः ।

अत्र सर्वत्र प्रकृतिप्रत्ययार्थयोरभेदः संसर्गः, विभक्तीनां धर्मिवाचि-

※ दर्पणः ※

तिसूत्रोक्तदिशोहनीयः। **सर्वत्रेति।** तत्तत्सूत्रविहितद्वितीयाद्यन्तप्रयोगेष्वित्यर्थः। **अभेदः संसर्ग इति।** अभेदात्मकः संसर्गो विशिष्टबुद्धिनियामको विशेष इत्यर्थः। अभेदसंसर्गकप्रकृत्यर्थप्रकारकबोधं प्रति सम्बन्धार्थकविभक्तिभिन्नप्रत्ययजन्योपस्थितेर्हेतुत्वादिति भावः। यत्तु—'सम्बन्धस्य सम्बन्धिभेदनियतत्वादभेदस्य सम्बन्धत्वे मानाभावादभेदसंसर्ग इत्यस्याभेदेऽपि संसर्गः—इतरसम्बन्धानवच्छिन्नविशेष्यविशेषणभाव इति, तन्न, विशेष्यविशेषणभावस्याऽपि सम्बन्धनियतत्वेन तदसत्त्वे तस्याऽप्यसम्भवात्। अत एव भासमानवैशिष्ट्यप्रतियोगित्वं विशेषणत्वमिति टीकाकृतः। कथमन्यथा 'द्विष्ठोऽप्यसौ परार्थत्वा'दिति विशेषणत्वेन विवक्षितस्य सम्बन्धं विना विशेषणत्वाऽसम्भवेन तदाकाङ्क्षित्वादिति स्वयं व्याख्यातम्। न च तस्य सम्बन्धत्वे 'नीलो घट' इत्यादौ षष्ठ्यापत्तिरिति वाच्यम्, 'राहोः शिर' इत्यादावौपाधिकभेदसम्बन्धमादाय षष्ठ्युपपादनपरस्या'ऽनेकाऽवस्थायुक्तराहोरिदमेकाऽवस्थायुक्तं शिरोऽवयव' इति भाष्यप्रामाण्येन भेदमूलकसम्बन्ध एव षष्ठीत्यर्थलाभाद् भेदसम्बन्धे तदापादनाऽसम्भवात्, तादृशभाष्येणाऽभेदसम्बन्धस्य प्रातिपदिकाऽर्थविशेष्यत्वाऽविवक्षणाद्वा। सम्बन्धस्य सम्बन्धिभेदनियतत्वं स्वसिद्धमेव, यदि,—भेदनियतत्वमेवेत्याग्रहस्तदा सर्वसाधारण्याय सम्बन्धिताऽवच्छेदकभेद एव नियामकत्वेनाऽभ्युपेयताम्, न च तत्सम्बन्धत्वे मानाऽभावः, सर्वसिद्धनीलादिविशिष्टबुद्धेरेव मानत्वात्, शाब्दबोधे तज्ज्ञाननियामकं च प्रकृतिप्रत्ययविशेषयोः, समानाधिकरणप्रातिपदिकाऽर्थयोश्च समभिव्याहाररूपा-

※ काशिका ※

क्रान्तत्वबोधनाय। द्वितीयादिकारकप्रकृत्यर्थविभक्त्यर्थयोरन्वयबोधं वर्णयति—...[illegible]त्या प्रा...
'हरिं भजती'त्यादिषु। प्रकृतिप्रत्ययार्थयोरिति। प्रकृत्यर्थस्य प्रत्ययार्थेऽभेदस...[illegible] एव प्रतीय...
मित्यर्थः। न च प्रत्ययार्थे प्रकृत्यर्थस्याभेदसंबन्धेन विशेषणत्वं न दृष्टमिति वाच्य...[illegible]
...[illegible] तातत्वन्यव-
देवतार्थकतद्धितादौ दृष्टत्वात्। तदुक्तम्— ...त्म्यस्य
'आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः।' इति। ...र्थः।

तत्र द्वितीयार्थस्याश्रयत्वस्याधेयतासंबन्धेन फलेऽन्वयः। कर्तृतृतीयार्थस्य तस्य धातूपात्तव्यापारे, करणतृतीयार्थस्य तस्य व्युत्पत्तिवैचित्र्येण तृतीयोपात्तव्यापारे, तस्य च जन्यतासंबन्धेन धात्वर्थव्यापारे तदुपात्तफले च। अथवा व्यापारो न तृतीयार्थः। अपि त्वाश्रयः करणत्वशक्तिमान् वा, तस्य स्ववृत्तिव्यापारजन्यत्वसंबन्धेन धात्वर्थे सप्तम्यर्थाश्रयस्य कर्तृकर्मद्वारा तन्निष्ठ-

❀ दर्पणः ❀

काङ्क्षादिः, अत एवाऽर्थवत्सूत्रे भाष्ये—'एषां पदानां सामान्ये वर्त्तमानानां यद्विशेषे पर्य्यवसानं स वाक्याऽर्थ' इत्युक्तम्। अन्विताभिधानवादिमतेन चेदम्, तन्मतेऽन्वितस्यैव पदाऽर्थत्वात्, तचा च सामान्यरूपेण सम्बन्धवाचकानां पदानां यद्विशेष इत्यादेस्तत्तदनुयोगिप्रतियोगिकत्ववैशिष्ट्यबोधकत्वम्, आकाङ्क्षादिसमवधानात् स एव वाक्याऽर्थो = वाक्यजन्यबोधविषय इत्यर्थः, वाक्यशक्त्यभिप्रायेण वा तथाऽभिधानम्, प्रातिपदिकाऽर्थसूत्रे भाष्ये 'पदसामानाधिकरण्य उपसङ्ख्यानमधिकत्वा'दित्यस्य तु,—'वीरः पुरुष' इत्यादौ विशेष्यविशेषणभावप्रयोजकप्रातिपदिकार्थाऽतिरिक्ताऽभेदसंसर्गस्याऽपि भानात् प्रातिपदिकाऽर्थमात्राऽभावात् प्रथमा न प्राप्नोतीत्यतः प्रथमाया उपसङ्ख्यानमारब्धव्यमित्यर्थान्न तद्विरोधोऽपि। कैयटेनाऽपि,—'न वाक्याऽर्थत्वा'दिति तत्प्रत्याख्यानावसरे—वीरप्रातिपदिकादनपेक्षितशब्दान्तरोहितविशेषणभावात् स्वार्थमात्रनिष्ठात् प्रथमा विधीयते इत्यत्र—'प्रतिपादित'पदमपहायो'हित'शब्दं प्रयुञ्जानेन—विशेष्यविशेषणभावनियामकत्वमितरसम्बन्धस्यैवाङ्गीकृतम्। वस्तुतस्तु—प्रकृते विशेष्यविशेषणभावस्य सम्बन्धतानुपपन्नैव, सम्बन्धस्य सम्बन्धिभेदनियतत्वादिति त्वदुक्तेः, विशेष्यविशेषणयोर्भाव इति व्युत्पत्त्या—तस्या विशेष्यत्वविशेषणत्वमात्रपर्य्यवसायितया प्रत्येकं तयोरद्विष्ठत्वाच्च, अऽनुयोगित्वप्रतियोगित्वाभ्यां द्विष्ठत्वोपपादनेऽप्येकस्यैव सा स्यान्न समुदितयोर्द्वयोः, स्वस्वामिभाववत्, शब्दानुगममात्रस्याऽर्थापरिच्छेदकत्वात् सम्बन्धान्तरे षष्ठी, न विशेष्यविशषणभावसम्बन्धे इत्यत्र मानाभावाच्च, तस्माद्यथोक्तमेव रमणीयमिति।

❀ काशिका ❀

[illegible] फले चेति यथाक्रममिति बोध्यम्। प्रत्यक्षार्थकधातुसमभिव्याहारे लौकिकविषयतैव [illegible] त्या [illegible] वच्छेदकः संवन्ध इति नियमः, अन्यथा सौरभाद्यपनीतभानेऽपि 'सौरभं पश्यती'त्यादि- [illegible] प [illegible] ं च कथमत्र तथाविधप्रकारतायाः फलतावच्छेदकत्वाभ्युपगम इति न [illegible] म्यर्थत्वे सूत्रं [illegible] कर्म [illegible] नियमस्य विषयानुपहितप्रत्यक्षार्थस्थले एव स्वीकारात्। 'गन्धं जिघ्रती'त्यत्र [illegible] ऽप्यवधेः कथं तत्व [illegible] ति- [illegible] लो व्यापारो धात्वर्थः। न तु गन्धस्य तदर्थेऽन्तर्भावः। लौकिकविषयता- [illegible] दानम्' इति [illegible] दकसंवन्धेन तथाविधप्रत्यक्षरूपफलाश्रयत्वाद् गन्धस्य कर्मत्वमिति बोध्यम्। [illegible] घ्रती'त्यत्र गन्धनिरूपितलौकिकविषयिताशालिप्रत्यक्षानुकूलो व्यापारो धात्वर्थः। आधेयत्वीयसांसर्गिकविषयतानिरूपितप्रकारतारूपविषयताविशेषात्मकफलतावच्छेदकसंवन्धेन तथाविधप्रत्यक्षात्मकफलाश्रयतया पुष्पस्य कर्मत्वम्। 'तदाननं मृत्सुरभि क्षितीश्वर' इत्यत्रानने गन्ध इति ज्ञानीयताद्दशप्रकारतावत्वमाननेऽस्तीत्याननस्य कर्मत्वोपपत्तिः। संवन्धघटकप्रकारत्वे गन्धनिष्ठविशेष्यतानिरूपितत्वं निवेशनीयम्। तेनदानींतनपुष्पे गन्ध इति प्रत्यक्षीयपुष्पे विशेष्यता-

त्वात्, धर्ममात्रवाचकत्वे,—'कर्मणि द्वितीये'ति सूत्रस्वरसभङ्गापत्तेः,'

❀ दर्पणः ❀

ननु विभक्तीनां धर्मवाचकत्वस्य तन्त्रान्तरसिद्धतया कथं तत्र प्रकृत्यर्थस्याऽभेदेनाऽन्वयः, ? अयोग्यत्वादत आह—**विभक्तीनामिति**। कारकविभक्तीनामित्यर्थः। धर्मिवाचकत्वात् = शक्तिमच्छक्तत्वादित्यर्थः। नन्वस्तु शक्तिरेवाऽर्थोऽत आह—**धर्मवाचकत्व इति। सूत्रस्वरसभङ्गापत्तेरिति**। तद्घटककर्मादिपदानां धर्मपरतां विनोक्ताऽर्थाऽलाभात्तत्परत्वे तद्भङ्गः स्पष्ट एवेत्यर्थः। तथाऽर्थस्य सूत्रकारसम्मतत्वे,—'कर्म द्वितीये'त्याद्येव ब्रूयादिति भावः। ननु 'कर्मणी'त्यादौ विषयसप्तमी, बोध्य इत्यर्थः, तथाच विभक्तीनां धर्माऽवाचकत्वेऽपि तस्याश्रयतया प्रकृत्यर्थेऽन्वयेन कर्मबोधात्, तत्र प्रकृत्यर्थस्याधेयतयाऽन्वये तु तल्यवित्तिवेद्यतया तण्डुलादीनां फलाश्रयकर्मत्वादिना भानान्न सूत्रस्वरसभङ्गोऽत

❀ काशिका ❀

निरूपिताधेयत्वीयसांसर्गिकविषयतानिरूपितप्रकारतायाः काले समादायापि नोक्तदोषः। समवायसंबन्धावच्छिन्नत्वेनाधेयत्वस्य विशेषणत्वादिति दिक्त्वेऽपि कालं जिघ्रतीति न प्रयोगः। काले गन्ध इति भ्रममादाय तद्दोषतादवस्थ्यं तु नापाद्यम्, तादृशभ्रमस्याप्रामाणिकत्वात्। अत एव 'तेजो जिघ्रति' 'रूपं जिघ्रती'त्यादिप्रयोगे न कालिकसंबन्धावच्छिन्नाधेयत्वसंबन्धेन कालप्रकारकप्रमा। ननु द्वितीयार्थाश्रयस्याधेयतासंबन्धेन धात्वर्थफलेनान्वयस्वीकारो न संभवति, तस्य हर्यादिरूपनामार्थाभिन्नस्य धात्वर्थे भेदसंबन्धेनान्वयस्याव्युत्पन्नत्वात्। अन्यथा तण्डुलः पचतीत्यत्र कर्मत्वादिसंबन्धेनापि तदापत्तेरिति चेन्न। नामार्थधात्वर्थयोर्विभक्त्यर्थमद्वारीकृत्य परस्परमन्वयो नेत्येव व्युत्पत्तेः। प्रकृते विभक्त्यर्थद्वारा तथान्वये बाधकाभावात्। ननु प्रकृतिप्रत्ययार्थयोरभेदः संसर्गो न संभवति, विभक्तीनां धर्ममात्रवाचकत्वादित्यत आह—**विभक्तीनां धर्मीति**। द्वितीयादीनां कर्मत्वादिरूपधर्ममात्रे शक्तिर्लाघवादुचिता तत्र प्रकृत्यर्थस्य स्वरूपसं[illegible] नाधेयतयान्वयः। तस्य च निरूपकतासंबन्धेन धात्वर्थफलादाविति परमतं दूषयति—[illegible]त्वया प्र[illegible] मात्रपदेन धर्मिव्यवच्छेदः। 'कर्मणि—' इति। 'कर्मणि द्वितीया' 'क[illegible]णैव प्रतीय[illegible] इत्यादिसूत्रस्वरसभङ्गापत्तेरित्यर्थः। अन्यथा 'कर्मत्वे द्वितीया' इत्यादि सूत्र[illegible]श्रयतात्वन्यव- इत्यादि। कर्मणि वाच्ये इत्यादिर्नार्थोऽपि तु कर्मणि बोध्ये द्वितीयेत्यादिरर्थः, तादात्म्यस्य प्रकृत्यर्थस्य प्रत्ययार्थेऽन्वयाद् भवति, एवं च न तत्स्वरसभङ्गः। न चाश्रय[illegible]निष्ठ-[illegible]र्थः। प्रकृत्यर्थस्यान्वयेऽपि हरिविशिष्टमाश्रयत्वमित्येव बोधो, न त्वाश्रयत्ववान् हरिस्तत्कथं कर्मबोधनिर्वाहकत्वं द्वितीयाया इति वाच्यम्, आश्रयत्वे प्रकृत्यर्थहर्यादेरन्वयबोधे हरिराश्रय इति मानसबोधसंभवात्। 'राजसखो देवदत्त' इत्यतो देवदत्ते राजमित्रत्वशाब्दबोधे राजनि देवदत्तमित्रत्व-

१ उद्देश्यताश्रय इत्येव तदर्थात्।

कर्मार्थककृत्तद्धितादौ तथा दर्शनाच्च, द्वितीयाद्यर्थकबहुव्रीहौ 'प्राप्तोदक' इत्यादौ धर्मिवाचकत्वालाभाच्च, 'सुपां कर्मादयोऽप्यर्थाः सङ्ख्या चैव तथा तिङा'मिति भाष्याच्चेति दिक् ।

※ दर्पणः ※

आह—**कर्मार्थकेति** । कृति—'पक्वस्तण्डुल' इत्यादौ, तद्धिते—'शत्योऽश्व' इत्यादौ । आदिपदात्,—'पच्यमानस्तण्डुल' इत्यादौ लडादेशशानच्संग्रहः । **तथा दर्शनादिति** । धर्मिवाचकतादर्शनादित्यर्थः । तथाच कर्मपरामर्शकतच्छब्दघटित'तयो'रित्यादिसूत्रविहितक्तादीनां धर्मिवाचकत्ववदत्राऽपि तद्वाचकत्वमेव न्याय्यमिति भावः । ननु तत्र पदार्थान्तरसामानाधिकरण्याऽनुपपत्त्याऽस्तु तथात्वमत्र तूक्तापत्त्यभावेनाऽस्तु धर्मवाचकत्वमेवेत्यत आह—**द्वितीयाद्यर्थकेति** । द्वितीयादिविभक्तीनां धर्मवाचकत्वे तदर्थविहितसमासस्यापि धर्मवाचकत्वापत्त्या 'प्राप्तोदक' इत्यादावुदककर्तृकप्राप्तिकर्मत्वस्य समासार्थस्य समानविभक्तिकपदोपस्थाप्यग्रामादावभेदान्वयाऽनुपपत्तेरत्राऽपि जागरूकतया द्वितीयादिविधायकसूत्रस्थकर्मादिपदानां धर्मिवाचकत्वमावश्यकमिति भावः । ननु त्वन्मतेऽपि षष्ठ्याः सम्बन्धार्थकतया तदर्थविहितबहुव्रीहेः पदार्थान्तरसामानाधिकरण्यानुपपत्तेस्तौल्येन तत्र लक्षणया, विशिष्टशक्त्या वा सामानाधिकरण्यस्योपपाद्यतयाऽन्यत्राऽपि तयैव रीत्या निर्वाहे कृतं सुपां धर्मिवाचकत्वेनेत्यत आह—**सुपां कर्मादयोऽप्यर्था इति** । यदि कर्मत्वादिधर्मो द्वितीयादिवाच्यतया विवक्षितोऽभविष्यत् तदा कर्मत्वादयोऽप्यर्था इत्येवाऽवक्ष्यत्, तदनुक्त्या तु तेषां द्वितीयाद्यर्थत्वमप्रामाणिकम्, मुनित्रयाऽनुक्तत्वादिति भावः ।

※ काशिका ※

[illegible] संवे[illegible], कर्मणि शक्तिबोधकसूत्रस्याश्रयमात्रशक्तिग्राहकत्वकल्पनापि, भवन्मतेऽपि सूत्रस्वरस[illegible] [illegible] च कथ[illegible] फलस्य धातुलभ्यतयाश्रयमात्रे तत्कल्पनमिति चेन्ममापि मते लाघवाद्धर्मे [illegible] नियमस्य तुल्यमित्यत आह—द्वितीयाद्यर्थकेति । **धर्मिवाचकतेति** । 'प्राप्तोदक' इत्यत[illegible] [illegible] व्यापारो[illegible] कर्मग्राम इत्याकारकस्य समासार्थस्य, ग्रामस्य च सामानाधिकरण्यविषयकबोध[illegible] [illegible]दकसंबन्धेन [illegible]स्य निर्वाहाय द्वितीयायाः कर्मणि शक्तिरावश्यकी । अन्यथा द्वितीयार्थबहुव्रीहेरपि [illegible]'त्यत्र [illegible]वकत्वापत्त्या सामानाधिकरण्यानुपपत्तेः । धर्मिवाचकतायां भाष्यमपि साधकमित्याह—**सुपां कर्मादय इति** । परमते तु एतत्स्वरसभङ्गापत्तिश्चेति भावः । न चात्रापि कर्मपदं कर्मत्वपरम्, अनेकस्थले लक्षणापत्तेः । ननु कर्मणीत्यादौ कर्मादिपदे लक्षणापत्तावपि द्वितीयादीनां धर्ममात्रवाचकत्वमुचितं लाघवात्, अस्तु च बहुव्रीहेरपि धर्ममात्रवाचकत्वं, सामानाधिकरण्यं च लक्षणयोपपाद्यम्, मुख्यार्थे प्राप्तोदकादिप्रयोगस्तु प्राप्तोदकोऽस्तीत्यादावित्यत आह—दिगिति ।

आश्रयस्यापि प्रकृत्यैव लाभान्न विभक्तिवाच्यता, किन्त्वाश्रयत्वमात्रं वाच्यम्, तदेव च तादात्म्येनावच्छेदकं, करणतृतीयायाश्च-व्यापारोऽपि, पञ्चम्या-विभागमात्रं, चतुर्थ्या—उद्देश्यत्वमात्रम्, अत एवाऽऽकृत्यधि-

❀ दर्पणः ❀

शक्तिवादपक्षमवलम्ब्याह—**आश्रयस्यापीति**। आश्रयत्वेन भानं त्वसिद्धमेवेति भावः। **आश्रयत्वमात्रमिति**। 'द्वितीयातृतीयासप्तमीना'मिति शेषः। 'मात्र'पदेनाश्रयत्वव्यवच्छेदः। नन्वाश्रयत्वस्य शक्यत्वे-आश्रयत्वं शक्यताऽवच्छेदकं वाच्यं, तच्चाश्रयत्वेतरावृत्तित्वघटितत्वाद् गुर्विति शक्यतावच्छेदकगौरवमेवैतस्मिन् कल्पे दोष इत्यत आह—**तदेवेति**। आश्रयत्वमेवेत्यर्थः। एवकारेण निरुक्ताश्रयत्वत्वव्युदासः, तस्याऽखण्डत्वस्योपपादितत्वात्, नानाव्यक्तिविशेष्यकशक्तिग्रह एव स्वेतरधर्मस्याऽवच्छेदकत्वाऽपेक्षणादिति भावः। कर्तृतृतीयाया आश्रयमात्रार्थकत्वादाह—**करणेति**। 'व्यापारोऽपी'त्यपिनाश्रयसमुच्चयः। **विभागमात्रमिति**।

❀ काशिका ❀

तदर्थसमवेतं सति कृतत्तद्धितसंज्ञकस्यापि तव्यादेर्धर्मिवाचकत्वं न सिध्येत्। 'पक्तव्यास्तण्डुला' इत्यादौ तण्डुलादिसामानाधिकरण्यानुभवानुरोधात्तथेति चेन्न। उक्तरीत्यैव तदुपपत्तेः। 'पक्तव्य' इत्यादितः कर्मत्वमात्रबोधोऽनुभवविरुद्ध इति चेत्, प्रासादकादावपि तुल्यमिति भावः। द्वितीयादीनामाश्रयेऽपि न शक्तिः, फलव्यापारयोर्धातुलभ्यत्ववदाश्रयस्यापि प्रकृतिभूतप्रातिपदिकेन लभ्यत्वात्, अपि त्वाश्रयत्वादिमात्रेऽनन्यलभ्यत्वात्। धर्मधर्मिणोश्चाभेदात् कर्मणीत्यादिनिर्देशो नानुपपन्नः, अत एव द्वितीयादेः कर्मत्वादिशक्तिवाचकत्वमिति सिद्धान्ते प्रासादकादिवद्व्रीहेर्धर्मिबोधकतानिर्वाहः, शक्तिमदभेदापन्नाया एव शक्तेर्विभक्तिवाच्यत्वात्। तिङ्कृदादेस्तु पचति पक्ता पक्व इत्यादित एवाश्रयप्रतीतेः 'युष्मद्युपपदे समानाधिकरणे—' इति व्यवहारानुरोधाच्चाश्रये शक्तिर्युक्तेत्याशयेनाह—आश्रयस्यापीत्यादिना। आश्रयस्यापि प्रकृत्यैव लाभान्न विभक्तिवाच्यता इत्यन्वयः। **न विभक्तीति**। न द्वितीयादिविभक्तिवाच्यतेत्यर्थः। नन्वाश्रयत्वस्य वाच्यत्वेनैव प्रतीयमानतात्वस्य शक्यतावच्छेदकत्वमुपेयं, तथा च गौरवं, तस्य तदाश्रयायतिरिक्तावृत्तित्वे सति सकलतदाश्रयवृत्तित्वरूपत्वादित्यत आह—तदेवेति। आश्रयत्वमेवेत्यर्थः। एवेनाश्रयतात्वव्यवच्छेदः। तद्वृत्तेस्तस्य कथं तन्निष्ठवाच्यतावच्छेदकत्वमित्याशङ्क्याह—तादात्म्येनेति। तादात्म्यस्य वृत्त्यनियामकत्वेऽपि संबन्धित्वं तेन संभवत्येवेत्याश्रयत्वस्य तादात्म्येन स्वसंबन्धितया न स्वनिष्ठवाच्यतावच्छेदकत्वानुपपत्तिरिति भावः। यद्यप्याश्रयतात्वस्याखण्डोपाधित्वाङ्गीकारे तस्यावच्छेदकत्वेऽपि न गौरवं, तथापि फलाश्रयत्वत्वादेरेव द्वितीयादिवाच्यत्वे चाश्रयतात्वस्यातिप्रसक्ततया तदवच्छेदकत्वासंभवः, फलाश्रयतात्वस्यानेकफलघटिततया गौरवतादवस्थ्यम्। किं चाश्रयतात्वविशिष्टे शक्तिकल्पनायां धर्मधर्मिणोरुभयत्र तत्कल्पनया न पूर्वकल्पापेक्षया लाघवमिति भावः।

करणमपि न विरुद्ध्यत इत्यभिप्रेत्याह—शक्तिरेव वेति। षण्णामपीति शेषः।

❀ दर्पणः ❀

'मात्रपदेनाश्रयत्वव्यवच्छेदः, विभागस्याश्रयतयाऽन्वयादेव वृक्षादावचधित्व-लाभादिति भावः। वस्तुतस्तु—वृक्षादेरवधित्वरूपसम्बन्धेन पञ्चम्यर्थविभागेऽन्वय इत्युक्तम्, 'उद्देश्यत्वमात्र'मित्यनेनाप्याश्रयत्वस्य सः। **अत एवेति**। कर्मत्वादिश-क्तेस्तत्तद्विभक्तिवाच्यत्वकथनादेवेत्यर्थः। **न विरुद्ध्यत इति**। शक्तिग्रहे जाति-व्यक्त्योरुभयोर्भानाविशेषेऽपि जातिरेव शक्या, 'नागृहीतविशेषण'न्यायाद्, 'विशेष्यं नाभिधा गच्छे'दिति न्यायाच्च, व्यक्तिशक्तौ व्यभिचारात्, तासामानन्त्याच्चेति तत्र सिद्धान्तितमिति।

कारकविभक्त्यर्थं निरूप्य प्रसङ्गात् षष्ठ्यर्थं निरूपयति—सूत्रे—**सम्बन्ध इति**। 'शेषे षष्ठी'ति सूत्रात्। कारकप्रातिपदिकाऽर्थभिन्नः स्वस्वामिभावादिसम्ब-न्धश्च तत्र 'शेष'पदाऽर्थः, तत्राऽन्यविभक्तीनां मतभेदेन धर्मिधर्मवाचकत्ववदेत-

❀ काशिका ❀

व्यापारोऽपीति। करणताघटकव्यापारोऽपीत्यर्थः। अपिनाश्रयत्वपरिग्रहः। षण्णामिति। षण्णां कारकविभक्तीनामित्यर्थः। कारकाणां षट्त्वेन तत्प्रयुक्तविभक्तित्वेनोपादानात्—षष्ठीरहित-विभक्तीनां विवक्षणे तासां षट्त्वेऽपि कारकषष्ठ्या असंग्रहः, तत्सहितानां विभक्तीनां विवक्षणे तु तासां सप्तत्वप्रकारकविभक्तिसंग्रहापत्तिश्चेति षण्णामित्युक्तिरसंगतैवेति दूषणानवकाशः। अनेन चोपपदविभक्तीनां संबन्धार्थकत्वमिति सूचितम्।

अथ केषुचित् प्रयोगेषु विभक्त्यर्थो निरूप्यते—तत्रोपपदविभक्तीनामत्राऽर्थे तु विशेषा-नुक्तेस्तत्तत्स्थले तत्संबन्धप्रतीतेश्च तदर्थकत्वम्। तत्र यासां विशेषसंबन्धे विधानं, यत्र च तत्संबन्धेन संबन्धिनि नियताकाङ्क्षा—तत्र तासां विशेषरूपेणैव संबन्धार्थकत्वम्—यथा 'अनुर्लक्षणे' इत्यादौ "...न्तरा त्वां मां हरि'रित्यादौ च। 'जपमनु प्रावर्ष'दित्यत्र लक्ष्यलक्षणभावसंबन्धो द्वितीयावाच्यो संबन्... कर्मप्रवचनीयत्वात्। 'कर्म प्रोक्तवन्तः—कर्मप्रवचनीयाः' इति तद्व्युत्पत्तिप्रदर्शनेन ... च कथं ...शेषं द्योतितवतां संप्रति नामार्थक्रिययोः संबन्धद्योतकानामेव तत्संज्ञाविधानात्। यत्र तु तद्बाधस्तत्र विधानसामर्थ्यात् संज्ञा, यथा 'अधिपरी अनर्थकौ' इत्यादिनाध्यादीनाम्। स्पष्टं चेदं 'कर्मप्रवचनीयाः' इत्यत्र भाष्यादौ। जपमित्यत्र विभक्तेर्हेतुतृतीयाबाधकत्वाद्धेतुवाचकत्वमपि, लक्ष्यत्वं च प्रकृते ज्ञानजन्यज्ञानविषयत्वरूपज्ञाप्यत्वस्वरूपम्। जपस्य हि कालविशेषाधिकरण-कत्वेन ज्ञातस्य स्वाधिकरणकालोत्तरकालवैशिष्ट्येन ज्ञापकत्वम्। एतेन जपस्य वृष्टिव्याप्यत्वा-भावाद्वृष्टेर्जपज्ञाप्यत्वासंभव इति शङ्का निरस्ता। निर्ज्ञातकालक्रियाया अनिर्ज्ञातकालक्रियायाः कालविशेषवैशिष्ट्येन ज्ञापकत्वात्। अत एव 'कदा वृष्ट' इति प्रश्ने एतस्योत्तरत्वं संगच्छते। कालविशेषवैशिष्ट्यज्ञानं च तद्वाक्यजन्यं, मानान्तरजन्यं वेत्यन्यदेतत्। जपाभिन्नहेतुज्ञानज-

'शेषे षष्ठी'ति सूत्रात्तस्याः सम्बन्धमात्रं वाच्यं, कारकषष्ठ्यास्तु शक्तिरेवेत्यलम् ।

ॐ दर्पणः ॐ

स्यास्तथा भ्रमो माभूदित्याशयेनाह सारे—सम्बन्धमात्रमिति । 'पक्षद्वयेऽपी'ति शेषः, स च क्वचित् सम्बन्धत्वेन सामान्यधर्मेण वाच्यः, क्वचिच्च विशेषरूपेणैव, तत्र सामान्यरूपेण—'मातुः स्मरती'त्यादौ, विशेषरूपेण विवक्षायां स्वस्वविषये तत्तद्विभक्तीनां प्रसरात् । 'राज्ञः पुरुष' इत्यादौ तु विशेषरूपेणैव, अनेकसम्बन्धसत्त्वेऽपि सम्बन्धविशेषविवक्षया,—'नेदं चैत्रस्ये'ति प्रयोगात् । सम्बन्धश्च सर्वत्र क्रियाकारकभावमूल एव, 'षष्ठी शेष' इति सूत्रे,—'राज्ञः पुरुष' इत्यत्र 'राजा पुरुषाय ददाती'ति सम्प्रत्ययाद्राजा कर्त्ता पुरुषः सम्प्रदानं, 'वृक्षस्य शाखे'त्यत्र वृक्षे शाखेति लौकिकप्रसिद्ध्या वृक्षः शाखाया अधिकरणम्, यदेतत् स्वम्प्रदानं स्वं नाम चतुर्भिः प्रकारैरेतद्भवति, क्रयणादपहरणाद्याञ्चायाः परिवर्त्तनरूपाद्विनिमयादित्यनेन यत्र श्रूयमाणा क्रिया तत्राऽपि तत्फलसम्बन्धानुमितकरणत्वादिशक्तेर्वस्तुतः सत्त्वादित्यर्थकेन भाष्येण—शेषपदार्थाऽप्रसिद्धिमाशङ्क्य वंतर्हि कर्मादीनामविवक्षा शेष' इति शेषोक्तेः, क्रियाकारकसम्बन्धस्य वस्तुतः सर्वत्र सत्त्वेऽपि तन्निमित्तस्य स्वस्वामिभावादेः सम्बन्धत्वेन विवक्षणे तस्याऽविवक्षा तदा राजपदादेव, यदा तु पुरुषस्य तद्विवक्षा तदा पुरुषपदादपि,—'पुरुषस्य राजे'ति । नचैकदोभयत्र सेति नोक्ताऽतिप्रसङ्गः । तदुक्तं हरिणा—

'द्विष्ठोऽप्यसौ परार्थत्वाद् गुणेषु व्यतिरिच्यते ।
तत्राऽभिधीयमानश्च प्रधानेऽप्युपचर्य्यते ॥' इति ।

परार्थत्वात् = परं प्रति गुणानां विशेषणत्वाद्, विशेषणत्वेन विवक्षितस्य सम्बन्धं विना विशेषणत्वाऽसम्भवेन—सम्बन्धो व्यतिरिच्यते = उद्भूततया प्रती... इति तत्रैव षष्ठी, विशेष्यस्य तु पदाऽन्तराऽसमभिव्याहारे स्वरूपेणैव प्रतीयमानत्वान्न विशेष्यतानियामकसम्बन्धाकाङ्क्षा, तत्र = विशेषणे, अभिधीयमानः = षष्ठ्या प्रतीयमानः, प्रधाने = विशेष्येऽपि उपयुज्यते, तस्य द्विष्ठत्वस्वभावाद्राजनिरूपितविशेष्यताया राजपदसन्निधाने प्रतीयमानाया उपकारको भवतीति तदर्थः । **कारकषष्ठ्या इति ।** 'कर्त्तृकर्मणोः कृती'त्यादिसूत्रविहितषष्ठ्या इत्यर्थः,

ॐ काशिका ॐ

ज्ञानविषयो वर्पणमिति बोधः । उक्तं च हरिणा—

'क्रियाया द्योतको नायं, संबन्धस्य न वाचकः ।
नापि क्रियापदाक्षेपी, संबन्धस्य तु भेदकः ॥' इति ।

॥ दर्पणः ॥

शेषविहितषष्ठ्याः सम्बन्धरूपधर्मवाचकतया षष्ठीत्वेनैतस्या अपि तद्वाचकत्वस्य न्याय्यत्वादिति भावः।

॥ काशिका ॥

तदर्थस्तु 'प्रजयती'त्यादावुपसर्गवन्न क्रियागतप्रकर्षादिरूपविशेषद्योतकः अनुः, प्रादेशं विपरिलिखतीत्यादौ विशब्द इव न क्रियापदाक्षेपी, विंशब्दो हि विमानक्रियामाक्षिपति, अत एव प्रादेशस्य कर्मत्वम्, प्रादेशं विमाय परिलिखतीत्यर्थात्, तथा सत्याक्षिप्तक्रियानिबन्धनद्वितीयासिद्धौ 'कर्मप्रवचनीययुक्ते–' इत्यस्य वैयर्थ्यापत्तेः, किं तु विशिष्टक्रियाजनितोक्तसंबन्धस्य विभक्तिवाच्यस्य द्योतकः, प्रकृते तु निशामनक्रियाकृत उक्तसंबन्ध इति। अन्ये तु लक्षणं = व्यावर्तनं, प्रकृते च प्रवर्षणक्रिया जपोत्तरकालिकतया बोध्यत्वेन विवक्षिता, व्यावर्तकश्च जप इति कालोत्तरकालिकत्वरूपसंबन्धहेतुश्च न द्योत्यो विभक्त्यर्थः। जपाभिन्नहेत्वधिकरणकालोत्तरकालिकं वर्षणमिति बोध इत्याहुः। विशेषसंबन्धे तत्तदुपपदविभक्तेर्विधानं, विशेषरूपेण संबन्धविवक्षणे पष्ठ्येवेति 'चतुर्थी–'इति सूत्रभाष्यसिद्धम्, तत्र हि गुरोरिदं गुर्वर्थमित्यत्र तादर्थ्यस्य संबन्धत्वेन विवक्षायां षष्ठीत्युक्तम्, तेन 'तव मम चान्तरा कमण्डलु'रित्यत्र युष्मदस्मद्भ्यां न द्वितीया, अवधित्वस्य संबन्धत्वेन विवक्षणान्न त्ववधित्वत्वेन। अन्तराशब्दवाच्यमध्याधिकरणघटकमध्यत्वस्यावधित्वसंबन्धेन संबन्धिनियताकाङ्क्षत्वात्, अवधित्वत्वावच्छिन्नस्यैव द्वितीयार्थत्वाद् द्वितीयाऽप्राप्तेः। अत एव स्वसंबन्धिकमण्डलुतात्पर्येणोच्चरिते कमण्डलौ युष्मदस्मदर्थस्य स्वस्वामिभावरूपसंबन्धविवक्षया षष्ठ्यन्तप्रयोगोपपत्तावपि तदस्वामिककमण्डलुतात्पर्यकताद्दृशप्रयोगानुपपत्तिरिति दूषणानवकाशः। अन्तराशब्दस्याभाववानप्यर्थः,—अन्तरा हरिं न सुखमित्यादौ। हरिभक्तिपरहरिशब्दात् प्रतियोगिभावार्थिकाद् द्वितीया। प्रतियोगित्वे हरिभक्तित्वावच्छिन्नाधेयत्वं प्रकृत्यर्थस्य संबन्धः। यद्वा हरिभक्तित्वावच्छिन्नप्रतियोगिताकत्वं द्वितीयार्थः, हरिशब्दस्तात्पर्यग्राहकः। यद्वा प्रतियोगितात्वेन रूपेण द्वितीयावाच्यकोटिप्रविष्टं संबन्धिगित्वम्, तत्तदर्थप्रकृतिसमभिव्याहारवशात् प्रतियोगितात्वेन तद्विशेषभानम्। एतेन शुद्धप्रतियोगित्वस्य वाच्यत्वे हरिभक्तिमत्यपि द्वित्वादिना तत्प्रतियोगिकाभावसत्त्वादन्तरा हरिं सुखमिति प्रयोगापत्तिरिति दूषणं निरस्तम्। अस्तीत्यध्याहारलभ्यसुखकर्तृकसत्ताभावे हरिभक्त्यभावत आधेयत्वसंबन्धेनान्वयः। न च नामार्थयोरिति व्युत्पत्तिविरोधात् तथान्वयासंभव इति वाच्यम्। निपातातिरिक्तेति विशेषणात्। यद्वाभाव एवान्तराशब्दार्थः। सामानाधिकरण्यसंबन्धेन तथाविधाभावे तस्यान्वयः, पक्षद्वयेऽपि सुखाद्यभावे हरिभक्त्यभावप्रयोज्यत्वं पर्यवस्यति। द्वितीयपक्षे तेनैव वा संबन्धेनान्वयः। यद्यपि निपातातिरिक्तेति विशेषणात् प्रतियोगित्वादिसंबन्धेनान्वयः प्रकृत्यर्थस्य संभवति, तथापि तस्याः सार्थकत्वे संभवति साधुत्वमात्रप्रयोजनकत्वस्वीकारोऽनुचितः। षष्ठ्या इव तस्या उक्तार्थकत्वावश्यकत्वाच्च। मञ्जूषाकृन्मते निपातानां नामत्वाभावात्तन्मते निपातातिरिक्तत्वविशेषणप्रवेशो नास्ति। एवमन्तरेणशब्दोऽप्यनेन

❀ काशिका ❀

समानार्थकः। तद्योगेऽपि 'अन्तरान्तरेण' इति सूत्रेण अन्तरेण त्वां मां हरिः, अन्तरेण हरिं न सुखमित्यत्र द्वितीया। तत्राप्युक्तप्रकारोऽनुसर्तव्यः। एवं विनाशब्दोऽप्यभाववदर्थको-ऽभावार्थको वा तत्राप्येषैव दिक्। 'वृक्षं प्रति विद्योतते विद्यु'दित्यादौ प्रतिपर्यनूनां द्योत्यो लक्ष्यलक्षणभावो विभक्तिवाच्यः, निविडान्धकारे वृक्षदर्शनेन हि तत्समीपदेशविशेषे विद्युद्विद्यो-तनमनुमीयते, ज्ञानजन्यज्ञानविषयत्वं विभक्त्यर्थः। वृक्षविषयकज्ञानजन्यज्ञानविषयो विद्युद्विद्यो-तनमिति बोधः। भक्तो विष्णुं प्रतीत्यादौ भक्तत्वाख्यः संबन्धः—कंचित्प्रकारं प्राप्तस्याख्याने प्रत्यादिः कर्मप्रवचनीयसंज्ञ इत्यर्थकेन 'इत्थंभूताख्याने' इत्यनेन—कर्मप्रवचनीयसंज्ञकप्रत्यादिद्योत्यो विभक्तिवाच्यः, न तु विषयविषयिभावस्तथा, सूत्रोपात्तस्य भक्तत्वस्यैव तथात्वौचित्यात्। न च तस्य भक्तपदोपात्ततया न द्वितीयाशक्तिसंभवोऽनन्यलभ्यस्यैव शब्दार्थत्वादिति वाच्यम्। प्रकारतया बोधे सिद्धेऽपि संसर्गतया बोधनिर्वाहाय विभक्तिशक्तेरावश्यकत्वात्। पदान्तरवाच्यस्यापि विभक्त्यर्थस्य संसर्गतया भानस्य चैत्रस्य पुत्र इत्यादौ दृष्टत्वात्। जन्यत्वस्यैव पुत्रपदशक्ति-विशेष्ये संबन्धतासंभवात्। पदार्थः पदार्थेनेति व्युत्पत्तिविरोधेन पदार्थैकदेशजन्यत्वे निरूपितत्वस्य संबन्धताया अनुचितत्वादिति भावः। 'लक्ष्मीर्हरिं प्रती'त्यादौ स्वस्वामिभावः प्रत्यादिद्योत्यो विभक्ति-वाच्यः। हरिस्वामिका लक्ष्मीरिति बोधः। 'वृक्षं वृक्षं प्रति सिञ्चती'त्यादौ वीप्साविषये व्याप्यत्वं द्विर्वचनद्योत्यं, वृक्षशब्दस्य व्याप्यत्वविशिष्टवृक्षपरत्वं, तस्य च व्यापकत्वसंबन्धेनान्वये तात्पर्य-ग्राहकः प्रत्यादिः। व्याप्यतावच्छेदकसंबन्धस्तादात्म्यं, व्यापकतावच्छेदकश्च—सेचनस्य द्रवद्रव्य-संयोगानुकूलव्यापारात्मनः स्वजन्यसंयोगः। तादृशसंयोगे व्यापकत्वभाने तु समवायस्तथा। व्यापकतावच्छेदकाभावे प्रतियोगिवैयधिकरण्यं—निरवच्छिन्नवृत्तित्वरूपं, व्याप्यवृत्तित्वं वा निवेश्यम्। तेन क्रियायाः संयोगस्य चाव्याप्यवृत्तितया तदभावस्य तद्वत्यपि वृक्षे सत्त्वेऽपि न व्यापकत्व-हानिः। सेचनविशेषे जगतीतलगतवृक्षसामान्यव्यापकत्वसंभवेऽपि न क्षतिः। वृक्षपदस्य बुद्धिस्थत्वेन वृक्षविशेषपरत्वात्। तथा च तादृशवृक्षनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगिता-नवच्छेदकं यच्चैत्रकर्तृकसेचनत्वादि तद्वत्त्वरूपं व्यापकत्वं संबन्ध इति पर्यवसितम्। तादृशाभावप्रतियोगिताशून्यत्वम्। तादृशसेचनस्य तादृशवृक्षनिष्ठस्वप्रतियोगितावच्छेदकावच्छिन्न-व्यधिकरणोभयाभावादिप्रतियोगित्वाद् व्यापकत्वासंभवापत्तेरिति दिक्। सेचनक्रियायाः सकर्म-कतया कर्मण्येव द्वितीया, कर्मप्रवचनीयसंज्ञाफलं तु गत्युपसर्गसंज्ञाबाधनद्वारा षत्वाभाव एवेति प्राञ्च आहुः। तन्मते सेचनकर्मत्वे तत्कर्मणि वा स्वरूपसंबन्धेन तादात्म्येन यथाक्रमं व्यापकत्वं प्रकृत्यर्थसंबन्धतया भासते, न तु सेचनादौ। विभक्त्यर्थे विशेषणतयान्वितस्य प्रकृत्यर्थस्य सेचनादौ विशेषणतयान्वयायोगात्। अन्ये तु कर्मत्वाविवक्षायां द्वितीयासिद्धिरपि कर्मप्रवचनी-यसंज्ञाप्रयोजनम्। अत एव प्रत्यर्थं शब्दाभिनिवेश इत्यादावर्थस्य निवेशनक्रियानिरूपिताधि-करणत्वेऽपि अर्थमर्थं प्रतीत्येव विग्रहप्रदर्शनं भाष्यादौ कृतम्। वृक्षादेः क्रियायाः कर्मत्वमुप-गम्यैतस्याः संज्ञाया द्वितीयासाधकत्वाङ्गीकारे तु सप्तम्यन्तेनैव प्रकृते विग्रहस्य समुचिततया

॥ काशिका ॥

तथाविधभाष्यासंगत्यापत्तिः। तादृशसंज्ञाया द्वितीयाफलकत्वे त्वर्थस्याधिकरणत्वाविवक्षायां व्यापकत्वसंबन्धार्थिका द्वितीयेति नासंगतिः। अत एव 'वृक्षं वृक्षं प्रति श्यामता' 'घटं घटं प्रति गन्ध' इत्यादावपि क्रियाजनितव्यापकत्वसंबन्धार्थिका द्वितीया सिध्यति। द्विर्वचनेन व्याप्यत्वद्योतनात् सेचनार्थकपदसमभिव्याहारात्तत्तद्व्यापकं व्याप्यत्वरूपेण प्रकारतया भासते। अनुगतव्याप्यत्वानङ्गीकारे तु वीप्सायां द्विरुक्तिविधानं च? व्याप्यत्वस्य वृक्षाद्यर्थकत्वे मानम्। तथा हि व्याप्तिप्रतीतीच्छाप्रकृते व्युपसृष्टाप्नोतेस्तत्प्रतीतिपरत्वाद् द्विरुक्तप्रयोगादिच्छाया अप्रतीतेर्न तस्य तदर्थकता। एवं च व्याप्तिप्रतीतीच्छायां सत्यां द्विर्वचनमिति वाक्यार्थः पर्यवसन्नः। न च धातुरेव व्यापकत्वार्थकोऽस्तु अस्तु च साधुत्वार्थी विभक्तिरिति वाच्यम्। नामार्थधात्वर्थयोः साक्षाद्भेदसंबन्धस्याव्युत्पन्नतया वृक्षस्य व्यापकतादौ निरूपितत्वादिसंबन्धेनान्वयासंभवात्। अत एव चैत्रः पच्यत इत्यादौ पाकादौ चैत्रादेः कर्तृतानिरूपकत्वादिसंबन्धेनान्वयबोधो न, शोभनं पचतीत्यत्र शोभनपदार्थस्य धात्वर्थे भेदेनान्वयाद्भेदेनेति। तण्डुलं पचतीत्यादौ तण्डुलादेर्विभक्तयर्थद्वारान्वयात्—साक्षादिति। 'मासमधीते' अत्र 'कालाध्वनोः—' इति सूत्रेण कालाध्वानुयोगिकक्रियाद्रव्यगुणादिभावप्रतियोगिकेऽत्यन्तसंयोगेऽत्यन्तसंबन्धे निरन्तरसंबन्धे सत्युपस्थितत्वात् कालाध्ववाचकेभ्यो द्वितीयेत्यर्थकेन द्वितीया। अन्तं विराममतिक्रान्तश्चासौ संयोगश्चेति व्युत्पत्त्या निरन्तरसंबन्धलाभः। उपस्थितशब्दस्वरूपमात्रस्य न प्रकृतित्वं 'कालाः' 'अत्यन्तसंयोगे च' इति समासविधौ वहुवचननिर्देशाल्लिङ्गात्। व्यापकत्वं द्वितीयार्थः। पदार्थतावच्छेदकमासत्वनिरूपितव्यापकत्वभानाङ्गीकारे समवायादिर्व्याप्यताघटकसंबन्धस्तादात्म्यं, तत्त्वं च त्रिंशदहोरात्रत्वरूपमासत्ववन्निष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकधर्मित्वम्। व्यापकताघटकश्च कालिकविशेषणतात्मकः संबन्धः। मासपदं चावयवानतिरिक्तत्रिंशदहोरात्रसमूहपरं, न तु तावत्पर्यन्तस्थायिस्थूलकालपरम्। तथा सत्येकदिनादिमात्राध्ययनकर्तर्यपि मासमधीते इति प्रयोगापत्तेः। तदीयाध्ययनस्यापि त्रिंशदहोरात्ररूपतादृशकालनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकसंबन्धाध्ययनत्ववत्त्वेन मासादिव्यापकत्वसंभवात् तदीयाध्ययनाभावस्य तत्र दिनान्तरावच्छेदेन वर्तमानस्यापि तदीयाध्ययनरूपप्रतियोगिसमानाधिकरणत्वात्। त्रिंशद्दिनसमूहरूपमासपदार्थे तु, तद्घटकदिनान्तरे तदीयाध्ययनाभावस्य प्रतियोगिव्यधिकरणतया नोक्तदोषः। तद्घटकाहोरात्रश्च सूर्योदयावधिसूर्योदयपर्यन्तस्थाय्यवयवातिरिक्तः क्षणसमूहादिरेव। तेन त्रिंशद्दिने प्रत्यहमध्ययनस्थलेऽपि स्वापादिसमयावच्छेदेन मासत्वाधिकरणे क्षणादौ तदीयाध्ययनस्य प्रतियोगिव्यधिकरणाभावसत्त्वेन मासमधीत इति प्रयोगानुपपत्तिरिति दूषणानवकाशः। अभावे प्रतियोगिवैयधिकरण्यानिवेशे उक्तरीत्योक्तदोषतादवस्थ्यमिति तन्निरासाय तन्निवेशः। प्रतियोगिवैयधिकरण्यं च—व्यापकतावच्छेदकत्वेनाभिमतसंबन्धावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नाधिकरणतावद्भिन्नवृत्तित्वम्। न तु तत्संबन्धेन प्रतियोगितावच्छेदकावच्छिन्नाधिकरणावृत्तित्वमध्ययनादेः कालिकाव्याप्यवृत्तितया स्वाधिकरणकालेऽपि किंचित्क्षणाद्यवच्छेदेन स्वाभावस्य सत्त्वेन प्रतियोग्यधिकरणावृत्तित्वाभावेन

❀ काशिका ❀

मासान्तर्गतैकदिनाध्ययनशालिन्यपि मासमधीते इति प्रयोगापत्तिः। क्रोशैकदेशमात्रे पर्वतादि-सत्त्वेऽपि क्रोशत्वाक्रान्ततदन्यदेशनिष्ठसंयोगसंवन्धावच्छिन्नप्रतियोगिताकतदभावस्य क्रोशत्वाक्रान्ते तत्र कालिकसंबन्धेन पर्वतरूपप्रतियोग्यधिकरणत्वसत्त्वेन प्रतियोग्यनधिकरणवृत्तित्ववैशिष्ट्या-भावेनातीततद्वयत्त्यभाव एव क्रोशे तादृशप्रतियोगिवैयधिकरण्यविशिष्टतत्प्रतियोगितानवच्छेद-कत्वस्य पर्वतत्वे सत्त्वात् 'क्रोशं पर्वत' इति प्रयोगापत्तिः। अतो व्यापकताघटकसंबन्धेन प्रतियोग्य-नधिकरणत्वनिवेशः। यदा देवदत्तेन काश्यामुपवास एकाहस्तद्द्वयादिकं वा क्रियते, मासान्तः—पातित्वविशिष्टाहोरात्रेषु काशीतो वहिरुष्यते तादृशस्थले देवदत्तीयो भोजनाभावो मासं काश्या-मिति प्रयोगापत्तिः। काश्यवच्छिन्नत्वविशिष्टदेवदत्तीयभोजनाभावस्य काश्यनवच्छिन्नतादृश-भोजनाभावस्य चैक्येन काश्यवच्छिन्नस्य तादृशभोजनाभावस्याभावो दिनान्तरात्मकतादृशमास-त्वाधिकरणे वर्तमानोऽपि देवदत्तीयभोजनाभावात्मकप्रतियोग्यधिकरणत्वेन तन्मासत्वाक्रान्तदिना-न्तरस्य न प्रतियोगिव्यधिकरणोऽपि त्वन्याभाव एव, तत्प्रतियोगितानवच्छेदकत्वस्य काश्यवच्छिन्न-देवदत्तीयभोजनाभावत्वे सत्त्वात्। एवं मासान्तर्गतदिनद्वयं देवदत्तेन बहिरुषितं तदनन्तर-मष्टाविंशतिदिनानि काश्यामुषितं, तत्र देवदत्ताभावो मासं काश्यामिति प्रयोगापत्तिः। काश्यव-च्छिन्नदेवदत्ताभावाभावस्य मासत्वाक्रान्तदिननिष्ठत्वेऽपि प्रतियोगिव्यधिकरणत्वाभावात्। देशान्त-रावच्छिन्नत्वविशिष्टदेवदत्ताभावरूपप्रतियोगिसमानाधिकरणत्वात्। विशिष्टस्य शुद्धानतिरेकित्वात्। अतः प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशः। तथा सति काश्यवच्छिन्नत्वविशिष्टदेवदत्ती-यभोजनाभावत्वरूपप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वस्य मासत्वाधिकरणदिनान्तरे सत्त्वात् काश्यवच्छिन्नदेवदत्तीयभोजनाभावादिरपि प्रतियोगिव्यधिकरण इति नोक्तातिप्रसङ्गः। अत्रेदं बोध्यम्—द्वितीयार्थो न व्यापकत्वं, व्यापकत्वस्य व्याप्यविशेषाघटितस्याखण्डस्य दुर्वचतया तद्घ-टितव्यापकत्वानामानन्त्याच्छत्त्यानन्त्यप्रसङ्गात्। प्रकृत्यर्थस्य विभक्त्यर्थे निराकाङ्क्षतयानन्वया-पत्तेश्चेति प्रतियोगिवैयधिकरण्यविशिष्टाभावे प्रतियोगितावच्छेदकत्वे अभावे च खण्डशः वृत्तिः। प्रथमाभावे प्रकृत्यर्थमासादेराधेयत्वसंबन्धेनान्वयः। तदन्विताभावप्रतियोगितावच्छेदकत्वस्य... विधावच्छेदकत्वत्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन द्वितीयार्थान्तरेऽभावेऽन्वयः। तादृशाभावस्य चैत्रकर्तृकाध्ययनत्वरूपस्वाश्रयघटितपरम्परासंबन्धेन चैत्रकर्तृकाध्ययनेऽन्वयः। तत्तत्प्रतियोगिता-वच्छेदकावच्छिन्नानधिकरणत्वेऽपि द्वितीयायाः शक्तिं स्वीकृत्य तस्य प्रकृत्यर्थे व्युत्पत्तिवैचित्र्या-द्विशेषणत्वमिति वास्तु। तत्र शक्तिस्वीकारे शक्त्यानन्त्यम्। लक्षणाङ्गीकारे विभक्तौ न लक्षणेति सिद्धान्तविरोधो गौरवं चेति चेदत्राहुः—अगत्या शक्त्यानन्त्यादि स्वीक्रियते। एवं तत्तद्व्या-प्यान्तर्भावेणापि शक्तिरभ्युपेयते, विशिष्टव्यापकत्वे एव निरूपकत्वसंबन्धेन प्रकृत्यर्थस्या-न्वयो न तु व्यापकताघटकमासत्वादौ। अतो न मासत्ववतो मासत्वे आधेयत्वेनान्वये निराकाङ्क्षतयानन्वयप्रसक्तिरिति दूषणावकाशः। अत एव खण्डशः शक्तिस्वीकारे विभि-न्नपदजन्योपस्थितेर्हेतुभूताया अभावानन्वयबोधसंभव इति दूषणस्याप्यनवकाशः। किं च

❀ काशिका ❀

संबन्धत्वेनैव बोधस्यानुभवसिद्धतया न शक्त्यानन्त्यप्रसक्तिरपीति। अन्ये तु स्वनिष्ठभेदप्रतियोगितावच्छेदकनिष्ठप्रतियोगिताकत्वविशिष्टाधेयतासंबन्धेन प्रकृत्यर्थस्य व्यापकताघटकाभावेऽन्वयोपगमेन सामञ्जस्यान्न प्रतियोगिवैयधिकरण्यस्य विभक्त्यर्थेऽन्तर्भावः। न वा व्याप्यस्याप्यन्तर्भाव इति न गौरवमिति दिगित्याहुः। मासत्वं च तन्मासभेदेन भिन्नमिति यत्किंचिदेकमासमात्राधिकरणकाध्ययनशालिनि न तादृशप्रयोगानुपपत्तिरिति स्पष्टं व्युत्पत्तिवादादौ। 'दिवसे स्वपिती'-त्यादौ दिवसपदस्य सूर्योदयावधिसूर्योदयपर्यन्तक्षणसमूहपरतया नैकदण्डादिमात्रस्वापे तथाप्रयोगः। 'योजनं पर्वत' इत्यत्र द्रव्येण—क्रोशं कुटिला नदी क्रोशं रमणीयेत्यत्र कौटिल्यादिगुणेन, मासं भोजनाभाव इत्यत्राभावेनात्यन्तसंबन्धाद् योजनादिपदोत्तरं द्वितीया। ननु 'मासमास्ते' गोदोहमास्ते, मास आस्यते, गोदोह आस्यत इत्यादाविव मासमधीते इत्यत्रापि धातोर्व्यापनपर्यन्तं वृत्तिस्वीकारेणैव 'कर्तुरीप्सित—' इति कर्मत्वेन द्वितीयासिद्धौ 'कालाध्वनोः—' इति सूत्रं व्यर्थम्। तथा चोक्तं वाक्यपदीये—

'कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः।
सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते ॥' इति।

तत्राकर्मकैरित्युक्तावपि न्यायसाम्येन सकर्मकधातोरपि तदर्थान्तर्भावेण वृत्तिस्वीकारे बाधकाभावः। अत एवैतत्सूत्रस्य वैयर्थ्यमुक्ताभिप्रायेण 'प्राकृतमेवैतत् कर्मे'ति प्रकृतसूत्रस्थभाष्येणाशङ्कितम्। अकर्मके एवोक्तरीतेरभ्युपगमे मासमधीते इत्यादिप्रयोगनिर्वाहार्थं सूत्रावश्यकत्वे शङ्का असंगता स्यात्। न च तादृशशङ्कापरभाष्यात्तादृशप्रयोगो नेष्यत एवेति वाच्यम्। 'अपवर्गे तृतीया' इति सूत्रे—अन्यथा मासमास्ते मासमधीते इति द्विविधप्रयोगनिर्वाहकस्यास्य सूत्रस्य वैयर्थ्यशङ्कानुपपत्तेः। एतत्सूत्रे आस्यते मासः शय्यते क्रोश इत्यकर्मकधातुघटितप्रयोग एवास्ति। न तु मासमधीते इत्यादिः—सकर्मकधातुघटितः प्रयोगो येन तत्रापि व्यापनान्तर्भाव आस्थेयः। मासमधीतोऽनुवाको न चानेन गृहीत इति प्रयोगात् तादृशप्रयोगाणामपीष्टत्वात्। [illegible] एव मासमोदनं पचतीति प्रयोगोऽपि व्यापनकर्मत्वविवक्षयापि भवति। कालादिकर्मणो बहिरङ्गतया न तत्र लादिरपि त्वन्तरङ्गे द्रव्यकर्मण्येवेति स्पष्टं भाष्यप्रदीपोद्द्योते। अनयैव रीत्यात्यन्तसंयोगे कर्मवल्लाद्यर्थमिति वचनमपि न कर्तव्यमिति भाष्ये उक्तम्। अकर्मकधातुभिरिति वचनं तु भाष्ये नास्त्येव। 'अकथितं च' इति सूत्रभाष्ये—

'कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्।'

—इत्यपि सिद्धार्थकथनं न त्वपूर्वं, हिशब्दप्रयोगादिति स्पष्टं शेखरादौ। तत्र कालादिकर्म प्रधानं कर्म, द्रव्यमप्रधानं कर्म, कालादेराधारत्वेन द्रव्यद्वारैव क्रियासंबन्धात्। तस्मात् सूत्रं व्यर्थमिति चेन्न। यत्राक्रियया संयोगस्तदर्थमिदं वक्तव्यमिति भाष्ये एव समाधानात्। कथं तर्हि मासमधीते इत्युदाहरणमिति चेन्, संबन्धसामान्यविवक्षायां षष्ठीबाधनार्थत्वेन क्रियायोगार्थमप्यस्यावश्यकत्वेन यत्र क्रियाकारकभावेन नान्वयविवक्षा तत्रात्यन्तसंयोगार्थमिति तद्भाष्य-

❀ काशिका ❀

व्याख्यानस्योचितत्वमित्याशयात्। यद्यपि क्रोशं कुटिला नदीत्यत्रास्तीति क्रियाध्याहारं विना प्रथमायाः साधुत्वानिर्वाहात्तदध्याहारावश्यकता तथापि कौटिल्यादेरेव क्रोशव्यापकत्वविवक्षायां द्वितीयासिद्ध्यर्थमिदमिति न भाष्यादिग्रन्थासंगतिः। तत्र कौटिल्यादिरूपे पदार्थैकदेशेऽन्वयो व्युत्पत्तिवैचित्र्यात्, तद्विशिष्टधर्मिणि वा, अन्ये तु सर्वत्र तत्तद्धातोर्व्याप्तिपर्यन्तं वृत्तिं स्वीकृत्य क्रोशं कुटिला नदीत्यादावपि द्वितीयोपपादनेऽपि मासि—मासमासितेत्यत्र कृद्योगलक्षणा षष्ठ्येव स्यान्न द्वितीयेति तदर्थमिदमावश्यकमित्याहुः। इति द्वितीयार्थनिरूपणम्॥

धूमेन वह्निमनुमिनोति,—अत्र करणे तृतीया। धूमादिज्ञानस्यानुमितिकरणतापक्षे धूमादिशब्दः स्वज्ञानपरः। ज्ञायमानस्य करणतामते तु मुख्यार्थक एव। व्याप्तिविशिष्टवैशिष्ट्यावगाहिपरामर्शस्य व्यापारत्वाद् व्याप्तिविशिष्टधूमादिज्ञानस्य करणतानिर्वाहः। अन्वयितावच्छेदकवह्निविधेयकानुमितित्वावच्छेदेन धूमादिज्ञानकरणकत्वान्वयोपगमाद्यत्र वह्न्यनुमितौ तद्व्यक्तित्वादिरूपलिङ्गान्तरेण घटादिभानं तत्र तद्व्यक्तित्वादिना वह्निमनुमिनोतीति न प्रयोगः। न वा धूमेन घटमनुमिनोतीति प्रयोगः। ननु तार्किकनये इदं संभवति न शाब्दिकनये, तथा हि तन्नये विधेयता विधेयितावद्द्वितीयार्थः। वह्न्यन्वितायास्तस्या निरूपकत्वादिसंबन्धेनानुमितावन्वयः। तादृशविधेयतादिविशिष्टायामनुमितौ धूमज्ञानकरणकत्वान्वयाद्वह्निविधेयकत्वादेरन्वयितावच्छेदकत्वसंभवः। शाब्दिकमते त्वनुमित्यनुकूलव्यापारो धात्वर्थः। विधेयतासंबन्धः फलतावच्छेदकः। इत्थं च वह्निविधेयकानुमितित्वस्यान्वयितावच्छेदकत्वाभावः स्पष्ट एव। तथा च पूर्वोक्तातिप्रसङ्गो दुर्वार एवैतन्मत इति चेन्न, विधेयतादिस्थानीयविधेयतासंबन्धेनानुमितिसंबद्धवह्न्यवच्छेदेन धूमादिज्ञानकरणकत्वान्वयोपगमेनोक्तातिप्रसङ्गासंभवात्। ननु तथापि यत्र धूमलिङ्गकवह्न्यनुमितौ घटादिज्ञानेन द्रव्यत्वाद्यवगाहित्वं तत्र घटेन न वह्निमनुमिनोतीति नञ्घटितप्रयोगानुपपत्तिः। उक्तसमूहालम्बनवह्न्यनुमितौ घटज्ञानकरणकत्वाभावबाधेन तत्प्रयुक्तघटज्ञानकरणत्वविशिष्टोक्तानुमितिविरहबोधनासंभवात्। धूमेनेदं वह्नेरनुमानं न घटेनेति प्रयोगस्य तार्किकमतेऽप्यनुपपत्तिः। पूर्वोक्तस्थले प्रथमान्तार्थे घटज्ञानकरणकवह्न्यनुमितेर्घटे वह्निव्याप्यत्वभ्रमदशा... प्रसिद्धाया अभावबोधनसंभवेऽप्यत्र तदसंभवादिति चेन्न, उक्तसमूहालम्बनात्मकानुमितिसत्त्वे धूमकरणकं वह्नेरिदमनुमानं न घटकरणकमिति प्रयोगस्य सरणेरत्र प्रदर्शनीयत्वाद्, यथा तादृशप्रयोगो नेष्यते तथागत्या पूर्वोक्तप्रयोगद्वयमपि नेष्यत इत्याहुः। अन्ये तु धूमादिपदं ज्ञानकरणतामतेऽपि मुख्यार्थकमेव 'हेतौ' इति सूत्रेण तृतीयासंभवात् प्रयोजकत्वरूपं हेतुत्वं जनकतावच्छेदकसाधारणमिति विषयितयानुमितिजनकतावच्छेदकधूमादावपि तदक्षतम्। प्रयोजकत्वं जन्यतावच्छेदकतारूपं प्रयोज्यत्वं वा तृतीयार्थः। तस्य वह्निमित्यादिविभक्त्यन्तार्थवह्निविधेयकत्वे निरूपकतादिसंबन्धेनान्वयाभ्युपगमाद्धातः घटेन वह्निमित्यादिप्रयोगापत्तिः। वह्निविधेयकत्वे घटनिष्ठप्रयोजकतानिरूपकताद्यभावात्। तत्र घटप्रयोज्यत्वाभावस्याबाधितत्वान्न घटेनेत्यादिप्रयोगोपपत्तिश्च। धूमेन वह्निमित्यादिप्रयोगोपपत्तिर्वह्निविधेयितया धूमनिष्ठप्रयोजकता-

ॐ काशिका ॐ

निरूपकत्वात् प्रयोज्यत्वाच्च। शाब्दिकमते विभक्तौ लक्षणाविरहेण विधेयिताया विभक्त्यर्थताविरहान्नञ्घटितोक्तप्रयोगनिर्वाहायागत्यानुपूर्वकमिनोतेरेव वह्निविधेयताकानुमितिलाक्षणिकत्वं वह्निमित्यादिविभक्त्यन्तस्य तात्पर्यग्राहकत्वं चाङ्गीकरणीयम्। एवं च नात्रोक्तसमूहालम्बनानुमितितात्पर्येण घटेन वह्निमनुमिनोतीति प्रयोगापत्तिः। न घटेन वह्निमनुमिनोतीति प्रयोगस्तु धात्वर्थैकदेशवह्निविधेयकत्वादौ तृतीयार्थान्वयाभ्युपगमे एव संपाद्यवह्निविधेयकत्वादौ घटादिज्ञानप्रयोज्यत्वाभावप्रयुक्तविशिष्टानुमित्यभावबोधनसंभवेन संपाद्य इत्याहुः। 'पुत्रेण सहागतः पिते'त्यत्र 'सहयुक्ते ऽप्रधाने' इति तृतीया। सहशब्दार्थः साहित्यम्। तच्च समभिव्याहृतपदोपस्थाप्यक्रियादिसमानकालिकक्रियाद्यन्वयित्वम्। तदन्वयित्वं च समभिव्याहृतक्रियादिबोधकपदेन साहित्यान्वयिनि क्रियाया यादृशः संवन्धः प्रतीयते तादृशः संवन्ध एव। पुत्रेणेत्यादौ कर्तृत्वरूपः सः। 'पयसा सहौदनं भुङ्क्ते' 'पयसा सहौदनो भुज्यत' इत्यादौ कर्मत्वम्। खड्गेन सह बाणेन हत इत्यत्र करणत्वम्। शिष्येण सह गुरवे दक्षिणा दीयत इत्यत्र संप्रदानत्वम्। प्रयागेण सह काश्यां देवाः सन्तीत्यत्राधिकरणत्वम्। पुत्रेण सह स्थूल इत्यादावाधारत्वादिः संवन्धः, पुत्रेणेत्यादौ तृतीयार्थोऽपि कर्तृत्वादिकमेव। आधेयतासंवन्धेन पुत्रान्वितकर्तृत्वस्यागमनसमानकालिकागमनकर्तृत्वरूपसहार्थघटकीभूतागमने निरूपकतासंवन्धेनान्वयः। सहार्थकर्तृत्वस्य पितर्याश्रयतयान्वयः। तद्विशिष्टक्तप्रत्ययान्तार्थस्यागमनकर्तुरभेदेनान्वयः। न चोद्देश्यतावच्छेदकविधेययोरैक्यान्निराकाङ्क्षत्वमिति वाच्यम्। कर्मकर्तृत्वादेः संवन्धत्वेनैव सहार्थेऽन्तर्भावेणैकरूपोद्देश्यतावच्छेदकविधेययोरैक्ये एव निराकाङ्क्षतया प्रकृते तदभावात्। यद्वा संवन्धिसमानकालिकपदार्थसंवन्धित्वमेव सहशब्दार्थः। संवन्धश्च कर्तृत्वादिरेव संवन्धत्वेन पूर्ववदन्तर्भाव्यः पुत्रपदोत्तरतृतीयार्थः। कर्तृत्वं सहशब्दार्थान्वयवलात् प्रतीयमानागमनक्रियानिरूपितम्। अत एव शिष्येण सहागत इत्यादौ कर्तृतृतीययैव सिद्धमिति भाष्यस्य नासंगतिः। प्रतीयमानक्रियासंवन्धस्यापि कारकविभक्तिप्रयोजकत्वस्य क्लृप्तत्वात् पुत्रसंवन्धिसमानकालिकपदार्थसंवन्धीयतेति बोधे आगमनस्य पुत्रसंवन्धं विना प्रतीतस्य पुत्रस्य संवन्धितादृशपदार्थसंवन्धित्वस्यानुपपत्त्या पुत्रेऽपि न तत्संवन्धस्य मनसा प्रत्याय्यत्वात् पुत्रपदार्थस्य तृतीयाबोधितस्वनिष्ठकर्तृत्वादिनिरूपकत्वसंवन्धे सहार्थघटकसंवन्धिन्यन्वयः। पयसा सहौदनं भुङ्क्ते इत्यत्र प्रतीयमानक्रियानिरूपितकर्मतृतीयाघटितसंवन्धेन पुत्रस्य संवन्धिन्यन्वयः। अथवा तादृशपदार्थान्वयित्वसमनियतमखण्डपदार्थान्तररूपं साहित्यम्। शेषं पूर्ववत्। अत्र कल्पे—उद्देश्यतावच्छेदकविधेययोरैक्यशङ्कापि न। तादृशसाहित्यस्यैवोद्देश्यतावच्छेदकत्वात्। तथा च पुत्रसाहित्यवान् पितागमनकर्तृभिन्न इत्यादिबोधः। एतन्मते प्रकृत्यर्थस्य साहित्ये निरूपितत्वसंवन्धेनान्वयः। 'सपुत्र' इति समासघटकसहशब्दस्य तु धर्मिपरत्वम्। अत एव तस्य पित्रादिपदेन समानाधिकरण्योपपत्तिः। अत एव च 'तेन सह' इति बहुव्रीहिविधानं चरितार्थम्। साहित्यवतोऽन्यपदार्थत्वाभावेन 'अनेकम्—' इति सूत्रस्याप्राप्तेः। साहित्यमात्रार्थकत्वाङ्गीकारेण तु तत्सूत्रखण्डनं भाष्यकृताम्।

※ काशिका ※

अथवा सहार्थः साहित्यम्। तच्च समभिव्याहृतपदोपस्थापितागमनादिपदसमानकालिकपदत्वादिकमेव, लाघवात्। आदिपदेन समानदेशत्वं तत्समनियतमखण्डोपाधिरूपं वा साहित्यं तदर्थः। तस्य चागतादिपदोपस्थाप्यागमनादावन्वयः। तृतीयार्थश्च क्रियासमभिव्याहारे क्रियाया यादृशसंबन्धः प्रधाने प्रतीयते स एव, कर्तृत्वादिः सहार्थान्वयबलात् प्रतीयमानतत्तत्क्रियानिरूपितो द्रव्यादिसमभिव्याहारे सहार्थान्वयबलात् प्रतीयमानतत्तत्पदार्थनिरूपितः स्वस्वामिभावादिरेव संबन्धः। तस्य च धात्वार्थागमनादावन्वयः। पुत्रेण सह स्थूल इत्यादौ स्थूलपदार्थैकदेशेऽपि स्थौल्यादौ व्युत्पत्तिवैचित्र्येण सहार्थस्थौल्यसमानकालिकत्वस्यान्वयः। तथाच पुत्रेण सहागतः पिता, पुत्रेण सह पितुर्गौः, पुत्रेण सह स्थूल इत्यादौ पुत्रकर्तृकागमनसमानकालिकागमनाश्रयः, पुत्रस्वामिकत्वसमानकालिकपितृस्वामिकत्ववती गौः, पुत्रवृत्तिस्थौल्यसमानकालिकस्थौल्यवानित्यादिक्रमेण बोधः। सपुत्र इत्यादौ तु समुदायार्थतादृशक्रियादेरन्तर्भावान्नासामर्थ्यम्। व्यपेक्षावादे समासघटकसहशब्दस्यागमनसमानकालिकागमनवान् लक्षणयार्थः पुत्रपदस्य पुत्रकर्तृकत्वमर्थस्तस्य चागमनेऽभेदेनान्वयः। पुत्रस्य स्वनिष्ठकर्तृतानिरूपकत्वेन वा सहार्थागमनेऽन्वयः। पुत्रेण सह स्थूल इत्यत्र पुत्रपदस्य पुत्राधेयत्ववानर्थः। सहपदस्य स्थौल्यसमानकालिकस्थौल्यवान्। पूर्वपदार्थस्योत्तरपदार्थेऽन्तर्गतस्थौल्येऽभेदः संसर्गः, पुत्रस्याधेयत्वेन चान्वयः। एवमन्यत्रापि बोध्यम्। अगत्या व्यस्तसमासवाक्ययोरसमानाकारबोधजनकत्वं सपुत्र आगतः सपुत्रः स्थूल इत्यादौ क्रियायाः पित्रादौ द्वेधासंबन्धभानं चोपगम्यते। पुत्रेण सहागतः पितेत्यत्र व्यर्थं तस्य द्वेधाभानमित्यभिप्रायेणोत्तरपक्षोऽङ्गीकृतो वृद्धैः। वक्ष्यमाणरीत्या नञ्घटितवाक्ये प्रकृतधातूपस्थितक्रियायामेव पुत्रकर्तृकागमनादिसमानकालिकत्वभानस्यावश्यकत्वाच्च। यत्र चैत्रे मापवापोत्तरं तिला उप्यन्ते तत्र तिलैः सह मापान्वय इति भावः। तत्र समभिव्याहृतपदार्थसमानदेशत्वं तदर्थः। इतरत् पूर्ववत्। ननु कर्तृतृतीययैव गतार्थता सूत्रस्य। न च पुत्रेण सहगमनं देवदत्तस्येत्यत्र कृद्योगलक्षणषष्ठीबाधनार्थं तदिति वाच्यम्। इतरसमभिव्याहारं विनापि प्रतीयमाने कृत्प्रत्ययार्थकर्त्रादेरेव तत्र ग्रहणात्। क्तेनाविधानाच्च कर्तृतृतीयाप्राप्तिरित्यपि एतादृशकर्तुरेव क्तेनाभिधानादिति चेन्न। उक्तरीत्या पुत्रेण सह स्थूल इत्याद्यर्थं तस्यावश्यकत्वात्। इदं तु बोध्यम्। पूर्वमते पुत्रेण सह नागच्छतीत्यादौ नञ्समभिव्याहारे समभिव्याहृतक्रियादावेव सहशब्दार्थस्यागमनादिसमानकालिकत्वस्यान्वय उपगन्तव्यः। अन्यथा पुत्रानागमनस्थले पुत्रसाहित्यस्य पितरि बाधेऽपि पुत्रसाहित्यवत् पितृकर्तृकागमनाभावस्याबाधेन पुत्रेण सह नागच्छति पितेत्यादिप्रयोगस्योपपत्तावपि पुत्रेण सह नागतः पिता, पुत्रेण सह न स्थूल इत्यादेरनुपपत्तिः। तत्र पुत्रसाहित्यवति पितरि आगमनकर्तृभेदस्य स्थूलभेदस्य च बोधो वक्तव्यः। स च तत्र पुत्रसाहित्यस्योक्तभेदस्य च बोधान्न संभवति। समभिव्याहृतक्रियादौ पुत्रकर्तृकसमानकालिकत्वस्यान्वयाभ्युपगमे तु उक्तस्थले पुत्रकर्तृकागमनसमानकालिकागमनकर्तृभेदस्य पुत्रनिष्ठस्थौल्यसमानकालिकस्थौल्यवद्भेदस्य च पितर्यबाधेनोक्तप्रयोगनिर्वाह इति समभिव्या-

ॐ काशिका ॐ

हृतशब्दोपस्थितिसहकारेण तदर्थक्रियाद्यन्वयित्वाभावोऽत्राप्राधान्यम्। स च विशेषणाभावकृतो विशिष्टाभावः पुत्रादौ वर्तते। 'सहैव दशभिः पुत्रैर्भारं वहति गर्दभी'त्यादौ विद्यमानतावाचिसहशब्दयोगे क्रियाद्यन्वयरूपविशेष्याभावकृतोऽपि विशिष्टाभावः। तादृशसहशब्दयोगेऽपि तृतीया भवति, विनिगमनाविरहात् तादृशसंख्याकपुत्राणां विद्यमानत्वेऽपीत्यर्थं इति वदन्ति। तेषामयमाशयः—सहशब्दो लुप्तसप्तम्यन्तः। सा च सतिसप्तमी। अपिशब्दाध्याहारश्च। तेनोक्तार्थलाभ इति। अन्ये तु विद्यमानेत्याद्यध्याहारः, एवं च विद्यतिक्रियाप्रयुक्तसाहित्यनिर्वाह इति प्रत्यपीपदन्। ननु 'प्रासोष्ट शत्रुघ्नमुदारचेष्टमेका सुमित्रा सह लक्ष्मणेन' इत्यादौ शत्रुघ्नलक्ष्मणप्रसवयोः समानकालत्वविरहेण क्रियाद्वयसमानकालिकत्वस्य सहशब्दार्थत्वासंभव इति चेन्न। तत्रापि स्थूलकालघटितसमानकालिकत्वसंभवात्। एवं—

'शिशोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत्।
सहोपनीत्या कुर्याच्चेत्तदा दोषो न विद्यते॥'—

—इत्यादि स्मृतिवाक्येष्वपि बोध्यम्। तत्र दिनस्य सहार्थेऽन्तर्भावः। अन्यथा चूडाकर्मोपनयनयोः पूर्वापरीभावेन घटिकादिरूपैककालत्वाभावेनासंगत्यापत्तेः। नन्वेवं पुत्रागमनपूर्वकाले आगन्तरि आगतोऽयं न पुत्रेण सहेत्यस्यानापत्तिः। तत्रापि दिवसादिरूपस्थूलकालमादाय समानकालिकत्वसत्त्वादिति चेन्न। तत्र क्षणत्वादिनैव कालस्य सह शब्दार्थेऽन्तर्भावनीयत्वादित्यन्यत्र विस्तरः।

दण्डेन घटः पयःपानेन स्थूलः पुण्येन दृष्टो हरिः,—अत्र 'हेतौ' इति सूत्रेण तृतीया, न तु 'कर्तृकरणयोः' इति करणे। दण्डस्य व्यापारवत्त्वेऽपि क्रियाजनकत्वाभावेन करणत्वाभावात्, व्यापारवत्त्वे सति क्रियाजनकस्यैव करणत्वात्। ननु अस्तीत्यध्याहारस्यावश्यकतया क्रियाजनकत्वमक्षतमेवेति चेन्न। क्रियाजनकत्वाभावादित्यस्य तज्जनकत्वविवक्षणाभावादित्यर्थकत्वात्। दण्डाभावेऽपि घटसत्तायाः सत्त्वेन दण्डस्य तदजनकत्वाच्च। पयःपानस्य शुक्रवृद्धिसंपादनरूपव्यापारसत्त्वेऽपि स्थौल्यात्मकगुणजनकत्वं न क्रियाजनकत्वम्। पुण्यस्य परमापूर्वरूपादृष्टव्यापशेषात्मनो दर्शनक्रियाजनकत्वेऽपि व्यापाराभावः। पुण्यपदस्य दानादिपरत्वे तु करणतृतीयैव। द्रव्यगुणक्रियान्यतमजनकसव्यापारनिर्व्यापारान्यतरवृत्तिधर्मविशेषो हेतुत्वम्। तदुक्तं वाक्यपदीये—

'द्रव्यादिविषयो हेतुः कारणं नियतक्रियम्।
अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यते॥' इति।

तथा च हेतुत्वकरणत्वयोर्भेदात्तेन रूपेण बोधनिर्वाहार्थं सूत्रद्वयमावश्यकमिति ब्रुवन्ति स्म वृद्धाः।

अन्ये तु करणे तृतीयानुशासनविरहे शरैः शातितपत्र इत्यादौ वृत्तिघटकैकदेशभूतशातनक्रियायाः शरहेतुत्वान्वये सापेक्षत्वेनासामर्थ्यें समासस्य साधुत्वानुपपत्तिः। करणतृतीयायास्तु कारकविभक्तितया—

'प्रतियोगिपदादन्यद्यदन्यत् कारकादपि।
वृत्तिशब्दैकदेशेन न तस्यान्वय इष्यते॥'

❀ काशिका ❀

-इति व्युत्पत्तौ कारकपर्युदासेन करणविभक्तेः कारकविभक्तित्वेन करणत्वसापेक्षत्वेऽपि नोक्तानुपपत्तिः।

एवं धनवता ऋणेन बद्ध इत्यत्र ऋणपदात्तृतीयानुपपत्तिः। हेतुतृतीयाया 'अकर्तर्यृणे—' इति सूत्रानुशिष्टपञ्चम्यापवादभूतया बाधितात्। अतः करणे तृतीयानुशासनमावश्यकमेव, तत्सत्त्वे तु करणत्वविवक्षायां तृतीया सिध्यतीत्याहुः। एतन्मतेऽपि विभिन्नप्रकारकबोधकत्वं तयोरिति पर्यवसन्नमेवेति बोध्यम्। ननु यत्रैकैव पाकक्रिया चैत्रेण काष्ठैर्मैत्रेण तुपप्रक्षेपेण निष्पाद्यते तत्र चैत्रस्तुपैर्न पचति किं तु दारुभिरेवेति प्रयोगानुपपत्तिः। तस्यां पाकक्रियायां चैत्रकर्तृकत्वस्य तुपहेतुकत्वस्य तत्करणकस्य च सत्त्वेन तद्विशिष्टक्रियाभावबाधान्निखिलविशेषण-विशिष्टक्रियाया एवाभावस्य नञा बोधनीयत्वात्। न्यायमते तु नैष दोषः। तुपहेतुकत्वस्योक्त-पाके सत्त्वेन तदभावबोधेऽपि समभिव्याहृतकर्तृव्यापाराधीनव्यापारघटितकरणत्वस्य कर्तरि व्या-पारवत्त्वस्य सत्त्वेनातिप्रसङ्गवारणार्थं विवक्षणीयस्य तुपेष्वसत्त्वेन तत्करणकत्वाभावस्य तस्मिन् पाकेऽबाधितस्य बोधनसंभवात्। कृतिरूपकर्तृव्यापाराधीनव्यापाराश्रये कर्तर्यतिप्रसङ्गवारणाय कर्तरि स्वभेदो निवेशनीय इति चेन्न। कर्तृभेदेन पाकक्रियाया अपि भेदेन चैत्रकर्तृकपाके तुपकरणकत्वाभावाबाधेन तुपकरणकचैत्रकर्तृकवर्तमानपाकाभावस्य तत्राक्षतत्वेनादोषात्। तथा च चैत्रः काष्ठैः पचति मैत्रस्तुपैः पचतीति वाक्यभेदस्तत्रेष्ट एवेत्याहुः। 'अध्ययनेन वसति' अत्राध्ययनस्य वासफलस्यापि स्वज्ञानद्वारा वासनिमित्ततया हेतुत्वेन विवक्षायां तृतीया। अध्ययनाभिन्नहेतुक एककर्तृको वास इति बोधः। स्पष्टं चेदं 'प्रत्ययः' 'तदर्थं विकृतेः प्रकृतौ' इत्यादिसूत्रेषु कैयटे। नन्वेवं काश्यादेरपि वासहेतुतयापि हेतुत्वविवक्षायां तृतीयाप्रसक्तिरिति चेन्न, अधिकरणत्वविवक्षायां परया सप्तम्या बाधनात्, तदविवक्षायां तु करणत्वविवक्षायामि-ष्टापत्तेः। अपरे तु—इह सूत्रे हेतुशब्देन फलमपि गृह्यतेऽत एवाध्ययनरूपफलजनको वास इत्यनुभवसिद्धबोधनिर्वाहः। न च तत्र लक्षणेति वाच्यम्। विभक्तौ लक्षणानङ्गीकारात्। तत्र फलत्वेन फलं विभक्त्यर्थः। अभेदेन तत्र प्रकृत्यर्थस्य तस्य च वासे जनकतासंबंधेन विशेषणत्वम्। एतेन हेतुत्वं ज्ञानाद्वारकमेव गृह्यते। अत एव धूमादिपदस्य तज्ज्ञाने लक्षणा-ङ्गीक्रियते तान्त्रिकैः। एवं च कथमत्र तृतीयेति देश्यं परास्तमित्याहुः। ज्ञानद्वारकनिमित्त-त्वानाश्रयणेऽपि फलस्य हेतुशब्देनापरिग्रहेऽपि 'हेतौ' इति सूत्रेणाध्ययनपदाद्धेतुत्वार्थिका हेत्वर्थिका वा तृतीया सिध्यति। हेतुत्वे तदर्थे अध्ययनस्य निरूपितत्वं संबन्धः। वासे तस्या-श्रयत्वं, हेतुरूपतदर्थेषु स्वनिरूपितहेतुत्वं संबन्धः। अध्ययननिष्ठहेतुत्वनिरूपितो वास इत्याद्या-कारको बोध इति तु न शङ्क्यम्। हेतुत्वाद्यर्थे प्रत्यासत्त्या तदाश्रयार्थकाद् विभक्तिरित्यर्थस्यैव लाभात्, अत एव 'कर्तृकरणयोस्तृतीया' इति सूत्रविहिता तृतीया न कदाचिदपि क्रियार्थ-काद्भवति, अपि तु कर्त्राद्यर्थकादेव। अन्यथा देवदत्तेन भुक्तमित्यादौ भुक्तादिपदादपि तृतीया स्यात्। न च कर्मक्तान्तस्य 'सत्त्वप्रधानानि नामानि' इति निरुक्तात् कर्मप्रधानकतया प्र[illegible]नार्थेनैव प्रत्ययार्थान्वयस्य क्लृप्तत्वात्तन्निरूपितकर्तृकत्वाद्यसंभवान्न ततस्तृतीयापत्तिरिति वाच्यम्।

❀ काशिका ❀

एवमपि भुक्तिकर्ता देवदत्त इत्यर्थविवक्षायां भुक्तिपदात् 'कर्तृकर्मणोः कृति' इति षष्ठीप्रसक्त्या भुक्तेर्देवदत्त इत्यादिप्रयोगात् दुर्वारत्वात्, देवदत्तस्य भुक्तिरित्यस्यैवेष्टत्वात्। न च परत्वात् प्रथमा भविष्यतीति नोक्तापत्तिरिति वाच्यम्। षष्ठ्या अन्तरङ्गत्वात् प्रथमाया एवापवादत्वमित्यस्य वक्तुं शक्यत्वात्। तादर्थ्यविवक्षायामध्ययनाय वसतीति चतुर्थ्यपि भवति। उपकारत्वं चतुर्थ्यर्थः। तत्र प्रकृत्यर्थस्य निरूपितत्वं संसर्गः। अध्ययननिरूपितोपकारकतावान् वास इति बोधः। उपकार्योपकारकत्वं वा चतुर्थ्यर्थः। उपकार्यं भेदसंबन्धेन प्रकृत्यर्थोऽन्वेतीति बोपगन्तव्यम्। 'दास्या संयच्छते कामुकः'—अत्र चतुर्थ्यर्थे तृतीया। अशिष्टव्यवहारे इत्यादिवचनात्। अत्र धातुर्दानपूर्वकोपभोगार्थः। संप्रदानत्वशक्तिमांस्तृतीयार्थः। दासीसंप्रदानकदानपूर्वकोपभोगो वाक्यार्थः। 'दाणश्च सा चेत्—' इति सूत्रेणात्मनेपदविधायकेन चतुर्थ्यर्थे तृतीया ज्ञाप्यते, चेदित्यनेन तदनित्यत्वं ज्ञाप्यते—इत्यशिष्टव्यवहार इत्यंशसिद्धिः। अशिष्टानां = निषिद्धाचाराणां व्यवहारः क्रियारूप इति स्पष्टं तत्सूत्रे एव भाष्ये इति शिवम्॥

पत्ये शेते—अत्र 'क्रियया यमभिप्रैति—' इति संप्रदानसंज्ञा। संप्रदानत्वशक्तिमान् विभक्त्यर्थः। पतिसंप्रदानकं शयनमिति बोधः। भाष्यकारमते तु क्रियापि कृत्रिमं कर्म संदर्शनप्रार्थनव्यवसायजन्यारम्भक्रियानिरूपितं तस्याः कर्तुरीप्सितमिति कर्मत्वम्। एवं च 'कर्मणा यमभि—' इति सूत्रेणैव संप्रदानसंज्ञापत्तिरित्याहुः।

'संदर्शनं प्रार्थनायां व्यवसाये त्वनन्तरा।
व्यवसायस्तथारम्भे साधनत्वाय कल्पते॥
पूर्वस्मिन् या क्रिया सैव परस्मिन् साधनं मता॥'

इति। संदर्शनं फलविषयकसंकल्पः, स च ज्ञानमिच्छा वा। तत् प्रार्थनायां फलोपायात्मिकायां हेतुः। व्यवसायो यागपाकादेर्व्यापारस्य फलविशेषसाधनत्वेन निश्चयः। तत्रानन्तरा प्रार्थना हेतुः। अभिलाषे सति तादृङ्निश्चयोदयात्। व्यवसायश्चारम्भे प्रवृत्त्यात्मनि हेतुस्तेनाप्यमाना प्रकृतक्रिया कर्मत्वभाग्भवति। पूर्वस्मिन् = पूर्वकाले। परस्मिन् = उत्तरकालभाविनि। एतन्मते पतिसंप्रदानकर्मारम्भकर्मरूपं शयनमिति बोधः। अभिधानाभावान्न घटं करोतीत्यादावतिप्रसङ्ग इत्याहुः। 'पशुना रुद्रं यजते'—अत्र फलाश्रये करणत्वशक्तिरुद्देश्ये कर्मत्वशक्तिः 'कर्मणः करणसंज्ञा संप्रदानस्य च कर्मसंज्ञा' इति वचनात्। पशुकरणको रुद्रकर्मको याग इति शाब्दोऽर्थः। रुद्रोद्देश्यकः पशुनिष्ठस्वत्वनिवृत्त्यनुकूलो व्यापार इति त्वार्थः। अयमेवान्यमते शाब्दः, एवमेवान्यत्रापि बोध्यम्। हरये रोचते भक्तिः—प्रीत्यनुकूलस्तत्समानाधिकरणो व्यापारो रोचतेरर्थः। प्रीतिरन्तःकरणवृत्तिविशेषः। स च सविषयको मदीयत्वादिप्रकारकज्ञानरूपोऽयमिष्टभाग्भवत्वित्याकारेच्छारूपो वा। हरिनिष्ठप्रीतेर्नित्यत्वेऽपि विषयस्यानित्यतया फलतावच्छेदकविषयताया अनित्यत्वमितिसंबन्धेन प्रीतेर्जन्यत्वारोपेण तदनुकूलत्वनिर्वाहः। आरोपानङ्गीकर्तृमते तु निर्धायकतासंबन्धेन तत्फलविशिष्टज्ञानादिकमेव प्रीतिपदार्थः। एवं च शिखी ध्वस्त इतिवद्विशेषणफलमादायानुकूलतानिर्वा-

ॐ काशिका ॐ

कत्वनिर्वाहः। विषयतायाः फलतावच्छेदकत्वादेव न रोचतिः सकर्मकः। प्रीयमाण इत्यत्र प्रीञ् तर्पण इत्यस्मात् कर्मणि लटः शानच्, न तु प्रीङ् प्रीताविति दैवादिकात्। तस्याकर्मकत्वात्। अत एव प्रीयतां भगवानीशः परमात्मेत्यादौ कर्मरहितस्यैव प्रयोगः। न च तस्मात् कर्तर्येव लटः शानजङ्गीकारे क्षतिविरहः। एवं सति प्रीधात्वर्थव्यापाराश्रयस्य संज्ञेति सूत्रार्थोऽभ्युपेतव्यः। तथा सत्यपि प्रीतिसमानाधिकरणतदनुकूलव्यापाराश्रयत्वस्य हर्यादौ सत्त्वेन प्रकृते संज्ञासिद्धेस्तादृशव्यापारानाश्रयेऽतिप्रसङ्गाभावाच्चेति वाच्यम्। प्रीधात्वर्थकर्मणः संज्ञेति सकलग्रन्थविरोधात्। श्लीप्स्यमान इति साहचर्येण कर्मण्येव शानच उचितत्वाच्च। प्रीधात्वर्थफलतावच्छेदकसंबन्धस्तु समवायः। अत एव हरिं प्रीणयतीत्यादिप्रयोगासिद्धिः। समवायसंबन्धेन प्रीत्याश्रयस्य 'रुच्यर्थानाम्—' इति सूत्रेण संप्रदानत्वम्। प्रीधातो रुच्यर्थत्वाभावान्न तद्योगे संप्रदानत्वम्। अत एव प्रीयमाण इति निर्देशोपपत्तिः। एतत्सूत्राभावे हरिशब्दादेः षष्ठी प्राप्तेति शेषषष्ठ्यपवादत्वं चतुर्थ्याः। अन्ये तु रुचिधातुः प्रीधातुसमानार्थः। एवं च कर्मसंज्ञापवादिकेयं संज्ञा, प्रीयमाण इति निर्देशादेव प्रीधातूपात्तप्रीत्याश्रयस्य नेयं संज्ञेति वदन्ति। तन्मते गौरवम्। प्रीधातुयोगे संज्ञावारणार्थं निर्देशाश्रयणात्। अभिलष्यतेश्च प्रीतिव्यधिकरणप्रीत्यनुकूलव्यापारोऽर्थः। फलतावच्छेदकसंबन्धो विषयता। अत एव न स रुच्यर्थ इति हरिभक्तिमभिलष्यतीत्यत्र हरेर्न संप्रदानत्वं येन सुखरूपफलाश्रयस्य देवदत्तादेः कर्मसंज्ञायां प्राप्तायामियं संज्ञा तदपवादभूतेत्याहुः।

अत्रापि मते पूर्वोक्तं गौरवम्। अन्ये तु अभिलाषात्मकप्रीतौ रोचतेरर्थः, विषयत्वरूपं कर्तृत्वमाख्यातार्थो लक्षणया षष्ठ्यपवादिका चतुर्थीति नारदसंबन्धिरुचिविषयतावान् कलह इति नारदाय रोचते कलह इति वाक्यजन्यबोध इत्याहुः। अपरे तु तार्किकाः—प्रीतिजनकताप्रकृतधात्वर्थजनकतात्मकधात्वर्थव्यापाराश्रयतया कलहादेः कर्तृता आश्रयत्वमाख्यातार्थं आश्रितत्वरूपः संबन्धश्चतुर्थ्यर्थ इत्याहुः। एतन्मतेऽपि षष्ठ्यपवादिका चतुर्थी प्रीधातुस्तु नैतदर्थक इति न पूर्वोक्तादिप्रसङ्गः। 'गोपी स्मरात् कृष्णाय श्लाघते ह्नुते तिष्ठते शपते वा' अत्र 'श्लाघह्नुङ्स्थाशपाम्—' इति सूत्रेण श्लीप्स्यमानस्य संप्रदानसंज्ञा। श्लीप्स्यमानपदेन ण्यन्तकर्मणः प्रकृत्यर्थकर्मणो वा ग्रहणम्। ण्यर्थस्य प्राधान्यात् तत्कर्मणो ग्रहणम्। सन्स्वारस्यात् प्रकृत्यर्थकर्मणः। अन्यथा ज्ञाप्यमान इत्येव वदेत्, प्रकृत्यर्थकर्मणोऽपि सन्नर्थेच्छाविषयव्यापारप्रयोज्यफलाश्रयत्वेन सन्नन्तकर्मतया तत्र लकारोत्पत्तिरविरुद्धेति तादृशनिर्देशोपपत्तिः। श्लाघ्यादेः स्तुत्या प्रीतिपूर्वको बोधनार्थः। स्तुत्या कृष्णमात्मानुरागं बोधयति। एवं ह्नुत्यादीना तं कृष्णं बोधयतीत्यर्थः। ह्नुतिरितरादर्शनयोग्यदेशस्थापनम्। कर्मसंज्ञापवादभूतेयं संज्ञा, बाधविषयात्मानुरागस्तु प्रकरणादिगम्यः। कृष्णसंप्रदानक आत्मानुरागविषयकबोधानुकूलः स्मरहेतुकः स्तुत्यादिपूर्वको व्यापार इति शाब्दबोधः। प्रकृत्यर्थकर्मणो ग्रहणे स्तुत्यादिना कृष्णं स्वसखीजनं ज्ञापयतीत्यर्थः। देवदत्ताय शतं धारयतीत्यत्र 'धारेरुत्तमर्णः' इति सूत्रेणोत्तमर्णस्य संप्रदानसंज्ञा। उत्कृष्टार्थवृत्तेरुदस्तमप्। द्रव्यप्रकर्षादाम् न। उत्तममृणं यस्येति बहुव्रीहिः। अत एव निपातनान्निष्ठान्तस्य परनिपातः।

❀ काशिका ❀

उत्तमर्णो धनस्वामी। धृङ् अवस्थाने दिवादिः। तस्माद्धेतुमण्णिच्। अवस्थित्यनुकूलव्यापारो धारयतेरर्थः। शतस्यावस्थितिरधमर्णे स्वकर्मकादानजन्यदुरदृष्टविशेषसंबन्धेन। अत एव परिशोधनपर्यन्तमधमर्णे चैत्रादौ संयोगाद्यसत्त्वदशायां संयोगानुत्पादादपि च शतं ध्रियते चैत्र इति प्रयोग उपपद्यते। एवं चैत्रो देवदत्ताय शतं धारयतीति च। न हि भवति प्रयोज्यव्यापारशून्यतादशायां पाचयतीति प्रयोगः। स्पष्टं चेदं 'हेतुमति च' इति सूत्रे भाष्ये। तदनुकूलो व्यापार ऋणापरिशोधनं सजातीयद्रव्यदानमङ्गीकृत्य परदत्तद्रव्यग्रहणं वा। न च ग्रहणोत्तरसमये ग्रहणस्यासत्त्वाद्धारयतीति न स्यादिति वाच्यम्। सूक्ष्मरूपेण स्वजन्यादृष्टविशेषसंबन्धेन परिशोधनपर्यन्तं तस्य सत्त्वात्। तस्य विनाशेऽपि प्रवृत्ताविरामरूपवर्तमानत्वविवक्षणाद्वा। अत्रोत्तमर्णस्य यद्यपि दानक्रियाद्वारा धारणप्रयोजकत्वं तथापि क्रियाया अश्रवणाद्धेत्वादिसंज्ञाया अप्राप्त्या शेषषष्ठी प्राप्ता। सर्वत्र विशेषरूपेणाविवक्षणे क्रियानिमित्तत्वमात्रेण विवक्षणे शेषत्वमिति बोध्यम्। तदुक्तं हरिणा—

'हेतुत्वे कर्मसंज्ञायां शेषत्वे वापि कारकम्।
रुच्यर्थादिषु शास्त्रेण संप्रदानाख्यमुच्यते ॥' इति।

सजातीयद्रव्यदानाभ्युपगमपूर्वकं परदत्तपरकीयद्रव्यादानं तज्जन्योऽधमर्णनिष्ठोऽदृष्टविशेषो वा ऋणम्। आदीयमानद्रव्ये ऋणव्यवहारस्तन्निमित्तत्वप्रयुक्त औपचारिकः। अत एव गृहीतस्यान्नादेर्भक्षणादिकरणेऽपि मम ऋणमस्तीति व्यवहार उपपद्यते। तादृशादानकर्मण्येव मुख्यस्तादृशादृष्ट औपचारिकोऽस्त्विति चेन्न। 'ऋणमाधमर्ण्ये' इतिसूत्रेणाधमर्णनिष्ठभावादावेव तस्य निपातनात्, तत्रैव शक्तेरुचितत्वात्। अमरकोशेऽपि 'सत्यानृतं तु वाणिज्यं स्यादृणं पर्युदञ्चनम्' इत्युक्तम्। सर्वथापि मोक्षस्य न तथात्वं, तव तत्र तादृशं दुरदृष्टमिति कथं भक्ताय मोक्षं धारयतीत्युदाहरणमिति चेदत्राहुः—अवश्यदेयत्वेन तत्रापि ऋणत्वव्यवहारान्मोक्षस्थित्यनुकूलो व्यापारो हरिनिष्ठसेवनकर्मत्वादिरूपः। सेवनरूपोपकाराश्रयतया भक्त उत्तमर्णशब्दव्यवहारविषयः। **व्युत्पत्तिवादकृतस्तु**—द्रव्यान्तरदानाभ्युपगमपूर्वकपरदत्तद्रव्यादानजन्योऽदृष्टविशेषो धारयतेरर्थः। तद्घटकदानान्वयि कर्तृत्वं चतुर्थ्यर्थः। न च ऋणापरिशोधनमेव दुरदृष्टजनकमुपपातकमध्ये तस्यैव परिगणनादिति वाच्यम्। ऋणादानस्य तज्जनकत्वेऽपि परिशोधनस्य तन्नाशकताबोधनायापरिशोधनस्य नरकरूपफलोपधानप्रयोजकत्वाभिप्रायेणोपपातकमध्ये परिगणनोपपत्तेः। गृहीतर्णापरिशोधनापेक्षया लाघवेन ऋणादानस्यैव दुरदृष्टं प्रति हेतुत्वकल्पनाया उचितत्वादित्यादि विस्तरेणाहुः। पुष्पेभ्यः स्पृहयति—अत्र स्पृहयतिरिच्छामात्रवाची। ईप्सितपदेन धात्वर्थव्यापारजन्यफलाश्रयत्वेन बोधनात् न तु फलस्य धात्वर्थत्वाग्रहः। एवं च षष्ठ्यपवाद एतत्संज्ञाप्रयुक्ता चतुर्थी। पुष्पसंप्रदानिकेच्छेति बोधः। पुष्पविषयिणीति त्वार्थः। फलावच्छिन्नेच्छावाची चायं धातुः। इच्छानुकूलमनःसंयोगादिरूपव्यापारवाची वा। इच्छायाः फलं विषयता, प्रवृत्तिर्वा, तद्योगे तदर्थफलाश्रयत्वेन विवक्षायां परत्वात् कर्मसंज्ञायां द्वितीयेत्याद्यन्यत्र विस्तरः। हरये क्रुध्यति द्रुह्यति ईर्ष्यति असूयति वा। हननाद्यनुकूलव्यापारजन्यः कश्चिद्वृत्ति-

❀ काशिका ❀

विशेषः क्रोधः क्रुधेरर्थः। द्रुह जिघांसायामित्यर्थनिर्देशाद् द्रोहो द्रुहेः। स च दुःखजनकक्रियाविशेषजनकश्चित्तवृत्तिविशेषः। धात्वर्थसंगृहीतकर्मकतयैतावकर्मकौ। एकद्योगे षष्ठी प्राप्ता। एतद्धात्वर्थमूलभूतकोपस्य विषयतया सबन्धिनः 'क्रुधद्रुहेर्ष्यासूयार्थानाम्—' इति सूत्रेण संप्रदानसंज्ञा विधीयते। हरिसंप्रदानकः क्रोधो द्रोह इति बोधः। उत्कर्षविरुद्धधर्मारोपानुकूलव्यापारजनकचित्तवृत्तिविशेषरूपाक्षमेर्ष्यतेरर्थः। शौचाचारादिगुणविषये दम्भादिकृतत्वरूपदोषारोपानुकूलश्चित्तवृत्तिविशेषयोऽसूयतेः। चित्तवृत्तिविशेषात्मककोपमूलका एते। प्ररूढकोपस्यैव क्रोधपदार्थतया तत्रापि कोपमूलकत्वमनपवादम्। असूयाद्यर्थकधातुयोगे मूलभूतकोपविषयताविशिष्टतत्तद्धात्वर्थफलाश्रयस्य संप्रदानसंज्ञा, 'यं प्रति कोपः' इत्यनेनापि कोपविषयस्येत्येव लभ्यते। तथापि प्रयोगानुरोधात् तादृशफलाश्रयस्येति निवेशितम्। विशेषणप्रयोजनं तु—भार्यामीर्ष्यतीत्यत्र भार्यायाः संप्रदानत्ववारणम्। नात्र भार्यां प्रति कोपोऽपि तु परैर्दृश्यमानायास्तस्या असहनम्। एकभार्यायां नेर्ष्यतिधात्वर्थारोपात्मकफलाश्रयत्वमित्यर्थः। हरिसंप्रदानकोत्कर्षविरोधिधर्मारोपानुकूलश्चित्तवृत्तिविशेष इति बोधः। तार्किकमते तु क्रोधो द्वेषविशेषो ज्ञानविशेषो वा द्रोहोऽपकारविषयेच्छाहितेच्छेति यावत्। ईर्ष्या परोत्कर्षगोचरद्वेषात्माक्षमा। गुणिनि दोषाविष्करणरूपव्यापारविशेषोऽसूया। विषयित्वादिकं चतुर्थ्यर्थ इति बोध्यम्। हरेः क्रोधद्रोहाभ्यामिच्छाविषयत्वाभावान्न 'क्रियया यम्' इति संज्ञासिद्धिः। मित्राय द्रुह्यति प्रतापोऽपीत्यादौ चेतनत्वारोपो बोध्यः। कुप्यति कस्मैचिदित्याद्यसाध्वेव, 'क्रियया यमभिप्रैति' इति संप्रदानत्वं वेत्याहुः।

कृष्णाय राध्यति ईक्षते वा। अत्र प्रश्नविषयशुभाशुभपर्यालोचनार्थौ राधीक्षती। तदर्थप्रश्नविषयसंबन्धिनो 'राधीक्ष्योर्यस्य—' इति संप्रदानत्वम्। कृष्णसंप्रदानकं शुभाशुभपर्यालोचनमिति शाब्दबोधः। तत्संबन्धीत्यादिरत्रार्थः। यूपाय दारु। अत्र 'तादर्थ्ये चतुर्थी वाच्या' इति वचनाच्चतुर्थी। तस्मा इदं तदर्थं, तस्य भावस्तादर्थ्यमिति व्युत्पत्त्योपकारकत्वमुपकार्योपकारकभावो वा विभक्त्यर्थः। आद्ये निरूपितत्वं प्रकृत्यर्थस्य विभक्त्यर्थे तस्य च दारुण्याश्रयत्वं संसर्गः। अन्त्ये प्रकृत्यर्थस्याधेयत्वमुपकार्यत्वे संबन्धः। उपकार्यत्वं वा विभक्त्यर्थः। तत्र प्रकृत्यर्थस्य... भेदसंबन्धः। तस्य स्वनिष्ठोपकार्यतानिरूपितोपकारकत्वसंबन्धेनान्वयः। 'स्वर्गाय पुण्य'मित्यादि त्विष्टमेव। अत एव 'पापं नरकाय भवती'त्यादिस्मार्तादिप्रयोगसंगतिः। यागाय यातीत्यादौ तुमर्थकघञा तादर्थ्यस्योक्तत्वान्नानेन सिद्धिरिति 'तुमर्थाच्च' इति सूत्रारम्भः। ब्राह्मणकर्तृकभोजनोपकारिणि दध्नि परंपरया ब्राह्मणोपकारिता ब्राह्मणोपकारकत्वस्यारोपणं वा ब्राह्मणाय दधीत्यादौ चतुर्थीसिद्धिः। यूपाय दार्वित्यादौ कार्यवाचकादुत्तरवर्तिचतुर्थ्येव कारणगतसंबन्धस्य बोधनाद्धेतुत्वसत्त्वेऽपि न दार्वादिपदात् तृतीया। भक्तिर्ज्ञानाय कल्पते। अत्र 'क्लृपि संपद्यमाने च' इति चतुर्थी, क्लृप्यर्थकधातुयोगे संपद्यमानेऽर्थे वर्तमानाच्चतुर्थीति तदर्थः। सा च प्रथमापवादभूता भक्त्यभिन्नज्ञानकर्तृकोत्पत्तिरिति बोधः, ज्ञानात्मना परिणमत इत्यत्रात्मशब्दो ज्ञानवृत्तिधर्मपरः। एवं च तस्य न विकृतिवाचकत्वमिति न ततश्चतुर्थी, किं तु प्रकृत्यादित्वात् तृतीया।

❀ काशिका ❀

वैशिष्ट्यं तदर्थः, ज्ञानत्वविशिष्टरूपान्तरप्राप्तिर्भक्तिकर्तृकेति बोधः। रूपान्तरप्राप्तिर्धात्वर्थः। प्रकृति-विकृत्योर्भेदविवक्षायां प्रकृतिविकृतिभावाप्रतीत्या न चतुर्थी। अपि तु 'जनिकर्तुः—' इत्य-पादानत्वात् पञ्चमी। भक्तेर्ज्ञानं कल्पत इति ज्ञानपदात् तादर्थ्यचतुर्थ्यपेक्षया परत्वात्तस्य कर्तृकारकतया उपपदविभक्तेरिति वचनाच्च प्रथमैवेति कैयटे स्पष्टमिति मञ्जूषाकृतः।

अन्ये तु भेदविवक्षायां विकृतिवाचकाच्चतुर्थी। कल्पते इत्यस्य परिणमत इत्यर्थः। यद्यपि भेदविवक्षायां तादर्थ्यचतुर्थ्यैव सिद्धं, तथापि संबन्धत्वेन बोधनिर्वाहार्थमिदमावश्यकम्। अन्यथा तथाविवक्षायां षष्ठी स्यात्। अभेदविवक्षायां तु परत्वात् प्रथमैव भक्तिर्ज्ञानं कल्पत इति। चतुर्थीघटितवाक्ये 'भक्तिकर्तृको ज्ञानाभिन्नः परिणाम इति बोधः। प्रथमाघटिते तु भक्त्यभिन्नज्ञानकर्तृकोत्पत्तिरिति बोधः। अपादानत्वविवक्षायां पञ्चमीत्याहुः। फलेभ्यो याति। अत्र 'क्रियार्थोपपदस्य—' इति चतुर्थी। स्थानिनो ज्ञायमानस्य क्रियार्थोपपदकस्य तुमुनन्तस्य कर्मणि = तुमुनन्तोपस्थितक्रियाकर्मणि चतुर्थीति तदर्थः। यथा ब्राह्मणाय दधीत्यादौ भोजनोपकारकत्वेन दध्नो ब्राह्मणोपकारकत्वात्तादर्थ्ये चतुर्थी भवति, तथा फलाहरणोपकारकत्वेन फलोपकारकत्वस्यापि सैव चतुर्थी यद्यपि प्राप्नोति तथापि फलकर्मकाहरणफलकं यानमिति फलकर्मत्वप्रकारकबोधे चतुर्थीसाधुत्वार्थमिदं सूत्रमावश्यकमित्यन्यत्र विस्तरः।

'वाताय कपिला विद्युदातपायातिलोहिनी'त्यादौ ज्ञाप्यज्ञापकभावार्थिका चतुर्थी। उत्पातेन ज्ञापिते चेति वचनात्, प्राणिनां शुभाशुभसूचकभूतविकाररूपोत्पातज्ञापितार्थवृत्तेश्चतुर्थीति तदर्थः। वातज्ञापिका कपिला विद्युदिति बोधः। 'ब्राह्मणाय हितं' 'ब्राह्मणाय सुखम्'—अत्र 'चतुर्थी तदर्थार्थ—'इति समासविधानेन हितसुखशब्दयोगे चतुर्थी। हितशब्दयोगे चतुर्थ्यां 'तस्मै हितम्' इति निर्देशोऽपि ज्ञापको बोध्यः, इष्टसाधनं हितशब्दार्थः, तद्घटकेच्छान्वय्याधेयत्वादिकं चतुर्थ्यर्थः। इष्टसाधनान्वयीच्छाघटितः परंपरासंबन्धो वा। अत एव परकीयौषधादितात्पर्येण ब्राह्मणायेदं हितमिति संगच्छते इति दिक्। हरये नमः। 'नमःस्वस्ति—' इति सूत्रेणात्र चतुर्थी। स्वापकृष्टत्वज्ञानबोधानुकूलो व्यापारः स्वरादिपठितनमःशब्दार्थः। नमःशब्दप्रयोगे स्वनिष्ठं यदपकृष्टत्वज्ञानं तज्ज्ञापकस्यानुभवसिद्धत्वात्। तादृशाननुभवे तु—अपकृष्टत्वबोधानुकूलो व्यापार एव तदर्थो बोध्यः। अत एव बृहच्छब्देन्दुशेखरे तथैवाभ्यधायि। अपकर्षः—स्वतन्त्रवक्तृनिष्ठो नमस्कार्यावधिक एव प्रतीयते। व्यापारोऽपि वक्तृनिष्ठ एव प्रतीयते, शब्दशक्तिस्वभावात्। अन्योच्चारितनमःपदादन्यदीयनमस्कारावोधात्। व्यापारश्च करमस्तकसंयोगादिः नमःपदघटितवाक्यप्रयोगश्च। चतुर्थ्यर्थ उद्देश्यत्वम्, हर्युद्देश्यकस्तादृशो व्यापार इति बोधः। एषोऽर्घ्यः शिवाय नम इत्यादौ त्यागो नमःपदार्थः। त्यागश्च स्वस्वत्वनिवृत्त्यनुकूलेच्छारूपो व्यापारः। स्वत्वभागितयेच्छाविषयतारूपोद्देश्यत्वं चतुर्थ्यर्थः। शिवोद्देश्यकत्यागविषयोऽर्घ्य इति बोधः। स्वत्वनिवृत्तिविषयेच्छैव परस्वत्वमपि विषयीकरोतीति मन्येत तदोक्तविधोद्देश्यतानिरूपकत्वरूपं तदुद्देश्यकत्वं बोध्यम्। यदि च त्यागजनिकान्येच्छैव तदवगाहत इति स्वीक्रियते तदोद्देश्यतारूपचतुर्थ्यर्थस्य

❀ काशिका ❀

परंपरया निरूपकत्वरूपं, स्वनिरूपकेच्छाधीनेच्छाविषयत्वरूपं वा संसर्गतया भासमानं तद्बोध्यम्।

त्यागश्च वेदबोधितोद्देश्यकत्वस्वकर्तृकत्वोपरक्त एव प्रतीयते, शब्दशक्तिस्वभावात्। अन्योच्चारितनमःपदेनान्यसंबन्धित्यागाप्रतीतेः। वेदबोधितेत्याद्युक्त्या न नीचोद्देश्यकयागे पूजाभिन्नयादृच्छिकेच्छयान्नादित्यागे च नमःशब्दप्रयोगः। ऋत्विजा च यजमानद्रव्ये स्वीयत्वारोपपूर्वक एव तथाप्रयोगः क्रियते। शिवादीनां द्रव्ये स्वत्वबाधेऽपि शिवस्वं न गृह्णीयादित्यस्य नासंगतिः। शिवोद्देशेन त्यक्तमित्यर्थकत्वात्। नमस्करोति देवानित्यत्र कृधातुरेव पूर्वोक्तार्थकः। नमःशब्द ऊर्यादित्वान्निपातस्तद्द्योतकः। उपपदविभक्तेरिति न्यायात्, कर्मणि द्वितीया। यदवधिकमपकृष्टत्वं बोध्यते तद्वृत्तित्वविशिष्टः समवायात्मकः फलतावच्छेदकसंबन्धः। अतस्तेन संबन्धेन तादृशबोधरूपफलाश्रयाणां देवानामेव कर्मत्वं न तु शुद्धसमवायेनोक्तबोधाश्रयस्य तटस्थस्येत्याहुः। नमःशब्दद्योत्यार्थान्वयमात्रेणात्र चतुर्थीप्राप्तिरिति बोध्यम्। नमस्कुर्मो नृसिंहायेत्यत्र नृसिंहमनुकूलयितुमिति बोधात् 'क्रियार्थोपपदस्य—' इति चतुर्थीति स्पष्टं कौमुद्यादौ। अत्र नमःशब्दस्य वाचकत्वे 'नमःस्वस्ति—' इति चतुर्थी। एवं द्योतकत्वेऽपि कर्मत्वाविवक्षायां षष्ठीं बाधित्वा चतुर्थीति **परे वदन्ति**। न त्वां तृणाय मन्ये। अत्र 'मन्यकर्मणि—' इति चतुर्थी कर्मार्थिका। अत्रानादरशब्दो नादराभावमात्रावेदकोऽपि तु नञः प्रतिपक्षवाचितयाऽधर्मादिवदादरविरोधितिरस्कारार्थकः। 'अनादरे' इत्यस्य कर्मविशेषणतयानादरद्योतककर्मार्थकादेव चतुर्थीविधानान्न युष्मच्छब्दात् सा। अत्र कुत्सित इति वक्तव्येऽनादरपदोपादानमनादरातिशयविवक्षायामेवेयं विभक्तिः प्रवर्तत इति बोधनाय। एतदर्थमेवोदाहरणे नञुपादानं, तृणतुल्यमपि न मन्ये इति बोधनेन तदतिशयप्रतिपादनात्। अत एव तृणाय मत्वा रघुनन्दनोऽपीत्यादिप्रयोगाणामसाधुत्वमभाणि **निबन्धकृद्भिः**। मन्ये इति श्यन्नन्तस्वरूपविवक्षया तु न तदसाधुत्वं युक्तं, लिङाद्यन्ततद्धातुयोगे चतुर्थ्यनापत्तेः। श्यना निर्देशस्तु तानादिकव्यावर्तनाय। तेन न त्वां तृणं मनुते इत्यत्र चतुर्थी नेति स्पष्टमेवेति दिक्। ब्राह्मणेभ्यः स्वस्ति। स्वस्तिशब्दः कुशलार्थो मङ्गलार्थो वा, संबन्धश्चतुर्थ्यर्थ इत्यलं विस्तरेणेति शिवम्।

सार्थाद्धीयते देवदत्त इत्यत्र धातूपात्तविभागावधितया सार्थस्यापादानत्वम्। ननु धातूपात्तव्यापाराश्रयतया परत्वात् कर्तृत्वापत्तिस्तस्य तदनाश्रयत्वे तु देवदत्तस्य तदाश्रयत्वात् कर्तृत्वापत्तौ तदुपकर्मणो ?लादिनाभिधानानापत्तिः। सार्थस्य कर्मत्वापत्तौ देवदत्तेन सार्थो हीयत इत्यस्यापत्तिश्चेति चेदत्राहुः—'अपादाने चाहीयरुहोः' इति सूत्रेण कर्तृत्वप्राप्तावप्यपादानत्वस्य ज्ञापितत्वान्न दोषः। अन्यथा सार्थस्यापादानत्वाभावादेव तसेरप्राप्तौ किम् 'अहीय' इति निषेधेन ? तज्ज्ञापितमपादानत्वं कर्मप्रत्ययान्तजहातिविषयकमेव 'हीय' इति निर्देशात्। तेन देवदत्तः सार्थं जहाति इत्यादौ न। 'कर्तुरीप्सिततमम्—' इत्यत्र कर्तृपदस्य धातूपात्तप्रधानीभूतव्यापाराश्रयलाक्षणिकतया देवदत्तस्य कर्मत्वसिद्धिः। संप्रदानसंज्ञासूत्रस्थकैयटग्रन्थस्वरसोऽप्यत्रैव। अधर्माज्जुगुप्सते—अत्र 'जुगुप्साविराम—' इति वचनेनापादानत्वम्। यद्विषयत्वेन जुगुप्सादयो विवक्षितास्तदपादानमिति

ॐ काशिका ॐ

तदर्थः। अनिष्टसाधनत्वज्ञानरूपा निन्दा जुगुप्सतेरर्थः। विषयत्वादि पञ्चम्यर्थः। अपादानत्वशक्तिर्वा। तादृशनिन्दापूर्वकनिवृत्तौ लक्षणां धातोः स्वीकृत्य 'ध्रुवमपाये—' इति सूत्रेणैवापादानत्वम्। एवमेवेदं वार्तिकमुत्तरसूत्राणि च न कर्तव्यानीति भाष्यकृन्मतम्। धर्माद्विरमति कृतिसंसर्गाभावानुकूलो व्यापारो विरमतेरर्थः। अनुकूलता चात्र योगक्षेमसाधारणी। अनुकूलव्यापारश्च धर्मविषयोपेक्षात्मक एव। तदुक्तं भाष्ये—'य एष मनुष्यो नास्तिकबुद्धिर्भवति स पश्यति नेदं किंचिद्धर्मो नाम नैनं करिष्यामीति स बुद्ध्या संप्राप्य ततो निवर्तते' इति। अनेन यः कदाचिदपि धर्मं न कृतवांस्तत्राप्यसौ प्रयोग इष्ट इति लभ्यते। एतेन करणानन्तरमकरणं विरमतेरर्थः। तच्च जीवनकालावच्छिन्नः कृत्यसमानाधिकरणकृतिध्वंसः। उभयत्र कृतिरेकविषयैव। अतो भोजनादिकृतिसमानाधिकरणत्वाज्जीवनकालावच्छिन्नकृतिध्वंससामान्यस्येति नासंभवः। ध्वंसे जीवनकालावच्छिन्नत्वनिवेशात्—मरणादिकालिककृतिध्वंसमादाय धर्माद्विरमते इत्यादिप्रयोगो न। जीवनं कर्तृसंबन्ध्येवोपादेयं, तेनान्यदीयजीवनकालावच्छिन्नत्वस्य चैत्रीयमरणादिकालिककृतिध्वंसे सत्त्वान्न तद्दोषापातादवश्यम्। पूर्वपरकालयोर्धर्माचरणे घटिकादिकाले तदनाचरणेऽपि धर्माद्विरमतीति प्रयोगापत्तिवारणाय कृत्यसमानाधिकरणत्वं कृतिध्वंसे विशेषणम्। तच्च स्वावच्छेदकशरीरजातीयशरीरावच्छेदेन कृतिसमानाधिकरणत्वं यत्तद्भिन्नत्वधर्मविषयः। कृतिध्वंसस्यापि भाविदेहान्तरावच्छिन्नत्वकृतिसमानाधिकरणतया तादृशप्रयोगासंभवापत्तिनिरासाय स्वावच्छेदकशरीरजातीयशरीरावच्छिन्नत्वकृतिसामानाधिकरण्ये विशेषणम्। तादृशशरीरावच्छिन्नत्वनिवेशे शरीराणामवस्थाभेदेन भेदाद्युवशरीरावच्छेदेन धर्मं कुर्वाणेऽपि बालशरीरावच्छिन्नकृतिध्वंसस्य कृत्यवच्छेदकशरीरावच्छिन्नत्वाभावेन स्वावच्छेदेन कृत्यसमानाधिकरणतया धर्माद्विरमतीतिप्रयोगापत्तेस्तज्जातीयशरीरावच्छिन्नत्वनिवेशः। साजात्यं चैत्रादिपदोपस्थापितचैत्रत्वादिनैव, नातो भवान्तरीयदेहस्यापि पृथिवीत्वमनुष्यत्वादिना सजातीयतया तद्दोषापातादवश्यम्। तत्र वर्तमानदेहस्य तादृशकृत्यनवच्छेदकतया न तत्सामानाधिकरण्यावच्छेदकत्वमिति नोक्तदोषः। ननु प्राचीनशरीरावच्छिन्नकृतिसामानाधिकरण्यादुक्तदोषस्तदवस्थ एवेति चेन्न। स्वावच्छेदककालावच्छिन्नत्वस्यापि सामानाधिकरण्ये निवेशात्तन्निरस्तम्। कदाचिदपि धर्मानाचरणे इष्टस्य तादृशप्रयोगस्यानापत्तेः। नन्विष्ट एव तत्र स प्रयोगः। निखिलजनानां धर्माचरणानन्तरं तदकरण एव तथाविधप्रयोगात्। उक्तभाष्यस्यापि पूर्वं यो धर्मं कृतवान् पश्चाद्यो नास्तिकस्तत्परत्वस्यापि संभवादिति चेन्न, संकोचे मानाभावात्। धर्माद्विरतोऽपि पुनः प्रवृत्त इत्यादेरनापत्तेश्च। ननु तव मते पूर्वं धर्मविषयोपेक्षा तदनन्तरं च स्वापादिक्रिया तत्समये तादृशप्रयोगापत्तिः, कृत्यभावानुकूलोपेक्षात्मकव्यापारस्य तदा सत्त्वात्। तन्मते तु नापत्तिस्तदानीं तत्तत्कृतिध्वंसस्य तत्तत्कृतिसमानाधिकरणत्वादिति चेन्न। यत्काले तथाविधप्रयोगः प्रामाणिकस्तत्कालनिष्ठोपेक्षाया एव धात्वर्थत्वाङ्गीकारात्। एतत्सूचनायैव मञ्जूषायामुपेक्षाविशेष इत्युक्तम्। ननु करणानन्तरमकरणमित्यस्य नोक्तोऽर्थोऽपि स्वानन्तर्यसामानाधिकरण्योभयसंबन्धाभ्यां कृतिविशिष्टं कृत्यभावा-

❀ काशिका ❀

नुकूलव्यापारस्तदर्थः। व्यापारश्च पूर्वोक्त एव। अथवा कृतिध्वंसानुकूलोक्तव्यापारः। एवं च धर्माद्विरतोऽपीत्यादिर्नोक्तदोषोऽपरिष्कारापेक्षया लाघवं भवदुक्तार्थापेक्षयैतस्मिन् गौरवाभावश्चाथवेति पक्षे इति चेन्न, कदापीति पूर्वोक्तदोपतादवस्थ्यादुत्पत्तिमत्त्वघटितध्वंसत्वस्याभावत्वापेक्षया गुरुत्वाच्चेति दिक्। धर्मात् प्रमाद्यति—इष्टसाधनविशेष्यकानिष्टसाधनत्वप्रकारकज्ञानरूपानवधानता धात्वर्थः। विषयित्वमपादानत्वं वा पञ्चम्यर्थः। अन्ये त्वस्मरणपूर्वकप्रवृत्त्यभावोऽस्मरणमेव वानवधानता। स एव धात्वर्थः, स्मरणं च कर्तव्यादिप्रकारकम्, विषयित्वं पञ्चम्यर्थः। धर्मविषयकर्तव्यत्वादिप्रकारकस्मरणाभावप्रयुक्तो धर्मविषयकप्रवृत्त्यभावस्तादृशस्मरणाभावो वा वाक्यार्थः। चोराद्बिभेति त्रायते वा—अत्र 'भीत्रार्थानां भयहेतुः' इत्यपादानत्वम्। अनिष्टसंभावनं भयम्। अनिष्टनिवृत्त्यनुकूलो व्यापारस्त्राणम्। सूत्रे भयशब्देन तदेकदेशरूपमनिष्टमुच्यते। तथा चानिष्टहेतुरपादानसंज्ञ इत्यर्थः। चोरापादानकमनिष्टज्ञानमित्याद्याकारको बोधो मञ्जूषाकृन्मते। अन्यमते चोरहेतुक इत्यादिरीत्या बोधः। तन्मते प्रयोज्यत्वस्य पञ्चम्यर्थत्वात् तस्यानिष्टेऽन्वयः। अनिष्टं च प्रत्यासत्त्यानिष्टसंभावनं कर्तृसंबन्धि। न चैवं यस्य चोराधीनमनिष्टमप्रसिद्धमथ च तद्धेतुकत्वेन स्वस्यानिष्टं संभावयति तत्र चोरादयं बिभेतीति प्रयोगो न स्यात्, तदीयानिष्टे चोरहेतुकत्वस्य बाधादिति वाच्यम्। तद्धेतुकान्यदीयानिष्टस्य तस्मिंस्तदीयानिष्टे वा चोरहेतुकत्वस्यारोपेणोक्तप्रयोगस्य निर्वाहात्। यज्जन्यं भयं कस्याप्यप्रसिद्धं तत्र तथाविधप्रयोगस्येष्टत्वे आरोप एव शरणीकर्तव्यः। अत्रापि चोरादेः संबन्धित्वेन विवक्षायां षष्ठी भवति। अत एव 'कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे' इति **रामायण**प्रयोगसंगतिः। कस्य संयुगे इत्यन्वयो वा स्वीकार्य इत्याहुः। **तार्किकास्तु** प्रयोज्यताप्रकारकत्वं पञ्चम्यर्थः। तस्य संभावनायामन्वयान्नोक्तदोषः। अनिष्टतत्प्रयोज्यत्वबाधेऽपि तत्प्रयोज्यताप्रकारकत्वस्य तादृशसंभावनायामक्षतत्वात्। एवं च शत्रुभ्रमेण मित्रादपि बिभेतीति वाक्यस्यापि प्रामाण्योपपत्तिः। एवं च भयार्थकधातुयोगे भयहेतुत्वेन संभावनमपादानमित्येको वाक्यार्थः, त्राणार्थकधातुयोगेऽनिष्टप्रयोजकं तदित्यपर इत्याहुः। अध्ययनात् पराजयते—अत्र 'परानेरसोढः' इति सूत्रेणापादानत्वं, कृत्यसाध्यत्वप्रकारकज्ञानसमानाधिकरणस्तद्विषयकोत्साहाभावो धात्वर्थः। तद्विषयत्वमत्रापादानम्। असोढ इत्यस्य तादृशासहनरूपधात्वर्थविषयार्थकत्वात्। एवं चाकर्मकत्वे एतोदाहरणत्वमिति पर्यवसन्नम्। उत्साहो हर्षपदव्यपदेश्यश्चित्तवृत्तिविशेषः, प्रवृत्तिविशेषो वा। अध्ययनापादानकस्तादृश उत्साहाभाव इति बोधः। विषयत्वं पञ्चम्यर्थः। अध्ययनविषयस्योत्साहेऽन्वय इत्यन्य आहुः। अपरे तु द्वेषाधीननिवृत्तिर्धात्वर्थः। पञ्चम्यर्थो विषयित्वं तदर्थद्वेषे निवृत्तौ चान्वेति। अध्ययनविषयकद्वेषप्रयुक्ततत्तद्विषयकनिवृत्तिस्तद्वान् वेति बोध इत्याहुः। एवं च समनन्तरोक्तमते एतन्मते च सकर्मक इति लभ्यते। परं तु प्रवृत्त्यभावादिप्रतीतिरेवानुभवसिद्धेतीदं न युक्तमिति प्रतिभाति। शत्रून् पराजयत इत्यत्र तिरस्कारानुकूलो व्यापारो धात्वर्थः। तिरस्कारात्मकफलाश्रयत्वेन शत्रूणां कर्मत्वम्। 'असोढ' इत्युक्तेर्नात्रापादानत्वम्। 'गां वारयति' अग्रेर्माणवकं वारयति 'कूपादन्धं वारयति'

ॐ काशिका ॐ

अत्र 'वारणार्थानामीप्सितः' इत्यपादानत्वम् । वारणार्थकधातुयोग ईप्सिततत्तद्धात्वर्थफलाश्रयत्वेनेच्छाविषयोऽपादानसंज्ञ इति तदर्थः । इच्छा च वार्यमाणस्य गवादेः । ईप्सित इत्यनेन प्रधानाप्रधानान्यतर व्यापाराश्रयकर्तुराक्षेपात् । स्पष्टं चेदमत्र सूत्रे कैयटे । भक्षणसंयोगाद्यनुकूलक्रियाभावानुकूलव्यापारो वारयतेरर्थः । या क्रिया यदा प्रतिषिध्यते तदा तत्क्रियाभावानुकूलक्रियार्थकत्वं तस्येति फलितम् । यवादयो भक्षणादिकर्तुर्गवादेर्गलबिलाधःसंयोगादिरूपस्वस्वक्रियाजन्यफलाश्रयत्वेनेप्सिता इति तेषामपादानत्वम् । यवापादानके गोकर्मकमर्थाद्यवनिष्ठगलबिलाधःसंयोगानुकूलव्यापाराभावानुकूलव्यापार इति बोधः । योगक्षेमसाधारणानुकूलतोपादेया । अतः प्रागभावादेरजन्यत्वेऽपि नाप्रवृत्तवारणे उक्तप्रयोगासिद्धिः । 'यदीमा गावस्तत्र गच्छन्ति ध्रुवं सस्यनाशस्तन्नाशेऽधर्मो राजभयं च, स बुद्धया संप्राप्य निवर्तयति' इति भाष्यात्तत्रापि तस्येष्टत्वावधारणात् । स्वरूपयोग्यतारूपैव चानुकूलता ग्राह्या न तु फलोपहितत्वरूपा, तेन प्रतिषेधानन्तरं भक्षयत्यपि गवादावयं निवारयति तथापि न निवर्तते इति प्रयोगोपपत्तिः । भाष्यकारमते तादृशाभावानुकूलनिवर्तनाया धात्वर्थतया 'ध्रुवमपाये—' इत्यनेनैवापादानत्वम् । अचेतनेऽप्यारोपितनिवृत्तेः सत्त्वान्न पुष्पेभ्य आतपं वारयतोत्यस्यासिद्धिरतन्मते । कूपपतनमप्यन्धस्याभिमुखदेशगमनत्वेनेच्छाविषयः । एवं सति विषयस्य विषयत्वेनेच्छाविषयत्वाभावेऽपि भक्षणत्वादिनेच्छाविषयत्वसत्त्वान्नान्तरीयकविषभोजनप्रसक्तौ तद्वारयितरि विषाद्वारयति देवदत्तं यज्ञदत्त इति प्रयोगापत्तिरिष्टापत्त्या परिहरणीयेत्याहुः । मातुर्निलीयते कृष्णः—'अन्तर्धौ येन—' इति सूत्रेणात्रापादानत्वम् । अन्यकर्तृकस्वविषयकदर्शनाभावानुकूलाव्यवहितदेशे स्थितिरन्तर्धिस्तद्धटकं यत्कर्तृकदर्शनाभावमिच्छति तदपादानमिति सूत्रार्थः । लीङ्धातोरुक्तान्तर्धिरर्थः । उदाहरणे इच्छा आक्षेपलभ्या, दर्शने मातृकर्तृकत्वं प्रत्यासत्तितो लभ्यम् । तथा च मात्रपादानकस्वकर्मकमर्थान्मातृकर्तृकं यद्दर्शनं तदभावानुकूलस्तादृशदेशावस्थितिरूपो व्यापारः कृष्णकर्तृक इति बोधः । अन्ये तु कर्तृत्वं पञ्चम्यर्थस्तस्य धात्वर्थघटकदर्शने निरूपकत्वसंबन्धेनान्वयः । तथा च मातृकर्तृकं स्वकर्मकं यद्दर्शनं तदभावानुकूलस्तादृशो व्यापार इति बोधः । सूत्रे 'येन' इत्यस्याभावे यस्तादृशदर्शनाभावमिच्छति तस्यैव स्यादिति 'येन' इत्युपात्तम् । ननु कर्तृकर्मणोः कृति' इति षष्ठीप्रसङ्गाद् 'येन' इति निर्देशानुपपत्तिः । न च आत्मन इति कर्मणोऽध्याहारेण 'उभयप्राप्तौ' इति नियमान्न दोष इति वाच्यम् । एवं सति 'अथ शब्दानुशासनम्' इत्यत्राप्याचार्यस्य कर्तुः प्रसिद्धतयाध्याहारावश्यकतया 'उभयप्राप्तौ—' इति नियमप्रसक्त्या 'कर्मणि च' इति समासनिषेधापत्तेः । वस्तुतस्तूभयोपादाने एव नियमप्रवृत्तिरिति 'आत्ममाने—' इति सूत्रभाष्ये स्पष्टम् । एवं च प्रकृते आत्मन इत्यस्याध्याहारान्न दोष इति सुस्थम् । 'उपाध्यायादधीते' 'पण्डितान् पुराणं शृणोति' अत्र 'आख्यातोपयोगे' इति सूत्रेणापादानत्वम् । नियमपूर्वकविद्यास्वीकारे सति वक्तापादानमिति तदर्थः । उच्चारणोत्तरकालिको ब्रह्मचर्यादिरूपनियमपूर्वकग्रन्थस्वीकारानुकूलो व्यापार इङ्धात्वर्थः । नियमपूर्वकश्रवणप्रत्यक्षानुकूलो व्यापारः—श्रुधात्वर्थः । यदि नियमपूर्वकविद्यास्वीकाररूपोपयोगस्य स्वरूपसत्तायाः संज्ञोपयोगित्वं स्वीक्रियते न तु तस्य शाब्दबोधे

❀ काशिका ❀

मानमपि तदा धात्वर्थे नियमपूर्वकत्वं नान्तर्भाव्यम्। उपाध्यायापादानकस्तादृशो व्यापार इति बोधः। अन्ये तु कर्तृच्चारणाधीनत्वं पञ्चम्यर्थः, उच्चारणाधीनत्वमात्रं वा, आद्ये पञ्चम्यर्थघटक-कर्तरि प्रकृत्यर्थस्याभेदेनान्वयः; अन्त्ये स्वकर्तृकत्वसंबन्धेन पञ्चम्यर्थस्योच्चारणादिरूपे धात्वर्थे आश्रयत्वसंबन्धेनेत्याहुः। ब्रह्मणः प्रजाः प्रजायन्ते–अत्र 'जनिकर्तुः–' इति सूत्रेणापादानत्वम्, जननं जनिरुत्पत्तिस्तस्याः कर्तेति षष्ठीतत्पुरुषः, तृजन्तत्वान्न समासनिषेधः। न चैवं 'न लोक–' इति षष्ठीनिषेधप्रसङ्गः, कारकषष्ठ्या एव स निषेध इति सिद्धान्ताच्छेषषष्ठीप्रवृत्तौ बाधकाभावात्।

वस्तुतस्तु शेषषष्ठ्यास्तृजन्तेनापि समासः सुलभ इति ध्येयम्। स्पष्टं चेदं मनोरमादौ। एवं चोत्प-त्त्याश्रयस्य प्रकृतिरुपादानकारणमपादानमिति सूत्रार्थः। प्रकृतिशब्दस्य तत्रैव प्रसिद्धेः। मायाशबलस्य ब्रह्मणो जगदुपादानत्वं वेदान्तिसिद्धान्तसिद्धम्। अतएव ब्रह्मणो जगदुपादानत्वे 'यतो वा इमानि भूतानि जायन्ते' इति श्रुतिस्थपञ्चमीनिर्देशमुपष्टम्भकमाहुर्वेदान्तिनः। प्रकृतसूत्रप्रत्याख्यानपरभाष्य-सिद्धत्वाच्च। पुत्रात् प्रमोदोऽजायत इत्यादावुपादानत्वारोपेण निर्वाहः। वृत्तिकृतस्तदनुयायिनोऽन्ये च पुत्रात् प्रमोद इत्यादिप्रयोगानुरोधेन प्रकृतिपदेन हेतुमात्रपरिग्रह इत्याहुः न च धूमादग्निमा-नित्यादाविव प्रकृतेऽपि 'विभाषा–' इति पञ्चमीसिद्धौ किमनेन सूत्रेणेति वाच्यम्। अपादान-त्वप्रकारकबोधनिर्वाहार्थमेतस्यावश्यकत्वात्। अन्ये तु हेतुत्वातिरिक्तस्वरूपसंबन्धविशेषाधीनत्व-बोधे पञ्चमीसिद्धय इदमावश्य,—संबन्धत्वेन रूपेण हेतुत्वबोधनिर्वाहार्थं चेत्याहुः। हिमवतो गङ्गा प्रभवति–अत्र 'भुवः प्रभवः' इत्यनेनापादानत्वम्। भवनं भूः, सम्पदादित्वात् भावे क्विप्। समासैकदेशभूतमपि कर्तृग्रहणमनुवर्तते स्वरितत्वात्। तथा च भवनकर्तुः प्रभवः, प्रभवत्यस्मादिति प्रभवः–प्रथमप्रकाशाधिकरणमपादानमिति तदर्थः। 'प्रभवो जलमूले स्याज्जन्महेतौ पराक्रमे। ज्ञानस्य चादिमस्थाने–' इति विश्वः। प्रभवतीत्यत्र प्रथमोपलम्भरूपः प्रथमप्रकाशो धात्वर्थः। सूत्रेऽपि भूधातुरुक्तार्थक एव। प्रकाशप्रत्यक्षात्मकज्ञानविषयत्वं, तादृशज्ञानमात्रं वा विषयता-संबन्धेन। तदाश्रयस्य गङ्गादेः कर्तृत्वम्। तद्गतं प्राथम्यं च समानकालिकत्वसंबन्धेन स्वध्वं-साविशिष्टत्वम्, तादृशं ज्ञानं भूमण्डलस्थस्य कस्यचिदेव गङ्गाविर्भावसमानकालिकस्य संभवति। दक्षिणदेशादागतस्य विन्ध्याचले गङ्गायाः प्रथमदर्शनेऽपि न विन्ध्यादितो गङ्गा प्रभवतीति प्रयोगः तद्दर्शनस्य तादृशध्वंसाविशिष्टत्वाभावात्। ज्ञानं च तात्पर्यवशान्मनुष्यलोकस्थनिष्ठमेव। अतो देवानां तादृशज्ञानविषयत्वमादाय न वैकुण्ठाद्गङ्गा प्रभवतीति प्रयोगापत्तिः। अपादानत्व-शक्तिमान् पञ्चम्यर्थ इति मञ्जूषाकृतः। अधिकरणत्वं पञ्चम्यर्थ इत्यपरे। संबन्धाधीनत्वं तदर्थ इति व्युत्पत्तिवादकृतः। दर्शनयोग्यत्वाभावावच्छेदकदेशाव्यवहितदेशावच्छेदेन दर्शन-योग्यत्वं धात्वर्थः। तादात्म्यं पञ्चम्यर्थः। तस्य धात्वर्थघटकद्वितीयदेशेऽन्वयः। तथा च हिम-वदभिन्नो यो दर्शनयोग्यत्वाभावावच्छेदकदेशाव्यवहितदेशस्तदवच्छिन्नदर्शनयोग्यत्ववती गङ्गेति बोध इति तार्किकरत्नाकरकृतः। कारकवादकृतस्तु–आद्यवहिः—संयोगो धात्वर्थः। वहिः पदार्थः प्रकृते रसातलं, संयोगध्वंसाव्यवहितोत्तरक्षणवृत्तित्वं पञ्चम्यर्थः। आश्रयत्वमाख्यातार्थः।

❀ काशिका ❀

तथा च हिमालयानुयोगिकसंयोगध्वंसाव्यवहितोत्तरक्षणवृत्तित्वं पञ्चम्यर्थः, आश्रयत्वमाख्यातार्थः। तथा च हिमालयानुयोगिकसंयोगध्वंसाव्यवहितोत्तरक्षणवृत्त्याद्यपृथ्वीसंयोगाश्रयत्ववती गङ्गेति बोधः। वैकुण्ठात् प्रभवति गङ्गा काशीतो वेति प्रयोगवारणायाव्यवहितत्वाद्यत्वयोरुपादानम्। भूसंयोगस्य वैकुण्ठसंयोगध्वंसाव्यवहितोत्तरक्षणवृत्तित्वाभावात्, काशीसंयोगध्वंसाव्यवहितोत्तरक्षणवृत्तिगङ्गाभूसंयोगस्याद्यत्वाभावान्न दोष इत्याहुः। अत्र प्रथमज्ञानात्मकप्रथमप्रकाश एव धात्वर्थ इति ज्ञानस्य चादिमस्थान इत्युक्तविश्वकोशाल्लभ्यते। उपलभ्येतेति प्रभवतीत्यस्य वृत्तिस्थव्याख्यानाच्च। अत्र आसनात् प्रेक्षते, 'ल्यब्लोपे कर्मण्यधिकरणे च' इति पञ्चमी। गम्यमानार्थकतयाप्रयोगो लोपः। एवं च ल्यबन्तस्याज्ञाने प्रत्यासत्त्या ल्यबन्तधात्वर्थकर्मणीत्यादिरर्थः। ल्यबन्तस्यानुच्चारणे इति तु 'ल्यब्लोपे' इत्यस्य नार्थः। दर्शनाभावस्यैव लोपसंज्ञकत्वात्। दृशेश्चोच्चारणक्रियत्वाभावादिति स्पष्टं बृहच्छब्दरत्नादौ। आसने उपविश्य प्रेक्षत इत्यर्थः। प्रासादात् प्रेक्षते—प्रासादमारुह्य प्रेक्षत इत्यर्थः। क्रमेणाधिकरणकर्मणी पञ्चम्यर्थौ। उपवेशनादिक्रियाया वाक्यैकदेशन्यायेन भानमित्यन्यत्र विस्तरः। आसनाधिकरणकं यदुपवेशनं तदव्यवहितोत्तरकालिकं तत्समानकर्तृकं प्रेक्षणमित्यादिः शाब्दबोधः। वनाद् ग्रामो योजने योजनं वा—अत्र 'यतश्चाध्वकालनिर्माणं तत्र पञ्चमी, तद्युक्तादध्वनः प्रथमासप्तम्यौ कालात् सप्तमी च वक्तव्या' इति वचनात् पञ्चम्यादिकं विधीयते। यदवधित्वेनाश्रित्याध्वकालान्यतरस्य निर्माणं परिच्छेदः प्रतिपाद्यते ततः पञ्चमी, तद्युक्तात् = तेन पञ्चम्यन्तेनार्थद्वारा युक्तात् परिच्छेद्याध्ववाचिनः प्रथमासप्तम्यौ भवतः। कालादित्यत्रापि तद्युक्तादित्यस्यानुषङ्गः। तथाविधकालार्थकात् सप्तमीति तदर्थः। अव्यवहितोत्तरत्वं पञ्चम्यर्थः। प्रतियोगित्वसंबन्धेन प्रकृत्यर्थान्वितस्याश्रयत्वसंबन्धेन योजनेऽन्वयः। प्रथमासप्तम्योरव्यहितोत्तरवृत्तित्वमर्थः। तस्य ग्रामे आश्रयतयान्वयः।

एवं च वनाव्यवहितोत्तरयोजनाव्यवहितोत्तरदेशवृत्तिर्ग्राम इति बोधः। कार्तिक्या आग्रहायणी मासे इत्यत्रावयवघटितत्वं पञ्चम्या अर्थः, अव्यवहितोत्तरकालवृत्तित्वं सप्तम्याः, कार्तिकीरूपप्रकृत्यर्थस्य तादात्म्यसंबन्धेन पञ्चम्यर्थघटकावयवेऽन्वयः। कार्तिक्यवयवघटितमासाव्यवहितोत्तरकालवृत्तिराग्रहायणीति बोधः। पूर्वत्र प्रथमासप्तम्योरत्र च सप्तम्या अव्यवहितोत्तरत्वमात्रं वार्थः। तस्याश्रयत्वसंबन्धेन ग्रामेऽन्वयः। योजनाधिकव्यवधाने वनाद् ग्राम इत्यप्रयोगात्तत्र पञ्चम्यर्थेऽव्यवधानांशनिवेशः। योजनोत्तरविभक्त्यर्थेऽप्यत एव तन्निवेशः। मासे इत्यत्र सप्तम्यर्थे तदन्तर्भावोऽप्येतदर्थमेव। अन्यथा कार्तिक्याः पौषी मासे इत्यादेरप्यापत्तेः। कार्तिकीघटितमासोत्तरवृत्तित्वस्य पौष्यामपि सत्त्वात्। कार्तिक्या इति पञ्चम्या वनादित्यत्रेवाव्यवहितोत्तरत्वं नार्थः। कार्तिक्यव्यवहितोत्तरमासाव्यवहितोत्तरवृत्तित्वस्याग्रहायण्यामसंभवादुक्तप्रयोगानुपपत्तेः। उभयत्र पञ्चम्या अवधित्वमर्थः। वनावधिकयोजनाव्यहितोत्तरदेशवृत्तिर्ग्राम इत्याकारको बोध इति शाब्दिकरत्नाकरकृतः। योजनाद्यर्थे ज्ञाते नियमेनावध्याकाङ्क्षायाः सत्त्वान्नासंभव इति भावः। कार्तिक्या इत्यादावपि नार्थासंगतिः तद्धर्मवतोऽपि तद्धर्मावधित्वात्, यथाभिविधा-

ॐ काशिका ॐ

वित्ति भावः । घटादन्य इत्यादौ स्वप्रतियोगिकभेदसंबन्धः पञ्चम्यर्थः । तेन संबन्धेन प्रकृत्यर्थस्यान्यस्मिन्नन्वयः, अत एव नात्रैकदेशान्वयप्रसक्तिः । अत एव देवदत्तस्य पुत्र इत्यादौ जन्यत्वादेः षष्ठ्यर्थत्वमभ्युपयन्ति शाब्दिकाः । अन्यादिशब्देन भेदाद्यवगतनिराकाङ्क्षत्वं न प्रकारतया, तद्बोधे एव निराकाङ्क्षत्वेन संसर्गतया बोधे निराकाङ्क्षत्वविरहात् । स्वप्रतियोगिकत्वमित्यस्य प्रकृत्यर्थतावच्छेदकावच्छिन्नप्रतियोगिताकत्वमित्यर्थः । तेन घटेऽपि घटान्तरमादाय घटो घटादन्य इति प्रयोगापत्तिः । स्वपदेन घटत्वादिविशिष्टतत्तद्व्यक्त्युपादानेऽपि द्वित्वादिना तत्प्रतियोगिकभेदमादाय तद्दोषस्तदवस्थ इति दूषणं प्रयुक्तम् । अन्ये तु प्रतियोगित्वं प्रतियोगिमत्त्वं वा पञ्चम्यर्थः । प्रतियोगित्वे प्रकृत्यर्थतावच्छेदकावच्छिन्नाधेयत्वसंबन्धेन प्रकृत्यर्थस्य प्रकृत्यर्थान्वितस्य निरूपकत्वसंबन्धेन भेदे तद्घटितसंबन्धेन तद्वति वान्वयः । द्वितीयपक्षेऽनुयोगितास्वरूपे प्रतियोगिमत्त्वे प्रकृत्यर्थतावच्छेदकावच्छिन्ननिरूपितत्वसंबन्धेन प्रकृत्यर्थस्यान्वयः, तस्य चाश्रयत्वसंबन्धेन भेदे एकदेशेऽप्यन्वयो व्युत्पत्तिवैचित्र्याद्, विस्पष्टपटुरित्यत्र पाठवे यथा व्युत्पत्तिवैचित्र्यादन्वयः । अत एव मुख्यसामानाधिकरण्याभावाद् 'विशेषणं विशेष्येण' इति कर्मधारयो न किं तु सुप्सुपेति समासो विस्पष्टादीनीति ज्ञापकाद्वेति स्पष्टं 'प्राक् कडारात् समासः' इति सूत्रे भाष्यकैयटयोः । तद्घटितसंबन्धेन भेदवति वान्वय इत्याहुः । अन्येत्यर्थग्रहणमत एव घटाद्भिन्न इति प्रयोगसिद्धिः । घटस्य भेद इत्यत्र तु न पञ्चमीप्रसक्तिः । भेदविशिष्टार्थकस्यैव ग्रहणात् । अन्यशब्दस्य विशिष्टार्थकत्वात् । इतरग्रहणमेतदर्थसूचकमेवेत्यभिप्रेत्यैव प्रपञ्चार्थमित्युक्तं कौमुद्याम् ।

अत एव घटो नेत्यत्र न तदापत्तिस्तस्य द्योतकत्वाङ्गीकाराच्चेति प्राञ्चः । नव्यशाब्दिकमते तु नार्थग्रहणं भाष्यानुक्तत्वात् । घटाद्भिन्न इत्यत्र पञ्चमीनिर्वाहस्तु प्रागुक्त एवेत्यलम् । कृष्णादृते दुःखम्, अत्र कृष्णशब्दस्तद्भक्तिलाक्षणिकः । ऋतेशब्दार्थः संसर्गाभावः । प्रतियोगितासंबन्धेन प्रकृत्यर्थान्वितस्य तस्य सामानाधिकरण्यसंबन्धेन तत्स्थे दुःखेऽन्वयः । अभावे प्रतियोगिवैयधिकरण्यं निवेशनीयमन्यथाराध्यत्वप्रकारकज्ञानात्मकभक्तेरव्याप्यवृत्तितया तदभावसामानाधिकरण्यस्य सुखेऽपि सत्त्वेन कृष्णादृते सुखमिति प्रयोगापत्तिः । क्वचित् प्रयुक्तत्वसंबन्धेनैवान्वयः । अत एव वृष्टेर्ऋते सुखमिति न । अन्यथा वृष्टेः क्षेत्रादौ सत्त्वेऽपि तदभावस्यात्मनि सत्त्वेन स्यात्तथा प्रयोगः । स्वदेशात् शत्रोः प्रयाणादृते देवदत्तस्य दुःखमित्यादौ प्रयुक्तत्वबोधस्यानुभवसिद्धत्वादावश्यकत्वाच्च । अन्यथा शत्रोः प्रयाणे सत्यपि तदभावस्य देवदत्ते सत्त्वेन तदीयव्याध्यादिप्रयुक्तदुःखे तादृशप्रयाणाभावसामानाधिकरण्यमादाय दुर्वारत्वात् । एवं दण्डादृते न घट इतिवद्रासभादृते न घट इत्यादिप्रयोगापत्तिरप्यत एव न । दण्डाभावप्रयुक्तत्वस्य घटाभावेऽबाधितत्ववद्रासभाभावप्रयुक्तत्वस्याबाधितत्वविरहात् । सामानाधिकरण्यसंबन्धस्य संसर्गत्वे तु स्यादेवोक्तप्रयोगापत्तिः । प्रयुक्तत्वसंबन्धेनैव तस्यान्वय इति नियमस्तु न वह्नेर्ऋते पर्वतरूपाभाव इत्यादौ तदसंभवादित्यलम् ।

ऋते वाताद्वृक्षः पतति, अत्राभावस्तद्ध्वान्वा तदर्थः । वाताभावविशिष्टवृक्षस्य पतने संबन्धावगतौ वाने वा तज्जन्यत्वाभावलाभ आर्थः । जन्यत्वशब्दादनुपस्थितस्याभावप्रतियोगितया भानासंभवाज्ज-

❀ काशिका ❀

न्यत्वस्य वृत्त्यनियामकतया तत्संबन्धावच्छिन्नप्रतियोगिताकवाताभावबोधोऽपि न संभवति। वातपदस्य वातजन्यत्वलक्षणायां तु तदाश्रयणमेव दोपः। भेदवानपि ऋतेशब्दार्थः। यथा रामादृते न धनुर्धर इत्यत्र। रामभिन्नो धनुर्धरभिन्न इति बोधः। घटादन्य इत्यत्रोक्तप्रकारः सर्वोऽप्यत्रावगन्तव्यः। एतद्योगे द्वितीयापि 'ततोऽन्यत्रापि दृश्यते' इत्यत्र दृशिग्रहणात्। अत एव चान्द्राः 'ऋते द्वितीया च' इति सूत्रयन्ति। अत एव 'पुरुषाराधनमृते' इति प्रयोगोऽपि साधुर्भवति। तेन ऋते वातं वृक्षः पततीत्यपि भवति। पूर्वो ग्रामात्तडागः—अत्र 'अन्यारात्—' इति सूत्रेण पञ्चमी। अत्र पूर्वशब्दस्यादिग्वृत्तित्वेऽपि शब्दग्रहणसामर्थ्याद्दिशि दृष्टमात्रस्य ग्रहणात्। उदयाचलसंनिहितदेशः पूर्वपदार्थः। अवधित्वं पञ्चम्यर्थः। अवधित्वसाकाङ्क्षो धर्मविशेषः पूर्वत्वम्। स चाखण्डोपाधिः। एवं परत्वाचपि। ग्रामावधितानिरूपकपूर्वत्ववानित्यादिक्रमेण बोधः। चैत्रात् पूर्वः फाल्गुनः—अत्र प्रतियोगितद्ध्वंसानधिकरणकालभवः पूर्वपदार्थः। उपाधिविशेषात्मकपूर्वत्वेन प्रतियोगिविशेषतद्ध्वंसानधिकरणकाल एव भासते तत्तदवधिबोधकपदसमभिव्याहारसाचिव्यात्। चैत्रावधिकपूर्वत्ववत्कालभवः फाल्गुन इति बोधः। तद्ध्वंसमात्रानधिकरणभवस्य पूर्वत्वेन रूपेण वाच्यत्वे चैत्रात् पूर्वश्चैत्र इति प्रयोगापत्तिः। तत्प्रतियोगिमात्रानधिकरणभवस्य तथात्वे वैशाखादावपि तदापत्तिरिति तूभयानधिकरणेत्युक्तम्। तादृशकालभवत्वस्य शक्यतावच्छेदकत्वे गौरवम्। चैत्रादिरूपप्रतियोग्याद्यन्तर्भावेण शक्त्यङ्गीकारे शक्त्यानन्त्यम्। प्रतियोगित्वादिरूपेणैवान्तर्भावेऽप्रसिद्धिरित्यादिदोपभयात् तादृशकालभवस्य पूर्वत्वेनैव शक्तिरङ्गीकृता। कालस्य क्रियामात्रपरिच्छेदकत्वात् फाल्गुनादिनान्वयो न स्यादतस्तद्भवस्यान्तर्भावः। पूर्वादिशब्दस्य तत्र लक्षणा। लक्षणाभावे तु चैत्रात् पूर्वं फाल्गुन इत्येव प्रयोगः। अधिकरणशक्तिप्रधानमव्ययम्। अस्तीत्यादेरध्याहारः। अन्ये तु ग्रामात् पूर्व इत्यत्रोदयाचलावधिकापरत्वाश्रयः पूर्वशब्दार्थः, पञ्चम्याः परत्वनिरूपकत्वमर्थः। तथा च ग्रामवृत्तिपरत्वनिरूपकं यदुदयाचलावधिकमपरत्वं तदाश्रय इति बोधः। चैत्रादित्याद्युदाहरणे पूर्वशब्दः प्रागभावाश्रयार्थकः। प्रतियोगित्वार्थिका पञ्चमी। प्रागभावानङ्गीकारे तु ध्वंसप्रतियोगी पूर्वशब्दार्थः। आधेयत्वं पञ्चम्यर्थः। तस्य च ध्वंसेऽन्वयः। चैत्रप्रतियोगिकप्रागभावाश्रयः फाल्गुन इत्याद्याकारो बोध इत्याहुः। अत्र मते प्रागभावादेः सावधिकत्वाभावेन तदर्थकपूर्वशब्दस्यावध्याकाङ्क्षार्थकत्वं न स्यात्, तथा च व्यवस्थाभावे सर्वनामता न स्यात्। न च प्रतियोग्याकाङ्क्षासत्त्वादेव तथात्वोपपत्तिरिति वाच्यम्। प्रतियोगित्वावधित्वयोर्भेदात्, पूर्वत्वस्य सावधिकत्वान्मन्मते नानुपपत्तिरित्याहुः शाब्दिकाः। चैत्रात् परो वैशाखः—चैत्रध्वंसाधिकरणकालभवः परत्वेन परशब्दार्थः। अवधित्वे पञ्चमी। 'गृहाद्गङ्गा मम परा काश्याः सैवापरा मम' इत्यादौ विप्रकृष्टदेशस्थसंनिकृष्टदेशस्थौ परत्वापरत्वाभ्यां परापरशब्दप्रतिपाद्यौ। गृहावधिकमत्संबन्धिपरत्ववती गङ्गेत्यादिक्रमेण बोधः। परत्वादिनिष्ठः स्वसंबन्धः स्वसंयुक्तसंयोगपरंपराश्रयाश्रितत्वाद्यात्मकः मध्यवर्ति गृहं स्वसंबन्ध्यन्यसंबन्धि वेत्यन्यदेतत्। यस्य तदर्थे उत्थिताकाङ्क्षा प्रत्यास...

❀ काशिका ❀

तन्निमित्तकविभक्तेरतद्वाचकादेव स्वीकारात्। परादिपदं चावधावेव नियताकाङ्क्षमिति स्पष्टमेव।

प्रागादयः पूर्वादिना व्याख्याताः। सध्र्यङ् चैत्रेणेत्यादौ तु पञ्चमीसाहचर्येण दिग्वाचकस्यैवाञ्चूत्तरपदस्य पञ्चमीनिमित्तत्वाभ्युपगमात्। ग्रामाद्बहिः—समभिव्याहृतपदार्थतावच्छेदकानाश्रयस्तत्स्थं च बहिष्ट्वरूपोपाधिनोच्यते। अनावृतदेश इत्यनेनाप्ययमेवार्थोऽभिप्रेतः। अत एव द्रव्याद्बहिर्भूतो गुण इत्याद्युपपद्यते। काशीतो बहिर्भूतमिदं गृहमिति च। बहिःशब्देन पञ्चमीसमासविधानज्ञापितात्र पञ्चमी। ज्ञापकसिद्धस्यासार्वत्रिकत्वेन 'करस्य करभो बहिः' इति सिद्धमित्याहुः। अप हरेः परि हरेः संसार इत्यत्रापपरी ऋतेशब्दसमानार्थौ। 'अपपरी वर्जने' इति कर्मप्रवचनीयसंज्ञा। 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी। हरिशब्दो हरिभक्तिलाक्षणिकः। हरिभक्त्यभावसमानाधिकरणस्तत्प्रयोज्यो वा संसारः। संसारो जन्मादि। अपरे तु अत्यन्ताभावोऽनयोरर्थः, पञ्चम्या आधेयत्वम्। तस्य चात्यन्ताभावेऽन्वयोऽत्यन्ताभावस्य प्रतियोगितया संसारे। हरिवृत्त्यत्यन्ताभावप्रतियोगी संसार इति बोधः। अप पृथिव्या गन्धाभाव इत्यादौ तथैवानुभवादिति वदन्ति। तेषामयमाशयः—पृथिव्यभावसमानाधिकरणो गन्धाभाव इति बोधाभ्युपगमो न संभवति। अप पृथिव्याः स्नेहाभाव इत्यादेरप्यापत्तेः। अथ पृथिव्यभावप्रयुक्तो गन्धाभाव इति बोधः स्वीक्रियते स्नेहाद्यभावश्च न तत्प्रयुक्त इति नातिप्रसङ्ग इति चेत्, हेतुतावच्छेदकसंबन्धावच्छिन्नहेत्वभावस्यैव कार्याभावप्रयोजकतया संयोगादिसंबन्धावच्छिन्नततदभावस्य तथात्वासंभवादिति पृथिव्यन्योन्याभावप्रयुक्तत्वबोधाभ्युपगमे तु नोक्तदोष इति बोध्यम्।

आमुक्तेः संसारः आङोऽत्र मर्यादार्थः। कालदेशभेदेन मर्यादा द्विविधा। कालगतं मर्यादात्वं स्वस्वोत्तरकालोभयप्रागभावाधिकरणयावत्कालभवो यः समभिव्याहृतपदार्थस्तदनधिकरणत्वम्। मुक्तिपदं तदधिकरणकालपरम्, मर्यादामर्यादिभावसंबन्धः पञ्चम्यर्थः स एवाङ्द्योत्यः। मुक्तिमर्यादकः संसार इति बोधः। मुक्तिकालप्रागभावादिनिरूपितं यन्मुक्तिकालतत्प्रागभावकालान्यकालवृत्तित्वविशिष्टव्यापकत्वं संसारे तद्बोधस्त्वार्थिकः। तादृशकालवृत्तित्वस्यार्थिकबोधनिर्वाहार्थमेव तदुत्तरकालप्रागभावोपादानं कृतम्। तादृशप्रागभावाधिकरणकाले समभिव्याहृतकालप्रागभावानधिकरणत्वमपि प्रवेश्यम्, तेन सावित्रीं जपेदर्धास्तमिते मण्डले आ नक्षत्रदर्शनादिति प्रयोगे जपनिष्ठतथाविधप्रागभावानिरूपितव्यापकत्वभानानिर्वाहः, अन्यथा तत्प्रागभावस्यार्धास्तमितपूर्वकालेऽपि सत्त्वेन तद्व्यापकत्वस्य बाधेन तदनिर्वाहात्। अत्र वस्तुगत्या यस्तादृशविशेषणविशिष्टः समभिव्याहृतपदार्थस्तदधिकरणभेदरूपं तदनधिकरणत्वं समभिव्याहृतपदार्थभेदाधिकरणभेदत्वेन रूपेणोच्यते संबन्धत्वेन वेति न शक्त्यानन्त्यं, मर्यादित्वं च तथाविधमर्यादात्वनिरूपकत्वमिति बोध्यम्। तार्किकरत्नाकरकृतस्तु समानकालिकत्वाभावः कालिकमव्यवधानं चाङा प्रत्याय्यते। तादृगव्यवधानं तत्प्रागभावाधिकरणक्षणप्रागभावानधिकरणत्वे सति तत्प्रागभावाधिकरणभूतो यः क्षणस्तद्वृत्तित्वम्। प्रागभावानभ्युपगमे तु तदधिकरणक्षणोत्पत्तिकध्वंसप्रतियोगिक्षणवृत्तित्वं प्रतियोगित्वं पञ्चम्यर्थः। तथा च मुक्तिसमानकालिकत्वाभाववान् मुक्त्यव्यवहितः संसार इति

ॐ काशिका ॐ

बोध इत्याहुः। अत्र मते संसारे मुक्त्युत्तरकालावृत्तित्वस्यार्थिक एव लाभ इति बोध्यम्। न च तदभानेऽपि न क्षतिरिति वाच्यम्। मध्याह्नोत्तरं तत्पूर्वं चाध्ययने मध्येऽवसाने आ मध्याह्ना-दधीत इति प्रयोगापत्तेः। प्रतिदिनं सायंकालपर्यन्तमध्ययनकर्तरि आ सायंकालादधीते इत्यादि तु धातोस्तत्तदध्ययनपरत्वेन निर्वाह्यम्। अव्यवहितोत्तरकालविशेषो वोत्तरकालेत्यनेन विवक्षणीयः। अत्र मते प्रातःकाले सायंकालाव्यवहितपूर्वकाले एव जपे प्रातरारभ्या सायंकालाज्जपतीति प्रयोगा-पत्तिरिति तु द्रष्टव्यम्। अपरे तु मर्यादात्वघटकः प्रागभाव एवाङोऽर्थः। मुक्तिपदं मुक्तिकालपरं पञ्चम्याः प्रतियोगित्वं वाच्यम्। एवं च मुक्त्यधिकरणकालप्रतियोगिकप्रागभावलाभः। तस्य स्वस्वोत्तरकालावृत्तित्वसहितव्यापकत्वसंबन्धेन संसारेऽन्वय इत्याहुः। प्रयागात् प्रभृत्या काश्या वृष्टो देव इत्यादौ देशरूपा मर्यादा। मर्यादात्वं च स्वस्वोत्तरदेशयोगनिष्ठं काशीप्रयागोभयान्तरा-लिकयावद्देशवृत्तिसमभिव्याहृतपदार्थवृष्ट्याद्यनधिकरणत्वम्। उत्तरदेशावृत्तिताद्दृशसमभिव्याहृत-पदार्थानधिकरणत्वं तन्निष्ठं मर्यादात्वमिति तु परमार्थः। उत्तरदेशे तदनधिकरणत्वनिवेशात् काशीतः पूर्वदेशेऽपि वृष्टिसद्भावे न तादृशप्रयोगापत्तिः। पाटलिपुत्रात् पूर्वदेशे वृष्टिसत्त्वे काशी-पाटलिपुत्रान्तराले तदसत्त्वे प्रयागकाशीमध्यदेशे वृष्टिसत्त्वदशायामुक्तप्रयोगस्य प्रामाणिकत्वे उत्तर-शब्देनाव्यवहितोत्तरदेशो ग्राह्यः। वृष्टिपदं वा वृष्टिविशेषपरं, प्रयागपदोत्तरं पञ्चमी प्रभृत्यर्थयोगे। तथा च प्रयागादिकाशीमर्यादकवृष्टिकर्ता देव इति बोधः। प्रयागाधिकरणकप्रारम्भिका काशी-प्रयागोभयान्तरालिकयावद्देशनिष्ठं यत्काशीतदुत्तरदेशनिष्ठाभावप्रतियोग्यधिकरणत्वं तन्निरूपिका या वृष्टिस्तत्कर्तेति यावत्। पञ्चम्यर्थमर्यादात्वशरीरे काश्युत्तरदेशे समभिव्याहृतपदार्थानधिकरण-त्वान्तर्भावोऽनन्यगतिकतया स्वीकार्यः। एवं सति नानार्थत्वे इष्टापत्तिरिति भावः। वस्तुतस्तु उभयविधमर्यादात्वानुगमकं मर्यादात्वं धर्मविशेषरूपम्। एवं च न नानार्थत्वप्रसक्तिः, अत एव काशीमर्यादकेति बोधप्रदर्शनमभियुक्तैः क्रियते। धर्मविशेषरूपमर्यादात्वस्यानङ्गीकारे तु पूर्वोक्त-रीतिरत्राप्यनुसंधेया। प्रयागादिकाशीपश्चिमदेशनिरूपितं यत्सुभिक्षदेशविशेषावृत्तित्वविशिष्टव्याप-कत्वं तद्बोधस्त्वार्थः। तादृशव्यापकत्वस्य शब्दादनुपस्थितेः। काशीपदोत्तरपञ्चम्या व्यापकत्वार्थ-कत्वाङ्गीकारेण निर्वाह इति तु न, व्यापकत्वस्य व्याप्यविशेषाघटितस्य दुर्वचत्वात्, तद्घटक-पदार्थेषु खण्डशः शक्तिस्वीकारे गौरवं व्याप्यस्यानुपस्थिताविष्टानिर्वाहश्च। व्याप्यविशेषान्त-र्भावेण शक्तौ शतयानन्त्यमित्यादिकं बोध्यम्। अभिविधिस्तत्पर्यन्तमभिव्याप्तिः, तत्पदेनावधिः। स चाङा द्योत्यः पञ्चम्यर्थः। तत्पर्यन्ताभिव्याप्तिश्च तद्व्यापकत्वे सति तदितरत्र संबन्धः। स च क्वचिद् व्यापकत्वरूपः क्वचित्तादात्म्यसंयोगादिरतात्पर्यवशाद्भासते। क्वचिद्व्यापकत्वमात्रं यथा आ हरेः प्रमेयत्वम्। अत्र प्रमेयत्वे हरिव्यापकत्वे सति तदितरव्यापकत्वं प्रतीयते। आ परमाणोः पृथिवी, अत्र परमाणुपदं पार्थिवपरमाणुपरं तादात्म्येन, तद्व्यापकत्वं तदितरतादात्म्यसंबन्धश्च प्रतीयत इत्यादि बोध्यम्। आ सकलाद् ब्रह्म। अत्र व्यापकत्वमात्रमर्थः। सकलव्यापकं ब्रह्मेति बोधः। अभिविधिरूपः संबन्धोऽपि द्विविधः कालिको दैशिकश्च। आद्यो यथा कार्तिक्याश्चैत्रं याव

'प्रकारक' ॐ काशिका ॐ

भूषणे' कार्तिकीप्रभृति चैत्रान्तकालव्यापकं शीतमिति बोधः, चैत्रपदं चैत्रान्तकालपरम्। अन्त्यं यथा काशीतः पाटलीपुत्रं यावद्वृष्टो देवः। काशीप्रभृतिपाटलिपुत्रान्तदेशव्यापकत्वं वृष्टौ प्रतीयते। अनयोस्तात्पर्यवशात्तदभिन्नकालावृत्तित्वविशिष्टं तदभिन्नदेशावृत्तित्वविशिष्टं च व्यापकत्वं प्रतीयत इत्युक्तमभियुक्तैः। अयं भावः, व्यापकत्वं द्वितीयार्थो यावच्छब्दो द्योतकः, व्युत्पत्तिवैचित्र्यादितरपदार्थविशिष्टप्रकृत्यर्थचैत्रान्तकालादेर्निरूपितत्वसंबन्धेन व्यापकत्वेऽन्वयः। व्यापकत्वं च तत्तद्व्याप्यघटितघटकोपादेयमतो नाप्रसिद्धम्। अथवा भेदप्रतियोगितावच्छेदकत्वमभावश्चेत्येतद् द्वयं व्यापकत्वघटकं व्याप्यघटितमेव द्वितीयार्थः। इतरपदार्थविशिष्टप्रकृत्यर्थस्याधेयत्वसंबन्धेन भेदेऽन्वयः, तद्बलादेव तद्व्यापकत्वलाभः, अथवा चैत्रपदस्यैव कार्तिकीप्रभृतिचैत्रान्तकालार्थकत्वं लक्षणया, कार्तिक्या इति तात्पर्यग्राहकं द्वितीयार्थः पूर्ववत्, काशीत इत्यत्राप्येवमेव बोध्यम्, यावच्छब्दस्य वाचकत्वपक्षे तु आधेयत्वं द्वितीयार्थः, तस्य यावच्छब्दार्थघटकभेदेऽन्वयः, इतरत् पूर्ववत्।

अथवा द्वितीयार्थो व्यापकत्वं तदितरसंबन्धश्च, तदितरश्च प्रत्यासत्त्या कार्तिकीप्रभृतिककाल एव संबन्धश्च व्यापकत्वरूपो भासते इति दिक्। मर्यादोदाहरणेऽपि यद्यप्येवंरीत्या व्यापकत्वबोधो निर्वहति तथापि मर्यादात्वेन रूपेण बोधनिर्वाह एतादृशक्लेशं विनैव संभवतीत्येतदुपेक्षा तत्र पुरस्कृता। अत्र त्वगत्या व्यापकत्वबोध उक्तक्रमेणाङ्गीकारे कृतः। अभिव्याप्तितात्पर्यसत्त्वे कार्तिकीत आ चैत्र्याः शीतमित्याद्यपि कालिकाभिविधेरुदाहरणं बोध्यम्। अत्राप्युक्तैव रीतिरनुसर्तव्या। तत्र यो द्वितीयार्थः सोऽत्र पञ्चम्यर्थ आङ्द्यो य इति विशेषः। अपरे तु कार्तिकीतश्चैत्रमित्यत्रोत्तरकालपूर्वत्वं काशीतः पाटलीपुत्रमित्यत्र पूर्वदेशपश्चिमत्वं यावच्छब्दार्थः। अवधित्वं द्वितीयार्थः। तस्य यावच्छब्दार्थेऽन्वयः। उत्तरकालपूर्वत्वस्य व्यापकत्वसंबन्धेन शीतभवनेऽन्वयः। व्यापकत्वघटकोत्तरकालपूर्वत्वाधिकरणे समभिव्याहृतकार्तिक्यादिपूर्वकालभेदो निवेश्यः। द्वितीयेऽपि पूर्वदेशपश्चिमत्वस्य व्यापकत्वसंबन्धेन वृष्टावन्वयः। अत्रापि व्यापकत्वघटकपूर्वदेशपश्चिमत्वाधिकरणे काशी पश्चिमदेशभेदो निवेश्यः। एतादृशव्यापकत्वभाने कार्तिकीपूर्वकालावृत्तित्वमर्थात् सिद्धं भवतीत्यलमतिविस्तरेण। आङ्घटितोदाहरणेऽपीदं सर्वं बोध्यमित्याहुः। कार्तिक्या इति पञ्चमी तु प्रभृत्यर्थयोगनिमित्तिका। आरभ्येत्यर्थकमव्ययं प्रभृतीति। 'यतश्चाध्वकाल—' इति वार्तिकप्रत्याख्यानाय भाष्ये 'इदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते कार्तिक्याः प्रभृत्याः प्रभृत्याग्रहायणी मासे' इत्युक्तम्। तेन प्रभृत्यर्थयोगे पंचमीति वचनसत्त्वं सूचितम्। तेन तदप्रयोगेऽपि पञ्चमीसिद्धिः, अवधिमादायेति तदर्थः। अवधित्वेन स्वीकृत्येति यावत्। आरभ्येत्यस्य तदर्थकताग्रहणमात्रार्थकता च। आद्ये पञ्चमी, द्वितीये प्रातःकालमारभ्येत्यादौ कर्मत्वाद् द्वितीया। अवधित्वं च भवात् प्रभृति सेव्यो हरिरित्यत्र समभिव्याहृतपदार्थमरणान्तकालापेक्षमित्यन्यत्र विस्तरः। अवधित्वं पञ्चम्यर्थः। प्रद्युम्नः कृष्णात् प्रति—अत्र 'प्रतिः प्रतिनिधिप्रतिदानयोः' इति प्रतेः कर्मप्रवचनीयसंज्ञा। 'प्रतिनिधिप्रतिदाने च यस्मात्' इति सूत्रेण पञ्चमी। यस्मादिति षष्ठ्यर्थे सूत्रे पञ्चमी, यत्संबन्धी यत्प्रतियोगी प्रतिनिधिः प्रतिदानं वा

❀ काशिका ❀

कर्मप्रवचनीययुक्ततदर्थकात् पञ्चमीति सूत्रार्थः, प्रतियोगित्वरूपसंबन्धः सूत्रस्य पञ्चम्यर्थः च प्रतिः स शार्थकः। कृष्णादिति पञ्चम्याः प्रतियोगित्वमर्थः, कृष्णप्रतियोगिकसादृश्यवानिति बोधः, तिलेभ्यः प्रतियच्छति माषान्। ग्रहणपूर्वकं प्रत्यर्पणं प्रतिदानम्, तत्र गृहीतर्णजन्या-दृष्टध्वंसफलकदानात्मकं प्रतिसमभिव्याहृतयच्छतेरर्थः। तिलग्रहणपूर्वकं माषकर्मकप्रतिदानमिति बोधः, कर्मत्वाभावः संबन्धः पञ्चम्यर्थः, तस्य धात्वर्थघटकग्रहणेऽन्वयः। तार्किकरत्नाक-रकृतस्तु ऋणत्वध्वंसजनकत्वं प्रतेरर्थः, तस्याश्रयत्वेनादानेऽन्वयः, पञ्चम्या आदानजन्यत्वम् ऋणत्वान्वयो ऋणत्वं पदार्थान्तरं पापविशेषो वा, तिलादानजन्यर्णत्वध्वंसजनकमापदानकर्म-त्याद्याकारो बोध इत्यभ्युपयन्ति स्म। शताद्बद्धः 'अकर्तर्यृणे पञ्चमी' इति सूत्रेणात्र पञ्चमी। कर्तृभिन्नं हेतुभूतं यदृणं तद्वाचकात् पञ्चमीति तदर्थः हेतुहेतुमद्भावो हेतुत्वं हेतुमत्त्वं वा पञ्चम्यर्थः। शतहेतुकं बन्धनकर्मेति बोधः। ऋणत्वं तु वस्तुसन्निमित्तं न तु तस्य वाच्यकोटा-वन्तर्भाव इत्याहुः। तस्य वाच्यत्वं न युक्तं गौरवात्तद्बोधस्यानुभवाद्वेत्याहुः। शतेन बन्धित इति प्रत्युदाहरणे हेतुमण्ण्यन्तात् कर्मणि क्तः। शतमिह ऋणं प्रयोजककर्तृ 'तत्प्रयोजकः—' इति हेतुसंज्ञं च। जाड्याद्बद्ध इत्यत्र 'विभाषा गुणे—' इति वैकल्पिकी पञ्चमी। पक्षे हेतु-तृतीया। जाड्यहेतुकबन्धनकर्मेति बोधः, धूमादग्निमानित्यादौ ज्ञाननिष्ठजन्यजनकभावस्य विषये आरोपात् पञ्चमीत्याहुर्मञ्जूषाकृतः। एतत्पक्षे धूमहेतुको वह्निरिति बोधः। एतेन धूमादेर्व-ह्न्याद्यजनकत्वेऽपि पञ्चम्यनुपपत्तिर्निरस्ता। ज्ञापकस्यापि हेतुपदेन ग्रहणमिति तु न युक्तम्। 'हेतुर्ना कारणं बीजम्' इति कोशेन हेतुपदस्य कारणार्थकत्वनिश्चयात्। लोके तत्र प्रयोगा-भावाच्च। धूमपदं धूमज्ञानपरम्। अग्निमत्पदं स्वज्ञानविषये लाक्षणिकमिति लघुशेखरे।

एतन्मते धूमज्ञानहेतुकवह्निमज्ज्ञानविषयपर्वत इति बोधः। मणिकृतस्तु—वह्निपदं वह्निज्ञान-लाक्षणिकं, धूमपदं धूमज्ञानलाक्षणिकं हेतुत्वं जनकत्वरूपं पञ्चम्यर्थः। प्रकृत्यर्थधूमज्ञानान्वितस्य तस्य निरूपकतासंबन्धेन वह्निपदार्थवह्निज्ञानेऽन्वयः। मतुवर्थो विषयतावान् विषयता वा वह्नि-पद[illegible]गा वा आश्रयत्वसंबन्धी मतुवर्थः। अथवा वह्निपदं ज्ञायमानवह्निलाक्षणिकं मतुबर्थः संयोगीति स्वीचक्रुः। अनयोर्मञ्जूषाशेखरोक्तयोः पक्षयोर्मध्ये ज्ञानगतजन्यजनकभावस्य विषय आरोप इत्येव पक्षः सम्यगिति प्रतिभाति। दीधितिकारादयस्तु—ज्ञानज्ञाप्यत्वं पञ्चम्यर्थो धूमपदं मुख्यार्थकमेव। अत एवोदाहरणादिवाक्ये न धूमस्यैव गमकताप्रयोजकव्याप्त्यादिकं प्रदर्श्यते। एवं च वह्निपदमपि मुख्यार्थकमेव। अत एव जिज्ञासिताभिधानं भवति यतो वह्निरेव जिज्ञासितो न तु वह्निज्ञानमित्याहुरित्यलमतिविस्तरेण। ज्ञानं च प्रमात्मकमेव पञ्चम्याद्यर्थ-घटकं तेन व्याप्त्यादिभ्रमविषये वह्न्यादिलिङ्गकधूमानुमत्युत्पत्तावपि न वह्निना वह्नेर्वा धूमवा-निति प्रयोगापत्तिः। प्रमात्वं च यावद्धूमभिन्नत्वं वह्निर्धूमव्याप्य इति भ्रमस्यापि वह्नित्यांशे प्रमात्वमादाय नोक्तप्रयोगापत्तितादवस्थ्यमिति बोध्यम्। धूमादेरगुणत्वेऽपि 'विभाषा' इति योग-विभागात् पञ्चमी। अत एव नास्ति घटोऽनुपलब्धेरित्यत्र स्त्रीलिङ्गत्वेऽपि पञ्चमीत्याहुः। पर

'प्रकारकघट भूषणे । विरो वोध छ पत्त न

❀ काशिका ❀

प्रकृतेरतनुदृष्टेः' इति 'उणादयो बहुलम्' इति सूत्रस्थवार्तिकप्रयोगाद्विशेपणद्वयं माहुः । ज्ञाप्यज्ञापकभावोऽन्वयितावच्छेदकवह्नित्वधूमत्वादिरूपेण प्रतीयत इत्यभ्युपगमात् वह्निमान् द्रव्यत्वाद् द्रव्यत्वेन वेत्यादिर्न प्रयोगः । अन्यथा तु प्रमेयत्वादिना वह्नेरपि ज्ञाप्यत्वात्, वह्नित्वेन रूपेण विशिष्टद्रव्यत्वज्ञापितत्वाच्चोक्तप्रयोगापत्तिर्दुर्वारैव । एवं ज्ञाप्यत्वादेर्यदन्वयितावच्छेदकं पर्वतत्वादि तदवच्छिन्नांशे एव ज्ञाप्यत्वादिकं भासत इति नियमाद् पर्वतो वह्निमान् महानसत्वान्महानसत्वेन वेत्यादेर्नापत्तिः । अथ पर्वतो वह्निमान् न त्वान्नापि महानसत्वादित्यादिप्रयोगानुपपत्तिः, सर्वमतेऽपि वह्नावपि प्रमेयत्वाद्यवच्छिन्नद्रव्यत्वनिरूपितज्ञाप्यत्वस्य महानसे महानसत्वज्ञाप्यत्वस्य च सत्त्वेन तदभावबोधनस्य तत्प्रयुक्तस्य द्रव्यत्वादिज्ञानज्ञाप्यत्वविशिष्टवह्निमत्कर्तृकसत्ताभावस्य च बोधनासंभवात्, वह्नित्वावच्छिन्नस्य द्रव्यत्वज्ञानज्ञाप्यत्वस्य पर्वते महानसत्वज्ञानज्ञाप्यत्वस्य चाप्रसिद्ध्या तदभावबोधनासंभवाच्चेत् न्न । अभावबोधने वास्तवप्रतियोगिप्रसिद्धेरनपेक्षणात्, अपि तु प्रतियोगिज्ञानमात्रस्य । तच्चारोपरूपं प्रकृतेऽपि संभवति, द्रव्यत्वज्ञानज्ञाप्यत्वे वह्नित्वावच्छिन्नत्वस्यारोपः, पर्वतत्वावच्छिन्नांशे महानसत्वस्येत्यादिकं बोध्यम् । अत एव नान्तरिक्षे चिन्वीतेत्यादिवाक्यादन्तरिक्षाधिकरणचयनरूपक्रियाभावबोधनिर्वाहः, अत एव च यद्गेहाधिकरणकः क्षीरपाकोऽप्रसिद्धः पाकमात्रं वाप्रसिद्धं चैत्रस्य सुषुप्तिदशायां तादृशगेहतात्पर्यकस्य अत्र गेहे क्षीरं न पचति चैत्र इत्यादेर्नञ्घटितवाक्यस्य नायोग्यता, तादृशगेहाधिकरणकक्षीरपाकानुकूलकृतेरवास्तवत्वेऽप्युक्तरीत्या तदभावस्य चैत्रसमभिव्याहृतकारकविशिष्टपाकाभावस्य च बोधनसंभवात्, तादृशगेहाधिकरणकत्वाभावस्यपाकक्रियायां बोधनसंभवेऽपि तथाविधाभावविशिष्टपाकानुकूलवर्तमानकालिककृतेश्चैत्रे बाधिताया बोधयितुमशक्यत्वात्, एतादृशवाक्यानामन्ध आकाशं न पश्यतीतिवदप्रमाणतेति चेत्, पर्वतो वह्निमान् न द्रव्यत्वादित्यादिवाक्यस्याप्यप्रमाणतोरीकर्तव्या, नव्यतार्किकाः पुनरेवमुक्तप्रयोगोपपत्तिमाहुः । पर्वतो वह्निमान् धूमाद् धूमेन वेत्यादौ पञ्चम्यादेर्ज्ञानप्रयोज्यत्वं ज्ञानजन्यतावच्छेदकत्वरूपं समभिव्याहृतपर्वतादिविशेष्यतानिरूपितं विधेयत्वं च विशकलितमर्थद्वयम्, धूमादेर्विषयत्वसंबन्धेन ज्ञानेऽन्वयः, धूमज्ञानप्रयोज्यत्वस्य विधेयत्वे तस्य वह्न्यादौ, एवं चोक्तस्थले तथाविधविधेयत्वे द्रव्यत्वमहानसत्वज्ञानप्रयोज्यत्वाभावः प्रत्याय्यते, स चाबाधित एव, तत्प्रयोज्यत्वं च प्रमेयत्वाद्यवच्छिन्नविधेयतायां महानसनिष्ठविशेष्यतानिरूपितविधेयतायां च प्रसिद्धम्, ननु पर्वतो वह्निमान् न धूमादित्यस्य प्रयोगस्यापत्तिः, धूमज्ञानजन्यतानवच्छेदिकायास्तत्तद्वह्नित्वावच्छिन्नायाः पर्वतत्वावच्छिन्नविशेष्यतानिरूपितविधेयताया वह्नावपि सत्त्वादिति चेन्न, तथाविधविधेयतात्वावच्छेदेन धूमादिज्ञानप्रयोज्यत्वाभावान्वयबोधोपगमात्, विधेयतायाः साध्यतावच्छेदकसंबन्धावच्छिन्नविधेयतात्वेन पञ्चम्याद्यर्थत्वमङ्गीकर्तव्यम् । तेन ज्ञानवानात्मत्वादित्यत्र विषयतासंबन्धावच्छिन्नपटनिष्ठविशेष्यतानिरूपितज्ञानवृत्तिविधेयतायां द्रव्यत्वज्ञानप्रयोज्यत्वसत्त्वेनावच्छेदकावच्छेदेन तदभावबोधनाऽयोग्यत्वात्, 'न द्रव्यत्वा'-दिप्रयोगानुपपत्तिर्निरस्ता । पञ्चम्याद्यर्थघटके ज्ञाने हेतुतावच्छेदकतत्तत्संबन्धावच्छिन्नप्रकारकत्वं

ॐ काशिका ॐ

प्रवेश्यम्। तेन समवायेन हेतुत्वतात्पर्येणायं वह्निमान् तद्रूपान्न धूमादिति प्रयो[illegible] इति। पृथग्ग्रामाद्ग्रामेण रामं वा—अत्र 'पृथग्विना—' इत्यादिना विभक्तित्रयं विधीयत[illegible] तेन तृतीयापञ्चम्यौ विधीयेते, द्वितीया तु ऋते वातमित्यत्रेव 'ततोऽन्यत्रापि दृश्यते' भवति। अत्र पञ्चम्यादेः प्रतियोगित्वमर्थः। पृथक्त्वं गुण इति मतेऽवधित्वमर्थः। व[illegible] पृथक्त्वं न गुणः, किं तु भेद एव। अत एव रूपं रसात् पृथगिति रूपादावपि पृथक्त्व[illegible] भवति। न हि गुणे गुणः संभवति। न चाश्रयगतं तत्सामानाधिकरण्येन रूपादौ [illegible] इति वाच्यम्। पटात् पृथग्घट इत्यत्रेव साक्षात्संवन्धेनैतद्वानस्यानुभवसिद्धत्वात्। [illegible] तद्रूपात् पृथगिति प्रतीत्यापत्तेश्च, तद्रूपावधिकपृथक्त्वस्य तदाश्रये सत्त्वात्। अपि च रूप[illegible] रसत्वात् पृथगित्यस्यानापत्तेश्च, तदाश्रये पृथक्त्वस्य गुणरूपस्यासंभवादित्यन्यत्र विस्तरः।

स्तोकेन स्तोकाद्वा मुक्तः—अत्र करणं करणत्वं वा विभक्त्यर्थः। स्तोकशब्दस्याल्पत्वरूपधर्मपरतया, द्रव्यासामानाधिकरण्येन सर्वनामपरामर्शायोग्यतया चासत्त्वरूपत्वं चाद्युपस्थितसमुच्चयादिवत्[illegible] स्तोकादिशब्दोपस्थितधर्मस्य सर्वनामपरामर्शायोग्यता बोध्या लिङ्गाद्यविशेष्यत्वरूपमप्यसत्त्वभूतत्[illegible] तस्य स्तोकादिशब्दाः शुक्लादिशब्दवद्धर्ममात्रपरा अपि। धर्मस्य करणत्वमाश्रयद्वारा 'करणे च स्तोका—' इति सूत्रबलादीदृशेऽर्थे एव साधुता। तेन ह्यत्र तृतीयापञ्चम्यावनुशिष्येते। स्पष्टं चैतत् 'अलुगुत्तर—' इति सूत्रे कैयटे। ग्रामस्य दूराद्दूरेण वा गतम्। अत्र 'दूरान्तिकार्थेभ्यो द्वितीया च' इति प्रातिपदिकार्थमात्रे पञ्चम्यादयो विधीयन्ते। व्याख्यानाद् दूरशब्दो दूरदेशवृत्तिपरः। ग्रामसंबन्धिदूरदेशवृत्तिगमनमिति बोधः। एवं ग्रामस्यान्तिकमित्यादावपि बोध्यम्। 'दूरान्तिकार्थेभ्यः सप्तम्यधिकरणे च' इत्यनेन सप्तमी चेति चतस्रो विभक्तयः प्रातिपदिकार्थे भवन्ति। किं च 'सप्तम्यधिकरणे च' इत्यत्र 'दूरान्तिकार्थेभ्यः' इति सूत्रस्यानुवृत्तिरिति विभक्तित्रयोपेतस्यानुवर्तनादधिकरणे एभ्यो विभक्तिचतुष्टयं विधीयते इति ज्ञेयम्। दूरः पन्था इत्यत्र तु न द्वितीयादिप्रवृत्तिः। 'असत्त्ववचनस्य' इत्यस्यानुवृत्त्या द्रव्यासमानाधिकरणेभ्य एव दूरान्तिकार्थेभ्यस्तद्विधानात्,—'दूरादावसथात् मूत्रं दूरात् पादावसेचनम्' इत्यत्र यथेति शिवम्।

इति पञ्चम्यर्थविचारः।

'षष्ठी शेषे' इति सूत्रेण कारकप्रातिपदिकार्थभिन्नस्वस्वामिभावादिरूपसंबन्धे षष्ठी विधीयते, स च संबन्धः संबन्धत्वेन, तत्तद्रूपेण च तदर्थः, तात्पर्यबलात् क्वचित्तत्तद्रूपेण क्वचित्संबन्धत्वेन प्रतीयते, संबन्धत्वेन क्रियाकारकभावश्च तदर्थः, अत एव समानकालिकत्वाद्यनेकसंबन्धवत्यपि वाससि नेदं चैत्रस्येति प्रयोग उपपद्यते, अन्यथा तत्र चैत्रसंबन्धाभावेन तद्भेदाभावेन च तदनुपपत्तिः स्पष्टैव। तत्तद्रूपेण संबन्धस्य षष्ठ्यर्थत्वे तु स्वत्वादिमत्त्वावच्छिन्नभेदस्य चान्यदीयवस्त्रादौ सत्त्वान्नोक्तप्रयोगानुपपत्तिः। तत्तद्रूपेण वाच्यत्वादेवैकशतं षष्ठ्यर्था इति 'षष्ठी स्थाने—' इति सूत्रस्थभाष्यमुपपद्यते। संबन्धत्वेनैव तस्य षष्ठ्यर्थत्वे तु संबन्धत्वावच्छिन्नशक्तेरैक्यात्तदनुपपत्तिः। द्वितीयादितः क्रियाकारकभावस्यानुभवानुरोधात् कर्मत्वक्रियात्[illegible]

※ काशिका ※

'प्रकारकघट
भूषणे।
विरो

.एव बोधः। मातुः स्मरतीत्यादौ च क्रियाकारकभावस्य विषयरूपेण बोधाभ्युपगमे ...ाथाचापत्त्या संबन्धत्वेनैव तस्य बोध उपेयत इति नव्याः शाब्दिकास्तार्किकाश्च मिश्राः। प्राञ्चस्त्वत्रापि क्रियाकारकभावमूलकं विशेषणत्वरूपं, विषयत्वं निमित्तत्वं वा सबन्धत्वेन, ...रूपेण वा प्रतीयते। अत एव—

बोध
घ

'संबन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः।
श्रुतायामश्रुतायां वा क्रियायामभिधीयते॥'—

पत्त इत्यनेन संबन्धस्य क्रियाकारकभावमूलकत्वमभ्यधायि भर्तृहरिभिः। सर्वत्रैव हि संबन्धस्त-...मूलकः। राज्ञः पुरुष इत्यत्र स्वस्वामिभावसंबन्धः क्रियाकारकभावपूर्वकः। 'यतः राजा पुरुषाय द्रव्यं ददाति ततोऽसौ पुरुषस्य स्वामीभवति' इति भाष्यादौ स्पष्टम्। क्रिया हि सिद्धस्वभावानां द्रव्याणां क्रियां विना परस्परसंबन्धमभजतां निःश्रयणीव संबन्धं करोतीति स्पष्टं भाष्यकैयटादौ। मातुः स्मरतीत्यादौ क्रिया श्रुता, राज्ञः पुरुष इत्यादौ त्वश्रुता दानादिक्रियानुमीयते इत्याहुः। ...स्तरस्तु मञ्जूपातोऽनुसंधेयः। स्वस्वामिभावादिसंबन्धस्य द्विनिष्ठत्वेऽपि विशेषणवाचकादेव राजादिशब्दात् षष्ठी, न तु पुरुषादिशब्दात्, प्रकृत्यर्थं प्रति प्रत्ययार्थस्य प्राधान्यानुरोधात्, तथा हि राजादिः संबन्धे विशेषणं, स च पुरुषे विशेषणम्, राजसंबन्धी पुरुष इति बोधात्। षष्ठ्यर्थसंबन्धस्य संसर्गतयैव भानमिति भाष्यमतेऽपि प्रकारतायाः सांसर्गिकविषयताविशेष्यतो-भयनिरूप्यतया प्रकारतानिरूपकविषयताशालित्वरूपप्राधान्यमक्षतमेव। न हीदं पुरुषादिशब्दात् षष्ठ्यां सत्यां निर्वहति। किं च विशेष्यपुरुषादौ कारकप्रातिपदिकार्थान्यतरत्वस्यावश्यकत्वे नाशेषत्वान्न तद्वाचकात् षष्ठीत्याहुः। परे तु शब्दशक्तिस्वभावाद्विशेषण एव संबन्ध उद्भूततया प्रतीयत इति षष्ठी। तदुक्तं हरिभिः—

'द्विष्ठोऽप्यसौ परार्थत्वाद् गुणेषु व्यतिरिच्यते।
तत्राभिधीयमानश्च 'प्रधानेऽप्युपयुज्यते॥' इति।

परार्थत्वाद् = गुणानां परं प्रति विशेषणतया विवक्षितत्वात्। अयं भावः—प्रकारताया अभेदस्य संबन्धत्वानङ्गीकर्तृनये नीलो घट इत्यादौ व्यभिचार इति भेदसाहित्यानुसरणम्। भेदसहितायाः संबन्धनियततया विशेषणे एव तदाकाङ्क्षोदयेन तत्र एव संबन्ध उद्भूततया प्रतीयत इति तत्रैव षष्ठी पदमादधाति। विशेष्यस्य तु पदान्तरासंनिधाने स्वनिष्ठत्वादेव न विशेष्यतानियामकसंबन्धाकाङ्क्षा। स्वनिष्ठत्वं च स्वार्थप्रवृत्तिनिमित्तनिरूपितविशेष्यतया भास-मानत्वं, तच्छालित्वं वा। अप्रधाने षष्ठ्यादिनांशतः प्रतीतिपथावतीर्णः संबन्धः प्रधानोपयोग्यपि भवति, तस्य द्विनिष्ठत्वात्। राजादिपदसाहित्ये प्रतीयमानराजादिनिरूपितविशेष्यताया उपकारको भवतीति यावत्। षष्ठ्यन्तराजपदसत्त्वे एव तदर्थनिरूपितविशेष्यताशाली, तादृशविशेष्यतावत्त्वेन बोधविषयो वा भवति, राज्ञ इत्यादेस्तु पुरुषादिपदासत्त्वेऽपि अध्याहृतसंबन्धिसामान्यनिरूपित-वि...त्वप्रतीतिरिति विशेषः। राज्ञ इत्येतावता स्वामित्वमवगम्यमानमन्यथानुपपत्त्या पुरुषे

❀ काशिका ❀

स्वत्वं गमयति। अतः संबन्धस्य बहिरङ्गत्वात् पुरुषादन्तरङ्गत्वात् प्रथमैव, स्व... स्वामित्वादिसमूहस्यैव संबन्धतया तस्यैव विभक्त्यर्थत्वं, न स्वत्वादिमात्रस्य, द्विनिष्ठ... स्वत्वस्य निरूपकतया स्वामिवृत्तित्वेन तत्त्वमनपवादमिति तु न वाच्यम्, निरूपक... वृत्त्यनियामकतया स्वामिनस्तद्वत्त्वासंभवात्, स्पष्टं चेदं सर्वं प्रकृतसूत्रभाष्यादाविति ...

पुरुषस्य विशेषणत्वविवक्षायां ततो षष्ठी भवत्येवाङ्गानां राजेतिवत्, शेषपदस्याप्रधानार्थ... भ्युपगम्य पुरुषपदात् षष्ठीवारणं तु न सम्यक्, शुक्लः पट इत्यादौ शुक्लादेस्तत्प्रसङ्ग... भेदसंबन्धावच्छिन्नविशेषणतारूपप्राधान्यपुरस्कारे तु नायं दोष इति प्रतिभाति। अत्रेदं बोध्यम्, संयोगसंबन्धेनाधिकरणकारकस्य संबन्धत्वेन न विवक्षा, अत एव 'तदस्यास्त्यस्मिन्–' सूत्रे 'वृक्षवान् पर्वत' इत्यादिप्रयोगसिद्धये सप्तम्युपात्ता, 'गोमान् देवदत्त' इत्याद्यर्थं च षष्ठी... तत्सूत्रे भाष्ये उक्तम्। नन्वधि ब्रह्मदत्ते पञ्चाला इत्यत्राधिकरणसप्तमी 'आधृतास्ते तत्र भवन्ति' इत्यादिना ग्रन्थेन 'यस्मादधिकम्–' इति भाष्ये स्वीकृता, तद्वदत्रापि गावः सन्त्यस्मिन्निति सप्त... भविष्यतीति किमर्थं षष्ठ्युपादानमिति चेन्न। स्वस्वामिभावविवक्षायामपि गोमानित्यादिप्रयोग... सिद्धये तदुपादानादिति मञ्जूषायां विस्तरः। **अन्नस्य हेतोर्वसति**। 'षष्ठी हेतुप्रयोगे' इ... सूत्रेणात्र षष्ठी, हेतुशब्दप्रयोगे तस्मात्तत्समानाधिकरणाच्च षष्ठोति तदर्थः। 'हेतोः' इत्युक्तौ हेतुशब्दादेव स्यान्न तु विशेष्यान्नवाचकादिति तथा नासूत्रि। हेतुहेतुमद्भावः संबन्धः षष्ठ्यर्थः अन्नहेतुको वास इति बोधः। हेतुशब्दोऽत्रैव तात्पर्यग्राहकः। एवमन्नेन हेतुना वसतीत्यादावपि बोध्यम्। विभक्तिः प्रयोजनं हेतुं च यथायथमभिधत्ते। प्रयोजनत्वादिप्रकारको बोध इत्यन्ये।

कृष्णस्य कृतिः, जगतः कर्ता कृष्णः,—अत्र 'कर्तृकर्मणोः कृति' इति षष्ठी। तदर्थश्च कर्ता कर्म। कृष्णकर्तृका कृतिः, जगत्कर्मककृत्याश्रय इति बोधः। तार्किकमते कर्तृत्वं कर्मत्वमर्थः। प्रकृत्यर्थस्य तत्राधेयत्वसंबन्धेनान्वयः। कर्तृत्वादेर्निरूपकतासंबन्धेन धात्वर्थेऽन्वयः। कृष्णवृत्तिकर्तृतानिरूपककृतिः जगद्वृत्तिविषयतारूपकर्मतानिरूपककृत्याश्रय इति बोधः। इदमनुशासनं शक्तिग्राहकमेव न तु लक्षणाग्राहकम्। लक्षणाग्राहकत्वस्य कुत्राप्यनुशासनेऽभावादिति मञ्जूषादौ विस्तरः। कृतपूर्वी कटमित्यादौ तु न कटादिपदादनेन सूत्रेण षष्ठी। कृद्ग्रहणसामर्थ्येन कृदन्तमात्रशक्तिग्रहप्रयोज्योपस्थितिविषयक्रियाकर्तृकर्मणोरेव षष्ठीविधानात्। अन्यथा तिङ्योगे 'न लोक–' इति निषेधेन कृद्योगे एव षष्ठीसिद्धौ तद्वैयर्थ्यं स्पष्टमेवेति कैयटादिभिः प्रपञ्चितम्। प्रकृते च न कृदन्तमात्रशक्तिग्रहः क्रियोपस्थितिप्रयोजकोऽपि तु तद्धितान्तशक्तिग्रहः, तथा हि कृतेतिक्तप्रत्ययो न कर्मणि, कटमिति द्वितीयानापत्तेः, किं तु कर्मणोऽविवक्षयाकर्मकत्वं पुरस्कृत्य भावे कार्यः, अथवा कर्मविशेषस्य प्राकृततद्रूपेणान्वयाविवक्षयाकर्मकत्वाद्भावे क्तः। स च कृतपूर्वी अधीतीत्यादिवृत्तिविषय एव। तदुक्तं भाष्ये 'यदा वाक्यं न तदा प्रत्ययः, यदा प्रत्ययः सामान्येन तदा वृत्तिः' इति। 'न तदा प्रत्ययः' इत्यस्य न तदा भावे प्रत्ययः, सकर्मकत्वादित्यर्थः। 'यदा प्रत्ययः' भावे इति शेषः, सर्वं वाक्यमिति न्यायेन, 'तदा वृत्तिः' इत्यस्य तदा वृत्तिरेवेत्यर्थः। सा... न

'प्रकारकघट ※ काशिका ※

भूषणे । याहु—'सामान्येन' इति । उपदर्शितरीत्या कर्मरहितार्थकधातुप्रकृतिकक्तान्तेनेत्यर्थः । विरोधाद्दृशक्तान्तस्य वाक्ये न प्रयोग इति स्पष्टमेवोक्तम् । योऽसौ कृतकटयोरभिसंबन्धः —धिकरण्यरूपः, स उत्पन्ने तद्धिते निवर्तते इति च भाष्ये उक्तम् । तेनाकृते तद्धिते—कृतः स्यैव भवतीति' ध्वनितम् । अत एव कटं क्रियते इति न । ततः पूर्वं कृतमनेनेत्यर्थे बोध्यदेनिः' इत्यनुवर्तमाने—'सपूर्वाच्च' इति सूत्रेण तद्धिते कृते ततः फलस्याश्रयाकाङ्क्षायां घ देरूपकर्मविशेषान्वयः । न चैवमसामर्थ्यात्तद्धितो न स्यादिति वाच्यम्, तदुत्पत्तिसमयेऽसापर्त्यविरहात् । एवं च तद्धितान्तशक्तिग्रहप्रयोज्यैव प्रकृतिक्रियेति स्पष्टम् । कारकान्वयो स्त्वप्रभूतक्रियायामपीति स्पष्टमेव ।

'अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः ।
क्रिया संबध्यते तद्वत् कृतपूर्वादिषु स्थितिः ॥'

इति हरिकारिकायाम् । 'अविग्रहा' = कर्तृविशेषणतयैवोपस्थितिविषयीभूता । प्रकारान्तरमपि रभ्यधायि—

'विशेषकर्मसंबन्धे निर्भक्तेऽपि कृतादिभिः ।
विशेषनिरपेक्षोऽन्यः कृतशब्दः प्रवर्तते ॥
अकर्मकत्वे सत्येवं क्तान्ते भावाभिधायिनि ।
ततः क्रियावता कर्त्रा योगो भवति कर्मणाम् ॥' इति ।

निर्भागः = प्राप्तिः, सा च वाक्ये इत्यवगन्तव्यम् । तण्डुलानां पाचकतर इत्यत्र तु न षष्ठ्यनुपपत्तिः । तत्र पाचक इत्यस्यापि पृथक् प्रयोगेण कृदन्तमात्रशक्तिज्ञानस्यापि क्रियोपस्थितिप्रयोजकत्वात् । कृतीत्यनेन तद्धिताधिक्यमात्रव्यावृत्त्यङ्गीकारे तूक्तभाष्यरीत्येष्टस्य तण्डुलानामित्यादिप्रयोगस्यानुपपत्तिरूपदोषः स्फुट एव । तण्डुलान् पाचकतर इति प्रत्युदाहरणमनुपन्यस्य कृतपूर्वीत्यादिक्लिष्टप्रत्युदाहरणोपन्यासात् तण्डुलानां पाचकतर इत्यत्र भाष्यकृतः षष्ठीष्टैवेति प्रतीयते । 'न लोक–' इति निष्ठायोगे नेति निषेधस्य तु नात्र प्राप्तिः, निष्ठान्तमात्रशक्तिग्रहप्रयोज्योपस्थितिविषयक्रियान्वयिनोरेव कर्तृकर्मणोरतेन षष्ठीनिषेधात् । अत्र च कृद्ग्रहणमेतत्प्रत्युदाहरणपरं भाष्यं च मान्यमित्याहुः । एतादृशार्थकल्पनया प्रकृते निषेधाप्रसक्त्या कृद्ग्रहणसार्थक्योपपादनम् । न चैवं कृद्ग्रहणवैयर्थ्यम्, कर्तव्यपूर्वी कटं पक्तव्यपूर्वी ओदनमित्यादेरेव प्रत्युदाहरणस्य संभवात् । तत्राप्युक्तरीत्या भावे तव्यप्रत्ययसंभवात् । न च भाष्ये एतत्प्रत्युदाहरणात्तथाकल्पना नेति वाच्यम् । प्रयोजनदौर्लभ्यस्य तथाप्यनपायादित्यपरे आहुः । प्रयोजनविरहेऽपि भाष्यस्थतथाविधोदाहरणान्यथानुपपत्त्या तथार्थकल्पनेति युक्तमिति भाति । कटं कृतवत्पुत्र इत्यादौ तु निषेधप्रवृत्तिर्भवत्येव, क्रियाया निष्ठान्तेनोपस्थापनात्, उक्तरीत्या कर्तव्यपूर्वी कटमित्यपि यदि प्रमितं तर्हि तदपि प्रत्युदाहरणं भवतु नाम । अन्ये तु कृतपूर्वी कटमिति प्रत्युदाहरणपर प्रामाण्यादेकार्थीभावानापन्ननिष्ठादियोगे निषेधोऽभ्युपेयते । एकार्थीभावानापन्नत्वं चेतरा-

❀ काशिका ❀

श्रितैकार्थीभावनाश्रयत्वम्, अन्यथासंभवापत्तेः। एवं च न प्रकृते तेन निषेधप्रसक्तिः। ए- निषेधसंकोचप्रयोजनं तु गत इवाचरति गतति, आचारक्विबन्ताल्लट्, ग्रामस्य गततीत्यत्र षष्ठीसिद्धिः। लादेशयोगे न इति निषेधस्तु नात्र शङ्क्यः। लादिप्रकृत्युपस्थितिमुख्यवि- क्रियाकर्तृकर्मणोरेव निषेधाङ्गीकारात्। एवमाचारक्विबन्तगतशब्दाण्वुलि पंचाद्यचि च गतको, ग्रामस्य गत इत्यत्र च षष्ठीसिद्धिस्तत्फलं, ण्वुलादिप्रयुक्तषष्ठीप्राप्तिरिति तु न शङ्क्य निषेधस्य विध्युन्मूलनस्वभावत्वेन प्राबल्यात्। एतच्च सर्वं कृतपूर्वी कटमित्यादि निष्ठान्त भाष्योदाहरणादुन्नीयत इत्याहुः। तर्करत्नाकरे तु पक्वपूर्वी सूपान् कृतपूर्वी कटमित्यादौ पाका- कूलभावनावानिनिप्रत्ययस्यैवार्थः, क्तान्तस्तु निरर्थकः, कृतीत्युपादानसामर्थ्यात्। अन्यथा ष्ठी कर्मणोऽभिहितत्वेनानभिहिताधिकारीयत्वेन षष्ठ्यप्राप्त्या तद्वैयर्थ्यस्य स्पष्टत्वात्। द्वितीयाप्रसन्त सूपानित्यादिप्रयोगानुपपत्तेश्च। कृतपूर्वी कटमित्यत्र कृञः सकर्मकतया भावे क्तस्य दौर्लभ्यम् अन्यथा गम्यते ग्राममित्यस्यापत्तेः। न चैवं क्तान्तप्रयोगवैयर्थ्यम्, तद्धितस्योक्तार्थे तात्पर्यग्राह कतया सार्थक्यात्। एवं च कर्मणोऽनभिधानेन षष्ठीप्रसक्तिरिति कृद्ग्रहणं सार्थकम्, द्वितीया सिद्धिश्च, निष्ठाप्रयुक्तनिषेधप्रसक्तिश्च न, प्रत्यासत्त्या निष्ठाप्रकृत्यर्थक्रियान्वयिनोरेव षष्ठीनिषेधा दित्युक्तम्, तन्महाभाष्याननुगुणमिति स्पष्टं तद्विदाम्। सूपादिशब्दाद् द्वितीयानुपपत्तिश्च, उक्त व्यापारस्य धात्वर्थत्वाभावेन धात्वर्थतावच्छेदफलशालित्वाभावात्। भावे क्तप्रत्ययस्तु प्रागुपपादित एव, भाष्याद्यनुसारेणातिप्रसङ्गोऽपि वारित एवेत्यलमनल्पजल्पनेन। कटकर्मकातीतकालवृत्त्युत्पत्त्य- नुकूलव्यापाराश्रय इति कृतपूर्वीत्यादिवाक्यजन्यो बोधः। 'तदर्हम्' इति निर्देशादनित्योऽयं विधिः। तेन 'धायैरामोदमुत्तमम्' इति भट्टिप्रयोगोपपत्तिरित्याद्यन्यत्र विस्तरः। जगत् कुर्वन्, कुर्वाणः इत्यादौ न षष्ठी। 'न लोक-' इति निषेधादिति—षष्ठ्यर्थनिर्णयः।

अधीती व्याकरणे,—अत्र 'क्तस्येन्विषय—' इति सप्तमी। इन्नन्तो विषयो वर्तनभूमिर्यस्ये- त्यर्थः। यद्वा विषयशब्देन प्रकृतिः समर्प्यते। इनो विषय इति षष्ठीतत्पुरुषोऽत्र पक्षे। अत्रापि कृतपूर्वीतिवत् भावे क्तः। 'इष्टादिभ्यश्च' इति कर्तरि इनिः। सप्तम्यर्थः कर्मत्वादिः। व्याकरण- कर्मकाध्ययनकर्तेति बोधः। 'चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्' इत्यादौ 'निमित्तात् कर्मयोगे' इति सप्तमी। निमित्तं = फलं तद्वाचकात् सप्तमी भवति, संयोगसमवायान्यतररूपकर्म- संबन्धे सतीति तदर्थः। अत्र कर्मसंबन्धः स्वरूपसन्निमित्तं, न तु तस्य सप्तमीवाच्यकोटावन्तर्भावः। इत्थं च फलं सप्तम्यर्थः, तस्य स्वनिष्ठफलतानिरूपकत्वादिसंबन्धेन 'द्वीप्यादिकर्मकहननक्रिया- यामन्वयः, तत्र द्वीपिचर्मणोर्मृगाण्डकोशयोश्च समवाय, इतरयोः संयोगः। चर्मादीनां हननफलत्वं च स्वविषयकेच्छाप्रयोजकेच्छाविषयत्वम्। हननेच्छाप्रयोजिकेच्छा चर्मादिलाभेच्छेति चर्मादौ तादृशफलत्वमक्षतम्। तार्किकनये फलत्वं, निमित्तत्वं, तादर्थ्यं वा सप्तम्यर्थः। लाघवादनुशासन- विरोधाभावाच्चेदमेव युक्तमित्याहुः। ब्राह्मणेष्वधीयानेषु गतः, गोषु दुह्यमानासु गतः अत्र 'यस्य च भावेन भावलक्षणम्' इति सप्तमी। यस्य भावेन = क्रियया क्रियान्तरं लक्ष्यते = यते

प्रकारकघट

❀ काशिका ❀

भूषणे ।...चकात् सप्तमीति तदर्थः । ब्राह्मणाधीयानादिपदयोरुभयोरपि क्रियाश्रयवाचकत्वादुभाभ्या-
विरोधःप्तमी । निर्ज्ञातदेशकालो क्रियाऽनिर्ज्ञातदेशकालायाः क्रियाया देशकालज्ञापनद्वारा लक्षणम् ।
निर्ज्ञातदेशादिकक्रियाश्रयकर्तृकर्मवाचका ज्ञाप्यज्ञापकभावसंबन्धार्थिका षष्ठ्यपवादिकेयं
भवति । अत्र क्रियापदेन धात्वर्थमात्रमिति कर्मणोऽपि तदाश्रयत्वमविरुद्धम् । तत्र काचित्
बोध स्वाधिकरणकालेन क्रियान्तरं परिच्छिनत्ति, यथोक्तोदाहरणयोः । काचित् स्वाधिकरण-
व्यवहितपूर्वकालेन—यथा गोषु धोक्ष्यमाणासु गत इत्यादौ । काचित् स्वाधिकरण-
व्यवहितोत्तरकालेन—यथा गोषु दुग्धासु गत इत्यत्र । ज्ञाप्यज्ञापकभावश्च तत्तच्छब्दबोध्यत्वेन
त्वम् ...त एवैतच्छास्त्रप्रवृत्तौ निमित्तं, न तु मानान्तरेण ग्रहणापेक्षेति न भूयोदर्शनापेक्षा । अत
प्रक ...क्तस्थले सप्तम्युपपत्तिः । अन्यथोदिते आदित्ये तमो नष्टमित्यादावेव स्यान्नत्वत्र । कदाचिद्
...दोहनपुरुषविशेषकर्तृकगमनयोरेककालादौ संबन्धो न तु नियमेनेति बोध्यम् । सदेशोदाहरणं तु
...ति गुणे द्रव्यत्वमस्तीत्यादौ । अत्राधीयानब्राह्मणादेर्ज्ञापकत्वं सप्तम्या प्रतीयमानं स्वविशेषण-
...क्रयाकालादिद्वारके पर्यवस्यति । गोषु धोक्ष्यमाणास्वित्यादौ भविष्यद्गोदोहनादेरपि बुद्ध्युपारूढ-
...स्योक्तं ज्ञापकत्वमविरुद्धमिति बोध्यम् । मानान्तरसिद्धस्यार्थस्य कालविशेषसंबन्धादिप्रतिपिपाद-
यिषया यत्र प्रयोगस्तत्रैवेदं सूत्रं प्रवर्तते, सूत्रभाष्यस्वरसात् । एवं च राहूपरागे स्नायादित्यत्र
राहूपरागपदेन स्वार्थाश्रयकालो लक्ष्यते, अधिकरणसप्तम्येव । एवं विवाहे नान्दीमुखं कुर्यादित्यत्र
विवाहपदेन तत्प्राक्कालः, सप्तमी तु राहूपरागपदवदित्यन्यत्र विस्तरः । अन्ये तूक्तस्थले गमनादि-
क्रियादोहनादिसमानकालिकत्वेन बोध्यतयाभिप्रेतेति समानकालिकत्वं सप्तम्यर्थः । ततो दुग्धासुप-
स्थापितदोहनादेर्निरूपकतयान्वयेन दोहनसमानकालिकत्वस्य गमनादौ लाभ इति न संभवदुक्ति-
कं, दोहनादिक्रियायाः कृदर्थविशेषणतापन्नायाः समानकालिकत्वेऽन्वयासंभवात् । सप्तम्या प्रकृत्यर्थ-
गताद्यनन्वितस्वार्थबोधनासंभवाच्च । ततः समभिव्याहृतदोहनादिक्रियैव सप्तम्यर्थः । तत्र कृदन्तस्य
विशेषणत्वे कर्मत्वनिरूपकत्वसंबन्धेन प्रकृत्यर्थस्यान्वयः । कर्तृकृदन्तस्य तथात्वे त्वधीयानेषु
ब्राह्मणेष्वित्यादौ कर्तृत्वनिरूपकत्वेनेति बोध्यम् । तस्याश्च समानकालिकत्वादिसंबन्धेन गमना-
दावन्वयः । तत्र वर्तमानार्थकक्तसमभिव्याहारे समानकालिकत्वं संबन्धः । भविष्यदर्थककृतः
स्थले प्राक्कालवृत्तित्वं, भूतार्थकक्तस्थले उत्तरकालवृत्तित्वमित्याद्याहुः । अत्र सूत्रभाष्याद्यानुगुण्यात्
पूर्वोक्तमेव मतं सम्यगिति परे आहुः । रुदति रुदतो वा प्राव्राजीदित्यत्र 'षष्ठी चानादरे' इति
सूत्रेण षष्ठीसप्तम्यौ, ज्ञाप्यज्ञापकभावस्तदर्थः । अनादरविशिष्टं प्रव्रजनं धात्वर्थः । तत्र तात्पर्यं
ग्राहयति षष्ठ्यादिविभक्तिः । अनादरश्च प्रत्यासत्त्या पुत्रादिविषयक एव । स्वसामानाधिकरण्य-
स्वोत्तरकालिकत्वसंबन्धाभ्यामनादरवैशिष्ट्यम् । इत्थं च रोदनकर्तृपुत्रादिज्ञाप्यमनादरविशिष्टं
प्रव्रजनमिति बोधः । नृणां नृषु वा द्विजः श्रेष्ठ इत्यादौ—'यतश्च निर्धारणम्' इति सूत्रेण यतः =
समुदायात् स्वेतरस्वघटितसमुदायघटकेभ्यो व्यावृत्तेन धर्मेण जातिगुणक्रियासंज्ञाविशिष्टस्यैकदेशस्य
पृ...रणरूपं निर्धारणं ततः षष्ठीसप्तम्यौ भवत इत्यर्थकेन षष्ठीसप्तम्यौ विधीयेते । पृथक्करणं

❀ काशिका ❀

च व्यावृत्तधर्मप्रकारकज्ञानविषयीकरणं ताहृशैकदेशविशेष्यकताहृशधर्मप्रकारकज्ञानानु-पर्यवसितम्। स्वेतरत्वं स्वनिष्ठपदार्थतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकभेदाश्रयत्वम्। एव नराणां नरः श्रेष्ठ इत्यादिना द्विजाद्यात्मकनरस्य द्विजत्वाद्यवच्छिन्नभेदवच्छूद्राद्यात्म समुदायव्यावृत्तश्रेष्ठत्वकरणकपृथक्करणसंभवेऽपि नरत्वावच्छिन्नभेदवद्व्यावृत्तत्वस्य बाधान्निरुक्तनिर्धारणविषयत्वासंभवात्। द्विजप्रतियोगिकभेदस्य द्विजेऽपि संभवेन तथाविध घटितसमुदायव्यावृत्तत्वस्य श्रेष्ठत्वेऽसंभवेन नराणां द्विजः श्रेष्ठ इत्यादिप्रयोगासंभवो वाऽत एव समुदाये स्वघटितत्वोपादानफलं तु क्षत्रियाणां ब्राह्मणः श्रेष्ठ इत्यादिप्रयोगवारणम्। अस्ति नराणां द्विजः श्रेष्ठ इत्यादौ द्विजत्वावच्छिन्नभेदवान् यो नरघटितसमुदायघटकशूद्रादिस्तद्वृत्ति श्रेष्ठत्वप्रकारकप्रतीतिर्द्विजविषयिणीति निरुक्तार्थविवक्षायां तथाविधप्रयोगनिर्वाहः। इत्थं च व्यावृत्त रूपसंबन्धो निर्धारणविभक्तेरर्थः। नरपदं च नरत्वरूपेण विशेषरूपेण वा द्विजेतरनरसमुदायपरम् एवं च तथाविधनरसमुदायव्यावृत्तश्रेष्ठत्ववान् द्विज इति बोधः। नराणां क्षत्रिये शौर्यमित्यत्र क्षत्रि तरनरसमुदायपरम्। एवं च तथाविधनरसमुदायव्यावृत्तं क्षत्रियवृत्तिशौर्यमिति बोधः। समुदाय स्योद्भूतावयवभेदविवक्षया एतद्विषये बहुवचनस्यैव साधुत्वमिति 'कारके' इति सूत्रे 'निर्धारणे कारकेष्विति ब्रूयात्' इति वदता **पतञ्जलिना** स्पष्टमेवोक्तम्। अत एव 'मिदचोऽन्त्यात्— इति सूत्रे 'अचः' इत्येकवचनस्य सौत्रत्वात् साधुत्वमुक्तं **निबन्धकारैः**। व्यावृत्तत्वरूपविभक्त्य-र्थस्य व्युत्पत्तिवैचित्र्यात् पदार्थैकदेशेऽपि श्रेष्ठशब्दावन्वयः। अथवा स्वाश्रयपदार्थतावच्छेदकवत्त्वसंब-न्धेन धर्मिण्येवान्वयः। एतेन द्रव्याणां कम्बुग्रीवादिमान् घट इत्यादौ घटत्वादिधर्मस्यान्वयितावच्छेद-कघटत्वत्वादिरूपेणानुपस्थित्या तत्र व्यावृत्तत्वान्वयासंभव इति नोद्यं प्रत्युक्तम्। पदार्थानां जाति-मति सत्तेत्यादौ जातिमदन्यनिरूपितवृत्तित्वसामान्याभावस्य सत्तादौ बाधात्तन्निरूपितसमवेतत्वाप्रसि-द्धया तदभावस्य चाप्रसिद्धया व्यावृत्तत्वबोधो न संभवतीति तु न शङ्क्यम्। साक्षात्संबन्धाव-च्छिन्नवृत्तित्वाभावस्य तदर्थत्वात्। साक्षात्संबन्धे कालिकाद्यतिरिक्तत्वं प्रवेश्यम्। अन्यथा गन्धस्य पृथिव्यतिरिक्तजलादिरूपद्रव्येऽपि कालिकसंबन्धेन सत्त्वाद् द्रव्याणां पृथिवी गन्धवतीत्यादिप्रयोगानु-पपत्तिः। अथवा तादात्म्येनान्वयिविधेयार्थकपदसमभिव्याहारस्थले तादात्म्येनेतरसंबन्धित्वाभावः श्रेष्ठादिपदार्थे एवान्वेति भेदसंबन्धेनान्वयिविधेयस्थले पूर्वोक्तसंबन्धावच्छिन्नवृत्तित्वाभावो नराणां द्विजे श्रैष्ठ्यमित्यादौ श्रैष्ठ्यादौ प्रत्याय्यते इति नैकदेशान्वयप्रसङ्ग इत्याहुः। अन्ये तु व्यावृत्तत्वं भेदप्रतियोगित्वरूपमभेदेनान्वयिविधेयार्थकपदसमभिव्याहारस्थले विभक्त्या प्रतिपाद्यते। भेदा-न्वयिविधेयस्थले च येन संबन्धेन तदन्वयस्तत्संबन्धावच्छिन्नात्यन्ताभावप्रतियोगित्वं विधेये प्रत्याय्यते। तस्य विधेयतावच्छेदकावच्छेदेनान्वय उपेयः। अतो देवदत्तो नराणां शूरतमो घटः पृथिवीनां गन्धवानिति प्रयोगापत्तिर्न। शूरतमादिनिष्ठोभयादिभेदप्रतियोगित्वस्य शूरतमादौ सत्त्वेऽपि शूरतमत्वाद्यवच्छेदेनासत्त्वात्। तस्य तथाविधभेदधर्मितानवच्छेदकत्वा[illegible]। अथवा भेदे प्रतियोग्यवृत्तित्वरूपमत्यन्ताभावे च प्रतियोगिवैयधिकरण्यादिरूपं विशेषण[illegible]र्यं

'प्रकारकघट

※ काशिका ※

भूषणे [.पः। भेदादौ प्रकृत्यर्थनरादेरुद्देश्यतावच्छेदकक्षत्रियत्वाद्यवच्छिन्नभेदविशिष्टप्रकृत्यर्थ-
विरो|धकनरत्वादिव्यापकाधिकरणतानिरूपिताधेयत्वसंबन्धेनान्वयः। तावतैव क्षत्रियादीतरनरा-
वृत्तेर्विधेये लाभान्नरादिपदं मुख्यार्थकमेव। द्रव्याणां क्षितिपाथसी रसवतीत्यादौ द्रव्य-
त्वत्यर्थस्य भेदात्मकविभक्त्यर्थे क्षितित्वावच्छिन्नभेदजलत्वावच्छिन्नभेदद्वयविशिष्टद्रव्यत्वव्यापका-
बोध ..णतानिरूपिताधेयत्वं संबन्धः। विधेयस्य शूरतमादेर्निर्धारणविभक्तिप्रकृत्यर्थतावच्छेदकनरत्वा-
घ ..शिष्टतादात्म्यादिरेव संबन्धतया भासते। अतो नराणां राक्षस इत्यादिप्रयोगस्य नापत्ति-
पत्ते ..हुः। परे तु व्यावृत्तत्वस्य विभक्त्यर्थत्वे न भगवतः सूत्रकृतस्तात्पर्यम्। 'न निर्धारणे' इति
त्वप्र ..। निर्धारणस्य विभक्तिवाच्यकोटिप्रवेशस्य बोधनात्। तत्रत्यनिर्धारणपदस्य व्यावृत्तत्वार्थकत्वे
प्रक ..णाभावात्। तस्माज्जातिगुणक्रियासंज्ञाविशिष्टस्यैकदेशस्य यतः स्वसजातीयघटितसमुदायात्
..तरसमुदायघटकव्यावृत्तधर्मकरणकं पृथक्करणं ततः षष्ठीसप्तम्यावित्यर्थः सूत्रस्य, उक्तनिर्धारण-
..विषयत्वमवयवावयविभावसंबन्धश्च निर्धार्यमाणान्वयी विभक्त्यर्थः। नृसमुदायावधिकद्विजेतरनर-
व्यावृत्तश्रेष्ठत्वकरणकनिर्धारणविषयो नृसमुदायावयवो द्विज इति बोधः। नृणां शूद्रः श्रेष्ठ इति
प्रयोगव्यावर्तनायाद्यस्य संबन्धस्य, नृणां राक्षसः शूरतम इत्यस्य व्यावर्तनाय द्वितीयस्य विभक्त्यर्थ-
त्वाङ्गीकारः। शूद्रेऽप्यन्त्यजात्याद्यपेक्षया श्रेष्ठत्वस्य विद्यमानतया तद्बोधेन तथाविधप्रयोगापत्तेर-
वारणात्। संसर्गघटककरणं च प्रत्यासत्त्या श्रेष्ठत्वादिरूपमेव ग्राह्यम्। तेन नृणां क्षत्रियादिः
श्रेष्ठ इति प्रयोगापत्तिर्न। अन्यथा क्षत्रियादेरपि शूरतमत्वादिकरणकपृथक्करणविषयतया स्यादेव
तादृशप्रयोगः। नृणां मध्ये द्विजः श्रेष्ठ इत्यत्र मध्ययोगे षष्ठी। तद्योगे सप्तमी तु न साधुः।
न च तत्सत्त्वेऽपि मध्यार्थेऽन्वयाविवक्षया निर्धारणसप्तमी साधुरेवेति वाच्यम्। तत्सत्त्वे तदर्थस्य
नियमेनावध्याकाङ्क्षया तत्रैवान्वयस्य युक्तत्वात्। निर्धारणविभक्तिस्थले श्रेष्ठतमत्वादौ द्विजेतर-
नरादिव्यावृत्तत्वबोधस्तु देवदत्तो वामेनाक्ष्णेत्याद्युक्तौ दक्षिणनेत्रकरणकदर्शनाभावबोधवन्मानस एव,
द्विजमण्डले वर्तमानोऽवशिष्टः श्रेष्ठ इत्याधारसप्तमीघटितवाक्येऽपि तथाप्रतीतिरुक्तरूपावश्यक्येव।
निर्धारणावधिनिर्धार्यमाणनिर्धारणहेतूनां सांनिध्ये एव निर्धारणप्रतीतिरतस्तत्रैव निर्धारणविभक्तिः
समासनिषेधश्च। अत एव पुरुषाणामुत्तम इत्यत्र शेषषष्ठीति पुरुषोत्तम इति समासः साधुरिति
'द्विवचनविभज्य–' इति सूत्रे कैयट इत्याहुः। माथुरा पाटलिपुत्रकेभ्य आढ्यतरा इत्यत्र तु
निर्धार्यमाणनिर्धारणावध्योर्भेदस्यैव सत्त्वेन 'पञ्चमी विभक्ते' इति पञ्चमी। तत्र विभक्तपदेन भेदो,
निर्धार्यमाणस्य निर्धारणावधितो यत्र भेद एव तदवधिवाचकात् पञ्चमीति तदर्थः। विभक्तग्रहण-
सामर्थ्यादवधारणलाभः। तेनोपात्तेन केनापि रूपेणाभेदे नैतत्प्रवृत्तिः। अत्र निर्धारणावधिव्यावृत्त-
धर्मकरणकनिर्धारणविषयत्वं विभक्त्यर्थः। पाटलिपुत्रकावधिकतद्व्यावृत्ताढ्यतरत्वकरणकनिर्धारण-
विषया माथुरा आढ्यतरेति बोधः। 'मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्', मूले श्रवणे इति वा।
..त्र 'नक्षत्रे च लुपि' इति सूत्रेण सप्तमी। लुप्शब्देन लुप्संज्ञया लुप्तप्रत्ययार्थो लक्ष्यते। तथा
..दृशप्रत्ययार्थे वर्तमानान्नक्षत्रवाचकादधिकरणे सप्तमी, तृतीया चेति तदर्थः। अधिकरण

'सप्तमीपञ्चम्यौ कारकमध्ये' इति सूत्रे—'शक्तिः कारक'मि

ॐ दर्पणः ॐ

ननु कर्तृकर्मादिकारकविहिततृतीयादीनां कथं कर्त्रादिधर्मवाचकत्वमत आ सप्तमीपञ्चम्याविति। तथाच धर्मस्याऽपि कारकत्वस्य भाष्यसम्मत तासां तद्वाचकत्वे न दोष इति भावः। दर्शनादिति। तत्र हि 'द्रव्यं कारक'मि पक्षेऽ'द्य भुक्त्वाऽयं द्व्यहे भोक्ते'त्यादौ देवदत्तरूपकर्तृकारकस्यैक्यान्मध्यव्यपदेश सम्भवादप्राप्तसप्तमीपञ्चम्योरुपपादनाय प्रवृत्तस्य—'क्रियामध्य इति वक्तव्यमि वार्तिकखण्डनायोक्तम्—"नान्तरेण साधनं क्रियायाः प्रवृत्तिर्भवति, क्रियामध्यं कारकमध्यमपि भवति, तत्र कारकमध्ये इत्येव सिद्ध"मिति। तत्र 'साधन'मित्यस्य शक्तिमित्यर्थः। तथाच देवदत्तादिरूपकर्तृद्रव्यस्यैक्येऽपि कालभेदभिन्नभुजिक्रियाऽनुमितकारकपदार्थकर्तृत्वशक्त्योरभेदात् तन्निमित्तमध्यव्यपदेशाऽबाधाद्यथोक्तेऽनुपपत्त्यभावात् 'क्रियामध्य' इति वार्त्तिकं नारम्भणीयमिति तद्भावः। इदमुपलक्ष-

ॐ काशिका ॐ

इत्यनुवृत्तिलभ्यम्। तत्प्रयोजनं त्वद्य पुष्य इत्यादौ सप्तम्यादिव्यावृत्तिः। अन्यथान्तरङ्गत्वात् प्रातिपदिकार्थे एव स्यात्। मूलेनेत्यत्र 'नक्षत्रेण युक्तः कालः' इत्यण्। तत्र नक्षत्रशब्देन तत्समीपवर्ती चन्द्र उच्यते। तस्याणः 'लुबविशेषे' इति लुप्। लुपि सति लुप्यमानप्रत्ययार्थः प्रकृत्यैव प्रत्याय्यते, यः शिष्यते इति न्यायात्। आधारादिकं सप्तम्यार्थः। इत्थं च मूलनक्षत्रसमीपवर्तिचन्द्रयुक्तकालाधिकरणकं देवीकर्मकमावाहनमित्याद्याकारको बोधः। अद्य भुक्त्वायं द्व्यहे द्व्यहाद्वा भोक्ता, अत्र 'सप्तमीपञ्चम्यौ कारकमध्ये' इति सूत्रेण सप्तमीपञ्चम्यावनुशिष्येते। कारकपदेन कारककर्तृत्वादिशक्तिरुच्यते। 'कालाध्वनोः—' इति सूत्रात् 'कालाध्वनोः' इत्यनुवर्तते। तथा च शक्तिद्वयमध्ये यौ कालाध्वानौ तद्वाचकात् सप्तमीपञ्चम्याविति तदर्थः। अनन्तरकालवृत्तित्वं विभक्त्यर्थः। अद्यपदार्थैतद्दिवसाधिकरणकत्वस्य भोजनक्रियायामन्वयः, तदन्वितक्त्वान्तप्रतिपाद्यभोजनक्रियायाः स्वोत्तरकालवृत्तित्वस्वसमानकर्तृकत्वोभयसंबन्धेन भोजने प्रकृतविभक्त्यर्थस्यापि तत्रैव। इत्थं चैतद्दिवसाधिकरणकभोजनोत्तरकालिकं तथाविधभोजनसमानकर्तृकमेतद्दिवसानन्तरद्व्यहानन्तरकालवृत्ति यद्भोजनं तदाश्रय इत्यर्थः। द्व्यहे एतद्दिवसानन्तर्यलाभः समभिव्याहारबलात्। सोऽपि न शाब्दः किं, त्वार्थः। इहस्थोऽयं क्रोशे क्रोशाद्वा लक्ष्यं विध्येत् अत्रानन्तरदेशवृत्तित्वं विभक्त्यर्थः। इहशब्दप्रतिपाद्यस्यैतद्देशाधिकरणकत्वस्य स्थितावन्वयः। तादृशस्थितिः कृदर्थाश्रये, तस्याख्यातार्थकर्तरि, तस्य व्यधनक्रियायां तत्रैव क्रोशानन्तरदेशस्थितलक्ष्यकर्मकत्वस्य। तथा चैतद्देशाधिकरणकस्थितिकर्तृकर्तृकमेतद्देशानन्तरक्रोशानन्तरदेशस्थित लक्ष्यकर्मकं संभावनाविषयीभूतं व्यधनमिति बोधः। एवमन्यत्राप्यूह्यम्। इति सप्तम्यर्थनिर्ण[illegible]

'प्रकारकघट ❀ दर्पणः ❀

भूषणे । [illegible]तसूत्रभाष्यस्य, तत्र 'संख्या विभक्त्यर्थ' इति पक्षेणाऽनभिहिताधिकारं विरोध-द्वयोः कारकयोरन्यतराऽभिधाने विभक्त्यभावप्रसङ्गः, क्व ? प्रासाद आस्ते, [illegible] आस्ते' किं कारणं ? यदि प्रत्ययेनाऽभिहितमधिकरणमिति कृत्वा सप्तमी न [illegible]तीत्याशङ्क्य, न वाऽन्यतरेणाऽभिधानात्, अनभिहिते विधानमित्यादिना प्रसज्य-बोध[illegible]षेधे पर्युदासे वा नञर्थे दूषणं परिहृत्य—यदि साधनं द्रव्यं स्यात् तदेकमेव, [illegible]भिहितमिति पूर्वोक्तपरिहारो न सम्भवति, अथ शक्तिः साधनं तदा तस्याभेदाद-[illegible]हितत्वसम्भवाद्भवत्युक्तपरिहार इत्यभिप्रेत्य—किं पुनर्द्रव्यं साधनमाहोस्विद् [illegible]इत्याशङ्क्योक्तं,—किं पुनः साधनं न्याय्यं ? गुण इत्याह, कथं ज्ञायते ? एवं [illegible]कश्चित् पृच्छति,—क्व देवदत्त इति ? स तस्मायाचष्टेऽसौ वृक्षे इति, कतर-[illegible]मन् ? यस्तिष्ठति स वृक्षोऽधिकरणं भूत्वाऽन्यशब्देनाभिसम्बध्यमानः कर्त्ता [illegible]स्पद्यते, द्रव्ये साधने यत् कर्म कर्मैव स्याद्यत् करणं करणमेव यदधिकरणमधि-[illegible]करणमेवेति । कैयटेनाऽपि—'यदि द्रव्यं साधनं स्यात् तदा तस्यैकरूपत्वात् [illegible]निबन्धनाबाधितप्रत्यभिज्ञाविषयत्वाद् नानाऽर्थक्रियाकारणनिबन्धनो 'घटेन जलमाहर' 'घटं कुरु' 'घटोऽस्ती'ति व्यपदेशो न स्यात्, दृश्यते चाऽसौ, तस्मा-[illegible]नानाशक्तिभावावगमः सिद्ध इति तद्विवृतम्, एवं च शक्तिपक्षस्याऽऽकरसम्मत-[illegible]तया द्वितीयादीनां कर्मत्वादौ शक्तिरिति वदतां मतमपि सम्यगेवेति भावः ।

प्रातिपदिकार्थेतिसूत्रविहितप्रथमाया यथायथं प्रातिपादिकार्थो, लिङ्गं, परिमाणं चाऽर्थः, कर्माऽऽद्याधिक्ये प्रथमा मा भूदिति तत्र 'मात्र'ग्रहणम्, द्वन्द्वान्ते श्रूयमाणस्य तस्य प्रत्येकं द्वन्द्वघटकपदार्थेऽन्वयात् 'प्रातिपदिकार्थमात्रे प्रथमे'त्यादिवाक्यभङ्गिः, प्रातिपदिकार्थत्वं च—नामनिष्ठशक्त्यवच्छिन्नजनकतानि-रूपितजन्यताश्रयोपस्थितित्वव्यापकविषयताप्रतियोगित्वम् । उच्चैरित्याद्यर्थविषयि-तायास्तादृशोपस्थितित्वव्यापकत्वात् तत्र प्रथमोपपत्तिः, एवं कृष्ण इत्यादौ कृष्णा-दिविषयितायाः इव पुंल्लिङ्गादिविषयिताया अपि तदुपस्थितित्वनैयत्यं व्यक्तमेव, यद्यपि 'द्विकं प्रातिपदिकार्थं' इति पक्षे लिङ्गस्योपस्थितिविषयत्वं दुर्घटं, तथाप्य-नुभवाऽनुरोधेन शक्यार्थोपस्थितेः प्राग् लिङ्गोद्बोधकसमवधानस्य नियमेन कल्प-नात् तस्य तत्त्वं बोध्यम् । एवञ्चालिङ्गा, नियतलिङ्गाश्च, 'प्रातिपदिकार्थमात्र' इत्यस्योदाहरणानि । तटादिशब्दजन्योपस्थितौ तु—पुंल्लिङ्गादिभानस्यानैयत्यात्तत्रा-ऽप्राप्तप्रथमाविधानाय लिङ्गग्रहणम् । 'सिंहो माणवक' इत्यादौ सादृश्याद्यधिका-ऽर्थस्य प्रतीतावप्यन्तरङ्गत्वात्, स्वाऽर्थमात्रनिष्ठात् तस्मात् प्रथमा सुलभैव, [illegible] प्रथमाऽर्थलिङ्गस्य विशेषणतया प्रकृत्यऽर्थेऽन्वयो योग्यताबलादनुभवाच्च, [illegible] कार्य्यकारणभावकल्पनात् । एवं 'द्रोणो व्रीहि'रित्यादौ द्रोणपदात् परिमा-

भाष्ये दर्शनात्।

एवञ्च,—'देवदत्तस्य गौर्ब्राह्मणाय गेहाद् गङ्गायां मया दीयते' इत्यत्र देवदत्तसम्बन्धिनी या गौस्तदभिन्नाश्रयकत्य-ऽनुकूलो ब्राह्मणोद्देश्यको गेहनिष्ठविभागजनको गङ्गाऽधिकरणको द करणको मन्निष्ठो व्यापार इति बोधः। यथायथम् = उक्तप्रकारेण। मानमुपदर्शयन्,—'घटं जानाती'त्यादौ द्वितीयाया विषयतायां लक्षणे

ॐ दर्पणः ॐ

णस्याप्याधिक्येन भानात्तत्र परिमाणग्रहणम्, न च व्रीह्यादिपदसमभिव्याहा तदभानेऽप्यन्तरङ्गत्वात् प्रातिपदिकार्थमात्र एव साऽस्त्विति वाच्यं, तथा स द्रोणपदार्थस्य भेदसम्बन्धेनाऽन्वयानुपपत्तेः, प्रथमार्थस्य तस्य तु भेदेनाऽन्व न किञ्चिद् बाधकमिति सम्प्रदायः।

नव्यास्तु—"प्रातिपदिकार्थस्तत्तत्पदप्रवृत्तिनिमित्तं, तदाश्रयश्च, अत एव लिङ्ग ग्रहणं चरितार्थम्, अन्यथा 'स्वमोर्नपुंसका'दितिसूत्रप्रामाण्यात् तस्याऽपि प्राति-पदिकार्थतया तदुपपादनवैयर्थ्यापत्तेः, आश्रयत्वं च वैज्ञानिकम्, शक्यताऽवच्छेद-कारोप एव लक्षणेत्यन्यत्र व्यवस्थापितत्वात्, 'गोपी'त्यादौ प्रकृत्यर्थस्य लाक्षणि-कत्वेऽपि न क्षतिः, तटादिशब्दानां लिङ्गं वाच्यमेव, विसर्गादयस्तद्द्योतकाः, एवञ्च 'प्रातिपदिकार्थ' इत्यस्यालिङ्गा, लिङ्गप्रवृत्तिनिमित्तकाऽव्ययस्त्रीपुंसादिशब्दा-श्चोदाहरणम्, इतरे लिङ्गमात्राद्याधिक्यस्य, द्रोणत्वादिप्रवृत्तिनिमित्तकद्रोणादि-शब्दानां परिमाणत्वेन परिमाणमपि लिङ्गवद् विशेष्यान्वय्यर्थः, एवञ्च लिङ्गवत् प्रातिपदिकार्थत्वाभावात् परिमाणग्रहणम्, 'वीरः पुरुष' इत्यादौ पुरुषादिपद-सन्निधाने विशेष्यविशेषणभावस्याधिकस्य भानेऽपि तत्समभिव्याहारात् पूर्वं स्वार्थ-मात्रनिष्ठात्तस्मात् से"त्याहुः।

'सम्बोधने चे'ति विहितप्रथमायास्तु सम्बोधनमर्थः, प्रातिपदिकार्थापेक्षया तस्याधिक्येन भानात् पूर्वसूत्राविषयत्वात्, तत्सूत्रारम्भः, तच्चाभिमुखीभवनानुकूलो व्यापारः क्रियान्वय्येवेति प्रतिपादितं प्राक्। 'यथायथं विभक्त्यर्थां' इत्यत्रत्यं 'यथायथ'पदं व्याचष्टे—उक्तप्रकारेणेति। यदर्थबोधे या विभक्तिः समर्था तस्याः सोऽर्थोऽवसेयः, तथैवोक्तं प्राग्,—'द्वितीयातृतीयासप्तमीना' मित्यादिनेति भावः।

अत्रेति। सुपां कर्मादिवाचकत्व इत्यर्थः। नैयायिकान् प्रतीति। प्राची-

ॐ काशिका ॐ

एवं सुब्विभक्त्यर्थानुपवर्ण्य तदनुरोधेन संबन्धसहितसकलकारकघटितवाक्यार्थबोधं वर्णयति—एवं चेति। उक्तरीत्या धर्मिणां विभक्त्यर्थत्वे च। तदभिन्नाश्रयक इति। आख्यातार्थे गोरभेदेनान्वय इति भावः। विभागजनक इति। ददातेर्विभागपूर्वकदाने वृत्तिरिति यं।

'प्रकारकघ... तो नैयायिकान् प्रत्याह—सुपां कर्मेतीति। अयं भावः—

भूषणे। "सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्।
विरो... प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु च"—

-इति वार्त्तिकतद्भाष्याभ्यां कर्मादेर्वाच्यतायास्तन्नियमस्य च लाभः।

बोध... तथाहि—'स्वौजसमौट्,' 'कर्मणि द्वितीया' 'द्व्येकयोर्द्विवचनैकवचने'

छ

पत्त...

ॐ दर्पणः ॐ

त्वप्र... प्रतीत्यर्थः, यथा तन्मतं तथाख्यातशक्तिनिरूपणावसरे प्रतिपादितम्, ननु प्रक...'सुपां कर्मादयोऽप्यर्थाः' इति भाष्यात् सिद्धा तु तेषां कर्मादौ शक्तिः, विषय... ...ादौ लक्षणायां तु किं बाधकम्? क्रियाजन्यफलशालित्वरूपमुख्यकर्मत्वबाध एव ...प्रसरादत उत्तरार्द्धप्रदर्शितनियमं बाधकत्वेनोपदर्शयिष्यन्नाशयं प्रकाशयति—अयं भाव इत्यादि। 'स्वौजसमौ'डित्यत्र कारकविभक्तिष्वादौ द्वितीयाया उपादानाद् वार्त्तिकेऽपि तदर्थकर्मणः प्राङ् निर्देशः। कर्मादीत्यादिना,—कारकान्तरसंग्रहः, अपिना,—शक्तिः कारक'मितिपक्षोक्तकर्मत्वादिशक्तीनां समुच्चयः।

तथा तिङामिति। तद्वत्तिङामपि सङ्ख्याकर्माद्यर्थ इत्यर्थः। तत्र = सुप्तिङ्क्षु। प्रकृतेषु = अर्थेष्वित्यर्थः। तद्भाष्येति। लोकादेव बहुत्वादिषु बहुवचनादि भविष्यति, किमर्थं, 'बहुषु बहुवचन'मित्यादिसूत्रमित्याक्षेपे—सुप्तिङामविशेषेण विधानाद् दृष्टविप्रयोगत्वाच्च नियमार्थं वचनमिति समाधाय,—नियमाऽऽकारप्रदर्शकमिदं श्लोकवार्त्तिकम्, अथवा प्रकृतार्थानपेक्ष्य नियमः, के च प्रकृताः, एकत्वादयः, एकस्मिन्नेवैकवचनं, न द्वयोर्न बहुषु—इत्यादितद्भाष्यं च ताभ्यामित्यर्थः।

ॐ काशिका ॐ

तथा तिङामिति। तिङामिति कर्तृकर्मणी संख्या चार्थ इत्यर्थः। नियम इति। अर्थनियम इत्यर्थः। एवं च कर्मत्वादिशून्यार्थकाव्ययादपि विभक्तिसिद्धिः। प्रत्ययनियमपक्षेऽपि तत्र विभक्तिसिद्धिमाह—नियमः प्रकृतेषु चेति। प्रकृतकर्त्राद्यर्थापेक्षो नियमः, कर्मण्येव द्वितीयेत्यादिनियमेन कर्त्रादौ द्वितीयादयो व्यवच्छिद्यन्ते न तु कर्मत्वादिशून्य इत्यर्थः। ननु 'स्वौजसमौट्' इत्यादिना 'तिप्तस्झि—' इत्यादिना च विहितानां स्वादीनां तिबादीनां च 'कर्मणि द्वितीया' इत्यादिशास्त्रैर्नियमपक्षे न कर्मादौ वाचकताग्राहकत्वं 'स्वौजस्—' इत्यादिशास्त्रस्य लभ्यते, तत्र 'कर्मणि—' इत्यादेरभावात्, नापि 'कर्मणि' इत्यादेः, नियामकत्वादित्याशङ्क्याह—तथा हीति। एकवाक्यतया = वाक्यैकवाक्यतया, न पदैकवाक्यतया। तदभ्युपगमे कर्मत्वादियोग्यार्थकप्राति... ...र्थमात्रगते एकत्वे प्रथमैकवचनं सुः, कर्मत्वादिशक्तिसमानाधिकरणे एकत्वे द्वितीयैकवचनम... ...क्रमेण बोधः स्यादेवं चान्यत्राव्ययादेः प्राप्तिरुपपादयितुं नैव शक्येत। वाक्यैकवाक्यतायां

इत्यादेः; 'लस्य, 'तिप्तस्झि,' 'तान्येकवचनद्विवचने'त्यादेरे
कर्मादेस्तत्सङ्ख्यायाश्च वाच्यता लभ्यते, तथा तन्नियमश्च द्विविधो
'द्वितीया कर्मण्येव', 'तृतीया करण एवे'त्येवमादिः शब्दनियमः, 'क
द्वितीयैव' 'करणे तृतीयैवे'त्येवमर्थनियमश्च। उभयथाऽपि सिद्धनि
विरुद्धं लक्षणादिकमसाधुत्वप्रयोजकमिति,—'याज्ञे कर्मणि नाऽनृतं व
दिति निषेधविषयो भवत्येवेति स्वेच्छया लक्षणाऽपि विभक्तावप्रयोजिके

❀ दर्पणः ❀

नियमाकारमाह—द्वितीया कर्मण्येवेति—प्रकृताऽभिप्रायम्। उभय
पीति। विभक्त्यपेक्षया अर्थाऽपेक्षया चेत्यर्थः। विभक्तिनियमोऽपि द्विधा,-
अर्थविशेषाऽपेक्षस्तत्सामान्याऽपेक्षश्च, तत्राद्यः—'कर्मार्थयोग्यप्रातिपदिकाच्चे
द्वितीया तदा कर्मण्येव, न करणादौ कर्मादियोग्येऽपि'। 'तद्रहितप्रातिपदिकाऽर्थ ए
प्रथमा, न कर्मादौ' 'संख्याद्यर्थयोग्यप्रातिपदिकादेकत्वादावेकवचनादि न द्विवचना-
दी'त्याकारकः। द्वितीयस्तु—'प्रातिपदिकाच्चेद् द्वितीया कर्मण्येवे'त्याकारकः, अर्थ-
नियमस्तु—कर्मार्थयोग्यप्रातिपदिकाच्चेत् कर्मणि विभक्तिस्तदा द्वितीयैव'। कर्मादि-
रहिते तद्योग्यप्रातिपदिकाद् द्वितीयैवे'त्याकारक इति बोध्यम्। 'सिद्धे'त्यस्यै'कवाक्य-
तावलेने'त्यादिः, तथाच विषयत्वस्य निरुक्तकर्मत्वाऽनात्मकत्वेन तत्र द्वितीयादेः

❀ काशिका ❀

तु प्रातिपदिकात् स्वादयो भवन्ति, ते च प्रातिपदिकार्थमात्रगते एकत्वादौ भवन्तीत्यादिबोधाकारो भवति। तथा सति तत्र प्रथमवाक्येनान्वयादौ प्राप्तिरुपपादयितुं शक्यते। किं चैवमर्थनियम-प्रकृतार्थापेक्षप्रत्ययनियमशुद्धप्रत्ययनियामकयोरुच्छेदश्चैवं स्यात्। एकवचनादिशब्दे सूत्रशाटकवद् भाविसंज्ञाश्रयणमन्योन्याश्रयपरिहारायेति गौरवं चेत्येकवाक्यतापदेन वाक्यैकवाक्यतैव विवक्षिता।

नन्वेवं पूर्वपूर्ववाक्यविहितानां कथं कर्माद्यर्थबोधनं कर्तुं शक्यम्। न च सामग्रीसत्त्वे तत् संभवत्येवेति वाच्यम्। एवं सत्येकवाक्यताविरहेऽपि 'द्व्येकयोः—' इत्यादिना एकत्वे एवैकवचन-मित्यपि बोधने कृते सत्येकत्वाद्यर्थकत्वबोधनसंभवे वाक्यैकवाक्यतापुरस्कारो निरर्थक इति चेन्न। एकवाक्यतापक्षे स्वादिवाक्येनैव वाक्यैकवाक्यतोक्तहेतुभिरङ्गीक्रियते, न तु 'कर्मणि द्वितीया' 'द्व्येकयोः—' इत्याद्योः, किं तु पदैकवाक्यता। एवं च कर्मगतैकत्वे एव द्वितीयैकवचनमम् भवतीत्याद्याकारनियमलाभोऽत्र भवति। एकवाक्यताविरहे तु कर्मण्येव द्वितीया, एकत्वे एवैक-वचनममिति विरुद्धनियमद्वयं स्यात्, तच्चासंगतमित्याशयादिति दिक्। उभयथापि सिद्धनियम-विरुद्धमिति। तत्र कर्मण्येव द्वितीयेत्यादिरूपप्रत्ययनियमविरोधो विषयतालक्षणाङ्गीकारे स्पष्ट एव। विषयतायाः शेषत्वाच्छेषे षष्ठ्येवेति नियमविरोधोऽर्थनियमपक्षेऽपीति बोध्यम्।

'प्रकारकघट 'विभक्तौ न लक्षणे'त्यादिर्नैयायिकवृद्धानां व्यवहार

भूषणे । क् ॥२४॥

विरो ※ इति श्रीवैयाकरणभूषणसारे सुबर्थनिर्णयः ॥३॥ ※

※ दर्पणः ※

बोध ज्ञेणाऽविधानात् तदर्थतात्पर्य्येण तदुच्चारणस्याऽनृतत्वादित्यर्थः। अत एवेति। घ भक्तौ लक्षणाया अप्रयोजकत्वादेवेत्यर्थः। ननु व्याकरणस्य शक्तिनिरूढलक्ष- पत्त ण्यतरप्रतिपादकत्वेन यत्र मुख्याऽर्थबाधप्रतिसन्धानादि तत्र शक्यसम्बन्धिनि त्वप्र णास्वीकारे बाधकाऽभावः, 'घटं जानाती'त्यादितो घटादिविषयकज्ञानबोधस्य प्रक नुभवसिद्धस्य द्वितीयाया वृत्तिं विनाऽनुपपन्नस्यैव लक्षणाकल्पकत्वाच्च, विभक्तौ लक्षणेति प्रवादस्त्वेकविभक्तेरपरविभक्त्यर्थे न लक्षणेत्येतत्परोऽत एव न व्यत्य- ानुशासनवैयर्थ्यम्, 'सुपां कर्मादयोऽप्यर्था' इत्यत्र कर्मादिपदस्य गौणमुख्य- साधारणकर्मत्वपरतयाऽप्युपपत्तेर्न तद्विरोधेऽपीत्यत आह—दिगिति। तदर्थस्तु मुख्याऽर्थमादाय शास्त्रचरितार्थ्ये गौणे तद्व्यापारे मानाभावः, नच 'घटं जानाती' तिप्रसिद्धप्रयोगानुरोधेन गौणेऽपि तद्व्यापारकल्पनाऽवश्यिकेति वाच्यं, ज्ञानविषयत्वा- पत्युपसर्जनविषयत्वापादनार्थकतया मुख्यकर्मतयैवाऽस्मन्मते प्रयोगोपपत्तिसम्भवात्, त्वानुभवैकगम्येऽर्थे लक्षणाऽभ्युपगमेऽर्थनिर्देशस्य वैयर्थ्यापत्तेश्चेत्यादिः। अत्र वदन्ति,—शास्त्रस्य गौणे प्रवृत्त्यनभ्युपगमे स्थादीनां मुख्याकर्मकत्वाभावात्ततो भावे कर्त्तरि च प्रत्ययानुपपत्तिरेवं वारयतेः संयोगानुकूलव्यापाराभावानुकूलव्यापारा- ऽर्थकतायाः सर्वसम्मततया तस्यापि मुख्यसकर्मकत्वाभावेन ततोऽपि कर्त्तरि कर्मणि च लकाराद्यनुपपत्तिरतो गौणेऽपि शास्त्रविषयताऽवश्यमभ्युपेतव्येति 'न घटं जाना- ती'त्यादीनां विषयत्वलक्षणायामप्यसाधुता। वस्तुतस्तु—'शक्तिः कारक'मिति पक्षस्य तन्मते तिङ्सुप्सु व्यवस्थितत्वेन द्वितीयाया विषयत्वान्वय्याधेयत्वबोधक- त्वेऽपि न क्षतिः, तादृशस्थले विषयरूपफलस्य धात्वर्थपरतायाः प्रागुपपादनात् तन्मतेऽप्युक्तनियमविरोधस्य निषेधविषयतायाश्चाऽसम्भवादित्यलम् ॥ २४ ॥

※ इति भूषणसारदर्पणे सुबर्थनिर्णयः ॥ ३ ॥ ※

※ काशिका ※

प्राचीननैयायिकानामपि संमतिमाह—अत एवेत्यादिना। एवं च नव्यनैयायिकानां न केवलं व्याकरणविरोधोऽपि तु स्वीयवृद्धसिद्धान्तविरोधोऽपीति तदुक्तिरुपेक्ष्यैव। एवं मीमांसकोक्तिरपीति सूचितमिति शिवम् ॥

इति श्रीकालोपनामककेशवदीक्षितात्मजहरिरामविरचितायां वैयाकरणभूषणसार- व्याख्यायां सुबर्थनिर्णयः समाप्तिमगमत् ॥

अथ नामार्थनिर्णयः

नामार्थानाह—

एकं द्विकं त्रिकं चाऽथ चतुष्कं पञ्चकं तथा ।
नामाऽर्थ इति सर्व्वेऽमी पक्षाः शास्त्रे निरूपिताः ॥ २५

एकं—जातिः, लाघवेन तस्या एव वाच्यत्वौचित्यात्, अने
व्यक्तीनां वाच्यत्वे गौरवात्,—

ॐ दर्पणः ॐ

क्रमप्राप्तं नामार्थनिरूपणमित्याशयेनाह—**नामार्थानिति** । जातिरिति तत्तत्पदार्थाऽसाधारणो धर्म इत्यर्थः, तेनाऽभावत्वाकाशत्वादीनां नित्याऽनेकसमवेत्स्वरूपजातित्वाभावेऽपि न क्षतिः, एतस्यैव शास्त्रे 'स्वार्थ'पदेन व्यवहारः, जातेः पदाऽर्थत्वे मानं तु—'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्या'मिति सूत्रे, 'सवर्णेण्ग्रहणमपरिभाष्यमाकृतिग्रहणात् सिद्ध'मिति वार्त्तिकम्, 'आकृतिं वाजप्यायन' इति सरूपसूत्रस्थं भाष्यं च । युक्तिमप्याह—**लाघवेनेति** । एकाश्रयकशक्तेरेकस्या एव सम्भवादिति भावः । ननु शक्तिग्राहकशिरोमणिना व्यवहारेण व्यक्तावेव तत्परिच्छेदात् कथं जातौ तत्सिद्धिरत आह—**अनेकव्यक्तीनामिति** । पूर्वंव्यवहारेण व्यक्तौ शक्तिग्रहेऽप्यानन्त्यात् तावतीषु शक्तिग्रहासम्भवात्तत्तदाश्रयभेदभिन्ननानाशक्तिकल्पने गौरवात् पश्चाज्जातावेव निर्द्धार्य्यते इत्यर्थः । एकव्यक्तिविषयकशक्तिज्ञानादपरव्यक्तिविषयकशाब्दबोधाऽभ्युपगमे तु—गोव्यक्तिविषयकशक्तिज्ञानादश्वविषयकबोधापत्त्या तद्व्यक्तिविषयकशक्तिज्ञानस्य तद्व्यक्तिविषयबोधे हेतुताया अवश्यकल्प्यतयैकविषयकज्ञानादपरव्यक्तिबोधाऽनुदयापत्त्या सकलव्यक्तिभानाऽर्थं तावद्व्यक्तिषु शक्तिकल्पनायां गौरवस्य स्फुटतया जातावेव शक्तिकल्पनोचिता, । यद्यपि 'गौर्गोपदवाच्य' इति शक्तिग्रहो व्यक्ति-

ॐ काशिका ॐ

सकलनाममूलभूतधात्वर्थं तत्प्रकृतिकतिङर्थास्तत्प्रसङ्गेन सुबर्थाश्च निरूप्यावसरसंगत्या नामार्थान्निरूपयतीत्याशयेनाह—नामार्थानिति । प्रातिपदिकार्थानित्यर्थः । एकादिशब्दानां साधारणतयानभिमतार्थपरत्वशङ्कानिवृत्तये प्रकृते विवक्षितानर्थानाह—एकं जातिरित्यादिना । **गौरवादिति** । अनेकव्यक्तिषु शक्तिकल्पने, जातौ च तत्कल्पने तत्र शक्यतावच्छेदकत्वस्य वा कल्पने गौरवादित्यर्थः । न च जातिशक्तिमतेऽपि जातिगतगोत्वत्वादिधर्मे शक्यतावच्छेदक[illegible]

व्यक्तीनामपि प्रत्येकमेकत्वाद्विनिगमनाविरहः, एवं हि एकस्या-
'प्रकारकघट शक्त्यभ्युपगमे व्यक्त्यन्तरे लक्षणायां स्वसमवेताश्रयत्वं संसर्ग
भूषणे । रवम्, जात्या तु सहाश्रयत्वमेव संसर्ग इति लाघवम्, किञ्चैवं-
विरो शिष्टवाच्यत्वमपेक्ष्य 'नागृहीविशेषण'न्यायाज्जातिरेव वाच्येति युक्तम्।

※ दर्पणः ※

बोध्यकोऽपि, तथापि, 'सविशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः सति च शेष्ये बाध' इति न्यायेन जातावेव स तां परिच्छिनत्ति। यद्वा जातिविशेष्यक पक्षे शक्तिग्रहो 'गौर्गोपदशक्य' इति, जातिशक्तिवाद एवमेवाऽभिलापात्, व्यक्तित्वप्रस्य त्वग्रे उपपादयिष्यमाणत्वान्न तदनुपपत्तिरिति भावः।

प्रक विनिगमनेति। एकतरपक्षपातियुक्तिरूपेत्यर्थः, तथाचेयं व्यक्तिः शक्या न जातिरित्येवं प्रत्येकव्यक्तिग्रहे विनिगमकाऽभावः, पूर्वत्र तु व्यक्तिसमुदायस्यैव कोटितया गौरवज्ञानस्यैव बाधकस्य विनिगमकत्वान्न तदभाव इति भावः। तत्पक्षेऽपि गौरवमेव बाधकमित्याह—**एवं हीत्यादि**। ननु उक्तविनिगमनाविरहेण सर्वास्वपि व्यक्तिषु शक्तिसिद्धावशक्यव्यक्तेरभावेन न तद्भानाय व्यक्तिवृत्तिकल्पनेति व्यक्तिशक्तिवादपक्षो निर्दुष्टोऽत आह—**किञ्चैवमिति**। यद्वा—ननु गोत्वादिजात्यनुगतीकृतयावद्व्यक्तिषु शक्तिस्वीकारान्नाऽऽनन्त्यादिदोषोऽत आह—किञ्चैवमिति। एवं = विशिष्टे शक्त्यभ्युपगमे। **नागृहीतेति**। 'नागृहीतविशेषणा

※ काशिका ※

करणीयम्, एवं च तस्य गवान्यासमवेतत्वे सति सकलगोसमवेतत्वरूपस्य शक्यत्वमावश्यकमिति विपरीतं गौरवमिति वाच्यम्। अत्रालक्ष्यस्यापि लक्ष्यतावच्छेदकत्ववत् अशक्यस्यापि शक्यतावच्छेदकत्वसंभवाद्, गुरुभूतेऽवच्छेदकत्वस्वीकारप्रयुक्तं गौरवमित्यपि न, शब्दार्थयोस्तादात्म्याच्छब्दगतजातेरेव शक्यतावच्छेदकत्वात्, तद्वृत्तिधर्मस्याऽऽविषयकधर्मविशेषरूपत्वाद्वा, गोत्वत्वमित्यादौ तस्यैव त्वादिप्रत्ययार्थत्वं न तु गवेतरासमवेतत्वघटितस्य, गौरवादिति स्पष्टमन्यत्र।

व्यक्त्यन्तरे लक्षणायामिति। स्वीक्रियमाणायामिति शेषः, तत्स्वीकारश्च व्यक्त्यन्तरबोधान्यथानुपपत्त्यावश्यकः। स्वसमवेतेति। शक्यत्वेनाभिमतव्यक्तिविशेषः स्वपदार्थः। इति लाघवमिति। तथा चोक्तलाघवं विनिगमकमिति न विनिगमनाविरह इति भावः। उपजीव्यत्वादपि जातिरेव वाच्येति युक्तमित्याह—**नागृहीतेति**। 'नागृहीतविशेषणा बुद्धिर्विशेष्यमव-

१—स्वं = शब्दत्वेनाभिमता पीतगवादिव्यक्तिः, तत्समवेता = तत्र समवायसम्बन्धेन वर्तमाना—गोत्वजातिः, तदाश्रयत्वं श्वेतगवादावपीति समन्वयः।

२—स्वाश्रयत्वमित्यर्थः, स्वं—गोत्वं तदाश्रयत्वं सर्वास्वेव गोव्यक्तिष्वित्येवं समन्वयः। जातौ शक्तिर्व्यक्तौ लक्षणेति तदाशयः, शक्यसम्बन्धो हि लक्षणा, स च सम्बन्धः, जातिशक्ता- रेति स एव पक्षो युक्त इति तत्त्वम्।

❀ दर्पणः ❀

बुद्धिर्विशेष्यमधिगच्छती'तिन्यायशरीरम्, विशेषणाविषयकबुद्धिर्विशे-
हत इति तदर्थः, विशेष्यविषयकत्वस्य विशेषणविषयकत्वनियतत्वमिति
तथाच विशिष्टशक्तिवादे विशिष्टशक्तिग्रहस्य विशेषणविषयकत्वावश्यक-
तदुभयविषयकत्वस्य पदार्थोपस्थित्यादिकारणताऽवच्छेदकत्वकल्पनापेक्षया वि-
णविषयकत्वमात्रस्यैव तदवच्छेदकत्वकल्पना लाघवादुचितेति जातावेव श-
सिद्धयतीति भावः। नन्वेवं 'गां दद्याद् व्रीहीनवहन्ती'त्यादौ दानावहननकर्म-
द्यन्वयानुपपत्तिर्जातेस्तदन्वयायोग्यत्वादिति चेदत्र केचित्,—जात्याक्षिप्तव्यक्ता
दानादिकर्मत्वान्वय इति, तन्न, 'प्रत्ययाना'मिति व्युत्पत्तेरप्रकृत्यर्थव्यक्तौ तदन्-
सम्भवात्, तदुक्तम्—गम्यमानस्य चार्थस्य नैव दृष्टं विशेषणम्।
शब्दान्तरैर्विभक्त्या वा धूमोऽयं ज्वलतीतिवत्।' इति।

किञ्चाऽयमाक्षेपोऽर्थापत्तिः? समानसंवित्संवेद्यत्वं वा? नाद्यः, अनुपपत्ति-
मन्तरेणाऽपि 'गौरस्ती'त्यतो गोत्वविशिष्टबोधात्, नान्त्यः, जातिविषयकशक्तिग्रहस्य
विशिष्टविषयकबोधहेतुत्वाऽभ्युपगमेन जातिविषयताया व्यक्तिविषयतानैयत्यरूपं
वाच्योऽन्यस्यासम्भवात्, स च 'गोत्वमस्ती'त्यत्र गोत्वविशिष्टाप्रत्ययाद् व्यभि-

❀ काशिका ❀

गाहत' इति न्यायशरीरं, विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुतयागृहीतविशेषणा एतादृशी
बुद्धिर्न विशेषणविशिष्टविशेष्यविषयिणी भवति। नञ्द्वयेन प्रथमतो विशेषणविषयकग्रहस्या-
वश्यकत्वं सूचितम्। तदिदमुक्तं भट्टैः—

'विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे'। इति।

नन्वेवं व्यक्तिबोधो न स्यात्। न चाक्षेपात् पीनो देवदत्त इत्यत्र रात्रिभोजनव-
दिति वाच्यम्, प्रकृतिवृत्त्यनुपस्थिततया गां दद्यादित्यादौ व्यक्तौ कर्मत्वाद्यन्वयानुपपत्तेः।
प्रत्ययानां प्रकृत्यर्थान्वितेत्यादिव्युत्पत्तेः। पदार्थान्तरान्वयश्च तत्र न स्याद् वृत्तिग्रहविशेष्ये एव
तदन्वयात्। अन्यथा समवायेनोपस्थिताकाशेऽपि तदन्वयापत्तेः। उक्तं हि तद्भूताधिकरणे—

'गम्यमानस्य चार्थस्य नैव दृष्टं विशेषणम्।
शब्दान्तरैर्विभक्त्या वा धूमोऽयं ज्वलतीतिवत्॥' इति।

विशेषणं, विशेषणीभूतव्यावर्तनं विशेषणताख्यविषयतावत्तया प्रतिपादनं वा तदर्थः।
किं चापत्तिरूप आक्षेपोऽपि न संभवति। गां दद्यादित्यादितोऽनुपपत्तिज्ञानं विनापि बोधदर्शनात्।
समानवित्तिवेद्यत्वमेवाक्षेप इति गुरवो मेनिरे। तथा चोक्तं तैः—यावती हि जातिधीर्व्यक्तिं
विषयीकरोति, अतो जातिभासकसामग्र्या एव व्यक्तिभासकत्वमङ्गीकार्यम्। व्यक्तिप्रत्यक्षं विना
जातिप्रत्यक्षाभावेन तत्रैवैतन्नियमावधारणात्, तथा च जातिशक्तिज्ञानमेव व्यक्तिविशेष्यकजाति-
प्रकारकशब्दबोधं प्रति कारणमिति पर्यवसन्नमिति, तदपि न। एवं सति गोत्वमस्तीत्य- [illegible] -

'प्रकारकघट[illegible] लक्षणया, एवञ्च तत्र विभक्त्यर्थान्वयोऽप्युपपद्यते इति दिक् ।

भूषणे ।

विरो'

❀ दर्पणः ❀

इत्युक्ताऽनुपपत्तिर्दुर्वारैवेत्यत आह—व्यक्तिबोधस्त्विति । लक्षणयेति । [illegible]गोत्वाश्रयत्वसम्बन्धरूपलक्षणयेत्यर्थः । तथाच पदवृत्तिजन्योपस्थितेरेव बोध[illegible]बोधे हेतुतया व्यक्तेरशक्यत्वेऽपि लक्षणावृत्त्युपस्थितायां तस्यां नाऽवघातादि[illegible]त्रान्वयानुपपत्तिरिति भावः । एवञ्चेति । लक्षणाऽभ्युपगमे चेत्यर्थः । तत्र = प[illegible]तव्यक्तौ । उपपद्यत इति । अन्यथा—'प्रत्ययाना'मिति व्युत्पत्तेः स नोपपद्ये[illegible]त्वप्र[illegible]भावः । ननु व्यक्तिलक्षणाभ्युपगमे 'युगपद्वृत्तिद्वयविरोध' इति सिद्धा[illegible]प्रक्ष[illegible], 'गौरस्ती'तिवाक्यादनुभूयमानव्यक्तिबोधानुपपत्तिश्च, लक्षणाबीजस्यान्व[illegible]नुपपत्तेस्तत्राभावादत आह—दिगिति । तदर्थस्तु—सति तात्पर्ये 'गङ्गायां घोष[illegible]स्यौ स्त' इत्यत्र वृत्तिद्वयस्य सर्व्वैरेवाभ्युपगमात्तादृशन्यायो,—युगपच्छक्तिस्ता[illegible]र्याऽविषये लक्षणा च नेत्येवंपर इति न तद्विरोधः, तात्पर्यानुपपत्तिसत्त्वाच्च न [illegible]क्तिलक्षणानुपपत्तिः, तद्विरोधाभ्युपगमे तु जातिव्यक्त्योरभेदपक्षमुपगम्य [illegible]भक्त्यर्थान्वय उपपाद्यः । तदुक्तम्—

❀ काशिका ❀

[illegible]विशिष्टबोधापत्तेः । लक्षणैवाक्षेपपदार्थः । एवं च तयोपस्थितव्यक्तौ विभक्त्यर्थाद्यन्वयः संभव[illegible]त्यन्ये, तदपरे न क्षमन्ते—लक्षणायाः शक्यान्वयानुपपत्तिज्ञानाधीनतयोक्तदोषकवलितत्वा[illegible]यत आह—व्यक्तिबोधस्त्विति । लक्षणयेति । निरूढलक्षणयेत्यर्थः । तत्र च नान्वयाद्यनुपपत्तिज्ञानापेक्षेति भावः । लक्षणयेति—जातिव्यक्त्योरभेदस्याप्युपलक्षणम् । तदुक्तं भट्टैः—

'तेन तल्लक्षितव्यक्तेः क्रियासंबन्धबोधना ।
व्यक्त्याकृत्योरभेदो वा वाक्यार्थेषु विवक्षितः ॥' इति ।

'तद्धितार्थ—' इति सूत्रे भाष्ये उक्तम्—'अथवा व्यतिरेकाद् द्रव्याकृत्योर्द्रव्यानयनम्' इति । गोत्वादिपदं तु गोत्वादिवृत्तिधर्मशक्तमिति न ततो गोत्वविशिष्टविषयकबोधः । नन्विदमसंगतं—'शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा ।'—

—इति नियमाल्लक्षणया शक्यगोत्वप्रकारकव्यक्तिविशेष्यकबोधानिर्वाहादिति चेन्न, एतन्नियमे मानाभावात् । शुक्लमानयेत्यादितो लक्षणया शक्यशुक्लरूपादिप्रकारकव्यक्तिविशेष्यकबोधोदयेन व्यभिचाराच्चेत्यभिप्रेत्याह—दिगिति । एतदभिप्रेत्यैव 'सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणात्' इति वार्तिकं संगच्छते । सरूपसूत्रे भाष्येऽप्युक्तम्—'आकृतिं वाजप्यायनः' इति । अपरे मीमांसकास्तु—यथा व्यक्तिशक्तिमते गोत्वाद्यंशे शक्तिस्तदवच्छेदकता वा निरवच्छिन्ना, तथा जातिशक्तिमतेऽपि [illegible] निरवच्छिन्नैवेति न गोत्वत्वादिनिवेशप्रयुक्तगौरवशङ्कापि । अत एवैतन्मतेऽपि स्वरूपतो

❀ दर्पणः ❀

तेन तल्लक्षितव्यक्तेः क्रियासम्बन्धचोदनात् ।

जातिव्यक्त्योरभेदो वा वाक्यार्थेषु व्यवस्थितः इति । वस्तुतस्तु—जाति- शक्तिग्रहस्य जातिविशिष्टव्यक्तिशाब्दबोधे हेतुत्वकल्पनान्न व्यक्तिभानानुपपत्ति- र्व्यशक्यभानापत्तिस्तस्य तद्वैशिष्ट्याभावादिति जातिशक्तिवादनिष्कर्षः । चाऽधिकमुपरिष्टात् ।

अन्ये तु जातिशक्तिवादमित्थमुपपादयामासुः—माऽस्तु व्यक्तेर्भानं, आनयनादिक्रिया केवलायां जातावसम्भवन्ती व्यक्तिसाहित्येन निष्पाद्यते—समा- पाणिपादसाहित्येन वादनक्रियावत्, तदुक्तं 'तद्धितार्थे'ति सूत्रे भाष्ये—"आ- वालम्भनादीनां सम्भवो नास्तीति कृत्वा तत्सहचरिते द्रव्ये भविष्यति, शी- 'ऽग्निरानीयता'मित्युक्ते केवलस्याग्नेरानयनासम्भवादचोदितमपि पात्रमानी- एतदेवाऽग्नेरानयनं यत्पात्रस्थस्य, तथाऽऽकृतावालम्भनादीनि चोद्यमानानि सा- र्थ्यात् साहचर्याद् द्रव्यमभिनिविशन्ते, सर्व एवाकृतेर्योगोऽन्तर्भावितद्रव्या- इति द्रव्यद्वारकः सम्बन्धः सम्पद्यते' इति । साहचर्यं = सम्बन्धः, सरूपसू- भाष्येऽपि स्फुटोऽयमर्थः । हरिरप्याह—

व्यक्तौ कार्याणि संसृष्टा जातिस्तु प्रतिपद्यते' । इति ।

गोत्वादिपदानां तु गोत्वादिधर्मिवृत्तिधर्म एव शक्तिरिति न तत्र गोवि- शेष्यको बोधः, जातेराश्रयाऽवियोगेऽपि केवलायास्तयाः शब्दवाच्यत्वं ना- पपन्नम्, जलादौ दृश्यमानस्य मुखस्य स्वस्थानाऽवियोगेऽपि मुखादिप- बोध्यत्ववत्, शक्यतावच्छेदकता तु जातिगतधर्मस्यैवेति । इदमपि मतं जात्या व्यक्त्याक्षेपे पर्य्यवस्यति—तच्च 'न चाऽपदाऽर्थे प्रत्ययान्वय' इति दूषणग्रस्तम्, विनाऽपि सङ्केतविषयतां सामान्येन सम्बन्धनियमादर्थाऽध्याहारन्यायेनोपस्थितां व्यक्तिं पुनर्जातिर्विशिनष्टि, रूपादिज्ञानाविषयाणां 'चाक्षुषयामी'ति प्रतीत्या विषयीकरणवदित्यपि केचित् ।

❀ काशिका ❀

गोत्वादिभाननिर्वाहः शाब्दबोधे । ननु गोत्वत्वादेः शक्यतावच्छेदकत्वविरहेऽपि शक्तिग्रहकारणतायां गोत्वत्वादेर्धर्मितावच्छेदकताख्यविषयताप्रवेशाद् गौरवं दुर्निवारमेव, व्यक्तिशक्तिवादिमते स्वरूपतो गोत्वादिनिष्ठधर्मितावच्छेदकत्वस्यैव निवेशादिति चेन्न । निरूपितत्वसंबन्धेन स्वरूपतो गोत्व- प्रकारकस्य गोपदविशेषणत्वापन्नशक्तिविशेष्यकस्य गोपदशक्तिर्गौरित्याकारस्य, शक्तिसंबन्धेन स्वरूपतस्तत्प्रकारकगोपदविशेष्यकस्य गोपदं गौरित्याकारकस्य वा शक्तिज्ञानस्यैव कारणत्वोपगमात् । तत्र च गोत्वत्वादिविषयताया अप्रवेशात् । समवायेनैव स्वरूपतः प्रकारत्वमिति नियमस्तु न, घटं जानामीत्याद्यनुव्यवसाये प्रकारितासंबन्धेन घटत्वादीनां स्वरूपतो ज्ञानाद्यंशे प्रकारत्व- मा-

'प्रकारकघट—केवलव्यक्तिरेवैकशब्दार्थः, केवलव्यक्तिपक्ष एवाण्ग्रहणस्य, भूषणे । च चारम्भेण तस्यापि शास्त्रसिद्धत्वात् ।
विरो युक्तं चैतत्,—व्यवहारेण व्यक्तावेव तद्ग्रहणात् ।

❀ दर्पणः ❀

बोध शक्यसम्बन्धरूपाया लक्षणाया एकस्या लक्ष्यलक्ष्यतावच्छेदकयोरसंभवेऽपि च याऽर्थप्रतीतौ लक्ष्यताऽवच्छेदकभानवच्छक्यतावच्छेदके शक्त्यभावेऽपि तादृश-पत्त्यंकारणभावबलादेव गोत्वादिभाननिर्वाहे कृतं तत्र शक्तिकल्पनयेत्याशयेनैक-त्वम न्यथा व्याचष्टे—यद्वेति । 'व्यक्तिरेवे'त्येवेन जातिव्यवच्छेदः । ननु 'सवर्णे-प्र हण'मित्यादिप्रमाण्यादस्तूक्तः पक्षः, 'व्यक्तिः पदार्थ' इत्यत्र तु किं मानमत —केवलव्यक्तीति । एकशेषस्य चेति । जातिपक्षे एकेनैव शब्देन योर्बहूनां वा प्रत्यायनसम्भवात् तदनर्थकं सद् व्यक्तिपक्षज्ञापकमित्यर्थः । अण्-ग्रहणस्य भाष्यकृता प्रत्याख्यानात्, सरूपसूत्रस्य च शास्त्रीयप्रक्रियामात्रोपयो-गत्वस्याऽऽकरे व्यवस्थापनात्, कथमुक्ताऽर्थे तयोः प्रामाण्यमत आह—युक्त-

❀ काशिका ❀

दिति दिगिति समूचुः । अस्मिन् मते दूषणमुद्भावयन् व्यक्तिशक्तिमते साधकं वदंश्चैकपदस्य व्यक्ति-रत्वमाह—यद्वेति । केवलव्यक्तिरेवेति । एवशब्दव्यावर्त्या—जातिः । केवलशब्देनैव तद्व्या-सिद्धावेवः स्पष्टार्थः । केवलव्यक्तिपक्ष एवेति । जातिविशिष्टव्यक्तेः पदार्थत्वमते तु ज्जात्यवच्छिन्नविशेष्यताकशक्तिग्रहत्वेन तज्जातिप्रकारकतदाश्रयविशेष्यकशाब्दत्वावच्छिन्नं प्रति हेतुतया अत्वादिजात्याश्रयसकलव्यक्तिग्रहणसंभवेनाण्ग्रहणम् 'अणुदित्—' सूत्रे व्यर्थं स्यात् । केवलजातिशक्तिमते तु तद्वैयर्थ्यं स्पष्टमेव । 'अण्ग्रहणस्य' इत्यस्य 'आरम्भेण' इत्यत्रान्वयः ।

एकशेषस्य चेति । 'सरूपाणा'मिति सूत्रारम्भेणेत्यर्थः । एकशेषारम्भस्य व्यक्तेः पदार्थतायां मानता, न तु केवलव्यक्तेः पदार्थतायां, जातिविशिष्टव्यक्तेः पदार्थत्वेऽपि तदारम्भस्यावश्यकत्वात् । यद्वा तज्जात्यानुगतीकृतानेकार्थानामेकशब्देन प्रतिपादनस्य वक्ष्यमाणतया केवलव्यक्तेः पदार्थत्वसाधक-तेति बोध्यम् । न च जातेः पदार्थत्वेऽप्यक्षादिपदार्थमापपाशादिसाधारणजातेरभावेनानेकमापत्व-पाशत्वादितात्पर्येण अक्षा इत्यादिप्रयोगनिर्वाहायैकशेषसूत्रारम्भ आवश्यक इति वाच्यम्, अश्नोतेरक्षशब्दस्य व्युत्पादनाद्धात्वर्थव्याप्तिगतव्याप्तित्वरूपजातिः स्वसमवायिसमवायात्मकपरंपरा-संबन्धेन मापपाशादिसंबद्धाक्षपदवाच्येत्यभ्युपगमात् । तथा चोक्तं सरूपसूत्रभाष्ये—'अश्नोतेरक्ष-स्तत्र क्रियासामान्यात् सिद्धम्' इति । क्रियागतं सामान्यमित्यर्थः । तथाविधक्रियासमनियतं सामान्यमक्षपदार्थत्रयसमवेतमित्यर्थं इत्यपरे । तथा च तादृशजातेः संभवेनोक्तदोषानवकाशात् तस्यापि च केवलव्यक्तिशक्तिपक्षस्यापि शास्त्रं मानमुक्त्वा युक्तिमपि तत्र प्रमाणयति—युक्तं चे व्यक्तावेवेति । घटमानयेति वाक्यप्रयोगानन्तरकालिकप्रयोज्यकर्तृकानयनादिरूप-

'सम्बन्धितावच्छेदकस्य जातेरैक्याच्छक्तिरप्येकैवेति न गौरवम्

❀ दर्पणः ❀

क्वैतदिति । सयुक्तिकमप्येतदित्यर्थः । अपिना—'द्रव्याऽभिधानं व्याडि' सरूपसूत्रस्थभाष्यप्रामाण्यं समुच्चीयते ।

युक्तिमेवाह—व्यवहारेणेति । एतत्तत्त्वं शक्तिवादे वक्ष्यते । एतत् पूर्वोक्तं शक्त्यानन्त्यदोषं समुद्धरति—सम्बन्धितावच्छेदकस्येति । शक्तिः धर्म्मिताऽवच्छेदकस्येत्यर्थः, सम्बन्धिताऽवच्छेदकपदस्य लिङ्गसर्वनामनपुंसकत्वा उद्देश्यसमर्पकत्वाद्वा न तत्त्वाऽनुपपत्तिः । तथाच सम्बन्धिताऽवच्छेदकजात्य गतीकृतनानाव्यक्तिष्वेकधर्मावच्छिन्नाया एकस्या एव शक्तेरुपगमान्न तन्नान

❀ काशिका ❀

व्यवहारेण व्यक्तावेव शक्तिग्रहादित्यर्थः । ननु व्यक्तौ जातोऽपि शक्तिग्रहो लाघवादग्रे बाध्यते बाधो नामाप्रामाण्यग्रह इति चन्द्रमण्डलादिप्रमाणं पूर्व मिन्द्रियेण गृहीतमपि ज्योतिःशास्त्रेण बाध्यते, न तु लाघवमात्रेणेति न दोषः । पूर्वं जातोऽपि कर्मधारयनिश्चयोऽग्रेऽपूर्वविद्याकल्पनभिया बाध्येतेति निपादस्थपत्यधिकरणविरोध इति चेन्न । पूर्वं जातस्य लाघवमात्रेण बाधायोगात् । अन्यथा निपादस्थपतिं याजयेदित्यत्र गां दद्यादित्यत्रानुपपत्तिश्च, जातिशक्तिमते गोत्वादेर्दानाद्यसंभवात् । लक्षितव्यक्तिमादाय तदुपपत्तिरित्यपि न युक्तम् । व्यक्त्यन्तरे शक्यसम्बन्धाऽग्रहात्, व्यक्त्यन्तर-विषयकसंबन्धग्रहस्य तदितरव्यक्तिबोधाजनकत्वात् । अन्यथा हस्तित्वधर्मितावच्छेदककादेकहस्ति-विषयकहस्तिपकसंबन्धग्रहात् कालान्तरे हस्तिपकदर्शने हस्त्यन्तरस्मरणापत्तेः । गां नयेत्यादिवाक्ये वृत्तिद्वयकल्पनायां गौरवं च । अत एव—'जातेरस्तित्वनास्तित्वे न हि कश्चिद्विवक्षति ।

नित्यत्वाल्लक्षणीयाया व्यक्तेस्ते हि विशेषणे ॥'—

—इति मण्डनमिश्रोक्तमप्यपास्तम् । जातिव्यक्त्योरभेदाद्दानान्वय इति चेत्तथा सति व्यक्ते-र्वाच्यत्वं स्वीकृतमेवेति भावः । ननु व्यक्तीनामानन्त्याच्छक्त्यानन्त्यप्रसङ्गः, कुत्रचिदेव व्यक्तौ शक्तिरिति नोक्तदोप इति चेदेवं सत्यगृहीतशक्तिकव्यक्तिबोधेऽप्यव्यभिचारेण शक्तिग्रहस्य शाब्दबोधहेतुत्वभङ्गापत्तिः । शक्तिग्रहाविषयत्वाविशेषाद् घटपदात् तटादेरपि बोधापत्तिश्च । तदुक्तं मीमांसकादिभिः—'आनन्त्यव्यभिचाराभ्यां शक्त्यनेकत्वदोषतः ।'

—इत्याशङ्कामपाकुर्वन्नाह—संबन्धितावच्छेदकस्येति । शक्यतावच्छेदकस्येत्यर्थः । जाति-रूपस्य तस्येति योजना । एवं च संबन्धितावच्छेदकस्यैव विशेष्यतया विवक्षणान्नपुंसकनिर्देशो-पपत्तिः । अन्यथा संबन्धितावच्छेदिकाया इति स्यादिति बोध्यम् । एकैवेति । शक्यव्यक्तीनामा-नन्त्येऽप्युपलक्षणीभूतघटत्वादिजातेरैक्यात्तदैक्यं, कारणतायाः निरूपकाश्रयव्यक्तिबाहुल्येऽप्यवच्छेद-

१. सम्बन्धितावच्छेदकस्य = शक्यतावच्छेदकस्य, जात्यनुगतीकृतासु व्यक्तिषु एकधर्मा-वच्छिन्नाया एकस्या एव शक्तेः सत्त्वान्न गौरवं, शक्यतावच्छेदकैक्याच्छक्तेरैक्यमिति तत्त्वम्।

'प्रकारकघट' घटत्वमपि वाच्यं स्याच्छक्यतावच्छेदकत्वात्, तथा च 'ना भूषणे ।(व)शेषण'न्यायात् तदेव वाच्यमस्त्विति शङ्क्यम्, अकारणत्वेपि विरो-

❀ दर्पणः ❀

(बोध)कगौरवमिति भावः। **एवमिति**। विशिष्टे शक्तिस्वीकारे इत्यर्थः। घटत्वादे-(घ)टादिनिष्ठशक्यताऽवच्छेदकत्वाभ्युपगम इति यावत्। तदेव = घटत्वाद्येव, (वा)च्यं = शक्यमित्यर्थः। शक्यत्वे हेतुपन्यसनं—**न्यायादिति**।

अकारणत्वेऽपीति। दण्डत्वाऽदीनामन्यथासिद्धत्वेनाऽकारणत्वेऽपि, तीर-(त्व)प्र(भृ)तीनां प्रवाहाद्यसम्बन्धितयाऽलक्ष्यत्वेऽपि च, तत्र तत्तन्निष्ठाऽवच्छेद्यतानिरूपित-(स्व)रूपसम्बन्धाऽऽत्मिकाया विषयिताविशेषाऽऽत्मिकाया वावच्छेदकताया अभ्यु-पगमवद् अशक्यस्यापि घटत्वादेस्तादृशशक्यताऽवच्छेदकत्वसम्भवात्, शक्यत्वे सति शक्यविशेषणतापन्नस्य शक्यताऽवच्छेदकत्वमिति नियमे मानाभावादिति

❀ काशिका ❀

कदण्डत्वादेरैक्यादैक्यवदिति भावः। तद्धर्मावच्छिन्नधर्मिकशक्तिग्रहस्य तद्धर्मप्रकारकतद्धर्माश्रय-विशेष्यकशाब्दत्वावच्छिन्नं प्रति कारणत्वाच्छक्तिग्रहस्य यावद्व्यक्तिविषयकत्वासंभवेऽपि न व्यभिचारः। कार्यत्वकारणत्वयोरवच्छेदककोटौ तत्तद्व्यक्तिविषयताया अनिवेशात्। तत्तद्धर्म-(स्)याशक्यत्वेऽपि तद्विषयतायाः कार्यतावच्छेदककोटिप्रवेशाद्भानोपपत्तिश्च। घटपदात् पटादिबोध-प्रसङ्गो द्रव्यत्वप्रकारकघटभानप्रसङ्गश्च नेति भावः। शङ्कते—न **चैवमिति**। एवं = घटत्वादेः शक्यतावच्छेदकत्वे। **शक्यतावच्छेदकत्वादिति**। शक्यत्वे सति शक्तिग्रहीयार्थनिष्ठधर्मितावच्छे-दकत्वरूपत्वाच्छक्यतावच्छेदकत्वस्य घटत्वादेरपि वाच्यत्वमावश्यकमिति भावः। **तदेव वाच्य-मिति**। एवं च केवलव्यक्तिवाच्यतापक्षोऽत्यन्तासंभवग्रस्त इति तात्पर्यम्। **अलक्ष्यत्वेऽपीति**। यथा गङ्गायां घोष इत्यादौ तीरत्वाद्यवच्छिन्नधर्मिकप्रवाहरूपशक्यसंबन्धिताग्रहादेव तीरत्वा(दि)-प्रकारकोपस्थितिशाब्दबोधनिर्वाहः, संबन्धितावच्छेदकत्वग्रहस्यैवोपस्थित्यादिविषयताप्रयोजकत्वान्न तु तदंशेऽपि लक्षणोपेयते, शक्यसंबन्धस्य तीरतत्त्वोभयसाधारणस्याभावादुक्तरीत्यैवोपपत्तौ तदंशे संबन्धज्ञानस्योपस्थित्यादिहेतुत्वाकल्पनाच्च। एवं शक्त्याख्यसंबन्धितावच्छेदकत्वग्रहादेवोपपत्तौ न घटत्वाद्यंशेऽपि शक्तिरिति समुदिततात्पर्यार्थः। शक्यतावच्छेदकत्वं तु शक्यत्वाघटितमेवेति भावः। लक्ष्यत्ववदिति दृष्टान्तोपन्यासेनेतरसंबन्धशून्ये तत्संबन्धितावच्छेदकत्वेऽपि वृत्त्यात्मकसंबन्धशून्ये तत्तत्संबन्धितावच्छेदकत्वमुपेयत इति शङ्का निरस्ता। अयं च दृष्टान्तो नैयायिकनये। आलंका-रिकादिनये तु लक्ष्यतावच्छेदकेऽपि लक्षणास्त्येव। तथा चोक्तम्—

'मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत् सा लक्षणा—॥' इति।

कारणतावच्छेदकत्ववद्, अलक्ष्येऽपि लक्ष्यतावच्छेदक
सम्भवात्। उक्तञ्च—

"आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम्।
शब्दः सुकरसम्बन्धो न च व्यभिचरिष्यति ॥" इति।

※ दर्पणः ※

भावः। उक्तेऽर्थे सम्मतिमाह—उक्तञ्चेति। आनन्त्येऽपीति। भावानां व्यक्तीनां, नानात्वादपरिच्छेद्यत्वेऽपि, एकम् = अनुगतजात्यादिधर्मम्, उ लक्षणम् = अशक्यत्वेऽपि शक्यव्यावर्त्तकं, कृत्वा = अभ्युपगम्य, शक्यताऽवच्छे कतयाभ्युपेत्येति यावत्। शब्दो = गवाद्यात्मकः, सुकरसम्बन्धः = सुग्राह्यगवा निष्ठवाच्यतासम्बन्धः, न चेति—शक्तिग्रहाऽविषयव्यक्तिं बोधयिष्यतीति तदर्थः[1] गोत्वादिसामान्यलक्षणया सर्वास्वेव व्यक्तिषु शक्त्यवधारणादिति भावः। अधिक मग्रे वक्ष्यते। व्यक्तिरेवाऽत्र द्रव्यपदेन व्यवह्रियते, सर्वनामपरामर्शयोग्यत्वात्, उक्तञ्च—

'वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते।
द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः ॥' इति।

[2]स्वभावादेव बुद्धिविषयताऽवच्छेदकत्वोपलक्षिततद्धर्माऽवच्छिन्नबोधकं सर्वनाम यस्मिन् धर्मिणि तादृशधर्मं प्रवृत्तिनिमित्तीकृत्य प्रयुज्यते, इदं—तदिति परामर्श योग्यमिति यावत्, द्रव्यपदेन व्यवह्रियत इत्यर्थः। भेद्यत्वेन = विशेष्यत्वेनेत्यादि तु लक्षणान्तरपरम्। एतत्पक्षे तु जात्यादेरपि विशेष्यत्वविवक्षायां द्रव्यत्वमिष्टमेव, तिङन्ताऽर्थक्रियायाः किमादिभिः परामर्शात्, स्तोकाद्यर्थनिरूपितविशेष्यतावत्त्वाच्च द्रव्यत्वमस्त्येव, 'विप्रतिषिद्ध'मित्यादौ च सामर्थ्यात्तन्त्रान्तरप्रसिद्धद्रव्यग्रहणम्, '[चा]दयोऽसत्त्वे' इत्यत्र प्रथमकल्पोक्तद्रव्यस्यैव पर्युदासो बोध्यः।' शक्यतावच्छेदकत्वं च—शक्यनिष्ठविशेष्यताऽवच्छेदकतया भासमानत्वं, घटादिपदे शक्तिग्रहे च घटत्वादेरेव तत्त्वं, न पृथिवीत्वादेरिति न तेभ्यः पृथिवीत्वादिबोधः, आकाशशब्दस्य शब्दाश्रयत्वे शक्त्यभावेऽपि ततस्तद्रूपेणैव बोधः। तद्विशिष्ट-

※ काशिका ※

लक्ष्यते = ज्ञायत इत्यर्थः। एवं च नान्याश्रयः। एवं च शक्यादशक्योपस्थितिरूपायास्तस्या लक्ष्यतावच्छेदकेऽपि विषयतया सत्त्वमनपवादमेवेत्याहुरिति दिक्। उक्तेऽर्थेऽरुणाधिकरणस्थभट्टोक्तिसाधकतयोपन्यस्यति। आनन्त्येऽपीति। भावानां = घटादीनां—वाच्यत्वेनाभिमतानाम्। एकम् = अनेकव्यक्तिसंबद्धं घटत्वादिकम्। सुकरसम्बन्धः=सुकरसंबन्धग्रहः, संबन्धः=शक्तिरूपः। न च व्यभि-

१. भट्टोक्तकारिकार्थः २. 'वस्तूपलक्षण' मित्यंशविवरणमिदम्।

स्तु—"न ह्याकृतिपदार्थस्य द्रव्यं न पदार्थं' इति भाष्याद्
'प्रकारकघट वाच्यम्,
भूषणे ।
विरो

ॐ दर्पणः ॐ

क्तिग्रहस्य तद्बोधहेतुत्वात् । यद्वाऽऽकाशत्वमखण्डोपाधिः, 'वृद्धि'सूत्रोक्तरीत्या दं वाकाशशब्दशक्यतावच्छेदकमिति 'नाकाशः शब्दाश्रय' इति प्रयोगानु-बाधपत्तिरिति-द्रव्यवादनिष्कर्षः ।

ननूक्तपक्षद्वयमपि न विचारसहम्, तथाहि—जातिशक्तिवादे गोत्वादि-पदात्तद्विशिष्टबोधापत्तिर्गोत्वशक्तिग्रहस्य तद्विशिष्टबोधौपयिकस्य सत्त्वात्, न च त्वप्रधर्मितावच्छेदकशक्तिग्रहो गोत्वविशिष्टबोधे हेतुर्गोत्वत्वधर्मितावच्छेदकशक्तिग्रहश्च प्रकारत्वत्वेन तदुपस्थितौ शाब्दबोधे च हेतुरिति वाच्यम्, 'गोत्वं न गोपदशक्य'मिति गोत्वत्वधर्मितावच्छेदकबाधग्रहकाले निर्धर्मितावच्छेदकशक्तिग्रहसम्भवेन गोत्वविशिष्ट-बोधापत्त्या गोत्वत्वधर्मितावच्छेदकशक्तिग्रहस्य तादृशबोधहेतुताया आवश्यकत्वात् । यदि च गोत्वे निरवच्छिन्नैव शक्तिः, 'गोपदं गौ'रित्याकारकं शक्तिसम्बन्धेन गोत्व-प्रकारकं, गोपदत्वविशिष्टविषयकं शक्तिज्ञानं गोत्वविशिष्टबोधहेतुरिति नोक्तबाधकाले शाब्दबोधापत्तिरिति विभाव्यते, तदापि कदाचित् समवायेन गोत्वविशिष्टबोधः, कदाचित् कालिकादिसम्बन्धेनेति व्यवस्थाऽनुपपत्तिः, गोत्वविषयकशक्तिज्ञानस्या-ऽविशिष्टत्वात् । मन्मते तु समवायेन गोत्वविशिष्टविषयकशाब्दबुद्धिं प्रति तेन सम्बन्धेन गोत्वविशिष्टशक्तिग्रहस्य, एवमितरसम्बन्धेन तादृशविशिष्टविषयक-बोधे तेन सम्बन्धेन तादृशविशिष्टशक्तिज्ञानस्य हेतुतया तन्नियमोपपत्तेः, गोपदं गौरित्याकारकशक्तिग्रहात् तादृशबोधाऽननुभवाच्च । गोत्वादिपदानां गोत्वत्वे शक्तिरित्यपि न, प्रकृतिजन्यबोधप्रकारे भावप्रत्ययविधानात्, गवेतराऽसमवेत-त्वविशिष्टसकलगोसमवेतत्वरूपस्य गुरोः शक्यत्वाऽभ्युपगमे लाघवमूलकाऽऽकृति-वादस्य मूलशैथिल्यापत्तेश्च । व्यक्तिवादेऽपि पदमात्रस्यैव व्यक्तिबोधकत्वाऽविशे-षात् 'गौश्चलो नील' इत्यादीनां सह प्रयोगाऽनुपपत्तिः । किञ्च,—हस्तिपक-व्यक्त्यन्तरे सम्बन्धग्रहे यत्र हस्तिपके सम्बन्धो न गृहीतस्तस्याऽपि हस्तिदर्शने स्मरणापत्त्या तद्व्यक्तिविषयकसम्बन्धग्रहस्य तदुपस्थितिनियामकत्वस्यावश्यक-तया कथमेकविषयकशक्तिज्ञानादपरविषयकोपस्थितिः, सामान्यलक्षणा त्वापातर-मणीयैवेत्यभिप्रायवानाह—**वस्तुतस्त्विति । विशिष्टमिति ।** जातिविशिष्टा

ॐ काशिका ॐ

चरिष्यतीत्यस्योक्तोऽभिप्रायः । आकृतिपदार्थस्येति—आकृतिः पदार्थो यस्येति बहुव्रीहिः । इति भाष्यादिति । इदं च सरूपसूत्रस्थं भाष्यम् । विशिष्टं वाच्यमिति । जातिविशिष्टं

❀ दर्पणः ❀

व्यक्तिर्व्यक्तिविशिष्टा जातिर्वेत्यर्थः। यद्यप्या'कृतिपदार्थकस्य द्रव्यं न पद पदार्थकस्य चाकृतिर्न पदाऽर्थ इत्युभयोरुभयं पदार्थ' इति भाष्याद्विशक रेवाकृतिव्यक्त्योः शक्तिग्रहविषयता लभ्यते, तथापि 'कस्यचित् किञ्चिद् गु भूतं किञ्चित् प्रधान'मित्युत्तरभाष्यपर्यालोचनया तत एव विशिष्टे शक्त्यवधारण तथोपादानमविरुद्धम्, अन्यथा तृतीयोपात्तैकत्वकरणत्वयोरिव विशेष्यविशेष भावाऽनापन्नजातिव्यक्त्योः शक्यत्वे गोर्यद्गोत्वं व्यक्तिश्चेति समूहालम्बनबोधा पत्तेः, शक्तिज्ञानपदार्थोपस्थितिशाब्दबोधानां समानप्रकारकत्वनियमात्। एवमेवा ऽवयवसंयोगरूपाकृतौ। तथाच सूत्रितं गौतमेन,–'जात्याकृतिव्यक्तयः पदार्थः' इति त्रिष्वेकैव शक्तिरिति बोधनाय च तत्रैकवचनं। 'गुणभूत'मिति भाष्यस्य 'स्वारसिकतये'ति शेषः। जातेः कदाचित् प्राधान्येन भानं तु तात्पर्यग्रहसापेक्ष मिति तदाशयः। जातेः प्राधान्येऽपि द्रव्यसंख्यामादाय तत्र द्विवचनाद्युपपत्ति-र्बोध्या, तदुक्तं कैयटेन 'यथा भवत इत्यादौ क्रियाप्राधान्येऽपि साधनकृतो वचनभेद एवमाकृतिप्राधान्येऽपि द्रव्यसंख्याकृत इत्यदोष' इति। द्रव्यप्रधान्येऽपि क्वचि-ज्जातिसंख्यामादाय वचनं,–'ब्राह्मणं न हन्या'दित्यादौ यथा। जातेः प्राधान्ये च निरवच्छिन्नाया एव व्यक्तेः प्रकारताविशेष्यीभूतजात्या च तदनुगमः, न हि प्रकारीभूतमेवाऽनुगमकमिति नियम इति तत्कल्पपरिष्कारः।

वस्तुतस्तु–जातिविशिष्टव्यक्तिरेव शक्या, गवादिपदाद्गोविशिष्टगोत्वबोधस्या ऽननुभवेनोक्तकल्पाऽसम्भवात्, अत एव तथैव व्याख्यातम्। जात्यतिरिक्तपदा ऽर्थस्य किञ्चिद्धर्माऽवच्छिन्नत्वमिति नियमेन निरवच्छिन्नायास्तस्या जात्यंशे भानाऽ योगात्, गोत्वस्याऽन्वयितावच्छेदकरूपेणाऽनुपस्थित्या तत्र कर्मत्वाद्यन्वयासम्भवाच्च। 'सम्पन्नो व्रीहि'रित्यादौ तु स्वाश्रयप्रकृत्यर्थतावच्छेदकत्वसम्बन्धेन प्रकृत्यर्थ-भूतावेवैकत्वाऽन्वयः। उक्तस्थले एकवचनोपस्थितानि नानैकत्वानि नाना व्रीहिष्वन्वीयन्त इति न सत्, सजातीयनिष्ठभेदप्रतियोगिताऽनवच्छेदकैकत्वरूप-सजातीयद्वितीयरहितत्वस्यैवैकवचनाऽर्थत्वेन तत्र तस्य बाधात्, संख्यारूपैकत्वस्य द्रव्यमात्रसाधारण्येनाऽर्थत एव लाभादनुपयोगात्तस्यैकवचनाऽर्थत्वाभावाच्च, अत एव,–'पशुना यजेते'त्यत्र तादृशैकत्वस्यैकवचनेन विवक्षितत्वान्नाऽनेकपशु-करणकयागादृष्टसिद्धिः। समभिव्याहृतपदार्थसंसर्गित्वविशिष्टप्रकृत्यर्थतावच्छेदक-

❀ काशिका ❀

गवादिकं गवादिशब्दवाच्यमित्यर्थः। अत एव चक्षुरादिशब्दवाच्यमित्यर्थप्रमाणवच्छब्दरूपप्रमाणस्य स्वसंबद्धविषयस्यैव ग्राहित्वमिति नियमभङ्गो न। परे तु "न ह्याकृतिपदार्थस्य द्रव्यं न पदार्थः द्रव्यपदार्थकस्य वाकृतिर्न पदार्थः, उभयोरुभयं पदार्थः कस्यचित् किंचित् प्रधानभूतं किंचि

❀ दर्पणः ❀

'प्रकारकघट...त्यस्य विवक्षणाच्च ना'ऽत्र घटोऽस्ती'त्यादौ घटनिष्ठभेदप्रतियोगिता... भूषणे । ...च्छेदकैकत्वाप्रसिद्धिः, एतद्देशविद्यमानघटनिष्ठभेदप्रतियोगिताऽनवच्छेदकैक... विरोध्येव तत्र बोधेन तस्योक्तरीत्या प्रसिद्धिसम्भवात् । एवञ्च—व्यक्तिविशेष्यक... बोध...गाऽभ्युपगमे क्वाऽप्यनुपपत्तेरभावेन तस्य च तद्विशेष्यकशक्तिग्रहमन्तरेणाऽस... गवादिपदानां जातिविशिष्टव्यक्तावेव शक्तिः, व्यक्तिमात्रविषयकस्य, जातिमात्र... विषयकस्य वा शक्तिज्ञानस्य जातिविशिष्टव्यक्तिशाब्दबोधहेतुतायामुक्तदोषस्य दुरुद्धरत्वादिति—सारकारनिगर्वः ।

अन्ये तु—'उभयोरुभयं पदाऽर्थं' इति भाष्याज्जातौ, व्यक्तौ च गवादिपदानां शक्तिः, परन्तु व्यक्तिशाब्दबोधेऽपि जातिविषयकत्वेन जातिशक्तिज्ञानस्यैव हेतुता, व्यक्तिशक्तिस्तु स्वरूपसत्युपयुज्यते, अशक्यस्याऽपि शाब्दे भानाऽभ्युपगमे गवादिपदादशक्यगवादिव्यक्तेरिवाऽशक्यघटादीनामपि भानापत्त्या व्यक्तिशक्तिरावश्यकी, अयमेव 'कुब्जशक्तिवाद' इति व्यवह्रियते, शाब्दबोधकारणतावच्छेदककोटौ व्यक्तिविषयकत्वस्यानिवेशात् । तथाच-'गोत्वप्रकारकगोविषयकशाब्दबोधे गोत्वविषयकगोपदशक्तिमती गौ'रित्याकारकशक्तिज्ञानं कारणं, न तु 'गोत्वविशिष्टविषयकगोपदशक्तिमती गौ'रित्याकारकम् 'गोत्वमस्ती'त्यादौ तादृशगोत्वप्रकारकशक्तिज्ञानाभावान्न गोत्वविशिष्टबोधप्रसङ्ग इत्याहुः । तदप्यापातमनोरमम् । 'गोत्वविषयकगोपदशक्तिमती गौ'रित्याकारकशक्तिग्रहे कारणताऽवच्छेदककोटौ गोत्वविषयकत्वस्य प्रवेशे गौरवात् । ननु माऽस्तु तद्विषयकत्वस्यावच्छेदककोटौ निवेशः, 'गोपदशक्तिमती गौ'रित्याकारकशक्तिग्रहस्य गोत्वप्रकारकत्वेन गोत्वविशिष्टविषयकशाब्दबुद्धिहेतुत्वे व्यक्तिविषयतायाः कारणताऽवच्छेदककोटावनिवेशेन लाघवात्, देशान्तरस्थव्यक्तिविशेष्यकबोधाऽनुपपत्त्या समानविशेष्यकत्वेन कार्यकारणभावाऽसम्भवेन समानप्रकारकत्वेनैव कार्यकारणभावोपगमादिति चेन्मैवम्, व्यक्तिविषयतायाः कारणताऽवच्छेदककोटावनिवेशे व्यक्तिशक्तिस्वीकारस्य वैयर्थ्यापत्तेः, न च तदस्वीकारे गोत्वप्रकारकशक्तिज्ञानत्वेन हेतुत्वाऽसम्भवः, व्यक्तौ शक्त्यभावेन तादृशशक्तिज्ञानस्य भ्रमत्वादिति वाच्यम्, शक्तिर्हि न स्वरूपसती शाब्दबोधहेतुरपभ्रंशादपि बोधोदयात् अगृहीतशक्तिकाच्छाब्दबोधापत्तेश्च, किन्तु ज्ञाता, तथाच यदंशे शक्तिज्ञानहेतुस्तदेव शक्यमिति जातिवद् व्यक्तिरपि शक्यैव,

❀ काशिका ❀

भूत''मित्यादि भाष्ये द्रव्यपदार्थवादे आकृतेर्विशेषणत्वोक्त्या तज्जात्यनुगीतकृतानेकव्यक्तिबोधस्यैकशब्देनैव संभवेन तत्पक्षेऽप्येकशेषो नारम्भणीय इति सूचितम् । जातिवादे व्यक्तेर्व्यक्तिवादे जातेः ...च्छेदकत्वमिति च सूचितमित्याहुः । ननु विशिष्टस्य पदार्थतापक्षे एकमिति विरुद्धं

'एक'मित्यस्य चाऽयमभिप्रायः,—शक्तिज्ञाने च विषय
दिका जातिरेकैवेति । तथाच 'घटत्वप्रकारकविशिष्टबोधे घटत्व

❀ दर्पणः ❀

एवं तद्वैशिष्ट्यमपि तथा, अन्यथा व्यक्तावेव शक्तिर्व्यक्तिशुक्तिज्ञाने जातेरपि प्रक रकत्वात्, समानप्रकारत्वेन शक्तिज्ञानपदार्थोपस्थितिशाब्दबुद्धीनां कार्य्यका रणभावादिति जातावपि शक्तिरुच्छिद्येत। न च यद्विषयकत्वेन शक्तिज्ञान कारणं तदवश्यं शक्यमिति नियमाज्जातौ शक्तिः सेत्स्यतीति वाच्यम्, तर्हि व्यक्तिविषयकत्वेन शक्तिज्ञानस्य हेतुतया व्यक्तिशक्तिस्वीकारस्यावश्यकत्वात्, उक्तेऽर्थे भाष्योपन्यसनं तु 'कस्यचित् प्रधानभूतं किञ्चिद् गुणभूत' मित्युपसंहा भाष्यानालोचनमूलकमेवेत्यास्तां तावत्।

नन्वेवमेकमिति पक्षस्य निरालम्बनापत्तिरत आह—**एकमित्यस्य चेति** । 'बोधकत्वं शक्ति'रिति मते बोधकत्वज्ञानविषयबोधांऽशे प्रकारितयावच्छेदकत्वं-शक्तिरित्यर्थलाभात्तदाश्रयजातेरैक्याच्छब्दनिष्ठबोधकत्वस्येव विनिगमनाविरहादर्थ-निष्ठबोध्यत्वस्याऽपि शक्तित्वमिति मतेऽप्यस्मात् पदादेतदर्थबोधो भवत्विति शक्तिज्ञाननिष्ठशाब्दधीहेतुतायां प्रकारितयावच्छेदिकाया जातेरैक्याद्वा तत्पक्षोपप-त्तिरित्यर्थः। तथाच तादृशप्रकारितावच्छेदकतारूपायाः शक्तेर्जातिमात्रनिष्ठतया-ऽऽकृतिरेव पदाऽर्थ इति पक्षः समर्थितो भवति। अवच्छेदकतायाः स्वरूपसम्बन्ध-रूपाया घटत्वाद्यात्मकत्वेऽप्यवच्छेद्याऽवच्छेदकभाव उपहिताऽनुपहितभेदात् सम-र्थनीयः। एवमेवैकं व्यक्तिरिति पक्षोऽपि समर्थनीयः। तादृशज्ञाननिष्ठशाब्दबोध-करणतायां बोधांऽशे विशेष्यतया व्यक्तेरवच्छेदकत्वात्। एतत्पक्षे चावच्छेद्या-वच्छेदकभावस्य सामञ्जस्येनोपपत्तिः, गोत्वादिजात्याऽनुगमान्न तदानन्त्यमपि। शक्यतावच्छेदकप्रकारकव्यक्तिबोधे व्यक्तिशक्तिग्रहस्यैतत्कल्पे हेतुतया चलत्वा-दिना गवादिव्यक्तिबोधार्थं तत्प्रयोगस्याऽप्युपपत्तिश्चेति बोध्यम्।

ननु घटो घटपदबोध्य इत्याकारकशक्तिज्ञानात् स्वरूपतो घटत्वप्रकारक-विशिष्टबुद्धेरिव जातित्वेन घटत्वविशिष्टबुद्ध्यापत्तिस्तत्कार्य्यतावच्छेदकाक्रान्तत्वादत आह—**तथाचेति । घटत्वप्रकारकविशिष्टबोध इति** । स्वरूपतस्तत्प्रकारक-

❀ काशिका ❀

स्यादत आह—एकमित्यस्य चेति। चस्त्वर्थः। अयं = वक्ष्यमाणः। जातिरेवेति। शक्तिज्ञान-निष्ठकारणतायां विषयतासंबन्धेन जातिरेवावच्छेदिका न तु व्यक्तिः, तद्विषयकशक्तिज्ञानत्वेन कारणत्वाभावादिति भावः। एकं नामार्थं इत्यस्यैकं = सामान्यमेव तादृशकारणतावच्छेदकमित्यर्थ एतन्मते बोध्यः। एतदेव विशदयति—तथा चेति। घटत्वांशेऽन्याप्रकारकेति। तेन

'प्रकारकघटत्वशक्तिज्ञानत्वेन हेतुते'ति कार्यकारणभाव इत्यादि प्रपञ्चितं भूषणे। तदेतदभिप्रेत्याह–द्विकमिति। जातिव्यक्ती इत्यर्थः। पूर्वपक्षाद् विरोधपरिहारः पूर्ववत्।

❁ दर्पणः ❁

बोध इत्यर्थः। **कार्य्यकारणभाव इति**। तथा च 'जातिमान् घट' इति बोधस्य घटत्वांऽशे जातित्वप्रकारकत्वेनोक्तशक्तिज्ञानकार्य्यतावच्छेदकानाक्रान्तत्वेनोक्ता-पत्तेरसम्भवाद्, घटत्वांऽशे जातित्व प्रकारकघटत्वविशिष्टबुद्धिं प्रति तु तदंशे जाति-त्वप्रकारकशक्तिज्ञानस्य हेतुत्वाऽन्तरं कल्पनीयमिति भावः। ननु तदंशेऽन्या-प्रकारकत्वघटितधर्मस्याऽर्थसमाजग्रहस्ततया कथं कार्य्यताऽवच्छेदकत्वमत आह— **प्रपञ्चितमिति**। तथाच निरवच्छिन्नप्रकारताकतद्विशिष्टबुद्धिं प्रति निरवच्छिन्न-प्रकारकताकतच्छक्तिज्ञानस्य, सावच्छिन्नप्रकारकताकतद्विशिष्टबुद्धिं प्रति साऽव-च्छिन्नतत्प्रकारकशक्तिज्ञानस्य हेतुत्वकल्पान्नोक्तापत्तिरिति तत्रोक्तमित्यर्थः। **तदभिप्रेत्येति**। उक्तरीत्या विशिष्टस्य शक्यत्वमुपगम्येत्यर्थः। **जातिव्यक्ती इति**। विशेष्यविशेषणभावापन्ने ते इत्यर्थः। **पूर्वपक्षादिति**। एकमिति

❁ काशिका ❁

स्तीत्यतो न घटत्वविशिष्टबोधापत्तिः। एवं जातिरस्तीत्यतोऽपि। एतेन घटत्वमस्तीत्यतस्तथा-बोधवारणाय विशिष्टशक्तिज्ञानत्वेन कारणतावश्यकीति दूषणं निरस्तम्। घटत्वत्वावच्छिन्ने-[illegible] घटत्वपदशक्तेर्घटत्वांशे तत्प्रकारकशक्तिधिय एव संभवात्। अयमेव कुब्जशक्ति-वाद इति गीयते मीमांसकैः। यद्विषयकत्वेन शक्तिधियो हेतुता तस्यैव शक्यत्वमिति नियमे मानाभावेन व्यक्तेरपि शक्यत्वसिद्धिः। ननु विनिगमनाविरहाद् व्यक्तिविषयक-शक्तिज्ञानत्वेनैव तथाविधबोधं प्रति हेतुतास्त्विति चेन्न, व्यक्तीनामानन्त्यादनन्तव्यक्ति-विषयकत्वनिवेशे गौरवात्। न च यत्किंचिज्जात्याश्रयव्यक्तिविषयकत्वमेव निवेश्यमि[illegible] न गौरवमिति वाच्यम्, द्रव्यादिपदशक्तिज्ञानस्यापि द्रव्यत्वाश्रयव्यक्तिविषयकत्वेनैव हेतुता-पत्तौ घटादिपदादपि द्रव्यत्वप्रकारकबोधापत्तेः। पर्यायान्तराद् द्रव्यत्वप्रकारकबोधानुपपत्त्या द्रव्यपदज्ञानत्वेन हेतुत्वोपगमासंभवादित्यादिकं बृहद्भूषणे द्रष्टव्यमित्यभिप्रेत्याह—**प्रपञ्चितं भूषण इति**। **पूर्ववत्** = विषयतासंबन्धेन तादृशकारणतावच्छेदकमित्यर्थस्वीकारेण परिहरणीयः। अन्यथा पूर्वमते एकस्यैव नामार्थत्वमेतन्मते च द्वयोस्तथात्वमिति विरोधः स्पष्ट एव। पूर्वत्र विशिष्टस्य पदार्थत्वे विरोधः परिहृतः, इह तु द्वयोस्तथात्वे स परिहृतः। ननु 'स्तनकेशवती स्त्री स्यात्' इत्यादिना विवक्षितमवयवसंस्थानविशेषरूपं स्त्रीत्वादिकं नैतच्छास्त्रीयप्रक्रिया-

१ [illegible] घटत्वविशिष्टघटबोधे घटत्वांशे घटत्वत्वाद्यप्रकारकस्य 'घटो घटपदशक्य' इति शक्ति-[illegible] हेतुतेति [illegible]।

त्रिकमिति । जातिव्यक्तिलिङ्गानीत्यर्थः । सत्त्वरजस्तमोगुणानां साम्यावस्था-नपुंसकत्वम्, आधिक्यं पुंस्त्वम्, अपचयः स्त्रीत्वम्, तत्तच्छब्दनिष्ठं, तत्तच्छब्दवाच्यं च । तमेव विरुद्धधर्ममादाय तटादिशब्दाः भिद्यन्ते[1] ।

❀ दर्पणः ❀

पक्षादित्यर्थः । तत्पक्षे हि शाब्दज्ञानकारणतायां बोधांऽशे प्रकारितयावच्छेदकत्वमिति मते केवलव्यक्तिरेव शक्येति सिद्धान्तितम् । अत्र तु विषयितात्वेन प्रकारिताविशेष्यिते अनुगमय्य तत्र विषयितयाऽवच्छेदकत्वं शक्तिरित्युपगमाद् द्वयोरपि नामाऽर्थत्वसिद्धिरिति न तयोः परस्परविरोधशङ्केति भावः । एतेषां मतानामाकरारूढत्वेऽपि 'व्यक्तिः पदार्थ' इति पक्ष एव क्षोदक्षमः, प्रत्येकपद-शक्तिनिर्णयस्त्वन्यतोऽवधार्य्यः । **लिङ्गानीति** । लिङ्गत्वं च प्राकृतगुणवतो धर्मविशेषः । तद्विशेषश्च नपुंसकत्वादीत्याशयेनाऽऽह—**सत्त्वेति । साम्यावस्थेति** । उपचयापचयराहित्येनाऽवस्थानमित्यर्थः । उपचयो = वृद्धिः, अपचयस्तन्न्यूनत्वम् ।

तत्तच्छब्दनिष्ठमिति । जातिगुणक्रियादिभेदभिन्नशब्दनिष्ठम् । **तत्तच्छब्दवाच्यं चेति** । स्वाश्रयशब्दवाच्यं चेत्यर्थः, 'पुँल्लिङ्गः शब्द' इति व्यवहारा[त्] 'तस्माच्छसो नः', स्वामोर्नपुंसका'दित्यादिसूत्रप्रामाण्याच्चेति भावः । **तमेवे[ति]** [सम]ानाऽनुपूर्वीकत्वेऽप्युपचयाद्यवस्थारूपं परस्परसमानाधिकरणं लिङ्गमादयैवेत्यर्थ[ः] **भिद्यन्ते इति** । पुँस्त्वादिलिङ्गकेतरव्यावृत्तिविधेयकाऽनुमित्युद्देश्या भवन्तीत्यर्थः ।

ननु लिङ्गस्योक्तावस्थारूपत्वे तासां परस्परविरुद्धानामेकत्राऽवस्थानाऽसम्भवेन

❀ काशिका ❀

निर्वाहकम् । दारानित्यादौ नत्वाभावप्रसङ्गात् । न चारोपेण निर्वाह इति युक्तम् । विशेषदर्शिनान्तदसंभवात् । न चाहार्यः स संभवत्येवेति वाच्यम् । तदसत्त्वेऽपि तथाविधप्रयोगाणामिष्टत्वात् । अत एव स्त्रियामिति सूत्रे भाष्यकारैरुक्तानुपपत्त्यान्यथा स्त्रीत्वादिनिर्वचनं कृतमित्याशङ्क्य भाष्योक्तरीतिमनुसरति—सत्त्वेति । ननूपचयापचयादेर्विरुद्धस्यैकत्र समावेशायोगात् तटस्तटी तटमित्यादेरनुपपत्तिः । गुणानां क्षणिकत्वपुरस्कारेण तदुपपत्तिरित्यपि न युक्तम्, एवमपि युगपत्तथाव्यवहारानुपपत्तेर्दुष्परिहरत्वात् । अविकारिण्युपचयाद्यसंभवाद्ब्रह्म आत्मेत्यादिव्यवहारानुपपत्तेश्च । आरोपादरे तु लौकिकलिङ्गानादरो निर्बीज इत्यत आह—तत्तच्छब्दनिष्ठमिति । नन्वत्रापि पक्षे एकशब्दे अनेकविरुद्धलिङ्गासंभवतादवस्थ्यमत आह—तमेव विरुद्धेति । भिद्यन्त इति । तथा च नोक्तदोषावकाशः । नन्वेवं 'तटं त्रि[...]'त्यादि-

१. तमेव = स्त्रीत्वपुंस्त्वादिरूपं, भिद्यन्ते—'परस्पर'मिति शेषः ।

केषाञ्चिदनेकलिङ्गत्वव्यवहारस्तु समानाऽनुपूर्वीकत्वेन शब्दानामभेदारोपात्। एवञ्च पदार्थपदे पुंस्त्वमेव, व्यक्तिपदे स्त्रीत्वमेव, वस्तुपदे

❁ दर्पणः ❁

केषुचिच्छब्देष्वनेकलिङ्गकत्वव्यवहारः किंनिबन्धनोऽत आह—केषाञ्चिदिति। तटादिशब्दानामित्यर्थः। वस्तुतस्तेषां विरुद्धत्वेऽपि शब्दानां समानाऽनुपूर्वीकत्वनिबन्धनाऽभेदाध्यासादनेकलिङ्गकत्वव्यवहारोपपत्तिरित्यर्थः। अर्थनिष्ठं,—'स्तनकेशवती नारी लोमशः पुरुषः स्मृत' इत्यादिस्मृतिलक्षितं लिङ्गं—तु नाऽऽश्रयितुं शक्यम्, 'दारा'नित्यादौ शस्प्रकृत्यर्थे तदभावेन नत्वाद्यनापत्तेः। तथाच भाष्यम्—'एकाऽर्थशब्दान्यत्वाद्दृष्टं लिङ्गान्यत्वमवयवान्यत्वाच्चे'ति। एकस्मिन्नर्थे पुष्यस्तारका नक्षत्रमिति लिङ्गनानात्वदर्शनात् 'कुटी' 'कुटीर' इत्यादौ रेफस्याऽवयवस्योपजनेऽपि लिङ्गमिति तदर्थः। अर्थनिष्ठत्वे तु 'पुँल्लिङ्गः शब्द' इति सामानाधिकरण्यानुपपत्तिश्चेति भावः। एवञ्चेति। पारिभाषिकशब्दनिष्ठलिङ्गस्य व्यवहारौपयिकत्वे चेत्यर्थः। व्यवहार इति। अर्थनिष्ठस्य तस्य तन्नियामकत्वे तु स्त्रीव्यक्तिर्वस्तुपदाऽर्थपदाभ्यां न व्यवह्रियेत, एवं पुरुषादिरपि व्यत्ययादिशब्दैः, स्तनकेशादिरूपलौकिकलिङ्गस्य खट्वादावभावेन तद्वाचकात् स्त्रीप्रत्ययाद्यनाप[illegible]

❁ काशिका ❁

[illegible]हारानुपपत्तिरत आह—केषांचिदिति। समानेति। अयं चाभेदारोपे हेतुः। प[illegible]तीति। [illegible]ङ्गस्य शब्दनिष्ठत्वे चेत्यर्थः। परे तु उपचयाद्यवस्थात्रयस्य सार्वत्रिकत्वादिदं लिङ्ग[illegible]वाद्वाक्येपि [illegible]दं वस्तु इयं व्यक्तिरयं पदार्थ इत्यादिव्यवहाराणामप्रतिबद्धसकलजनसिद्धप्रसरात[illegible]—तत्र हि [illegible]निष्ठम्। 'एकार्थे शब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वमवयवान्यत्वाच्च' इति भाष्याच्च[illegible]प्रधानकल्पनेन [illegible] नक्षत्रमिति नानाशब्दत्वदर्शनात् स्तनकेशाद्यतिरिक्तमेव लिङ्गमर्थनिष्ठं, कुटी[illegible]समकालमेव्ये- रेफस्यावयवस्योपजनने लिङ्गभेददर्शनाच्चेत्यर्थ' इति कैयटोपाध्यायाः। अत प[illegible]नमा[illegible] 'रूपरसगन्धस्पर्शशब्दानां स्त्यानप्रसवौ लिङ्गम्' इत्युक्तम्। यस्माद्रूपादयो न हि शब्दगताः। [illegible]

नन्वेवं 'पुंलिङ्गः शब्द' इति व्यवहारानुपपत्तिरिति चेन्न। वाच्यवाचकयोरभेदोपचारादर्थ आद्यजन्तत्वाद्वा तदुपपत्तेः। आत्मा ब्रह्मेत्यादि व्यवहारसिद्धिस्तु ब्रह्मणि सर्वस्यैवाध्यासेन परंपरया संस्त्यानादिसत्त्वेन चोपपद्यते। 'उपचयादेर्विरुद्धस्यैकत्रासमावेशात् तटस्तटीत्याद्यनुपपत्ति'रिति न वाच्यम्, कोशभाष्यादिप्रामाण्येन विरोधस्यैव विरहात्। कश्चिच्छब्द एकलिङ्गविशिष्टार्थे, कश्चिल्लिङ्गद्वयविशिष्ट इत्यादिकं कोशादितोऽवसेयम्। तत्र टिघुभादिवल्लघुसंज्ञाकरणौचित्येऽपि गुरुसंज्ञाकरणात् नत्वादिशास्त्रप्रवृत्तौ लौकिकमपि लिङ्गं निमित्तत्वेनाश्रीयते। संख्यासंज्ञावत् पुंसादिसंक्षेपाधिकपृथिकसंग्रहार्थत्वेऽपि [1]लोकप्रसिद्धार्थनिरासार्थत्वाभावाच्च। लौकिकासंभवे तु शास्त्रीये एव

[1] स्तनकेशवती स्त्री स्यादित्यादिलोकप्रसिद्धार्थेत्यर्थः।

नपुंसकत्वमेवेति—सर्वत्रैवाऽयं पदाऽर्थः, इयं व्यक्तिः, इदं वस्त्विति व्यवहारस्तटस्तटी तटमिति चोपपद्यते। तच्च लिङ्गमर्थपरिच्छेदकत्वेनाऽन्वेतीति पश्वादिशब्दोक्तं पशुस्त्रियां नास्तीति—'पशुने'त्यादिविधिर्न'

❁ दर्पणः ❁

श्चेति भावः। **तटस्तटीति**। अर्थे लौकिकलिङ्गाभावेऽपि परस्पराऽसमानाधिकरणपारिभाषिकलिङ्गवत्त्वेन विभिन्नानां तटादिशब्दानां तत्तत्कार्यभाक्त्वमुपपद्यते इत्यर्थः। ननु शब्दनिष्ठोक्तलिङ्गस्यैव स्त्रीपुंसादिव्यवहारौपयिकत्वे तस्य स्त्रीवाचकपशुशब्देऽपि सत्त्वात् 'पशुना यजेते'त्यत्र पशुस्त्रीकरणकयागादप्यदृष्टसिद्धिः स्यात्, तदुपात्तलिङ्गस्य व्यक्त्यादिशब्दोक्तलिङ्गवत् स्त्रीपुंसादिसाधारण्येनाऽर्थापरिच्छेदकत्वादत आह—**तच्चेति**। शब्दनिष्ठमेवेत्यर्थः। **अर्थेति**। अर्थमपि परिच्छिन्नत्तीत्यर्थः। तदेवाह—**पश्वादिशब्दोक्तमिति**। 'लिङ्ग'मिति शेषः। 'यदि स्त्रीपशुर्यागाङ्गत्वेन विवक्षितोऽभविष्यत्तदा, अस्त्रीविहितनाभावं विभक्त्यन्ते न प्रायोक्ष्यत्, तदन्तपशुशब्दप्रयोगात्तु पुम्पशुरेव यागाङ्गमिति निर्णीयत इत्यर्थः। स्त्रीलिङ्गाऽर्थकपशुशब्दादा'ङो नाऽस्त्रिया'मिति विहितनाभावस्य तृतीयैकवचने असम्भवेन तदन्तपशुशब्दप्रयोगात् तदर्थस्य पुंस्त्वाऽवगतेरिति भावः। ननु व्यक्त्यादिशब्दानामर्थनिष्ठलिङ्गानादरेण प्रवृत्तिवत्पशुशब्दस्य तथा 'तस्माच्च

❁ काशिका ❁

[illegible]समानाऽनुप॰। तत्संभवे तु शास्त्रीयविशिष्टलौकिक एव, न तु केवलशास्त्रीये। नत्वादिकार्[illegible] भिद्यन्ते स्वार्थगतस्य बोधात्।

ननु [illegible] 'आविर्भावस्तिरोभावः स्थितिश्चेत्यप्यपायिनः।
धर्मा मूर्तिषु सर्वासु लिङ्गत्वेन व्यवस्थिताः॥'

[illegible] हरिकारिकातोऽपि तस्यार्थनिष्ठत्वमेवावसीयते। अत्रापिना सति संभवे लौकिकलिङ्गस्यापि नत्वादिप्रवृत्तौ निमित्तत्वमिति सूचितम्' इत्यादि मञ्जूषायां प्रत्यपीपदन्। ननु तस्य शब्दनिष्ठत्वे शब्दवाच्यत्वेऽप्यर्थे तदन्वयासंभवेन पशुना यजेतेति विहितयागस्य च्छाग्यापि करणापत्तिरित्यत आह—**तच्च लिङ्गमिति**। **अर्थपरिच्छेदकत्वेनेति**। तद्विशेषणत्वेनेत्यर्थः। लिङ्गविशेषविशिष्टस्यैवार्थविशेषवाचकताया लिङ्गानुशासनशास्त्रसिद्धतया च स्वाश्रयवाच्यत्वसंबन्धेनार्थविशेषणत्वोपपत्तिः। एवं च पुंस्त्वविशिष्टपशोरेव विधानाच्छाग्या न तत्करणापत्तिः, पुंलिङ्गस्य पशुशब्दस्य पुंव्यक्तेरेव वाचकत्वमन्यथा परंपरया तस्यार्थविशेषणत्वाभ्युपगमवैयर्थ्यापत्तेरिति भावः। **पश्वादिशब्दोक्तमिति**। अस्य 'पुंस्त्वं पशुशब्दार्थपरिच्छेदकत्वेनान्वेती'ति शेषः। **पशुस्त्रियां नास्तीति**। पशु यदि स्त्रियां नास्ति—पशुना यजेतेति वाक्यान्तर्गतः पशुशब्दः[illegible]त्वेन

१. 'पशुना यजेते'ति विधिः।

छाग्यादीनङ्गत्वेन प्रयोजयतीति विभावनीयम्। नच व्यक्त्यादिशब्दोक्त-लिङ्गस्येव पश्वादिशब्दोक्तस्यापि साधारण्यं शङ्क्यम्, व्यक्तिशब्दस्य नित्यस्त्रीलिङ्गत्वेन तथा सम्भवेऽपि पशुशब्दस्य नित्यपुँल्लिङ्गत्वे प्रमाणाभावात्, "पश्वा न तायुं गुहा चरन्तं', 'पश्वे नृभ्यो यथा गवे' इत्यादि-वेददर्शनाच्च। मीमांसायां चतुर्थे,—'पशुना यजेते'त्यत्रैकत्वपुंस्त्वयोर्विव-

❀ दर्पणः ❀

प्रवृत्तौ बाधकाभावादुक्तदोषो दुरपह्नव इत्याशङ्का निराचष्टे—नचेति। 'व्यक्त्यादी-त्यादिना वस्त्वादिपदसङ्ग्रहः। साधारण्यं स्वाश्रयवाच्यत्वसम्बन्धेन स्त्रीपुंसवृत्तित्वं। **नित्यस्त्रीलिङ्गत्वेनेति**। 'स्त्रियां क्तिन्नित्यनुशासनादिति भावः। ननु 'पशुना यजेते'ति वैदिकप्रयोग एव तस्य नित्यपुंस्त्वे मानं स्यादत आह—**पश्वेति**। तथा च वेदे पशुशब्दस्य स्त्रीलिङ्गत्वस्याऽपि दर्शनेन न तस्य व्यक्त्या-दिशब्दसाम्यमिति भावः। स्वोक्तेऽर्थे मीमांसकसम्मतिमाह—**मीमांसाया-**

❀ काशिका ❀

पुंलिङ्गत्वबोधनात् स्त्रियां नास्तीति हेतोः पशुना यजेतेत्यादिविधिश्छाग्यादीनङ्गत्वेन न प्रयोजय[illegible] = न ग्राहयतीत्यर्थः। ननु पुंलिङ्गः पशुशब्दः पुंव्यक्तेरेव वाचक इति यदि नियमः स्[illegible]तीति। [illegible]संभवेत्, स एव तु नेत्याशयेन शङ्कते—न चेति। व्यक्त्यादिशब्दोक्तेति। [illegible]त्वाद्वाक्येपि [illegible]क्तलिङ्गस्य यथा साधारण्यं = स्वाश्रयवाच्यतासंबन्धेन पुमादिसंबद्धत्वमत एव त[illegible]भयपुं:—तत्र हि [illegible] पश्वादिशब्दोक्तलिङ्गस्याप्युक्तपरंपरासंबन्धेन स्त्रीव्यक्तिसंबद्धत्वात्तदपि न व्[illegible]न्त्रधानकल्पनेन तन्मात्रनिष्ठस्यैव तद्व्यावर्तकत्वान्न तु व्यभिचारिण इति समुदितार्थः। पश्वा[illegible]समकालमेव्य-अत्र लिङ्गस्येत्यनुपज्यते। व्यक्तिशब्दस्य क्तिन्नन्तत्वेन नित्यस्त्रीलिङ्गत्वात [illegible] वैलक्ष[illegible] पशुशब्दस्य नित्यपुंलिङ्गत्वे मानाभावान्न साधारण्यमिति परिहरति—व्यक्तिशब्द[illegible] **दर्शनादिति**। पश्वेत्यादिदर्शनात् स्त्रीलिङ्गेऽपि पशुशब्द इति भावः। पुंलिङ्गे नादेशप्रवृत्योक्त[illegible]। रूपासिद्धिः स्पष्टैव। तथा 'घेर्ङिति' इति गुणप्रवृत्त्या पश्व इति रूपासिद्धिश्च। ननु स्त्रीलिङ्गेऽ[illegible]विस्तर-गुणप्रवृत्त्योक्तरूपासिद्धिस्तदवस्थैव। न च 'ङिति ह्रस्वश्च' इति नदीसंज्ञाप्रवृत्त्या न घिसंज्ञेति[illegible] वाच्यम्, तथा सत्याट्प्रवृत्त्योक्तदोषतादवस्थ्यादिति चेन्न, छान्दसत्वादाडप्रवृत्तेः सूपपदत्व[illegible]मित्याशयात्। 'जसादिषु च्छन्दसि वावचनम्' इति वचनेन पुंलिङ्गेऽप्युक्तप्रयोगसिद्धिरिति तु न शङ्क्यम्, स्त्रीलिङ्गे तदाश्रयणं विनाप्युक्तरीत्या निर्वाहः। आगमशास्त्रस्य 'सागरं तर्त्तुका-मस्ये'त्यादावनित्यत्वं दृष्टमिति तत्राडप्रवृत्त्यर्थं छान्दसत्वमनाश्रयणीयमित्याशयात्। लिङ्गान्तर-साधक[illegible]न्तरमप्याह—**मीमांसायामिति**। चतुर्थे = चतुर्थाध्याये। तत्प्रथमचरणे एतदव-

[illegible]यु मित्यपि [illegible]

क्षितत्वान्नाऽनेकपशुभिः, पशुस्त्रिया वा याग इति प्रतिपादितत्वाच्च ।

वस्तुतस्तु-विशेषविध्यभावे उप्रत्ययान्तानां पुंस्त्वस्य व्याकरणेन निर्णीतत्वाद्, वेदभाष्येऽपि 'जसादिषु छन्दसि वावचन'मिति नाभावाऽभाव इत्युक्तेः पशुशब्दस्य नित्यपुंस्त्वनिर्णयात्, प्रकृते 'छागो वा मन्त्रवर्णा'दिति 'न्यायेनैव निर्णयः। मन्त्रवर्णे हि 'छागस्य वपाया मेदस' इति श्रूयते,

❀ दर्पणः ❀

मिति। वक्ष्यमाणाऽस्वरसादाह—**वस्तुतस्त्विति।** ननु उप्रत्ययान्तानां नित्यपुंस्त्वे पश्वेत्यादिस्त्रीलिङ्गप्रयोगाऽनुपपत्तिरत आह—**वेदभाष्येऽपीति।** तथाच व्यक्त्यादिशब्दोक्तलिङ्गस्येव पशुशब्दोक्तलिङ्गस्यापि स्त्रीपुंससाधारण्यात्त्र तत्स्वार्थपरिच्छेदकत्वमिति भावः। ननु कथं तर्हि पुम्पशोरेव यागाङ्गत्वनिर्णयोऽत आह—**छागो वेति।** 'न्यायेनैवे'त्येवकारेण लिङ्गस्याऽर्थपरिच्छेदकस्य व्युदासः। यथा,–'सारस्वतौ मेषा'वित्यत्र तद्धितप्रकृतिशब्दः स्त्रीलिङ्गः पुंल्लिङ्गो वेति सन्देहे—'सन्दिग्धे वाक्यशेषा'दिति न्यायेन, 'एतद्वै दैव्यं मिथुन'मित्यर्थवादाद् द्वयोरेवैक-

❀ काशिका ❀

वा[illegible]ः [illegible]व्यम्। 'ननु नियतपुंलिङ्गत्वे प्रमाणाभावा'दित्यसंगतम्, 'उप्रत्ययान्ताः पुंसी'ति व्याकरणस्यै[illegible] 'तस्माच्च[illegible]दित्याशङ्क्य पशुशब्दस्य नियतपुंलिङ्गत्वे प्रमाणसद्भावेऽपि प्रकारान्तरेण च्छा[illegible] नीसमानाऽनु[illegible] [illegible]रयति—वस्तुतस्त्विति। नाभावाभाव इत्युक्तेरिति। तथा च पश्वेत्या[illegible] भिद्यन्ते [illegible]र्थैरपि न—पशुशब्दस्य नियतपुंलिङ्गत्वेऽपीति भावः। नित्यपुंस्त्वनिर्णयादि[illegible] ननु [illegible]निर्णयादित्यर्थः। तथा च पुंस्त्वस्य साधारण्याद्व्यावर्तकत्वानुपपत्तिरिति भावः। [illegible]क्तिर्व्यावर्तिकाया उक्तयुक्तेरसंभवेऽपि तद्व्यावर्तकयुक्त्यन्तरं दर्शयति—'छागो [illegible] [illegible]तं हशितं—षष्ठाध्यायचरमाधिकरणसिद्धान्तसूत्रम्। तत्र हि 'अग्नीषोमीयं पशुमालभेते'त्यत्र [illegible]स्यापि [illegible]शब्देन नाश्वादिर्ग्राह्यः किं त्वज एव 'छागस्य वपायाः' इति मन्त्रवर्णादिति निर्णीतम्, शब्दा[illegible]द्वत् पुंस्त्वस्यापि तत एव निर्णय इत्यर्थः। यथा 'संदिग्धे तु वाक्यशेषात्' इत्यधिकरणे विधौ [illegible]करणसंदेहे वाक्यशेषान्निर्णयः संख्यादिवत्, यथा 'सारस्वतौ मेषौ भवत' इत्यत्र तद्धितप्रकृतिः शब्दः लिङ्ग[illegible]पुंलिङ्गः स्त्रीलिङ्गो वेति संदेहे 'एतद्वै दैव्यं मिथुनम्' इत्यर्थवादादेकशेषेणोभयोर्ग्रहणमिति नार्थविनिर्णीतम्। नन्वस्तूक्तस्थले तावदेवं तथापि सर्वनामनिष्ठलिङ्गस्य चेतनाचेतनस्त्रीपुंससाधारण-[illegible] पशु[illegible]त्वात् 'प्रास्मा अग्निं भरते'त्यध्रिगु? प्रैषस्य स्त्रियामपि प्रवृत्त्यापत्तिः। न चेष्टापत्तिः। मीमांसक-सिद्धान्तविरोधात्। लौकिकलिङ्गस्य वाच्यत्वपक्षे तु न दोषः, मुख्यसंभवे गौणपरिग्रहस्यान्याय्यत्वेनारोपस्याप्यसंभवादिति चेन्न। पूर्वोपस्थिततद्रूपेणोपस्थापकादस्मै एनमित्यादि पदाच्छा-

१. एवकारेण लिङ्गव्यवच्छेदः।

तत्र 'छागस्ये'ति छाग्यामसम्भावितमिति भवति ततः पुंस्त्वनिर्णय— इति विस्तरेण प्रपञ्चितं भूषणे ।

चतुष्कं = संख्यासहितं त्रिकमित्यर्थः । पञ्चकं = कारकसहितं चतुष्कमित्यर्थः ।

❀ दर्पणः ❀

शेषेण ग्रहणं तद्वन्मन्त्रवर्णादत्र पुम्पशोर्यागाङ्गत्वनिर्णय इति भावः । **तत्रेति ।** मन्त्रवर्णे इत्यर्थः । **असम्भावितमिति ।** छागशब्दस्य व्यक्त्यादिवन्नित्यलिङ्गत्वाभावादिति भावः । **प्रपञ्चितमिति ।** लौकिकलिङ्गमेव नामार्थः, तच्चावयवविशेषसंस्थानरूपम्, 'दारा'नित्यादौ पुंस्त्वारोपणैव तत्प्रयुक्तकार्यम्, 'रात्राह्नाहाः पुंसी'त्यादिलिङ्गानुशासनस्यैवोक्ताऽर्थे मानत्वात्, अत एव न पशुस्त्रिया यागसिद्धिः । अथवा स्त्रीत्वादिर्जातिरेव—

तिस्रो जातय एवैताः केषाञ्चित् समवस्थिताः ।
अविरुद्धा विरुद्धाभिर्गोमहिष्यादिजातिभिः । इत्यादि तत्रोक्तमिति ।
परे तु—'स्तनकेशवती नारी लोमशः पुरुषः स्मृतः ।
एतयोरन्तरं यच्च तदभावे नपुंसक'मिति,—

—स्मृत्युक्तलक्षणलक्षितलिङ्गस्याऽसार्वत्रिकत्वेन 'दारा'नित्यादौ नन्व...ष्टा... —'स्त्रिया'मिति सूत्रेऽ'वश्यं कश्चित् स्वकृतान्त आस्थेय' ...तीति । ...त्रिकगुणाऽवस्थारूपपारिभाषिकलिङ्गस्य शास्त्रीयकार्योपयोगिनो ...त्वाद्वाक्येपि ...मपि गुरुसंज्ञाविज्ञानान्नत्वादिशास्त्रप्रवृत्तौ लौकिकलिङ्गस्याप्याश्रयणे—तत्र हि संज्ञानां सङ्ख्यासंज्ञाया इवाधिकसंग्रहार्थं प्रवृत्तत्वेऽपि ...प्रधानकल्पनेन साऽर्थमप्रवृत्तेः, अत एव,— ...समकालमेव्ये-

आविर्भावस्तिरोभावः स्थितिश्चेत्यप्यपायिनः ।
धर्मा मूर्तिषु सर्वासु लिङ्गत्वेन व्यवस्थितः' ॥

❀ काशिका ❀

गत्वादिविशिष्टानामिव पुंस्त्वादिविशिष्टानामेव पशूनामुपस्थित्या मेष्यामप्रवृत्तेः संभवादित्यादिः—विस्तर... बृहद्भूषणेऽनुसंधेय इत्याशयेनाह—विस्तरेण प्रपञ्चितं भूषणे इति । लिङ्गस्यार्थनिष्ठत्वपक्षेऽपि 'छागो वा मन्त्र—' इत्यादिन्यायेन पुंव्यक्तेरेव ग्रहणमिति बोध्यम् । वैशेषिकास्तु पुंस्त्वाद... ...तयस्तथा च हरिभिरुक्तम्—

'तिस्रो जातय एवैताः केषांचित् समवस्थिताः ।
अविरुद्धा विरुद्धाभिर्गोमहिष्यादिजातिभिः ॥' इति

...भावः । उपपत्तौ = ...द्रव्य-लिङ्गत्रिकम् ।

नन्वन्वयव्यतिरेकाभ्यां प्रत्ययस्यैव[1] तद् वाच्यं, तत एव लिङ्गादीना-मुपस्थितौ प्रकृतिवाच्यत्वे मानाभावाच्चेति चेत्, सत्यम्,—

❀ दर्पणः ❀

—इत्यत्रापि नाऽलौकिकलिङ्गमपि समुचितवान् हरिः। तत्र सति सम्भवे सामानाधिकरण्यसम्बन्धेन लौकिकपुंस्त्वविशिष्टशास्त्रीयलिङ्ग एव पुमादिशब्दानां शक्तिर्न केवलशास्त्रीये, नाऽपि लौकिके। असम्भवे तु शास्त्रीय एव, अत एव—'पशुना यजेते'त्यादौ पशुस्त्रिया कृते यागे वैगुण्यम्, तत्र लौकिकपुंस्त्वविशिष्ट-शास्त्रीयपुंस्त्वस्यैव शब्देन प्रतिपादनादित्याहुः।

अथ लिङ्गे शक्तिग्रहविषयताया अभावेन प्रातिपदकाऽर्थत्वाभावात्, 'त्रिक'-मिति पक्षोऽनुपपन्न इति चेन्न, 'स्वमोर्नपुंसका'दित्यादिसूत्रप्रामाण्येन पुँल्लिङ्गादि-विशिष्टोऽयं घटो घटपदवाच्य इत्याकारकशक्तिग्रहाऽभ्युपगमेन सामञ्जस्यात्, शब्दनिष्ठमेव लिङ्गं नत्वादिप्रवृत्तौ निमित्तमिति मते शब्दार्थयोरभेदे लिङ्गस्य साक्षात् इत्यर्थात् स्वाश्रयवाच्यत्वसम्बन्धेनाऽर्थांशे प्रकारत्वाद्धर्मितावच्छेदकत्वेन धर्मितावच्छेदकसमानाधिकरणत्वेन वा शक्तिग्रहविषयताया नियामकत्वस्य वार्ः [illegible] बलेन कल्पनात्। वस्तुतस्तु पारिभाषिकलिङ्गमप्यर्थं एव स्वीकर्तुमुचितम्, 'तस्माद्' [illegible] शब्द इत्यादौ पुँल्लिङ्गादिशब्दा अर्शआद्यजन्ताः, आत्मनि सर्वस्याध्य[illegible] [illegible] तत्रापि स्त्यानादिसत्त्वादात्मा ब्रह्मेत्यादिप्रयोगोपपत्तिः, स्त्य[illegible] भिद्यन्ते [illegible] य इति यावत्। उपचयादिविवक्षाया एव प्रयोगनियाम[illegible] ननु [illegible] धेऽपि क्षत्यभावात्, अत एव 'सामान्ये नपुंसक'मिति [illegible] ते, उत्कर्षापकर्षसत्त्वेऽपि तदविवक्षायामिति तदर्थ इत्याद्यन्य-

[illegible] इति—पष्ठ

[illegible] देत्रयस्य नामार्थत्वं साधयितुं शङ्कते—**नन्विति**। **अन्वयव्यतिरेका-**[illegible] **मिति**। टावादिसमभिव्याहारे अश्वादिपदात् स्त्रीत्वबोधादभावे च तद्बोधा-[illegible] रूपाभ्यामित्यर्थः। एवमन्यत्राप्यूह्यम्, तथाच ताभ्यां लिंगादेः प्रत्ययार्थत्वा-[illegible] धारणान्न लिंगादित्रिकस्य प्रकृत्यर्थत्वमित्यर्थः, 'दधि पश्यती'त्यादावित्या-[illegible]

❀ काशिका ❀

—परस्परविरुद्धाभिर्गोत्वमहिषत्वादिजातिभिः सह परस्परमविरुद्धा एताः समवस्थिता [illegible] इत्यर्थः। केषांचिद् = वैशेषिकाणामिति हेलाराजः। गोत्वादिजातीनां परस्परमविरोधे महिष[illegible] दावपि गवादिव्यवहारापत्तिर्गवादावपि [illegible] हिषादिव्यवहारापत्तिस्तासां परस्परविरोधस्वीका[illegible] पुंस्त्वादिरियं व्यक्तिरयं पदार्थ इत्य[illegible] [illegible] त्वादविरोध इति तात्पर्[illegible]

१ तत् = लिङ्गादित्रिकम्।

प्रत्ययवर्जिते—'दधि पश्यती'त्यादौ प्रत्ययमजानतोऽपि बोधात् प्रकृतेरेव वाचकत्वं कल्प्यते, लिङ्गानुशासनस्य प्रकृतेरेव दर्शनाच्चेति। अत एवैषु पक्षेषु न निर्बन्धः, प्रत्ययस्यैव वाचकताया युक्तत्वात्।

❀ दर्पणः ❀

दिनाऽ'यं यातीयमायातो'त्यादिपरिग्रहः। **बोधादिति**। कर्मत्वादिबोधादित्यर्थः। तथाच व्यतिरेकव्यभिचारेणान्यलभ्यत्वाच्च तदर्थत्वाभावान्नामार्थत्वमेव तेषामावश्यकमिति भावः। वक्ष्यमाणयुक्त्या सङ्ख्याकारकयोः प्रत्ययार्थत्वेपि लिंगस्य प्रकृत्यर्थत्वमेव युक्तमित्याशयेनाह—**लिङ्गेति**। **अत एवेति**। प्रकृतिप्रत्यययोरन्यतरस्य वाचकत्वे युक्तिसाम्यादेवेत्यर्थः। **निर्बन्ध इति**। इदमेव मतं मुख्यमित्यभिनिवेश इत्यर्थः, तदेवाह—**प्रत्ययस्यैवेति**। **युक्तत्वादिति**। अनन्तानां प्रकृतीनां शक्तत्वकल्पनापेक्षया कतिपयस्वादीनामेव तत्कल्पने लाघवादिति भावः।

❀ काशिका ❀

च्यमिति। तत् = लिङ्गादित्रयम्। तत एव = प्रत्ययादेव। **प्रकृतेरेव वाचकत्वमि** त। न [illegible] प्रकृतेर्लक्षणेति वाच्यम्, अनुपपत्तिप्रतिसंधानं विनापि बोधात्। अनन्तप्रकृतिषु [illegible] [illegible] फलमुखत्वान्न दोषकृत्। प्रकृतौ गृहीतशक्तिकस्य प्रकृतिमात्रादपि [illegible] [illegible]ङ्गानुशासनस्य प्रकृतिविषयस्यैव दर्शनाच्च। अत एव 'द्व्येकयो[illegible]स्यतीति। वित्यादि[illegible] इति न्यायेन संख्याद्यर्थकत्वे सिद्धे नियामकत्वं भाष्यकृदभिमत[illegible] [illegible]त्वाद्वाक्येपि योग[illegible] अतिप्रसङ्गस्तु तात्पर्यादेर्नियामकस्याश्रवणात् परिहरणीय इत्[illegible] [illegible]हुः—तत्र हि विभक्त्यर्थः, इतरच्चतुष्टयं प्रातिपदिकार्थ इत्याहुः। तदुक्तम्— [illegible]मवधानकल्पनेन

'वाचिका द्योतिका वा स्युर्द्वित्वादीनां विभक्तयः॥' [illegible]तिसमकालमेव्ये-

अत्रेदं बोध्यम्—घटादिशब्दे लिङ्गादिनिरूपिता पृथक् पृथक् [illegible] वैलक्षण्[illegible] एकपद[illegible]पस्थितानामप्यर्थानामाकाङ्क्षावैचित्र्यात् परस्परमन्वयः। तत्र लिङ्गसंख्[illegible] [illegible] बोधः, वि[illegible]त्वं, कारकस्य विशेष्यत्वम्। यद्वा—तस्यापि विशेषणत्वमेव, द्योतकत्वात्, [illegible]त्वात्। [illegible]स्वा[illegible]दिविशिष्टार्थकत्वे त्वेकत्वविशिष्टे द्वित्वादिविशिष्टे च शक्तिकल्पने गौरवं, [illegible]नगौर- [illegible] [illegible]छब्दबोधानुपपत्तिश्च, विशकलितपदार्थत्वपक्षे तात्पर्यग्राहकाभावात् तादृ[illegible] [illegible]या इति। [illegible]यलक्षणया [illegible] [illegible]धातुवदविशिष्टे एव शक्तिः, केवलघटत्वादिविशिष्टेऽपि पृथक्शक्तिर् [illegible]ति। रथव [illegible] [illegible]र्वाह इत्याहुः। ननु पञ्चानामपि प्रातिपदिकार्थत्वे प्रातिपदिक[illegible]मित्यर्थः। [illegible] [illegible]दिजन्योपस्थितिर्हेतुरित्या[illegible] [illegible]व विभक्तियोत्यार्थमाद्यपि सूत्रम- [illegible] [illegible] तु तद्भिलये[illegible] [illegible]णादिविषयेतयै[illegible] [illegible] इति सूचयितुं। [illegible] [illegible]। भावः। उपपत्तौ = [illegible]। न्यूनतां परिहर्तुमाह[illegible]

वाचक[illegible] युक्त[illegible]

※ दर्पणः ※

केचित्तु टाबादिकं विनापि वागादिशब्देभ्यः स्त्रीत्वस्याऽव्युत्पत्तिपक्षे राम-ज्ञानादिशब्देभ्यः पुन्नपुंसकत्वयोर्बोधस्य सार्वजनीनाऽनुभवसिद्धत्वाल्लिङ्गत्वं प्रातिपादिकार्थत्वमेव, लुप्तविभक्तिस्मरणादपि बोधाऽङ्गीकारेण सङ्ख्याकारकयोर्विभक्तिवाच्यतैव । उक्तञ्च—

स्वार्थो द्रव्यं च लिंगं च सङ्ख्या कर्मादिरेव च ।
अमी पञ्चैव नामार्थास्त्रयः केषाञ्चिदग्रिमाः ॥' इति ।

अग्रिमा—लिंगान्ता इत्याहुः ।

नन्वेकवचनत्वादेरनुगतस्य दुर्वचतया कथं तेन रूपेण स्वादीनामेकत्वादिवाचकत्वम्, तथाहि—न तावदेकत्वादिवाचकत्वं तत्, वाचकतायाः शक्तारूपत्वेनात्माश्रयात्, बोधकतारूपत्वे तु—द्विवचनादीनामपि शक्तिभ्रमेणैकत्वादिबोधकतयातिप्रसङ्गात्, 'बोधकत्वं शक्ति'रिति मते आत्माश्रयस्य दुर्वारत्वाच्च, नाप्येकवचनत्वादिकं जातिः, सुत्वादिना साङ्कर्यात्, न च पाणिनिसङ्केतसम्बन्धेनैकवचनादिपदवत्त्वं तत्, तादृशसङ्केतस्य संकेतत्वेन सम्बन्धत्वे कस्य चिदेकवचनादि- ...त्वत् औ-जसादिर्बोद्धव्य इत्याकारकसङ्केतस्यापि सम्भवेनाऽतिप्रसङ्गतादवस्थ्यात्, तस्मा... दित्याश... सङ्केतत्वेन तत्त्वे तु व्याकरणान्तरप्रणेतृपुरुषान्तरस्यापि पाणिनिसङ्केततु... समानाऽनु... रयत्वेन एकवचनादिपदवत्त्वस्य 'डित्थादिपदात् स्वौजसादिर्बोद्धव्य... भिद्यन्ते ...र्थैरपि न—...यीयसङ्केतसम्बन्धेन डित्थादिपदवत्त्वस्य वा विनिगमना... ननु ...र्णयादित्य...धेऽपि ...रिति चेन्न, सुत्वाऽम्त्वादिनैवैकवचनस्य शक्तत्वे ... ...क्तिर्न्याल्ते, उत्क... कार्य्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशाच्च ... ...कस्...तं ...ति—पष्ट... ...व्यभिचारः । न च 'दधि' 'मधि'त्यादौ व्यभिचारः, तत्र स्या...शब्देन ...आदेत्रयस्य ...नेनैव बोधाभ्युपगमात्, कथमन्यथा द्योतकतावादिमतेपि ...वत् पुंस्त्व...मिति । टाद्य...त्तदुपपत्तिर्द्योतकस्यैवाभावात्, नचाऽनेकसुत्वादीनां शक्तत्वा... ...हे वा...रूपाभ्यामि...गौरवात् प्रातिपदिकत्वस्यैकस्य तत्त्वमुचितं लाघवादिति शङ्क्यम्, लि... ...ारणान्न प्रातिपदिकत्वस्याप्यनुगतस्य दुर्वचत्वात्, तदज्ञानेऽप्येकत्वादिबोधत्या... नार्थ...तम्- ...त्वात्, पदत्वेन वर्णत्वेन वा शक्तत्वे तु—विभक्तेरपि वाचकत... ...त्वात 'प्रार —परस्प...तेः प्राग्वर्णत्वाद्युपस्थितेरप्यनावश्यकत्वात्, तदनुरोधेन समवस्थित ...र्थः । केषांचिद् ...र्थयोर्विशेष्यविशेषणभावेनाऽन्वये विभिन्नपदजन्योपस्थि...धे महि... दावपि गवादिव्यक्...घटैकत्वाद्योस्तदभावेन परस्परमनन्वयापत्तिश्चेति स्वादीन... पुंस्त्वादिरियं व्यक्तिर...भावः । ...न्कत्वादि...

१ तत् = लिङ्गादित्रिकम् ।

...घटैकत्वाद्यो विश...
...दौ ...क् शक्त...

'द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तय' इति वाक्यपदीये-

॥ दर्पणः ॥

गमेनाऽन्वयस्यैवाऽभावात्, अनन्तप्रकृतीनामेकत्वादिशक्तताकल्पनगौरवस्याप्यभावाच, घटपदस्यैकत्वे शक्तिभ्रमदशायां 'घटः प्रमेय' इत्यादिवाक्यादेकत्वं प्रमेयमिति बोधस्य सर्वसिद्धतया तदनुरोधेनैकत्वादिविषयकशाब्दबोधे घटादिपदजन्यैकत्वाद्युपस्थितेर्हेतुताया आवश्यकत्वाच । किञ्च–विभक्तेः संख्यावाचकत्वमते समानविषयकानुमितिसामग्रीप्रतिबन्धकतायां प्रातिपदिकजन्यघटाद्युपस्थितिः, स्वादिजन्यैकत्वाद्युपस्थितिश्च निवेश्या, तथाच तयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण प्रतिबध्यप्रतिबन्धकभावबाहुल्यम्, मन्मते तदुभयस्थलीयैकैकविशिष्ट-[illegible]पस्थितिस्तत्र निवेश्येति लाघवम्, विशिष्टविषयकोपस्थितेरप्येकत्वादि-[illegible]निरूपितघटादिविशेष्यताशालित्वेन, घटादिविशेष्यतानिरूपितैकत्वादि-[illegible]शालित्वेन वा निवेश इत्यत्र विनिगमकाऽभावात् साम्यमिति तु न,—[illegible] यत्र योग्यताज्ञानघटोपस्थित्येकत्वोपस्थितीनां तिसृणां विशेष्यविशेषणभावे [illegible]प्रत्येकपदद्वयविरहेण प्रतिबध्यप्रतिबन्धकभावषट्कं, तत्र मन्मते योग्यताज्ञा[illegible] [illegible]स्य, [illegible]रोगाप्यनुष्ठाश्रयकोपस्थितेः प्रत्येकं विशिष्टोभयरूपेण वैशिष्ट्यं निवेश्य द्वयं [illegible] दृष्टा-[illegible]वच्छिन्नायामुपस्थितौ योग्यताज्ञानस्य वैशिष्ट्यं निवेश्य च [illegible]स्यतीति । [illegible]ति—लाघवात् । अतिप्रसङ्गपरिहारस्तु–तत्तत्संख्याबोधे [illegible]त्वाद्वाक्येपि [illegible] [illegible]स्य हेतुत्वकल्पनात् । [illegible] [illegible] हि [illegible]एवं 'कारकं विभक्त्यर्थ' इति कल्पे तत्तत्कारकबोधे [illegible]मवधान[illegible]ल्पनेन [illegible]हारस्य हेतुत्वकल्पनात् स बोध्यः, स चाऽम् घट[illegible]स्थितिसमकालमेव्ये- नियमत[illegible]तावादिनामप्यावश्यकः, एवं रीत्योपसर्गाणामपि द्य[illegible]रिति वैलक्षण्[illegible] [illegible]ऽपि हरिसम्मतिमाह—द्योतिका वाचिका वेति । '[illegible] न बोधः, तत्रा[illegible]समुदायोऽभिधायकः' इति तस्योत्तरार्द्धम् । 'घट' इत्याद्य[illegible]म्यत्वात् । [illegible] स्वादिविभक्त्यन्तसमुदायो वैकत्वादिविशिष्टघटादिवाचक इति तदर्थः [illegible]ल्पनगौर- [illegible] [illegible] चेदम्, नामार्थधात्वर्थयोः साक्षादभेदातिरिक्तसम्बन्[illegible]या इति । [illegible]यलक्षणयाऽभिधानानभिधानव्यवस्थानुपपत्तेश्च—कारकं विभक्त्यर्थ[illegible] [illegible]ति । [illegible]रर्थयोर्भेदेन परस्पराऽन्वयापादनं—तण्डुलकर्मकपाकविशे[illegible]ष्यमित्यर्थः । [illegible] [illegible] समभिव्याहृतपचतीत्याद्यानुपूर्वीविशेषज्ञानस्य [illegible] यद्यपि सूत्रम- [illegible]—तथा चेति । ब्राह्मणादिविषयतयै[illegible]—'संख्या विभ[illegible] [illegible]न इति सूचयितुं । [illegible]वादिति भावः । उपपत्तौ = [illegible] । न्यूनतां परिहर्तुमाह[illegible]

ऽपि पक्षद्वयस्य व्युत्पादनात्। 'शास्त्रे' इति—बहुषु स्थलेषु व्युत्पादनं व्यञ्ज-यितुम्, प्राधान्येन तु 'सरूप'सूत्रादौ व्यक्तम् ॥ २५ ॥

❀ दर्पणः ❀

वाक्यार्थसम्पत्तिः। प्रथमकल्पे द्वितीयादीनां तिङादीनां च कर्मादिवाचकतया-न्यतरेणाभिधानेऽन्यतरस्य गतार्थत्वादनभिहितसूत्रमफलम्, द्वितीये तु—कृता कर्मणोऽभिधानेऽपि तद्गतसंख्याया अनभिधानात् प्राप्तां द्वितीयां वारयितुं तद-वसरः। सति तस्मिन्ननभिहितकर्मगतत्वाभावान्न द्वितीयादिप्रसङ्गः, संख्यापि यदि प्रातिपदिकार्थस्तदोक्तवाक्यार्थासम्भवात् सूत्रवैयर्थ्यमेव। नन्वनभिहितसूत्राऽभावे—'भीष्मं कटं करोती'त्यादौ भीष्मादिपदाद् द्वितीयाद्यनुपपत्तिः, विशिष्टस्यैव कटादेः क्रिययेप्सिततमत्वात् प्रातिपदिकार्थमात्रे प्रथमाप्रसङ्गात्, तत्सूत्रपक्षे त्वभि... कृदादिभिः परिगणनात्—कटप्रकृतिद्वितीययाऽभिहितेऽपि तस्मिन् भीष्मादिपद... द्वितीयादिविभक्तेः सूपपादत्वादिति चेन्न, विशिष्टस्य विधित्सायां धर्मान्वयेनैक-तोपाभावाद्धर्माणामपीप्सिततमत्वात् कर्मत्वम्, तस्य चान्यवाचकपदोत्तरवचनादि-...भिधानात्। 'कृतः कट' इत्यादौ तु प्रत्ययस्य धातूत्तरवर्त्तित्वेन ...स्थ्यात्, ...दित्याशङ्क्य ...विशेषनिष्ठकर्मत्वस्यानभिधानादविशेषाद्धर्मधर्मिनिष्ठतदभिधानमित्युक्तम् ... ...मानाऽनुप... वारयति ...वाचकपदेभ्यः प्रथमोपपत्तिरिति न क्वापि तदनारम्भेनुपपत्तिः ... ...द्यन्ते ...ऽपि न— ... ,—'कटोऽपि कर्म' 'भीष्मादयोऽपी'ति, तदाऽस्तु कारकम्... ननु ...निर्णयादित्यबोधेऽपि ...पि पक्षे कारकस्य प्रकृत्यर्थव्यक्तिविशेषणतैव विभक्ति... ...क्तिन्यावर्त्तिते,' उक्त्वा चैवं प्रातिपदिकार्थप्रकारकबोधे सुब्जन्योपस्थिते ... ...इष्टत्वात्। एतत्कल्पे जातिलिङ्गसंख्याकारकविशिष्टद्र... तत्र ...कस्... इति—पष्ठाप ... ...शब्देन ...दित्रयस्य ...नोक्तहेतुहेतुमद्भावस्य गगनकुसुमायमानत्वाद्, विशेष्य... ...द्रव्य पुंस्त्वर्यामिति। ...भवात्, क्रियाऽन्वयानुरोधाच्चेति—पञ्चकपक्षस्योपपत्तिरित्युक्त्वा-...वाक्यद्वरूपाभ्यामि... स्थलेष्विति। भाष्याद्याकरग्रन्थेष्वित्यर्थः। तत्र पञ्चकचतुष्क... ...त्वा, लिङ्ग... ...धारणान्न ...त्यत्र कैयटेनोपन्यस्तौ, त्रिकमिति पक्षस्तु वृत्तिकारेण। प्राधान्येत्या-...निर्णीतम्। ...त्व... पक्षाणां भाष्यकृतोपन्यासादिति भावः। 'सूत्रादा'वित्यादि... ...त्वात 'प्रास्म ...—परस्पर...ग्रहः ॥ २५ ॥ ...समवस्थित... ...त्यर्थः। केषांचिद्... ...र्थे महि...

❀ काशिका ❀

...दावपि गवादिव्यर्व...। 'शास्त्र' इति सामान्यपदप्रयोजनं स्पष्टयति—शास्त्र इति ...दीन। ...क... पुंस्त्वादिरियं व्यक्तिरयं ...टोऽस्तीत्यादिवाक्य... ...त्रिकत्वादि... ...घटैकत्वाद्यो वि... ...दौ ...क् शक्त...

१ तत् = लिङ्गादित्रिकम्।

शब्दस्तावच्छाब्दबोधे भासते—

'न सोऽस्ति प्रत्ययो लोके यः शब्दाऽनुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥' इत्याद्यभियुक्तोक्तेः ।

'विष्णुमुच्चारये'त्यादावर्थोच्चारणासम्भवेन विना शब्दविषयं शाब्द-

❀ दर्पणः ❀

'घटमानये'त्यादिशाब्दबोधे घटादिशब्दस्य भाने प्रमाणाभावेन तस्य प्रातिपदिकार्थत्वसाधनमनुचितमित्याशङ्कां परिहरति—शब्दस्तावदिति । तत्र हरिवाक्यं प्रमाणयति—न सोऽस्तीति । प्रत्ययः = शाब्दबोधात्मकः । शब्दानुगमादिति । शब्दविषयकत्वादित्यर्थः । अनुविद्धमिति । विशिष्टमित्यर्थः । [illegible]वसायो यथार्थेन विशिष्टज्ञानं विषयीकरोति तथा शब्देन विशिष्टमपी- [illegible] । वैशिष्ट्यं चार्थद्वारकं बोध्यम्, घटपदजन्यबोधानन्तरं 'घटं शाब्दयामी'- [illegible]व्यवसायान्न कलशं कुम्भं वेति, अत एवो'देति सविता ताम्र' इत्यादौ न [illegible]त्यम्, तत्पदानुपादाने उदयास्तयोः शाब्दबोधे ऐकरूप्यानिर्वाहादिति [illegible] ननु तावताऽपि शब्दभानं सिद्धं,—न विशेष्यत्वेनेति कथं शब्दस्य [illegible] [illegible]द्विरत आह—विष्णुमिति । 'अर्थोच्चारणासम्भवेने'ति वद[illegible]दृष्टा- [illegible] सूचितः । असङ्गतिरिति । अनुपपत्तिरित्यर्थः । से[illegible]स्यतीति ।

❀ काशिका ❀

[illegible]त्वाद्वाक्येपि [illegible]ब्दबोधविषयत्वेऽभियुक्ततमभर्तृहर्यनुभवं प्रमाणयति—न सो[illegible] [illegible]हुः—[illegible]हि [illegible]दभानम् । अनुविद्धमिव = तादात्म्येन संबद्धमिव । [illegible]मवधा[illegible]ल्पनेन [illegible]ययितुमिवशब्दः । प्रत्यक्षादिरूपसकलज्ञाने शब्दभानं शब्दाध्यास्थितिसमकालमेव्ये- [illegible]योर्भेदेप्यनुभवबलाज्ज्ञानसामान्यसामग्र्या एव शब्दभासप्रतिरिति वैलक्षण्ये[illegible] [illegible]ज्ञानेनोद्बोधकविषयोपस्थापितस्य शब्दस्य प्रत्यक्षादौ अथ[illegible]ये तु न बोधः, [illegible]त्, अनुभवाच्चेति तु न युक्तं, शब्दोपस्थापकार्थज्ञाने तद्भान[illegible]न्यलभ्यत्वात् । [illegible]द्धानमुपपादयितुं शक्यत इत्याहुः । अत्र घटादिशब्दं पक्षीकृत्य[illegible]कल्पनगौर- [illegible]—तादृशाभियुक्तोक्त्या सकलजातीयज्ञानविषयत्वेन बोधितत्वा[illegible]विषया इति । [illegible]त्वं तदन्तर्गतयत्किञ्चिज्जातीयज्ञानविषयत्वं विना न संभुः [illegible]दिशब्दे विशिष्य तत्तच्छाब्दबोधविषयत्वस्य साध्यत्व[illegible]गाष्यमित्यर्थः । [illegible]न सिद्धसाधनम् ॥ [illegible] यद्यपि सूत्रम- [illegible]—तथा चेति । ब्राह्मणादिविषयेतय[illegible]विशे[illegible]चान इति सूचयितुं । [illegible]त्वादिति भावः । उपपत्तौ = [illegible] । न्यूनतां परिहर्तुमाह[illegible]न्यस्य:

बोधासङ्गतिश्चेति सोऽपि प्रातिपदिकार्थः, नच लक्षणया निर्वाहः, निरूढलक्षणायाः शक्त्यनतिरेकात्, 'जबगडदशमुच्चारये'त्यादौ शक्या-ग्रहेण शक्यसम्बन्धरूपलक्षणाया अग्रहाच्च, अज्ञातायाश्च वृत्तेरनुपयोगाद्, 'गावमुच्चारये'ति भाषाशब्दानामनुकरणे साधुतासम्प्रतिपत्तेस्तेषां शक्त्यभावेन परनये लक्षणाया असम्भवच्चेत्यभिप्रेत्य षोढाऽपि क्वचित्'

❀ दर्पणः ❀

प्रातिपदिकार्थ इति । प्रकारान्तरेणोपस्थितस्य विशेष्यत्वासम्भवादिति भावः । लक्षणया = स्ववाच्यवाचकत्वसम्बन्धरूपया । **निर्वाह इति ।** तावतापि पदवाच्यत्वासिद्धेरिति भावः । **निरूढेति ।** निरूढत्वं च-लक्षणायामनादितात्पर्य[illegible]ग्रहाधीनत्वम्, अनादित्वं च-तत्र स्वजन्यबोधसमानाकारपूर्वपूर्वबोधध्वंसव[illegible]धेनैक- 'शक्त्यनतिरेका'दित्यस्या'ऽस्मन्मत' इत्यादिः । एतत्तत्त्वमग्रे वक्ष्यते । [illegible]चनादि- असार्वत्रिकत्वमप्याह—**जबगडदशमिति ।** तत्र समुदायस्य क्वचाप्यशक्तत्वस्थ्यात्, भावः । **अग्रहादिति ।** मन्मते तु तादृशसमुदायस्यैव तत्पदशक्यतया न [illegible] भावः । ननु तत्र समुदायस्याशक्तत्वेपि तद्घटकजकारादिवर्ण[illegible] [illegible]त्रादौ शक्तिप्रतिपादनात्तत्तदर्थवाचकत्वरूपलक्षणायास्तत्र [illegible] **[illegible]ताया इति ।** गङ्गापदस्य वस्तुतः स्वशक्यप्रवाहसामीप्य[illegible] [illegible]बोधस्यानुदयेन ज्ञाताया एव तस्याः पदार्थोपस्थित्य[illegible] [illegible]नुपपत्तिस्तदवस्थैवेति भावः । ननु शाब्दबोधाच्च तत्र [illegible] सत्त्वेऽपि यदा कदाचिज्जाततादृशवृत्तिग्रहादिनोद्बुद्धमतेपि तद्द्वारा तादृशशाब्दबोधोपपत्तिः सुकरेत्यत आह—साधुत्वा- [illegible] साधुत्वस्य सर्वैरेवाऽभ्युपगमादित्यर्थः । **परनय इ[illegible]** [illegible] तेषां शक्त्यभावेन तद्घटितलक्षणाया अप्यप्रस[illegible]

❀ काशिका ❀

[illegible]मादधाति, प्रयोजनासाचिव्यात् । लक्षणाया असंभव एव यत्र तादृ[illegible] शक्याग्रहेणेति । एकाक्षरकोशादिप्रामाण्येन प्रत्येकवर्णस्य शक्य[illegible] [illegible] लक्षणाया अग्रहेपि लक्ष्यार्थबोधोस्तु लक्षणरूपसामग्र्या[illegible] [illegible]भायाश्चेति । चस्त्वर्थे । अनुपयोगादिति । [illegible] [illegible]त्तेः = साधुता[illegible]

१ तत् = लिङ्गादित्रिकम् ।

प्रातिपदिकार्थं इत्याह—

शब्दोऽपि यदि भेदेन विवक्षा स्यात् तदा तथा ॥
नो चेच्छ्रोत्रादिभिः सिद्धोप्यसावर्थो व भासते ॥ २६ ॥

यद्यनुकार्यानुकरणयोर्भेदविवक्षा तदा शब्दोऽपि प्रातिपदिकार्थः, यदि न भेदविवक्षा, तदा श्रोत्रादिभिरुपस्थितोप्यर्थवद् भासते, अपिर्हेतौ,

❀ दर्पणः ❀

वृत्तिस्वात्मकार्थवत्त्वनिबन्धनप्रातिपदिकत्वाद्यनुपपत्तिरिति भावः। षोढापीति। ...र्थौ रूपञ्चकसहितः शब्दोपीत्यर्थः। क्वचित् = अनुकरणस्थले। तच्चानुकरणं ...शक्ति... ...म्, ध्वनेर्वर्णस्य च, तत्राद्यं,–'पटत्करोती'त्यादि। द्वितीयं,–'भुवो वु'गि· ...रन्त्वांस्या... ...क्तुं श... भेदविवक्षेति। 'पट'दित्यादौ ध्वनिमयत्ववर्णमयत्वाभ्यां, 'भुवो ...निरूढल...दावर्थपदार्थकत्वशब्दपदार्थकत्वाभ्यां तद्विवक्षेत्यर्थः। शब्दोपि ...प्रत्येकप...दिकार्थ इति। तथाच,–'मतौ च्छः सूक्तसाम्नो'रिति सूत्रे योसावा· ...रंगाद्यनु...वासशब्दः पठ्यते स छप्रकृतेरस्यवामीयमित्यादौ पदार्थोत एव ... ...च्छसिद्धिरितीति भावः। मूले,–'अर्थेऽवभासते' इति पु...स्यतीति। ...रूपे, अवभासते = विशेषणतया विषयो भवतीत्यर्थः। ...त्वाद्वाक्येपि ...वित्याद्रीचनयासावर्थो व भासते इति पाठः। तत्र 'व'शब्द... ...हुः— ...हि ...योपक्षे यथानुकार्य्यरूपोर्थो विशेष्यतया शाब्दबोधे ...मवधा... ...ल्पनेन ...पृथगनुकार्य्याभिन्नानुकरणशब्दोऽपीत्यर्थः। तत्रानुपताय... ...पस्थितिसमकालमेव्ये· नियतयामुक्तं—श्रोत्रादिभिरिति। आदिना–वृत्ति ...थतिरिति वैलक्षण... ...ण्योपपक्षेचित्। वस्तुतस्तु–लिप्याद्यनुसंहितस्य तस्य ...ये तु न बोधः, ...तत्राप्रत्य। 'पदोपस्थितमेव शाब्दबोधे भासते घटादि ...न्यलभ्यत्वात्। ...। अत एव सारकृताऽ'र्थवद्भासते' इति ...त्यर्थः। ...वत्त्वाक्केकल्पनगौर- ...विषयतानुतायाविषया इति।

❀ काशिका ❀

...व्याप्यसंबन्धो लक्षणेति स्वीकर्तृमीमांसकमते तत्संभवेऽपि ...कतासीदाहुः ...िति त... शक्तिस्वीकार आवश्यकः, अन्यथा बोधो न स्या... प्रयोज...पु ...ाप्यमित्यर्थः। इत्या... परिग्रातिपदिकसंज्ञापि न स्यात्, साधुत्वं च न स्या...त्यर्थः... यद्यपि सूत्रम- ...अभेदप... ...स्थितमित्यर्थमाह—प्राति... ...चीनान इति सूचयितुं। ...सूत्रप्र... ...ादिति भावः। उप... ...। न्यूनतां परिहर्तुमा...स्य:

उपस्थितत्वाद्भासत इत्यर्थः। अयं भावः—अनुकार्यानुकरणयोर्भेदेनु-कार्यस्य पदानुपस्थितत्वात् तत्सिद्धये शक्तिरुपेया, अभेदे प्रत्यक्षे विषयस्य हेतुत्वात् स्वप्रत्यक्षरूपां पदजन्योपस्थितिमादाय शाब्दबोधविषयतोप-पत्तिरिति।

❀ दर्पणः ❀

पक्षेऽनुकरणस्यार्थाभावेन तदंशे भानवर्णनमसम्भवदुक्तिकमित्याशङ्का समाहिता। नन्वभेदपक्षेप्यनुकार्य्यस्य शाब्दे कथं भानम्, पदवृत्तिजन्योपस्थित्य-भावादत आह—**अयम्भाव इति**। 'पदानुपस्थितत्वा'दित्यस्य 'शाब्दबोधे भानानुपपत्त्ये'ति शेषः। तत्सिद्धये = शाब्दबोधजनकपदजन्योपस्थितये इत्य… **शक्तिरिति**। 'असम्बद्धस्य तत्स्मृत्यजनकत्वा'दिति शेषः। तथाच प… ज्ञानजन्योपस्थितिसद्भावात्तस्य शाब्दविषयता सुलभेति। **अभेदे इति**। विवक्षायामित्यर्थः, तत्पक्षे निरूप्यनिरूपकत्वयोर्भेदनिबन्धनत्वेनानुकरणे … सम्भवादिति भावः। **हेतुत्वादिति**—उपस्थितिनिष्ठजन्यतायामन्वेति। …**प्रत्यक्षेति**। अनुकरणप्रत्यक्षरूपामित्यर्थः। **शाब्दबोधविषयत**… …मानाऽनुप…। …आशयः—अभेदपक्षे स्वप्रत्यक्षरूपामुपस्थितिमादाय यथा शाब्द… …मद्यन्ते …अपि न—'घटमानये'त्यादौ घटादिपदानामपि तां सामग्रीमादाय …

ननु … …णयादित्यबोधेमात्रस्य शब्दविषयकत्वसिद्धिः, तदुक्तं 'स्वं रूप'मिति …

…क्तिन्यावर्तिते,' … कारणं? शब्दपूर्वको ह्यर्थे सम्प्रत्ययः, 'आतश्च शब्द… … नाम च तेन यदा नोपलब्धं तदा पृच्छति,— … …स्य सम्प्रत्ययः, इह शास्त्रे शब्दे सम्भवाद… … पुंस्त्वस्या**मिति**। … …ब्दपूर्वको ही'त्यादिना शब्दवृत्तिज्ञानस्य पदार्थ…

❀ काशिका ❀

… वैभक्तिश्रवणापत्तेः। ननु भेदाभेदात्मकपक्षद्वयेऽप्यनुकार्य… …निर्णीतम्। …तया मूले भेदपक्षे एव तदावश्यकताकथनमयुक्तमतस्तद… …त्वात 'प्रास… —परस्पर… इति। **अनुकार्यानुकरणयोर्भेदे इति**। तयोर्भेदविवक्षाय… …पमवस्थित… …विदित्यर्थः। केषांचिद् … भेदो ध्वनिमयत्ववर्णमयत्वादिरूपविरुद्धधर्मसंबन्धेन सिद्ध इ… …धे महिष… …दावपि गवादिव्यव… …दिति। 'शक्त्यभावे' इत्यादिः। तथा च शक्त्यभावेनुकार्य… पुंस्त्वादिरियं व्यक्ति… …ये = उपस्थितिसिद्धये। …

१ तत्=लिङ्गादित्रिकम्।

यद्यप्यतिप्रसङ्गवारणाय वृत्तिजन्यपदोपस्थितिरेव हेतुस्तथाप्यत्राश्रयतया वृत्तिमत्त्वस्य सत्त्वान्नानुपपत्तिः। निरूपकताश्रयतान्यतरसम्बन्धेन वृत्तिमत एव शाब्दबोधविषयत्वं कल्प्यते इत्यनवद्यम्, सम्बन्धस्योभयनिरूप्यत्वात्, पदार्थस्येव तद्बोधकत्वेन स्वस्यापि ज्ञानसम्भवाच्चेति।

॥ दर्पणः ॥

त्यादावन्वयव्यतिरेकौ प्रदर्श्य 'शब्दपूर्वक' इत्यादिग्रन्थेन प्रकारान्तरं प्रदर्श्यते, शब्दविशेषणक इत्यर्थः। तेनार्थे असम्भवेर्थविशेषणतयोपस्थिते शब्दे कार्य्यमित्यर्थः। तथाचोक्तभाष्याच्छब्दतदर्थयोरुभयोरेव शब्दाद्भानम्, यत्र च लोके शब्दे इतरपदार्थान्वयबाधस्तत्रार्थांशे शब्दस्य विशेषणता, यत्र स्वर्थे 'विष्णुमुच्चारय' [illegible] शक्तिः। [illegible]त्यादौ तत्र शब्दांशेर्थस्य विशेषणतेति स्पष्टप्रतिपत्तेर्विषयत्वमनाद्रत्येति [illegible]चांस्याद्युप[illegible]चेति। **अतिप्रसङ्गेति।** 'घटोऽस्ती'त्यतः समवायेनैकज्ञानविषय[illegible]स्तु शक्या[illegible]पस्थितस्याकाशादेः शाब्दे भानापत्तिवारणायेत्यर्थः। **वृत्तिजन्येति।** [illegible]निरूढलक्षण[illegible]येत्यर्थः। **पदोपस्थितिरिति।** 'घटपदं शृण्वि'त्यादौ तादृशपदो[illegible]त्येकपदवृत्त्[illegible]या दर्शनात्, प्रकृते च तदभावेनुकरणस्य शाब्दविषयत्वं दुर्घट[illegible] [illegible]गाप्यनुष्ठान[illegible]**श्रयतयेति।** इदं च बोधकत्वं शक्तिरित्यभ्युपेत्य। बोध[illegible]दृष्टा[illegible] [illegible]रूपकतयेति बोध्यम्। नन्वाश्रयतासंसर्गेण वृत्तिमत्त्वस्यै[illegible]स्यतीति। [illegible]न्त्रत्वे निरूपकतासंसर्गेण वृत्तिमतः शाब्दे भानानुपप[illegible]त्वाद्वाक्येपि [illegible]वित्यादि[illegible]क्तेति। प्रामाणिकगौरवस्यादोषत्वादिति भावः [illegible] [illegible]हि [illegible]योगादे[illegible]रूपकार्थबोधकत्वस्यैव प्रातिपदिकत्वे तन्त्रत्वान्ना[illegible]मवधान[illegible]ल्पनेन पृथगुप[illegible]ः। ननु स्वप्रतियोगिकत्वविशिष्टसम्बन्धाश्रयताया[illegible]पस्थितिसमकालमेव्ये[illegible]नियमत[illegible]स्य वृत्तिमत्तेत्यत आह—**सम्बन्धस्येति।** [illegible]स्थितिरिति वैलक्ष[illegible] [illegible]ण्योपपन्न[illegible] साम[illegible]

॥ काशिका ॥

[illegible]द्विक[illegible]ये तु न बोधः, तत्राप्र[illegible]यसमवा[illegible]जन्यत्वे हेतुः। अतिप्रसङ्गेति। समवायेन घटादि[illegible] [illegible]न्यलभ्यत्वात्। [illegible]स्त्वामि[illegible]स्तीत्यादिवाक्यजन्यशाब्दबोधविषयत्वापत्तिवारणायेत्यर्थः। [illegible]र्थवत्त्वाक्तकल्पनगौर[illegible] [illegible]तरं वि[illegible]च न प्रकृत इति न [illegible]गवित्ययमाहेति वाक्यजबोधविषयतानु[illegible]तायाविषया इति। [illegible]यलक्षणया[illegible]श्रयतासंबन्धेन शक्तिरूपवृत्तिमत्त्वस्य सत्त्वेपि निरूपकतास[illegible] [illegible]माहुः [illegible]मिति। [illegible]रथकं[illegible]द्वस्था, निरूपकतासंबन्धेन तत्सत्त्वस्यैव शब्दभानप्रयोज[illegible]पु[illegible]ग्राह्यमित्यर्थः। [illegible] परि[illegible] [illegible]एवेति। न [illegible] निरूपकतया वृत्तिमत एवेत्यर्थः। [illegible]सूत्रप्र[illegible] यद्यपि सूत्रम[illegible] अभेद[illegible]तथा चेति। ब्राह्मणादिविषयेतय[illegible] शा[illegible]चीन इति सूचयितुं। सूत्रप्र[illegible] [illegible]त्वादिति भावः। उपपत्तौ = [illegible]। न्यूनतां परिहर्तुमा[illegible]न्यस्यः

❀ दर्पणः ❀

प्रत्यक्षात्मकशाब्दबोधजनकत्वेनेत्यर्थः। तथाच हर्य्यादिवाक्यप्रामाण्यात् प्रकृते स्वस्मिन्नपि तादृशसम्बन्धाश्रयताभ्युपगमान्न तस्य शाब्दे भानानुपपत्तिरित्यनयैव रीत्या शब्दमात्रस्य शाब्दे भानं निर्बाधमिति भावः। स्वीयप्रत्यक्षात्मकबोधजनकत्वस्य वृत्तित्वं दुरुपपादं, शाब्दबोधजनकपदार्थोपस्थितिजनकज्ञानविषयतावच्छेदकसम्बन्धस्यैव तत्त्वात्, न चैतादृशज्ञानेन शाब्दबोधात् प्राक् शब्दरूपपदार्थोपस्थितिर्जन्यते, नापि बोधकत्वेऽपि बोधकत्ववदिति ज्ञानं तदानीमस्तीति येन सापि सम्भाव्येत, तस्मात् कथमेतदिति चेत्—अत्र वदन्ति—'सम्बन्धस्ये'त्यादिग्रन्थस्य पदवृत्त्युपस्थितेनार्थेन सम्बन्धाविशेषाच्छब्दोपस्थितिस्ततः शब्दार्थयोरुभयोरपि शाब्दे भानं शब्दवृत्तिप्रयोज्यत्वस्योपस्थितिद्वये सत्त्वादित्यर्थ... नोक्तानुपपत्तिः। तत्रार्थस्येवेत्यनन्तरं बोध्यत्वादिति शेषः। 'तद्बोधक'... तदव्यवहितप्रागुपस्थितार्थपदार्थपरामर्शस्यैवौचित्यादर्थबोधकत्वेनेत्यर्थात्।

'यत्संज्ञास्मरणं तत्र न तदप्यन्यहेतुकम्।
पिण्ड एव हि दृष्टः सन् संज्ञां स्मारयितुं क्षमः।' इति।

...मवादिति भावः ...द्बोधस्तु वक्ष्यमाणहर्य्यादिवाक्यप्रामाण्यात् क्षणविलम्बेनैवाभ...
...प्रत्यक्षेति। अभेदपक्षे भानाय प्रकारान्तरमेवानुसर्त्तव्यमिति।
...माशयः—अभेदमते पदार्थोपस्थितेः शाब्दबोधहेतुतायां तदव...
...घटमानये'त्यादौ वृत्तिज्ञानजन्यत्वनिवेशावश्यकत्वेन वृत्तेर्द्वेधा प्रवेशे ...
...मात्रस्य शब्दविशेष्यान्यतरत्वघटकभेदयोर्विशेष्यविशेषणभावे विनि...
...कारणं ? ... तदपेक्षयाभेदपक्षे सादृश्यसम्बन्धेनानुकरणा...
...नाम चेत् तात्पर्यवशाच्छाब्दे भानं, वृत्तिज्ञानजन्य...
...स्य सत्त्वनिवेशात् तद्धेतुतायां व्यभिचारः, अत एव...
...पूर्वकेभक्त्युत्पत्तिः, 'वृत्त्यार्थबोधकत्व'रूपार्थवत्त्वाभावे...
...मर्थो—'मतौ च्छः सूक्तसाम्नो'रित्यत्र भाष्यकैयटयो...
...त्वविशिष्टसम्बन्धस्य स्वस्मिन् सतां तेजोदृष्टान्त...

❀ काशिका ❀

...बोध्यबोधकभावसंबन्धरूपा शक्तिरित्यावेदितम् ... आदीनं। परस्परविरोधस्वीक...
...दिति। 'शक्त्यभावे' इत्यादेः। तथा च शक्त्यभावेनुकार्य... घटकत्वाद्यो विरु...
...ये = उपस्थितिसिद्धये। ...

उक्तञ्च वाक्यपदीये—ग्राह्यत्वं ग्राहकत्वञ्च द्वे शक्ती तेजसो यथा ।
तथैव सर्वशब्दानामेते पृथगवस्थिते इति ॥'
विषयत्वमनादृत्य शब्देनार्थः प्रकाश्यते । इति च ।

❀ दर्पणः ❀

स्वोक्ते हरिसम्मतिमाह—उक्तञ्चेति । ग्राह्यत्वं = बोध्यत्वम् । ग्राहकत्वं = बोधकत्वम् । एते = ग्राह्यत्वग्राहकत्वे । पृथगवस्थिते—इत्यनेन तयोरसमनैयत्यं दर्शयति । दीपादिरूपतेजसो विषयसन्निधाने शक्तिद्वयं लोके प्रत्यक्षसिद्धम्, तदसमवधाने तु ग्राह्यत्वमेव यथा, तथा शब्दानामर्थाबाधे उक्तशक्तिद्वयम्, तद्बाधे तु ग्राह्यत्वमेवेति तदर्थः । 'स्वं रूप'मिति सूत्रभाष्यादप्युक्तार्थस्यैव लाभादिति तस्यैव

माह—विषयत्वमिति । स्वस्य विषयतामसम्पाद्य शब्दैरर्थो न बोध्यते

या एवाऽरु जन्यार्थबोधत्वस्य स्वविषयकत्वव्याप्यत्वादिति यावत् । अयं भावः—

भापाशब्दे मेदसते तन्मूलकाध्यासाच्छब्दादर्थाकारवृत्तौ जायमानायां शब्देनापि

नि❀ इति श्रीभू रससर्पणमिति शाब्दबोधस्य शब्दविषयकत्वसिद्धिरिति ।

प्रत्ये त्याशङ्क्याहदन्ति—'न सोऽस्ति प्रत्ययो लोके' इत्युक्तत्वात् किं बोधत्वावच्छेदे

रेगाप तस्मादित्युत्तरत्रं प्रतिज्ञायते ? उत ग्राह्यत्वमिति पद्यद्वयाच्छाब्दत्व

नियमार्थं, प्रत्यय वा शाब्दत्वसामानाधिकरण्येन ? नाद्यः, घटादिप्रत्य

या न केवलः घटादिपदोपस्थितेरनैयत्येन तादृशप्रत्यक्षस्य घटादि

निषेधोल्लङ्घनं ; एवं—घटाद्यनुमितावपि तज्ज्ञानं न सम्भवति, कल्पनेन

ध्यम् । अं व्याप्तिग्रहे तदभानात् । तदनन्तरं 'घटपदं कालमेव

त्वाभावेन मी'त्यनुव्यवसायाभावाच्च । न द्वितीयः—घटप वैलक्ष

धस्य चा त्वेन तस्य शाब्दविषयत्वाऽसम्भवात्, पदेन बोधः,

भावसे , तिपदिकत्वा ❀ काशिका ❀ भ्यत्वात् ।

पस्थित्वमुपस्थाप्यते स्वोक्तेऽर्थे हरेरुक्तिं प्रमाणयति—उक्तं चेति । तेऽपनगौर-

कद्ज्ञानविष त्तौ इत्यर्थः । अयं भावः—द्रव्यचाक्षुषत्वावच्छिन्नं इति ।

वृत्त्यन्तर गाद न प्रयु न्धकारेऽपि घटादिप्रत्यक्षापत्तेश्चक्षुःसंयोगसद्भावात् । त

समुदायल थस्तत्करण घटवद् स्वस्यापि प्रत्यक्षजनकत्वतथार्थगोचरत्वाद्वतिनिश्चित्य : ।

एक प्र व्यवा जनकः । यथा च घटचक्षुःसंयोगसत्त्वे न रूपालोकत्वम-

भेदपर्याय परिच्छेदायशक्तिः ने—योग संभावे शब्दे च तात्पर्ये सति शब्दस्तद्द्रष्टव्येव स्वयितुं

इत्यत्राह—तथा चेति । ब्राह्मणादाव संगत्या । नं च श्रोत्रादिर्निर्माह—

त्यैवं । सम्भव नादिति भावः । उपपत्तौ = ।

प्रसङ्गादनुकार्य्यानुकरणयोरभेदपक्षे साधकमाह—

अत एव 'गवित्याह' 'भू सत्ताया'मितीदृशम् ॥
न प्रातिपदिकं, नापि पदं, साधु तु तत्स्मृतम् ॥२७॥

❀ दर्पणः ❀

विधयार्थस्मारकत्वेन हस्तिपकदर्शनजन्यहस्त्युपस्थितौ हस्तिपकस्येव तज्जन्यार्थोपस्थितावुद्बोधकतावच्छेदकपदस्य विषयत्वाऽसम्भवाच्च। 'घटो न घटशब्द' इति सार्वजनीनप्रतीत्या शब्दार्थयोस्तादात्म्ये मानाऽभावेन नाऽर्थाकारवृत्तेः शब्दाकारतासम्भवोऽपि, घटशाब्दबोधाऽनन्तरं घटपदं शाब्दयामीति प्रतीतेः सार्वजनीनत्वे क्षणविलम्बसहिष्णुता सम्भवेदपि, न च तस्यास्तथात्वमिति न किञ्चिदेतत्। अपिच—भिन्ने विषयेऽनुमितिसामग्र्या बलवत्ता, यत्र तादृशाऽनुमिति... काले केवलघटत्वविशिष्टविषयिका शाब्दधीर्जायतामितीच्छाबलाद् ... नाप्येक... धीस्तत्र घटांशे तद्भानं दुरुपपादमेव। घटशब्दशाब्देच्छाविरहविशिष्ट...वन्धेनैककानुमितिसामग्र्याः प्रतिबन्धिकायाः सत्त्वात्। नाऽपि तृतीयः—सिद्ध...चनादि-
...ष्णुमुच्चारये'त्यादौ विष्ण्वादिपदानां लक्षणया शाब्दविषयतायाः ...वस्थ्यात्,
सम्भवाद... उक्तभाष्यादपि क्वचिच्छाब्दबोधे शब्दो विषय इत्यर्थस्य ...सिद्धेस्तत्...
...स्माच्च ...प्रत्यक्ष... ...र्न क्वचिदन्यत्रापि विशेष्यांऽशे तद्भानाभ्युपगमे क्षतिवि... ...प्राध्य
समानाऽनुप। ...वारमाशय... विशिष्य तत्तद्रूपेणानुपस्थितत्वेऽपि नलपदवाच्यः कश्चि... ...स्य
भिद्यन्ते ...यार्थे ...पि न ...टमा... ...पदवाच्यत्वेन तेषां बोधः प्राचीनसम्मत उपपद्यते, ...सव
ननु ...र्णयादित्... ...मात्रस्य
...क्तिव्यावर्तिते, ...कार ...त्युक्तभाष्यसम्मतमतेनैव, अत एव तस्मादवि...
प्रणवब्रह्मणोरभेदोपासनश्रद्धातिशयबोधकानि ..., तत्र
...कम... ...इति—षष्ठाध
...ुशब्देन नाश्वादि... ...दित्रयस्... ...सिद्धिः, तस्माच्छाब्दबोधमात्रस्य शब्दवि... ...मतेपि
...र पुंस्त्व... ...मिति। ...कृतेद्ध... ...व्यक्तीभविष्यतीति ॥ २६ ॥ ...रिशक्तत्वा-
...स्थलेऽस ...

❀ काशिका ❀

...क्षयशेरूपाभ्यारि... ...मत्यत्र ...स्येव प्रत्यक्षेण शीघ्रमुपस्थितत्वाद् गौरस्तीत्यादावपि शब्द... ...र्थत्वा...
...क्ष्मी... ...धारणान्न ...रस्ताः। तात्पर्यग्रहसाचिव्याद् वृत्त्यैवाविकृतस्यैव शब्दादुपरि... ...दित... ...वित्या
...निर्णीतम्। ...माद् ...त्। तस्मादुक्ततात्पर्यनिर्णये सति शब्दस्यैव प्राधान्ये...
...त्वात 'प्रास्म —परर... ...सेद्धमिति विस्तरो बृहद्भूषणेऽनुसंधेयः ॥२६॥ ...समवस्थित
...न्तविर्ह्यर्थः। केषांचि... ...भेद ...व्याख्यानमाह—गवित्ययमित्यादिना। न ... ...ादीनां ...रोधे महिष
दावपि गवादि... ...करणशब्दानामर्थवत्... ...मुकार्य... ...कप
पुंस्त्वादिरियं व्यर्... ...ये = उपास्य...तद्वये। ...शब्दबोधभिः ...घटैकत्वाच्चो...
...शब्दबो... ...ादौ ...यक् शक्त

१ तत् = लिङ्गादित्रिकम्।

'गवित्ययमाह,' 'भू सत्ताया'मित्येवमादयो यतोऽनुकरणशब्दा अनुकार्य्यान्न भिद्यन्ते, अतस्तेषामर्थवत्त्वाभावाद्, 'अर्थवदधातु'रित्याद्यप्रवृत्तौ न प्रातिपदिकत्वं, नापि पदत्वम्, अथ च साधुत्वमित्युपपद्यते। अन्यथा 'प्रत्ययः' 'परश्च,' 'अपदं न प्रयुञ्जीते'ति निषेधादिलङ्घनादसाधुतापत्तिरित्यर्थः ॥ २७ ॥

❀ इति श्रीवैयाकरणभूषणसारे नामार्थनिर्णयः ॥ ४ ॥

❀ दर्पणः ❀

अन्यथेति। भेदपक्षस्यैवाऽभ्युपगमे इत्यर्थः। **प्रत्ययः परश्चेति।** नियमशास्त्राणां निषेधमुखेनाऽपि प्रवृत्तेः प्रत्ययपरैव प्रकृतिः प्रयोक्तव्या, 'न केवले'ति नियममूलकस्या'ऽपदं न प्रयुञ्जीते'ति निषेधविधेः प्रत्यययोग्यस्य प्रत्ययं विना शक्तिः। (प्र)णादसाधुतापत्तेरित्यर्थः। अस्मन्मते तु तस्य प्रत्यययोग्यत्वाभावाप्ष्वांस्याद्युपस्थिया एवाऽभावात्तदतिक्रमणाऽप्रसक्तेः, साधुत्वादेव च तत्रावादेशादिर्भूस्तु शक्यादिभाषाशब्देष्विव तदप्रवृत्तिः स्यादिति भावः ॥ २७ ॥

निरूढलक्षण ❀ इति श्रीभूषणसारदर्पणे नामार्थनिरूपणम् ॥ ४ ॥ ❀

❀ काशिका ❀

प्रत्येकपदवृत्त्यु त्याशङ्क्याह—अन्यथेति। 'प्रत्ययः' 'परश्च' इति। प्रत्ययविधौ पञ्चमी ... गुरुत्य,
रंगाप्यनुष्ठानन्नि तस्मादित्युत्तरस्य' इति परिभाषायाः प्रवृत्त्यैव प्रत्ययस्य प्रकृतिप... तद्दृष्टा-
नियमार्थं, प्रत्ययपरैव प्रकृतिः प्रयोक्तव्येति, तदेतदभिप्रेत्यैव प... तस्यतीति।
...या न केवलः प्रत्ययः प्रयोक्तव्य इति। तथा च नियमभाव... त्वाद्वाक्येपि
वित्यादि... निषेधोल्लङ्घनं स्पष्टमेव। विधिमुखेन प्रवृत्तिरिति भाष्यरि... हुः— ...हि
योगादे... ध्यम्। अभेदपक्षे उक्तरीत्या प्रातिपदिकत्वाभावेन प्रत्यय... मवधान ...ल्पनेन
पृथगुप... तयो... त्वाभावेन न केवलेति निषेधस्य पदत्वयोग्ये एव पदत्वरहि... पस्थितिसमकालमेव्ये-
नियमत... सं... रस्य चानवतार इति भावः। अभेदपक्षे वृत्त्या अर्थ... थतिरिति वैलक्षण्...
ण्योपप... साम...र्थ्यम् ...तिपदिकत्वमिति बोध्यम्। परे तु सादृश्यमूलकाभेदविक...ये तु न बोधः,
तत्राप्र...यसंभवात्, ...मुपस्थाप्यते, वृत्तिज्ञानस्यानुकरणाजन्यशाब्दत्वमेव ...नन्यलभ्यत्वात्।
क... तद् स्वामित्वेनोप... ज्ञानविषयोपपत्तिः। एवं च वृत्त्यार्थबोधकत्वरूपार्थवत्त्वाक्तेकल्पनगौर-
वा... तरं विना धर्... न प्रयुञ्जीतेत्यत्रापदमपरिनिष्ठितमित्यर्थः, भू सत्ताया विषया इति।
...यलक्षणया, ऽप्रत्ययानुकरणस्यापरिनिष्ठितत्वाभावोऽत्रोक्तनिषेधविषयत्वमित्याहुः
...मिति। रथकारपदेपीत्युवस्थितौ तेन 'वार्तघ्नी पौर्णमास्यां कवतीषु र...ध्यमित्यर्थः।
इत्या... परिग्रः, रथकर्मकोत्पादकत्वकर्तृरूपावयवत्व... मि...—' इत्यादि सूत्रप्र... यद्यपि सूत्रम-
अभेदप... —तथा चेति। ब्राह्मणादिविषयेतयै... उपस्थित्यै सङ्कोचान इति सूचयितुं।
सूत्र... ... दिति भावः। उपपत्तौ = ... न्यूनतां परिहर्तुमाह—यस्य:

❀ समासशक्तिनिर्णयः ❀

समासान् विभजते—

सुपां,-सुपा, तिङा, नाम्ना, धातुना, ऽथ तिङां,-तिङा ॥
सुबन्तेनेति, च ज्ञेयः समासः षड्विधो बुधैः ॥ २८ ॥

सुपां सुपा—पदद्वयमपि सुबन्तं,—'राजपुरुष' इत्यादिः। सुपां तिङा,—पूर्वपदं सुबन्तमुत्तरपदं तिङन्तम्—'पर्य्यभूषत्' 'अनुव्य-

❀ दर्पणः ❀

'कृत्तशक्त्यैव निर्वाहान्न नामसमुदायात्मकसमासेऽतिरिक्ता शक्ति'रि... दूषयिष्यन् प्रसङ्गात्समासार्थं निरूपयितुमादौ तद्विभागप्रदर्शनमित्य... **समासानिति**। समासत्वं च शक्तिसम्बन्धेन समासपदवत्त्वम्, पन्नपदसमुदायविशेषो वा। एकार्थीभावे मानं च—"किं पुनः स... ...तसा... ...र्थानामेकार्थीभावः समर्थवचनम्, क पुनः पृथगर्थानि, क्वैकार्थ... ...णमुच्चारये'त्या... ...नि—राज्ञः पुरुष इति, समासे पुनरेकार्थानि—राजपुरुष" इत्यु... ...उक्तभाष्यादौ... ...प्रत्यक्ष... ...प्यम्, तन्मूलिका वक्ष्यमाणा युक्तयश्च। 'तत्रैकार्थ... ...न क्वचिदन्य... ...समानो... ...माशयः... ...र, न त्वेकार्थशक्तत्वम्। घटादिपदानामपि घट-घट... ...स्त्य... ...भिद्यन्ते... ...घटमा... विशिष्य ते... ...कार्थतानापत्तेः, नानोपस्थितिविषयार्थकत्वं—प्रामन... ...नन्तु त्वे... ...मात्रस्य ...पदवाच्यत्वे... ...ति

❀ काशिका ❀

...त्युक्तभा... ...क्तिर्... ...कार... समासत्वं च पाणिन्यादिसंकेतसंबन्धेन समासपदवत्त्वं... ...प्रणव... ...त्याकारकपुरुषान्तरीयसंकेतसंबन्धेन समासपदवत्त्वस्य ...प... ...क्रमात... ...र्तते—पष्ठ्य... ...सेद्धिः... ...शब्दन नाश्वादि... ...ोति। व्याकरणप्रणेतृमुनीत्यर्थः। तथाविधस्य पुरुषस्त्वा... ...व्यर्थ... ...पुंस्त्व... ...तद्व... तेषामन्यत्र व्यवहाराभावादन्याभियुक्तानां व्यवहाराभ...म्, ...संदेहे वाक्यशेष... ...थैलेऽसि... ...केतसंबन्धेन घटादिपदवत्त्वं न समासत्वम्। अभियुक्त प्र... ...पुंलिङ्गः स्त्री... ...त्यत्र ...देव... ...र्थबोधफलकविभक्त्यव्यवहितपूर्ववर्तित्वप्रकारकज्ञानाविषयपूर्वपदी'त्या... ...निर्णीतम्। न... ...रस्ताः ...राजपुरुष इत्यादावपि राजादिशब्दे कस्यचित् पुंसो ...त्वात 'प्रास्मा... ...माद... ...त्व... ...क्तत्वाभावान्नासम्भवोऽव्याप्तिर्वा। दधिसुन्दरमस्त्यानयेत्यादौ एताः समवस्थित ...सिद्धान्तविरोधा... ...स्यर्थः ...भेद... ...सेद्धमि... ...पगमान्न तत्रातिप्रसङ्गः। समासस्थले तु पूर्वपदे विभक्तीनास्परमविरोधे महिष... ...दावपि... ...व्याख्य... ...क्रम। दधि स... ...विरोधस्वीक... ...पुंस्त्वा... ...ये = उपस्थि... ...रणशब्दानामर्थ... ...घटैकत्वाद्यो विश... ...सात्पर्... ...दौ ...गक् शक्त

१ तत् = लिङ्गादित्रिकम्।

चलत्' । 'गतिमतोदात्तवता तिङापि समास' इति वार्त्तिकात्समासः ।

❀ दर्पणः ❀

यथा वाक्ये—पृथक् पदानामाकाङ्क्षादिसहकारेण विशिष्टार्थप्रत्ययः, नैवं वृत्तौ, किन्त्ववयवशक्त्या समुदायशक्तिसहकृतया जायमाना पदार्थोपस्थितिरेव विशेष्यविशेषणभावापन्नविशिष्टार्थमवगाहते, 'संसृष्टार्थं समर्थ'मिति भाष्यात् । 'राजपुरुषादिपदं राजसम्बन्धवत्पुरुषादौ शक्त'मित्याकारकः शक्तिग्रहः, ततश्च प्राप्ताप्राप्तविवेकेन विशिष्टशक्तिः पञ्चम्याद्यर्थे पर्यवस्यति, अत एव न तत्र राजादौ सुन्दरादिपदार्थान्वयः, एकदेशत्वात्, 'देवदत्तस्य गुरुकुल'मित्यादौ तु गमकत्वात्स इति वक्ष्यते । 'जहत्स्वार्था वृत्तिः, पदानामानर्थक्य'मिति तु न सम्यक्, 'महाबाहु' [illegible] त्वाद्यनापत्तेः, भूतपूर्वगत्याश्रयणं तु सत्यां गतावनुचितम्, तदुक्तं—

शक्तिः । [illegible]

❀ काशिका ❀

[illegible]स्यांस्याद्युपरि शक्यतयासंभवापत्तेः । न च समासे पदयोरव्यवहितपूर्वापरीभावस्याकाङ्क्षात्वेन

[illegible]क्तुं शक्या[illegible] बोधे हेतुतया विभक्त्यनुसन्धानं विनैव बोधोपगम उचितः, असमासे तु

निरूढलक्षण[illegible] विभक्त्यव्यवहितपूर्ववर्तित्वप्रकारकज्ञानविषयस्यैवाकाङ्क्षात्वेन तत्र विभक्त्ये[illegible]

प्रत्येकपदवृत्त्यु[illegible] वाच्यम्, अलुक्समासे व्यभिचारेण तथाविधाव्यवहितपूर्वापरीभा[illegible] [illegible]स्य,

[illegible]गाद्यनुष्ठाननि[illegible] च तत्र 'दास्याः पुत्रे'त्यादिसमुदायस्यैवाकाङ्क्षात्वान्न दोष इ[illegible] तद्दृष्टा-

[illegible] [illegible]त्रः' 'कण्ठेकाल' इत्यलुक्समासेऽव्याप्तेः, समुदायघटकविभक्ति[illegible] [illegible]स्यतीति ।

[illegible] अर्थोपस्थितिद्वारा बोधजनकत्वं तत्र निवेश्यमतो न तत्राव्याप्ति[illegible] [illegible]त्वाद्वाक्येऽपि

वित्यादि[illegible] भावात् । अत एव 'गोपुचर' इत्यत्र बहुवचनसत्त्वेऽ[illegible] [illegible]हुः—[illegible] हि

योगादे[illegible] [illegible]ध्ये इति चेदेवमपि—'पर्यभूषत्,' 'पचतभृज्जते'त्यादावव्या[illegible] [illegible]मवधान[illegible]ल्पनेन

पृथगुप[illegible]तयो[illegible] इति दिगिति वदन्ति । अन्ये तु तार्किका यादृशम[illegible] पस्थितिसमकालमेव्ये-

नियमत[illegible] संस[illegible] [illegible]पयतानिरूपितस्वार्थविषयताशालिबोधजनकस्तादृशवाक्ये [illegible]थतिरिति वैलक्षण्[illegible]

प्योपपन्नं साम[illegible]र्थ्यम् [illegible]वाक्यत्वं समासत्वमिति यावत्—भवति हि [illegible]ये तु न बोधः,

तन्नाप्र[illegible]यसंभवात्, पूर्वपदार्थविशिष्टोत्तरपदार्थान्वितरवार्थबोधजननात् । पाचका[illegible] [illegible]न्यलभ्यत्वात् ।

क[illegible] स्वस्वामित्वेनोप[illegible] [illegible]कानेकनामलभ्यतादृशार्थप्रतिपादकत्वरूपमहत्वाभावान्न महाव[illegible] [illegible]कल्पनगौर-

वा[illegible]रं विना धर्मि[illegible] [illegible]रदावव्याप्तिः, कुम्भपदस्यैव लक्षणया कुम्भसमीपार्थकत्व [illegible]वषया इति ।

[illegible]यलक्षणया, उप्रत्य[illegible] [illegible]वयबोधायोग्यत्वरूपमहत्त्वस्य निवेशात्, अत एव

[illegible]मिति । रथकारपदेऽपि[illegible] [illegible]प्रसङ्गः उक्तमहावाक्यत्वाभावात् । न च म[illegible]ाप्यमित्यर्थः ।

इत्या[illegible] परिग्र[illegible]ः, रथकर्मकोत्पादनकर्तृरूपावयव[illegible] [illegible] [illegible] यद्यपि सूत्रम-

अभेदप्[illegible] [illegible]—तथा चेति । ब्राह्मणादिविषयेतयैव[illegible]ष्टोपस्थित्यै सङ्कोचान इति सूचयितुं ।

सूत्र[illegible] [illegible] [illegible]त्वादिति भावः । उपपत्तौ = [illegible] स्वाप्तेः । न्यूनतां परिहर्तुमाह[illegible]न्येभ्यः

सुपां नाम्ना—'कुम्भकार' इत्यादि। 'उपपदमतिङि'ति समासः, स च—'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्ते'रिति परिभा-

ॐ दर्पणः ॐ

'जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी'ति। अवयवार्थविरुद्धो यत्र समुदायार्थस्तत्रैव सा, यथा 'कृष्णसर्पादा'विति तदर्थः। अयमेव पक्षः—'समासे खलु भिन्नैव शक्तिः पङ्कजशब्दव'दितिवदतो मूलकृतः सम्मतः। तथा सति पङ्कजशब्दादौ परैर्योगरूढ्यभ्युपगमेन 'तद्दृष्टान्तोपन्याससार्थक्यात्। 'जहत्स्वार्था वृत्ति'-रिति पक्षस्य तत्सम्मतत्वे—स्वमते तस्य पक्षतया परैस्तत्र तदनभ्युपगमेन तदुपन्यासानुपपत्तेः स्पष्टत्वात्, अधिकमग्रे वक्ष्यत इति। गतिमतोदात्तवतेति। उपलक्षणमिदं, 'सह सुपे'ति योगविभागस्यापि, 'अनुव्यचल'दि-चलदित्यनेन, वेश्वाचलदित्यनेन युगपत्समासः, अन्विति सुवन्तेन

ॐ काशिका ॐ

पुरुषभावः प्रतीयते, न तु राजसंबन्धाद्यन्वितपुरुषे त्वप्रत्ययार्थः। एवं 'तव ...पि पुत्रवृत्तिभावे युष्मदर्थनिरूपितत्वस्य पष्ठ्यन्तार्थस्यान्वयस्तद्धितानां ...धकत्वव्युत्पत्तेः। अत्र त्वादिस्थाने प्रत्ययमात्रस्य, तद्धितमात्रस्य वा ...संबन्धविशिष्टपुत्रस्यैव छप्रत्ययार्थेऽन्वयाद् 'राज्ञः पुत्रे'ति भागेऽ... विशिष्य ...त्यसापेक्षतया एकादेशान्वयेऽपि बाधकाभावात्। तद्धितानां ...दवाच्यत्वेन संकोचनीया। अत एव 'परमगार्ग्यस्यापत्य'मित्यर्थे गा... ...त्युक्तभाष्य...स्थभाष्यसंगतिः, अन्यथा प्रकृत्यर्थातिरिक्तपरमान्वितप्रकृत्यर्थ... प्रणवत्र... ससंबन्धिकार्थातिरिक्तप्रकृत्यर्थपरा वा। यदि तत्र राजस... ...एवान्वयस्तदा तद्धितसामान्योपादानेऽपि न क्षतिरिति वो... ...व्यक्तीभ... ...जसंबन्धान्वितपुरुषस्य पष्ठ्यर्थस्वामित्वादावन्वयाद्राज्ञः ... ...पेक्षेत्याहुः। अत्र पक्षे 'पिबतखादता' 'पचतभृज्जते'... ...पष्ठ्यन्तार्थस्य 'दास्याः पुत्रत्व'मित्यत्र पुत्रान्विततत्वप्रत्य... ...रस्ताः। त... ...त्। ...व राज्ञः पुत्रत्वमित्येतद्घटके राज्ञः पुत्रेति भागेऽतिप्रसङ्गो ... नियामकाभावः। प्रदायेत्यादेः क्रियायामेवान्वयात्तत... ...द्वा एताः समवस्थित... ...गनयनासंभवात्, तदर्थस्य प्रथमार्थेनैवान्वयात ... परस्परमविरोधे महि... ...रस्परविरोधस्वीक... ...पदार्थ इत्य... ...घटैकत्वाद्योर्विषि इति तात्पर्य...

...दौ ...क् शक्त...

१ तत् = लिङ्गादित्रिकम्।

षया भवति सुबुत्पत्तेः प्राक्। अत्र-उत्तरपदे सुबुत्पत्तेः प्रागित्यर्थात्, अन्यथा-

❀ दर्पणः ❀

समुदायस्य समर्थत्वात्, सत्यां समाससंज्ञायां शाकलप्रतिषेधाद्यणादेशः समासाऽन्तोदात्तत्वं च भवति, तिङ्कत्वस्योक्तत्वात्, प्रकृत्यर्थव्यापारस्य संख्यान्वयायोग्यत्वाद्वा, न ततः सुबुत्पत्तिः, समयपरिपालकौत्सर्गिकैकवचनस्य तु तथा सुबन्तस्यानभिधानादेवाप्रवृत्तिरिति भावः। अन्यथेति। सुबुत्पत्तेः प्राक्स-

❀ काशिका ❀

स्य नासंग्रहः, तथा चानेकसुबन्तघटितत्वं विभाजकतावच्छेदकमिति भावः। राजेति। 'उपपदमतिङ्' इति सूत्रभाष्यप्रामाण्याद् 'द्वितीयाश्रित-' इत्यादावपि 'गतिकारकोपपदानाम्-'इति परि- ... नेकसुबन्तत्वाघटितत्वात् प्रथमोपस्थितेत्यादिन्यायस्य निजां त्रयाणामित्यत्र त्रिग्रहणादत्र शक्तिः। ... प्रसिद्धतमत्वाच्च कृष्णश्रितादीनपहाय राजपुरुष इत्यस्य प्रदर्शनमिति बोध्यम्। ... ति। 'देवो देवान् क्रतुना पर्यभूष'दिति ऋक्संहितायाम्। अत्र 'सह-' इति योग- ... क्तुं शक्य... । अत्र 'समासस्य' इत्यन्तोदात्तत्वं बाधित्वा तत्पुरुषे तुल्यार्थ-' इत्यव्यय- ... निरूढलक्षण... प्राप्ते—तदपवादेन 'गतिकारकोप-' इति सूत्रेणोत्तरपदप्रकृतिस्वरेणाद्युदात्त... त्येकपदवृत्यु... वार्तिककारेण तत्रत्यकृद्ग्रहणस्य प्रत्याख्यानात्। नन्वत्र समासस्य ... वृत्त्य, ... गाप्यनुष्ठानमि... भाष्ये साधनेन तत्पुरुषत्वाभावेन तत्पुरुषे विधीयमानस्वरस्य क... तद्दृष्टा- ... क्रीडा-' इति सूत्रे 'नित्यम्-' इति योगविभागेन भाष्ये... नस्यतीति। ... पि इति—'यत्रा नरो देवयन्तो युगानि वितन्वते' इत्यादौ भाव... त्वाद्वाक्येपि ... वित्यादि... बोध्यम्। अत्र कृद्ग्रहणाभावे प्रभवनमित्यादावेव क्रिया... हि योगादे... कृद्ग्रहणं कृन्मात्रपरिग्रहार्थं कर्तव्यमेवेति—सिद्धान्तपक्षे ... मवधान... कल्पनेन पृथगुप... तयो... द्याद्युदात्तत्वं बोध्यमिति कैयटोद्योतादौ विस्तरोऽनु... पस्थितिसमकालमेव्य- नियमत... संस... उभयोरपि निवृत्तेरुक्ततया सुपां नाम्नेत्यसंगतं, पदद्वये... रिति वैलक्षण्य ... ण्योपपन्न... सामर्थ्य... आपत्तेरोदायाह—अत्रोत्तरपदे इति। इत्यर्थादिति। ... स्ये तु न बोधः, तन्त्राप्र... संभवात्, ...। अतिङ्ग्रहणात् तृतीयान्तं सुपेत्येतदेव नानुवर्तते, ... न्यलभ्यत्वात्। ... स्वामित्वेनो... तु समुदायाननुवृत्तितात्पर्यकम्। एकानुवृत्तावपि उभयाद् ... कल्पनगौर- ... विना ध... । अथवा सुवित्यनुवृत्त्यैवैधानाहारको व्रजतीत्यादे... विषया इति। ... यलक्षणया, ऽप्रत्य... सांप्योक्ता यथाश्रुतैवास्तु। एवमप्युपपदमिति महा... ति। रथकारपदेपी... ... णात् पूर्वपदे सुबुत्पत्त्यनन्तरमेव समासः। 'सु... भाष्यमित्यर्थः। इत्यपरिग्र... रथकर्मकोत्पादनकर्तृरूपाव... ... यद्यपि सूत्रम- भेदप्र... तथा चेति। ब्राह्मणादिविपर्यंतयैव... उपस्थित्यै सङ्कोचान इति सूचयितुं ... त्वादिति भावः। उपपत्तौ = ... न्यूनतां परिहर्तुमाह—

'चर्म्मक्रीती'त्यादौ नलोपानापत्तेः। सुपां धातुना—उत्तरपदं धातुमात्रं न तिङन्तम्—'कटप्रूः' 'आयतस्तूः'। 'क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घश्चे'ति वार्त्तिकात्। तिङां तिङा—'पिवतखादता' 'पचतभृज्जते'त्यादि, 'आख्यातमाख्यातेन क्रियासातत्य' इति मयूरव्यंसकाद्यन्तगणसूत्रात्। तिङां सुबन्तेन—पूर्वपदं तिङन्तमुत्तरं सुबन्तम्—'जहिस्तम्बः', 'जहि कर्म्मणा बहुलमाभीक्ष्ण्ये कर्त्तारञ्चाभिदधाती'ति मयूरव्यंसकाद्यन्तगणसूत्रात्। अयं षड्विधोपि समासः—'सहसुपा' इत्यत्र योगविभागेन भाष्ये व्युत्पादितः, स्पष्टः शब्दकौस्तुभादौ ॥ २८ ॥

❀ दर्पणः ❀

माससंज्ञाभ्युपगम इत्यर्थः। 'नलोपे'त्यस्य—'अपदत्वा'दित्यादिः। य…
मिति सूत्रे भाष्ये'ऽनयोर्योगयोर्निवृत्तं सुप्सुपे'त्युक्तं, तथा…
महासंज्ञाबलादेव पूर्वपदस्य सुबुत्पत्त्यनन्तरं समास इति भावः। …
रित्येकदेशप्रयोजनप्रदर्शनमिषेण परिभाषायाः प्रयोजनमपि दर्शित…
…न् समासे हि स्वार्थद्रव्यलिङ्गसंख्याकारकाणां क्रमिकत्वस्यान्तर…
…, इति सूत्रभाष्यसम्मतत्वेनान्तरङ्गत्वात् सुबुत्पत्तेः पूर्वं …
…णपूर्वा'दिति ङीपोनुपपत्तेरिति दिक्। भाष्ये व्युत्…
…कं समाससंज्ञावारणरूपं सहशब्दप्रयोजनं समुदायें…
…वं तर्हि सिद्धे यत् सहग्रहणं करोति, तस्यैतत्…
…येत, सति योगाङ्गे योगविभागः करिष्यते—…
…नर्थेन, अनुव्यचलत्, अनुप्राविशत्,—ततः 'सुपा'…
…धिकारश्च लक्षणं च, यस्य च समासस्यान्य…
…—त्युक्तम्। तत्राधिकारप्रयोजनं—'देवद…
…समाससंज्ञावारणं बोध्यम् ॥ २८ ॥

❀ काशिका ❀

न लोपानापत्तेरिति—पदत्वाभावात्। कटप्रूरिति। …
…भात् कर्तरि क्विप्। आयतस्तूरिति। आयतं स्तौतीत्यर्थः…
…। वार्तिकादिति। वार्तिके निपाननात् समासः। …
…क्रियायामभिधीयते सा पिवतखादतेत्यर्थः। …

१ तत् = लिङ्गादित्रिकम्।

स्वयं भाष्यादिसिद्धतद्भेदं व्युत्पाद्य प्राचीनवैयाकरणोक्तविभागस्याऽव्याप्त्यतिव्याप्त्यादिभिस्तल्लक्षणस्य प्रायिकत्वं च दर्शयति—

'समासस्तु चतुर्द्धे'ति प्रायोवादस्तथा परः, ।
योयं पूर्वपदार्थादिप्राधान्यविषयः स च ॥ २८ ॥
भौतपूर्व्यात्सोपि रेखागवयादिवदास्थितः ॥ २९½ ॥

चतुर्धा—अव्ययीभावतत्पुरुषद्वन्द्वबहुव्रीहिभेदात्, अयं प्रायोवादः,—भूतपूर्वः, दन्भूः, काराभूः, आयतस्तूः, वागर्थाविवेत्याद्यसङ्ग्रहात्, तथा

❀ दर्पणः ❀

...मिति । पाड्विध्यरूपमित्यर्थः । **प्राचीनेत्यादि ।** यद्यप्य'व्ययं शक्तिः । ...सूत्रे भाष्ये समुदायस्य संस्कार्यत्वेन प्राधान्यात्तस्यैव समृद्ध्यादयो ...व्याम्याद्युपर्या... समुदायात्—समृद्ध्यादीनां गम्यमानत्वादत्राप्यव्ययीभावापत्तिरि- ...क्तुं शक्याः ...इ कस्मान्न भवन्ति—सुमद्राः, सच्छत्र' इति प्रश्ने, 'नैष दोषः, इह निरूढलक्षण... सः पूर्वपदार्थप्रधान' इत्यादिसमासलक्षणान्युक्त्वा—'नात्र ये... प्रत्येकपदवृत्त्यु... गम्यत'इति समाहितम् । तथापि'नैते समासार्था नि... ...दुद्दिश्य, रेगाप्यनुष्ठानानि... ...क्षान्तरोपन्यासेनोक्तलक्षणेष्वनिर्भरसूचनाददोष इति... तद्दृष्टा- ...न्स्यतीति । ...व ...। तत्त्वं—साधारणधर्मवत्त्वम् । धर्मे साधारण्यं ...त्वाद्वाक्येपि ...वित्यादि... ...ते सकलतद्वृत्तित्वम्, । यथा सास्नाश्टङ्गवत्त्वं... ...हुः— ...हि योगादे... ...नकृष्णरूपादीनां लक्षणत्ववारणाय सत्यन्तवृत्तित्व... ...मवधान ...पनेन पृथगुपस्थि... ...तया ...क्षणे तान्येव पदानि देयानि यैरव्याप्त्यतिव्याप्त्य... ...परस्थितिसमकालमेव्ये- नियमत... संस्... लक्षणाऽसत्त्वमव्याप्तिः, अलक्ष्ये तत्सत्त्वमति... ...थ...रिति वैलक्षण्य... ...ण्योपपन्नं सामर्थ्यम्, उदाहरणानि वक्ष्यन्ते । असाधारणधर्म... ...स्ये तु न बोधः, तत्राप्र...यसंभवात्, ...र्व्यवहारश्च फलम्, यस्य तु धर्मस्य केवल... ...नन्यलभ्यत्वात् । ...व्यवहारमात्रम् तदुक्तं,—'व्यावृत्तिर्व्यवहारो ...स्वामित्वेनो... ...प्रायोवाद इति । प्रायशस्तेषामुपलभ्यमानत्वेपि ...कल्पनगौर- ...रं विना धर्मि... ...धर्मस्तदेव विशदयति—**भूतपूर्व** इत्यादि । ...विषया इति । ...यलक्षणया, ...उप्रत्य...

❀ काशिका ❀

...मिति । रथकारपदेपी... ...—योयं पूर्वेति । योयं पूर्वपदार्थप्राधान्यादिविषय... ...भाष्यमित्यर्थः । ...इत्यां परिग्रहः, रथकर्मकोत्पादनकर्तृरूपावच्छिन्न... ...इत्यं... ...प यद्यपि सूत्रम- अभेदपर्... —तथा चेति । ब्राह्मणादिविषयेतयैव... ...ष्टोपस्थित्यै... ...चीन इति सूचयितुं सूत्र... ...त्वादिति भावः । उपपत्तौ = ...स्वार्थः । न्यूनतां परिहर्त्तुमाह—

पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, उभयपदार्थप्रधानो द्वन्द्वः, अन्यपदार्थप्रधानो बहुव्रीहिरित्यादि लक्षणमपि प्रायिकम्, उन्मत्तगङ्गं, सूपप्रति, अर्द्धपिप्पली, द्वित्राः, शशकुशपलाशमित्यादौ परस्परव्यभिचारात्, तथाहि—'उन्मत्तगङ्ग'मित्यव्ययीभावे पूर्वपदार्थप्राधान्याभावादव्याप्तिः, अन्यपदार्थप्राधान्याद् बहुव्रीहिलक्षणातिव्याप्तिश्च, 'अन्यपदार्थे च संज्ञाया'मिति समासात्। 'सूपप्रती'त्यव्ययीभावे उत्तरपदार्थ-

❀ दर्पणः ❀

माणयत्किञ्चिल्लक्षणाक्रान्तत्वेपि तत्तदधिकारीयसूत्राननुशिष्टत्वादसङ्ग्रहो बोध्यः, [illegible] समासाधिकारीयसूत्रानुशिष्टत्वाद्विभागे तदसङ्ग्रहे इष्टापत्तेरयोगात्। [illegible] पदार्थेत्यादि। प्राधान्यं च समासघटकपदार्थप्रकारतानिरूपितमुख्य[illegible] तथा च पूर्वपदार्थविशेष्यकबोधजनकत्वमव्ययीभावत्वमित्यर्थः, [illegible] 'उपकुम्भ'मित्यत्र कुम्भनिरूपितसामीप्यस्य विशेष्यतया बोध[illegible] [illegible]दौ राजसम्बन्धिपुरुषोस्योत्तरपदार्थस्य, 'पीताम्बर' इत्यत्र [illegible] [illegible]नोऽन्यपदार्थस्य, 'धवखदिरा'वित्यत्र साहित्यापन्नधवखदिर[illegible] [illegible]शेष्यतया भानाद् यथायथं लक्षणसमन्वयः। [illegible] [illegible]चारोऽतिव्याप्तिरेव तथापि प्रकृते दोषत्वेन [illegible] [illegible]व्याप्तिरिति। तमेवाभिनयेन 'प्रदर्शयति—त[illegible]

❀ काशिका ❀

[illegible] वागर्थाविवेत्यत्र 'इवेन समासः—' इति समासः। [illegible] [illegible]त्यर्थः। तथा च पूर्वपदार्थनिष्ठमुख्यविशेष्यताकबोध[illegible] [illegible]न राजपुरुष इत्यादावपि राजत्वादिनिष्ठप्रकारतानिरू[illegible] [illegible] न तत्रातिव्याप्तिः, राजादौ तज्जन्यबोधीयमुख्य[illegible] [illegible]। उपकुम्भमित्याद्यव्ययीभावस्य कुम्भसमीपमित्याकारक[illegible] [illegible]जनकत्वाल्लक्षणसंगतिः। उभयपदार्थेति। अनेकपदार्थ[illegible] [illegible]मासस्य नासंग्रहः। परस्परेति। परस्परस्य व्यभि[illegible] [illegible]स्पराभाववद्वृत्तित्वादित्यर्थः। व्यभिचारं प्रदर्शयति—त[illegible] [illegible]णस्याव्याप्तिः। अन्यपदार्थप्राधान्ये गमकमा[illegible] [illegible]घटकत्वाद्यो वि[illegible] इति तात्पर्[illegible]

१ तत् = लिङ्गादित्रिकम्।

प्राधान्यात्तत्पुरुषलक्षणातिव्याप्तिरव्ययीभावाव्याप्तिश्च, 'सुप्प्रतिना मात्रार्थे' इति समासात्। 'अर्द्धपिप्पली'ति तत्पुरुषे पूर्वपदार्थप्राधान्यसत्त्वादव्ययीभावातिव्याप्तिस्तत्पुरुषाव्याप्तिश्च,—'अर्द्धं नपुंसक'मिति समासात्। एवं 'पूर्वकाय' इत्यादौ द्रष्टव्यम्। 'द्वित्रा' इति बहुव्रीहावुभयपदार्थप्राधान्याद् द्वन्द्वातिव्याप्तिर्बहुव्रीह्यव्याप्तिश्च। 'शशकुशपलाश'मित्यादिद्वन्द्वे

❀ दर्पणः ❀

पूर्वपदार्थेति। उन्मत्तादिपदार्थेत्यर्थः, एवमग्रेऽपि। **अव्ययीभावलक्षणेति**। पूर्वपदार्थविशेष्यकबोधजनकत्वरूपतल्लक्षणाऽसत्त्वरूपेत्यर्थः। **अन्यपदार्थप्राधान्यादिति**। समासावटकसप्तम्यर्थाधिकरणविशेष्यकबोधजन-[illegible]त्वरूपे लक्षणसत्त्वरूपेत्यर्थः। **बहुव्रीहीति**। तल्लक्षणेत्यर्थः, एवमग्रेऽपि।

[illegible] शक्तिः। [illegible]

❀ काशिका ❀

[illegible]व्यास्याद्युपर्[illegible]नानिर्दिष्टत्वात् कथमत्राव्ययस्योत्तरपदत्वमित्यत आह—'सुप् प्रतिना' इति। [illegible]क्तुं शक्य[illegible]इति। पिप्पलीसंबन्ध्यर्धमिति ततो बोधोदयात्। भाष्यकारैस्तु—समुदाये दृष्टा इति [illegible]निरूढलक्षणं कायादिशब्दानां पिप्पल्याद्यवयवपरतयार्धपिप्पली-पूर्वकाय इत्यादिः कर्मधारय प्र[illegible] [illegible]त्येकपदवृत्त्यु'अर्धं नपुंसकम्' इत्यादि सूत्रत्रयं न कर्तव्यमत एवोर्ध्वकायादिसिद्धान्तितु[illegible]स्य, [illegible]गाप्यनुष्ठानति[illegible]यसत्त्वेन व्यभिचाराभावेऽप्यन्यो राजेत्यर्थक'राजान्तर'मित्यत्र पूर्व[illegible] तद्दृष्टा-[illegible]सकादिसमासे सर्वमते व्यभिचारो द्रष्टव्यः। भिन्नवाचिनोऽन्तर[illegible]स्यतीति। [illegible] मयूरव्यंसकादिगणे निपातनात् परवल्लिङ्गता, एतेन 'पर[illegible] [illegible]त्वाद्वाक्येपि [illegible]वित्यादि[illegible]णादेस्तत्पुरुषोदाहरणस्य कर्मधारयत्वोपगमेनोत्तरपदार्थ[illegible] [illegible]हुः—[illegible] हि योगादे[illegible] तत्पुरुषग्रहणप्रत्याख्यानेन कथमत्र परवल्लिङ्गतेति दूषणं नि[illegible]मवधान[illegible]ल्पनेन पृथगुप[illegible]तयो[illegible]यबुद्धिस्थयत्किंचित्प्रतियोगिकत्वं व्युत्पत्तिबललभ्यम्। उपस्थितिसम[illegible]कालमेव्ये-नियमत[illegible] संस्[illegible] व्यभिचारो द्रष्टव्यः। दृगब्जेनेत्यादौ मयूरव्यंसकादि[illegible]रिति वैलक्षण्[illegible] [illegible]ण्योपपन्नं सामर्थ्यं[illegible] पूर्वपदार्थप्रधानता च। राजान्तरमिति तद्धितसमासे[illegible]न्ये तु न बोधः, तत्राप्र[illegible]यसंभवात्, 'उपमितं व्याघ्रादिभिः—' इति समासस्तु नात्र [illegible]न्यलभ्यत्वात्। [illegible] स्वामित्वेनो[illegible]जकस्तदुपादान इत्यर्थस्य काव्यप्रकाशे दशमे स्फुटत्वात्कल्पनगौर-[illegible]र विना धर्म[illegible]। पुरेन्दुः सकल इत्यादावनुपात्तधर्मेण सादृश्यासंभवाच्च विषया इति। [illegible]यलक्षणया, डप्रत्य[illegible] प्रवर्तते, अन्यथा 'परवल्लिङ्गम्—' इति सूत्रे '[illegible] [illegible]मिति। रथकारपदेपी[illegible]नः एकदेशिसमासः, अर्धपिप्पलीति,' इति [illegible]ाष्यमित्यर्थः। [illegible] रथकर्मकोत्पादनकर्तृरूपाव[illegible] [illegible]मप्रसंगत्यापरो[illegible] यद्यपि सूत्रम-[illegible]भेदप्[illegible]—तथा चेति। ब्राह्मणादिविषयतये[illegible]ष्टोपस्थित्यै सङ्कोचीन इति सूचयितुं सूत्र[illegible] [illegible]वादिति भावः। उपपत्तौ = [illegible]। न्यूनतां परिहर्तुमाह—

समाहारान्यपदार्थप्राधान्याद् बहुव्रीह्यतिव्याप्तिर्द्वन्द्वाव्याप्तिश्च स्यादिति भावः । सिद्धान्ते त्व'व्ययीभावाधिकारपठितत्वमव्ययीभावत्व'मित्यादि द्रष्टव्यम् । असम्भवश्चैषामित्याह—**भौतपूर्व्यादि**त्यादि । रेखागवयादिनिष्ठ·

❀ दर्पणः ❀

ननु तर्हि कान्यव्ययीभावादिलक्षणानीत्यत आह—**सिद्धान्ते त्विति**। लक्ष्यतावच्छेदकं तु शक्तिसम्बन्धेनाव्ययीभावादिपदवत्त्वम् । भूतपूर्वादीनां लक्ष्यतावच्छेदकानाक्रान्तत्वात्तदसंग्रहो न दोषायेति भावः । जहत्स्वार्थवृत्ति-पक्षमवलम्ब्य मूलमवतारयति—**असम्भवश्चैषामिति** । अस्य 'जहत्स्वार्था वृत्तिपक्ष'इत्यादिः । एषां = लक्षणानाम् । असम्भवः = लक्ष्यमात्रावर्त्तनमित्यर्थः । तत्पक्षे पूर्वोत्तरपदयोस्तत्त्वेन कुत्रापि वृत्तेरभावेन तदर्थघटितानां तेषा[illegible] दावसम्भवादिति भावः । मूले—**भौतेति** । शब्दनित्यतावादिमते य[illegible]

❀ काशिका ❀

[illegible]प्राधान्यादिति, द्वित्रा इत्यतो द्वित्र्यन्यतर इति बोधोत्पत्तेः । द्वन्द्वाति[illegible] क्वचिदन्यतिव्याप्तिरित्यर्थः । एवमग्रेऽपि । **समाहारान्ये**ति । समाहा[illegible] [illegible] विशिष्य [illegible]न्यादित्यर्थः । **द्वन्द्वाव्याप्तिश्चे**ति । धवखदिरावित्यादौतरे[illegible] [illegible]ध्वजकादिसंभवो नेति भावः । वस्तुतस्तु 'चार्थे द्वन्द्वः' इ[illegible] [illegible]त्युक्तभाष्य[illegible] बहुव्रीहावन्यपदार्थस्यैव चार्थसमूहस्यैव प्राधान्यं लभ्यते, तत्र [illegible] [illegible]कसमासस्याप्यलिङ्गासंख्यतापत्तिमाशङ्क्य स्वभावेन परि[illegible] [illegible] समासार्थस्तद्द्रव्यलिङ्गसंख्याग्राहक इति च समाधानमु[illegible] [illegible]त्यद्वन्द्वपरं, तस्य तद्ग्राहित्वाभावात्, तत्रेतरेतरयोग [illegible] [illegible]न त्वनुद्भूतावयवः स इति विशेषः, उद्भूतावयवभेदत्वम् [illegible] संख्यानारोपेऽनुद्भूतावयवभेदत्वम्, इदमेव तिरोहितावयव[illegible] [illegible]लक्षणासंभवो बहुव्रीहिलक्षणातिव्याप्तिश्च द्वन्द्वे बोध्या । [illegible] इत्यादीनामव्ययीभावादिलक्षणत्वं दूषयित्वा सिद्धान्तिमते [illegible] **अव्ययीभावाधिकारे**ति । अव्ययीभावाधिकारान्त[illegible] समवस्थित[illegible] [illegible]रपाकुम्भादेस्तदधिकारे पाठाभावेऽपि न क्षतिः, तत्तद[illegible] [illegible]मविरोधे महि[illegible] [illegible]णत्वाभावात्, समासत्वं प्रागुक्तमेवेति न दोषः । [illegible] परस्परविरोधस्वीक[illegible] [illegible] पदेष्विदवत्त्वमेव त[illegible] घटकत्वाद्यो [illegible] इति तात्पर्[illegible]

१ तत् = लिङ्गादित्रिकम् ।

लाङ्गूलादेर्वास्तवपश्वलक्षणत्ववदेतेषामपि न समासलक्षणत्वम्, बोधकता तु तद्वदेव स्यादिति भावः ॥ २९½ ॥

ननु पूर्वपदार्थप्रधान्यादि समासे सुवचं, तथाहि—'समर्थः पदविधि'रिति सूत्रे भाष्यकारैरनेकधोक्तेष्वपि पक्षेषु—जहत्स्वार्थाऽजहत्स्वार्थपक्षयोरेवैकार्थीभाव-व्यपेक्षारूपयोः पर्यवसानं लभ्यते, तत्राजहत्स्वार्थपक्षे उक्तव्यवस्था नासम्भविनीत्याशङ्कां मनसिकृत्याह—

❀ दर्पणः ❀

पूर्व्यस्याप्यव्ययीभावादावसम्भवादाह—सोपीति । व्यवहारोपीत्यर्थः । रेखेति । अन्यस्य कथमन्यधर्मबोधकत्वमत आशयं प्रकाशयति-सारे—रेखागवयेत्यादि । ...ति । रेखागवयादिवदेवेत्यर्थः, यथा गवयादावविद्यमानमपि रेखागवयादि- शक्तिः । ...पुच्छं गवयादिपुच्छे सादृश्यमूलकाऽभेदाध्यवसायाद् गवयादिबोधकं पूर्वास्याद्युपर्... विद्यमानमपि विग्रहवाक्यनिष्ठपूर्वपदार्थादिप्राधान्यं सादृश्यादव्ययी- ...क्तुं शक्य... मित्यर्थः ॥ २९½ ॥

...निरूढलक्षण... ...र्थवृत्तिपक्षे पूर्वपदार्थप्राधान्यव्यवहारो न पुनर्दुरुपपाद इत्याह... प्रत्येकपदवृत्यु... —नन्विति । अनेकधोक्तेष्विति । 'अथ तेषां ब्रुवतां ...' रेगाप्यनुष्ठानानि... ...राहोस्विदजहत्स्वार्थेत्यादिने'त्यादिः । एकार्थीभाव... तद्दृष्टा- ...कः, व्यपेक्षा तु समस्तपदानां परस्परसाकाङ्क्षत्वम् । ...स्यतीति । ...ति । 'समर्थ'सूत्रभाष्यपर्यालोचनया तु एकार्थीभाव... ...त्वाद्वाक्येपि वित्यादि... ...हुः—... हि

❀ काशिका ❀

योगादे... ...मवधान ...ल्पनेन ...वयादिवदास्थितः, = स्वीकृत इत्यर्थः । भौतपूर्व्यादित्य... पृथगुप... ...तया ...त्वमिति । रेखागवयादिनिष्ठलाङ्गूलादेर्वास्तवपशुगतत्वाभा... ...पस्थितिसमकालमेव्ये- नियमत... संस... ...दृशबोधजनकत्वस्य तत्तत्समासनिष्ठत्वाभावान्न तत्तत्समा... ...थै...रिति वैलक्षण्य... ण्योपपन्न... सामर्थ्ये... ...नानां नैरर्थक्यादिति भावः । बोधकता तद्वदेवेति । ...न्ये तु न बोधः, तत्राप्र... ...यसंभवात्, ... पशुनिष्ठलाङ्गूलादिबोधनद्वारा वास्तवपशुबोधकत्वं, तथा ... ...न्यलभ्यत्वात् । ...स्वामित्वेनो... तत्तदर्थविशेष्यकबोधजनकतया तत्तदाश्रये तत्तत्सम... ...कल्पनगौर- ...रं विना धर्म... ...विषया इति ।

...यलक्षणया, ...प्रत्य... ...त्र प्राचीनोक्तानि लक्षणानि नासम्भवदुक्तिका... ...ति । रथकारपदेपी... ...कार्थीभावः, अजहत्स्वार्थत्वमेव व्यपेक्षेति भाष्यमित्यर्थः । ...परि...ः, रथकर्मकोत्पादनकर्तृरूपावच्छि... ...उपस्थि... यद्यपि सूत्रम- ...अभेद... —तथा चेति । ब्राह्मणादिविषयतयै... ...पस्थित्यै... ...चान इति सूचयितुं ...स्यादिति भावः । उपपत्तौ = ...श्वापः । न्यूनतां परिहर्तुमाह—

जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा ॥ ३० ॥
भेदः, संसर्ग, उभयश्चेति वाच्यव्यवस्थितेः । ३० ।

जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था, पदे वर्णवद्वृत्तौ पदानामानर्थक्यमित्यर्थः । अयं भावः—"समासशक्त्यैव राजविशिष्टपुरुषभानसम्भवे न राजपुरुषपदयोरपि पुनस्तद्बोधकत्वं कल्प्यं, वृषभयावकादिपदेषु वृषादिपदानामिव, अन्यथा राजपदेन विग्रहवाक्य इव, राज्ञः

※ दर्पणः ※

पक्ष एव वृत्तिद्वयस्वीकारो बोद्धृभेदेन, किन्तु—'अथ ये वृत्तिं वर्तयन्ति किन्ते आहु'रित्यादिभाष्याद् वाक्यादेवेयं वृत्तिर्निष्पन्नेति मतमवलम्ब्याऽयं वि... लभ्यते । 'समासशक्त्यैवे'त्येवकारेणावयवशक्तिव्यवच्छेदः । दृष्टान्तम... दिपदानामिवेति । आनुपूर्व्यन्तरघटकत्वाभावविशिष्टानुपूर्व्या एव ... कत्वेन वृषभादिपदान्तरगतवृषादिसमवेतानुपूर्व्याः शक्ततानवच्छेदक...

※ काशिका ※

... क्वचिदन... संभविनीति । उपकुम्भमित्याद्यव्ययीभावादौ तस्य संभवात् । यथा ... विशिष्य ... प्रदोपसत्त्वेऽपि समनन्तरमभिहितोऽसंभवोऽसंभवीत्यर्थः । जहत्स्वा... —' इति सूत्रे सप्तमीग्रहणाज्ज्ञापकाद्व्यधिकरणानामपि पदान... जहति स्वानि = वृत्तिघटकीभूतपदानि यंस जहत्स्वस्तादृशाऽ... पि संभवतीति परे । वृत्तौ पदानामानर्थक्यमिति । ... दानामानर्थक्यानङ्गीकारे पदघटकवर्णानामप्यानर्थक्यं न स्या... नां कुत्राप्यर्थाबोधकतयानर्थक्येऽपि राजादिपदानां ... त्पादेन च न नैरर्थक्यसंभव इत्याशङ्क्याह—अ... स्वामित्वादिसंबन्धेन राजविशिष्टपुरुषेत्यर्थः । राज्ञ... ... भानाद्वृत्तिवाक्ययोः समानार्थत्वनिर्वाहः । वाक्यजबो... राजपुरुषादिसमुदायस्य राजसंबन्धविशिष्टपुरुषबोधकत्वमङ्गी... तद्बोधकत्वम् = राजादिबोधकत्वम् । कल्प्यमिति । समवस्थित... बोधावृत्तिप्रसङ्गाच्चेति भावः । ननु संभेदेनान्यतरस्याविरोधे महि... वृत्तिप्रसङ्गः, तथा च वृत्तिघटकपदानामर्थबोधकत्वेऽपरविरोधस्वीक... घटकत्वाद्यो विग्र... इति तात्पर्...

... माशयः ... घटमान ... मात्रस्य ... ननु ... त्युक्तमा ... कार ... प्रणवग्रह ... सिद्धिः, ... व्यक्तीभा ... स्थलेऽपि ... देहे ... त्येव प्रत्यक्षेण ... रस्ताः । ... मादः ... सेद्धमिति ... भेदः ... व्याख्यानम ... रणशब्दान ... चे = उपास्य ...

१ तत्र = लिङ्गादित्रिकम् ।

स्वातन्त्र्येणोपस्थितिसत्त्वाद्—'ऋद्धस्य राज्ञः पुरुष' इत्यत्रेव 'ऋद्धस्य राजपुरुष' इत्यस्याप्यापत्ते''रिति। अजहदिति। न जहति पदानि स्वार्थं

❀ दर्पणः ❀

सान्तर्गतराजानुपूर्व्याः शक्ततावच्छेदकत्वासम्भवादित्यर्थः, अन्यथा 'रामादिपदा-दग्न्यादीनामवयवार्थानामपि पदार्थोपस्थितिशाब्दबोधयोरापत्तिरवा-तरसुब्रुत्पत्त्या-पत्तिर्धनं वनमित्यादौ जश्त्वापत्तिश्च, वाक्ये तु पदान्यर्थवन्त्येव, राजसम्बन्धी पुरुष इत्याद्यर्थे राज्ञः पुरुषः, पुरुषो राज्ञ इत्यादिविशिष्टानुपूर्वीद्वयस्य शक्यता-वच्छेदकत्वकल्पनापेक्षया पदशक्तिकल्पनाया एव लघीयस्त्वादिति भावः। नचै-तत्कल्पे विशिष्टरूपोपादानविहिताऽऽत्वानापत्त्या,—महाबाहुः, सुपन्था इत्यादौ ...नर्थकत्वाद्, एवमसमर्थवत्त्वनिबन्धनप्रातिपदिकत्वाभावेन नलोपाद्यनापत्तिश्चेति ...शक्तिः। ...प्रागभाविनमर्थवत्त्वमारोप्य तत्तत्तात्पर्यस्य सूपपादत्वात्, इदं च,— ...स्यास्याद्युपरि द्वयोश्चे'तिसूत्रे भाष्ये स्पष्टम्। नचैवं,—'वाप्यश्व' इत्यादौ न दोषो ...क्तुं शक्या... वृत्तावानर्थक्यादिती'दूतौ च ससम्यर्थे' इति सूत्रस्थभाष्यविरोधो ...निरूढलक्षणा आरोपितार्थवत्त्वस्य समासान्तर्गतपदेषु स्वीकारादिति वाच्यम्; ...त्येकपदवृत्त्युद्देश्येनारोपितार्थस्य तत्राग्रहणादित्याशयात्। एकस्यैव पदसमुदाय, ...रेगाप्यनुष्ठानन्वित्वानर्थवत्त्वे च प्रयोगानुरोध एव शरणम्, योगार्थ तद्दृष्टा-... शक्त्यभ्युपगमान्न तदुच्छेदोऽपि, नचात्र पक्षे राजा...स्यतीति। ...त्तद्वानं न स्यात्तस्माचैकपदार्थोऽपरपदार्थे विशेषणमिति ...त्वाद्वाक्येऽपि

वित्यादि...

❀ काशिका ❀

...हुः—...हि योगादे... वृषवृषभादिशब्दानां पर्यायतया वृषभशब्दघटकवृषशक्ति... अवधान ...ल्पनेन पृथगुप... तयोः समानार्थत्वाभावात् समासघटकराजादिपदस्य नैरर्थक्येपस्थितिसमकालमेव्ये-नियमत... संख्यावच्छेदकाघटकेत्यादिनियम इति प्रकृते न दोषः, ...रिति वैलक्षण्य... ण्योपप्र... सामर्थ्य... कसमुदायनिष्ठानुपूर्व्येनुप्रविष्ठाया अवयवानुपूर्व्याः शक्ये तु न बोधः, तत्राप्र... यसंभवात्, एवं च समासे नायं अनियमः किं तु समासे एवेत्याशङ्कान्यलभ्यत्वात्। ... स्वामित्वेनोपनेति। अन्यथा = समासाद्यवयवस्य स्वार्थबोधकत्वे। ...कल्पनगौर-... विना ... र्थत्वे तु राजाद्यर्थस्य पुरुषादिविशेषणतयैवोपस्थित्यविषया इति। ...यलक्षणया, ... शत्रन्तप्रकृतिकजसन्तम्। अत्रापि न जहति स्वानि या... ...मिति। रथकारपदेऽपि... गर्भो बहुव्रीहिर्बोध्यः। ननु समुदायशक्त्यैव राजा... प्यमित्यर्थः। ...परिहारः, रथकर्मकोत्पादनकर्तृरूपार्थ... भवतीत्यजहत्स्वार्थत्व यद्यपि सूत्रम-अभेदपू... तथा चेति। ब्राह्मणादिविषयतयै... शिष्टोपस्थित्यै... योचान इति सूचयितुं ... वादिति भावः। उपपत्तौ = ... स्वार्थः। न्यूनतां परिहर्तुमाह—

यस्यां सा अजहत्स्वार्था । अयमभिप्रायः—राजपुरुषादिसमासादौ नातिरिक्ता शक्तिः, कल्पकाभावात्, क्लृप्तराजादिपदादेवार्थोपस्थितिसम्भवे तत्कल्पनस्य गौरवपराहतत्वाच्च, क्लृप्तशक्तित्यागोपि अप्रामाणिकः

❀ दर्पणः ❀

वाच्यम्, विशिष्टेनैव राजादिविशिष्टपुरुषाद्युपस्थापनेनाद्यदोषाभावात्, अथवाऽन्वयाद् विशेषणं भवतीति भाष्येण द्वितीयस्यापि समाधानात्, 'निष्कीर्णास्वपि सुमनःस्वामोदान्वयमात्रेण यथा चम्पकपुटव्यवहारस्तथा सदृशार्थान्वयमात्रेण राजादिपदार्थः पुरुषे विशेषणमिति व्यवहार इति तदर्थं इति जहत्स्वार्थवृत्तिपक्षोपपत्तिः । परन्त्वे"वं हि दृश्यते लोके पुरुषोयं परकर्मणि प्रवर्त्तमानः स्वं कर्म जहाति, तद्यथा तक्षा राजकर्मणि प्रवर्त्तमानः स्वं कर्म जहाति, एवं य[...] राजा पुरुषार्थे वर्त्तमानः स्वमर्थं जह्यादुपगुश्चाऽपत्यार्थे वर्त्तमानः स्व[...]दिति भाष्यादेतत्कल्पेऽपि पूर्वपदार्थ एव जहत्स्वार्थत्वं लभ्यते इति । [...]वृत्तौ व्यपेक्षारूपसामर्थ्याभ्युपगमे इत्यर्थः । 'इत्यस्याऽपी'त्यपिना[...] [...]याश्चे'त्येकत्र द्वयमिति विषयताशालिबोधजनकस्य समुच्चयः । [...] [...] क्वचिद[...] तु पदार्थैकदेशत्वाद्भेदेपि शक्त्यभ्युपगमेन राजकी[...] [...] विशिष्य [...]योगाच्च न सेति भावः । अजहत्स्वार्थवृत्तिपक्षस्य [...] [...]पदवाचनाद् "व्यपेक्षांसामर्थ्यमेक' इत्येकीयमताश्रितामनुसृत्यास[...] [...]त्युक्तम् । नातिरिक्तेति । क्लृप्तप्रत्येकवृत्त्यतिरिक्तेत्यर्थः । [...] [...] प्रणवव्रह्मणस्याभावादित्यर्थः । ननु विशिष्टार्थानुपपत्तिं [...] [...]सिद्धिः, [...] आह—क्लृप्त इति । विशिष्टशक्तिकल्पनस्ये[...] [...] व्यक्तीभ[...] प्रत्येकपदशक्तिकल्पना, सैव नेति क्व गौरवा[...] [...] वृत्तिप्राक्काले क्लृप्ता या प्रत्येकपदशक्तिस्तत्प[...] [...]त्येव प्रत्यक्षेण [...]व शब्दस्यार्थवत्त्वानर्थकत्वयोर्विरुद्धत्वात्, न[...]

❀ काशिका ❀

[...]रताः । ता[...] [...]त् । तस्[...]राकरोति—अयमभिप्राय इति । ननु राजादिसंबन्धी[...] [...]सिद्धमिति वि[...]या भानमनुपस्थितस्याप्यविरुद्धमिति वाच्यम्, ना[...] एताः समवस्थित[...] व्याख्यानमा[...]दित्यत आह—क्लृप्तेति । गौरवपराहतत्वादिति [...]रस्परमविरोधे महि[...] [...]रणशब्दान[...]विषयेति स्वत्वादिसंसर्गकबोधो[...] [...]बाधक[...] परस्परविरोधस्वीक[...] [...] [...]घटैकत्वाद्यो विरुद्ध इति तात्प[...]

[...]दौ [...]भक् शक्त[...]

१ तत् = लिङ्गादित्रिकम् ।

कल्प्येत, तथाचाकाङ्क्षादिवशात् क्लृप्तशक्त्यैव विशिष्टार्थबोधः। अयमेव व्यपेक्षापक्षो मतान्तरत्वेन भाष्यकारैरुक्तः। नचात्र मते समासे 'ऋद्धस्ये'ति विशेषणान्वयापत्तिः 'सविशेषणानां वृत्तिर्न, वृत्तस्य वा विशेषणयोगो ने'ति वार्तिकात्। तथाचैतन्मतवादिनां पूर्वोत्तरपदार्थसत्त्वाद् 'पूर्वपदार्थप्रधान' इत्यादिव्यवस्था सूपपादेति भावः।

❀ दर्पणः ❀

ऽनुपपत्त्या च वृत्तिदशायां तत्स्वीकारस्यैवोचितत्वादिति भावः। ननु प्रत्येकशक्त्या तत्तत्पदार्थोपस्थितावपि विशिष्टे शक्त्यनङ्गीकारेण तदनुपस्थित्या' कथं तस्य शाब्द-
विषयतेत्यत आह—तथाचेति। आकाङ्क्षेति। आदिपदाद्योग्यतादिपरिग्रहः,
शक्तिः। [illegible]हितपुरुषपदत्वादिरूपाकाङ्क्षादिकारणसमवधानादित्यर्थः। तथा च
प्रत्यास्याद्युप[illegible]पस्थितिसहकृताकाङ्क्षादिभिरेव विशिष्टबोधसम्भवे न तत्पूर्वं विशिष्टोप-
[illegible]क्तुं शक्य[illegible]स्थै' सा कल्प्येति भावः। अयमेवेति। 'अयमभिप्राय' इत्यादिनोक्त
निरूढलक्षण[illegible]भाष्यकारै'रित्यस्य 'परस्परव्यपेक्षां सामर्थ्यमेक इत्यादिने'ति शेषः।
प्रत्येकपदवृत्त्यु[illegible]मुद्धरति—नचात्रेति। अन्वयापत्तिरिति,—यथाश्रुताभिप्राये[illegible]उक्त्य,
रेणाप्यनुष्ठानन[illegible]ासमापत्तेरभावस्य वक्ष्यमाणत्वात्। प्रसङ्गादिति। स[illegible] तद्दृष्टा-
[illegible]तावच्छेदकधर्मवत्त्वादित्यर्थः। वृत्तिभेदमिति [illegible]न्स्यतीति।
व [illegible]भेदं = भेदसंसर्गादिरूपार्थकृतमित्यर्थः। तदुक्तं भाष्ये,[illegible] स्वाद्वाक्येऽपि
वित्यादि[illegible] संसर्गो वा, अपर आह—भेदसंसर्गौ वा सामर्थ्यमिति[illegible] हुः—[illegible] हि
योगादे[illegible]

❀ काशिका ❀

[illegible]मवधान[illegible]ल्पनेन
पृथगुप[illegible]पत्ता[illegible]तया[illegible]जपदस्य राजसंबन्धिनि लक्षणा, राजसंबन्धिनः पुरुषेण[illegible]पस्थितिसमकालमेव्ये-
नियमत[illegible] संसन्तरत्वेनेति। तथा च समर्थसूत्रे भाष्यं—'परस्परव्य[illegible]थ[illegible]रिति वैलक्षण्
ण्योपपन्नं साम[illegible]र्थ्यमहावपि समुदायशक्येऽन्यपदार्थे चित्राद्यन्विताया गोः [illegible]न्ये तु न बोधः,
तत्राप्र[illegible]यसंभवात्, व्यपेक्षासंभवः। द्वन्द्वेऽपि समुदायार्थे समूहे वर्तिपदार्थ[illegible]न्यलभ्यत्वात्।
क[illegible] स्वामित्वेनो[illegible]पि तत्संभवः। अन्यपदार्थादेः समुदायशक्यत्वे मानं तु–[illegible]कल्पनगौर-
[illegible]र विना ध[illegible]त्रमित्यवगन्तव्यम्। व्यपेक्षाविरहादेव भार्या राज्ञः पुरुषो[illegible] विषया इति।
[illegible]यलक्षणया, ऽप्रत्यय[illegible]ः। विशेषणान्वयापत्तिरिति। तद्धेतुस्वातन्त्र्येणो[illegible]
[illegible]ति। रथकारपदेपी[illegible]शक्त्यन्तरकल्पनापेक्षयैतद्वचनारम्भो लघीयानिति भा[illegible] ाष्यमित्यर्थः।
[illegible]संभवो [illegible] भावः। आवश्यकश्चायं पक्षः
इत्या[illegible]परिग्रहः, रथकर्मकोत्पादनकर्तृरूपावय[illegible] [illegible]प यद्यपि सूत्रम-
अभेदप[illegible]—तथा चेति। ब्राह्मणादिविषयतयै[illegible]ष्टोपस्थित्यै[illegible]चीन इति सूचयितुं
सत्र[illegible]वादिति भावः। उपपत्तौ = [illegible]स्वार्थः। न्यूनतां परिहर्तुमाह—

प्रसङ्गाद्वृत्तिभेदमपि निरूपयति—ते पुनरिति । द्वे अपि वृत्ती त्रिविधे,–वाच्यत्रैविध्यात् । वाच्यमेवाह—भेद इत्यादि । भेदः = अन्योन्याभावः, तथा च—'राजपुरुष' इत्यादावराजकीयभिन्न इति बोधः, अस्यावाच्यत्वे च,—'राजपुरुषः सुन्दर' इतिवद्, 'राजपुरुषो देवदत्तस्य चे'त्यपि स्यात्, वाच्यत्वे तद्विरोधान्नैवं प्रयोग इति भावः ।

❀ दर्पणः ❀

भेदसंसर्गौ न स्यातां तदा सामर्थ्यमेव न स्यात्तदात्मकत्वात्सामर्थ्यस्येत्यतस्तदर्थकत्वं तस्येति तद्भावः । भेद इति । संसर्गाविनाभावित्वादनुमीयमानतादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभाव इत्यर्थः । तदेवाह—अन्योन्याभाव [illegible]

❀ काशिका ❀

रूपसामर्थ्यस्य समर्थसूत्रे परिग्रहे पराङ्गवद्भावासंग्रहः स्यात्, तत्रैकार्थीभाव[illegible] चेष्टापत्तिः, तथा सति 'यत्ते दिवो दुहितर्मर्तभोजनम्' इत्यत्र दिव इत्यस्य पराङ्गव[illegible] [illegible] निघातो यथा भवति, तथा 'ऋतेन मित्रावरुणावृतावृधावृतस्पृशा' इत्यत्र ऋतेने[illegible] [illegible]याश्च ए्वेतामन्त्रिताद्युदात्ततापत्तिः, पदात् परत्वाभावेन पादादिस्थितत्वेन चाष्टमि[illegible] [illegible] तु [illegible]मर्थ्यपक्षे तु समर्थपरिभाषाप्रवृत्तौ सत्यां ऋतेनेत्यस्य ध्यानशाथे[illegible] [illegible]प्रयोगक्रियायामेवान्वयेन मित्रावरुणाभ्यामित्यनेन व्यपेक्षाभावान्नोक्तदोष[illegible] [illegible]नाद् ति बोध्यम् । द्वे अपि वृत्तीति । जहत्स्वार्थाजहत्स्वार्थरूपे द्वे अपि [illegible] [illegible]त्युक्त[illegible] [illegible]शेपेऽपि प्रयोगदर्शनादाह—भेदोऽन्योन्याभाव इति । ननु भे[illegible] [illegible] प्रणवभ्रवणस्ये ? पुरुषस्य, राजविशिष्टपुरुषस्य वा भेदो—राज्ञि प्रतीयते, [illegible] [illegible]सिद्धिः, [illegible] आद्ये विशेषणतयान्वयासंभवात्, राजभेदस्य राजसंबन्धिपु[illegible] [illegible] व्यक्तीभ[illegible]त्येक, वक्ष्यमाणप्रयोजनानिर्वाहाच्च । न द्वितीयः—पुरु[illegible] [illegible]वृत्तिप्रताकभेदस्य राजनि वाधितत्वात्, तत्प्रतियोगिकभेद[illegible] [illegible]देव प्रत्यक्षेण [illegible]व [illegible]नत्वाद्यवच्छिन्नप्रतियोगिकभेदस्य पूर्वपदार्थे सत्त्वेऽपि तद्[illegible] [illegible]रस्ताः । ता[illegible] [illegible]तृतीयोऽपि, तद्बोधस्यानुपयोगादित्याशङ्कामपाकर्तुमाह—त[illegible] [illegible]ात् । तस्[illegible] [illegible]राकरोत्यर्थः । इति बोध इति । राजभिन्नासंबन्धीति बोध [illegible] [illegible]सेद्धमिति वि[illegible] [illegible]या [illegible]; तादृशबोधस्य राजसंबन्धिभिन्नभेदप्रकारकतया रा[illegible]ताः समवस्थित[illegible] [illegible]व्याख्यानमा[illegible]दित्यसंबन्धकत्वं न त्वितरसंबन्धबोधं प्रतीति राजपुरुषो [illegible]परमविरोधे महि[illegible] [illegible]रणशब्दानां विपर्येतिप्ररूप इति समुदायस्य [illegible] परस्परविरोधस्वीक[illegible] [illegible] वपेक्षाह्यः, [illegible]घटकत्वाद्यो विरोध इति तात्पर्[illegible] [illegible]दौ [illegible]शक् शक्त[illegible]

१ तत् = लिङ्गादित्रिकम् ।

'राजसम्बन्धवा'नित्येव शाब्दं भानं, भेदस्तूत्तरकालमुपतिष्ठत इत्याशयेनाह—संसर्ग इति। विनिगमनाविरहम्, अस्वामिकेपि राजपुरुष इत्यादिप्रयोगापत्तिश्च—मनसि कृत्वोभयं वाच्यमित्याह—उभयं चेति। तथाचा'राजकीयभिन्नो राजसम्बन्धवांश्चाय'मिति बोधः ॥३०३॥

❀ दर्पणः ❀

संसर्ग इति। भेदाविनाभावित्वादनुमीयमानभेदो = भेदमूलकः संसर्ग इत्यर्थः। वस्तुतस्तु 'भेदसंसर्गौ वा सामर्थ्य'मिति भाष्यस्य राजादिपदसमभिव्याहृतपुरुषादिपदेन राजादिविशिष्टपुरुषादिरूपविशिष्टार्थस्यैव बोध इत्यभिप्रायः, न तु भेदे पृथक्शक्तिबोधकं तत्, तादृशबोधाननुभवात्,—'रामकृष्णा'वित्यादिद्वन्द्वे शक्तिः। [illegible]च्यताया दुरुपपादत्वाच्चेति ॥३०३॥

❀ काशिका ❀

[illegible]

[illegible]क्तुं शक्य[illegible]त्वात्, यदि सर्वथा तादृशप्रयोगो नेष्यते,—तदा संबन्धसामान्यमेवोपादेयम्। परं निरूढलक्षणयुत्तरग्रन्थस्वारस्यं पूर्वकल्प एवेति प्रतीयते। 'राजा पुरुषं निवर्तयत्यन्येभ्यः' [illegible]त्येकपदद्वयुष्य स्वारस्यं च एतत्पक्षे। राजसंबन्धी पुरुष इति बोधस्तु व्यक्तिविशेषुद्स्य, [illegible]नुष्ठाननि[illegible]हेतुकानुमितिरूपपाष्णिक इति बोध्यम्। प्रयोगापत्ति चेति। तद्दृष्टा- [illegible]भेदस्य सत्त्वादिति भावः। उभयम् = भेदः संसर्गश्चेत्यर्थः। परे तु[illegible]स्यतीति।

[illegible]नपदानां स्वार्थानुपस्थापकत्वं, तथा च राजादिपदसांनिध्यात् पुरुषपदवाद्वाक्येपि वित्यादि[illegible]बोधकम्, पुटे चम्पकपुष्पाद्यसत्त्वेऽप्यामोदान्वयमादाय चम्पकपुटो [illegible] हि योगादे[illegible] [illegible]जपदार्थः पुरुषे विशेषणमिति व्यवहार उपपद्यते। [illegible]मवधा[illegible] [illegible]ल्पनेन पृथगुप[illegible] [illegible]पदानि स्वार्थं यस्यां सेत्यर्थ उक्तो हेलराजीये। तदुपस्थितिसमकालमेव्ये- नियमत[illegible] सं[illegible]पणं भवत्ययं मल्लिकापुटोऽयं चम्पकपुटः—इति, निष्कर्ष[illegible]रिति वैलक्षण्[illegible] [illegible]पपन्नं साम[illegible] मल्लिकापुटोऽयं चम्पकपुट इति' इति। यद्वा भेदसंसर्गये तु न बोधः, तत्राभ[illegible]यसंभवात्, [illegible]ानात् पुरुषपदमेव राजभिन्नास्वामिकराजस्वामिकपुरुषमेव नान्यलभ्यत्वात्। [illegible] स्वामित्वेनो[illegible]न्धः, राजपदस्य स्वार्थाभावात्। अतो न राज्ञः पुरुषोऽश्वश्चेकल्पनगौर- वा[illegible]र विना [illegible]पि पुरुषस्य स्वाम्यन्तरेण संबन्धः, पुरुषत्वरूपेणापि तद्विषया इति। [illegible]यलक्षणया, [illegible]प्रत्य[illegible]नस्यापि देवदत्तस्वामिकः पुरुष इति बोधविरोधित्व [illegible]मिति। रथकारपदेपी[illegible]खण्डार्थबोधवत् प्रकृते पुरुषत्वेन रूपेण व्यक्तिर्वाच्यमित्यर्थः। इत्या[illegible]परिहृ[illegible], रथकर्मकोत्पादनकर्तृरूपार्थमूलप्रतिपादनपरेण भेदसंसर्गौप यद्यपि सूत्रम- [illegible]भेद[illegible]—तथा चेति। ब्राह्मणादिविषयेतयै[illegible]सक्तं, पुरुष इत्यालोचान इति सूचयितुं [illegible] [illegible]त्वादिति भावः। उपपत्तौ = [illegible] स्वाक्षि। न्यूनतां परिहर्तुमाह—

व्यपेक्षावादस्यैवं युक्तिभाष्यविरुद्धत्वात्तन्मूलकः 'पूर्वपदार्थप्रधान'

❀ दर्पणः ❀

व्यपेक्षावादस्येति । 'अव्यवहितोक्तविधया वर्णितस्ये'ति शेषः । उक्ताऽजहत्स्वार्थपक्षस्य तु निर्दुष्टत्वमेवेति भावः । **एवं युक्तीति** । उक्तवक्ष्यमाणैर्युक्तिभिरित्यर्थः । **भाष्येति** । 'नानाकारकान्निघातयुष्मदस्मदादेशप्रतिषेध' इत्यादिभाष्यदूषितत्वादित्यर्थः । **वृत्तिमात्रेति** । मात्रपदं कृत्स्नार्थकम्, अजहत्स्वार्थलक्षणया वृत्तिपञ्चकोपस्थापकमित्यर्थः । **वाक्याभिधान इति** । तदर्थाभिधान इत्यर्थः । 'भाष्या'-दित्यस्य,—समर्थानां पदवचन'मित्यादिः । मूले,—**पङ्कजशब्दवदिति**—सप्तम्यन्ताद्वतिः, उपमेये सप्तमीदर्शनात्, पङ्कजशब्दे यथावयवशक्त्यतिरिक्तशक्तिस्तद्वत्समासेपीत्यर्थः । न च पङ्कजपदे रूढिस्वीकारे मानाभावः, [illegible] पद्मत्वविशिष्टप्रतीतेरेव मानत्वात्, पदान्नियतोपस्थिते रूढ्येकसाध्यत्वात् [illegible] योगेन मुकुदस्यापि बोधप्रसङ्गाच्च, रूढिस्वीकारेप्युद्भित्पदेन वृक्षादे[illegible] पङ्कजपदेन कुमुदमपि बोध्यत इति तु न, यत्र योगरूढिभ्यामेकार्थबोध[illegible] यौगिकार्थबोधे रूढेः प्रतिबन्धकत्वकल्पनात् । अथवा—रूढ्या [illegible]

[illegible] याश्च [illegible]

❀ काशिका ❀

[illegible] विशिसे [illegible] तु [illegible] त्केसुभयतो व्यवच्छिन्ने यदि स्वार्थं जहाति कामं जहातु' इति भा[illegible]

[illegible] टमान [illegible] पदवाच्य [illegible] ति त्र स्वाम्यन्तरादित्युक्त्या राजरूपस्वामिनोऽनिवृत्तिलाभेन तत्संसर्ग उक्त[illegible]

ननु सात्रस्य [illegible] त्युर [illegible] शेषविषयत्वं सूच्यते । बोधविषयत्वे संसर्गभेदप्रतियोगितयान्वयाय राजपदार्[illegible]

[illegible] कार [illegible] प्रणव [illegible] ण १भृत्यागकथनासंगत्यापत्तेः । न च पुरुषपदेनैव संसर्गभेदश्[illegible]

[illegible] सिद्धिः, [illegible] भेदे रिति वाच्यम्, अथवान्वयाद्विशेषणं भवतीति पूर्वकल[illegible]

[illegible] शब्दन ना [illegible] कृतद्र [illegible] व्यक्तीभि [illegible] णो निवर्तयतीत्युक्त्या वा वाच्यत्वमेव तयोर्लभ्यते, न [illegible]

[illegible] पुंस [illegible] थैलेसि [illegible] गतारामिभेदबोधश्च कस्यचित् संमतः । एवं द्वन्द्वबहुव्रीह्यो[illegible]

[illegible] भृत्यत्र [illegible] स्येव प्रत्यक्षेण [illegible] नत्वातेस्तु तत्र नासंभवस्तथाविधस्यैवान्यपदार्थस्य समूहस्[illegible]

[illegible] रस्ताः । ता [illegible] तृतीयेहुः । कृष्णश्रित इत्यादितोऽपि कृष्णमात्रश्रितः श्रितत्वेन रू[illegible]

[illegible] माद [illegible] तात् । तस्[illegible] म [illegible] त्यर्थतो विस्तरोऽनुसंधेय इत्यलम् । संबन्धादन्वय इति पू[illegible]

[illegible] सेद्धमिति वि [illegible] भेद [illegible] यं, । भूतपूर्वगत्यार्थवरत्नमादायात्वादिप्रवृत्तिः । यथा[illegible] समवस्थित

[illegible] व्याख्यानमा [illegible] वन्ति प्रश्नोत्तरभूते वेदान्तिमते प्रकृष्टप्रकाश इति [illegible] रमविरोधे महि[illegible]

[illegible] रणशब्दान [illegible] ये = उपस्थ [illegible] विपर्यासि [illegible] परत्वं चन्द्रशब्दस्य ग्राहयित्वा [illegible] परस्परविरोधस्वीक[illegible]

[illegible] ट्टिपदस्य सार्थक्यं [illegible] टकत्वाद्या [illegible] इति तात्पर्[illegible]

१ तत् = लिङ्गादित्रिकम् । [illegible] विधप्रका [illegible] दौ [illegible] शक् शत्त

इत्याद्युत्सर्गोऽप्ययुक्तः, किन्तु 'रेखागवय'न्यायेनोत्सर्गोऽपि परम्परयैव बोधक इत्याशयेन समाधत्ते—

समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत् ॥३१॥
बहूनां वृत्तिधर्माणां वचनैरेव साधने—।
स्यान्महद् गौरवं,—तस्मादेकार्थीभाव आश्रितः ॥३२॥

❀ दर्पणः ❀

पद्ममेव कर्तृव्यक्तिशक्त'ड'प्रत्ययेन पङ्कजनिकर्तृतया बोध्यते, 'बाधकं विना व्यक्तिवचनानां सन्निहितव्यक्तिविशेषपरत्व'मिति नियमात्। व्यक्तिवचनानां=यत्किञ्चिद्-व्यक्तितात्पर्य्यकाणां, सन्निहितो यो व्यक्तिविशेषस्तत्परत्वमिति तदर्थः। 'घटेन जल-... शक्तिः। ...सन्निहितसच्छिद्रव्यक्तिबोधवारणाय,—तत्र 'बाधकं विने'ति। तथाच ...स्वाम्याद्युप...सत्त्वेन तदेव योगेनापि प्रतीयते, न कुमुदम्, प्रथमकल्पस्तु—रूढि-...वक्तुं शक्य...ह्याभावानवगाहित्वाज्जनकज्ञानाविघटकत्वाच्च प्रतिबन्धकत्वासम्भवाच्च निरूढलक्षण...द्धेरनायत्या मणिमन्त्रादिन्यायेन प्रतिबन्धकत्वाभ्युपगमेप्यन्यत्र तत्र ...प्रत्येकपदवृत्त्यु...त्वात्। इत्थञ्च पद्मानुभवसामग्रीसत्त्वात्तस्यैव बोधो, न कुमुदस्य, ...रेणाप्यनुष्ठानति...यां फलानुत्पादे प्रतिबन्धकत्वापेक्षणादिति तार्किकाः, तद्दृष्टा-...मान्ये समुदाये शक्तिरावश्यकीति कथने पूर्वोक्तार्थ एव पर्य्यवस्यतीति।

...जहत्स्वार्थवृत्तिकल्पे विशिष्टशक्तेः सम्बन्धांशे विरामस्योक्तत्वाद्वाक्येऽपि ...वित्यादि...श एव तैः स्वीकारात्—को वृत्तिवाक्ययोर्विशेष इति चेदत्राहुः—... हि योगादे... पदार्थोपस्थितिकाले नियमतः सम्बन्धांश उद्बोधका...समवधा...कल्पनेन पृथगुप...त्तयोः पदार्थयोः संसर्गबोधः, वृत्तौ तु पदार्थोपस्थितिसमकालमेव्ये-नियमत... संसर्गांशे उद्बोधकसमवधानकल्पनाद्विशिष्टार्थो...स्थितिरिति वैलक्षण्यं ...प्योपपन्नं साम...र्थ्ये एव प्रासोदकादौ विशेष्यविशेषणभाववैपरीत्ये तु न बोधः, तन्त्राप्र...यसंभवात्, ...तीयार्थः सम्बन्धश्चोभयं समुदायशक्तिसाध्यम्, अनन्यलभ्यत्वात्। ...स्वामित्वेनोदिपदाद्राजादेरुपस्थितिसम्भवेन तत्र समुदायशक्तिकल्पनगौर-वाच्च...रं विना धर्मिभेदान्वय' इत्यादिव्युत्पत्तयश्च पृथगुपस्थितनामार्थविषया इति।

...र्यलक्षणया, डप्रत्य...

❀ काशिका ❀

...मिति। रथकारपदेऽपी...वं सूत्रमभिन्नतरकं भवति' इत्यादिसमर्थसूत्रस्थभाष्यमित्यर्थः। इत्यादिपरिग्रहः, रथकर्मकोत्पादनकर्तृरूपावेद्धपेक्षारूपैकविधसामर्थ्यपक्षेऽपि यद्यपि सूत्रम-भेदपक्षे...—तथा चेति। ब्राह्मणादिविषयतयैकभावपक्ष एव समीचीन इति सूचयितुं सूत्रपा... ...त्वादिति भावः। उपपत्तौ=...इत्यर्थः। न्यूनतां परिहर्तुमाह—

समास इति—वृत्तिमात्रोपलक्षणम्, 'समर्थः पदविधि'रित्यत्र पद-मुद्दिश्य यो विधीयते—समासादिः—स समर्थः—विग्रहवाक्याभिधाने शक्तः—सन्—साधुरिति सूत्रार्थस्य भाष्याल्लाभात्। पदोद्देश्यकविधित्वञ्च—कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपासु पञ्चस्वपि वृत्तिष्वस्त्येव। विशिष्ट-शक्त्यस्वीकर्त्तॄणां व्यपेक्षावादिनां मते दूषणं शक्तिसाधकमेवेत्याशयेनाह—

❀ दर्पणः ❀

जहत्स्वार्थवृत्तिपक्षे पङ्कजशब्दस्य पूर्वोक्तरीत्या दृष्टान्तत्वासम्भवेनान्यथा मूलमवतारयति—विशिष्टशक्त्यस्वीकर्त्तॄणामिति। साधकमिति। विशिष्ट-शक्तिसाधकमेवेत्यर्थः, व्यपेक्षावादिनये 'राजपुरुष' इत्यादौ प्रत्येकपदवृत्त्या पदार्थो-

❀ काशिका ❀

समास इति। वृत्तिमात्रोपेति। कृदन्तादिवृत्तीत्यर्थः। एकोपस्थितिजनकस्[illegible] वृत्त्याश्रयत्वात्तेषां वृत्तिव्यवहारः। समर्थपदं व्याचष्टे—विग्रहेति। भाष्य[illegible]

कृत्तद्धितेति। कृत्पदेन कृदन्तं, तद्धितपदेन तद्धितं गृह्यते, तेन 'बहुपटुः' 'स[illegible] संग्रहः, कृत्तद्धितयोः परिभाषाप्रवृत्त्या पटं करोति कुम्भमानयेत्यत्र न कर्मण्य[illegible] गोरपत्यमित्यत्र न तद्धितः, पृथगर्थानामेकार्थीभावः सामर्थ्यं, 'राज्ञः पुरुष[illegible] गर्थानि समासे एकार्थानीति' समर्थसूत्रभाष्यात्। तत्र सामर्थ्यमसन्न वच[illegible] शक्यत इति सामर्थ्यविशिष्टस्य साधुत्वं विधीयत इति भावः। तथा च य[illegible] पृथगुपस्थितिविषयार्थकत्वेन लोकदृष्टशब्दानां विशिष्टविषयैकशक्त्यैकोपस्थितिजनकत्व[illegible] इति पर्यवसितम्। तादृशशब्दानान्तत्त्वं तु सादृश्यादन्वगतव्यम्। कार्यशब्दवादे तु [illegible] वृत्तिनिष्पत्तिरिति, बुद्धेर्वा। दृष्टानामित्यन्तोपादानं विभक्त्यन्तेऽतिप्रसङ्गनिरासाय। [illegible] यथा विभक्त्या प्रतिपत्तिस्तथा न केनाप्यन्येन शब्देनेति विभक्तेस्तथाविधाथ[illegible] [illegible]ाभावान्न पू[illegible]तदन्तेऽतिप्रसङ्गत्तादवस्थ्यम्। औपगवादिसंग्रहाय यत्किंचित्त्वनिवेशः, उपगोर[illegible] [illegible]मित्यादाव-पत्यरूपार्थस्यापत्यपदजन्योपस्थितिविषयत्वं लोके दृष्टमिति तत्संग्रहः। चित्र[illegible] [illegible] गौण-मेकार्थत्वमिति सूचयितुम्। यथा पदानामसत्त्वात्तत्सत्ताव्यवहारो गौण[illegible] [illegible]कार्थव्य-वहारोऽपीति बोध्यमित्यन्यत्र विस्तरः। समासैकशेषेति। अत्रैव[illegible] [illegible]वृत्तित्वं, उक्तैकार्थीभावासंभावात् परार्थान्वितस्वार्थोपस्थापकत्वाभावात्, शिष्टपदे[illegible] [illegible]समूह-रूपार्थस्य भानमिति भाष्ये स्पष्टमुक्तत्वादिति शेखरादौ स्पष्ट[illegible] समवस्थि[illegible]यादेरपि परंपरया पदोद्देश्यकत्वान्न तदसंग्रहः। व्याकरणमधीते वैया[illegible]दिति[illegible]परस्पर[illegible]र्थाभिधानसामर्थ्यस्य अत्र तद्धितकृदर्थबोधकाख्यातस्य कर्त्रर्थ कवि[illegible]परस्परवि[illegible] [illegible] दृष्टान्त-न क्षतिः। ननु पङ्कजशब्दस्यापि [illegible] इति [illegible] अस्य [illegible]ता'-तया तदुपादानमसंगतमि[illegible]

पङ्कजशब्दवदिति । पङ्कजनिकर्त्तुरपि योगादेवोपस्थितौ तत्रापि समुदायशक्तिर्न सिद्ध्येत्, न च पद्मत्वरूपेणोपस्थितये सा कल्प्यत इति वाच्यं, चित्रग्वादिपदेपि स्वामित्वेनोपस्थितये तत्कल्पनावश्यकत्वात् । लक्षणयैव तथोपस्थितिरिति चेत्, पङ्कजपदेपि सा सुवचा । एवं रथकारपदेपि ।

❀ दर्पणः ❀

पस्थितावाकाङ्क्षादिवशाद्विशिष्टार्थबोधवत् पङ्कजपदादपि तथैव विशिष्टार्थोपस्थित्या रूढेरुच्छेदापत्तिः, न च सा तवेष्टेत्याह—**पङ्कजनिकर्त्तुरपि** । तेन रूपेण पद्मस्यापीत्यर्थः । **योगादेवेति** । अवयवशक्तेरेवेत्यर्थः । तत्रापि = पङ्कजादिपदेपि । तत्र तत्स्वीकारे तु किमपराद्धं समासे विशिष्टशक्त्येति भावः । सा = समुदायशक्तिः । तत्कल्पनस्य=रूढिकल्पनस्य । **तथोपस्थितिरिति** । स्वामित्वादिना स्वाम्याद्युपस्थितिरित्यर्थः । **सुवचेति** । पद्मत्वादिनोपस्थितिरपि लक्षणयेति वक्तुं शक्यमित्यर्थः । अधिकरणविरोधमपि तत्राह—**एवमिति** । **लक्षणामिति** । निरूढलक्षणामित्यर्थः, तस्याः शक्तिसमकक्षत्वादिति भावः । **योगेनेति** । प्रत्येकपदवृत्त्युपस्थाप्यरथकर्त्तृत्वेनेत्यर्थः । **उपपत्ताविति** । शास्त्रसङ्कोचमन्तरेणाप्यनुष्ठाननिर्वाह इत्यर्थः । **तत्कल्पनामित्यादि** । रूढिकल्पनामित्यर्थः, व

❀ काशिका ❀

वित्यादिः, तथा चेदं वक्ष्यमाणरीत्या परमतदूषणविधया शक्तिसाधकमेवेति भावः । **योगादेवेति** । योगोऽवयवशक्तिस्तयेत्यर्थः । तत्र व्युत्पत्तिवैचित्र्येण नामार्थस्यापि पङ्कस्य जनधात्वर्थोत्पत्तावधिकरणतानिरूपकत्वेनान्वयः, तथाविधोत्पत्तेर्डप्रत्यार्थकर्तर्याश्रयतया, एवं च पङ्काधिकरणकोत्पत्त्याश्रय इति बोधोपपत्तौ सत्यां समुदायशक्तिर्व्यर्थेति भावः । **तत्कल्प्यते** = एकार्थीभावरूपं सामर्थ्यम् । **पद्मत्वरूपेणोपस्थितय इति** । पद्मत्वावच्छिन्ने शक्तिं विना तेन रूपेणोपस्थित्यसंभवात्, तद्धर्मप्रकारकोपस्थितिं प्रति तद्धर्मावच्छिन्नवृत्तिज्ञानस्य हेतुत्वादिति भावः ।

स्वामित्वेनोपस्थितये इति । स्वामित्वेन रूपेणान्यपदार्थोपस्थितय इत्यर्थः । नहि वृत्त्यन्तरं विना धर्मिण उपस्थितिः केनापि रूपेण सम्भवतीति बोध्यम् । **लक्षणयेति** । समुदायलक्षणया, डप्रत्ययलक्षणया वेत्यर्थः । पङ्कजपदमन्यस्यापि योगरूढस्योपलक्षणमित्याह—**एवमिति** । **रथकारपदेपीति** । समुदायशक्तिर्न सिध्येदित्यस्यानुषङ्गेणात्रान्वयः । ननु मास्तु तत्र समुदायशक्तिः, रथकर्मकोत्पादनकर्तृरूपावयवशक्तिलभ्यरूपेणैव हि तत्र बोधोऽनुभूयते इत्याशङ्क्याह—**तथा चेति** । **ब्राह्मणादिविषयतयैवेति** । रथं करोतीति व्युत्पत्त्या रथकारपदे [illegible]दबोधकत्वस्यापि संभवादिति भावः । **उपपत्तौ** = ब्राह्मणादेरध्ययनविधिसिद्धिज्ञानसत्त्वेना-

तथा च,—'वर्षासु रथकारोऽग्निमादधीते'त्यत्रापि विना लक्षणां क्लृप्तयोगेन ब्राह्मणादिविषयतयैवोपपत्तौ तत्कल्पनां कृत्वा जातिविशेषस्याधिकारित्वं प्रकल्प्यापूर्वविद्याकल्पनमप्ययुक्तं स्यादिति भावः।

❀ दर्पणः ❀

तां कल्पयित्वेति यावत्। **जातिविशेषस्येति।** 'रथकारस्तु माहिष्यात्करण्यां यस्य सम्भव' इति स्मृतिसङ्केतितजातिविशिष्टस्येत्यर्थः। **अयुक्तमिति।** विनैव शास्त्रसङ्कोचं विधेश्चारितार्थ्यादिति भावः।

ननु प्रतिवन्देरनुत्तरत्वं, किञ्च—पङ्कजपदे लक्षणापि न सुवचा, तथाहि—सा किं पङ्कजपदे ? उत 'ड' प्रत्यये ? न तावदाद्यः—समुदाये शक्त्यभावेन तद्घटितलक्षणाया अप्यसम्भवात्, किञ्च जहत्स्वार्थायास्तस्यास्तत्राऽसम्भव एव, अवयवार्थविरोधिन्या रूढेरभावात्, 'जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी'त्यभियुक्तोक्तेः। यथा 'मण्डपं भोजये'त्यत्र मण्डपपदस्य गृहविशेषे रूढिर्योगविरोधिनी, रूढ्यर्थगृहे मण्डपानकर्तृत्वरूपयोगार्थस्य बाधात्तत्र 'रूढेर्योगापहारिते'ति प्रवादादवयवशक्त्या मण्डपानकर्तुर्बोधाऽसम्भवान्मण्डपपदस्य मण्डपानकर्त्तरि लक्षणा। तथाच तत्र रूढ्यर्थगृहसम्बन्धितावच्छेदकतया गृहीतचैत्रत्वादिनैव तद्बोधो, न मण्डपानकर्तृत्वेन, न च तथा प्रकृते, पद्मत्वे लक्षणाया मवयवार्थस्याभावेनाजहत्स्वार्थाया अप्यसम्भवाच्च। जहत्स्वार्था त्ववयवार्थप्रतीत्यनुपपत्त्या न वक्तुं शक्या। नान्त्यः—प्रकृत्यर्थस्यानन्वयापत्तेः, तदर्थे प्रत्ययस्यासाधुतापत्तेश्चेति लक्षणानवसरादनायत्या तत्र विशिष्टशक्त्यभ्युपगमः।

राजपुरुष इत्यादौ तु प्रत्येकपदवृत्त्यापि विशिष्टार्थबोधनिर्वाहे समुदायशक्तिकल्पनं तत्रानुचितमेव, नाऽपि रथकाराऽधिकरणविरोधः, यौगिकार्थरथकरणनिमित्ते वर्षविधानस्य सङ्करस्य विशिष्टाधानाऽपेक्षया लघुत्वेऽपि, 'ऋभूणां त्वा देवाना'मिति मन्त्रवर्णादृभुसौधन्वनपर्यायप्रतिलोमजातिरथकारस्यैव तदधिकारावगत्या लाघवापनादरेण रूढाऽर्थे तत्र विशिष्टाधानकल्पनात्, नचापूर्वविद्याध्ययनकल्पनागौरवम्, फलमुखत्वात्, प्रकृते राजपुरुषादिसमुदाये शक्तिग्राहकं न तादृशं कोशादि येन तद्बलादवयवार्थः परित्यज्येतेत्याशयेन मूलमवतारयति—

❀ काशिका ❀

धिकारितया तत्कर्तृकाधानविधायकतया चारितार्थ्ये। **तत्कल्पनाम्** = समुदाये जातिविशेषावच्छिन्नशक्तिकल्पनाम्। **जातिविशेषस्य**—जातिविशेषविशिष्टस्य।

'क्षत्रियो मागधं सूते वैश्यात् क्षत्तारमेव च।'—

—इति याज्ञवल्क्यवचनाद्वैश्यायां शूद्रादुत्पन्नोऽनुलोमजातीयो रथकार इति बोध्यम्। **अपूर्वविद्याकल्पनम्**—'मीमांसकाना'मिति शेषः। **अत्ययुक्तं स्यादिति।** रथकारपदस्य यो[illegible]त्वेन

साधकान्तरमाह—बहूनामिति । वृत्तेर्धर्म्माः = विशेषणलिङ्ग-सङ्ख्याद्ययोगादयस्तेषां वचनैरेव साधने गौरवमित्यर्थः ।

अयं भावः—विशिष्टशक्त्यस्वीकारे 'राज्ञः पुरुष' इत्यत्रेव 'राज-पुरुष' इत्यत्रापि स्याद् विशेषणाद्यन्वयः, राजपदेन स्वतन्त्रोपस्थिति-सत्त्वात्, विभाषावचनञ्च समासनियमवारणाय कार्यमिति ।

❀ दर्पणः ❀

साधकान्तरमिति । लिङ्गेति । 'कुक्कुटाण्ड'मित्यादौ कुक्कुटपदार्थे स्त्रीत्वस्याऽप्रतीतेरिति भावः । सङ्ख्येति । 'राज्ञो राज्ञां वा पुरुष इति वाक्ये उपसर्जन-पदानि सङ्ख्याविशेषयुक्तं स्वार्थमभिदधति, समासे त्वन्तर्भूतस्वार्थं प्रधानार्थ-मभिदधती'ति भाष्यात्तत्र सङ्ख्याविशेषस्याप्रतीतेरिति भावः । सङ्ख्यादीत्यादि-पदादिमे तद्यैकार्थीभावकृता विशेषाः,—सङ्ख्याविशेषो व्यक्ताभिधानमुपसर्जन-विशेषणं 'चा'ऽयोग इति भाष्योक्तस्य,—'राज्ञो गवाश्वपुरुषा' 'देवदत्तयज्ञदत्त-विष्णुमित्राणां गौ'रित्यादौ चाऽयोगस्य च सङ्ग्रहः । वचनैरिति । सविशेष-णानां वृत्तिर्नेत्यादिभिरित्यर्थः । उक्तार्थमेव प्रकटयति—अयम्भाव इति । न्यायसिद्धमेव सूत्रमिति । इह व्यपेक्षायां समासो न भवत्येकार्थीभावे वाक्यं न भवति, विभिन्नविषयत्वेन बाध्यबाधकभावाऽसम्भवादिति न्यायसिद्धं विभाषावचनं नापूर्वमित्यर्थः । तदुक्तं भाष्ये—'न संज्ञाया भावाऽभावाविष्येते'

❀ काशिका ❀

न ब्राह्मणादिविषयकत्वमेतद्वाक्यस्य, किं त्वनुलोमजातीयविषयकत्वम् , तस्य च वेदाध्ययनासंभवा-द्वेदविहिताधानान्यथानुपपत्त्या तदुपयुक्तवेदाध्ययनं कल्पनीयमिति मीमांसकसिद्धान्तो विरुध्येतेति भावः । स्याद्विशेषणेति । तथा च ऋद्धस्य राज्ञः पुरुष इति प्रयोगवदृद्धस्य राजपुरुष इत्यपि स्यात् । विशेषणान्वये हेतुमाह—राजपदेनेति । स्वतन्त्रेति । 'घटो नित्य' इत्यादौ घटत्वादौ नित्यपदार्थान्वयबोधनिवृत्तये विशेषणान्वयबुद्धौ मुख्यविशेष्यतासंबन्धेन हेतुतया कल्प्यमानोपस्थितेः सत्त्वादित्यर्थः, समुदायशक्तिकल्पने तु—तद्वशाद्राजादिपदेन स्वार्थविशिष्ट एवार्थ उपस्थाप्यत इति स्वमुख्यविशेष्यकोपस्थितेर्विरहान्न तत्र विशेषणान्वय इति भावः । राजवैशिष्ट्येनैव पुरुष-स्योपस्थित्या राजपुरुषो भार्यायाश्चेति न , एकसंबन्धेन यत्किंचिद्वैशिष्ट्येनोपस्थितेस्तत्सजातीय-संबन्धेनेतरान्वयस्याव्युत्पन्नत्वात् , अत एव घटो द्रव्यत्वस्येति न, समवायेन घटत्ववैशिष्ट्येनो-पस्थिते तेन संबन्धेन द्रव्यत्वान्वयाभावात् । राजपुरुषोऽभिरूप इति तु भवत्येव, बाधकाभावात् । राजपुरु[illegible]श्वश्चेत्यपि न । एकत्र विशेषणत्वेनोपस्थितस्यापरत्र विशेषणत्वायोगात् ।

समासनियमेति । अवश्यं वाक्यप्रयोगे प्राप्ते आरभ्यमाणः समासो नित्यं वाक्यनिवर्तकः स्यात् ,

ननु 'सविशेषणाना'मितिवचनान्न विशेषणाद्यन्वयः, विभाषावचनञ्च कृतमेवेत्याशङ्कां समाधत्ते—वचनैरेवेति । न्यायसिद्धमेव सूत्रम्, व्यपेक्षाविवक्षायां वाक्यस्य, एकार्थीभावे समासस्येति स्वभावत एव प्रयोगनियमसम्भवात् । 'सविशेषणे'त्यपि विशिष्टशक्तौ राज्ञः पदार्थैकदेशतयान्वयासम्भवान्न्यायसिद्धमिति भावः । अत एव व्यपेक्षापक्षमुद्भाव्य,—'अथैतस्मिन्व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभावकृतो विशेषः स वक्तव्य' इति भाष्यकारेण दूषणमप्युक्तम् ॥३२॥

❀ दर्पणः ❀

इति एकार्थानां विकल्पनान्नाऽर्थौ विकल्पेनेति तद्भावः । **अन्वयासम्भवादिति ।** वृत्तौ ह्युपसर्जनपदेन प्रधानार्थाभिधायिना भाव्यम्, स्वस्य विशेषणाकाङ्क्षायां च प्राधान्यमिति कथमेकदा प्राधान्यमेकार्थीभावश्च स्यात्, युगपद्गुणप्रधानभावविरोधादिति न्यायसिद्धमेवेत्यर्थः । **अत एवेति ।** व्यपेक्षावादस्यापातरमणीयत्वादेवेत्यर्थः । **दूषणमप्युक्तमिति ।** अस्य 'नानाकारकत्वान्निघातयुष्मदस्मदादेशप्रतिषेधः, अयं दण्डो हराऽनेनेत्यादिने'ति शेषः ॥ ३२ ॥

❀ काशिका ❀

एकार्थीभावपक्षे तु एकार्थीभावे समासस्य, व्यपेक्षायां वाक्यस्य सिद्धतया विभाषाधिकारो न कर्तव्यः । विभिन्नविषयत्वात्समासेन वाक्यबाधाप्रसक्तेः । एवं 'समर्थानां प्रथमाद्वा' इत्यत्रत्यमपि वेति न कर्तव्यम्, एवं सन्निधौ वाग्रहणमपि न कर्तव्यम्, तदुक्तं भाष्ये—'वावचनानर्थक्यं च स्वभावसिद्धत्वात्' इति । लिङ्गायोगः—कुक्कुटाण्डं मृगक्षीरमित्यादौ क्वचिद् द्रष्टव्यः, न तु सर्वत्र, कुमारीपुत्र इत्यादौ दर्शनात्, परे तु—जात्यन्तरनिवृत्तिपरे वाक्येपि छागस्य मांसमित्यादौ लिङ्गविशेषादर्शनान्नेदमेकार्थीभावप्रयुक्तमिति वदन्ति । एवं वृत्तावुपसर्जनपदार्थे संख्याविशेषो न भासते इत्युक्तं भाष्ये समर्थसूत्रे, संख्यात्वेन संख्याविशेष एकत्वादिः प्रतीयते, न तु एकत्वत्वादिविशेषरूपेण, इदमेवाभेदैकत्वसंख्या प्रतीयत इत्यनेनोच्यते । भेदो = विशेषरूपं तदभावरूपैकत्वसंख्येति तदर्थः । 'तदभावरूपे'त्यस्य तत्प्रतीत्यभावरूपेत्यर्थोऽवसेयः । प्रातिपदिकोपात्ता प्रवृत्तिनिमित्तभूता संख्या तु 'द्विपुत्र' इत्यादौ प्रतीयते, ततस्तदनुपात्ता सा न प्रतीयत इति भाष्यार्थोऽवगन्तव्य इति प्राञ्चो जगुः । परे तु—संख्या केनापि रूपेण न प्रतीयते, संकोचेन भाष्यव्याख्याने मानाभावात्, त्वत्पुत्रस्तावकीनो मासजात इत्यादौ तत्तत्प्रवृत्तिनिमित्तेन रूपेणैका व्यक्तिर्भासते, युष्मत्पुत्रो यौष्माकीण इत्यादौ तु तेन रूपेणानेकव्यक्तिभानम्, अत एव कुक्कुटेन्द्रगोपवाचक'गोपुचरो' 'वर्षासुजात'—इत्यादौ बहुवचनसत्त्वेऽपि न बहुत्वभानमेवं चात्र [illegible]आरोपेण शब्दसंस्कारमात्रं, न तु तस्य प्रकृत्यर्थेऽन्वयः, अत एव 'राजपुरुष' इत्यादौ संख्या-

तथा,—'धवखदिरौ' 'निष्कौशाम्बि' गोरथः, 'घृतघटः' 'गुडधानाः' 'केशचूडः' 'सुवर्णालङ्कारो' 'द्विदशाः' 'सप्तपर्ण' इत्यादावितरेतरयोगातिक्रान्त-युक्त-पूर्ण-मिश्र-सङ्घात-विकार-सुच्प्रत्ययलोप-वीप्साद्यर्थो वाचनिको वाच्य इत्यतिगौरवं स्यादिति दूषणान्तरमाह—

चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम् ।
कर्तव्यं ते, न्यायसिद्धं त्वस्माकं तदिति स्थितिः ॥३३॥

ॐ दर्पणः ॐ

कैयटोक्तं दोषसङ्घातमाह—**तथेत्यादि** । इति **दूषणान्तरमिति** । इत्याकारकं दूषणान्तरमित्यर्थः । **पूर्वोक्तानामिति** । 'निष्कौशाम्बिरित्यादौ क्रान्ताद्यर्थवाचकानां लोपवचन'मित्यादिकानामित्यर्थः । एतद्दूषणोद्धारस्य वक्ष्यमाणत्वादाह—**दूषणान्तरमिति** । व्युत्पत्तिभङ्गमाविष्कर्तुमाह—**अयमाशय इति** । **लक्षणेति** । 'वाक्ये इति' शेषः । 'चित्रगु'रित्यादौ वाक्यस्य गोस्वामि-

ॐ काशिका ॐ

प्रतीतिर्न सुबभावकृता, अत्र तत्सत्त्वेऽपि तदप्रतीतेरिति प्राहुः, विस्तरो भाष्यप्रदीपोद्योतादावनुसन्धेयः । अत एव = एकार्थीभावस्य सिद्धान्तिसंमतत्वेनैव ॥ ३२ ॥

एकार्थीभावस्य प्रयोजनान्तरं भाष्यकैयटाद्युक्तं स्वयमाह–**तथा धवेति** । धवखदिरावित्यादीनामितरेतरयोगादिभिः क्रमेणान्वयः, तथा च धवखदिरावित्यादौ द्वन्द्वे 'चार्थे द्वन्द्वः' इत्यनेनानेकं सुबन्तं चार्थे वर्तते, तच्च द्वन्द्वसंज्ञकं भवतीति वाक्यभेदमङ्गीकृत्यार्थबोधनं कर्तव्यं, तथा च गौरवम् , एवं 'निष्कौशाम्बि'रित्यादावपि 'निरादयः क्रान्ताद्यर्थे द्वितीयया' इत्यनेन निरादिपूर्वकद्वितीयान्तसमुदायः क्रान्ताद्यर्थे वर्तते, स च समाससंज्ञको भवतीति वाक्यभेदपुरस्कारेणार्थदेशनं बोध्यम् । गोरथादिविषयकं तु तत्तदर्थविधायकं वचनं कल्पनीयमिति गौरवम्, तत्र 'गोरथ' इत्यत्र गोयुक्तो रथ इति युक्तार्थः । 'घृतघट' इत्यत्र घृतपूर्णो घट इति पूर्णार्थः । 'गुडधाना' इत्यत्र गुडमिश्रधाना इति मिश्रार्थः । 'केशचूड' इत्यत्र केशसंघातभूता चूडा यस्येति संघातार्थः । 'सुवर्णालङ्कार' इत्यत्र सुवर्णविकारोऽलंकार इति विकाररूपार्थः । 'द्विदशा' इत्यत्र द्विरावृत्ता दशेत्यर्थात् सुज्लोपः । 'सप्तपर्ण' इत्यत्र सप्त सप्त पर्णानि यस्येत्यर्थाद्वीप्सा प्रतीयते ।

परे तु क्रान्ताद्यर्था निरादीनां, न तु समुदायस्येति नैकार्थीभावकृतोऽयं विशेषः, अत एव भाष्ये एकार्थीभावकृतेषु विशेषेषु नास्य गणनं कृतम् , द्विदशा इत्यत्रापि शब्दशक्तिस्वाभाव्येन पूर्वपदस्य सुजर्थान्तर्भावेण वृत्तिः, न तु समुदायशक्तितः द्वित्वसंख्योत्पत्तिकावृत्तिविषया दशेति बोध इति वदन्ति । मूले—**चकारादिति** । धवखदिरावित्यादौ वाक्यवच्चकारप्रयोगः ...स्य निषेधो = लोपो विधेयः । एकार्थीभावपक्षे तु पृथगुपस्थित्यभावात् पृथगुपस्थितिनिबन्धन-

आदिना-'घनश्यामः', 'हंसगमन' इत्यादावविवादीनां पूर्वोक्तानाञ्च संग्रहः। दूषणान्तरमाह—बहुव्युत्पत्तिभञ्जनमिति। अयमाशयः—'चित्रगु'रित्यत्र स्वाम्यादिप्रतीतिरनुभवसिद्धा, न च तत्र लक्षणा, 'प्राप्तोदको ग्राम' इत्यादौ तदसम्भवात्, प्राप्तिकर्त्रभिन्नमुदकमित्यादिबोधोत्तरं तत्सम्बन्धिग्रामलक्षणायामप्युदककर्तृकप्राप्तिकर्म्म ग्राम इत्यर्थालाभात्। 'प्राप्ते'ति क्तप्रत्ययस्यैव कर्त्रर्थकस्य कर्मणि लक्षणेति चेत्, तर्हि समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरुदकाभिन्नप्राप्तिकर्म्मेति स्यात्, अन्यथा समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिभङ्गापत्तेः, प्राप्तेर्धात्व-

ॐ दर्पणः ॐ

लक्षकत्वेऽभीप्सितबोधलाभसम्भवादाह—**प्राप्तोदको ग्राम इति**। **लक्षणायामपीति**। इदञ्च मीमांसकमतेन, स्वबोध्यसम्बन्धस्यैव तैर्लक्षणात्वाभ्युपगमात्। 'बोधोत्तर'मित्यस्या'ऽनुपपत्तिप्रतिसन्धाने सती'ति शेषः। 'लक्षणायामपी'त्यपिना तत्र लक्षणाया असम्भवं सूचयति। **अर्थालाभादिति**। प्राप्तिकर्त्रभिन्नोदकसम्बन्धिनो लाभेप्यनुभूयमानोक्तार्थालाभादित्यर्थः। **तर्हि सामानाधिकरणेति**। सामानाधिकरण्यं चात्र समानविभक्तिकत्वम्, अन्यथा = कर्मलाक्षणिकक्तान्तार्थोदकपदार्थयोरभेदान्वयानभ्युपगमे इत्यर्थः। **भङ्गापत्तेरिति**।

ॐ काशिका ॐ

समुच्चयाप्रतीतेर्न चप्रयोगः प्राप्नोतीति भावः। **इवादीनामिति**। अत्र लोप इति संबध्यते। **पूर्वोक्तानामिति**। निष्कौशाम्बिरित्यादौ क्रान्तादिशब्दानां लोप इत्यस्य संग्रह इत्यर्थः। **'हंसगमन'** इत्यस्य हंस इव गमनं यस्येति विग्रहः, एकार्थीभावपक्षे तु इवार्थस्य समुदायार्थेऽन्तर्भूतत्वादप्रयोगः सिद्ध एवेति भावः। प्रथमत एवोदकपदे उदकसंबन्धिलक्षणायामुदकस्यैकदेशतया प्राप्तपदार्थप्राप्तिकर्तुरन्वयो न स्यादित्यत आह—**प्राप्तिकर्त्रेति**। **इत्यर्थालाभादिति**। संबन्धिलक्षणायां प्राप्तिकर्त्रभिन्नोदकसंबन्धी ग्राम इति बोधस्यैव संभवात्। यद्यपि स्वकर्तृकप्राप्तिकर्मत्वमेव संबन्धित्वमिति प्राप्तिकर्मत्वेन बोधो जातः, एवमूढरथ इत्यादावपि रथपदादौ तत्संबन्धिलक्षणायामपि स्वकर्मकवहनकर्तृत्वादिरूपमेव संबन्धित्वमिति विवक्षितार्थलाभो जात एव, तथापि संबन्धत्वेनैव कर्मत्वादिभानं स्यान्न तु कर्मत्वत्वादिनेति तात्पर्यं बोध्यमिति भावः। **प्राप्तिकर्मेति—स्यादिति**। प्राप्तिकर्माभिन्नमुदकमिति बोधः स्यादित्यर्थः। प्राप्तपदस्य क्रियाशब्दत्वेनोदकशब्दस्य जातिशब्दत्वेन चोदकस्यैव विशेष्यताया उचितत्वात्—उदकस्य प्राप्तौ कर्तृतयेष्टोऽन्वयो न स्यादपि त्वभेदेनैव प्राप्तिकर्मणेति सूचयितुं तथाभिहितं, तथा चेष्टान्वयो न स्यादित्यत्रैव तात्पर्यं, न तूक्तान्वयबोधेऽपि निर्भर इति बोध्यम्। **अन्यथेति**। कर्तृतासं-

र्थतया कर्तृतासम्बन्धेन भेदेनोदकस्य तत्रान्वयासम्भवाच्च, अन्यथा 'देवदत्तः पचयत'इत्यत्र कर्तृतासम्बन्धेन देवदत्तस्यान्वयसम्भवेनानन्वयानापत्तेः। अथोदकाभिन्नकर्तृका प्राप्तिरिति बोधोत्तरं तत्सम्बन्धिग्रामो लक्ष्यत इति चेन्न, प्राप्तेर्धात्वर्थतया क्तार्थकर्तारं प्रति विशेष्यताया असम्भवात्, 'प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्य'मिति व्युत्पत्तेः, प्राप्तपदे प्राप्तेर्विशेष्यत्वे तस्या एव नामार्थत्वेनोदकेन सममभेदान्वयापत्तेश्च। एवम्,—

❀ दर्पणः ❀

तादृशव्युत्पत्तेरत्रैव व्यभिचारादिति भावः। ननु तद्व्युत्पत्तौ सामानाधिकरणस्यैकार्थाभिधायित्वस्यैव निवेशेन नेदं तद्विषयोऽत आह—**प्राप्तेरिति। अन्वयासम्भवादिति।** नामार्थधात्वर्थयोः साक्षाद्भेदेनान्वयस्याऽव्युत्पन्नत्वादिति भावः। **अन्यथा देवदत्त इति।** अन्यथा = उक्तव्युत्पत्यनभ्युपगम इत्यर्थः। **ग्रामो लक्ष्यत इति।** 'वाक्येने'ति शेषः। उक्तबोधस्य सम्भवदुक्तिकत्वे कथञ्चिल्लक्षणापि कल्पेत, तदेव नास्तीत्याह—**प्राप्तेर्धात्वर्थतयेति।** 'प्रकृतिप्रत्यययो'रिति न्यायस्य संख्यादौ व्यभिचरित्वं सम्भाव्याह—**प्राप्तपदे इति। नामार्थत्वेनेति।** नामजन्यप्रतीतिविशेष्यस्यैव नामार्थत्वादिति भावः। **अभेदान्वयापत्तेश्चेति।** 'सामानविभक्तिकनामार्थयो'रिति व्युत्पत्तेरिति भावः। **द्रष्टव्यमिति।** भवन्मते वहनकर्माभिन्नो रथ इति बोधोत्तरं सम्बन्धिनि लक्षणायामपि

❀ काशिका ❀

नोदकस्य प्राप्त्यन्वयाभ्युपगमे। **समानाधिकरणेति।** समानविभक्तिकप्रातिपदिकार्थयोरित्यर्थः। **अन्वयासंभवाच्चेति।** नामार्थधात्वर्थयोः साक्षादभेदेनैवान्वय इति व्युत्पत्तेरिति भावः। **अन्यथा** = तादृशव्युत्पत्त्यनभ्युपगमे। **अनन्वयानापत्तेरिति।** देवदत्तस्य पाके कर्तृतासंबन्धेनान्वयसंभवेन तादृशवाक्येऽनन्वितार्थकत्वस्येष्टस्यानुपपत्तेरित्यर्थः। **तत्सम्बन्धीति।** प्राप्तिकर्मेत्यर्थः। **कर्तरि विशेष्यताया इति।** कर्तृनिरूपितविशेष्यताया इत्यर्थस्तथा चोक्तबोधासंभव इति भावः। असंभवे हेतुमाह—**प्रकृतीति।** 'सत्त्वप्रधानानि नामानि' इति वचनविरोधोऽपि द्रष्टव्यः। ननु पचतीत्यादौ क्लृप्तत्यागकस्य प्रत्ययप्राधान्यस्य वृत्तावपि त्यागोऽस्तु, एवं 'सत्त्वप्रधानानी'त्यस्यापि वृत्त्यघटकनामपरत्वमस्त्वित्याशङ्क्याह—**नामार्थत्वेनेति।** नामजन्यप्रतीतिविशेष्यत्वेनेत्यर्थः। नामजन्यप्रतीतिविशेष्ययोरेवान्वयः, स चाभेदेनैवेति 'नामार्थयो'रित्यादेरर्थादिति भावः। **अभेदान्वयापत्तेश्चेति।** प्राप्तेर्विशेष्यत्वे विशेषणीभूतकर्त्रा उदकस्याभेदान्वयबोधानापत्तेरित्यर्थः। अयोग्यतानिश्चयस्य शाब्दहेतुत्वानङ्गीकारे यथाश्रुतमेवास्तु, न केवलं द्वितीयार्थबहुव्रीहावेव लक्षणयाऽनिर्वाहोऽपि तु तृतीयाद्यर्थबहुव्रीहावपीत्याह—**एवमूढरथ इति।** ऊढो रथो येनेति विग्रहवाक्यात् यत्कर्तृकवहनकर्मरथ इति बोधः। उपहृतः दत्तः पशुर्यस्मा इति

'ऊढरथः,' 'उपहृतपशुः,' 'उद्धृतौदना,' 'बहुपाचिके'त्यादावपि द्रष्टव्यम् । अत्र हि रथकर्म्मकवहनकर्त्ता, पशुकर्म्मकोपहरणोद्देश्यः, ओदनकर्म्मकोद्धरणाऽवधिः, बहुपाककर्त्रधिकरणमिति बोधाऽभ्युपगमात् । अतिरिक्तवृत्तिपक्षे च घटत्वविशिष्टे घटपदस्येवोदककर्तृकप्राप्तिकर्म्मत्वविशिष्टे 'प्राप्तोदक' इत्यादिसमुदायशक्त्यैव निर्वाह इति भावः ॥३३॥

साधकान्तरमाह—

अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना ।
क्लृप्तत्यादृशास्ति तव तत्किं शक्तिं न कल्पयेः ? ॥३४॥

❀ दर्पणः ❀

रथकर्मकवहनकर्त्ताऽनड्वानितीप्सितार्थस्यालाभ एव, कर्मार्थकक्तप्रत्ययस्य कर्त्तरि लक्षणायां तु धात्वर्थवहने रथस्य कर्मतया भेदसम्बन्धेनान्वयो दुर्लभ एवोक्तव्युत्पत्तिविरोधादिति पूर्वोक्तदिशावसेयमित्यर्थः । **अत्र हीति**—'बोधाभ्युपगमा'दित्यनेनान्वयि । अत्र = 'ऊढरथ' इत्यादिसमासे । विशिष्टशक्त्यभ्युपगमे तु न कस्या अपि व्युत्पत्तेर्विरोध इत्याह—**अतिरिक्तेति** ॥ ३३ ॥

षष्ठ्यर्थबहुव्रीहिपर्युदासे बीजं प्रदर्शयति—**अयम्भाव इति । विना शक्तिमिति** । समुदायशक्तिमित्यर्थः । **न च तत्रेति** । तादृशसमुदायघटकपूर्वोत्तरपदयो-

❀ काशिका ❀

वाक्याद्यदुद्देश्यकोपहरणकर्मपशुरिति, उद्धृत ओदनो यस्या इति वाक्याद्यदवधिकोद्धरणकर्मौदन इति, बहवः पाचका यस्यामिति वाक्याद्यदधिकरणकबहुभिन्नाः पाचनकर्तार इति । अत्रापि वहनकर्माभिन्नो रथ इति शब्दार्थान्वयबोधानन्तरं तत्संबन्धिलक्षणायामपि न वहनकर्त्रैत्यादिबोधनिर्वाहः । वहनादेर्धात्वर्थतया प्रत्ययार्थकर्मादिकं प्रति विशेष्यत्वानुपपत्तिरित्यादिदूषणानि पूर्ववद् बोध्यानीति समुदिततात्पर्यार्थः । संबन्धिलक्षणायाः पूर्वोक्तानेकव्युत्पत्तिभङ्गाभावेऽपि उक्तबोधानिर्वाहः, एवमग्रेऽपि द्रष्टव्यमिति भावः । बहुपाचिकेत्यत्रापि संबन्धिलक्षणायां तत्संबन्धित्वेनैव बोधः स्यान्न त्वधिकरणत्वेनेति भावः । अधिकरणत्वविशिष्टलक्षणायां तु नैतद् दूषणमिति बोध्यम् । घटपदस्येवेति । यथा घटपदस्य घटत्वविशिष्टशक्त्या विशिष्टोपस्थापकत्वं तथा प्राप्तोदकेति समुदायस्यापि विशिष्टशक्त्योदककर्तृकप्राप्तिकर्मत्वविशिष्टोपस्थापकतयोक्तानुपपत्त्यभावः, 'नामार्थयो'रित्यादिव्युत्पत्तीनां पृथगुपस्थितिविषयत्वादिति भावः ॥ ३३ ॥

'अषष्ठ्यर्थबहुव्रीहा'वित्यत्र षष्ठीपदं सप्तम्या अप्युपलक्षणं, षष्ठ्यर्थबहुव्रीहाविव सप्तम्यर्थबहुव्रीहावपि व्युत्पत्त्यन्तरकल्पनाया अप्रसक्तेः । कल्पयेरिति । संप्रश्ने 'विधिनिमन्त्रण—' इति सूत्रेण लिङ् । लक्षणा किं पूर्वपदे ? उत उत्तरपदे ? इति विकल्प्य नाद्य इत्याह—सा[illegible]न

अयं भावः—'चित्रगु'रित्यादिषु चित्रगवीनां स्वाम्यादिप्रतीतिर्न विना शक्तिमुपपद्यते, न च तत्र लक्षणा, सा हि न चित्रपदे, चित्रस्वामी गौरिति बोधापत्तेः, नापि गोपदे, गोस्वामी चित्र इत्यन्वयबोधापत्तेः, चित्रादिमात्रस्य लक्ष्यैकदेशत्वेन तत्र गवादेरन्वयायोगात्, नच चित्राभिन्ना गौरिति शक्त्युपस्थाप्ययोरन्वयबोधोत्तरं तादृशगोस्वामी गोपदेन लक्ष्यते इति वाच्यं, गोपदस्य चित्रपदस्य वा विनिगमनाविरहेण लक्षकत्वासम्भवात्।

ॐ दर्पणः ॐ

रित्यर्थः । चित्रस्वामीत्यादि । 'समानाधिकरणनामार्थयो'रिति व्युत्पत्तेरिति भावः । ननु गोपदस्य गोमति लक्षणा, गवि चित्रस्याभेदान्वये चित्राभिन्नगोस्वामीति बोधो नानुपपन्नोऽत आह—चित्रादिमात्रस्येति । आदिना—गवादिपरिग्रहः । प्राथम्यात् पूर्वपदे लक्षणेत्याशयेन 'चित्र'पदोपादानम् । लक्ष्यैकदेशत्वेनेति । लक्ष्यगोस्वामिरूपपदार्थैकदेशत्वेनेत्यर्थः । अन्वयायोगादिति । एकपदार्थप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धिं प्रति विशेष्यतासम्बन्धेनापरपदजन्योपस्थितेर्हेतुतेत्यर्थपर्यवसितायाः 'पदार्थः पदार्थेनाऽन्वेती'त्यादिव्युत्पत्तेर्विरोधादुक्तयन्वयाभावादिति भावः ।

ॐ काशिका ॐ

चित्रेति । चित्रस्वामी गौरितीति । गोपदसांनिध्याच्चित्रपदेन चित्ररूपवत्त्वेन गोरेव बोधनिर्वाहेऽपि चित्रान्वितगोत्वविशिष्टायाः स्वामिनि वैशिष्ट्यबोधानुपपत्तिः, गोपदोपस्थितार्थे चित्रस्वामिनोऽभेदान्वयापत्तिः, एवं जरच्चित्रगुः, शोभनचित्रगुरित्यादावेकैकपदस्य स्वार्थस्वामिलक्षकत्वे जरदाद्यभिन्नो यो गोस्वामी तदभिन्नो गौरिति बोधः स्यान्न तु जरदाद्यर्थस्य गवा सह, व्यवधानादित्यपि द्रष्टव्यम् । चित्रपदं चित्रस्वामिलक्षकं, गोपदं गोस्वामिलक्षकम्, चित्रत्वेन गोत्वेन चैकव्यक्तेरेव भानं, व्यक्तिवचनानां संनिहितव्यक्तिपरत्वमिति न्यायादिति तु तादृशबोधाननुभवाच्छोभनचित्रगुरित्यादौ शोभनान्वयानुपपत्तेश्चानुपादेयम् । शोभनपदस्यापि शोभनस्वामिलक्षकत्वे अत्यन्तानुभवविरोध इत्यादि द्रष्टव्यम् । अनन्वय एव गोपदार्थस्य स्यादिति भावः । नान्त्य इत्याह—नापीति । गोः स्वामी चित्र इति—पूर्ववद्व्याख्येयं, तादृशेऽर्थे तात्पर्याद्यभावग्रहो हेतुः । ननु चित्रादिपदलक्ष्यार्थैकदेशचित्रादिना गवादेरभेदान्वये सति गवाभिन्नचित्रस्वामी चित्राभिन्नगोस्वामीति वा बोधो भवति, तथा च नोक्ताकारबोधापत्तिरित्यत आह—चित्रादिमात्रस्येति । मात्रपदेन स्वामिनो व्यवच्छेदः । अन्वयायोगादिति । 'पदार्थः पदार्थेने'त्यादिव्युत्पत्तिविरोधात् । अन्वयबोधोत्तरमिति । पदार्थोपस्थित्यादिघटितसामग्र्या तयोरेवादावन्वयो भवति प्रत्यासन्नत्वात् तदनन्तरं चित्राभिन्नाया गोर्बोधग्रहे सति गोपदेन चित्राभिन्न-

न च गोपदे साक्षात्सम्बन्ध एव विनिगमक इति वाच्यम्, एवमपि 'प्राप्तोदकः,' 'कृतविश्व' इत्याद्यषष्ठ्यर्थबहुव्रीहौ विनिगमकाऽप्राप्तेः, यौगिकानां कर्त्राद्यर्थकतया साक्षात्सम्बन्धाविशेषात्, न च 'पदद्वये लक्षणे'ति नैयायिकोक्तं युक्तम्, बोधावृत्तिप्रसङ्गात्। न च परस्परं तात्पर्य्यग्राहकत्वादेकस्यैवैकदा लक्षणा, न द्वयोरिति, न बोधावृत्तिरिति वाच्यम्, एवमपि विनिगमनाविरहतादवस्थ्येन लक्षणाया असम्भवात्, न च

❀ दर्पणः ❀

कस्यचिन्मतमाशङ्क्य निराचष्टे—**न चेति**। **साक्षादिति**। गवाद्वारक इत्यर्थः। तथा च षष्ठ्यर्थबहुव्रीहौ न व्युत्पत्त्यन्तरकल्पनमिति भावः। **पदद्वय इति**। विनिगमकाभावादिति भावः। **नैयायिकेति**। एकदेशान्वयपक्षे हि तैरित्थमुक्तम्। **बोधावृत्तीति**। बोध्यमानस्य स्वामिनो द्वेधा भानापत्तेरित्यर्थः। **विनिगमनाविरहेति**। चित्रपदं तात्पर्य्यग्राहकमुत गोपदमित्येकतरपक्षपातियुक्तिविरहतादवस्थ्येनेत्यर्थः। **असम्भवादिति**। एकतरपदे लक्षणाया असम्भवा-

❀ काशिका ❀

गोस्वामित्वेन रूपेणान्यपदार्थो लक्ष्यते। प्राथमिकतादृशबोधश्च चित्रत्वादिविशिष्टगोस्वामित्वोपस्थितय आवश्यकः। तादृशबोधोत्पादकतया च चित्रापदसार्थक्यमिति भावः। **साक्षात्संबन्ध इति**। तत्र शक्यसंबन्धः सत्त्वनिरूपितस्वामित्वरूपः साक्षात्संबन्धः, चित्रपदस्य गुणवाचकतया स्वशक्तिसमवायिनिष्ठत्वनिरूपितस्वामित्वरूप आश्रयद्रव्यघटितः परंपरासंबन्धो लक्षणारूपो वाच्य इति गौरवमिति भावः, इदं तु परीत्योक्तम्, स्वमते तु चित्रपदस्यापि गुणविशिष्टद्रव्यवाचकत्वेन तस्यापि साक्षात्संबन्धसंभवादिति ध्येयम्। **कृतविश्व इति**। कृतं विश्वं येनेति व्युत्पत्त्या विश्वकर्मकोत्पादकत्वेन विश्वविषयककृतिमत्त्वेन वान्यपदार्थः प्रतीयते। अत्रापि षष्ठीपदं र[illegible]म्या अप्युपलक्षणं, चित्रगुर्ग्राम इति सप्तम्यर्थबहुव्रीहावपि। **कर्त्राद्यर्थकतयेति**। प्राप्तोदक इत्यत्र कर्तरि क्तः। कृतविश्व इत्यत्र कर्मणि। स्नानीयचूर्णं पात्रमित्यादौ करणाद्यर्थकः कृत्प्रत्यय इत्यर्थः, विनिगमकसम्भवाद्यौगिकानामित्युक्तिः, शुक्लाद्यादिरूढव्युदासार्थम्। इदमुपलक्षणम्, पाठकपुत्रको देवदत्तः, वीरपुरुषको ग्रामः, पाचकपुरुषक इति षष्ठ्यर्थबहुव्रीहौ सप्तम्यर्थबहुव्रीहावपि क्वचिद् विनिगमनाविरहात् वीरपाठकादिपदानामपि धर्मिवाचकत्वेन साक्षात्सबन्धोऽविशेषात् परं तु द्वितीयाद्यर्थबहुव्रीहौ सर्वत्रैव विनिगमनाविरहोऽन्यत्र तु क्वचिदिति सूचयितुमषष्ठ्यर्थेत्युक्तमिति बोध्यम्। **पदद्वये लक्षणेति**। चित्रपदे, गोपदे च चित्रगोस्वामिलक्षणेत्यर्थः। **नैयायिकेति**। प्राचीननैयायिकेत्यर्थः। **परस्परमिति**। चित्रपदे चित्रगोस्वामिलक्षणायां गोपदसमभिव्याहारस्तादृशार्थतात्पर्यग्राहकतया नियाम[illegible]। गोपदे लक्षणायां चित्रशब्दसमभिव्याहारो नियामक इत्यर्थः। **विनिगमनाविरहताद**व-

चरमपदे एव सा, प्रत्ययार्थान्वयानुरोधात्, प्रत्ययानां सन्निहितपदार्थगत-स्वार्थबोधकत्वव्युत्पत्तेरिति वाच्यम्, एवं हि बहुव्रीह्यसम्भवापत्तेः, 'अनेकमन्यपदार्थे' इत्यनेनानेकसुबन्तानामन्यपदार्थप्रतिपादकत्वेन तद्विधानात्।

किञ्चैवं सति घटादिपदेष्वपि चरमवर्ण एव वाचकताकल्पना स्यात्,

❀ दर्पणः ❀

दित्यर्थः। पदद्वये लक्षणायान्तूक्तदोष इति भावः। प्रत्ययार्थानुपपत्तिरेव उत्तरपदे लक्षणायां विनिगमिका भविष्यतीत्याशङ्क्य निराचष्टे—**न चेति**। **एवं हीति**। उत्तरपदस्यैवान्यपदार्थलक्षकत्वे इत्यर्थः। बहुव्रीह्यसम्भवे हेतुमाह-**अनेकमिति**। तद्विधानादित्यर्थः। अयम्भावः—वृत्तेर्विशिष्टार्थकत्वं न शास्त्रैकगम्यम्, 'अचतुरे'-त्यादावर्थानादेशनात्, किन्तु लौकिकव्यवहारगम्यं, 'स्वभावत एव तेषां शब्दानामेष्वर्थेष्वभिनिविष्टानां निमित्तत्वेनान्वाख्यानं क्रियत' इति समर्थसूत्रभाष्यात्। 'अनेकमन्यपदार्थे,' 'चार्थे द्वन्द्व' इत्यादीनामनेकं प्रथमान्तमन्यार्थप्रतिपादकं बहुव्रीहिसंज्ञकं भवति, चार्थे वर्त्तते यः प्रथमान्तसमुदायः स द्वन्द्वसंज्ञको भवतीति क्रमेण लोकसिद्धार्थानुवादेन बहुव्रीह्यादिसंज्ञाविधायकत्वमात्रम्, अर्थस्यापि विधाने वाक्यभेदापत्तेः, स्वसमानार्थकवाक्यानिवृत्तये विभाषाधिकारोपि विधेयः स्यात्, एवञ्च सुबन्तसमुदायस्यान्यार्थप्रतिपादकत्वे कथं बहुव्रीहिः स्यादिति। नन्वेकपदस्यान्यार्थप्रतिपादकत्वे तात्पर्य्यग्राहकतयाऽपरपदस्याप्युपयोगित्वेन समुदायस्य विशिष्टार्थप्रतिपादकत्वमविकल्प्यमत आह—**किञ्चैवमिति**।

❀ काशिका ❀

स्थ्येनेति। कदा कस्मिन्नेकपदे लक्षणेत्यत्र विनिगमनाविरहतादवस्थ्येनेत्यर्थः। **लक्षणाया असंभवादिति**। एकदा एकपदे लक्षणाया असंभवादित्यर्थः, एवं शोभना चित्रगुः, शोभना जरती चित्रगुरित्यादौ शोभनादिपदार्थस्यानन्वयापत्तिश्च। चित्रादेरेकदेशत्वेन तत्रान्वयासंभवात्, शोभनादिपदेऽपि शोभनाचित्रगोस्वामिलक्षणाभ्युपगमे त्रयाणामपि पदानां तादृशविशिष्टार्थलक्षकत्वात् समुदायशक्त्यपेक्षया लाघवानवकाशः। विनिगमनाविरहेण पदत्रयजन्यानां तिसृणामप्युपस्थितीनां शाब्दबोधहेतुत्वाभ्युपगमप्रयुक्तं गौरवं चैतत्कल्पे बोध्यम्।

नव्यनैयायिकसिद्धान्तं दूषयितुमुपन्यस्यति—न चेति। **सा** = लक्षणा। **संनिहितपदार्थेति**। संनिहितपूर्वपदार्थेत्यर्थः। अन्यथा राज्ञः पुरुष इत्यत्र पुरुषपदार्थेऽपि षष्ठ्यर्थसंबन्धान्वयापत्तिः। तथा च पुरुषसंबन्धिराजेत्यपि प्रतीयेत। तथा च प्राप्तोदक इत्यादावप्युदकादिपदे एवोदककर्तृकप्राप्तिकर्मादिलक्षणाङ्गीक्रियते इति भावः। नन्वन्यपदार्थप्रतिपादकत्वं तत्प्रतीत्यनुकूलत्वं, तच्चरमपदस्य स्ववृत्त्या तदुपस्थापकत्वेनेतरपदस्य तात्पर्यग्राहकतया तद्बोधानुकूलत्वं भवतीत्यतो दू...तरमाह—**किं चेति**। **एवं सतीति**। बहुव्रीहौ चरमपदे एव लक्षणाङ्गीकारे सति।

पूर्वपूर्ववर्णानां तात्पर्यग्राहकत्वेनोपयोगसम्भवात्, एवं सति चरमवर्णमात्र-श्रवणेऽर्थबोधापत्तिरिति चेद्,—अत्राप्युदकपदमात्रश्रवणादर्थप्रत्ययापत्ति-स्तुल्येत्यन्यत्र विस्तरः।

एवञ्च,—अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना = उक्तयुक्ते रगत्या शक्त्यन्तरकल्पनेत्यर्थः। क्लृप्तत्यागः—इत्यस्य 'क्लृप्तशक्त्योप-पत्ति'रिति व्युत्पत्तित्यागश्च तवास्ति, तत किं,—सर्वत्र समासे—शक्तिं न कल्पयेरिति वाक्यार्थः।

ॐ दर्पणः ॐ

समासस्थचरमपदस्यैव लक्षकत्वे सतीत्यर्थः। इष्टापत्तावाह—एवं सतीति। चरमवर्णस्य वाचकत्वे सतीत्यर्थः। अत्रापि = प्राप्तोदकादावपीत्यर्थः। आपत्ति-रिति। आपाद्यव्यतिरेकनिर्णयकालिकापाद्यव्याप्यापादकवत्ताज्ञानसत्त्वादिति भावः। ननूदकपदमात्रश्रवणान्न लक्ष्यार्थबोधः, तदानीं लक्षणाकल्पिकायास्तात्पर्यग्राहक-पूर्वपदोपस्थितेरभावादत आह—अन्यत्रेति। भूषणे इत्यर्थः। विस्तर इति। उत्तरपदलक्ष्यार्थे प्रकृत्यर्थत्वाभावेन तत्र प्रत्ययार्थान्वयापत्तिरित्यादि तत्रोक्तम्। व्युत्पत्तीति। व्युत्पत्तित्यागः—प्रकृते प्रतिज्ञाहानिरेव। व्यपेक्षावादिन इति।

ॐ काशिका ॐ

चरमवर्णे एव वाचकतेति। चरमवर्णस्यैव प्रत्ययाव्यवहितत्वात्, लाघवाच्च तेनैव वाचकता-कल्पना स्यात्, न चेष्टापत्तिरपसिद्धान्तादिति भावः। किं च घटपटादिघटकाच्प्रत्ययरूपचरमवर्णस्य लक्षणयैव घटादिविशेषोपपत्तिरित्यपि द्रष्टव्यम्। ननु कोशादिप्रामाण्येन घटादिपदस्य तावद्वर्ण-समुदायरूपस्य वाचकत्वमभ्युपेयते, प्रकृते तु चरमपदलक्षणयैवोपपत्तौ न समुदायशक्तिसिद्धिः यकोशादेरभावात् अनन्यलभ्यस्यैव शब्दार्थत्वाच्चेत्याशङ्क्याह—अन्यत्र विस्तर इति। अन्यत्र = बृहद्भूषणादौ। विस्तर इति। प्रत्ययानां संनिहितपूर्वेत्यादिव्युत्पत्तिस्वीकारो न संभवति, सर्वक इत्यादौ व्यभिचारात्। 'दधीयद्ददाती'त्यादौ दध्नि वतुबर्थान्वयापत्तेः। दधि बहुपटुर्ददाति इत्यत्र दध्नि बहुजर्थान्वयापत्तेः, पटावनन्वयापत्तेश्चेति। किं चैवं प्रातिपदिकात् कर्मत्वादौ स्वादय इति शास्त्रात् प्रत्यासत्तिलभ्याया प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तेरतल्लभ्यस्य परम्परार्थान्वयेनैव प्रकृतिप्रत्यययोः साधुत्वस्य च भङ्गः, उत्तरपदमात्रस्याप्रकृतित्वात् चित्रगुरित्यादौ पूर्वपदे स्ववाच्यार्थघटितलक्षणायां तात्पर्यग्राहकत्वस्य गङ्गायां घोष इत्यादौ क्लृप्तस्य च भङ्गा-पत्तिः। व्युत्पत्त्यन्तरस्वीकारे तु विशिष्टशक्तिरेवोचितेति द्रष्टव्यमिति भावः। उक्तयुक्तेरिति। प्राप्तोदकादावन्वयानुपपत्तिरूपयुक्तेरित्यर्थः। क्लृप्तत्याग इति व्याचष्टे—क्लृप्तशक्त्येति। व्यु-त्पत्तित्यागश्चेति। क्लृप्तशक्त्यैव निर्वाह इति नियमत्यागश्चेत्यर्थः, अन्यथादकर्तृ ..सि-

यत्तु व्यपेक्षावादिनो नैयायिकमीमांसकादयः—'न समासे शक्तिः, 'राजपुरुष' इत्यादौ राजपदादेः सम्बन्धिलक्षणयैव राजसम्वन्ध्यभिन्नः

❀ दर्पणः ❀

समर्थसूत्रेपरस्परान्वययोग्यत्वरूपसामर्थ्यमेव व्यपेक्षेति वादिन इत्यर्थः। **न समासे शक्तिरिति**। समासे राजपुरुषादिसमुदाये विशिष्टशक्तिर्नेत्यर्थः। समाससंज्ञाप्रयोजत्वं क्लृप्तप्रत्येकपदवृत्त्यतिरिक्ते नास्तीति यावत्। 'संसृष्टार्थ'मिति भाष्यकारोक्तेः संसर्गस्य पृथगुपस्थितिनिबन्धनत्वात् परस्परव्यपेक्षैव सामर्थ्यम्, 'इसुसोः सामर्थ्ये' इत्यत्र समर्थपदस्य तादृशार्थकत्वस्य सर्वैरेवाङ्गीकारात्, पराङ्गवद्भावानुरोधाच्च, अन्यथा समासादावेकार्थीभावः पराङ्गवद्भावादौ व्यपेक्षेति वाक्यभेदापत्तेः, तत्र व्यपेक्षानादरे तु,—'ऋतेन मित्रावरुणावृतावृधावृतस्पृशा'वित्यादा'वृतेने'त्यादेः पराङ्गवद्भावे सति, 'आमन्त्रितस्य चे'त्याद्युदात्ततापत्तिः, न च 'तन्निमित्तग्रहणं कर्त्तव्य'मिति वार्त्तिकेनामन्त्रितार्थस्य यन्निमित्तं तद्वाचकमेव पराङ्गवदित्यर्थकेन नियमितत्वात् पराङ्गवद्भावाप्रसक्तिरिति वाच्यं, समर्थपरिभाषामाश्रित्य तत्प्रत्याख्यानस्यैव न्याय्यत्वात्। 'ऋतेन मित्रावरुणा'वित्येतयोः समभिव्याहृतक्रियान्वयित्वेन परस्परमसामर्थ्याद् मित्रावरुणावृतस्पृशावेतयोस्तु पार्ष्ठिकान्वयबोधसत्त्वादत्त्येव सामर्थ्यं, स्पष्टं चेदं वेदभाष्ये। अत एवानन्तरपाठोऽपि चरितार्थः, 'पुत्रो राज्ञः पुरुषो देवदत्तस्ये'त्यादौ निरुक्तव्यपेक्षारूपसामर्थ्याभावादेव समासाऽप्रसक्तेः, समर्थसूत्राऽर्थस्तु—पदसम्बन्धी समासादिविधिः साक्षात्परम्परया वा स्वप्रयोज्यविषयतानिरूपितविषयताप्रयोजकत्वरूपव्यपेक्षापरनामकसामर्थ्यवत्पदाश्रितो बोध्य इति। बहुव्रीहौ चित्रादिविषयतायाः साक्षात्प्रयोजकत्वाभावा'त्परम्परये'ति, किञ्च वृत्तित्वावच्छेदेनैकार्थीभाववादिमते स्वावयवार्थातिरिक्तार्थाभिधायकत्वरूपवृत्तिलक्षणस्य कर्मधारयेऽव्याप्तिः, तत्रावयवाऽर्थातिरिक्तार्थवत्त्वाभावात्। वृत्तित्वसामानाधिकरण्येन तु रथन्तरादिशुद्धरूढे पङ्कजादियोगरूढे च कोशादिसिद्धायाः समुदायशक्तेरस्माभिरप्यभ्युपगमेन सिद्धसाधनात्। शुद्धयौगिकचित्रग्वादिसमुदाये शक्त्यभ्युपगमस्तु कोशाद्यनुक्तत्वात्समासघटकप्रत्येकपदवृत्त्यैवोपपत्तेश्च हेय इति तदभिसन्धिः। शक्तिकल्पकानुपपत्त्यभावं प्रयोजकतया दर्शयति—**राजपुरुष इत्यादाविति**। न च सम्बन्ध एव लक्ष्योस्तु, एवं च व्याससमासयोः समाना-

❀ काशिका ❀

कर्मेति बोधानुपपत्तेरिति भावः। **तर्हि शक्तिमिति**। पूरणसंवलितं व्याचष्टे—**तर्हि सर्वत्र** समासे शक्तिमिति।

पुरुष इति बोधोपपत्तेः, अत एव राज्ञः पदार्थैकदेशतया न तत्र शोभन-स्येत्यादिविशेषणान्वयः, न वा 'घनश्यामो' 'निष्कौशाम्बि' 'गोरथ' इत्यादौ

❀ दर्पणः ❀

कारबोधजनकत्वप्रवादोऽप्युपपत्स्यते, राजादिसम्बन्धरूपलक्ष्यार्थस्योत्तरपदार्थे आश्रयतयान्वयेनैवोपपत्तौ सम्बन्धिनि लक्षणाभ्युपगमे प्रयोजनभावश्चेति वाच्यं, 'राजा पुरुष' इत्यादावपि राजादिपदार्थस्य स्वस्वामिभावसम्बन्धेन पुरुषादावन्वयवारणाय—'निपातातिरिक्तनामार्थनिष्ठाभेदातिरिक्तसम्बन्धावच्छिन्न-प्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धिं प्रति विशेष्यतासम्बन्धेन प्रत्यय-निपातान्यतरजन्योपस्थितेर्हेतुत्वस्यावश्यकतया प्रकृते राजसम्बन्धरूपनामार्थस्य प्रत्ययनिपातान्यतरानुपस्थितेः पुरुषादावन्वयासम्भवात् । निपातातिरिक्तत्वविशे-षणा'च्चन्द्र इव मुख'मित्यादाविवपदार्थसादृश्यस्य नामार्थस्य प्रत्ययजन्योपस्थि-त्यविषये मुखे—निपातातिरिक्तनामार्थचन्द्रस्य तथोपस्थित्यविषये—सादृश्येऽन्वयेऽपि न क्षतिः । 'अभेदातिरिक्तसम्बन्धावच्छिन्नत्वस्य' प्रकारतायां निवेशाच्च—'राजा पुरुष' इत्यादावभेदान्वयेऽपि न सा । न च समस्यमानातिरिक्तत्वेनापि नाम्नो विशेषणीयत्वान्न प्रकृतेऽनुपपत्तिरिति वाच्यं, गौरवात्, क्वचिदगत्या सङ्कोचेऽपि सर्वत्र सङ्कोचस्यान्याय्यत्वाच्च, प्रकृते सम्बन्धिलक्षणाभ्युपगमरूपगति-सत्त्वात् । निपातानां द्योतकत्वनये घटादिपदानां घटादिप्रतियोगिकलाक्षणिकत-यैवोपपत्तौ निपातातिरिक्तत्वस्याप्रवेशाच्चेति भावः । **अत एवेति** । पूर्वपदस्य सम्बन्धिलाक्षणिकत्वादेवेत्यर्थः । न **विशेषणान्वय** इति । 'पदार्थः पदार्थेनान्वेती'ति व्युत्पत्तेरिति भावः । ननु 'गभीरायां नद्यां घोष' इत्यादौ नदीपदलक्ष्यनदीतीरार्थैकदेशनद्यादौ गभीराद्यन्वयवदत्राप्येकदेशान्वयो दुर्वार इति चेन्न, दृष्टान्तासिद्धेः, तत्राप्येतन्मते नदीपदस्य गभीर-नदीतीरलक्षकतया, गभीरतात्पर्यग्राहकतायाश्च वक्ष्यमाणतया अदोषात्,

❀ काशिका ❀

इति बोधोपपत्तेरिति । तथा च समुदायशक्तिं विनापि राजपदे राजसंबन्धिलक्षणया संबन्धबोधनिर्वाहे सति तत्तद्बोधान्यथानुपपत्त्या समुदायशक्त्युपगमश्चिन्त्यः, गौरवापत्तेः, न च वृत्त्यार्थबोधकत्वरूपार्थवत्त्वाभावात् प्रातिपदिकत्वानापत्तिः समासस्येति वाच्यम्, 'अर्थव'त्पदस्य स्वस्वावयवान्यतरवृत्त्यार्थबोधकत्वार्थकतयानुपपत्त्यभावात्, समासत्वादेव प्रातिपदिकत्वसंभवाद्वेति भावः । अत्र संबन्धे लक्षणाभ्युपगमे 'नामार्थयो'रिति व्युत्पत्तिविरोधेन संबन्धस्याश्रयतासंबन्धेन पुरुषेऽन्वयानुपपत्तिरिति संबन्धिलक्षणानुसरणं कृतम् । **अत एव** = संबन्धिनि लक्षणाभ्युपगमा-देवेत्यर्थः, 'एव'शब्दोऽप्यर्थः । **न शोभनस्येत्यादिविशेषणान्वय इति** । 'शोभ[illegible]

इवादिप्रयोगापत्तिः, उक्तार्थकतया इव-क्रान्तादिपदप्रयोगासम्भवात् ।

न वा,—'विभाषे'ति सूत्रावश्यकत्वं, लक्षणया राजसम्बन्ध्यभिन्नः पुरुष इति बुबोधयिषायां समासस्य, राजसम्बन्धवानिति बुबोधयिषायां विग्रहस्येत्यादिप्रयोगनियमसम्भवात् । नापि पङ्कजपदप्रतिबन्दी शक्तिसाधिका,

❀ दर्पणः ❀

तादृशव्युत्पत्तेः ससम्बन्धिव्यतिरिक्तविषयतया 'चैत्रस्य नप्ते'त्यादावेकदेशाऽन्वयेऽपि क्षतिविरहादिति । **उक्तार्थतयेति ।** तत्र निरादीनां द्योतकतया कौशाम्ब्यादिपदस्यैव कौशाम्ब्यवधिकनिष्क्रमणकर्त्राद्यर्थे लक्षणाभ्युपगमेनैवेप्सितार्थबोधोपपत्तौ क्रान्तादिशब्दानामुपादानासम्भवादित्यर्थः । **आवश्यकत्वमिति ।** तेन पारायणादावदृष्टार्थकतया, स्पष्टप्रतिपत्त्यर्थकतया वा तदुपयोगेऽपि न क्षतिरिति भावः । **प्रतिबन्दीति ।** पङ्कजादिपदे पद्मत्वादिविशिष्टशक्त्यभ्युपगमरूपेत्यर्थः । 'अवयवशक्तिमजानतोऽपी'त्यपिना दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं सूच्यते । शक्त्यग्रहे = अवयवशक्तिग्रहाऽभावे । तेभ्यः = पङ्कजादिपदघटकावयवेभ्यः ।

❀ काशिका ❀

गङ्गायां घोष' इत्यादौ तु गङ्गापदमेव शोभनगङ्गातीरलक्षकमतस्तत्र लक्ष्यार्थैकदेशगङ्गायां शोभनान्वयवदत्रापि लक्ष्यार्थैकदेशे राजादावपि शोभनान्वयः स्यादिति शङ्कानवसरः । 'घनश्याम' इत्यत्र घनपदार्थस्य सादृश्यसंबन्धेनोत्तरपदार्थेऽन्वयः, 'निष्कौशाम्बि'रित्यत्र निष्क्रमणावधित्वसंबन्धेन, 'गोरथ' इत्यत्र स्वयुक्तत्वसंबन्धेन पूर्वपदार्थस्योत्तरपदार्थे । एवं च—संसर्गतयेवार्थोक्तावपि सादृश्यादिप्रकारकबोधार्थं इवादिशब्दप्रयोगो दुर्वार इत्याशयेन शङ्कते—न चेति । **उक्तार्थकतयेति ।** समासे घनादिपदस्य तत्सदृशादिलक्षकतयोक्तार्थकत्वम्, अन्यथा 'नामार्थयो'रिति व्युत्पत्तिविरोधेन सादृश्यादिसंबन्धेनान्वयानुपपत्तेरिति भावः । **प्रयोगनियमेति ।** विभिन्नविषयकत्वेन समासादिना वाक्यबाधाप्रसक्तेरिति भावः, नीलोत्पलादिकर्मधारये प्रवृत्तिनिमित्त साहित्ये लक्षणा ? नीलोत्पलयोर्वा साहित्ये ? आद्ये—नीलोत्पलत्वसमूहवन्नीलमुत्पलमिति बोधः, द्वितीये तु—नीलसमानाधिकरणं तदभिन्नमुत्पलमिति । शाब्दिकमते समुदायशक्तिरेतदर्थमेवोपेयते, वाक्ये तु चद्वयेन तत्साहित्यं प्रतिपाद्यतेऽतो विविक्तविषयत्वं वृत्तिवाक्ययोः, एवमेव द्वन्द्वेऽपि बोध्यम् । अन्ये तु—नीलं च तदुत्पलं चेति वाक्ये नीलादिपदोत्तरविभक्तेरभेदोऽर्थः, तस्याश्रयत्वसंबन्धेनोत्तरपदार्थेऽन्वयः, समासे तु नीलादिपदेनैव लक्षणया नीलाद्यभेदः प्रतिपाद्यते, तथा च लक्षणया तादृशार्थविवक्षायां समासो, विभक्त्या तद्विवक्षायां वाक्यमिति व्यवस्थायाः संभवः, 'एकार्थीभावपदेनापि वाक्यदृष्टपदार्थघटितार्थे लक्षणैवोच्यत इति भाव इत्यूचुः । एवमौपगवादावपि उपगवादिशब्दस्योपगवादिसंबन्धे लक्षणेति बोध्यम् । **शक्तिसाधिकेति ।** वृत्तित्वे शक्तिसाधिकेत्यर्थः । अवयवशक्त्यग्रहस्य लक्षणाग्रहे कथं बाधकत्वमत आह—न च

तत्रावयवशक्तिमजानतोऽपि बोधात्, न च शक्त्यग्रहे लक्षणया तेभ्यो विशिष्टार्थप्रत्ययः सम्भवति। अत एव राजादिपदशक्त्यग्रहे 'राजपुरुषः' 'चित्रगु'रित्यादौ न बोधः, न च 'चित्रगु'रित्यादौ लक्षणासंभवेऽप्यषष्ठ्यर्थ-बहुव्रीहौ लक्षणाया असम्भवे बहुव्युत्पत्तिभञ्जनापत्तेरिति वाच्यं, 'प्राप्तो-दक' इत्यादावुदकपदे एव लक्षणास्वीकारात्, पूर्वपदस्य यौगिकत्वेन

❀ दर्पणः ❀

विशिष्टार्थप्रत्यय इति। पद्मत्वादिरूपेण पद्मादिबोध इत्यर्थः, लक्षणायाः शक्तिघटितत्वादिति भावः। **अत एवेति।** तत्पदीयलक्षणाग्रहे तत्पदशक्ति-ज्ञानस्य हेतुत्वादेवेत्यर्थः। उत्तरपदलक्षणायां विनिगमकमाह—**यौगिकत्वेनेति।** 'विलम्बितत्वा'दित्यनेन शीघ्रोपस्थितिकत्वमुत्तरपदलक्षणायां विनिगमकमिति सूचि-

❀ काशिका ❀

शक्त्यग्रह इति। 'न च संभवती'ति योजना। न चेत्यस्य—न हीत्यर्थः। शक्तिग्रहं विना शक्यानुपस्थितौ शक्यसंबन्धरूपलक्षणाग्रहवैधुर्येण पद्मत्वविशिष्टार्थबोधासंभव इति भावः। तथा चावयवशक्तिग्रहविरहदशायामपि पङ्कजपदात् पद्मत्वप्रकारकबोधस्यानुभवसिद्धस्य संपत्तये समुदाय-शक्त्यावश्यकत्वमिति तात्पर्यार्थः। एवमेव 'रथकार'शब्देऽपि समुदायशक्त्यभ्युपगम आवश्यक इति न पूर्वोक्ताधिकरणविरोध इति बोध्यम्। नन्वेवं राजादिपदशक्त्यग्रहदशायां राजसंबंधी पुरुष इति बोधो न स्यादिति तत्रापि समुदायशक्तिरभ्युपगन्तव्येत्याशङ्कामिष्टापत्त्या परिहरति—**अत एवेति।** अवयवशक्तिज्ञानस्य लक्षणया विशिष्टार्थबोधप्रयोजकत्वादेवेत्यर्थः। **न बोध इति।** तथा च तत्रावयवशक्तिग्रहविरहसमये तादृशबोधाभाव एवानुभवसिद्धो न तु बोध इति बोधानुदय इष्टापत्तिरेवेति भावः। '**बहुव्युत्पत्तिभञ्जनमिति।** मूले एव प्रागेतद्व्याख्यातम्। उत्तर-पद एव लक्षणायां विनिगमकमाह—**पूर्वपदस्येति। तल्लक्षणाया इति।** पूर्वपदलक्षणाग्रहस्ये-त्यर्थः। **धातुप्रत्ययेति।** धातुप्रत्यययोस्तदर्थयोश्च ज्ञानसाध्यतयेत्यर्थः, धात्वादिज्ञानं विना तदर्थज्ञानानुपपत्त्यार्थज्ञानद्वारा धात्वादिज्ञानस्यापि लक्षणाग्रहप्रयोजकत्वमिति भावः। ननु 'प्राप्ते'ति समुदाये न लक्षणा, तस्य शक्त्यभावेन शक्यसंबन्धरूपलक्षणाया असंभवात्, किंतु तत्तद्घटकक्तप्रत्यये एव, तथा च तत्तदर्थज्ञानमात्रसाध्यत्वं, न तु धातुतदर्थज्ञानसाध्यत्वमपि, एवं चोदकपदलक्षणायामपि उदकशब्दतदर्थज्ञानसाध्यतया साम्यमेव। ननु क्तप्रत्यये उदककर्तृकप्राप्तिकर्मलक्षणायां तादृशधातुसमभिव्याहारज्ञानस्य तात्पर्यग्राहकत्वं वाच्यमन्यथातिप्रसङ्गात्, एवं च धातुतदर्थज्ञानसाध्यत्वमक्षतमेव, किं च 'स्वबोध्यसंबन्धो लक्षणे'ति मीमांसकमते 'प्राप्ते'ति समुदाये लक्षणासंभवात्तत्तदर्थज्ञानसाध्यत्वमनपवादमिति स्फुटमेवेति चेत्—उदकपदे तादृशार्थलक्षणायामपि प्राप्तपदसमभिव्याहारस्य तात्पर्यग्राहकतया धातुप्रत्ययतदर्थज्ञानसाध्यत्वं दुरपह्नवमेव, प्राप्तिकर्मज्ञानं विना तत्संबन्धरूपलक्षणाग्रहाऽसंभवादित्यत उत्तरपदलक्षणायां

तल्लक्षणाया धातुप्रत्ययतदर्थज्ञानसाध्यतया विलम्बितत्वात्, प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्त्यनुरोधाच्च। घटादिपदे चातिरिक्ता शक्तिः कल्प्यमाना विशिष्टे कल्प्यते, विशिष्टस्यैव सङ्केतितत्वात्, बोधकत्वस्यापि प्रत्येकं वर्णेष्वसत्त्वात्, प्रकृते चात्यन्तसन्निधानेन प्रत्ययार्थान्वयसौलभ्यायोत्तरपदे एव सा कल्प्यत इति विशेषः। स्वीकृतञ्च—

※ दर्पणः ※

तम्। ननु व्युत्पत्तिपक्षे यौगिकत्वमुदकादिपदानामपि सममत आह—प्रत्ययानामिति। यथाश्रुतप्रकृत्यर्थत्वस्योदकादौ बाधात्प्रकृत्यर्थपदमन्यथा व्याचष्टे—सन्निहितेति[१]। तथाच'णुरपि विशेषोऽध्यवसायकर' इति न्यायेनोत्तरपद एव लक्षणेति न बोधावृत्तिरूपदूषणमपीति भावः। पूर्वोक्तदूषणान्तरमुद्धरति—घटादिपदे चेति। 'कल्प्यमाने'त्युक्त्याऽक्लृप्तसत्त्वं सूचयति। विशिष्टस्यैवेति। व्यवहारादिना तत्रैव तन्निर्द्धारणादिति भावः। 'असत्त्वा'दित्यस्य,—'येन तत्रापि विनिगमकगवेषणा स्या'दिति शेषः। उत्तरपद इति। प्राप्तोदकादिघटकोदकादिपदे इत्यर्थः। सा = लक्षणा। विशेष इति। घटादिपदात् समासस्य लक्षणाया

※ काशिका ※

विनिगमकान्तरमाह—प्रत्ययानामिति। संनिहितेति। संनिहितं यत्पदं तदर्थगतेत्यर्थः। अत्र 'राजपुरुषमानये'त्यत्र राज्ञि न प्रत्ययार्थकर्मत्वाद्यन्वयः, अन्यथा द्विवचनापत्तेः, पुरुषे आनयनकर्मत्वविरहग्रहदशायां राजनि आनयनकर्मत्वान्वयतात्पर्येण 'राजपुरुषमानये'ति प्रयोगापत्तेश्च, तादृशश्रवणानन्तरं तदर्थबोधे सति राजानयनापत्तेश्च। एतेन—राजनि तदन्वये इष्टापत्तिर्निरस्ता। घटादिपदघटकचरमवर्णस्यैव वाचकत्वं स्यात्तुल्यन्यायादिति शाब्दिकोक्तप्रतिबन्दीरूपं दूषणं निरस्यति—घटादिपदे चेति। अतिरिक्ता शक्तिरिति। तद्घटकधात्वादिशक्त्यतिरिक्ता, गृहीतशक्तिकपदशक्त्यतिरिक्ता, बोधकत्वातिरिक्ता वेत्यर्थः। विशिष्टे कल्प्यते = विशिष्ट एव कल्प्यते। संकेतितत्वात् = कोशादिना संकेतितत्वेन बोधनात्। ननु बोधकत्वरूपा शक्तिश्चरमवर्णे एव स्यात्, किं च तदन्यथानुपपत्त्या तदतिरिक्ता कल्प्यमानापि शक्तिस्तत्रैव पर्यवस्येदित्याशङ्क्याह—बोधकत्वस्यापीति। बोधजनकत्वपर्याप्त्यधिकरणत्वस्यापीत्यर्थः। तेन बोधकत्वाश्रयत्वस्य तत्र सत्त्वेऽपि न क्षतिः। ननु प्रकृतेऽपि 'चित्रगुस्वामी'ति बोधान्यथानुपपत्त्या कल्प्यमाना लक्षणापि उत्तरपदवत् पूर्वपदेऽपि कल्प्याऽविशेषादित्याशङ्क्याह—प्रकृते चेति। सा कल्प्यत इति। लक्षणा कल्प्यत इत्यर्थः। विशेष इति। चरमवर्णस्यात्यन्तं

---

१. 'दण्डिनमानय' 'कुण्डलिनं पश्ये'त्यादौ दण्डादौ व्यवहितपदार्थभूते कर्मत्वाद्यन्वयापत्तिनिरासाय—'सन्निहितेति'—इति क्वचिदधिकं पठ्यते।

❀ दर्पणः ❀

वैषम्यमित्यर्थः। अत्रेदं बोध्यम्—उक्तयुक्त्यो'पकुम्भ'मित्यादावुत्तरपदस्यैव समीपाद्यर्थे लक्षणा, पूर्वपदं तात्पर्य्यग्राहकम्, तत्पुरुषेपि क्वचिद'र्द्धपिप्पली'त्याद्येकदेशिनि चरमपदस्यैव सा पिप्पल्यर्द्धाद्यर्थे, इतरद् द्योतकम्। 'नीलोत्पल'मित्यादिकर्मधारये तु न क्वापि सा। प्रत्येकपदशक्त्युपस्थितयोरभेदान्वयसौलभ्यात्, बहुव्रीहौ तूत्तरपद एव सेति सार एव व्यक्तम्। 'पाणिपाद'मिति द्वन्द्वेप्युत्तरपदस्य पाणिपादसमाहारे लक्षणा, पदान्तरं द्योतकम्, तत्रैव परम्परया वादनकर्मत्वान्वयः।

एवमितरेतरयोगद्वन्द्वे साहित्यापन्नप्रत्येकपदार्थयोरुत्तरपदस्यैव सा, अत एव द्विवचनाद्यर्थद्वित्वाद्यन्वयः। तत्र समाहारद्वन्द्वे साहित्यं विशेष्यमत्र तु विशेषणमिति भेदः। यद्वा,—समाहारद्वन्द्वे साहित्याप्रतीतेर्न तत्र लक्षणा, किन्तु प्रत्येकपदशक्त्युपस्थाप्ययोरेव साक्षाद् वादनकर्मत्वान्वयः, 'द्वन्द्वश्च प्राणी'तिप्रकरणातिदिष्टैकत्वसमासस्यैव समाहारपदव्यपदेश्यत्वम्, नात इतरेतरयोगे तत्प्रसङ्गः। एवमितरेतरयोगेऽपि न लक्षणा, एकस्मृत्यारूढपदद्वयात् प्रत्येकशक्त्युपस्थितार्थयोर्द्वित्वान्वयसम्भवात्, एकक्रियान्वयित्वरूपस्य, एकबुद्ध्यवच्छिन्नत्वरूपस्य वा साहित्यस्य पश्चादेवावगमेन पूर्वं तत्र लक्षणाग्राहासम्भवाच्च। 'चाऽर्थे द्वन्द्व' इत्यस्य चार्थान्वययोग्य इत्यर्थान्न तद्विरोधोऽपि। युक्तं चैतत्,—द्वन्द्वत्वावच्छिन्नस्य प्रधानीभूतार्थद्वयप्रतिपादकत्वे एव—'द्वन्द्वः सामासिकस्य चे'त्यनेन समाससमूहमध्ये द्वन्द्वस्य विभूतितया परिगणनस्य भगवत्कृतस्य सङ्गतेः। विशिष्टशक्त्या, लक्षणया वा तस्य प्रधानीभूतसमाहारप्रतिपादकत्वे तु समासान्तराद् द्वन्द्वस्याऽविशेषात्तदसङ्गतिः स्पष्टैव।

यत्तु भारतभावदीपे—"सममेकत्रासनं समासो=विदुषां, गुरुशिष्याणां वा—मन्त्रार्थं, कथार्थं वैकत्रावस्थानम्, तत्र विदितमर्थजातं=सामासिकम्, चातुरर्थिकष्ठक्, तस्य,—'ठस्येक' इतीकादेशः, 'यस्येति चे'त्यलोपः, तस्य मध्ये द्वन्द्वो=रहस्योऽहम्, 'द्वन्द्वं रहस्ये'ति सूत्रे द्वन्द्वशब्दस्य रहस्यवाचित्वं शाब्दिकप्रसिद्ध"मिति व्याख्यातम्,

तत्तु—विदितार्थस्य चातुरर्थ्यामदर्शनाद्ग्रथन्तराधिकरणन्यायेन सङ्केतितसमासशब्दात् समासरूपार्थस्यैवोपस्थितेरुचितत्वेन प्राप्तस्य सामूहिकठकः समासशब्दादनभिधानात्। 'द्वन्द्वं रहस्ये'त्यनेन रहस्ये व्युत्पादितद्वन्द्वस्य नित्यनपुंस-

❀ काशिका ❀

प्रत्ययसंनिधानेऽपि तस्य बोधकत्वाननुभवात्समुदायस्यैव वाचकत्वं कल्प्यत इति भावः। स्वीकृतं चेति। तथा च घटादिशब्दे चरमवर्णस्यैव वाचकत्वे इष्टापत्तिरिति भावः।

घटादिपदेष्वपि चरमवर्णस्यैव वाचकत्वं मीमांसकम्मन्यैरित्याहुः।

अत्रोच्यते—समासे शक्त्यस्वीकारे तस्य प्रातिपदिकसंज्ञादिकं न

ॐ दर्पणः ॐ

कत्वेन पुँल्लिङ्गस्य तद्वाचित्वासम्भवात्, समासवाचिनश्च तस्य पुंल्लिङ्गताया'श्चार्थे द्वन्द्व' इत्यादौ दृष्टत्वात्, पारिभाषिकत्वाच्च तेन समासस्यैव ग्रहणस्योचितत्वाच्च चिन्त्यम्।

न च साहित्याभानेऽन्यतरस्य क्रियान्वयविवक्षायां, 'पश्य धवं', 'खदिरं छिन्धी'तिवाक्यवत्'पश्य धवखदिरौ छिन्धी'ति प्रयोगापत्तिरिति वाच्यम्, प्रत्ययार्थद्वित्वावच्छिन्नधर्मिकस्यैव पदार्थान्तरान्वयबोधस्यान्यत्र दर्शनेनात्रापि तदवच्छेदेनान्वयस्यैवोचितत्वात्। नच द्वित्वान्वययोग्यतावच्छेदकसाहित्यमन्तरेण द्वित्वान्वय एव कथमिति वाच्यम्, योग्यतावच्छेदकोपस्थितेरनपेक्षणाद्, उपस्थिते योग्य एव तदन्वयात्, अत एव 'घटेन जलमानये'त्यत्र छिद्रेतरस्यैव योग्यताबलेनान्वयः, न तु छिद्रेतरत्वप्रकारकः शाब्दबोधः, तत्र प्रकृत्यर्थतावच्छेदकस्यैव द्वित्वान्वययोग्यतावच्छेदकत्वेपि क्षतिविरहाच्च, विवेचितं चेदमधिकमन्यत्र।

नच 'क्षौमवसनावग्निमादधीयाता'मित्यत्र समुच्चयलाभो न स्यादिति वाच्यं, 'यत्कर्त्तव्यं तदनया सहे'तिवचनान्तरात्तत्सिद्धेः। यद्यपि द्वन्द्वे परस्परान्वयित्वरूपव्यपेक्षा दुर्घटा, तथापि 'चार्थे द्वन्द्व' इति विधिसामर्थ्यादेव तत्र समासः, तदर्थस्तूक्तः। समुच्चयान्वाचययोस्त्वनभिधानादेव न द्वन्द्व इति स्पष्टं भाष्ये। यत्त्वे'कस्यां क्रियायामेकरूपेणाऽन्वयित्वमेव तत्र सामर्थ्य'मिति, तन्न, क्वचिदेतस्य क्वचित् पूर्वोक्तस्य सामर्थ्यस्याश्रयणे समर्थसूत्रे वाक्यभेदापत्तेरिति। पूर्वोक्तापत्तिमिष्टत्वेनापि परिहरति—**स्वीकृतमिति। चरमवर्णस्यैवेति।** पूर्वपूर्ववर्णानुभवजन्योद्बुद्धसंस्कारसहितान्तिमवर्णस्येत्यर्थः, नातः केवलचरमवर्णादर्थबोधापत्तिः, अधिकमग्रे वक्ष्यते। 'व्यपेक्षायां सामर्थ्ये समास एकोऽसङ्गृहीतो भवती'ति भाष्याशयं प्रकाशयन्नैयायिकमतं दूषयति—**अत्रोच्यते इति।** 'संज्ञादी'त्यादिना

ॐ काशिका ॐ

मीमांसकम्मन्यैरिति। खशि 'अरुर्द्विष'दिति मुम्। मीमांसकमात्मानं मन्यन्त इत्यर्थः। अनेनास्वरसः सूचितः, तन्मूलं तु कोशादिविरोधः। **संज्ञादिकमिति।** आदिना—सुब्लुक्, समुदायात्पुनः सुबुत्पत्तिरनुदात्तं पदमित्यस्य प्रवृत्तिः परिगृह्यते। आकाङ्क्षादिसाचिव्येनार्थबोधकत्वरूपार्थवत्त्वस्यापि प्रातिपदिकसंज्ञाप्रयोजकत्वस्वीकारे गौरवं, 'चित्रगु'रित्यादौ तदसंभवश्च, गोशब्दस्यैव लक्षणया विशिष्टार्थबोधकत्वात्, न चार्थबोधजनकज्ञानविषयशब्दत्वमर्थवत्त्वं ग्राह्यम्, तच्चैकस्य पदस्य लक्षणया,—परस्य तात्पर्यग्राहकतया चेत्येवं समूहस्य निष्प्रत्यूहमिति वाच्यं,

स्यात्, अर्थवत्त्वाभावेन—'अर्थवदधातुरप्रत्ययः प्रातिपदिक'मित्यस्या-प्रवृत्तेः, न च,—'कृत्तद्धितसमासाश्च'त्यत्र समासग्रहणात्सा, तस्य नियमार्थताया भाष्यसिद्धाया वैयाकरणभूषणे स्पष्टं प्रतिपादितत्वात्।

ॐ दर्पणः ॐ

पदत्वादिपरिग्रहः। **भाष्यसिद्धाया इति।** 'समासग्रहणमर्थवत्समुदायानां नियमार्थ'मिति भाष्यसिद्धाया इत्यर्थः। **स्पष्टमिति।** वाक्यस्याप्यर्थवत्त्वेन प्रातिपदिकत्वप्रसक्तौ तद्व्यावृत्तये वचनारम्भमाशङ्क्य—नियमार्थेन समासग्रहणेन समाहितम्, शक्त्यनभ्युपगमे तु तस्य वृत्त्यार्थबोधकत्वरूपार्थवत्त्वाभावेना-प्राप्तसंज्ञाविषये तस्यावश्यकतया नियमार्थत्वव्याघातः स्पष्ट एव, तस्मादेतद्भाष्य-मपि समासे विशिष्टशक्तौ मानमिति तत्रोक्तत्वादित्यर्थः।

नचार्थवत्पदसामर्थ्येनार्थवाचकपदघटितेऽपि प्रातिपदिकसंज्ञासिद्धिरन्यथा धात्वादिपर्युदासेनैवार्थवत्त्वे लब्धे तदुपादानवैयर्थ्यं स्पष्टमेव, 'दश दाडिमानी'-त्याद्यनर्थकसमुदायस्य तु नियमेन वारणीयत्वादिति वाच्यम्, अर्थवद्ग्रहणस्यो-त्तरार्थतायाः सिद्धान्तसिद्धत्वेन तत्सामर्थ्याभावाद्, 'अर्थवद्ग्रहणं संज्ञिव्यप-देशार्थ'मिति भाष्येणार्थवत्त्वेन सादृश्यबोधनार्थं तदुपयोगदर्शनाच्चेति—विशिष्ट-शक्त्यभ्युपगममन्तरेण समासे प्रातिपदिकसंज्ञादौर्भिक्ष्यमेवेति भावः।

ॐ काशिका ॐ

प्रत्येकं विभक्त्युत्पत्त्यापत्तेः, 'एकाच्द्विर्वचन'न्यायेन तु न तद्वारणसंभवः, यत्र समुदायकार्येणाव-यवानुग्रहस्तत्रैव तत्प्रवृत्तेः, 'एकाचो द्वे प्रथमस्ये'त्यादिनिर्देशेन तद्वारणे तु गौरवमिति भावः। तदेतदुक्तं—स्यान्महद्गौरवं तस्मादिति। **समासग्रहणात्सेति। सा** = प्रातिप-दिकसंज्ञा। तथा च समासग्रहणं विध्यर्थमिति भावः। ननु तस्य नियमार्थत्वाभावेऽपि क्षत्यभावः, किं चा'सूर्यंपश्याः' 'शशशृङ्ग'मित्यादावर्थवत्त्वाभावेन प्रातिपदिकसंज्ञाविधायकतया नियमार्थत्वानुपपत्तिश्चेत्याशङ्क्याह—भूषणे स्पष्टं प्रतिपादितत्वादिति। 'असूर्यंपश्या' इत्यादावपि 'असूर्ये'त्यत्र सूर्यकर्मकदर्शनाभाववति शक्तिकल्पनेन 'अर्थवत्' सूत्रेणैव सा सिध्यति, उक्तं च समर्थसूत्रे कैयटे—'असमर्थसमासेऽपि क्रियायामुभयोः संनिपातादेकार्थीभावस्तद्द्वारको-स्त्येव' इति।[1] उभयोः = नञ्सूर्यपदयोः। शशशृङ्गादिपदेऽपि विशकलितं प्रसिद्धमारोपितसंबन्धं शक्यमतः 'अर्थव'त्सूत्रप्राप्तिरस्त्येव, किं च समासरूपधर्मिग्राहकात्'असूर्यललाटयो'रिति मानाद-सूर्येत्यस्य प्रातिपदिकसंज्ञा सिध्यति, न हि प्रातिपदिकत्वं, सुबुत्पत्तिं च विनोपपदत्वं—समीपोच्चारितपदत्वरूपं—निर्वहतीति स्पष्टं निबन्धेषु। शशशृङ्गादेर्बोधोऽर्थो वाच्य इति स्पष्टं—विवरणादौ। एवं च मन्मते समासग्रहणस्य नियमार्थत्वं सुस्थमेव, अपि च—'कृत्तद्धिते'ति

१ कैयटार्थमाह—उभयोरिति।

❀ दर्पणः ❀

ननु 'चित्रगु'रित्यादौ विशिष्टे शक्त्यस्वीकारेऽपि नार्थवत्त्वनिबन्धनप्रातिपदिकसंज्ञानुपपत्तिः, तथाहि,—न शक्यसम्बन्धो लक्षणा, 'गभीरायां नद्यां घोष' इत्यादावसम्भवात्, तत्र तावन्न गभीरपदं तीरलक्षकं, नद्यामित्यस्यानन्वयापत्तेः, न हि तीरं नदी, अत एव नदीपदमपि न तथा, गभीरपदार्थस्यानन्वयापत्तेः, न च पदद्वये प्रत्येकं सा, विशिष्टनदीतीराभानप्रसङ्गात्। न च नदीपदेनैव गभीरनदीतीरं लक्ष्यते, गभीरादिपदं तात्पर्य्यग्राहकमिति वाच्यम्, गभीरपदस्य तात्पर्य्यग्राहकत्वमुत नदीपदस्येति विनिगमनाविरहात्। नच 'नदी'पदस्य द्रव्यवाचकतया साक्षात्सम्बन्ध एव लक्षणायां विनिगमक इति वाच्यम्, 'गभीर' पदस्यापि नित्यं गुणिवाचकतया तदर्थस्यापि साक्षात्सम्बन्धाविशेषात्, तस्मात् पदद्वयलक्षणायां गौरवात्समुदाय एव साऽङ्गीकार्य्या, अत एवार्थवादवाक्यानां प्राशस्त्ये लक्षणेति सङ्गच्छते। किन्तु स्वबोध्यरूपैव सा, अस्ति च 'गभीरायां नद्या'मित्यत्र वाक्यज्ञाप्या गभीराभिन्ननदी, तत्सम्बन्धस्तीरे इति। एवञ्च 'चित्रगु'रित्यादिसमुदायस्य लक्षणया चित्राभिन्नगोस्वामिरूपार्थबोधकत्वरूपार्थ-

❀ काशिका ❀

सूत्रेऽपि तदन्तविधिलाभाय 'अर्थव'दित्यनुवर्तते इति स्पष्टं भाष्यादिषु, तथा च समासे शक्त्यनङ्गीकारे समासग्रहणेनापि न सा सिध्यति। 'अर्थवत्पदस्य कृत्तद्धितयोरेव संबन्धो न समास' इति तु न युक्तम्, तथा सति द्वन्द्वस्यासाधुत्वापत्तेरन्यतरस्य पाण्डित्ये 'देवदत्तयज्ञदत्तौ पण्डिता'विति प्रयोगाभावात्, द्वन्द्वघटकयावत्पदार्थे इतरपदार्थान्वये एव द्वन्द्वस्य साधुत्वं, न तु तद्घटकयत्किंचित्पदार्थे तदन्वये इत्यभ्युपगमात्, सौत्रत्वात् साधुत्वकल्पने तु गौरवमेव। समासग्रहणस्य विध्यर्थत्वेऽपि—'बहुपटव' इत्यत्रार्थवत्त्वाभावेनार्थवत्सूत्रेण प्रातिपदिकत्वानापत्त्या 'चितः सप्रकृते'रिति वचनेन चित्त्वप्रयुक्तान्तोदात्तत्वं वकारोत्तरवर्तिनोऽकारस्य स्यात्, इष्यते तु टकारोत्तरवर्त्यकारस्येति स्पष्टं भाष्यादौ। सिद्धान्ते तु—'अन्तरङ्गानपी'ति न्यायेन प्रथमजसो लुगुत्तरमेव प्रवर्तते स्वर इतीष्टसिद्धिः, 'बहुच्पूर्वस्ये'ति वचनारम्भे गौरवम्। न च तद्धितशब्दस्य तद्विशिष्टपरतया 'कृत्तद्धिते'—ति सूत्रेणैव तत्र प्रातिपदिकत्वमिति वाच्यं, 'पचतकी' त्यादावतिप्रसङ्गात्, 'बहुपटवस्तिष्ठन्तीति वाक्येऽतिप्रसङ्गाच्च। यस्मात्तद्धितो विहितस्तद्धितविशिष्टस्य तस्यैव प्रकृतिप्रत्ययसमुदायस्य ग्रहणे प्रमाणाभावात्, तादृशवचनान्तरकल्पने गौरवाच्चेति भावः।

एतेनाव्यवहितपूर्वत्वाव्यवहितोत्तरत्वान्यतरसंबन्धेन तद्धितविशिष्टस्य ग्रहणमिति न पचतकीत्यादावतिप्रसङ्ग इति निरस्तम्, उक्तवाक्यावारणात्, 'प्रत्ययग्रहणे तदन्तग्रहण'मिति परिभाषाविरुद्धार्थकल्पने मानाभावाच्च। एवं 'मूलकेनोपदंशं भुङ्क्ते' इत्यत्र 'मूलकेनोपदंश'मित्यस्य कृद्ग्रहणपरिभाषया प्रातिपदिकत्वापत्तिर्मूलकस्योपदंशनकर्मत्वं, भुजौ करणत्वं चास्ति, विभक्तिस्तु प्रधानक्रियां प्रति करणत्वप्रयुक्ता तृतीयैव कृतेति मूलकस्येत्युपदंशनकारकत्वाक्षतेः। न च

समासवाक्ये शक्त्यभावेन शक्यसम्बन्धरूपलक्षणाया अप्यसम्भवेन लाक्षणिकार्थवत्त्वस्याप्यसम्भवात् ।

अथ 'तिप्तसूझी'त्यारभ्य, 'ङ्योस्सु'ब्विति तिप्प्रत्याहारो भाष्यसिद्धस्तमादायाऽ'तिप्प्रातिपदिक'मित्येव सूत्र्यतां, कृतमर्थवदादिसूत्रद्वयेन,

ॐ दर्पणः ॐ

वत्त्वात् प्रातिपदिकसंज्ञा नानुपपन्नेत्यत आह—समासवाक्य इति । 'वाक्य' इत्युक्त्या क्वचित्तत्सम्भवेऽपि सर्वत्र राजपुरुषादिसमासे तदसम्भवं सूचयति । अयमाशयः—स्वज्ञाप्यसम्बन्धस्य न लक्षणात्वम्, अपभ्रंशेऽपि तत्प्रसङ्गात् । किञ्च 'स्वज्ञाप्य' इत्यस्य स्वनिष्ठज्ञापकतानिरूपकज्ञाप्यतावदर्थसम्बन्ध इत्यर्थो वाच्यः, तत्र ज्ञापकत्वं वृत्त्या बोधकत्वमुत ज्ञानजनकज्ञानविषयत्वमात्रम् ? नाद्यः—वाक्ये लक्षणाऽभावप्रसङ्गात्, तदर्थस्य गम्भीरस्य वृत्त्यबोध्यत्वात् । नान्त्यः—प्रत्येकं वर्णानामर्थवत्त्वापत्त्या विभक्त्यापत्तेरिति स्वशक्यसम्बन्धो लक्षणेत्येवाङ्गीकरणीयम्, तथाच समासे तदसम्भवेन प्रातिपदिकसंज्ञानुपपत्तिस्तदवस्थेति तदर्थं विशिष्टशक्तिस्वीकार आवश्यक इति । भाष्यसिद्ध इति । 'तिवेकादेशे प्रतिषेधोऽन्तवत्त्वा'दित्यादेस्तत्राऽभिधानादिति भावः । सूत्र्यतामिति । 'अतिप्समासश्च प्रातिपदिक'मित्येव सूत्र्यतामित्यर्थः, तथाच तिङ्सुबन्तभिन्नं यत्तत्प्रातिपदिकमित्यर्थेन समासस्य प्रातिपदिकत्वलाभादतिरिच्यमानं समासग्रहणं नियमा-

ॐ काशिका ॐ

'तृतीयाप्रभृतीनी'ति विकल्पेन समासविधानसामर्थ्यान्न तादृशवाक्यस्य प्रातिपदिकत्वं, विभक्तिश्रवणस्यैव तत्फलत्वादिति वाच्यं, समासे उत्तरपदप्रकृतिस्वरः असमासे तु उदात्तद्वयमिति स्वरविशेषस्य तत्फलस्य संभवात्, 'दधि उपदंश'मित्यत्र पक्षे 'इकोऽसवर्णे' इति प्रकृतिभावप्रवृत्तेरपि फलस्य संभवाच्च । एतेनोत्तरपदप्रकृतिस्वरे विकल्पयितव्ये समासविकल्पविधानवैयर्थ्यं निरस्तम्, अनभिधानेन तद्वैयर्थ्योपपादनं तु न समञ्जसम् । न च 'कृद्ग्रहणे' इति परिभाषाया ज्ञापकसिद्धतयाऽसार्वत्रिकत्वेन 'कृत्तद्धिते'त्यत्राप्रवृत्त्या न 'मूलकेने'त्यादावतिप्रसङ्ग इति वाच्यम्, अगतिकाश्रयणस्यायुक्तत्वात् । सिद्धान्ते तु—समासग्रहणकृतनियमेन परत्वाद्बाध इति 'कृत्तद्धित' इत्यत्र 'कृद्ग्रहणे' इति परिभाषाया अप्रवृत्तेरेवेति भूषणादितोऽवगन्तव्यमित्यलमतिविस्तरेण । समासवाक्ये—समासात्मके वाक्ये इत्यर्थः । लाक्षणिकार्थवत्त्वस्याप्यसंभवादिति । इदं नैयायिकं प्रत्युच्यते । स्वबोध्यसंबन्धरूपलक्षणावादिमीमांसकमते तत्संभवेऽपि निरूढलक्षणायाः शक्तितुल्यतया शाब्दिकाभिमतसिद्धिरिति भावः । भाष्यसिद्ध इति । 'अप्रत्यय इति चेत् तिवेकादेशे प्रतिषेधोऽन्तवत्त्वात्' । 'अप्रत्यय इति चेत् तिवेकादेशे प्रतिषेधो वक्तव्यः, काण्डे कुड्ये—इत्यर्थवत्सूत्रभाष्यसिद्ध इत्यर्थः । कृतम् = अलम् । अर्थवदादिसूत्रद्वयं नारम्भणीयं, किं

समासग्रहणञ्च नियमार्थमस्तु, तथाच सुप्तिङन्तभिन्नं प्रातिपदिकमित्यर्थात्समासस्यापि सा स्यादिति चेत्, तथापि प्रत्येकं वर्णेषु संज्ञावारणायार्थवत्त्वावश्यकत्वेन समासाऽव्याप्तितादवस्थ्यमेव। तथा च प्रातिपदिक-

❀ दर्पणः ❀

र्थमस्त्वित्यर्थः। **प्रत्येकं वर्णेष्विति।** वर्णानामानर्थक्यपक्षे प्रातिपदिकसंज्ञायां प्रकाशनीयार्थाभावादविशेषेण प्रतिवर्णं विभक्तिसम्भवात्—अव्ययादिवेति भावः।

अर्थवत्त्वेति। अर्थवद्ग्रहणस्यावश्यकत्वेनेत्यर्थः। न चाऽर्थवत्समुदायघटकवर्णानामर्थवत्त्वपक्षस्यापि भाष्ये दर्शनात्तद्ग्रहणेऽपि विभक्तिर्दुर्वारेति वाच्यम्, तत्पक्षेपि, 'सङ्घातस्यैकार्थ्यात्सुबभावो वर्णा'दिति भाष्यात्तन्त्रेणैकैव विभक्तिः समुदायावयवार्थगतमेकत्वं बोधयेत्, एकमेव तदेकत्वं, तच्चैकेन सुपा प्रत्यायितमिति बोधनीयाभावाद् विभक्तेः प्रत्येकवर्णादनुत्पत्तेरिति भावः।

ननु समासवाक्यस्यार्थवत्त्वाभावेपि न प्रातिपदिकसंज्ञानुपपत्तिः, 'कृत्तद्धिते'ति सूत्रेणैव तत्सम्भवात्, सम्भवति विधित्वे नियमकल्पनाया अन्याय्यत्वात्, समासग्रहणमेव च समास एकार्थीभावाभावे मानम्, वाक्यस्य तु न पूर्वसूत्रेण तत्प्रसक्तिरर्थवत्त्वाभावात्, संसर्गस्याशक्यत्वेप्याकाङ्क्षादिवशादेव तद्भानस्य सूपपादत्वात्, एवं प्रकृतिप्रत्ययसमुदायस्याप्यनर्थकत्वेनाप्राप्तसंज्ञाविधानार्थं

❀ काशिका ❀

स्वतिप्रातिपदिकं समासश्च इति सूत्रद्वयं रचनीयमित्यर्थः। **समास्यापीति।** समासस्यापि तिबन्तभिन्नत्वात्। तिपः प्रत्ययत्वेन 'प्रत्ययग्रहणे यस्मा'दिति परिभाषायाः प्रवृत्तेरिति भावः।

अर्थवत्त्वावश्यकत्वेनेति। अर्थवदिति विशेषणस्यावश्यकत्वेनेत्यर्थः। ननु संख्याकर्मादेरभावादेकैकस्माद्वर्णात्सुबुत्पत्तिर्न भविष्यति, औत्सर्गिकमेकवचनमपि गमकसत्त्व एव स्पष्टम्, अत एव 'ङ्याप्' सूत्रे भाष्ये तत्सूत्राभावे तिङन्तेभ्यः सुबुत्पत्तिशङ्कैकत्वादीनामुक्तत्वान्नेति समाहिता, एवं च फलाभावात्प्रतिवर्णं प्रातिपदिकसंज्ञापि न भविष्यतीति चेत्, तथापि 'दश दाडिमानि षडपूपा' इत्याद्यनन्वितार्थकसमुदायस्य वारणाय 'अर्थवदि'ति विशेषणस्यावश्यकत्वम्, तत्र हि प्रातिपदिकत्वे सति 'सुपो धातु' इति लुक् स्यादिति भाष्यादौ स्पष्टम्। नियमार्थसमासग्रहणेन तु—न वारणं कर्तुं शक्यम्, नियमस्य सजातीयापेक्षतया परस्परान्वितार्थकसमुदायस्यैव तेन वारणात्, अत एव 'गवित्याहे'त्यादौ समुदायस्य न प्रातिपदिकसंज्ञेति स्पष्टं शब्देन्दुशेखरादौ।

समासाव्याप्तीति। समासग्रहणस्य विध्यर्थत्वे तु पूर्वोक्तदूषणगणप्रसङ्ग इति भावः। 'असमासवाक्यस्य ने'ति तृतीयं सूत्रमपि कर्तव्यमिति चेद् गौरवमिति भावः। अत्र सनाद्यन्तानां प्रा[illegible]ादिकत्वापादनं तु न कृतं, तत्रेऽपि तेभ्यः सुबुत्पत्तेरापत्त्यसंभवात्, अपवादैस्तिवादिभिर्बाधनात्। ननु समासग्रहणस्य विध्यर्थत्वेऽपि 'मूलकेने'त्यत्र पूर्वोक्तक्रमेणातिप्रसङ्गो वारित

संज्ञारूपं कार्य्यमेवार्थवत्त्वमनुमापयति—धूम इव वह्निम्। किञ्चैवं,—

❀ दर्पणः ❀

कृत्तद्धितग्रहणमिति समस्तस्यैव सूत्रस्य विधायकत्वम्, आद्यसूत्रस्य तु अव्युत्पन्न-साधुशब्दस्वरूपमेव, न तु 'बहुपटु'रित्यादिसमुदायोऽपि, उत्तरपदलाक्षणिकता-दृशसमुदायस्यार्थवत्त्वाभावात्, कृदन्तानां केषाञ्चिदर्थवत्त्वेऽपि धातुत्वात्, एवं तद्धितानामपि—इः, इयानित्यादीनां प्रत्ययत्वेन, तादृशसमुदायस्य त्वनर्थकत्वेन पूर्व-सूत्राविषयत्वेन, तत्र तत्र प्रातिपदिकत्वविधानार्थं सूत्रकारेण द्वितीयं सूत्रं प्रणीतम्, अत एवात्रार्थवदिति नानुवर्त्ततेऽसम्भवात्प्रयोजनाभावाच्च, तत्र कृच्छब्देन प्रत्यय-परिभाषया तदन्तग्रहणं, 'संज्ञाविधा'वित्यस्य प्रायिकत्वात्, डतरादिवत्केवल-कृतामप्रयोगेण तदुपादानवैयर्थ्याच्च, यद्यप्युक्तयुक्त्या तद्धितपदस्यापि तद्धितान्तप-रतैव लभ्यते, तथापि बहुपट्वादिसङ्ग्रहाय तत्स्वाव्यवहितोत्तरत्वसम्बन्धेन तद्धितविशिष्टप्रकृतिघटितसमुदायतद्धितान्तान्यतरपरतया व्याख्येयम्,। प्रकृतित्वं च प्रत्ययविधानावधित्वम्, इः, इयानित्यादौ तु प्रत्ययस्यैव तदन्तत्वान्न दोषः, पचतक्यादिसमुदायान्तर्गततद्धितप्रकृतेर्निरुक्ततद्धितवैशिष्ट्याभावान्न तत्रातिप्रसङ्गः, कृद्ग्रहणपरिभाषाया अनन्तरग्रहणज्ञापिताया असार्वत्रिकत्वाच्च न मूलकेनोपदं-शमित्यादावतिप्रसक्तिः, एवं समासग्रहणेनाप्यप्राप्तप्रातिपदिकसंज्ञाविधानाद्राज-पुरुष इत्यादिसमुदायात् स्वाद्युत्पत्तिः सुलभेति तत्र विशिष्टशक्त्यभ्युपगमो निष्प्र-माणकः, वाक्यस्य सा नेत्युक्तमेव, तत्र कोशादिना शक्त्यपरिच्छेदात्, यत्र तु कोशादिकं परिच्छेदकं, तत्र समासे पङ्कजादौ तां न निवारयामः। एवञ्च वाक्यस्या-र्थवत्त्वाभावेन प्रातिपदिकसंज्ञाऽप्रसक्तेस्तदप्रवृत्तिरूपफलाभावेन समासग्रह-णस्य नियमार्थत्ववर्णनमसाम्प्रतम्, भाष्ये तस्य नियमपरतया वर्णनं तु संसर्गस्य शक्यत्वमित्येकदेशिमतमनुसृत्यैवेत्यरुचेराह—किञ्चैवमिति। एवं = समासे विशिष्टशक्त्यस्वीकारे, 'कर्मत्वाद्यनन्वयापत्ति'रित्यस्य—'गवादिपदार्थे' इति शेषः।

❀ काशिका ❀

इत्यतो दोषान्तरमाह—किं चैवमिति। एवम् = समुदायशक्त्यनङ्गीकारे। अर्धपिप्पली-त्यादाविति। आदिना 'पूर्वकाय' इत्यादेरितरेतरद्वन्द्वस्य च संग्रहः। द्वन्द्वे व्यवहितपदार्थे-ऽपि कर्मत्वाद्यन्वयेन व्यभिचारो द्रष्टव्यः, अव्ययीभावादिभेदं निवेश्य व्युत्पत्तेस्तदतिरिक्तविषय-कत्वसंपादने त्वनेकभेदनिवेशेन गौरवमिति भावः।

ननूपकुम्भमित्यत्र कुम्भपदस्यैव लक्षणया कुम्भसमीपार्थकत्वमेवमर्धपिप्लीत्यादावपि पिप्प-ल्यादिशब्दस्यैव विशिष्टार्थकत्वमिति न तत्र व्यभिचार इति चेद्विशिष्टेऽर्थे लक्षणां विनैवान्वयो-पपत्तौ तत्स्वीकारोऽनुचितः, अत एव 'पूर्वपदार्थप्रधानोऽव्ययीभाव' इति संगच्छते, किं च द्वन्द्वे

'चित्रगुमानये'त्यादौ कर्मत्वाद्यनन्वयापत्तिः, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधजनकत्वव्युत्पत्तेः, विशिष्टोत्तरमेव प्रत्ययोत्पत्तेर्विशिष्टस्यैव प्रकृतित्वात्। यत्तु—'सन्निहितपदार्थगतस्वार्थबोधकत्वव्युपत्तिरेव कल्प्यत' इति, तन्न। 'उपकुम्भम्[१], अर्द्धपिप्पली'त्यादौ पूर्वपदार्थे विभक्त्यर्थान्वयेन व्यभिचारात्। न च तत्रापि सन्निधानमेव,[१] आनुशासनिकसन्निधेर्विवक्षितत्वात्, तथा च यत्पदोत्तरं यानुशिष्टा सा तदर्थगतं स्वार्थं बोधयति,

❀ दर्पणः ❀

तत्र हेतुमाह—प्रत्ययानामिति। तथाच प्रकृतित्वं प्रत्ययविधानावधित्वं, न तु प्रत्ययाव्यवहितपूर्वत्वम्, 'बहुपटु'रित्यादौ पट्वादिशब्देऽव्याप्तेः, न च तावेव सुप्तिङौ यौ ततः परौ, सैव च प्रकृतिराद्ये'ति भाष्यात् प्रत्ययाव्यवहितपूर्वस्यैव प्रकृतित्वलाभ इति वाच्यं, तदर्थानबोधात्, यौ ततो = विधानावधेरसति विशेषानुशासने–परौ–तावेव,—'सुप्तिङा'वित्युपलक्षणं, प्रत्ययान्तरस्यापि,—यतो विहितौ सैव प्रकृतिरिति तदर्थात्। 'आद्ये'त्यभ्यासाभिप्रायेण, तथाच समासोत्तरपदस्य विधानावधित्वरूपप्रकृतित्वाभावेन तदर्थे न कर्मत्वाद्यन्वयः सम्भवति, उक्तव्युत्पत्तिविरोधादिति भावः।

'प्रत्ययाना'मिति व्युत्पत्तिर्हि 'दण्डिनमानये'त्यादौ दण्डादौ कर्मत्वान्वयवारणाय स्वीक्रियते, तदर्थं एव 'प्रकृत्यर्थनिष्ठविषयतानिरूपितविषयतासम्बन्धेन शाब्दबुद्धिं प्रति विशेष्यतासम्बन्धेन प्रत्ययजन्योपस्थितित्वेन हेतुते'ति तत्र प्रकृतेः सन्निहितत्वेनैव निवेशस्तावतैवोक्तस्थले व्यभिचारवारणात्; न तु प्रकृतित्वेन, गौरवादिति मतं दूषयितुमुपन्यस्यति—यत्त्विति। सन्निहितेति। सन्निहितत्वं चाव्यवहितपूर्वत्वेनाऽनुसन्धीयमानत्वं, तस्य च चित्रग्वादिपदे गवादौ सत्त्वान्नोक्तानुपपत्तिरिति भावः। 'व्युत्पत्तिरेवे'त्येवकारेण पूर्वोक्तप्रकृतित्वघटितव्युत्पत्तिव्यवच्छेदः, 'उपकुम्भा'दौ व्यभिचारोद्भावनं तु प्राचीनमते, नव्यनये तत्रोत्तरपदे लक्षणाभ्युपगमेन तदप्रसक्तेः। तत्रापि=उपकुम्भादिसमासेपीत्यर्थः। अनुशासनिकेति। सन्निहितत्वं नाव्यवहितपूर्वत्वं, तत्त्वेनानुसन्धीयमानत्वं वा, 'धवखदिरा'वित्यादौ धवादिपदार्थे विभक्त्यर्थानन्वयप्रसङ्गात्, किन्तु सन्निहितत्वेनानुशासनबोधितत्वं, तच्च धवादिपदार्थानामिवोपादिपदार्थानामस्तीत्याशयवानाह—

❀ काशिका ❀

व्यभिचारो दृढ एवेति भावः। भाष्यकारमतेऽर्धपिप्पल्यादेः कर्मधारयत्वेनोत्तरपदार्थप्राधान्येन

१ सन्निहितत्वेनानुशासनबोधितत्वं तत्त्वम्।

समासे च समस्यमानपदोत्तरमेवानुशासनमिति वाच्यम्, अर्थवत्सूत्रेण विशिष्टस्यैव प्रातिपदिकत्वेन विशिष्टोत्तरं विभक्त्यनुशासनात् ।

अथ प्रकृतित्वाश्रये विभक्त्यर्थान्वय इत्येव कल्प्यत इति चेत्तर्हि,—

❀ दर्पणः ❀

तथाचेति । समस्यमानपदोत्तरमिति । समासस्यानेकपदसमुदायात्मकतया, समुदायस्य प्रत्येकानतिरिक्तया, समासरूपप्रातिपदिकाद्विहितविभक्तेस्तत्तत्पदसन्निहितत्वादिति भावः ।

सम्भवेदेवं यदि समासग्रहणनिबन्धना प्रातिपदिकसंज्ञा, किन्तु तस्य नियामकतया पूर्वसूत्रेणैव सा वाच्या, तथाचोक्तप्रकारासम्भव इत्याशयेनाह— **अर्थवत्सूत्रेणेति ।** तथा च शास्त्रबोधितसन्निहितत्वमपि विशिष्टस्यैव, न केवलपूर्वपदस्येत्युक्तस्थले व्यभिचारो दुरुद्धर इति भावः ।

प्रकृतित्वस्य पर्याप्त्याख्यविलक्षणसम्बन्धेन समुदायमात्रविश्रान्तत्वेपि केवलाश्रयतया तद्वत्त्वस्य प्रकृत्येकदेशेपि सम्भवादुक्तव्युत्पत्तिशरीरे आश्रयतैव निवेशनीयेत्याशयेन शङ्कते—**अथेति ।** प्रकृतित्वाश्रये=प्रकृतित्वाश्रयार्थे । अस-

❀ काशिका ❀

तत्र व्यभिचाराभावेऽप्युपकुम्भादौ व्यभिचारो निष्प्रत्यूह एवेति ध्येयम् । **समस्यमानपदोत्तरमेवेति ।** समस्यमानं पदं च समासघटकीभूतपदं पूर्वं परं मध्यमं च, तथा चाव्ययीभावेऽव्ययम्, एकदेशिसमासे एकदेशवाचिपदं, द्वन्द्वे सर्वपदान्यपि समस्यमानानीति तत्तदर्थे विभक्त्यर्थान्वयः । अव्ययीभावादिसमासेऽव्ययं सुबन्तेन समस्यते इत्यादिनाव्ययादेरेव समसनक्रियाकर्मत्वं बोध्यते, नत्वस्येति बोध्यम् । एवं च समासे क्वचित्पूर्वपदार्थे क्वचिदुत्तरपदार्थे क्वचिद्यावत्समस्यमानपदार्थेऽन्वय इत्यत्र तदनुशासनं योग्यतादिकं नियामकमिति भावः । **विशिष्टोत्तरमेवेति ।** समासरूपसमुदायोत्तरमेवेत्यर्थः । एवशब्देन समासघटकपदव्यवच्छेदः ।

अनुशासनात्=प्रातिपदिकात् स्वादयो भवन्तीत्यनुशासनात्, तथा च समस्यमानपदोत्तरं तदनुशासनमसिद्धमेवेति तात्पर्यम्, न च प्रतिलक्ष्यं लक्षणभेदेन समस्यमानरूपप्रातिपदिकत्वाश्रयात् स्वादय इत्येवानुशासनं कल्प्यत इति वाच्यम्, प्रातिपदिकत्वपर्याप्त्यधिकरणात्, स्वादय इत्यनुशासनस्यैव समर्थसूत्रभाष्यसिद्धतयात्रान्यथा तत्कल्पने मानाभावात्, समुदायस्याङ्गत्वानापत्तेरवयवस्य तदापत्तेश्च, तथा सति 'देवस्य पुरुषो देवपुरुषस्तस्येदं दैवपुरुष'मित्यादौ समुदायादेर्वृद्धिर्न स्यादुत्तरपदादेरेव स्यात् । 'अवयवाद्वृतो'रित्यादेर्ज्ञापकात् समुदायादेरेव भविष्यतीति चेत्, एतादृशक्लिष्टकल्पनापेक्षया समुदायशक्त्यनुसरणमेव युक्तमिति भावः । एवमुपकुम्भमित्यादौ समुदायोत्तरं विभक्तिश्रवणानापत्तिरपि द्रष्टव्या इत्येव । **कल्प्यत इति ।** न तु प्रकृतित्वपर्याप्त्यधिकरणार्थे विभक्त्यर्थान्वय इति कल्प्यत इत्यर्थः । प्रकृतित्वाश्रयत्वं चोभ-

पङ्कजमानय', 'दण्डिनं पश्य', 'शूलिनं पूजये'त्यादौ पङ्कदण्डशूलेष्वानयनदर्शनपूजनादेरन्वयप्रसङ्गात्,' 'अघटमानये'त्यत्र घटेऽप्यानयनान्वयापत्तेश्च, नच दण्डादीनां विशेषणतया न तत्रानयनाद्यन्वयः, 'पाकान्नीलः',, 'धर्मात्सुखी'त्यादौ पाकधर्मादिजन्यताया रूपसुखादावनन्वयप्रसङ्गात्। यच्च प्रकृत्यर्थत्वं तज्जन्यज्ञानविषयत्वमात्रं, तच्चात्राविरुद्ध-

❀ दर्पणः ❀

न्निहितप्रकृत्यर्थे दूषणमुद्भाव्य सन्निहितेपि तदाह—**अघटमिति**। पूर्वपदार्थप्राधान्यमत्रेत्याशयेन दूषणोद्भावनम्, तत्त्वं चाऽग्रे वक्ष्यते। **विशेषणतयेति**। एकत्र विशेषणतयावरुद्धस्यापरत्र तदन्वये नैराकाङ्क्ष्यादिति भावः। यत्र क्वापि विशेषणे नापरान्वय इति यथाश्रुतं दूषयति—**पाकान्नील** इत्यादि। नीलत्वसुखयोः स्वाश्रये विशेषणतयान्वितयोः 'पाका'दित्याद्यन्तर्गतपञ्चम्यर्थहेतुत्वस्यानन्वयापत्तेरित्यर्थः। **तज्जन्यज्ञानविषयत्वमिति**। तत्पदार्थः—प्रकृतिः, मात्रपदेन वृत्तिप्रतिपाद्यत्वस्य व्यवच्छेदः। अत्र = चित्रगवादिसमासान्तर्गतगवादिपदार्थे इत्यर्थः। **अविरुद्धमिति**। अबाधितमित्यर्थः। 'घटं पश्ये'त्यत्र दृशिर्ज्ञानसामान्यार्थः।

❀ काशिका ❀

पदे पूर्वपदेऽपीति नोक्तदोष इति भावः। **अन्वयप्रसङ्ग इति**। आनयनादिकर्मत्वान्वयप्रसङ्ग इत्यर्थः। इष्टापत्तिस्तु न, सत्यपि तात्पर्ये विना लक्षणां तादृशान्वयबोधाननुभवात्। पङ्कानयनप्रसङ्गाच्च। अभीष्टापत्तौ स्थलान्तरेऽतिप्रसङ्गमाह—**अघटमिति**। पूर्वोक्तस्थले दण्डादिविशिष्टे क्रियान्वये विशेषणीभूतदण्डादावप्यन्वये कदाचिदिष्टापत्तिः स्यात्, अत्र तु न कस्यापि घटे आनयनकर्मत्वान्वयोऽनुभवसिद्ध इति भावः। **विशेषणतया न तत्रेति**। प्रकृतिजन्यप्रतीतिविशेष्ये एव विभक्त्यर्थान्वय इति व्युत्पत्तेरिति भावः। चित्रगुस्वामिनस्तु प्रकृतिजन्यप्रतीतिविशेष्यतया न विभक्त्यर्थान्वयानुपपत्तिः। **आनयनाद्यन्वयः** = आनयनकर्मत्वाद्यन्वयः। **जन्यतायाः** = पञ्चम्यर्थभूतायाः। **रूपसुखादावनन्वयेति**। नीलरूपसुखयोर्नीलादिशब्दजन्यप्रतीतिविशेष्यत्वाभावात्, नीलशब्दस्य नीलरूपविशिष्टपरत्वात्, सुखिशब्दस्य तद्विशिष्टबोधकत्वात्, अथैकत्रविशेषणतयान्विते इतरत्र विशेषणतयान्वय एवाव्युत्पन्नो, न तु विशेष्यतयान्वय इति न 'दण्डिनं पूजये'त्यादौ पूजनकर्मत्वाद्यन्वयापत्तिः, 'पाकान्नील' इत्यादौ नीलादौ पाकादिजन्यत्वाद्यन्वयानुपपत्तिश्चेति चेन्न, एवं सति 'शूली पूज्य' इत्यादौ 'शूलादौ पूज्यादिरूपविशेषणान्वयापत्तेः, किं च शूलिनि द्वित्वादेर्बाधे शूलेऽबाधे 'शूलिनौ पश्यत' इत्यादिप्रयोगापत्तिरिति दिक्। **ज्ञानविषयत्वमात्रमिति**। न तु प्रकृतिवृत्त्या तज्जन्यज्ञानविषयत्वमित्यर्थः। अत्र = उत्तरपदादिलक्ष्यचित्र-

 १ अपर्याप्त्या प्रकृतित्वस्य पङ्क-दण्डादावपि सत्त्वात्।

मिति, तन्न। 'घटं पश्ये'त्यत्र घटपदात्समवायेनोपस्थिताकाशवारणाय वृत्त्या प्रकृत्यर्थत्वस्यावश्यकत्वात्। अथ प्रत्ययप्राग्वर्त्तिपदजन्योपस्थितिविशेष्यत्वं प्रकृत्यर्थत्वमिति चेन्न, 'गामानयति कृष्णो दण्डेने'त्यत्र कृष्णे तृतीयार्थान्वयप्रसङ्गात्। अथ समस्यमानपदार्थगतस्वार्थबोधकत्वं समासोत्तरविभक्तेः कल्प्यत इति चेन्न, अक्लृप्तकल्पनां, क्लृप्तव्युत्पत्तित्यागञ्चापेक्ष्य—समुदायशक्तिकल्पनस्यैव युक्तत्वादिति दिक्।

❀ दर्पणः ❀

आकाशवारणायेति। समवायेनोपस्थिताकाशे द्वश्यर्थकर्मत्वाद्यन्वयवारणायेत्यर्थः। **वृत्त्या प्रकृत्यर्थत्वस्येति।** वृत्तिजन्योपस्थितिविषयत्वस्येत्यर्थः।

वादिवाक्ये यावन्तोऽर्थाः सम्भवन्तीति न्यायेनोक्तव्युत्पत्तिं दूषयितुमर्थान्तरपरतया व्याचष्टे—**अथेति।** पूर्वं तु प्रत्ययसन्निहितपदार्थत्वं प्रकृतित्वम्, अत्र तु तत्प्राग्वर्त्तिपदार्थत्वमिति भेदः। **प्रसङ्गादिति।** प्रत्ययप्राग्वर्त्तिपदजन्योपस्थितिविषयतायाः कृष्णे सत्त्वादिति भावः। 'प्रत्ययाना'मिति व्युत्पत्तेरेकार्थीभाववादिमते सत्त्वेऽपि नास्मन्मते सा सार्वत्रिकी, समास एवाऽसम्भवात्, किन्तु प्रकृते व्युत्पत्त्यन्तरमेव कल्पते इत्यभिप्रेत्याह—**अथेति। अक्लृप्तकल्पनामिति।** 'समस्यमानपदार्थविषयतानिरूपितविषयतासम्बन्धेन शाब्दं प्रति विशेष्यतासम्बन्धेन प्रत्ययजन्योपस्थितेः कारणत्वान्तरकल्पनामित्यर्थः। ननु प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वरूपा व्याससमाससाधारण्येकैव व्युत्पत्तिः, सन्निहितत्वं च प्रकृतिघटकत्वे सति प्राग्वर्त्तित्वमिति नोक्तदूषणमत आह—**दिगिति।** तथा कल्पने चोक्तव्युत्पत्त्यपेक्षया पदत्वस्य प्रकृतित्वघटितस्य व्युत्पत्तौ निवेशे गौरवमित्यादिदिगर्थः।

❀ काशिका ❀

गुरुवाग्यादौ। **समवायेनेति।** समवायेनोपस्थिते आकाशे घटपदोत्तरवर्तिद्वितीयार्थकर्मत्वान्वयवारणायेत्यर्थः। **वृत्त्या प्रकृत्यर्थत्वस्य**=वृत्त्या प्रकृतिजन्यज्ञानविषयत्वस्य। **आवश्यकत्वात्**=अवश्यं प्रवेशनीयत्वात्। 'घट'मित्यादौ घटत्वादौ कर्मत्वाद्यन्वयवारणाय विषयतासामान्यमुपेक्ष्य विशेष्यत्वप्रवेशः, अत एव 'दण्डिनं पश्ये'त्यादौ दण्डादौ न तदन्वयः। आकाशे न तदन्वयः, प्रत्ययप्राग्वर्तिपदवृत्त्येत्यस्यापि निवेश्यत्वादिति भावः। **कृष्णे तृतीयार्थेति।** अव्यवधानांशनिवेशे तु 'उपकुम्भ'मित्यादौ पूर्वपदार्थे विभक्त्यर्थान्वयापत्तिरिति भावः। एवं 'बहुपटः', 'सर्वक' इत्यादावव्याप्तिः, 'दधीयद्दाती'त्यादौ दध्यादावतिव्याप्तिश्च द्रष्टव्या, 'यदुत्तरं यः प्रत्ययो विहितस्तस्वे सतो'ति निवेशे तु—'चित्रगु'रित्यादावुत्तरपदस्य तत्त्वाभावादुक्तदोषतादवस्थ्यं बोध्यम्। **क्लृप्तव्युत्पत्तीति।** 'प्रत्ययानां प्रकृत्यर्थान्विते'ति व्युत्पत्तीत्यर्थः। नन्वनेकसमास-

अपिच-समासे विशिष्टशक्त्यस्वीकारे 'राजपुरुषः' चित्रगुः' 'नीलोत्पल'मित्यादौ सर्वत्रानन्वयप्रसङ्गः, राजपदादेः सम्बन्धिनि लक्षणायामपि,— 'तण्डुलः पचती'त्यादौ कर्म्मत्वादिसंसर्गेण तण्डुलादेः पाकादावन्वयवारणाय—'प्रातिपदिकार्थप्रकारकबोधं प्रति विभक्तिजन्योपस्थिते'र्हेतुताया आवश्यकत्वात्, पुरुषादेस्तथात्वाभावात् ।

'तण्डुलः शुभ्र' इत्यादौ च प्रातिपदिकार्थकप्रथमार्थे तण्डुलादेस्तस्य

ॐ दर्पणः ॐ

ननु 'प्रत्ययाना'मिति व्युत्पत्तेः प्रकृतिप्रत्ययघटिततया तत्र प्रकृतित्वप्रत्ययत्वयोरनुगतयोर्दुर्वचत्वेन तत्तद्व्यक्तिभेदेन कार्य्यकारणभावो वाच्यः, तथाच समासस्थले समस्यमानपदार्थस्य प्रत्ययार्थान्वयाभ्युपगमे बाधकाभावोऽत आह— अपिचेति । अनन्वयप्रसङ्ग इति । 'नामार्थयो'रिति व्युत्पत्तेरिति भावः । अनन्वयमेवाह—राजपदादेरिति । 'लक्षणायाम'पीत्यपिना सम्बन्धलक्षणायां नितरामन्वयाभावः सूच्यते । नचोक्तव्युपत्ते'स्तण्डुलः शुभ्र' इत्यादौ व्यभिचारोऽत आह—तण्डुलः शुभ्र इति । अभेदेनैवान्वय इति । तथा च तण्डुलान्व-

ॐ काशिका ॐ

रूपसमुदायेषु शक्तिकल्पनामपेक्ष्य व्युत्पत्त्यन्तरकल्पना, क्लृप्तव्युत्पत्तित्यागश्च न गुरुरत आह— दिगिति । तदर्थस्तु—'राजपुरुष' इत्यादौ राजसंबन्धिलक्षणायां राज्ञ एकदेशतया विशेषणान्वयवारणेऽपि 'दास्याः पुत्र' इत्याद्यलुक्समासे लक्षणायां मानभावेन दास्यादौ शोभनादिविशेषणान्वयो दुर्वारः, तत्रापि संबन्धिलक्षणायां दासीसंबन्धिबोधः स्यात्, इष्टापत्तिस्तु न, सर्वानुभवविरोधात्, अलुग्विषयीभूतविभक्तिर्न स्वार्थोपस्थापिका, अत एवा'प्सुचरो' 'गोपुचर' इत्यत्र न बहुत्वप्रतीतिः, एवं च दासीशब्दस्य दासीसंबन्धिलक्षणायामपि राज्ञः पुरुष इति वाक्यादिव समासादपि राजसंबन्धप्रकारकः संबन्धसंसर्गको राजप्रकारकपुरुषविशेष्यको बोधो भाष्यादिसिद्धः संबन्धिलक्षणायां न निर्वहतीत्यादिर्बोध्यः । तथात्वाभावादिति । विभक्तिजन्योपस्थितिविषयत्वाभावादित्यर्थः । ननु 'शुभ्रस्तण्डुल' इत्यादौ शुभ्रादिरूपनामार्थप्रकारकशाब्दबोधो विशेष्यतासंबन्धेन तण्डुलादौ जायते, न च तत्र विभक्तिजन्योपस्थितिर्विशेष्यतयेति व्यभिचारान्नोक्तकार्यकारणसंभवः, तण्डुलः पचती'त्यत उक्तबोधवारणायागत्या धातुजन्योपस्थितेः प्रतिबन्धकत्वमास्थेयं, धातुभिन्नजन्योपस्थितेर्हेतुत्वं वा कल्प्यम्, तथा च 'राजपुरुष' इत्यादावन्वयबोधे बाधकभाव इत्याशङ्क्याह—तण्डुलः शुभ्र इत्यादाविति । प्रातिपदिकार्थकप्रथमेति । प्रातिपदिकस्यार्थो यस्यास्तादृशी या प्रथमा तदर्थे इत्यर्थः । 'प्रातिपदिकार्थमात्रे प्रथमे'त्यस्य प्रतिपदिकार्थमात्रे वाच्ये प्रथमेत्यर्थः, 'पाक' इत्यादौ व्यापारस्येव प्रातिपदि-

च शुक्ले अभेदेनैवान्वयः, 'शुभ्रेण तण्डुलेने'त्यादौ च विशेषणविभक्ति-रभेदार्थिका, पार्ष्णिको वान्वय इति नातिप्रसङ्गः । तथाच समासे परस्प-

❀ दर्पणः ❀

यिनि प्रातिपदिकार्थे विभक्तिजन्योपस्थितेः सत्त्वान्न तत्र व्यभिचार इति भावः। 'शुभ्रेण तण्डुलेने'त्यादौ व्यभिचारमाशङ्क्य निराचष्टे—अभेदार्थिकेति। अथवा कट इव तत्समानाधिकरणभीष्मादिभ्यो द्वितीयादिविभक्तेरनभिहितसूत्रे भाष्यकृताभिधानात्, सामानाधिकरण्यस्य = समानाधिकरणयोर्विशेष्यविशेषणयोर्भावस्याभेदस्य—विशेषणपदोत्तरविभक्त्यर्थत्वलाभात् तथापि 'शुभ्रणे'ति तृतीयाजन्याभेदोपस्थितिसत्त्वान्न व्यभिचार इति भावः।

नन्वत्र अभेदो यदि भेदत्वावच्छिन्नाभावस्तदाऽप्रसिद्धिः, भेदस्य केवलान्वयित्वात्, यदि भेदप्रतियोगिकाऽभावस्तदा 'नीलो वह्नि'रिति वाक्यस्य प्रामाण्यापत्तिर्द्वित्वादिना नीलभेदाभावस्य वह्नौ सत्त्वाद्, विशेषणविभक्त्यर्थैकदेशे भेदे प्रकृत्यर्थस्यानन्वयापत्तिश्च, नन्वभेदेऽभावे च द्वितीयादेः शक्तिः, भेदे च प्रकृत्यर्थस्य प्रकृत्यर्थतावच्छेदकावच्छिन्नप्रतियोगिताकत्वेनान्वयः, उक्तसम्बन्धेन प्रकृत्यर्थविशिष्टभेदस्य तु—तत्त्वावच्छिन्नप्रतियोगिताकत्वेनाभावेऽन्वयोपगमान्नोक्तापत्त्यादिरिति वाच्यं, 'प्रमेयो घट' इत्यादौ प्रमेयत्वावच्छिन्नभेदाऽप्रसिद्ध्योक्तप्रकारासम्भवात्, नीलघटादिपरनीलपदघटित'नीलो घट' इति वाक्यस्य प्रामाण्यापत्तेश्च, नीलत्वादिना नीलभेदाभावस्य घटेऽबाधात्, न च तद्व्यक्तित्वावच्छिन्नाभेद एव विभक्त्यर्थः, तथा सत्यपूर्वव्यक्तिनिष्ठतद्व्यक्तित्वस्य भानाऽसम्भवेन तदवच्छिन्नप्रतियोगिताकाऽभावे शक्तिग्रहासम्भवेनापूर्वव्यक्त्यभेदान्वयानुपपत्तेः, अभावबुद्धेर्विशिष्टवैशिष्ट्यावगाहित्वानुपपत्त्या एकधर्मावच्छिन्नप्रतियोगिताकाभावेऽपरधर्मावच्छिन्नप्रतियोगितायाः सम्बन्धतया भानासम्भवाच्चेति चेन्न, अभेदस्ता-

❀ काशिका ❀

कार्थस्यापि द्वेधा भानं; विभक्त्याऽसत्त्वरूपेण स उपस्थाप्यते इति विरूपोपस्थितेः सत्त्वेनाभेदान्वयसंभव इति भावः, एवं च नोक्त कार्यकारणभावे व्यभिचार इति भावः।

नन्वत्र व्यभिचारवारणेऽपि 'शुभ्रं तण्डुलं' 'शुभ्रेण तण्डुलेने'त्यादौ व्यभिचारो दुर्वार एव, द्वितीयादेः प्रातिपदिकार्थे विहितत्वाभावादत आह—शुभ्रेण तण्डुलेनेतीति। अभेदार्थेति। कर्माद्यभेदस्य कर्मादिरूपतयाऽभेदस्यानुशासनविषयत्वादिति भावः। एवमेव 'स्तोकं पचती'त्यादौ न व्यभिचारः। ननु विशेष्यवाचकपदोत्तरविभक्त्यैव कर्माद्यर्थस्य गमिततया विशेषणवाचकपदोत्तरविभक्तिः साधुत्वार्थैव, तथा च शुभ्रपदार्थस्य तण्डुलेनैवान्वयो वाच्य इति व्यभिचारस्तदवस्थ एवेत्याशङ्क्याह—पार्ष्णिको वेति। अयं भावः—कर्मण्येव द्वितीयादि-

॥ दर्पणः ॥

दात्म्यं, तच्च—स्ववृत्त्यसाधारणो धर्म्मः, असाधारण्यं च—'स्वप्रतियोगिवृत्तित्व' 'स्वसामानाधिकरण्यो'भयसम्बन्धेन भेदविशिष्टं यत्तदन्यत्वमित्येकमात्रवृत्तिधर्मं एव प्रकृते सः। तस्मिन्नाधेयतया प्रकृत्यर्थान्वयः, अपूर्वव्यक्तिनिष्ठतद्व्यक्तित्वस्य विशिष्य ज्ञातुमशक्यत्वेप्येकमात्रधर्मत्वेन सामान्यप्रत्यासत्त्या सुग्रहात्सर्वं सुस्थमिति।

पार्ष्णिक इति। शाब्दबोधोत्तरकालिक इत्यर्थः। अन्वय इति। तद्बोध इत्यर्थः, अरुणाधिकरणरीत्या सर्वेषां विभक्त्यर्थानां प्रथमं क्रियायामेवान्वयेन तत्र शुभ्रादिपदार्थान्वये विभक्तिजन्योपस्थितिसत्त्वात्तत्पक्षेऽपि नोक्तव्युत्पत्तेर्व्यभिचार इति भावः।

ननु 'नामार्थयो'रिति व्युत्पत्तेः—'राजा पुरुषः''तण्डुलः पचती'त्यादौ राज्ञः स्वस्वामिभावसम्बन्धेन पुरुषे, तण्डुलस्य कर्मतासम्बन्धेन धात्वर्थपाकेऽन्वयवारणायावश्यकत्वेऽपि—तत्र 'राजा पुरुषः'स्तोकं पचती'त्यत्राऽभेदसम्बन्धेनाऽन्वयाद् व्यभिचारवारणायाभेदातिरिक्तसम्बन्धावच्छिन्नत्वं नामार्थनिष्ठप्रकारतायां निवेशनीयम्, न च विशेषणविभक्तेरभेदार्थकतया निर्वाहः, 'कट एव कर्मे'ति भाष्यव्याख्यावसरे—'भीष्मादीनां स्वयमकर्मकत्वेऽपि-विशेष्यसम्बन्धिविभक्त्यैव भीष्मादि-

॥ काशिका ॥

नियमेन साधुत्वार्थे विभक्तिरिति न युक्तं, किं तु कर्माद्यर्थिकैव, 'कटोऽपि कर्म भीष्मादयोऽपि कर्म' इति भाष्याद्विशेषणेऽपि कर्मत्वादिसत्त्वात्, एवं च कारकाणां क्रिययैवान्वय इति नियमात् क्रियायामन्वयः, तथा च विशेषणविशेष्ययोः परस्परमन्वयाभावान्न व्यभिचारः, न च क्रिययान्वयादेव व्यभिचारः, विभक्त्यर्थद्वारैव तदन्वयस्याङ्गीकारात्, परस्परान्वयाभावे विशेष्यस्य व्यवच्छेदो न स्यात्, तथा च 'शुभ्रेण तण्डुलेन शिवं पूजये'दित्युक्तेऽपि श्यामादितण्डुलेन येन केनचिच्छुभ्रेण पूजनप्रसक्तिः, एवं सामर्थ्याभावाच्छुभ्रतण्डुलो नीलोत्पलमित्यादिः समासो न स्यादिति दोषपरिहाराय द्वयोः पार्ष्णिकः परस्परमन्वयबोधोऽङ्गीकृतः, स च शाब्दो, मानसो वा। न च सामर्थ्यविरहेऽपि 'विशेषणं विशेष्येणे'त्यादिना विधानसामर्थ्यात्समास इति वाच्यं, तत्सामर्थ्यात् पार्ष्णिकबोधकल्पनाया एव युक्तत्वादिति भावः।

परे तु प्रथमायाः प्रातिपदिकार्थो न वाच्यो बोधावृत्तिप्रसङ्गात्, एकरूपेणोपस्थितयोरन्वयासंभवाच्च। भिन्नरूपेण बोधाननुभवाच्च, अत एव तत्तत्प्रातिपदिकेन तत्तदर्थे विवक्षिते तदुत्तरं प्रथमेत्येव वाक्यार्थः स्वीक्रियते, एवं विशेषणविभक्तेरभेदत्वेनाभेदार्थकत्वे मानाभावः, कर्माद्यभेदस्य कर्माभेदरूपत्वेऽपि कर्मत्वादिनैव वाच्यताया अनुशासनसिद्धत्वात्, कथं तर्हि शुभ्रादिपदाद् द्वितीयेति चेदत्राहुरनभिहितसूत्रे भाष्यकाराः—'विशिष्टस्य क्रिययेप्सितत्वात् कर्मत्वादुभयत्रापि द्वितीया' इति। विशिष्टनिष्ठं कर्मत्वं समानविभक्तिकत्वं विना न प्रत्याययितुं शक्यत इति

रमन्वयासम्भवादावश्यिकैव समुदायस्य तादृशे विशिष्टार्थे शक्तिः, किञ्च,—'राजपुरुष' इत्यादौ सम्बन्धिनि, ? सम्बन्धे वा ? लक्षणा, नाद्यः—'राज्ञः पुरुष' इति विवरणविरोधात्, समाससमानार्थकवाक्यस्यैव

❀ दर्पणः ❀

पदोत्तरं भवितव्यम्, तदेकयोगक्षेमत्वात् केवलानां च प्रातिपदिकानां प्रत्ययः परश्चेति नियमेन प्रयोगानर्हत्वात्, यथेश्वरसुहृदः स्वयं निर्धना अपि तदीयधनेनैव तत्फलभाजः, एवं गुणा अपी'त्यनभिहितसूत्रे वदता कैयटेन विशेषणविभक्तेः साधुत्वमात्रार्थकत्वं स्पष्टमेवोक्तम् । विभक्त्यर्थप्रातिपदिकार्थविशेष्यकपुरुषादिप्रकारकबोधस्याऽननुभावाच्च, अत एव व्युत्पत्तौ 'भेदेने'ति पठ्यते, तथाच तत्पक्षे लक्ष्यार्थराजसम्बन्धिनः पुरुषादावन्वयो नानुपपन्नोऽत आह—**किञ्चे**ति। **विवरणविरोधादि**ति। अत्र वदन्ति—विग्रहस्य विग्रियमाणसमानार्थकत्वं न विग्रियमाणजन्यबोधे यद्यद्विशेष्यकत्वे सति यद्यत्प्रकारकत्वं तत्तद्विशेष्यकतत्तत्प्रकारकबोधजनकत्वम्, प्राप्तमुदकं यमित्यादेः 'प्राप्तोदका'दिसमासविग्रहत्वानुपपत्तेः, 'पचति', 'व्याकरणमधीते' इत्यादिनां 'पाचको' 'वैयाकरण' इत्यादिकृत्तद्धितान्तविग्रहत्वानापत्तेश्च, तत्र विग्रहविगृह्यमाणजबोधविषयपदार्थानां विशेषणविशेष्यभाववैपरीत्यात्, नाऽपि तज्जन्यबोधीययावद्विषयविषयकबोधजनकत्वम्, पुरुषस्य राजेत्यस्यापि राजपुरुषादिविग्रहत्वापत्तेः, किन्तु विग्रियमाणजबोधजनकत्वं तद् वाच्यम्, प्राप्तमुदकं यमित्यादेः प्राप्तोदकादिसमासजबोधविषयाः परस्परसम्बद्धतात्पर्यविषयीभूताश्च यावन्तः पदार्था उदकादयस्तावद्विषयकबोधजनकत्वं ।

❀ काशिका ❀

तद्भावः। अत्र पक्षेऽपि विशेषणपदात् कर्मत्वाद्यनालिङ्गितार्थोपस्थितिः, विशेष्यात्तु तद्वैशिष्ट्येन ऽतीतेर्विशिष्टस्यैककर्मत्वबोधः, ततोऽथवा कटोऽपि कर्म भीष्मादयोऽपीति' समदधुः। अत्र पक्षे विशेषणपदं पृथक्तत्तच्छक्तिमत्तया प्रतिपादकं, द्रव्येणाभेदात्तु तस्याः शक्तेर्वाक्यार्थबोधेन विशिष्य ग्रहः, अत्रापि पक्षे विशेष्यविशेषणयोः परस्परमन्वयपूर्वकमेव क्रियान्वयः, कारकाणां भावनान्वयनियमभङ्गस्तु न, साक्षात् क्रियाजनकानां साक्षादेव भावनान्वयः, द्रव्यद्वारा तज्जनकानां तु द्रव्यद्वारैवान्वय इति नियमाङ्गीकरात्। 'गुणानां च परार्थत्वा'दिति न्यायस्य तु नात्रावसरः, यतो द्रव्यगुणयोरुक्तरीत्या समत्वाभावः, ततो विशेष्यस्यैव कर्मत्वं, तत्सामानाधिकरण्याद् भीष्मादिभ्योऽपि द्वितीयेति समादधुः।

अत्र कैयटोपाध्यायाः—यथेश्वरसुहृदः स्वयं निर्धना अपि तद्धनेनैव धनफलभाजस्तद्वत्तदेकयोगक्षेमत्वादिति, विशेष्यसमानशक्तिं विना विशेष्यतयैकार्थबोधैकत्वरूपसामानाधिकरण्यानुपपत्तिरिति विशेषणस्य विशेष्यसमानशक्तिकत्वमेव, तच्चारोपितमेवेति ततोऽपि विभक्तिनिर्वाह इति भावः।

विग्रहत्वात्, अन्यथा तस्माच्छक्तिनिर्णयो न स्यात् । नान्त्यः—राजसम्बन्धरूपः पुरुष इति बोधप्रसङ्गात्, विरुद्धविभक्तिरहितप्रातिप-

❀ दर्पणः ❀

घटकीया कर्मतेत्येतावन्मात्रस्य घटकर्मकानयनकृतिरिति विग्रहत्ववारणाय 'यात्र'-दिति। राज्ञः पुरुषः सुन्दर इत्यधिकाऽवगाहिनो 'राजपुरुष' इति विग्रहत्वमिष्टमेव। वस्तुतस्तु शक्तिग्रहणाऽर्थं प्रयुज्यमाने तस्मिन्न तात्पर्य्यविषयार्थकपदप्रयोगदौर्लभ्यमेव, पुरुषस्य राजेत्यादेस्तु विग्रहत्ववारणाय 'तात्पर्य्यविषयत्वं' विशेषणं, तत्र पुरुषः प्रतियोगी न। घटः कर्मत्वमित्यादिसमुदायस्य घटानयनेत्यादिना न। कुम्भं करोतीत्यादीनां कर्तृलक्षणिकानामेव न्यायनये कुम्भकारादिविग्रहत्वम्। प्रकृते च राजपुरुष इत्यादित्वस्य ? राज्ञः पुरुष इति वाक्ये अक्षतत्वान्न तस्य विग्रहत्वानुपपत्तिरिति। अन्यथेति। समानार्थकत्वाभावे इत्यर्थः। तस्मात् = विग्रहवाक्यात्। न स्यादिति। तत्समानाऽर्थकवाक्यस्यैव तच्छक्तिनिर्णायकत्वादिति भावः।

सम्बन्धलक्षणाकल्पं दूषयति—नान्त्य इति। नीलोत्पलादिसमाससङ्ग्रहाय समानविभक्तिकेत्यपहायोक्तं-'विरुद्धविभक्तिरहिते'ति। विरुद्धविभक्तिकधातु-

❀ काशिका ❀

अस्मिन्नपि पक्षे तयोरेव परस्परमन्वयो लभ्यत" इत्याहुः। विस्तरस्तु मञ्जूषादितोऽवगन्तव्यो ग्रन्थविस्तरभयान्नेह वितन्यते। एवं च 'शुभ्रस्तण्डुल' इत्यादौ व्यभिचारो दुष्परिहरः, तद्वारणार्थं भेदसंबन्धावच्छिन्ननामार्थप्रकारताकत्वं विभक्तिजन्योपस्थितेः कार्यतावच्छेदके यदि निवेश्यते, तर्हि—राजसंबन्धिनो भेदेन बोधे नोक्तं बाधकमिति प्रतिभाति, 'किं चे'त्युत्तरग्रन्थ इत एवास्वरसाद्वोक्त इति बोध्यम्।

ननु समाससमानार्थकत्वं समासजन्यप्रतीतिविषयार्थप्रतीतिजनकत्वं, तच्च प्रकृतेऽक्षतं, समासजन्यप्रतीतिविषयराजसंबन्धविषयकप्रतीतिजनकत्वाद्राज्ञः पुरुष इत्यस्येत्यत आह—अन्यथेति। उक्तप्रतीतिमात्रजनकत्वस्य विग्रहरूपत्वे। तस्मात्—विग्रहरूपविवरणात्। शक्तिनिर्णयो न स्यादिति। विवरणविव्रियमाणयोः समानार्थकत्वनियमे विवरणस्य शक्तिनिर्णायकत्वं संभवेत्, असमानार्थकस्याप्युक्तस्य विवरणत्वाङ्गीकारे तु तादृशनियमभङ्गेन विवरणादभियुक्तोक्तः शक्तिनिर्णयो न स्यात्, तथा च फलार्थककरोतिना विवरणादाख्यातस्य यत्ने शक्तिरित्यादिकं विलीयेतेति भावः, अथवा 'राज्ञः पुरुष' इति विग्रहस्य समासनिष्ठार्थबोधकतानिर्णायकत्वमनुभवसिद्धं भज्येतेति भावः। प्रसंगादिति। राज्यसंबन्धस्य नामार्थत्वेनाभेदसंबन्धेनैव पुरुषेणान्वयबोधः स्यान्न त्वाश्रयसंबन्धेनेति भावः। ननु समानविभक्तिकत्वं नामार्थयोरभेदबोधे तन्त्रं, तच्चात्र नास्तीति कथं राजसंबन्धः पुरुष इति बोधापत्तिरत आह—विरुद्धविभक्तीति। 'सुन्दरं दधि' 'सेवकद्वारी'त्यादौ व्यभिचारात् समानविभक्तिकत्वस्योक्तबोधे प्रयोजकत्वासंभवाद्विरुद्धविभक्तिराहित्यस्यैव प्रयोजकत्वमुररीक्रियत इति भावः। इदं चापादनं योग्यताज्ञानं भ्रमात्मकमयो-

❀ दर्पणः ❀

प्रातिपदिकार्थयोः, स्तोकं पचतीत्यादावभेदान्वयदर्शनादाह—**प्रातिपादिकार्थयोरिति।** तथाचाऽभेदसंसर्गावच्छिन्नप्रातिपदिकार्थनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धिं प्रति विरुद्धविभक्तिरहितपदजन्योपस्थितेर्हेतुतया तस्या राजपुरुष इत्यादिसमासोत्तरपदार्थे पुरुषादौ सत्त्वादभेदान्वयो दुर्वार इति भावः।

ननु विरुद्धविभक्तिराहित्यं व्याससमाससाधारणं,—न विशेष्यवाचकपदस्य विशेषणवाचकपदाऽप्रकृतिकविभक्त्यप्रकृतित्वम्, 'नीलघटमानये'त्यादावभावात्, नापि विशेषणवाचकपदस्य विशेष्यवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वं, विशेष्यपदाप्रकृतिकत्वस्य, तदनुत्तरत्वस्य, तदुत्तरत्वेनाऽप्रतिसन्धीयमानत्वस्य वा 'नीलो घट' इत्यादौ नीलपदोत्तरविभक्तौ घटादिपदोत्तरविभक्तिभिन्नायां सत्त्वेन तत्राभेदान्वयानुपपत्तेरिति चेत्—अत्र केचित्, विशेषणपदे विशेष्यवाचकपदप्रकृतिकविभक्त्यसजातीयविभक्त्यप्रकृतिकत्वमेव विरुद्धविभक्तिराहित्यम्, साजात्यं च सुप्त्वादिना, प्रथमात्वादिना वा, 'नीलो घट' इत्यादौ विशेषणविभक्तेर्विशेष्यविभक्तिभिन्नत्वेपि तत्सजातीयभिन्नत्वाऽभावेनोक्तविरुद्धविभक्तिराहित्यस्य तत्राक्षतत्वादिति। वस्तुतस्तु विशेषणविभक्तेः साधुत्वमात्रार्थकत्वमिति मते विरुद्धत्वं स्वार्थभिन्नार्थकत्वम्, 'नीलो घट' इत्यादौ विशेषणविभक्तेर्निरर्थकतया तत्र विशेष्यविभक्तिविरुद्धार्थकविभक्तिर्द्वितीयादिरूपैव, तदप्रकृतित्वस्य विशेषणवाचकपदे सत्त्वान्न तदसंग्रहः। एवं 'नीलघटमानये'त्यादिसमस्तस्थले विशेषणविभक्तेरेवाभावेन तादृशविभक्त्यप्रकृतित्वं विशेषणवाचकपदस्याव्याहतम्। अत एव 'चैत्रस्य सुतस्य धन'मित्यादौ नाऽभेदान्वयाकाङ्क्षा, तत्र विशेषणविशेष्यविभक्त्योर्विभिन्नसम्बन्धार्थकत्वात्, नापि 'स्तोकमत्ती'त्याद्यसङ्ग्रहः। पूर्वकल्पे तु विशेषणवाचकविभक्तेस्तिङ्विजातीयत्वेनोक्ताकाङ्क्षायास्तत्रासत्त्वेन तदसङ्ग्रहः स्पष्ट एव।

❀ काशिका ❀

ग्यतानिश्चयाभावो वा यदा वर्तते तदा बोध्यम्, वस्तुतस्तु—स्वमते योग्यताज्ञानस्य हेतुत्वमयोग्यतानिश्चयस्य प्रतिबन्धकत्वं च नास्तीति पूर्वं निरूपितं न विस्मर्तव्यम्।

अथोक्तव्युत्पत्तिनिर्वाहको— नामार्थप्रकारकाभेदान्वयबोधे विरुद्धविभक्तिरहितनामजन्योपस्थितिर्हेतुरिति कार्यकारणभावो न संभवति, 'चैत्रस्य सुतस्य धन'मित्यत्रातिप्रसङ्गादिति चेन्न, विभक्त्यर्थमनन्तर्भाव्य नामार्थान्वयमात्रबोधे उक्तकार्यकारणभावाङ्गीकारात्, चैत्रमात्रप्रकारकस्याभेदसंसर्गकबोधस्येष्टत्वादिति भावः। विरुद्धविभक्तिः = विरुद्धार्थकविभक्तिर्विभिन्नार्थकविभक्तिरिति यावत्, तादृशविभक्तिराहित्यमुक्तबोधे तन्त्रम्। 'राज्ञः सुतस्य धन'मित्यत्र तु विभक्त्योः समानार्थकत्वमेकत्र जन्यत्वस्यापरत्र स्वत्वस्य तदर्थत्वात्, 'राज्ञः पुरुषस्य धन'मित्यत्र षष्ठीद्वयस्य

दिकार्थयोरभेदान्वयव्युत्पत्तेरित्यादि प्रपञ्चितं वैयाकरणभूषणे।

अत एव 'वषट्कर्तुः प्रथमभक्ष' इत्यत्र न भक्षमुद्दिश्य प्राथम्यविधानं युक्तम्, एकप्रसरताभङ्गापत्तेरिति तृतीये,—'त्र्यङ्गैः स्विष्टकृतं यजती'

❀ दर्पणः ❀

सारे,—'प्रातिपदिकार्थयो'रिति प्रकृताभिप्रायेणैवं, तथाच 'विरुद्धविभक्त्यप्रकृति-प्रातिपदिकार्थनिष्ठाभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्द-बोधे धातुप्रातिपदिकान्यतरजन्योपस्थितिः कारण'मित्यर्थं फलित इति।

ननु पूर्वनिरुक्तविरुद्धविभक्तिराहित्यस्याभेदान्वयबोधाकाङ्क्षत्वे, 'चैत्रस्य सुतस्य धन'मित्यादौ तदापत्तिरत आह—**प्रपञ्चितमिति**। विभक्त्यर्थमन्तर्भाव्य नामार्थान्वय एवोक्तव्युत्पत्तिरिति तत्रोक्तं, तस्यापि—'सार्थकविभक्त्यप्रकृतित्व'मपि विशेषणवाचकपदे निवेशनीयमत्रेति तात्पर्यम्।

मीमांसकैरपि विशिष्टशक्तिपक्षोऽभ्युपेय इत्याह–**अत एवेति**। समासे एकार्थीभावस्य सर्वसम्मतत्वादेवेत्यर्थः। **भक्षमुद्दिश्येति**। 'ऋत्विजो हविःशेषान् भक्षयन्ती'ति विहितभक्षणमनूद्येत्यर्थः। **एकप्रसरताभङ्गापत्तेरिति**। उद्देश्य-विधेयभावेनान्वये पृथगुपस्थितेर्नियामकत्वेन तदनुरोधेन तदभ्युपगमे विशिष्टाऽर्थोपस्थितिजनकत्वरूपैकप्रसरताभङ्गापत्तेरित्यर्थः। तैर्विशिष्टशक्त्यनभ्युपगमेऽपि विशिष्टलक्षणाया अभ्युपगमेनैकप्रसरतायास्तन्मतसिद्धत्वात्। न चोद्देश्यतयाऽन्वये यच्छब्दयोगप्राथम्यादीनां, विधेयतयान्वये च तच्छब्दयोगादीनां तन्त्रतया तत्र तदभावात्कथं तदापादनमिति वाच्यं, सति तात्पर्ये 'प्रथमो भक्षः', 'पण्डितो ब्राह्मण' इत्यादावुद्देश्यविधेयभावेन बुद्धेरानुभविकतया यच्छब्दयोगादीनां प्रायिकत्वात्। तादृशशाब्दबोधेऽसमस्तपदजन्योपस्थितेर्हेतुता तु न, 'दामोदरः पूज्यो', 'राजपुरुषः सुन्दर' इत्यादितस्तथा बोधानुपपत्तेः, तत्र च प्राथम्यविशिष्टं भक्षणान्तरमेव विधीयते शब्दवृत्त्या, ततश्च प्राप्ताप्राप्तविवेकेन प्राथम्यविधिः पर्यवस्यतीति सिद्धान्तादिति भावः। **त्र्यङ्गैरिति**। तत्र हीज्याशेषभूतत्रित्वविशिष्टयस्कि-

❀ काशिका ❀

स्वत्वार्थकत्वेऽपि तयोः स्वत्वयोर्भिन्नत्वान्न दोष इति तु परे। समासे व्युत्पत्त्यन्तरमङ्गीकुर्म इति चेदतिरिक्तशक्तिसिद्धिरप्रत्यूहैव, तदेतत् सर्वमभिप्रेत्याह—प्रपञ्चितं वैयाकरणभूषणे इति।

अत एव = पृथगुपस्थित्यभावप्रयोजकसमुदायशक्तेरङ्गीकारादेव। भक्षमुद्दिश्येति। 'होतृ-चमस' इति समाख्यावलात् प्राप्तं वषट्कर्तृसंबन्धि भक्षमुद्दिश्येत्यर्थः। एकप्रसरतेति। एकरूपेत्यर्थः। भङ्गापत्तेरिति। तथा सति सामर्थ्यविघातात् समासो न स्यादिति भावः। समासे हि सर्व-पदार्थानामुद्देश्यत्वं विधेयत्वं वा भवति, यथा 'धवखदिरौ सुन्दरौ' इमौ वृक्षौ धवखदिरा'विति।

त्यत्राङ्गानुवादेन न तत्त्रित्वविधानं युक्तम्—एकप्रसरताभङ्गा-पत्तेरिति दशमे च,—निरूपितं सङ्गच्छते। सङ्गच्छते चारुणाधिकरणा-

❀ दर्पणः ❀

ञ्चिदङ्गविधानं ?, किं वा त्रित्वविशिष्टाऽशेपाङ्गविधानमिति संशये-प्रकृताविज्या-शेषेण पुरोडाशेन स्विष्टकृते हुतत्वादत्रापि शेषभूतत्रित्वविशिष्टाङ्गैरेव स्विष्टकृद्धवनं युक्तमिति पूर्वपक्षे शेषभूतानि कानिचिदङ्गान्यनूद्य त्रित्वविधाने एकप्रसरताभङ्गाप-त्तिस्तस्मात् कल्पसूत्रोक्तत्रित्वविशिष्टाङ्गान्तरविधानमिति निर्णीतं दशमाध्यायस्य तृतीये पादे इत्यर्थः। कल्पसूत्रोक्तानि हृदयाद्येकादशाङ्गानि तु-१ हृदयं, २ जिह्वा, ३ वृक्षो, ४ यकृत्, ५–६ वृक्कौ, ७ सव्यं दोः, ८–९ उभे पार्श्वे, १० दक्षिणा श्रोणी, ११ गुदमिति। तत्र त्रीणि—दक्षिणोंऽसः, सव्या श्रोणी, गुदं तृतीयमिति।

नन्वेकप्रसरत्वं न विशिष्टार्थोपस्थितिजनकत्वं, किन्तु समासघटकपदयोरुद्दे-श्यविधेयभावेनान्वयाबोधकत्वमिति व्युत्पत्तिस्तद्भङ्गापत्तेरिति तदर्थो, न तु विशिष्टार्थोपस्थितिजनकत्वभङ्गापत्तेरिति। तादृशव्युत्पत्तिशरीरं तु'समासघटक-पदार्थनिष्ठविधेयतानिरूपितोद्देश्यतासम्बन्धेन शाब्दबुद्धिं प्रति समासघटकपद-जन्योपस्थितिः प्रतिबन्धिके'ति। न च तादृशप्रतिबध्यप्रतिबन्धकभावकल्पने गौरव-मिति वाच्यम्, सर्वत्र विशिष्टशक्तिकल्पनापेक्षया क्वचित् प्रतिबध्यप्रतिबन्धक-भावकल्पने एव लाघवात्।

वस्तुतस्तु यत्रोद्देश्यभावेनान्वयबोधस्तत्पदार्थोपस्थितिसमवहिततदानुपूर्वी-विरहादेव तथान्वयासम्भवान्नोक्तप्रतिबध्यप्रतिबन्धककल्पनापि, एकप्रसरता तु प्रथमपदार्थान्वितभक्षविशेष्यकबोधानुभव एवेति नोक्तयुक्त्या मीमांसकैर्विशिष्टशक्ति-रभ्युपेयेत्यत आह—**सङ्गच्छते चेति**।

❀ काशिका ❀

न तु समासघटकैकपदार्थमुद्दिश्य तद्घटकापरपदार्थस्य विधेयत्वमुक्तदोषादिति प्राथम्यविशिष्टभक्ष इति मीमांसातृतीयाध्यायस्थस्तत्रत्यसिद्धान्तो बोध्यः। त्र्यङ्गैः **स्विष्टकृतमिति**। 'पशौ हृदय-स्याग्रेऽवद्यती'त्यादिना एकादशाङ्गानां होमस्य विधानेन 'प्रकृतिवद्विकृति'रिति न्यायेनैकादशभि-रङ्गैर्होमे प्राप्ते-इदं वाक्यमारभ्यते, तत्राङ्गानुवादेन त्रित्वं विधीयत इति **पूर्वपक्षः**, उक्तदोषात् त्रित्वविशिष्टाङ्गान्तरविधिरिति दशमाध्याये **सिद्धान्तितम्**, एतच्च विशिष्टशक्तिपक्षे घटपदाद् घटघटत्वयोरिव विशिष्टशक्त्यैव प्राथम्यविशिष्टभक्षस्य त्रित्वविशिष्टाङ्गानां चोपस्थित्या वाक्यार्थ-रूपोद्देश्यविधेयभावेनान्वयासंभवात् संगच्छते, समुदायशक्त्यनङ्गीकारे तु 'प्रथमो भक्षस्त्रिभि-रङ्गै'रितिवत् समासेऽपि तथान्वयः स्यादित्यधिकरणविरोध इति समुदितार्थः। न च 'यद्वृत्तयोगः प्राथम्यमित्याद्युद्देश्यलक्षण'मित्याद्यभियुक्तोक्तयोद्देश्यताविधेयतानियामकस्य यद्वृत्तयोगप्राथम्या-

रम्भः, अन्यथा,—'अरुणया एकहायन्या पिङ्गाक्ष्या सोमं क्रीणाती'त्यत्रारुण्यपदवदितरयोरपि एकाब्दत्वादिगुणमात्रवाचकतया अमूर्त्तत्वात्, क्रीणातौ करणत्वासम्भवस्य तुल्यत्वादारुण्यस्यैव वाक्याद्भेदशङ्काया असम्भवादिति प्रपञ्चितं भूषणे। तस्मात्समासशक्तिपक्षो जैमिनीयैरवश्याभ्युपेय इत्यास्तां विस्तरः ॥ ३४ ॥

ॐ दर्पणः ॐ

वाक्याद्भेदेति। न च तस्य वाक्यभेदेन प्रकरणे निवेशोऽपि सम्भवति, अमूर्त्तत्वेन क्रियाभिः कारकत्वेन द्रव्यैः सममपि सम्बन्धासंम्भवात्, नच तृतीयया ज्योतिष्टोमकरणीभूतप्राकरणिकद्रव्याण्यनूद्य 'यत्कर्त्तव्यं तदारुण्यगुणकेने'ति परिच्छेदकत्वेन तदन्वयो नासम्भावित इति वाच्यम्, तथा सति 'शक्तिः कारक'मिति सिद्धान्तभङ्गापत्तेरित्यपि बोध्यम्। उपसंहरति—**तस्मादिति।** 'जैमिनीयै'रिति वदता नैयायिकमतस्य सयुक्तिकत्वं ध्वन्यते ॥३४॥

ॐ काशिका ॐ

देरभावान्न भक्षार्थानुवादेन प्राथम्यादिविधिरिति वाच्यं, 'प्रथमो भक्ष' इत्यादावपि तदनापत्तेः, अत एवे'त्याद्युद्देश्यलक्षण'मित्यत्रादिपदं यद्वृत्तादेरनियतत्वसूचनार्थमुपात्तम्। विधेयताया विशेष्यमात्रनिष्ठतया न प्राथम्यादेर्विधेयत्वमित्यपि न युक्तम्, अज्ञातस्यैव विधेयत्वेन तस्य विशेष्यत्ववद् विशेषणत्वस्यापि संभवेन तथा नियमे मानाभावात्, अत एव 'प्रथमो भक्ष' इत्यत्र प्राथम्यादेर्विधेयत्वानुभवः, न च समस्तभिन्नपदजन्योपस्थितेस्तादृक्शाब्दबोधे हेतुतया न भक्षाद्यनुवादेन प्राथम्यादिविध्यापत्तिरिति वाच्यम्, 'पीतवासाश्चतुर्भुजः' 'प्रथमभक्षः कर्तव्य' इत्यादौ तथा बोधानापत्तेः, न च भेदप्रतियोगिसमस्तपदे उद्देश्यविधेयवाचकोभयघटितत्वं निवेश्योक्तहेतुहेतुमद्भावकल्पनान्न कोऽपि दोष इति वाच्यं, तथाविधगुरुतरकार्यकारणभावकल्पनापेक्षयैकार्थीभावकल्पनायामेव समीचनतेत्याशयात्। परे तु—'लोहितोष्णीषा ऋत्विजः प्रचरन्ति' 'सप्तदशारत्निर्वाजपेयस्य यूपो भवती'त्यादौ उष्णीषयूपारत्नी अनूद्य लौहित्यसप्तदशत्वयोर्विधिरिति मीमांसकसिद्धान्तात्तथान्वयाभिप्रायेण समासप्रयोगे प्राप्तत्वादिपर्यालोचनोत्तरं तथा बोध इष्ट एव, अत एव 'अपृक्त एकाल् प्रत्ययः' 'अभ्यासलोपश्चे'त्यादिप्रयोगे तथार्थोऽनुभूयते, अत एवालंकारिकैः 'न्यक्कारोऽयमतीव मे यदरय'इत्यादौ उद्देश्यवाचकेदम्पदाप्रकृतेऽपि विलम्बेन तथाप्रतीतिः, समासे तथाप्रतीत्यभाव इत्युत्सर्गपरित्यागेन सहृदयोद्वेगो वा दुष्टिबीजं, तद्वदेवास्यापि नासाधुतोक्तसौत्रप्रयोगात्, न चात्र यूपारत्न्युष्णीषयोरतदेशप्राप्ततयातिदेशादुपदेशस्य बलत्वेन सप्तदशारत्निरित्यादिवाक्यैरेवादौ विशिष्टविधिरिति वाच्यं, यूपऋत्विजामप्यतिदेशप्राप्ततयातिदेशपर्यालोचनोत्तरमेवास्य विधेः प्रवृत्तेः, 'प्रथमभक्ष' इत्यत्र तु समाख्यापेक्षया वाक्यश्रुत्योर्बलवत्त्वेन प्रथमतो नैव भक्षान्तरविधिरित्यादि मञ्जूषायां प्रत्यपीपदन्। प्रपञ्चितं भूषणे इति। 'अरुण-

"–'राजपुरुष' इत्यादौ राजा चासौ पुरुषश्चेत्येत्र विग्रहः, 'चित्रगु'-रित्यादौ च चित्राणां गवामयमित्येव, समानार्थत्वानुरोधात्। यद्यपि–

❀ दर्पणः ❀

समानार्थत्वानुरोधादिति। समानार्थत्वं च व्याससमासयोः समानविशेष्यप्रकारकबोधजनकत्वं, तदनुरोधादित्यर्थः। उक्तविग्रहवाक्याऽन्तर्गतराजशब्दस्य सम्बन्धिनि लाक्षणिकत्वान्न विग्रहत्वक्षतिः, सम्बन्धार्थकषष्ठ्यन्तस्य तु सम्बन्धप्रकारकबोधजनकत्वान्न विग्रहत्वम्। एवं चित्रा गावो यस्येत्यादेरपीत्याशयं प्रकाशयति—

❀ काशिका ❀

यैकहायन्या पिङ्गाक्ष्या सोमं क्रीणाती'ति श्रुतम्, अत्र हि किमरुणिमा वाक्याद्भित्त्वा प्राकरणिकेषु सर्वद्रव्येषु निवेश्यः? किं वा क्रीणातिना संबन्धमनुभूय तदङ्गं सदेकहायन्याम्? इति संदेहे–अमूर्तत्वेन क्रियायां करणकारकत्वासंभवात्ततो विच्छिन्नस्य प्रकरणकल्पितश्रुतानुमितैकदेशनिष्पन्नेन वाक्येनारुणिम्ना प्रकृतापूर्वसाधनीभूतद्रव्यपरिच्छेदं भावयेदित्याकारकेण प्राकरणिकसर्वद्रव्याङ्गत्वमिति **पूर्वपक्षे**–योग्यताज्ञानं न शाब्दबोधकारणमपि त्वयोग्यतानिश्चयस्य प्रतिबन्धकत्वमात्रं, ततश्च तादृशनिश्चयाभावसत्त्वे आरुण्यस्यापि क्रियान्वयबोधोपपत्तिः, पार्ष्णिकस्तु द्रव्येणान्वय इति न ततो विच्छेदकशङ्केत्यादि **सिद्धान्तितम्**। अत्र पूर्वपक्षस्य नोक्तिसंभवः, विशिष्टशक्त्यस्वीकारे पिङ्गाक्ष्येकहायनीशब्दयोरपि पिङ्गत्वाक्षित्वैकत्वहायनत्वादेर्वाच्यतया तेषामप्यमूर्तत्वात् क्रयणकरणत्वासंभवेन करणस्यैतद्वाक्यादलाभेनारुण्यप्राकरणिककरणानुवादासंभवे वा वाक्यभेदशङ्काया एवासंभवात्, त्रिष्वपि लक्षितद्रव्यविध्युपपत्तौ वाक्यभेदशङ्काया निवर्तित्वाच्च, त्रयाणामपि लाक्षणिकत्वाविशेषे बहुव्रीह्योरेव द्रव्यविधायकत्वं नारुणपदस्येत्यत्र विनिगमकासंभवादित्यादिकं **भूषणे** निरूपितम्।

अथ तृतीयाया निष्कृष्टशक्तिवाचकत्वमिति मीमांसकसिद्धान्तात्तया मास्तु करणीभूतद्रव्यानुवादः, 'अरुणे'ति प्रातिपदिकेन गुणवाचकेनापि लक्षणया द्रव्यप्रतिपादकत्वं संभवत्येव, प्रतिपाद्यं द्रव्यं च तृतीयासंयोगात् करणत्वेन भासते, तथा च गुणविशिष्टकरणप्रतीतिरुपपद्यते, एवं च करणतयावगतानि द्रव्याणि विशेष्यतयाऽनूद्य तद्घटितविशेषणरूपो गुणः परिच्छेदकत्वेन विधीयते, येन द्रव्येण किंचित् क्रियते तदरुणगुणकेनेति पूर्वपक्षः संभवदुक्तिक एव। **एतेन** वाक्यभेदेनारुण्यस्य प्रकरणे निवेशो न संभवति, न तावत् प्राकरणिकक्रियाभिः संबन्धो मूर्तत्वात्, द्रव्यैः कारकत्वात्, अनुयातानि च द्रव्याणि कथं गुणसंबन्धं भजेरन्निति पूर्वपक्षोऽपि निरस्तः, तदेतद् ध्वनयन्नाह—**आस्तां विस्तर इति।** अत्र जैमिनीयानां जैमिनिसूत्रविरोधोऽत्यन्तमनुचित इति ध्वननार्थं—**जैमिनीयैरवश्याभ्युपेय** इत्युक्तमित्यलं विस्तरेण॥ ३४॥

ननु समुदायशक्तिव्यवस्थापनानन्तरम्—'आख्यातं तद्धितकृतोः' इत्याद्यभिहितं, तत्र पूर्वग्रंथसंगतमित्याशङ्कानिराकरणाय संगतिमाह—**राजपुरुष इत्यादावित्यादिना। राजा**

प्रथमान्तानामेव बहुव्रीहिरिति 'शेषो बहुव्रीहि'रिति सूत्राल्लभ्यते इति प्रथमान्तं पक्षे वाक्यं,–चित्रा गावो यस्येत्येवं सम्भवत्येव। 'षष्ठी'ति समासविधानाद् राज्ञः पुरुष इति च पक्षे वाक्यं, तथापि–तस्य न विग्रहत्वं, भिन्नार्थत्वात्, किन्तूक्तस्यैव–" इति मीमांसकास्तान् प्रसङ्गान्निरस्यति—

आख्यातं तद्धितकृतोर्यत्किञ्चिदुपदर्शकम्।
गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः॥ ३५॥

तद्धितकृतोर्यत्किंचिदर्थबोधकं विवरणमाख्यातं तत्र विपर्ययो दृष्टः।

❀ दर्पणः ❀

यद्यपीत्यादि, मीमांसका इत्यन्तेन। सूत्राल्लभ्यते इति। तेन हि 'शेषो बहुव्रीहि'रित्यधिकारात्प्रथमात्रिकस्य 'द्वितीयाश्रिते'त्यादिनाऽनुक्तस्य समासो विधीयते। यद्यपि—'विशेषणं विशेष्येणे'त्यादिना तस्यापि समास उक्त एव, तथापि नासौ प्रथमाशब्देनोल्लिखित इति तत्त्रिकस्य[1] शेषत्वमविकलमिति भावः। उक्तस्यैवेति। चित्राणां गवामयमित्यादेरेवेत्यर्थः। 'एव'कारेण प्रथमान्तचित्रादिपदघटितस्य व्यवच्छेदः। 'उपदर्शक'पदस्य विवरणम्–'अर्थबोधक'मिति। आख्यातम्=

❀ काशिका ❀

चासाविति। राजपदं विग्रहस्थमपि राजसंबन्धिपरमत एव विग्रहस्य समाससमानार्थत्वाहानिरिति भावः। इत्येव विग्रह इति। 'एव' शब्देन प्रसिद्धस्य राज्ञः पुरुष इत्यस्य निरासः। अथ षष्ठ्यन्तेन विग्रहेऽपि राजपदं राजसंबन्धिलक्षकं, षष्ठ्यभेदार्थिकेत्यभ्युपगमे निर्वहत्येव समानार्थत्वमिति चेत्, षष्ठ्यर्थाभेदस्य विग्रहे राजसंबन्धिनं प्रति प्राधान्येन भानात् समासे तथाऽभानात् समानार्थत्वहानेरनुद्धारात्, षष्ठ्या अभेदार्थत्वे मानाभावाच्च। अथ साधुत्वार्थिका षष्ठीति न समाससमानार्थत्वहानिरिति चेन्न, संबन्धे एव षष्ठ्या विधानात्, साधुत्वार्थकतत्प्रयोगानुपपत्तेः। गवामयमित्येवेति। 'विग्रह' इत्यनुषज्यते। 'शेषो बहुव्रीहिरिति सूत्रादिति। यस्य त्रिकस्य विशिष्य समासो नोक्तः स शेषः, तादृशं च स्वादित्रिकमेवेति भावः। प्रथमान्तम्= प्रथमान्तपदघटितं। पक्षे लभ्यत इति। समासस्य वैकल्पिकत्वादिति भावः। भिन्नार्थत्वादिति। 'राजपुरुष' इति समासाद्राजसंबन्धिप्रकारकस्याभेदसंसर्गकस्य, राज्ञः पुरुष इति वाक्याद्राजसंबन्धप्रकारकस्याश्रयत्वसंसर्गकस्य बोधस्योदयात्, 'चित्रगुरिति समासाच्चित्राभिन्नगोस्वामीत्याकारकस्य वर्तिपदार्थप्रकारकान्यपदार्थविशेष्यकस्य, चित्रा गावो यस्येति वाक्यात् तत्स्वामिकाश्चित्रा गाव इत्याकारकस्यान्यपदार्थप्रकारकस्य वर्तिपदार्थविशेष्यकस्य बोधस्योत्पादाद्भिन्नार्थत्वमिति भावः।

१ सु-औ जसिति प्रथमावचनत्रयस्य।

तथा हि 'आक्षिकः' 'कुम्भकार' इत्यत्राक्षकरणकव्यापाराश्रयः, कुम्भोत्पत्त्यनुकूलव्यापाराश्रय इति बोध। 'अक्षैर्दीव्यति' 'कुम्भं करोती'त्यत्राक्षकरणिकादेवनानुकूला भावना, कुम्भोपत्त्यनुकूला भावनेति बोधः। कृत्प्रत्यये कारकाणामाख्याते च भावनायाः प्राधान्यं वदतो मीमांसकस्यापि—त्ययं गुणप्रधानभावांशव्यत्यासो न विवरणत्वबाधक इति—नात्र पाक्षिकस्य 'चित्रा गावो यस्ये'त्यादेर्विग्रहत्वे बाधकमस्तीति भावः ॥ ३५ ॥

❀ दर्पणः ❀

तिङन्तम्। तत्र = तिङन्तघटिते विवरणे इत्यर्थः। व्यत्यासमेवाह—तथाहीत्यादि। ननु तत्रापि तिपः कर्तृलक्षकतयाऽक्षकरणव्यापाराश्रय इति बोधान्न समानार्थकत्वभङ्गोऽत आह—कृत्प्रत्यये इति। कारकाणाम् = कर्त्रादीनाम्। प्राधान्यम् = मुख्यविशेष्यत्वम्। कारकाणां प्राधान्यं,—'प्रकृतिप्रत्ययार्थयो'रिति न्यायेन, भावनायास्तु 'भावप्रधानमाख्यात'मिति निरुक्तादिति भावः ॥३५॥

❀ काशिका ❀

आक्षिक इति। 'तेन दीव्यतीति' सूत्रेण देवनकर्तरि ठक्। कुम्भकार इत्यत्र 'कर्मण्यणिति सूत्रेणाण्। कुम्भानुकूलेति। कुम्भकर्मकोत्पत्त्यनुकूलव्यापारेत्यर्थः, उत्पत्त्यनुकूलव्यापारो धात्वर्थः। मीमांसकस्यापीति। अस्य 'संमति'रिति शेषः। न विवरणत्वबाधक इति। तद्धितकृत्तोरर्थप्रदर्शकवाक्ये गुणप्राधान्यवैपरीत्येऽपि विवरणत्ववच्चित्रा गावो यस्येति वाक्येऽपि विवरणत्वसंभवादिति भावः। तथा च वृत्तिजन्यबोधसमानविषयकबोधजनकत्वमेव विग्रहस्य नियतं, न तु तज्जन्यबोधसमानप्रकारकबोधजनकत्वमपीति भावः। किं च—चित्राणां गवामयमिति विग्रहस्य मत्वर्थे बहुव्रीहिः, कर्तृकर्मवचनेनाप्रथमायाः अप्रथमाविभक्त्यर्थे बहुव्रीहिः, शेषो बहुव्रीहिरित्यतः शेष इत्यादि मुनिवचनविरुद्धत्वं च, न चालौकिके प्रथमान्तानामेव प्रवेशान्न तद्विरोध इति वाच्यम्, अलौकिके यद्विभक्त्यन्तानां प्रवेशस्तद्विभक्त्यन्तानामेव परिनिष्ठितानां लौकिकेऽर्थबोधनाय सति संभवे प्रवेशस्यौचित्यात्, न तु षष्ठ्यन्तानामुपस्थितं परित्यज्यानुपस्थितकल्पनाया अन्याय्यत्वात्। एतेन "षष्ठ्यन्तघटितविग्रहो न युक्तः, अषष्ठ्यर्थबहुव्रीहावेवमप्यर्थसाम्यासंभवात्, प्राप्तस्योदकस्यायमिति विग्रहादुदककर्तृकप्राप्तिकर्मेत्याकारकस्य समासजन्यस्य सर्वानुभवसिद्धस्यानुदयात् प्राप्तिकर्त्रुदकसंबन्धीत्याकारकबोधस्यैव तत उदयादिति—दूषणं न सम्यक्, उदककर्तृकप्राप्तिकर्मत्वादिरूपस्यैव संबन्धस्यैव भानेन समाससमानार्थकत्वनिर्वाहादिति—" मीमांसकनव्योक्तं प्रत्युक्तम्, उक्तमुनिवचनविरुद्धत्वात्।

परे तु 'तत्र दृष्टो विपर्यय' इत्यस्य तद्धितकृदन्तयोः कर्त्रादिमुख्यविशेष्यकबोधजनकं विग्रहवाक्यस्य, भावनामुख्यविशेष्यकबोधजनकत्वं तद्धितान्तादेर्यत्प्रकारकयद्विशेष्यकबोध-

नन्वस्तूक्तरीत्या सर्वत्र समासे [1]शक्तिः, अस्तु च तथा विग्रहस्तथापि षष्ठीतत्पुरुषकर्मधारययोः शक्तिमत्त्वाविशेषान्निषादस्थपत्यधिकरणसिद्धान्तसिद्धिर्न स्यादित्यत आह—

पर्यवस्यच्छाब्दबोधाविदूरप्राक्क्षणस्थितेः ।
शक्तिग्रहेऽन्तरङ्गत्वबहिरङ्गत्वचिन्तनम् ॥ ३६ ॥

❀ दर्पणः ❀

शक्तिमत्त्वाविशेषादिति। शक्तिमत्त्वम् = एकार्थीभावः। **सिद्धान्तसिद्धिरिति।** सिद्धान्तस्य = मीमांसितार्थस्य, सिद्धिः = अनुष्ठानोपयोगार्हत्वमित्यर्थः।

❀ काशिका ❀

जनकत्वं तद्विपरीतविशेष्यविशेषणभावापन्नार्थविषयकबोधजनकत्वं पर्यवसितमित्यर्थो न एकाधिकरणे, पूर्वदृष्टगुणत्यागपूर्वकगुणान्तरस्वीकारस्यैव विपर्ययपदार्थत्वात्, विशेष्यतादिविपर्ययसत्त्वेऽपि तस्याख्यातनिष्ठत्वाभावात्, किं तु लोके प्रयुक्ततिङन्तस्य यथा भावनामुख्यविशेष्यकबोधजनकत्वं न तथा बोधजनकत्वे, विग्रहवाक्यस्थस्य तस्यापि तु तद्धितान्तादिवत् कर्त्रादिमुख्यविशेष्यकबोधजनकत्वमित्यर्थः, एवं च न वृत्तिवाक्ययोः समानार्थत्वभङ्गः। हरिपद्यमेतत्समानार्थकं पुञ्जराजेनाप्येवमेव व्याख्यातम्, अनेन तुल्यन्यायात् सर्वत्र वृत्त्यर्थप्रदर्शकवाक्ये एवमेवेति सूचितम्। तथा च 'तद्वहति' सूत्रभाष्ये वहत्यर्थे रथादिभ्यः प्रत्ययविधानमनर्थकम्, 'तस्येदम्' इति विहितत्वादित्युक्त्वा वोढेति द्रव्यप्रधानं वहतीति क्रियाप्रधानमित्याशयेनान्यः शब्दो रथं वहत्यन्यो रथस्य वोढेति, तेन न सिध्यतीत्याशङ्क्यार्थसामान्यात् सिद्धं, य एवार्थो रथं वहति, स एव रथस्य वोढेति तद्वैयर्थ्यदार्ढ्यं कृत्वा 'द्विरथ्य' इत्यादौ यतो लुङ् मा भूदित्येतदर्थं तदिति सिद्धान्त उक्तः, इदमर्थे प्रत्यये तु तस्य प्राग्दीव्यतीयत्वेन 'द्विगोर्लुक्' इति लुक् स्यात्, अयं तु न प्राग्दीव्यतीय इति न लुक्, य एवार्थ इत्यादेः—रथ्यस्य विग्रहभूते रथं वहतीत्यत्र स एव तद्विग्रहभूते रथस्य वोढेत्यत्रेत्यर्थः, विग्रहाघटकतिङन्ते तु क्रियाप्राधान्यमेव, वृत्तिवाक्ययोः समानार्थत्वानुरोधात्, चित्रा गावो यस्येति विग्रहस्यापि चित्रगोस्वामीत्याकारबोधजनकत्वमङ्गीक्रियते, एवं 'प्राप्तोदक' इति समासः प्राप्तिकर्तृदककर्मेत्याकारकमेव बोधं जनयति, उदके विशेष्यभूते कर्मत्वनिरूपकत्वस्य बाधाद्विशेषणप्राप्तौ 'शिखी ध्वस्त' इतिवत्पर्यवसानम्। अत एव प्राप्तादिपदे विशेष्यविशेषणभावव्यत्यासकल्पनप्रयुक्तगौरवं न। अत एव पूर्वोत्तरपदयोः समानाधिकरण्यस्य बहुव्रीह्युपजीव्यस्य भङ्गः, पुंवद्भावानापत्तिश्च नेति वदन्तीत्यन्यत्र विस्तरः ॥३५॥

तथा विग्रहः = चित्रा गावो यस्येत्याद्याकारो विग्रहः। **अधिकरणसिद्धान्त इति।** निषादस्थपतिशब्दो लक्षणाविरहेण लाघवात् कर्मधारयो न तु षष्ठीतत्पुरुष इति तत्रत्यसिद्धान्त-

१. शक्तिः = विशिष्टशक्तिः, तथा = षष्ठ्यन्तेन। शक्तिमत्त्वं = विशिष्टशक्तिमत्त्वम्।

पर्य्यवस्यंश्चासौ शाब्दबोधश्च तस्माद् विदूरश्चासौ प्राक्क्षणश्च, तदानीन्तनलाघवमादायाधिकरणाविरोध इत्यर्थः। अयं भावः—'निषादस्थपति'पदस्य,—समासशक्तिपक्षे-निषादरूपे, निषादानाञ्च स्थपतौ, निषादस्वामिके पुरुषान्तरे चेत्येवं सर्वत्र शक्तत्वान्नानार्थत्वम्, तथाच,—'नानार्थे 'तात्पर्य्याद् विशेषावगति'रिति न्यायेन तत्कल्पनायां पदद्वयेन पूर्वोपस्थितार्थे एवोपस्थित्यादिलाघवात्तत्कल्प्यत"—इति।

❀ दर्पणः ❀

तथाहि—'निषादस्थपतिं याजये'दिति श्रूयते, तत्र 'निषादस्थपतिशब्दः किं षष्ठीतत्पुरुषो, बहुव्रीहिर्वा, उत कर्मधारयः? इति संशये कर्मधारयेऽपूर्वविद्याध्ययनकल्पनागौरवाद् बहुव्रीहौ वाक्यलक्षणायां गौरवाल्लाघवाभावात् षष्ठीतत्पुरुष एवेति पूर्वपक्षे—तत्पुरुषस्यापि पूर्वपदलाक्षणिकतया कर्मधारयापेक्षया गौरवाल्लाघवात् कर्मधार एव, अपूर्वविद्याध्ययनस्योत्तरकालकल्प्यत्वेन तादृशगौरवस्य फलमुखतया अदोषत्वादिति सिद्धान्तितम्,—तद् विरुध्येत, भवन्मते तत्पुरुषस्वीकारेऽपि गौरवानवकाशादिति भावः। **तदानीन्तनेति।** तादृशवाक्यजन्यशाब्दबोधाव्यवहितप्राक्क्षणवृत्तिशक्तिग्रहनिष्ठान्तरङ्गबहिरङ्गभावचिन्तनप्रयुक्तलाघवमादायेत्यर्थः।

तदेव विशदयति—**अयम्भाव इति। निषादरूप इति**—'स्थपता'वित्यनेनान्वितम्। **निषादानामिति।** निषादसम्बन्धिस्थपतावित्यर्थः, तत्र षष्ठ्यर्थसम्बन्धान्तर्भावेणैकार्थीभावाऽभ्युपगमात्। **निषादस्वामिक इति।** 'स्थपति'शब्दस्य स्वाम्यर्थकतया निषादाभिन्नस्वामिके पुंसीत्यर्थः, तत्रान्यपदार्थान्तर्भावेण समुदायशक्तिस्वीकारात्। 'नानार्थं' इत्यस्य 'वृत्त्यानेकार्थोपस्थितौ जाताया'मिति शेषः। 'न्यायेने'त्यस्य-"क्व तात्पर्यमिति सन्देहे सति'। तत्कल्पनायाम्=तात्पर्यकल्पनायाम्। **पूर्वोपस्थितार्थ एवेति।** समासघटकप्रत्येकपदशक्त्युपस्थापिता-

❀ काशिका ❀

रतत्सिद्धिर्विशिष्टशक्तिस्वीकारे न स्यादुभयत्रापि शक्त्यविशेषादित्यर्थः। ननु शक्तिग्रहेऽन्तरङ्गत्वमित्याद्यसंगतमुभयत्रापि शक्तिग्रहस्य तुल्यकालत्वादित्यत आह—**अयं भाव इति।** **निषादस्वामिके इति।** निषादः स्थपतिः स्वामी यस्येति बहुव्रीहिपक्षे इत्यर्थः, 'स्थपति'शब्दः स्वामिपर्यायः। **सर्वत्र शक्तत्वादिति।** तात्पर्यसत्त्वे निषादसंबन्धिस्वाम्यादेरपि बोधोत्पत्तेस्तत्रापि शक्तिरावश्यकी, सति तात्पर्ये परमतेऽपि लक्षणया तद्बोधस्योत्पत्तेरिष्टत्वादिति भावः, एतच्चात्रैव समनन्तरं वक्ष्यति। तत्कल्पनायां=तात्पर्यकल्पनायाम्। **पूर्वोपस्थितार्थ एवेति।**

[१] नानार्थवाचके हर्यादौ, तात्पर्यात्=वक्तृतात्पर्यात्, विशेषस्य=विवक्षितार्थस्य। अवगतिः=निश्चयः।

परेषामपि सति तात्पर्य्ये,–'यष्टीः प्रवेशये'तिवल्लक्षणाया दुर्वारत्वात्—

❀ दर्पणः ❀

र्थमात्रविषयककर्मधारयीयशक्तिग्रहस्यान्तरङ्गत्वेन प्रथमोपस्थितार्थ एवोपस्थितिलाघवान्निषादस्थपतिशब्दस्य तात्पर्य्यमवसीयते, तेन विशेषावगतिः, न तु वहिर्भूतपदार्थविषयकशक्तिग्रहोपस्थापिते, तदुपस्थितेर्विलम्बितत्वादित्याखण्डलार्थः। निरुक्तव्यपेक्षैव सामर्थ्यं मूलकृदभिप्रेतमित्यर्थे इदमपि प्रमाणम्, अन्यथा जहत्स्वार्थवृत्तिपक्षे पदानामानर्थक्यात् प्रत्येकपदवृत्त्यार्थोपस्थितेरसम्भवेन क्व तन्मूलकशक्तिग्रह इति तस्यान्तरङ्गत्वकथनमसङ्गतमेव स्यादिति बोध्यम्। तत् = तात्पर्यं, कल्प्यते = अवधार्यते। ननु 'संयोगो विप्रयोगश्चे'त्यादिना हरिणा–संयोगादीनां विशेषावगतिहेतुत्वं बोध्यते, तत्कथं तात्पर्य्यस्य विशेषावगतिहेतुत्वमिति चेन्न, नानाशब्दोपस्थितानेकेषु संयोगादिनैकस्मिन्नवधारिते तात्पर्ये विशेषावगतिरिति 'शब्दार्थस्याऽनवच्छेद' इति भावाऽर्थस्य वक्ष्यमाणत्वात् संयोगादीनां तात्पर्य्यग्राहकतायामेवोपयोगेन तात्पर्य्यस्य विशेषावगतिहेतुत्वं सर्वसम्मतमेवेति भावः।

ननु प्रत्येकपदवृत्तिपक्षेऽनायासेनैवाधिकरणसिद्धान्तोपपत्तौ विशिष्टशक्तिपक्षे तादृशसिद्धान्तसमर्थने क्लेशो दुष्परिहर एवेत्यत आह—**परेषामपीति**। प्रवेशयेतिवदिति। तात्पर्य्यस्यैव लक्षणानियामकतया सत्सत्त्वे वाक्यलक्षणया समासान्तरबोधस्य दुर्वारतया तात्पर्य्याभावेनैव तदवगतेर्वारणीयत्वादित्यर्थः। ननु, 'निषादस्थपतिं याजये'दित्यत्र 'स्थपति'शब्दः स्वामिपर्य्यायः, श्रेष्ठपर्यायो वा, उभयथाप्यसौ गुणवचनः, तस्य च जातिवचन'निषाद'पदेन कर्मधारये तत्र गुणवचनस्यैव पूर्वनिपातनियमेन स्थपतिनिषादमिति प्रसज्येत, न तु 'निषादस्थपति'मिति स्यात्। किञ्च उभयथापि स्थपतिशब्दार्थस्य नित्यं सम्बन्धिसापेक्षत्वेन षष्ठीसमास एव न्याय्यो, न तु कर्मधारय इति कथमुक्तसिद्धान्तसङ्गतिः।

❀ काशिका ❀

निषादरूपस्थपतावेव निषादसंबन्ध्यपेक्षया तदुपस्थितेः प्रथमत एवोत्पत्तेः। एवं च शक्तिनिर्णायकतात्पर्यग्रहेऽन्तरङ्गत्वादिकं पर्यवस्यति, कर्मधारयशक्तिग्रहापेक्षया षष्ठीतत्पुरुषशक्तिग्रहस्य षष्ठ्यर्थरूपाधिकविषयत्वेन गौरवमित्यपि बोध्यम्। उपस्थित्यादीत्यादिपदेन वा तद् ग्राह्यम्। जैमिनिरप्याह—'स्थपतिनिषादः स्याच्छब्दसामर्थ्या'दिति। निषादाभिन्नः स्थपतिरेव निषादस्थपतिशब्दबोध्यः, अन्तरङ्गत्वेन तथाविधेऽर्थे शीघ्रोपस्थितिजनकत्वानुकूलशक्तिरूपसामर्थ्यादिति तदर्थः। ननु मीमांसकमते समासे शक्त्यभावात् कथं तन्नानार्थमत आह—**परेषामिति**। **सति तात्पर्ये इति**। षष्ठीतत्पुरुषाद्यर्थे तात्पर्ये सतीत्यर्थः। **यष्टीः प्रवेशयेतिवदिति**। तत्र यथा मुख्यार्थान्वयानुपपत्त्यभावेऽपि तात्पर्यानुपपत्त्या यष्टिधरलाक्ष-

तात्पर्यमेव कल्प्यकोटावविशिष्यत इति दिक् ॥ ३६ ॥

ॐ इति वैयाकरणभूषणसारे समासशक्तिनिरूपणम् ॥५॥ ॐ

ॐ दर्पणः ॐ


प्रकृतेपीत्यत आह—दिगिति। तदर्थस्त्वत एवास्वरसा 'लिङ्गदर्शनाच्चे'ति सूत्रं हेत्वन्तरोपसङ्ग्राहकं प्रणीतं महर्षिणा, तच्च शबरस्वामिना—"कूटं हि निषादानामेवोपकारकं नार्याणामेवञ्च तन्निषादानामेव स्व"मिति भाष्ये व्याख्यातम्। तथाच कूटदक्षिणालिङ्गात् कर्मधारयत्वे निर्णीते स्थपतिशब्दस्य राजदन्तादित्वात् परनिपातो बोध्यः, सम्बन्धाकाङ्क्षानिवृत्तिरप्यर्थतो निषादानां स्वत्वलाभादुपपद्यते। एवं लाघवादिविचारस्तु कथञ्चित् सम्भवमात्रेणेति सर्वमनवद्यम् ॥३६॥

ॐ इति समाशक्तिनिरूपणम् ॥५॥ ॐ

ॐ काशिका ॐ

णिकत्वमेवं प्रकृतेऽन्वयानुपपत्त्यभावेऽपि षष्ठीतत्पुरुषाद्यर्थे तात्पर्यानुपपत्त्या लक्षणा दुर्वारेत्यर्थः 'चिन्तन'मित्यस्य 'नासंगत'मिति शेषः। स्थपतिशब्दस्य गुणशब्दत्वं, निषादशब्दस्य 'अम्बष्ठः शूद्र्यां निषादो जातः पारशवोऽपि वे'ति स्मरणादनुलोमजातिविशेषवाचित्वम्। तथा च कर्मधारयस्थपतिशब्दस्य पूर्वनिपातापत्तिस्तु न शङ्क्या, राजदन्तादित्वेन परनिपातात्। अथ संवन्ध्यंशे नित्यसाकाङ्क्षत्वेन षष्ठीतत्पुरुष एव युक्त इति चेन्न, जैमिनिना 'लिङ्गदर्शनाच्च' इति हेत्वन्तराभिधानात्। लिङ्गं च दृश्यते कूटं दक्षिणेति। कूटं हि निषादानामेव स्वमिति शाबरभाष्यमिति दिक् ॥ ३६ ॥

इति समासशक्तिनिरूपणम् ॥



※ शक्तिनिर्णयः ※

शक्तिप्रसङ्गात्तस्याः स्वरूपमाह—

※ दर्पणः ※

प्रसङ्गादिति। 'समासे खलु भिन्नैव शक्ति'रिति ग्रन्थेन स्मृतायाः शक्तेरनुपेक्षणीयत्वादिति भावः। अगृहीतवृत्तिकात् पदात् पदार्थोपस्थितेः शाब्दबोधस्य चादर्शनात्तद्धर्मावच्छिन्नविषयकशाब्दबुद्धिं प्रति तद्धर्मावच्छिन्नार्थनिरूपितवृत्तिविषयकपदज्ञानं करणं, वृत्त्या पदजन्यपदार्थोपस्थितिर्व्यापारः, तां विना तदनुत्पत्तेः, न तु वृत्तिमत्त्वेन ज्ञातं पदम्, अतीतानागतशब्दानुसन्धानाच्छाब्दबोधाऽनुदयप्रसङ्गात्, वृत्तिश्च शक्तिलक्षणाभेदाद् द्विविधा, तत्रार्थे पदसङ्केतः शक्तिः, स चे'दं पदमिममर्थं बोधयतु' इति पदविशेष्यकेच्छात्मकः, 'अस्मात् पदादयमर्थो बोध्य' इत्याकारपदार्थविशेष्यकेच्छारूपो वा, विनिगमकाभावात्। तया चार्थबोधकं पदं—'वाचक'मिति व्यवह्रियते। शास्त्रकारादिसङ्केतः परिभाषा, तया चार्थबोधकं 'परिभाषिक'मिति व्यवह्रियते—नदीवृद्ध्यादिपदम्। लक्षणा तु शक्यसम्बन्धः, तत्कल्पिका तु मुख्यार्थबाधोन्नीततात्पर्यानुपपत्तिः, तथाहि—'गङ्गायां घोष' इत्यत्र गङ्गापदस्य घोषाभाववत्प्रवाहार्थकत्वेन तीरतात्पर्यकत्वे उन्नीते तात्पर्यविषयतीरस्मृतिं विनानुपपद्यमानेन तीरशाब्दबोधेन तत्स्मृतिराक्षिप्यते, सा च गङ्गापदवृत्तिं विनानुपपद्यमाना तज्ज्ञानमाक्षिपति, तद्विषया गङ्गापदनिरूपिता वृत्तिर्न शक्तिस्तस्यास्तत्राभावादतस्तीरस्मारिका काचिदन्यैव वृत्तिः कल्प्यते, सा च गङ्गापदशक्यसामीप्यरूपैव, तेन रूपेण गृह्यमाणा तीरं स्मारयत्यनुभावयति च, शक्यादशक्योपस्थितिस्तु न लक्षणा, उपस्थितिहेतोस्तस्यास्तत्त्वासम्भवात्, नापि स्वबोध्यसम्बन्धः, समासशक्तिनिरूपणोक्तयुक्तेः।

नन्वीश्वरेच्छाया शक्तित्वासम्भवः, घटपदस्यापि पटे शक्तत्वप्रसङ्गाद्, घटपदात् पटो बोद्धव्य इतीच्छाया विषयतया पटेऽपि सत्त्वात्, यदि चेश्वरेच्छीयघटपदजन्यबोधविषयत्वप्रकारतानिरूपितविशेष्यत्वं शक्तिरिति न पटपदेऽतिप्रसङ्गः, तद्विषयत्वेऽपि तादृशविषयत्वनिष्ठप्रकारतानिरूपितविशेष्यत्वस्य तत्रानभ्युपगमादित्युच्यते, तदापि गङ्गापदात्तीरबोधस्यापि जायमानत्वेन सन्मात्रविषयकेश्वरेच्छीयगङ्गापदजन्यबोधविषयत्वप्रकारतानिरूपितविशेष्यत्वस्य तीरे सत्त्वाच्छक्त्यैव निर्वाहे—कृतं लक्षणयेति चेन्न, गङ्गापदवाच्यत्वव्यवहारस्य तीरादावसत्त्वेन गङ्गापदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वसम्बन्धेन ईश्वरेच्छीयगङ्गादिपदानां प्रवाहादौ शक्तिस्तीरनिष्ठविशेष्यतायाश्च गङ्गादिपदजन्यबोधविषयत्वप्रकारता-

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥ ३७ ॥

❀ दर्पणः ❀

निरूप्यत्वेऽपि न तस्मात्तादृशविषयतात्वेन तादृशप्रकारतानिरूपितत्वमपि तु शुद्ध-विषयतात्वेनैवेत्यभ्युपगमाच्च तथा लक्षणान्यथासिद्धिर्नाऽपि विषयत्वलक्षणसम्बन्धस्य पदे जन्यजनकभावे च सत्त्वेऽपि तत्रातिप्रसङ्गः । तत्र लक्ष्योपस्थितिनियामकः सादृश्यात्मकः सम्बन्धो गौणी, तदतिरिक्तस्तु शुद्धलक्षणेति व्यवह्रियते । शुद्धाप्युपादान-लक्षणभेदेन द्विविधा, तत्र मुख्यसंसृष्टान्यार्थोपस्थापकत्वमुपादानत्वम् । शक्याविषयकलक्ष्यार्थोपस्थितिजनकत्वं लक्षणत्वम् । 'यष्टीः प्रवेशय', 'गङ्गायां घोष' इत्यादिके यथायथमुदाहरणे । तत्राऽप्याद्याऽजहत्स्वार्थाऽन्त्या च जहत्स्वार्थेत्युच्यते । तद्भेदान्तराणि त्वन्यतोवधार्य्याणीति नैयायिका आहुः ।

मीमांसकास्तु—उक्तयुक्त्या लाक्षणिकपदस्य वाचकत्वपरिहारेपि नेश्वरेच्छायाः शक्तित्वम्, ईश्वरस्यैवानभ्युपगमात् । नन्विच्छाया ईश्वरीयत्वमनुपादेयम्, एवं चाधुनिकसङ्केतज्ञानादपि शाब्दबोधोदयेन तादृशसङ्केतस्य वृत्तितानिर्वाहः । आधुनिकसङ्केतत्वेन तात्पर्य्यस्यापि वृत्तित्वप्रसङ्गस्तु न, पदार्थोपस्थितिनियामकसङ्केतस्यैव वृत्तित्वेन तस्यातत्त्वात् । तज्ज्ञानस्य साक्षादेव शाब्दधीजनकतया पदार्थोपस्थित्यात्मकव्यापाराऽनपेक्षणाद् । वृत्त्युपस्थापितार्थ एव प्रकरणादिना तदवधारणात् । आधुनिकसङ्केतितडित्थादिपदेषु त्वाधुनिकसङ्केतस्य प्रागवधारितस्य डित्थादिव्यक्तिशाब्दधीजनकपदार्थोपस्थितौ नियामकत्वेन तद्वृत्तित्वस्य सौलभ्यादिति चेदेवमपि सङ्केतस्य निष्प्रतियोगिकतया तदीयोक्तविषयत्वस्याप्यापातरमणीयतया सम्बन्धित्वासम्भवेन पदार्थानुपस्थापकत्वाद्वृत्तित्वानिर्वाहात् । तस्मात् पदपदार्थयोर्वाच्यवाचकभावनियामकः सम्बन्धः पदार्थान्तरमेव । नाप्यसौ समवेतः । अभावादावपि सत्त्वात् । किन्तु वैशिष्ट्याख्येन सम्बन्धान्तरेण वर्त्तत इत्याहुः ।

'वाच्यत्वं यथा न समवायि तथा वक्ष्यत' इति वदता दीधितिकृतापि तन्मतमेवाऽनुसृतम् ।

तदेतन्नानामतानि निराकर्त्तुमादौ तत्स्वरूपप्रदर्शनमित्याशयेन मूलमवतारयति—**तस्याः स्वरूपमिति** । तस्याः—शक्तेः = निर्विषयाणां तेषां कथं घटादि-

❀ काशिका ❀

तस्याः = शक्तेः । 'अनादिर्योग्यते'त्यत्र न आदिर्यस्याः सेत्यर्थो बोद्धव्यः । सैव शक्तिरिति । बोधकारणतारूपैव शक्तिरित्यर्थः । परे तु—"अर्थासंबद्धस्य शब्दस्यार्थविषयकबोधजनकत्वस्यानुपपत्त्याकल्प्यमानशक्तिरूपसंबन्धस्य बोधजनकत्वरूपत्वं न संभवति, आत्माश्रयापत्तेः । शाब्दबोधरूप-

इन्द्रियाणां = चक्षुरादीनां, स्वविषयेषु = चाक्षुषेषु घटादिषु यथाऽनादिर्योग्यता = तदीयचाक्षुषादिकारणता तथा—शब्दानामपि—अर्थैः सह तद्बोधकारणतैव योग्यता, सैव शक्तिरित्यर्थः। ननु न बोधकारणत्वमनादिभूतं शक्तिः, आधुनिकदेवदत्तादिपदे तदभावात्, अन्यथा पित्रा-

❀ दर्पणः ❀

विषयोऽत आह—चाक्षुषेति। तथाचौपचारिकविषयत्वं न विरुद्धमिति भावः। चाक्षुषपदं त्वाचादिप्रत्यक्षस्याप्युपलक्षणम्, इन्द्रियनिष्ठचाक्षुषादिकारणतायामनादित्वम्—इन्द्रियजन्यपूर्वपूर्वबोधध्वंसकालिकत्वं, न त्वजन्यत्वम्, अव्यावर्त्तकत्वात्। शब्दनिष्ठबोधकारणतायां तु—स्वजन्यबोधसमानाकारपूर्वपूर्वबोधध्वंसवत्त्वम्। तद्बोधकारणता = अर्थबोधकत्वम्। 'ज्ञायमानं पदं करण'मभिप्रेत्येदम्, अन्यथा विषयतायां तादृशहेतुतावच्छेदकतेत्यर्थो बोध्यः।

सङ्केतज्ञानं विनोक्तशक्तिग्रहासम्भवेनावश्यापेक्षणीयतया तस्यैव शक्तित्वमस्तु, 'तद्धेतोरेवे'ति न्यायादित्याशङ्कते—नन्विति। तस्याऽशक्तित्वे हेतु'राधुनिके'त्यादि। आधुनिके = एतत्कालिकसङ्केतविशिष्टे। तदभावात् = निरुक्तानादित्वविशेषणविशिष्टबोधकारणत्वाभावादित्यर्थः। विशेष्यसत्त्वेपि प्रकृते विशेषणाभावप्रयुक्तविशिष्टाभावसत्त्वेन तदप्रतियोगित्वरूपकारणत्वं न सम्भवतीत्यर्थः। नन्वनादि भूतमिति प्रसिद्धिप्रदर्शनमात्रार्थकं, न तु तच्छक्तिशरीरे प्रविष्टं, येन तद्रूपेण तस्य हेतुता सम्भाव्येत, किन्तु बोधकारणत्वत्वेनैव, प्रकृते तेन रूपेण तज्ज्ञाने बाधकाभाव इति चेत्स्यादेवं यदि सङ्केतग्रहमन्तरेणैव तद्ग्रहो भवेन्न तु तत् सम्भवतीत्याह—अन्यथेति। सङ्केतनिरपेक्षस्यैव तस्य शाब्दबोधहेतुत्वे इत्यर्थः।

❀ काशिका ❀

फलोपधायकत्वान्यथानुपपत्त्या शाब्दबोधस्वरूपयोग्यतात्मकतत्कारणतारूपा शक्तिः कल्प्यत इत्यभ्युपगमे नोक्तदोष इति चेत्, तथापि प्रमाणानां जनकत्वतद्घटितातिरिक्तसंबन्धस्यैव प्रमितिप्रयोजकत्वस्य क्लृप्ततयेह जनकत्वस्य तथात्वकल्पनमनुचितम्, अन्यथा वह्न्याद्यनुमितिजनकत्वमेव धूमादिनिष्ठं वह्निधूमयोः संबन्धः स्यात्, विशिष्टप्रतीतिनियामकस्यैव संबन्धतया जनकत्वस्य तदनियामकतया संबन्धत्वासंभवश्च, इच्छायास्तद्विषयत्वस्य च विशिष्टप्रतीतिनियामकत्वाभावेन संबन्धत्वासंभवो बोध्यः, तस्मात् पदार्थान्तरं शक्ति''रित्याहुः। नैयायिकः शङ्कते—नन्विति। इयं शङ्का 'पदार्थान्तरं शक्ति'रिति पक्षेऽपि बोध्या। आधुनिके = आधुनिकसंकेतिते। तदभावात् = अनादिशक्तेरभावात्, तथा च ततः शाब्दबोधो न स्यात्। ननु तत्र शक्त्यभावे मानाभावोऽत आह—अन्यथेति। अन्यथा = तत्र शक्तिसत्त्वे। पित्रादिसंकेतेति। यदि तत्र शक्तिः स्यात्तर्हि पित्रादिसंकेतज्ञानस्य तद्ग्राहकतया संकेतज्ञानशून्यसमयेऽपि तद्ग्राहकसामग्री-

दिसङ्केताज्ञानेप्यन्वयबोधप्रसङ्गो लाक्षणिकातिव्याप्तेश्चेति-सङ्केतज्ञानमपि हेतुर्वाच्यं, तथाचावश्यकत्वात्स एव शक्तिरस्तु, स चाधुनिके पित्रादेर्गवादौ चेश्वरस्य चेति चेत्, अत्रोच्यते—सङ्केतो न स्वरूपेण हेतुः, अगृहीतशक्तिकादर्थबोधप्रसङ्गात्, नापि सामान्यतो ज्ञातः, प्रमेयत्वादिना तज्ज्ञानेपि बोधप्रसङ्गात्, नापि सङ्केतत्वेन तज्ज्ञानं हेतुः, गवादिपदेष्वपी-

※ दर्पणः ※

लाक्षणिकेति। तत्राप्यनादिभूतबोधजनकत्वव्यवहारादिति भावः। **आवश्यकत्वादिति।** अवश्यापेक्षणीयज्ञानविषयत्वादित्यर्थः। **स एव** = सङ्केत एव। 'एव'कारेण बोधकत्वव्यवच्छेदः।

सङ्केतस्य स्वरूपतः, सामान्यतो, विशेषरूपेण वा हेतुत्वमभिमतमिति विकल्प्य दूषयति—**उच्यत इति। स्वरूपेणेति।** 'स्वस्य यद्रूप'मिति व्युत्पत्त्या स्वासाधारणधर्मेण—सङ्केतत्वेनेत्यर्थः। दण्डत्वेन घटे दण्ड इव ज्ञानाविषय एव सङ्केतत्वेन हेतुरिति यावत्। **अगृहीतशक्तिकादिति।** अज्ञातसङ्केतादित्यर्थः। **अर्थबोधप्रसङ्गादिति।** सङ्केतस्य तत्र विद्यमानत्वादिति भावः। **सामान्यत इति।** जनकाजनकसाधारणरूपेणेत्यर्थः। **सङ्केतत्वेनेति।** ईश्वरीयसङ्केतत्वा-

※ काशिका ※

सत्त्वेन तद्ग्रहापत्तिः, न चेष्टापत्तिः, तद्ग्रहरूपकारणघटितसामग्र्या शाब्दबोधापत्तेरित्यर्थः। तथा च योग्यानुपलब्धिरेव तदभावे मानमिति भावः। **लाक्षणिकेति।** तस्यापि बोधजनकतया तत्राप्यनादिशक्तिप्रस[ङ्ग इत्य]र्थः। **संकेतज्ञानमिति।** संकेतस्येश्वरेच्छारूपस्य तीरादौ लक्ष्ये गङ्गापदजन्यबोधविषयत्वसत्त्वेपि न गङ्गापदजन्यबोधविषयत्वत्वेन तीरांशे गङ्गापदजन्यबोधविषयत्वप्रकारकत्वमीश्वरेच्छाया उपेयते, किं तु शुद्धविषयत्वत्वेनैव, तावतैव भगवदिच्छायाः सर्वविषयकत्वाव्याघातात्, तथा च तत्पदजन्यबोधविषयत्वत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबन्धेन भगवदिच्छारूपसंकेतप्रकारकज्ञानस्य शक्तिग्रहे हेतुत्वाङ्गीकाराल्लाक्षणिके तथाविधसंकेतज्ञानाभावेन शक्तिज्ञानासंभवेन शाब्दबोधोपपत्तये लक्षणाग्रहस्य हेतुत्वं कल्प्यते, एवं च शक्तिग्राहकाभावेन लाक्षणिके तत्सद्भावे मानाभावेन न शक्तिरिति भावः। **आधुनिके पित्रादेरिति।** तत्र विशिष्य 'चैत्रादिपदजन्यबोधविषयो जायता'मिति भगवत्संकेताभावात्—तादृशसंकेतग्राहककोशाद्यभावात्। 'द्वादशेऽहनि पिता नाम कुर्या'दिति सङ्केतस्तु न विशिष्य तत्तत्पदविषयक इति सोऽकिंचित्कर इति सङ्केतमात्रं शक्तिरिति भावः। **स्वरूपेण हेतुरिति।** स्वरूपसन् हेतुरित्यर्थः।

अगृहीतशक्तिकादिति—बहुव्रीहिः,—पदमन्यपदार्थः, तत्पुरुषेणागृहीतशक्तिकादपि पदात्पुरुषस्य शाब्दबोधापत्तिः, तद्धेतुशक्तेः सत्त्वादित्यर्थः। **सामान्यतो ज्ञातः** = येन केनचिद्रूपेण

श्वरादेः सङ्केतत्वेन तज्ज्ञानशून्यानां लौकिक-मीमांसकादीनां तत्तदर्थबोध-जनकत्वग्रहवतामेव बोधोदयेन व्यभिचारात्।

नचार्थधीजनकतावच्छेदकत्वेन तज्ज्ञानं तथा, ततोपि लाघवेनार्थ-

※ दर्पणः ※

दिना विशेषधर्मेणेत्यर्थः। तज्ज्ञानशून्यानामिति। सङ्केते ईश्वरीयत्वमविदुषामित्यर्थः। 'लौकिकमीमांसकानामिति। वैदिकानां तेषां कथञ्चिदीश्वरबोधसम्भवादुक्तं—'लौकिके'ति। अथवा—लौकिकानां = व्यावहारिकपदार्थमात्रविषयकज्ञानवतां—पामराणामिति यावत्, मीमांसकानां चेत्यर्थः। 'बोधोदयेनेति। सङ्केतत्वेन तज्ज्ञानमात्राद् गवाद्यर्थबोधोदयेनेत्यर्थः। यद्यपि सङ्केतत्वेन सङ्केतज्ञानकारणतावादिमते नेश्वरीयत्वादेर्निवेशस्तथापि 'गवादावीश्वरस्ये'ति तद्ग्रन्थालोचनयेश्वरीयत्वादेर्निवेशस्तदभिमत इत्यभिप्रेत्य दूषितमिति ध्येयम्। 'तत्तदर्थधीजनकग्रहवतामेवे'त्येवकारेण निरुक्तसङ्केतज्ञानवत्त्वव्यवच्छेदः। स च 'तज्ज्ञानशून्याना'मित्यस्यैवानुवादः, 'एव'शून्यपाठस्तु सुगमः। इदञ्च शक्तिग्रहरूपकारणप्रदर्शकम्।

तज्ज्ञानं = सङ्केतज्ञानम्। तथा = हेतुः। ततोपीति। अर्थधीजनकतानिरूपितविषयतासम्बन्धावच्छिन्नावच्छेदकत्वस्यावच्छेदकत्वापेक्षयार्थधीजनकता–त्वेन हेतुताया औचित्येन वैयाकरणेष्टसिद्धेरित्यर्थः। सङ्केतज्ञानस्येदम्पदमर्थ-

※ काशिका ※

ज्ञातः। तज्ज्ञाने इति। ईश्वरादिसङ्केते इत्यर्थः। लौकिकेति। लौकिकाश्च मीमांसकादयश्चेत्यर्थः, लौकिकपदेन पामरा निरीश्वरवादिनो मीमांसका अत्र बोध्याः, आदिपदेन बौद्धादयः। ननु तेषामीश्वरसङ्केतत्वेन ज्ञानासंभवेऽपि संकेतत्वेन तज्ज्ञानं संभवत्येवेत्यत आह—तत्तदर्थबोधजनकत्वग्रहवतामेवेति। एवेन—सङ्केतत्वप्रकारकज्ञानव्युदासः, तथा च सङ्केतत्वज्ञानासत्त्वेऽप्युक्तज्ञानाच्छब्दबोधोत्पत्त्या व्यभिचारात्संकेतत्वेन ज्ञानमपि न हेतुरिति भावः। अर्थधीजनकतेति। अयं भावः—बोधजनकत्वं बोधजनकत्वयोग्यता, सा च तदवच्छेदकधर्मवत्त्वं, स च क्लृप्तत्वादीश्वरादिसंकेत एव, तस्य संकेतत्वेन ज्ञानस्य व्यभिचाराद्धेतुत्वासंभवेऽपि बोधजनकतावच्छेदकत्वेन ज्ञानस्य हेतुत्वं संभवत्येव, व्यभिचाराभावादिति। तज्ज्ञानं = संकेतज्ञानम्। लाघवेनेति। जनकतावच्छेदककोटावर्थधीजनकतावच्छेदकत्वस्यानिवेशेन लाघवम्। सङ्केतज्ञानादेवेति। 'एव'शब्दस्तदर्थबोधजनकत्वग्रहव्यावर्तकः। अस्य = तदर्थबोधजनतावच्छेदकत्व-

१ लिखितपुस्तके 'लौकिकमीमांसकाना'मिति प्रतीकात्पूर्वमेव 'बोधोदयेने'तिप्रतीकव्याख्यानमस्ति, तथापि मूलानुसारेण यथास्थानं निवेशः कृतोऽस्माभिः।

घोजनकतात्वेनैव हेतुतायामस्मत्पक्षसिद्धेः, न चाधुनिकदेवदत्तादौ सङ्केत-ज्ञानादेव बोधेनास्य व्यभिचारः, तत्रापी'दम्पदमेनमर्थं बोधय'त्वितीच्छा-ग्रहे पदे तदर्थबोधकत्वस्यावगाहनेन व्यभिचाराभावात्। नच स्वातन्त्र्येणा-र्थबोधकताज्ञानं कारणं वाच्यम्, अन्यथा'नेदं तद्धीजनक'मिति ज्ञानवतो-'ऽस्माच्छब्दादयमर्थो बुद्धोनेने'ति जानतस्तद्ग्रहापत्तेरिति वाच्यं, 'नेदं

ॐ दर्पणः ॐ

धीजनकतावच्छेदकताव'दित्याकारकस्यार्थधीजनकतावच्छेदकत्वावच्छिन्नप्रकारताकज्ञा-नत्वेन हेतुत्वे गौरवात्—'इदं पदमर्थधीजनक'मिति ज्ञानस्यैवार्थधीजनकतात्वावच्छिन्न-प्रकारताकज्ञानत्वेन हेतुत्वमुचितं, लाघवादिति भावः। वस्तुतस्तु तन्मते सङ्केतत्वे-नैव हेतुतेति नोक्तविकल्पावसर इति बोध्यम्। 'सङ्केतज्ञानादेवे'त्येवेनार्थधीजन-कत्वग्रहव्युदासः। अस्य = बोधकत्वग्रहस्य। व्यभिचारो—व्यतिरेके। तत्राऽपि= सङ्केतमात्रादर्थबोधस्थलेपीत्यर्थः। **इच्छाग्रह इति**। इदम्पदविशेष्यकैतदर्थ-बोधकत्वप्रकारकेच्छाग्रहे इत्यर्थः। **अवगाहनेनेति**। विषयीकरणेनेत्यर्थः। ज्ञानेच्छादिविषयकज्ञानस्य तद्विषयकत्वनियमादिति भावः। **स्वातन्त्र्येणेति**। इतराविशेषणत्वेनेत्यर्थः। प्रकृते चेच्छांशे विषयितया विशेषणीभूतबोधकत्वस्यैव तज्ज्ञानेन विषयीकरणादिति भावः। **अन्यथेति**। पारतन्त्र्येणापि बोधकता-ज्ञानस्य शाब्दधीहेतुत्व इत्यर्थः। इष्टापत्तिनिरासायाह—**नेदं तद्धीजनक-मितीति। अस्माच्छब्दादिति**। 'एतच्छब्दजन्यैतदाशयकबोधविषयोयमर्थ' इत्याकारकवर्त्तमानग्रहवत इत्यर्थः। पदविशेष्यकार्थधीजनकत्वबोधग्रहे विद्यमाने तदंशेर्थधीजनकत्वावगाहिनः,—'इदं पदमेतदर्थधीजनकत्वेन बुद्धमनेने'ति ग्रहस्या-सम्भवात्तदपहाया'स्मा'दित्याकारकबोधग्रह उक्तः। एतस्मिंस्तु न तस्य प्रतिबन्धकता, ग्राह्याभावानवगाहित्वादिति भावः। **तद्ग्रहापत्तेरिति**। घटादिशाब्दबोधा-पत्तेरित्यर्थः। उक्तज्ञानस्य विषयविषयकत्वेपि न तेन पदांशेर्थबोधकत्वं विषयी-क्रियते, येन तस्य शक्तिग्रहत्वं स्यात्, किन्तु बोधांशे तत्पदजन्यत्वमर्थांशे तादृश-

ॐ काशिका ॐ

ग्रहस्य। **अवगाहनेनेति**। सविषयकेच्छादिज्ञानस्य स्वविषयेच्छादेर्यदंशे यत्प्रकारकत्वं तदंशे तत्प्रकारकत्वमिति नियमेन तादृशेच्छाज्ञानस्य पदेऽर्थबोधजनकत्वप्रकारकत्वस्याक्षतेरिति भावः। **स्वातन्त्र्येणेति**। इतराविशेषणत्वेनेत्यर्थः। अत्र तु प्रकारत्वांशे तस्य विशेषणत्वं, बोधजन-कत्वप्रकारकत्वस्येच्छायां प्रकारत्वादिति भावः। **अन्यथा** = स्वतन्त्रास्वतन्त्रसाधारणतज्ज्ञान-मात्रस्य हेतुत्वे। **तद्ग्रहापत्तेरिति**। अर्थग्रहापत्तेरित्यर्थः, तत्रापि नञर्थाभावे विशेषणतया बोध-जनकत्वस्यावगाहनात्। बाधेन = पदे बोधजनकत्वाभावनिश्चयेन। पदे परेति। 'इदम्पदमेतदर्थबोध-

तद्धीजनक'मिति ग्रहवतो बाधेन पदे परग्रहं ज्ञानतोपि तद्ग्रहासम्भवात् । अन्यथा भ्रान्तिज्ञस्यापि भ्रान्तत्वापत्तेरिति ।

॥ दर्पणः ॥

बोधविषयत्वमेव तथा । तेन तुल्यवित्तिवेद्यतया पदांशेर्थबोधकत्वमप्यवगाह्यत इति तु दुर्वचं, तुल्यवित्तिवेद्यत्वे मानाभावात्, तत्प्रतिबन्धकस्य ग्राह्याभावावगाहिनो 'नेदं तद्धीजनक'मिति ज्ञानस्य जागरूकत्वाच्च । न च पदनिष्ठार्थधीजनकत्ववदर्थनिष्ठपदजन्यबोधविषयत्वमपि शक्तिर्विनिगमनाविरहात्, उभयविधज्ञानाच्छाब्दबोधस्य सर्वानुभवसिद्धत्वाच्च, कार्य्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशाच्च न परस्परजन्यशाब्दबोधे व्यभिचारः, एवञ्च द्वितीयशक्तिग्रहरूपात्तस्माच्छाब्दबोधापत्तिः सुकरेति वाच्यं, तथा सति, 'नेदमर्थधीजनक'मिति ग्राह्याभावानवगाहिनोऽप्रतिबन्धकग्रहस्योपन्यासवैयर्थ्यात्, ग्राह्याभावानवगाहित्वेप्युभयविधशक्तिप्रत्यन्वयव्यतिरेकाभ्यां प्रतिबन्धकत्वोपगमेन तदुपन्यासस्य सार्थक्यसम्पादने तूक्तज्ञानस्यासम्भव एवेत्याशयेन दूषयति—नेदं तद्धीजनकमिति । बाधेन = अप्रामाण्यज्ञानानास्कन्दितनिरुक्तनिर्णयात्मकप्रतिबन्धकसद्भावेनेत्यर्थः––तद्ग्रहासम्भवात् = अर्थविशेष्यकपदजन्यबोधविषयत्वग्रहासम्भवादित्यर्थः । अन्यथेति । बाधग्रहेपि जायमानस्य–'रजतं बुद्धमनेने'ति ग्रहस्य इदंविशेष्यकरजतप्रकारकग्रहत्वे । 'भ्रान्तिज्ञस्ये'त्यनेन दोषाभाववत्त्वमपि सूच्यते । भ्रान्तत्वापत्तेरिति । तदभाववति तदवगाहिज्ञानवत एव तत्त्वादिति भावः । अत्रेदञ्चिन्त्यम्—यत्रे'दं पदमेतदर्थं बोधय'त्विति सङ्केतमात्राच्छाब्दबोधस्तत्र बोधकताशक्तिज्ञानस्य हेतुतावादिमते व्यभिचारो दुरुद्धर एव, नच तत्र सङ्केतज्ञानमेव बोधकताज्ञानमित्युक्तमेवेति वाच्यं, सविषयकज्ञानस्य तद्विषयविषयकत्वेपि तद्विशेष्यांशे-तत्प्रकारो न तेन विषयीक्रियते, 'घटमहं जानामी'त्यनुव्यवसायेन ज्ञानांशेघटत्वप्रकारकत्वघटविशेष्यकत्वयोरेव विषयीकरणात्, अन्यथाऽभ्रान्तस्य भ्रान्तत्वापत्तिरनिवार्य्यैव स्यात्, अत एव शब्दचिन्तामणौ तात्पर्यविषयसंसर्गज्ञानपूर्वकत्वस्य पदपक्षकानुमानेन सिद्धावपि नेतरपदार्थेभिमतापरपदार्थसंसर्गसिद्धिस्तादृशसंसर्ग-

॥ काशिका ॥

जनक'मिति ज्ञानवानयमिति ज्ञानवतोऽपि । तद्ग्रहेति । पदेऽर्थबोधजनकत्वग्रहानुदयादित्यर्थः । अन्यथा = तदभावनिश्चयसत्त्वेऽपि तत्र तद्वत्तावगाहिज्ञानाभ्युपगमे । भ्रान्तत्वापत्तेरिति । भ्रान्तिज्ञस्य—'रजतत्वाभाववाञ्छुक्त्यादिः रजतत्वेन रूपेणानेन गृहीत' इति ज्ञानावश्यकत्वेऽपि रजतत्वाभाववच्छुक्तिविशेष्यकरजतत्वप्रकारकज्ञानसंभवात्तस्यापि रजतत्वभ्रमाश्रयत्वं स्यादिति भावः । ननु गङ्गापदेपि तीरबोधकत्वस्य सत्त्वेन तीरशक्तत्वमेव स्यादिति लक्षणोच्छेदापत्ति-

इदश्चार्थधीजनकत्वं पित्रादिसङ्केतज्ञानाद् गृह्यते,—अतस्तज्ज्ञानात् पूर्वं न बोधः।

नापि लाक्षणिकोच्छेदापत्तिः, इष्टत्वात्, शक्तिग्राहकव्यवहारस्य [1]मुख्यलक्ष्यसाधारण्यात्।

किञ्च प्रत्यक्षादिजन्योपस्थितेः शाब्दबोधानङ्गत्वाच्छाब्दबोधं प्रति शक्तिजन्योपस्थितेर्लक्षणाजन्योपस्थितेश्च कारणत्वं वाच्यं, तथाच कार्य-कारणभावद्वयस्य कल्पने गौरवं स्यात्, अस्माकं पुनः शक्तिजन्योपस्थिति-त्वेनैव हेतुतेति लाघवम्।

❀ दर्पणः ❀

ज्ञानपूर्वकत्वानुमानेन तत्पदार्थतात्पर्य्यविषयसंसर्गस्याविषयीकरणादित्यस्वरसात्—पदार्थपक्षकानुमानमवतारितं पक्षधरमिश्रैरिति।

शक्तिग्राहकमाह—**इदश्चेति**। शक्तित्वेनाभ्युपेतं बोधकत्वं चेत्यर्थः। 'पित्रादी'त्यादिनाप्तपरिग्रहः। पूर्वोक्तां लाक्षणिकोच्छेदापत्तिमिष्टत्वेन परिहरति—**नापीति**। **शक्तिग्राहकेति**। शक्ये इव शक्तिग्राहकव्यवहारादेर्लक्ष्येऽपि तुल्यत्वादित्यर्थः।

ननु शक्यलक्ष्यव्यवहारानुपपत्त्या लक्ष्यव्यावृत्तैव सा वाच्या, तथाच लक्ष्योपस्थितये लक्षणावृत्तेरावश्यकत्वेन कथमुक्तापत्तेरिष्टत्वमत आह—**किञ्चेति**। **शाब्दबोधानङ्गत्वादिति**। घटादिपदेऽगृहीतशक्तिकस्य प्रत्यक्षाद्युपस्थितघटादेः घटादिपदाच्छाब्दबोधानुदयादन्वयव्यभिचारेण प्रत्यक्षाद्युपस्थितेः शाब्दबोधाजनकत्वादित्यर्थः।

❀ काशिका ❀

स्तामिष्टापत्त्या परिहरति—**नापीति**। **साधारण्यादिति**। एवं च व्यवहारात्तत्रापि शक्तिग्रह एवेति भावः, एतेन—तत्र शक्तिग्राहककोशादेरभावान्न गङ्गापदादौ तीरादिनिरूपिता शक्तिरभिमतेति प्रत्युक्तं, शक्तिग्राहकशिरोमणेर्व्यवहारस्य सत्त्वात्, प्रसिद्ध्यप्रसिद्धिभ्यां मुख्यलक्ष्यव्यवहार उपपादनीयः। ननु व्यवहारस्य लक्षणाग्राहकतयोपपत्तौ गङ्गादिपदे तीरादिवाचकत्वमप्रामाणिकम्, 'अन्यायश्चानेकार्थत्व'मिति न्यायविरुद्धं च, अत एव गङ्गापदस्य तीरपर्यायमध्ये कोशे न पाठ इत्यत आह—**किं चेति**। **शाब्दबोधानङ्गत्वात्** = तथोपस्थितिसत्त्वेऽपि अगृहीतशक्तिकस्य पुंसस्तेन शब्देन शाब्दबोधाजननात्तस्यास्तदनङ्गत्वं बोध्यम्।

शक्तिजन्येति। शक्तिज्ञानजन्येत्यर्थः, एवमग्रेऽपि बोध्यं। 'ज्ञायमानवृत्तेरुपस्थितिहेतुत्व'मिति नये तु यथाश्रुतमेव साधु। **गौरवमिति**। ननु तीरादौ गङ्गादिपदवाच्यत्वव्यवहाराभावेन तत्र शक्तिस्वीकारोऽनुचित इति लक्षणाख्यं वृत्त्यन्तरमवश्यमभ्युपेयं, तथ च कार्यकारणभावद्वय-

१ मुख्यं = शक्यम्। एवञ्च लाक्षणिकार्थोच्छेदोऽस्तुनाम, का हानिरिति भावः।

अपिच लक्षणावृत्तिस्वीकारे कार्यकारणभावस्य प्रत्येकं व्यभिचारः, शक्तिजन्योपस्थितिं विनापि लक्षणाजन्योपस्थितितः शब्दबोधात्। नचाऽव्यवहितोत्तरत्वसम्बन्धेन तत्तदुपस्थितिमत्त्वं कार्यतावच्छेदकं, तत्तदुपस्थितित्वञ्च कारणतावच्छेदकम्,—अनन्तकार्यकारणभावप्रसङ्गात्।

❀ दर्पणः ❀

नन्वनायत्त्या तादृशगौरवं सोढव्यमत आह—**अपि चेति**। व्यभिचारो व्यतिरेके बोध्यः। तमेवोपपादयति—**शक्तिजन्योपस्थितिमिति**। **अव्यवहितोत्तरत्वेति**। तच्च स्वध्वंसाधिकरणक्षणानुत्पत्तिकत्वे सति, स्वाधिकरणक्षणध्वंसाधिकरणक्षणोत्पत्तिकत्वम्, अत्र 'स्व'पदं शक्तिज्ञानजन्योपस्थितिपरम्। लक्षणाज्ञानजन्यपदार्थोपस्थितिप्राग्वर्त्तिशक्तिज्ञानजन्यपदार्थोपस्थितिजन्यशाब्दबोधे व्यभिचारवारणाय—विशेष्यम्। शक्यशाब्दबोधानन्तरभाविलक्षणाज्ञानजोपस्थितिजन्यशाब्दबोधे व्यभिचारवारणाय—सत्यन्तम्। प्रकृते लक्षणाज्ञानजोपस्थितिजन्यशाब्दबोधे उक्तसम्बन्धेन शक्तिज्ञानजोपस्थितिवैशिष्ट्याभावेन तत्कार्यतावच्छेदकाक्रान्तत्वान्न व्यभिचार इति भावः। **अनन्तेति**। स्वत्वस्य तत्तद्व्यक्तिविश्रान्तत्वेनाननुगततया तद्घटिताव्यवहितोत्तरत्वसम्बन्धेनोपस्थितिमत्त्वस्य कार्य-

❀ काशिका ❀

कल्पनागौरवं न दोषायेत्यत आह—**अपि चेति**। अथवा तीरादिबोधजनकता गङ्गादिपदनिष्ठाप्रवाहबोधजनकतातो भिन्नेति निर्विवादमेव, एवं च तीरबोधजनकतायामपि शक्तित्वसंबन्धकल्पने तव मतेऽपि गौरवं, शक्यसंबन्धरूपलक्षणा तु कॢप्तैवेति न तत्कल्पनमधिकं, तज्जन्योपस्थितेः शाब्दबोधहेतुत्वमात्रं मया कल्प्यत इति नाधिकं गौरवं; बोधजनकतात्वं तु न शक्तित्वम्, अनुमानादिविधया बोधजनकत्वेऽतिप्रसङ्गात्, तदतिरिक्तजनकतात्वस्य शक्तित्वोक्तौ तु गौरवमन्यायश्चेति न्यायत्यागोऽपि नेत्याह—**अपि चेति**। **व्यभिचारः**—व्यतिरेकव्यभिचारः। तमुपपादयति—**शक्तीति**। **अव्येति**। समवायघटितसामानाधिकरण्यविशिष्टाव्यवहितोत्तरत्वसंबन्धेनेत्यर्थः। तेन चैत्रीयशक्तिजन्योपस्थित्यनन्तरं जायमानमैत्रीयशाब्दबोधस्याप्यव्यवहितोत्तरत्वसंबन्धेनोपस्थितिमत्त्वेन तदुपस्थितेर्मैत्रात्मन्यसत्त्वेऽपि न व्यभिचारः, मैत्रीयशाब्दबोधस्य चैत्रीयोपस्थित्यसमानाधिकरणत्वेन कार्यतावच्छेदकानाक्रान्तत्वात्, समानाधिकरण्यसंबन्धमात्रेण तत्तदुपस्थितिमत्त्वस्य कार्यतावच्छेदककोटौ निवेशे—पूर्वकाले, परकाले वोत्पन्ने तत्पुरुषीयलक्षणाजन्योपस्थितिजन्यशाब्दबोधे—शक्तिजन्योपस्थितेरव्यवहितपूर्वक्षणे तदात्मन्यसत्त्वेन व्यभिचार इत्यव्यवहितोत्तरत्वा'नुसरणम्, अव्यवहितपूर्वकालोत्पन्ने तथाविधशाब्दबोधे व्यभिचारो मा प्रसाङ्क्षीत्किन्तु 'त्तरत्व' निवेशनं, व्यवहितोत्तरकालोत्पन्ने बोधे व्यभिचारव्यावृत्तयेऽव्यवधानांशोपादानम्। **अनन्तेति**। उपस्थितीनामानन्त्येन तद्भेदेन कार्यकारणभावानन्त्यापत्तेरिति भावः। उक्तसंबन्धेन

किञ्च,—पदार्थोपस्थितिं प्रत्यपि शक्तिज्ञानत्वेन, लक्षणाज्ञानत्वेन च हेतुतेति व्यभिचारो गौरवञ्च प्राग्वदेव द्रष्टव्यम् ।

नचेदम्पदमेतदर्थबोधकमिति शक्तिज्ञाने कार्यकारणभावकल्पनेपि पदतदर्थभेदेनानेककार्य्यकारणभावकल्पने गौरवं तत्रापि समानम् , परस्पर-

---

ॐ दर्पणः ॐ

तावच्छेदककोटौ निवेशे कार्य्यकारणभावानन्त्यमिति भावः । न्यायसाम्यादाह— **किञ्चेति । प्राग्वदेवेति ।** शक्तिज्ञानं विनापि लक्षणाज्ञानात् पदार्थोपस्थितेः, एवं—लक्षणाज्ञानं विनापि शक्तिज्ञानात्पदार्थोपस्थितेस्तयोरुपस्थितिहेतुतायां परस्परं व्यभिचारः, अव्यवहितोत्तरत्वसम्बन्धेन तत्कारणवैशिष्टयस्य कार्य्यतावच्छेदककोटौ निवेशे च गौरवम्, तद्वदेवेत्यर्थः । ननु बोधकत्वशक्तिवादिनोपि 'गङ्गापदं प्रवाह-बोधक'मिति शक्तिग्रहाल्लक्ष्यार्थोपस्थितिशाब्दबोधयोरापत्तिवारणाय कारणतावच्छेदककुक्षौ तत्तदर्थनिवेश आवश्यकस्तथा च लक्षणावादिमते क्व गौरवमित्याशङ्क्य निराचष्टे—**नचेति । परस्परेति ।** गङ्गापदनिष्ठतीरबोधकत्वग्रहं विनापि तीरा-

ॐ काशिका ॐ

शक्तिज्ञानजन्योपस्थितिविशिष्टशाब्दत्वावच्छिन्नं प्रति तादृशोपस्थितित्वेन कारणता,—लक्षणा-जन्योपस्थितिविशिष्टशाब्दबोधं प्रति तथाविधोपस्थितित्वेन कारणतेति—कार्यकारणभावद्वयेनैवोपपत्तौ न तदानन्त्यप्रसक्तिरिति न शङ्क्यम्, उपस्थितेस्तत्तद्व्यक्तित्वेनोपादानमन्तराऽव्यवहितोत्तरत्वस्य निर्वक्तुमशक्यत्वात्, तथाहि-स्वध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सति, स्वाधिकरणक्षणध्वंसाधिकरणत्वमव्यवहितोत्तरत्वम्, इदं च द्वितीयतृतीयक्षणसाधारणं, क्षणद्वयस्य—स्वध्वंसाधिकरणीभूतो यः तृतीयक्षणस्तद्ध्वंसानधिकरणत्वात्, स्वाधिकरणभूतो यः क्षणः—प्रथमक्षणस्तद्ध्वंसाधिकरणत्वाच्च । चतुर्थादिक्षणव्यावृत्तये सत्यन्तस्य, स्वपूर्वक्षणव्यावृत्तये विशेष्यदलस्योपादानम् । अत्र स्वपदं न शक्तिजन्योपस्थितित्वादिना तथाविधोपस्थितिसामान्यपरं, सर्वस्यापि क्षणस्य स्वपूर्वकालोत्पन्नतथाविधोपस्थितिध्वंसाधिकरणक्षणध्वंसाधिकरणत्वेन तत्तदवच्छिन्नभिन्नत्वाभावात्, किं तु तत्तदुपस्थितिव्यक्तिपरम्, एवं चोपस्थितीनामानन्त्येन कार्यकारणभावानन्त्यं स्फुटमेव । **व्यभिचारः**—एकैकाभावे सत्यपरेणोपस्थितिजननात् । **गौरवं**—कार्यकारणभावद्वयकल्पने गौरवम् । पूर्वोक्तसंबन्धेन शक्तिज्ञानविशिष्टोपस्थितिं प्रति शक्तिज्ञानत्वेन कारणता, एवं—लक्षणाज्ञानविशिष्टोपस्थितिं प्रति लक्षणाज्ञानत्वेन कारणतोपगम्यते व्यभिचारवारणायेति चेदनन्तकार्यकारणभावकल्पनाप्रयुक्तमतिगौरवमित्यर्थः । तत्सूचयन्नाह—**प्राग्वदिति । पदतदर्थेति ।** पदं च, तदर्थश्च तयोर्भेदेनेत्यर्थः । **कल्पने गौरवमिति ।** घटपदधर्मिकघटरूपार्थबोधकत्वप्रकारकज्ञानत्वेन, कलशादिपदधर्मिकतादृशज्ञानत्वेन च घटविषयकोपस्थितित्वावच्छिन्नं प्रति कारणतेतिवत्—घटादिपदात्पटाद्युपस्थितेः परमते लक्षणाज्ञानजन्यत्वेनाभिमताया निर्वाहाय - घटादिपदधर्मिकस्य

व्यभिचारवारणायाव्यवहितोत्तरत्वघटितत्वे च' सुतरामिति वाच्यं, शक्तिभ्रमानुरोधेन तत्तत्पदतत्तदर्थभेदेन कार्य्यकारणभावानन्त्यस्य तवापि साम्यात्, लक्षणाकार्य्यकारणभावकल्पनागौरवं परं तवातिरिच्यते ।

अथ वृत्तिजन्योपस्थितित्वेनैव शाब्दबोधहेतुता, वृत्तिज्ञानत्वेन च पदार्थोपस्थितिकारणतेत्येवं मया वाच्यमिति चेन्न, शक्तिलक्षणान्यतर-

❀ दर्पणः ❀

दिपदनिष्ठतादृशशक्तिग्रहेण तीरबोधात्तयोः परस्परजन्यबोधे व्यभिचारप्रतिरोधायेत्यर्थः । **शक्तिभ्रमानुरोधेनेति** । गङ्गापदस्य तीरे शक्तिभ्रमदशायां तीरोपस्थित्यादेः सर्वमतसिद्धतया तवापि तत्तत्कारणतावच्छेदककोटौ तत्तत्पदतत्तदर्थनिवेशस्यावश्यकत्वादित्यर्थः । **तवेति** । लक्षणास्वीकर्त्तुरित्यर्थः । शक्तिज्ञानकारणतायां शक्तेरशक्तित्वेन निवेशे स्यादेवोक्तदोषः, किन्तु वृत्तित्वेनेति न तत्सम्भावनेत्याशङ्कते—**अथेति** । **वाच्यमितीति** । शक्तिजन्योपस्थिताविव लक्षणाज-

❀ काशिका ❀

पटाद्यर्थबोधकत्वप्रकारकज्ञानस्य पटाद्युपस्थितिं प्रति कारणताभ्युपेया; लक्षणाङ्गीकर्त्रा तु—घटादिपदधर्मिकपटाद्यर्थबोधकत्वप्रकारकज्ञानस्य पटाद्युपस्थितिं प्रति कारणत्वं न कल्प्यं, शक्तिसहकारेण घटादिपदात्पटादिबोधाजननादिति भावः । **तवापि**—वैयाकरणस्यापि । **व्यभिचारेति** । घटपदधर्मिकपटबोधकत्वज्ञानं विनापि पटपदधर्मिकपटबोधकत्वप्रकारकज्ञानात्, पटपदधर्मिकपटबोधकत्वज्ञानं विनापि घटपदधर्मिकपटबोधकत्वज्ञानाच्च पटशाब्दबोधजननादित्यर्थः । **अव्यवहितेति** कार्यतावच्छेदकस्याव्यवहितोत्तरत्वघटितत्वे चेत्यर्थः । तथा च स्वसामानाधिकरण्यविशिष्टस्वाव्यवहितोत्तरत्वसंबन्धेनैकैकज्ञानविशिष्टोपस्थितित्वावच्छिन्नं प्रति तत्तज्ज्ञानत्वेन हेतुत्वं स्वीकार्यम्, एवं तत्तदुपस्थितिकार्यतावच्छेदकशरीरेऽपि उक्तविशिष्टसंबन्धेन तत्तदुपस्थितिवैशिष्ट्यं निवेश्यमन्यथा व्यभिचारापत्तेरिति भावः । **सुतरामिति** । तथाविधज्ञानानामानन्त्येन कार्यकारणभावानन्त्यापत्त्यातिशयितं गौरवमिति सूचनाय प्रकर्षप्रत्ययः ।

शक्तिभ्रमेति । सर्वशब्दानां सर्वार्थवाचकत्वमनभ्युपगच्छतापि शक्तिभ्रमसहकृतघटपदेनापि पटबोधाङ्गीकारात्तन्निर्वाहाय घटपदधर्मिकपटशक्तिज्ञानत्वेन पटोपस्थितिं प्रति हेतुतावश्यं स्वीकार्येति तत्तत्पदं तत्तदर्थमन्तर्भाव्य कार्यकारणभावानन्त्यापत्तेस्तुल्यत्वादित्यर्थः । **लक्षणाकार्येति** । लक्षणाज्ञानकार्यकारणभावेत्यर्थः । **वृत्तिजन्योपस्थितित्वेनैवेति** । वृत्तिज्ञानजन्योपस्थितित्वेनैवेत्यर्थः, 'एव'शब्देन शक्तिज्ञानजन्योपस्थितित्वेन, लक्षणाज्ञानजन्योपस्थितित्वेन च हेतुत्वस्य च व्यवच्छेदः । **मया वाच्यमिति** । तथा मन्मतेऽपि एकैक एव कार्यकारणभाव

१ अतिशयितं गौरवमित्यर्थः ।

त्वस्य, शब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थसम्बन्धत्वस्य वा वृत्तित्वस्य कारणतावच्छेदकत्वाच्छक्तित्वमपेक्ष्य गौरवात्। शाब्दबोधहेतुतावच्छेदकपदार्थोपस्थितिहेतुवृत्तेरज्ञाने तद्घटितकार्य्यकारणभावग्रहस्याप्यसंभवात्।

अथ ममापि शक्तिज्ञानत्वेनैव हेतुता, शक्यसम्बन्धज्ञानरूपलक्षणायां

❀ दर्पणः ❀

न्योपस्थितावपि शक्तिलक्षणासाधारणवृत्तित्वावच्छिन्नजन्यत्वसत्त्वादिति भावः। **शक्तिलक्षणेति**। शक्तिभिन्नत्वे सति लक्षणाभिन्नं यत्तद्भिन्नत्वस्येत्यर्थः। **शाब्दबोधानुकूलेत्यादि**। शाब्दबोधजनिका या पदार्थोपस्थितिः = पदवृत्तिज्ञानजन्योपस्थितिस्तदनुकूलेत्यर्थः। कारणतावच्छेदकत्वे उभयसाधारणं दूषणमाह— **गौरवादिति**। अस्मदभिमतशक्तित्वमपेक्ष्य निरुक्तान्यतरत्वादेर्गुरुत्वादित्यर्थः।

द्वितीये दूषणान्तरमाह-**शाब्दबोधहेत्विति**। शाब्दबोधानुकूलत्वस्य तद्घसकत्वस्य कारणतावच्छेदकोपस्थित्यधीनत्वेन, तस्य च पदवृत्तिज्ञानजन्योपस्थितित्वात्मकतया तज्ज्ञानस्य स्वघटकवृत्तित्वज्ञानं विना असम्भवेन, कार्य्यकारणभाव एव दुर्घट इत्यर्थः। तथा च वृत्तित्वग्राहे शाब्दबोधपदार्थोपस्थित्योः कार्य्यकारणभावग्रहस्तद्ग्रहे च निरुक्तपदपदार्थसम्बन्धत्वरूपवृत्तित्वग्रह इत्यन्योन्याश्रयेणोक्तस्य वृत्तित्वासम्भव इति भावः। वस्तुतस्तु विजातीयपदार्थोपस्थितिजनकपदपदार्थयोः सम्बन्धः शक्तिः, वैजात्यस्य निवेशाच्च नाकाशोपस्थितिजनकसमवायादावतिव्याप्तिः, तादृशवैजात्यपरिचायकञ्च—'शाब्दबोधानुकूले'ति, न तु तेन रूपेणोपस्थितिर्निवेश इत्यन्तिमलक्षणस्यादुष्टत्वमिति। **ममापीति**। लक्षणाङ्गीकर्त्तुरपीत्यर्थः। **प्रवेशादिति**। तथाच लक्षणाज्ञानस्यापि शक्तिज्ञानत्वेन हेतुत्वेन

❀ काशिका ❀

इति न गौरवमिति भावः। **शाब्दबोधहेत्विति**। शाब्दबोधहेतुश्चासौ पदार्थोपस्थितिश्चेति कर्मधारयः, तथाविधोपस्थित्यनुकूलो यः पदपदार्थयोः संबन्धस्तत्त्वस्येत्यर्थः। गगनरूपार्थे शब्दस्य समवायसंबन्धेऽतिप्रसङ्गवारणायानुकूलान्तं संबन्धविशेषणमुपात्तम्, उक्तसमवायस्याप्याकाशोपस्थित्यनुकूलत्वादुक्तदोषस्तदवस्थ इति 'हेत्वन्त'विशेषणमुपस्थितेरुपात्तम्। **गौरवादिति**। शाब्दबोधजनकतात्वरूपशक्तित्वापेक्षया शक्तिलक्षणाभिन्नभेदात्मक—शक्तिलक्षणान्यतरत्वरूपवृत्तित्वस्य, शाब्दबोधेत्यादिरूपस्य च गुरुशरीरत्वादित्यर्थः। **पदार्थोपस्थितिवृत्तेरिति**। पदार्थोपस्थितिनिष्ठस्य शाब्दबोधहेतुतावच्छेदकस्य वृत्तिज्ञानजन्योपस्थितित्वरूपस्य। **असंभवादिति**। शाब्दबोधानुकूलत्वं—शाब्दबोधकारणत्वं, तस्य च कारणतावच्छेदकरूपाऽपरिचये दुर्ग्रहत्वेन, उक्तहेतुतावच्छेदकस्य दुर्ज्ञेयत्वेन च कार्यकारणभावग्रहस्यासंभवादिति भावः। **ममापीति**। अस्य 'मते'

शक्तेरपि प्रवेशादिति चेन्न, शक्तिज्ञानपदार्थोपस्थित्योः कार्य्यकारणभावे समानविषयत्वस्यावश्यकत्वात्, अन्यथा गङ्गातीरयोः सम्बन्धाग्रहवतो गङ्गापदशक्तिं जानतोपि 'गङ्गायां घोष' इति वाक्यात्तीरबोधप्रसङ्गः, शक्ति-

❀ दर्पणः ❀

लक्षणाज्ञानजन्यलक्ष्यार्थोपस्थित्यादौ शक्तिज्ञानस्य हेतुतायां व्यभिचार इत्यर्थः।

विषयसनिवेश्यैव यदि शक्तिज्ञानपदार्थोपस्थित्योः कार्य्यकारणभावः सम्भवेत्, तदा स्यादप्युक्तप्रकारः, स एव न सम्भवतीत्याह—**शक्तिज्ञानेति। आवश्यकत्वादिति।** तदर्थविषयकोपस्थितिं प्रति तदर्थनिरूपिततत्पदनिष्ठशक्तिज्ञानत्वेन हेतुताया अवश्यकल्प्यत्वादित्यर्थः। आवश्यकत्वमेवाह—**अन्यथेति।** शक्तिज्ञानपदार्थोपस्थित्योः कार्य्यकारणभावे समानविषयकत्वानिवेशे इत्यर्थः। 'सम्बन्धाग्रहवत' इत्युक्त्या लक्षणाज्ञानासत्त्वं बोधितम्। **गङ्गापदेति।** प्रवाहरूपार्थनिरूपितबोधकत्वशक्तिं गङ्गापदे जानत इत्यर्थः। **तीरबोधप्रसङ्ग इति।** तीरोपस्थितेस्तद्द्वारकशाब्दबोधस्य चापत्तिरित्यर्थः।

ननूक्तापत्तिवारणाय वृत्तिज्ञानजन्योपस्थितिशाब्दबोधयोरेव कार्य्यकारणभावे समानविषयकत्वं निवेश्यतां, कृतं वृत्तिज्ञानपदार्थोपस्थित्योः कार्य्यकारणभावे

❀ काशिका ❀

इति शेषः। **शक्तिज्ञानत्वेनैवेति।** न तु शक्तिज्ञानत्वेन, लक्षणाज्ञानत्वेन चेत्यर्थः। **हेतुतेति।** शाब्दबोधं प्रति, तदनुकूलपदार्थोपस्थितिं प्रति च हेतुतेत्यर्थः। तथा च नैयायिकादिनयेऽप्येकैक एव हेतुहेतुमद्भाव इति भावः। 'शक्यादशक्योपस्थितिर्लक्षणे'ति पक्षे लक्षणा न शक्तिघटिता, प्रवाहादिरूपो यो वस्तुतो गङ्गापदादिशक्यार्थस्तद्धेतुकतीराद्युपस्थितेरेव लक्षणात्वा), नचोक्तज्ञानस्योपस्थितिं प्रत्युपयोग इत्यत आह—**शक्यसंबन्धरूपेति।** अत्र शक्तेर्विशेषणविधयैव प्रवेशो, न तूपलक्षणतया, एवं च गङ्गापदशक्यप्रवाहसंवन्धितीरमित्याद्याकारक एव लक्षणाग्रहे हेतुर्न तु प्रवाहसंवन्धितीरमित्याद्याकारक इति भावः। **समानविषयत्वस्य** = तत्प्रवेशस्य, तद्विषयकोपस्थितौ तन्निष्ठविषयतानिरूपितशक्तिनिष्ठविषयताकज्ञानहेतुत्वस्यावश्यकत्वादिति पर्यवसितोऽर्थः। गङ्गापदशक्यसंवन्धि तीरमिति लक्षणाज्ञानस्य, शक्यसंवन्धसंसर्गकस्य गङ्गापदात्तीरमित्याकारस्य वा लक्षणाज्ञानस्य—तीरविषयकत्वे सति शक्तिविषयकत्वेऽपि—न तीरांशे शक्तिविषयकत्वमिति न शक्तिज्ञानविधया तीरोपस्थितिनिर्वाहकतासंभवः। अत्र 'शक्तिज्ञानपदार्थोपस्थित्यो'रित्युपलक्षणं,—शक्तिज्ञानशाब्दबोधयोरित्यपि बोध्यम्। समानविषयकत्वाप्रवेशे बाधकमाह—**अन्यथेति। संबन्धाग्रहेति।** तद्ग्रहदशायां तु 'प्रवाहो गङ्गापदशक्य' इति ज्ञानात्तीरबोध इष्ट एवेति तद्ग्रहानुसरणम्। ननु तद्विषयकोपस्थित्यादिकं प्रति तद्विषयकशक्तिज्ञानत्वेन हेतुत्वमनुपेयं, न तूक्तरूपेणेति—व लक्षणाज्ञानादनिर्वाहः, ? तस्यापि तीरविषयकत्वात्, उक्तशक्तिज्ञानादपत्तिश्च

ज्ञानस्य हेतोः सत्त्वात् । अपिच 'घटमानये'ति वाक्यं, हस्तिनश्च स्मरतो घटपदादिभ्यो घटादेर्गजाद्धस्तिपकस्य च समूहालम्बनस्मरणवतो घटानयनवद्धस्तिपकस्यापि शाब्दबोधापत्तिः, समूहालम्बनरूपायां पदार्थोपस्थितौ पदजन्यत्वसत्त्वात्, तथाच विषयतया शाब्दबोधं प्रति 'तदंशविषयकवृत्तिजन्योपस्थितिर्हेतुरिति वाच्यम्, एवञ्च लक्षणाया अपि शक्तिज्ञानत्वेन हेतुत्वमसम्भवदुक्तिकमिति ।

एतेन—शक्तिप्रयोज्यैवोपस्थितिर्हेतुरिति न लक्षणाज्ञाने कार्यकारण-

❀ दर्पणः ❀

तन्निवेशेनेत्यत आह—**अपिचेति** । हस्तिपकस्मृतेर्वृत्तिज्ञानजन्यत्वसम्पत्तये हस्तिनोपि वाक्यीयस्मृतिविषयता दर्शिता । 'समूहालम्बने'त्यत्रा'लम्बन'पदं विषयपरम् । **वृत्तिजन्योपस्थितिरिति** । तद्विषयकत्वावच्छिन्नवृत्तिज्ञाननिष्ठकारणतानिरूपितजन्यतावच्छेदकधर्मावच्छिन्नोपस्थितिरित्यर्थः । उक्तस्थले हस्तिपकोपस्थितेर्वृत्तिज्ञानजन्यत्वेपि न तन्निष्ठा जन्यता हस्तिपकविषयत्वेनावच्छिद्यते, नापि वृत्तिज्ञाननिष्ठजनकतायां हस्ती विषयत्वेनावच्छेदको वृत्तिज्ञाने धर्मित्वेनाभानादिति नोक्तापत्तिः । एवं च वृत्तिज्ञानोपस्थितिशाब्दबोधानां समानविषयकत्वेन हेतुहेतुमद्भावः फलतीति भावः । **एतेनेति** । द्विविधवृत्तिज्ञानस्यैकरूपेण हेतुत्वा-

❀ काशिका ❀

न, तस्य तीराविषयकत्वादित्याशङ्क्याह—**अपि चेति** । प्रथमस्मरणस्य,—घटमानयेति वाक्यविषयकत्वानुसरणं;—वक्ष्यमाणस्मरणस्य घटविषयकत्वस्य पदजन्यत्वस्य च संपत्तये । तस्य हस्तिपकविषयकत्वसंपत्तये हस्तिविषयकत्वमनुससार । गजवाक्योभयविषयकप्रत्यक्षस्यासंभवात्—स्मरत इति । वस्तुतस्तु स्मरणस्यैकत्वमित्यत्र न निर्भरः, क्रमिकस्मरणद्वयादपि वक्ष्यमाणसमूहालम्बनस्मरणनिर्वाहात्, एवं सति वाक्यस्य क्रमिकानेकवर्णघटितानेकपदघटितस्य प्रत्यक्षं न संभवतीति स्मरणमनुसृतम् । अत एव हस्तिनोऽपि तदेवादृतं, कल्पनालाघवात् । **वृत्तिजन्यत्वेति** । शक्तिज्ञानजन्यत्वसत्त्वादित्यर्थः । वृत्तिजन्यत्वोत्कीर्तनं तु वृत्तिजन्योपस्थितित्वेन हेतुत्वपक्षेऽपि दूषणमाविष्कर्तुमिति बोध्यम् । **एतेनेति** । उक्तस्थले हस्तिपकस्य शाब्दबोधापत्तिरूपदूषणेन ।

ननु शक्तिज्ञानप्रयोज्यतावच्छेदकविषयतासंबन्धेन तथाविधोपस्थितेर्विषयतासंबन्धेन शाब्दबोधे हेतुत्वमभ्युपेयतेऽतो नोक्तसमूहालम्बनस्मरणाद्धस्तिपकशाब्दबोधापत्तिः, हस्तिपकनिष्ठविषयताया घटपदशक्तिज्ञानप्रयोज्यतावच्छेदकत्वाभावात्, घटनिष्ठविषयतायास्तु—घटपदशक्तिज्ञानप्रयोज्यतावच्छेदकत्वादुपपद्यते घटस्य शाब्दबोधविषयत्वं, तीरादिनिष्ठविषयताया अपि गङ्गापदीयलक्षणात्मक-

१ तदंशविषयकेति । हस्तिपकादेरपि वृत्तिजन्यैवोपस्थितिरावश्यकीत्यर्थः ।

भावान्तरं ममापीति परास्तम्। प्रयोज्यत्वस्यानतिप्रसक्तस्य दुर्वचत्वाच्चे-

ॐ दर्पणः ॐ

सम्भवेन, वक्ष्यमाणदूषणेन वेत्यर्थः। **शक्तिप्रयोज्येति**। लक्षणाज्ञानस्य शक्तिज्ञानाधीनत्वेन तज्जन्योपस्थितौ शक्तिप्रयोज्यत्वसत्त्वान्न लक्षणावादिमते हेत्वन्तरकल्पनेत्यर्थः। **अनतिप्रसक्तस्येति**। जन्यजन्यत्वस्य लक्षणाज्ञानजन्योपस्थिताविव विशेषणतावच्छेदकप्रकारकनिर्णयविधया शक्तिज्ञानजन्यशक्यवानित्याकारकविशिष्टवैशिष्ट्यावगाह्यनुव्यवसायात्मकोपस्थितावपि सत्त्वात्तद्विषयस्यापि शाब्दबोधापत्तिः। साक्षाज्जन्यत्वस्य तत्स्वरूपत्वे लक्षणाज्ञानजन्योपस्थित्यसंग्रहः, उभयसाधारणस्य निर्वक्तुमशक्यत्वात्, स्वरूपसम्बन्धस्य तस्योभयसाधारण्यं तु-सुतरां सम्भावितमिति भावः। अन्यथासिद्धिनिरूपकतानवच्छेदकशक्तिज्ञानोत्तरवर्तितावच्छेदकधर्मवत्त्वरूपं शक्तिप्रयोज्यत्वमुभयसाधारणं सुवचमित्यन्ये। अधिकमग्रे वक्ष्यते।

अत्र वदन्ति--अर्थबोधजनकत्वस्य वस्तुतः पदनिष्ठस्य वाच्यवाचकव्यवहारनियामकशक्तित्वसम्भव एवोक्तकार्यकारणभावे गौरवलाघवादिचर्चा, न तु तस्य तद्रूपत्वसम्भवः, तथाहि-शाब्दबोधं प्रति वृत्तिज्ञानस्य हेतुतेति निर्विवादम्, सा च भवदुक्तार्थधीजनकत्वस्य वृत्तित्वे न सम्भवति, तद्रूपायास्तस्याः शाब्दधीजनकतायामनवच्छेदकत्वात्, आत्माश्रयेण स्वस्यैव स्वावच्छेदकत्वासम्भवात्। किञ्च प्रयोज्यप्रयोजकव्यवहारद्रष्टृप्रयोज्यप्रवृत्त्यनुमिते प्रयोज्यघटानयनादिज्ञाने उपस्थितत्वाच्छाब्दस्यैव हेतुतायामबाधाय्यमाणायामसम्बद्धस्य कारणत्वानुपपत्त्या कल्प्यमानसम्बन्धस्य जनकत्वात्मकत्वासम्भवः, स्वयमनुपपद्यमानत्वेन गृहीतस्य ग्रही-

ॐ काशिका ॐ

शक्तिज्ञानप्रयोज्यतावच्छेदकत्वस्याक्षततया गङ्गापदात्तीरोपस्थित्या तीरस्य शाब्दबोधविषयत्वोपपत्तिरिति चेन्न, हस्तिपकनिष्ठविषयताया अपि हस्तिपकपदधर्मिकशक्तिज्ञानप्रयोज्यतावच्छेदकत्वे नोक्तस्थले तस्य शाब्दबोधापत्तेर्दुर्वारत्वात्।

ननु तत्तच्छब्दविषयकशक्तिग्रहप्रयोज्यतावच्छेदकत्वं विषयतायां निवेश्यमतो नोक्तदोषोऽत आह--प्रयोज्यत्वस्येति। अनतीति। 'घटपदं घटशक्त'मिति शक्तिग्रहवतः पुंसो घटाद्घटोपस्थितौ तेन स्वसमवाय्युपस्थिताकाशस्य घटपदजन्यशाब्दबोधविषयत्वापत्तिः, तत्रापि घटपदशक्तिग्रहप्रयोज्यतावच्छेदकविषयतासंबन्धेन तथाविधोपस्थितेः सत्त्वादिति भावः।

न च शक्तित्वावच्छिन्नसांसर्गिकविषयतानिरूपितपदनिष्ठप्रकारतानिरूपितार्थनिष्ठविशेष्यताकज्ञानत्वेन शाब्दबोधहेतुत्वं स्वीक्रियते, शक्तिसंबन्धेन शक्यसंबन्धेन वा पदप्रकारकार्थविशेष्यकज्ञाने शक्तेः संसर्गत्वात्, शक्तित्वनिष्ठावच्छेदकतापर्याप्तेरनिवेशाच्छक्यसंबन्धेन पदप्रकारकज्ञानस्यापि संग्रहः, शक्तिसंबन्धावच्छिन्नप्रतियोगिताकपदाभावप्रकारकनिश्चयप्रतिबध्यत्वं तु-शक्यसंबन्ध-

ॐ दर्पणः ॐ

-तुमशक्यत्वात्, तस्मान्न बोधकत्वं शक्तिः, एवं न्यायमताभ्युपेता 'ऽस्मात्पदादेतदर्थं-विशेष्यकबोधो भव'त्वित्याकारकेश्वरेच्छाविषयत्वस्यापि सङ्केतीयगङ्गापदजन्यत्व-प्रकारतानिरूपितबोधत्वावच्छिन्नोद्देश्यकतानिरूपितविशेष्यत्ववृत्त्यवच्छेदकताधेयता-सम्बन्धावच्छिन्नावच्छेदकत्वपर्यवसितस्य न शक्तित्वं, लक्षणोच्छेदापत्तेः, गङ्गा-पदात्तीरबोधोदयेन 'गङ्गापदात्तीरबोधो भव'त्वितीच्छाया अपि भगवतः सम्भवात्, तादृशेच्छीयनिरुक्तावच्छेदकताया लक्ष्ये तीरेऽपि सम्भवात्, तादृशा-वच्छेदकतात्वेन शाब्दे शक्तिज्ञानस्य कारणताकल्पने गौरवाच्च, "तीरादिनिष्ठावच्छेद-कतायाः पूर्वोक्तविशेष्यत्ववृत्त्यवच्छेदकतानिरूपितत्वेपि न विशेष्यवृत्त्यवच्छेद-कतात्वेन तन्निरूप्यत्वं, किन्तु शुद्धावच्छेदकतामात्रेणेति न तादृशशक्तिस्तीरे" इति तु शिष्यप्रतारणामात्रम्, इच्छाविषयत्वं, ज्ञानविषयत्वं वा शक्तिरिति विनिगमना-विरहाच्च। तस्मात् पदपदार्थयोर्वाच्यवाचकभावव्यवहारनियामकः सम्बन्धः पदार्थान्तरमेव, तस्य च लक्ष्यव्यावृत्तस्यैव धर्मिग्राहकमानसिद्धत्वाल्लक्ष्यबोधार्थं शक्यसम्बन्धरूपलक्षणावृत्तेरपि स्वीकार आवश्यकः, तज्ज्ञानस्य शाब्दबोधे हेतुत्वा-न्तरकल्पनप्रयुक्तगौरवं तु फलमुखत्वान्न दोषावहम्, अन्यथानुपपत्तेश्च। अत एव शक्यलक्ष्यव्यवहारः स्वरसतः सङ्गच्छते।

अथवा शक्तिलक्षणाज्ञानयोः शाब्दरूपं प्रत्येकरूपेणैव हेतुता, तथाहि— तच्छाब्दं प्रति शक्तित्वावच्छिन्नसांसर्गिकविषयतानिरूपितपदनिष्ठप्रकारतानिरूपित-तदर्थविशेष्यताकज्ञानत्वेन हेतुता। शक्तिसम्बन्धेन शक्यसम्बन्धेन वा पदप्रकारक-ज्ञाने शक्तेः संसर्गत्वात्। शक्तित्वनिष्ठावच्छेदकतायां पर्याप्तेरनिवेशेन शक्य-सम्बन्धसंसर्गकज्ञानस्यापि केन क्रोडीकरणात्। परन्तु,—पदनिष्ठप्रकारतानिरूपित-तादृशसांसर्गिकविषयतायामर्थविशेष्यतानिरूपितत्वानभ्युपगमान्न शक्तिसम्बन्धेन पदाभावप्रकारकबुद्धिप्रतिबध्यत्वं लक्षणाज्ञानस्य।

ॐ काशिका ॐ

-संसर्गकपदप्रकारकज्ञानस्य न, पदप्रकारतानिरूपितशक्तिनिष्ठसांसर्गिकविषयताया अर्थनिष्ठविशेष्य-तानिरूपितत्वाभावात्, तन्निष्ठविशेष्यतानिरूपिततत्संबन्धनिष्ठसांसर्गिकविषयतानिरूपिततन्निष्ठप्रका-रताकबुद्धिं प्रत्येव तद्धर्मिकतत्संबन्धावच्छिन्नप्रतियोगिताकतदभावनिश्चयस्य प्रतिबन्धकत्वात्, अन्यथा संयुक्तसमवायसंबन्धेन घटवत्ताबुद्धिरपि संयोगेन घटाभावनिश्चये सति न स्यात्। इत्थं च न लक्षणाज्ञानस्य शाब्दबोधं प्रति पृथक्कारणत्वकल्पनापत्तिः, न वोक्तसमूहालम्बनस्मरणा-द्धस्तिपकस्य शाब्दबोधापत्तिः, न वाकाशस्योक्तस्थले शाब्दबोधापत्तिश्चेति वाच्यं, शक्तिसमान-कालिकपटपदसमवायसंबन्धेन घटपटप्रकारकाकाशादिविशेष्यकज्ञानादाकाशादेः शाब्दबोधापत्तेर्दु-वारत्वात्, न चेष्टापत्तिः, अननुभवात्, परम्परासंबन्धस्तु न लक्षणात्वेन वृद्धसंमतः, अत एव

॥ दर्पणः ॥

'इन्द्रियाणा'मित्यादिहरिपद्यस्य त्वयमर्थः–इन्द्रियाणां चाक्षुषादिविषयेषु घटादिषु पुरुषप्रयत्नानपेक्षा यथा योग्यता तदीयचाक्षुषादिकारणतावच्छेदकरूपास्ति, तथार्थैः साकमपि पादानां सम्बन्धो योग्यता,–तच्छाब्दबोधजनकतावच्छेदकधर्मो, न तु जनकत्वमेवोक्तयुक्तेरिति न तद्विरोधोपीति सर्वमनवद्यमिति ।

तद्ग्राहकं च––व्याकरणस्मृत्यादि, तदुक्तम्—

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥' इति ।

तत्र व्याकरणादिकं लाघवसहकृतमेव शक्तिग्राहकमिति नैयायिकमतम्, यतो लाघवसहकृतेन 'लः कर्मणी'ति सूत्रेण कृतावेव शक्तिः परिच्छिद्यते, न तु कर्त्तरीति, यथैतत्तथोक्तम् । एवं,–'गुणे शुक्लादय' इति कोशेनापि लाघवसहकृतेन गुण एव शक्तिर्निर्द्धार्य्यते, न तु गुणिनि, गौरवात्, गुणिबोधस्तु शुक्लादिपदेभ्यो निरूढलक्षणयैवेति च तदुक्तेः । निरूढत्वं च प्राङ्निरुक्तम् ।

उपमानस्य तु–सादृश्यज्ञानात्मकस्यातिदेशवाक्यार्थस्मृतिद्वारा 'गवयादिर्गवयादिपदवाच्य' इति शक्तिपरिच्छेदकत्वम् ।

'इदमेतद्वाचक'मित्याकारकाप्तवाक्यादपि तद्ग्रहः, आप्तत्वं च तदर्थविषयकयथार्थज्ञानवत्त्वम् । व्यवहाराद् यथा–प्रयोजकवृद्धेन 'घटमानये'त्युक्ते प्रयोज्यवृद्धेनानीते घटे—पार्श्वस्थो,–घटकर्मकानयनादिकार्यं घटकर्मकानयनादिज्ञानसाध्यमित्यनुमिमीते, व्यवहारे व्यवहर्त्तव्यज्ञानस्य हेतुत्वात्, अनन्तरं तद्धेतुजिज्ञासायामुपस्थितं तद्वाक्यमेव तद्धेतुत्वेनावधारयति, तस्य चार्थासम्बद्धस्य तद्धेतुत्वानुपपत्त्यार्थेन साकं पश्चाद् वाक्यस्य सम्बन्धमवधारयति, सैव 'शक्ति'रिति व्यवह्रियते ।

यद्यपि प्रथमं तेन वाक्यस्यैव वाक्यार्थेऽवधारितः सः, तथापि 'घटं नय, गामानये' त्यावापोद्वापाभ्यां पश्चाज्जातप्रत्येकपदशक्तिग्रहेण प्रागुजातवाक्यशक्तिग्रहे चन्द्रादेज्योतिःशास्त्राध्ययनजन्यशतयोजनादिपरिमाणग्रहेण पाश्चात्येन प्राथमिकाल्पपरिमाणग्रह इवाप्रामाण्यं गृह्यते इति–नैयायिकाः । प्रत्येकपदशक्तिग्रहेणैवाकाङ्क्षादिसहकृतेन वाक्यार्थबोधोपपत्तेरिति तदाशयः । अन्ये तु वाक्यार्थशक्तिग्रहस्य प्रत्येकपदशक्त्युपजीव्यत्वात्तेनैतद्बाधासम्भवेन प्रागुजातशक्तिग्रहस्यैव बलवत्त्वमित्याहुः ।

॥ काशिका ॥

काव्यप्रकाशकृद्भिः—'बाधो योगः फलेन नो' इत्युक्तम्, अन्यथा शैत्यपावनत्वादावपि तीरस्य स्वसंयुक्तसमवेतत्वरूपपरम्परसंबन्धस्य सत्त्वेन तदसंगतिः स्पष्टैव । ननु शक्यसंबन्धज्ञानादेव यत्र तीरोपस्थितिस्तत्र सर्वानुभवसिद्धबोधनिर्वाहाय लक्षणाज्ञानकारणत्वकल्पनं शाब्दिकस्यावश्यक-

❀ दर्पणः ❀

वाक्यशेषात्तु,—'यवैर्जुहोती'त्यत्र यवपदस्य दीर्घशूकविशिष्टे आर्याणां प्रयोगात्, कङ्गौ म्लेच्छानां प्रयोगात्, क्व शक्तिरिति सन्देहे, यत्रा'न्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्ती'ति वाक्यशेषेण दीर्घशूकविशिष्टे तन्निर्णयः विवरणस्य–यथा शक्तिग्राहकत्वं तथा धात्वर्थनिरूपणे उक्तम्। 'इह सहकारतरौ मधुरं पिको रौती'त्यादौ प्रसिद्धसहकारादिपदसन्निधानात्—पिकादिपदानां कोकिलादौ शक्तिपरिच्छित्तिरिति।

सैषा शक्तिर्नानार्थेषु संयोगादिना नियम्यते, तदुक्तं 'काव्यप्रकाशे'—

संयोगो, विप्रयोगश्च, साहचर्यं, विरोधिता।
अर्थः, प्रकरणं, लिङ्गं, शब्दस्याऽन्यस्य सन्निधिः।
सामर्थ्यमौचिती, देशः, कालो, व्यक्तिः, स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥' इति।

शब्दार्थस्यानवच्छेदे = सन्देहे, तन्निरासद्वारा विशेषनिर्णयस्य जनकाः—संयोगादय इति तदर्थः। शक्त्योपस्थितानामनेकेषामेकतरमात्रार्थतात्पर्यनिर्णयद्वारा तत्तदर्थबोधजनकत्वं तेषामिति भावः। तत्र–'सवत्सा धेनुः' 'अवत्सा धेनु'रिति क्रमेण संयोग—विप्रयोगयोरुदाहरणे। साहचर्यं = सादृश्यम्, सदृशयोरेव प्रायशः सहप्रयोगात्, एवञ्च 'रामलक्ष्मणा'वित्यादावुभयोर्नानार्थयोर्युगपदेव साहचर्यग्रहाधीनतात्पर्यग्रहेण विशेषावगतिरिति नान्योन्याश्रयः। 'रामार्जुनगतिस्तयो'रित्यादौ विरोधेन सा। 'अञ्जलिना जुहोति''अञ्जलिनादित्यमुपतिष्ठते' इत्यादौ 'धात्वर्थ'वशात्तदाकाराञ्जलिपरत्वम्। 'सैन्धवमानये'त्यादौ तु भोजनादिरूपप्रकरणेन सा। 'अक्ताः शर्करा उपदधाती'त्यादौ 'तेजो वै घृत'मित्यादिस्तुतिरूपा'लिङ्गा'दक्तपदस्य घृतसाधनाञ्जने तात्पर्यावगतिः। 'रामो जामदग्न्य' इत्यादौ जामदग्न्यपदसन्निधानेन रामपदस्य परशुरामपरता। एवम'भिरूपाय कन्या देये'त्यत्राऽभिरूपतरायेति 'सामर्थ्या'दवगम्यते। 'यश्च निम्बं परशुने'त्यत्रौचित्यात्' परशुपदस्य छेदनार्थत्वम्। 'भात्यत्र परमेश्वर' इत्यत्र राजधानीरूप'देशा'त् परमेश्वरपदस्य–राजपरत्वम्। 'चित्रभानुर्भाती'त्यत्र चित्रभानुपदं रात्रौ वह्नेर्दिवा सूर्य्यस्य बोधकम्। 'मित्रं भाति,' 'मित्रो भाती'त्यादौ व्यक्तेर्लिङ्गादाद्ये सुहृदोऽन्त्ये सूर्यस्य बोधकं मित्रपदम्। 'स्थूलपृषतीमनड्वाही'मित्यत्र स्वरा'त्

❀ काशिका ❀

मिति परमतेऽपि न प्राक्तनगौरवावकाश इति चेन्न, तत्रापि गङ्गापदं तीरबोधकमिति ज्ञानान्तरमेव तीरशाब्दबोधाङ्गीकारात्। न च तादृशज्ञानव्यक्तिकल्पनागौरवम्, फलमुखत्वेन तस्यादोषत्वात्। अन्ये तु—वस्तुतस्तु सुषुप्त्यपगमक्षणमारभ्य पुनस्तदुत्पत्तिक्षणपर्यन्तं प्रत्यक्षात्मगुणोऽवश्यं

❀ दर्पणः ❀

तत्पुरुषबहुव्रीह्यर्थनिर्णयः। 'आदि'पदात् षत्व-णत्वादि। यथा,–'सुसिक्त'मित्यत्र सुशब्दस्य कर्मप्रवचनीयस्य पूजार्थकत्वं, 'सुषिक्त'मित्यत्रोपसर्गस्याऽन्यार्थकत्वम्[1]। एवं 'प्रणायक' इत्यत्र णत्वात्—प्रणयनकर्त्तृबोधः, 'प्रनायक' इत्यत्र तदभावात्[2] प्रगतनायकबोध इत्याद्यूह्यम्।

यत्तु "पदपदार्थयोर्योर्थः स शब्दो, यः शब्दः सोर्थं इतीतरेतराध्यासमूलक-तादात्म्यं भेदव्यापृक्तमस्ति, 'तस्य वाचकः प्रणवः' 'ओमित्येकाक्षरं ब्रह्मे'ति भेदाभेदयोर्दर्शनात्, आद्ये–भेदस्योद्भूतत्वविवक्षया षष्ठी, अभेदस्योद्भूतत्व-विवक्षया त्वन्त्ये प्रातिपदिकार्थे प्रथमा। स एव सम्बन्धः–पदतदर्थयोर्वाच्य-वाचकभावव्यवहारनियामकः, शक्तिस्तु संकेतः, पदार्थाऽन्तरं वे"ति—भट्टानुया-यिमतम्, तत्तु न साधीयः,–अध्यासमूलकस्यासतस्तस्य सम्बन्धत्वासम्भवात्, भेदाभेदयोः परस्पराभावरूपतया विरुद्धत्वेनैकत्रासम्भवाच्च, कस्यचित्तथा-ध्याससम्भवेपि—सर्वेषां तथाध्यासे मानाभावात्, घटपादनाशेपि घटस्योपलभ्य-मानतया तयोस्तादात्म्यस्यासम्भवदुक्तिकत्वाच्च। न च पाकरक्ते प्राक् श्यामेपि पाकोत्तरम'यमिदानीं न श्याम' इति प्रतीतेर्भेदाभेदौ न विरुद्धाविति वाच्यम्, अव्याप्यवृत्तीनां तेषामेकावच्छेदेन विरोधानपायात्, अत एव तत्र देशकालावच्छेद-कभेदेनैवाय'मिदानीं न श्यामो', 'वृक्षो मूले न कपिसंयोगी'ति, न तु तदनव-गाहिनी—'घटोऽयं न श्यामो' 'वृक्षो न कपिसंयोगी'ति प्रतीतिः। किन्त्वभेदवादे घटपदनाशे घटनाशापत्तिः, एवं शब्दवदर्थस्यापि श्रोत्रेन्द्रियग्राह्यतायाः, शब्दस्य चक्षुरादीन्द्रियग्राह्यतायाश्चापत्तिरिति बहुव्याकोपः। शब्दस्य यथा न नित्यत्वं, तथा वक्ष्यते।

न चात्यन्तभेदे—'घटः पटो'ऽत्यन्ताऽभेदे–'घटो घट' इति सामानाधिकर-ण्यादर्शनाद्भेदाभेदवादोपपत्तिरिति शङ्क्यं, 'शब्दो घट' इत्याद्यननुभवाद् 'घटो न शब्दः' 'घटो न घट' इत्याद्यनुभवाच्च—भेदस्यैव सिद्धेः। 'ओमित्येकाक्षर'मित्यादौ त्वक्षरपदस्य तत्प्रतिपाद्ये निरूढलक्षणया सामानाधिकरण्योपपत्तेस्तद्वाक्यस्योपासना-काण्डस्थतया भेदेप्यभेदोपासनपरतयोपपत्तेश्चेत्यन्यत्र विस्तरः।

[illegible]ा च शक्तिस्त्रिधा—योगो, रूढिर्योगरूढिश्चेति। प्रकृतिप्रत्ययनिरूपिता त[illegible]या शक्तिः स योगस्तन्मात्रेणार्थबोधकं पदं-यौगिकमिति व्यवह्रियते, यथा [illegible]पदम्, तद्घटकधातुप्रत्यययोः पाकादौ कर्त्रादिकारके च व्युत्पन्नत्वात्। [illegible]न्नार्थाप्रतीतौ केवलसमुदायस्य तत्तदर्थे या शक्तिः सा रूढिस्तयार्थबोधकं

१ अन्यार्थकत्वं = निन्दाक्षेपाद्यर्थकत्वम्, यथा 'सुषिक्तं किन्तवात्रे'त्यादौ। २. णत्वाभावात्।

❀ दर्पणः ❀

पदं रूढं, यथा—मणि-नूपुरादि। 'अश्वगन्धा'दिपदात्तु कदाचिदोषधिनिष्ठसमुदायनिरूपितशक्त्या ओषधिबोधः, कदाचित्तु—अश्वस्य गन्धोऽस्यामिति व्युत्पत्त्या वाजिशालादिबोधोवयवशक्त्येति यौगिकरूढिः पृथङ्नोक्ता, उक्तयोरेवान्तर्भावात्। रूढिर्योगापहारिणी'ति तु प्रकरणाद्यभावे। लाक्षणिकं तद्—वाजिशालाबोधे इत्यपरे।

यत्रावयवार्थसहकृता समुदायशक्तिरर्थबोधिका सा योगरूढिस्तयार्थबोधकं पदं योगरूढम्, यथा—पङ्कजादिपदम्, तत्र पङ्काधिकरणकोत्पत्त्याश्रयपद्मत्वविशिष्टबोधाद्, अनुपपत्तिप्रतिसन्धानं विनापि पद्मबोधान्न तत्र लक्षणावसर इत्यादि प्रपञ्चितं पूर्वमेव। 'गङ्गायां घोष' इत्यादौ गङ्गापदस्य तीरे शक्यसामीप्यरूपलक्षणाग्रहे तदाहितसंस्कारजन्यतीरादिस्मृत्या तीराधिकरणकघोषशाब्दबुद्धिः। लक्ष्यव्यवहारान्यथानुपपत्त्या लक्षणाया अप्यवश्यमभ्युपेयत्वात्, अन्वयानुपपत्तिप्रतिसन्धानं च तत्कल्पने बीजं, यथा—उक्ते। क्वचिन्निराकाङ्क्षत्वमपि तद्बीजं, यथा 'वदनं तस्या वदनं मुखममुखं भाति चान्यासा'मित्यत्र तादात्म्यसम्बन्धावच्छिन्नवदनत्वावच्छिन्नप्रकारतानिरूपितवदनत्वावच्छिन्नविशेष्यताको बोधो न सम्भवति, तादात्म्यसम्बन्धावच्छिन्नताद्दशताद्दशप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन शाब्दबुद्धौ विधेयतावच्छेदकभेदस्य तन्त्रत्वादिति वदनत्वावच्छिन्नार्थकवदनपदनिरूपिताकाङ्क्षा न वदनपदे, अतस्तत्र वदनपदं लक्षणयाह्लादकपरम्, तदुपस्थिताह्लादकत्वावच्छिन्नास्याभेदान्वयो वदने।

अनुशासनबोधितनैराकाङ्क्ष्यमपि क्वचित्तथा—यथा,—

कृतसीतापरित्यागः स रत्नाकरमेखलाम्।
बुभुजे पृथिवीपालः पृथिवीमेव केवलाम्॥'—

—इत्यत्र भुजिधातोरवनवाचकस्यात्मनेपदनिराकाङ्क्षतया वाच्यार्थबुद्धौ प्रतिबद्धायां तद्धातुना स्वार्थपालनसम्बन्धि शासनं लक्ष्यते, आत्मनेपदसमभिव्याहृतभुजित्वावच्छेदेनाख्यातबोध्यकर्त्रन्वितपालनबोधस्वरूपाऽयोग्यत्वरूपनैराकाङ्क्ष्यस्य,—'भुजोऽनवन' इति सूत्रेण बोधनात्। तत्र 'केवल'पदेन तात्कालिकरामाभिन्नपृथिवीपालकर्तृकभोगकर्मनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकैकत्वयोगिनी व्यक्तिरभिधीयते, 'एव'कारेण पृथिव्यन्ययोगव्यवच्छेदः,—एवञ्च तत्कालिकरामा[illegible]न्नपृथिवीपालकर्तृकभोगकर्मनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकैकत्वविशिष्टा[illegible]—पृथिवीकर्मकभोगकर्त्ता पृथिव्यन्यस्त्रीकर्मकभोगाकर्त्ता रामाभिन्नः पृथिवीप[illegible]ति न्यायनये वाक्यार्थबोधः। 'द्विरेफो मधुरं रौति', 'पिकः कूजति कानन' इ[illegible]ज्ञानान्तरमे[illegible] मुख्यार्थबाध एव लक्षणाबीजम्। किन्तु सा 'लक्षितलक्षणे'त्युच्यते, लक्ष्य[illegible] सार्थरेफद्वयविशिष्टघटित्वात्तस्याः। तथाहि—येन पुरुषेण द्विरेफादिपदस्य प्राणि-

विशिष्टे शक्तिर्न गृहीता, किन्तु 'द्वौ रेफौ यत्रे'तिव्युत्पत्त्या रेफद्वयसम्बन्धिभ्रमरपदे शक्यसम्बन्धरूपलक्षणा गृहीता,–तस्य प्राणिविशेषविशेष्यकमधुरारावकर्तृत्व-शाब्दबोधस्य तात्पर्यविषयस्यानुपपत्त्या,–'द्विरेफ'पदात् स्वलक्ष्यरेफद्वयघटितपद-वाच्यत्वलक्षणयोपस्थिते प्राणिविशेषे-मधुरारावकर्तृत्वान्वय इति ।

'द्विरेफ'पदेन भ्रमरपदमुपस्थाप्यते, तेन च प्राणिविशेषोपस्थितिरिरिति तु न सम्यक्, 'प्रत्ययाना'मिति व्युत्पत्तेस्तत्र प्रत्ययार्थान्वयासम्भवात् । भ्रमरपदे लक्षणायामपि न तेन तदुपस्थितिरुच्चरितस्यैवार्थप्रत्यायकत्वादित्यप्याहुः ।

एवं, 'द्विकः[1] कूजति कानने' इत्यादावपि बोध्यम् । एवं 'गङ्गा हरति वै पुसां दृष्टा पीतावगाहिते'त्यत्र 'पीता गङ्गा पापं हरती'ति वाक्ये–'गङ्गा'पदात् स्वशक्य-प्रवाहावयवावयविभावसम्बन्धरूपलक्षणाग्रहाहितसंस्कारसहकृतादुपस्थितोद्धृतजले पानकर्मत्वान्वयः ।

तात्पर्य्यानुपपत्तिरेव वा सर्वत्र लक्षणावीजं, तदुन्नायकत्वेनैवोक्तैराकाङ्क्षया-दीनामुपयोगः, अत एव,–'यष्टीः प्रवेशये'त्यादौ यष्ट्यादिपदानां तद्धारणकर्त्तरि लक्षणा, यष्टिषु प्रवेशकर्मत्वान्वयानुपपत्त्यभावेपि भोजनादिप्रकरणोन्नीततात्पर्य्य-विषयभोजनप्रयोजनकप्रवेशकर्मत्वानुपपत्तेस्तत्र जागरूकत्वात् । एवं 'कुन्ताः प्रवि-शन्ति' 'छत्रिणो यान्ती'त्यादावप्यूह्यम् । ननु 'छत्रि'शब्दस्य पदद्वयघटितत्वेन वाक्यतया न्यायनये कथं तस्य लक्षणा, शक्याप्रसिद्धेः किञ्चात्र नैकसार्थगन्तृत्वं लक्ष्यतावच्छेदकं, 'यान्ती'त्यस्यानन्वयापत्तेः, गन्तृत्वेनोपस्थितस्य गमनाकाङ्क्षा-विरहादिति चेत्,—सत्यम्–सम्बन्धिशक्तमतुप एव तत्रैकसार्थसम्बन्धिलक्षकत्वा-भ्युपगमेनोक्तदोषद्वयस्याप्रसक्तेः, न च छत्रपदवैयर्थ्यं, तस्य तात्पर्य्यग्राहकत्वेन सार्थक्यात् ।

'लाक्षणिकपदं नानुभावक'मिति सम्प्रदायः,—स्वशक्यानुभवं प्रत्येव पदानां कारणत्वम्, इतरपदार्थेन सह स्वशक्यानुभावकत्वेन क्लृप्तसाद्धोपादिपदादेव तीरा-नुभवोपपत्तेर्न शक्यादशक्योपस्थितिर्लक्षणेत्यभ्युपगच्छतां मते स्वजन्योपस्थिति-सम्बन्धेनैव पदस्यानुभावकतया तस्याश्च तीरादावभावात्तस्याननुभावकत्वमिति तन्मूलम्[2] । न च तत्सम्भवति,—शक्योपस्थितात्तीरादेरप्रकृत्यर्थतया तत्र प्रत्यार्था-[illegible]सम्भवात् ।

[illegible] वस्तुतस्तु लाक्षणिकं पदमुद्देश्यविधेयभावेनान्वयाजनकमित्येव [3]तदर्थः । [illegible] विधेयभावेनान्वये—शक्तिमत्त्वस्यैव तन्त्रत्वात्, अत एव,—'न विधौ परः [illegible]ब्दार्थ' इति सङ्गच्छते ।

[illegible]

१ द्विकः = काकः । २ लाक्षणिकं नानुभावकमिति न्यायमूलम् । ३ तदर्थः = उक्तन्यायार्थः ।

स्यादि विस्तरेण प्रपञ्चितं भूषणे ॥ ३७ ॥

❁ दर्पणः ❁

किञ्च—तन्तुसंयोगहेतुत्वतात्पर्य्यकं,—'तन्तुः पटं जनयती'ति सर्वलाक्षणिकवाक्येन्वयानुभवापलापापत्तेर्लाक्षणिकपदस्यानुभावकत्वमेव न्याय्यम्, 'गङ्गापदात्तीरमनुभवामी'ति प्रतीतेश्च तादृशप्रवादे नाभिनिवेष्टव्यम्।

ननु 'स्वायत्ते शब्दप्रयोगे किमित्यवाचकं पदं प्रयोक्ष्यामह' इति न्यायात्तीराद्यवाचकगङ्गादिपदाभिधानमनुचितं, प्रयोजनजिज्ञासायां पावनत्वादिप्रतिपत्तये तदिति यदि, तर्हि—वृत्तिं विना तस्य शब्दे भानासम्भवात्तदर्थं व्यञ्जनावृत्तिरपि तृतीयाङ्गीकरणीया,—अत एव,—

अवलानां श्रियं हृत्वा वारिवाहैः सहानिशम्।
तिष्ठन्ति चपला यत्र स कालः समुपागतः॥'

—इत्यत्र 'अशक्तानां श्रियमपहृत्य पुंश्चल्यो जलवाहकैः सांकंरमते' इत्यतात्पर्यविषयरूढ्यर्थानालिङ्गितार्थान्तरस्यापि प्रतीतिः। सा चार्थद्वारिकापि—

'भ्रम धार्मिक! विस्रब्धं सोऽद्य श्वा मारितस्तेन।
गोदातीरनिकुञ्जप्रतिष्ठितनिसर्गदृप्तसिंहेन'॥ इत्यादौ प्रतिभाजुषां सहृदयानां वक्तृबोद्धव्यवैशिष्ट्यस्फूर्त्तौ सिंहप्रतीत्यनन्तरं गोदातीरे श्वभीरुभ्रमणायोग्यत्वप्रत्ययादिति चेन्न, रूढ्यर्थानालिङ्गितार्थस्य केवलयोगेन प्रतीत्यसम्भवेपि लक्षणया तस्याः सूपपादत्वात्। पावनत्वादिप्रतीतिर्विशिष्टलक्षणयापि शुद्धलक्षणयैवानुपपत्तिपरिहारे विशिष्टे तदभ्युपगमे बीजाभाव'इति तु न, 'यष्टीः प्रवेशये'त्यत्रापि तदनापत्तेः। वाच्यार्थवैयञ्जनिकबुद्धेरनुमानेनापि गतार्थत्वाच्च। वस्तुतस्तु गालिप्रदानादेरिवेतोपि तथा तात्पर्य्यमेवोन्नीयते, न त्वन्वयबोधोऽनुमितिर्वा, बाधे व्यभिचारपक्षधर्मतयोः, सन्देहे वा तयोरसम्भवात्तत्रैव तैर्व्यञ्जनोल्लासाभ्युपगमादित्यन्यत्र विस्तरः। यदि पुनरानुभाविको लोकानां स्वरसवाही 'शब्दादमुमर्थं प्रत्येमी'ति प्रत्ययस्तदा व्यञ्जनावृत्तिरप्रत्यूहैवेति ॥३७॥

❁ काशिका ❁

वाच्यः, अत एव सुषुप्तिकालभिन्नस्य तथाविधगुणशून्यकालस्य मूर्च्छात्वमुच्यते, तथा च त[illegible] काले ज्ञानाद्यावश्यकतया ज्ञानाद्यन्तरस्थाने इदमेव कल्प्यते इति क्व गौरवमिति वदन्तीति [illegible] तदेतदभिप्रेत्याह—विस्तरेण प्रपञ्चितं भूषणे इति ॥३७॥

१ भम धम्मिअ! वीसद्धो सो सुणओ अज्ज मारिओ देण। गोलाणई—कच्छ—कुडङ्गवासिणा दरिअसीहेण—॥ इति प्राकृतगाथानुवादभूतोऽयं श्लोकः। तत्त्वमस्य सहृदयैकसंवेद्यम्।

नन्वेवं भाषादितो बोधदर्शनाद् बोधकतारूपा शक्तिस्तत्रापि स्यात्, तथाच साधुतापि स्यात्, शक्तत्वस्यैव साधुताया व्याकरणाधिकरणे प्रतिपादनादित्याशङ्कां द्विधा समाधत्ते—

असाधुरनुमानेन वाचकः कैश्चिदिष्यते ।
वाचकत्वाविशेषे वा नियमः पुण्यपापयोः ॥३८॥

असाधुः = गाव्यादिः, अनुमानेन = साधुशब्दमनुमाय, वाचको = बोधकः—कैश्चिदिष्यते, तथाच लिपिवत्तेषां साधुस्मरण एवोपयोगो, न तु साक्षात्तद्वाचकत्वमतो न साधुत्वमिति भावः ।

❀ दर्पणः ❀

स्वोक्त[1]निष्कृष्टमतमवलम्ब्य मूलमवतारयति । **नन्विति** । एवं = बोधकत्वस्यैव शक्तित्वे । तत्रापि = अपभ्रंशात्मकभाषायामपि । **स्यादिति** । तस्या अपि बोधकत्वाद् । 'ईश्वरेच्छादीनां शक्तित्व'वादिनां तु नायमतिप्रसङ्ग इति भावः । इष्टापत्तावाह—**तथाचेति** । 'नापभ्रंशितवै' इत्यादिनिषेधविधिविषयत्वानापद्येष्टापत्तेः कर्तुमशक्यत्वादिति भावः । **द्विधेति** । अपभ्रंशानामुक्तशक्तिमत्त्वाभावव्यवस्थापनेन, साधुत्वस्यान्यथा निर्वचनेन चेत्यर्थः । मूले— **अनुमानेन वाचक इति** । अनुमानमत्र स्मृतिः, अनु = पश्चान्मानं—मितिरिति व्युत्पत्तेर्न तु व्याप्तिज्ञानम्, तच्छून्यानामपि शाब्दबोधदर्शनात्; गाव्याद्यपभ्रंशानां गवादिशब्दविकृतित्वेनोद्बोधकविधया झटिति प्रकृतिस्मारकत्वादित्याशयेन व्याचष्टे—**अनुमानेन साधुशब्दमिति** । **अनुमायेति** । स्मृत्वेत्यर्थः । वक्ष्यति च—**तेषां साधुस्मरण एवोपयोग इति** । अपभ्रंशानां साक्षाद्बोधकता तु न शब्दजनकसाधु-

❀ काशिका ❀

एवं = बोधजनकस्य शक्तित्वे । 'ईश्वरेच्छा शक्ति'रिति मते तु तत्तत्पदपदार्थसंबन्धत्वविशेषितेच्छाया एव शक्तित्वम् । एवं च गगरीशब्दाद्बोधोत्पत्त्या गगरीशब्दाद्घटबोधो जायतामितीच्छाया आवश्यकत्वेऽपि तस्या न गगरीशब्दसंबन्धत्वं कल्प्यते, तदनुग्राहककोशाद्यभावान्नापभ्रंशे शक्तिप्रसङ्गः । एवं 'पदार्थान्तरं शक्ति'रिति मतेऽपि न तत्र सा कल्प्यत [illegible] भावः । द्विधा = प्रकारद्वयेन, अपभ्रंशानां साक्षाद्बोधकत्वानभ्युपगम एकः प्रकारः, [illegible]त्वे इष्टापत्तिरित्यपरः, तत्राद्यं समाधानं नैयायिकादिमतेन, द्वितीयं स्वमतेनेति [illegible]यो अनुमाय = स्मृत्वा । अत एवाग्रे'तेषां साधुस्मरण एवोपयोग' इति वक्ष्यति । नन्वेवं [illegible]मास्य वाचकत्वमनुपपन्नं, साक्षाद्बोधकत्वस्यैव वाचकत्वरूपत्वादत आह—वाचको बोधक इति ।

योग्य[illegible]

१ स्वोक्तनिष्कृष्टमतं = बोधकतारूपा शक्तिरिति ।

उक्तं हि वाक्यपदीये—

ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः ।
तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः ॥१॥
न शिष्टैरनुगम्यन्ते पर्य्याया इव साधवः ।
ते यतः स्मृतिशास्त्रेण[1] तस्मात् साक्षादवाचकाः ॥२॥

❀ दर्पणः ❀

त्वस्याभावादसाधुत्वज्ञानस्य प्रतिबन्धकत्वाद्वेति भावः । तत्र हरिसम्मतिमाह— **उक्तं हीति** । ते = अपभ्रंशाः । 'साधु'ष्विति विषयसप्तमी, साधुविषयकस्मरणेनेत्यर्थः । **प्रत्ययेति** । गवाद्यर्थबोधकारणानीत्यर्थः ।

पक्षान्तरमाह–**तादात्म्यमिति** । साधुगवादिशब्दतादात्म्यप्रकारकज्ञानविषयतामापद्य वेत्यर्थः, एवकारो वार्थे । गोपदे उच्चारणीये करणापाटवेन गावीत्युच्चारितं वस्तुतो गोपदमेवेदमिति तादात्म्येन भासमाना गाव्यादिशब्दा गवादिरूपार्थस्य प्रकाशका इत्यर्थः । न च वक्ष्यमाणकल्पाभेदः, तत्रापभ्रंशगतानुपूर्व्या एव शक्ततावच्छेदकत्वादत्र तु साधुगतायास्तस्यास्तत्त्वमिति भेदादिति भावः ।

यत्तु–'शब्दार्थयोस्तादात्म्यं शक्ति'रिति स्वोक्तार्थे 'तादात्म्य'मित्यादिहरिकारिकार्द्धस्योपष्टम्भकतयोपन्यसनं, तन्मुधैव, तादात्म्यस्य शक्तित्वेपि शब्दनिष्ठतादात्म्यज्ञानस्यार्थाबोधकत्वेन तस्य शक्तित्वासम्भवात्, उपक्रमोपसंहारपर्य्यालोचनया साधुशब्दतादात्म्यभ्रान्त्यापभ्रंशानामर्थबोधजनकत्वमिति पक्षान्तरपरतयैव तद्व्याख्यानस्यौचित्यादिति ।

अवाचकत्वे युक्तिमाह—**न शिष्टैरिति** । 'यतस्तेपभ्रंशाः—साधवः पर्य्याया इव-शिष्टैः स्मृत्यादिना न प्रतिपाद्यन्तेऽतो न वाचका इत्यर्थः । 'ते साधु'ष्वित्या-

❀ काशिका ❀

साक्षात्तद्वाचकत्वमिति । साक्षात्तद्बोधकत्वरूपं तद्वाचकत्वमित्यर्थः । **तादात्म्यमुपगम्येवेति** । अर्थतादात्म्यं गगर्यादिशब्दे गृहीत्वेवेत्यर्थः । ग्रहस्य भ्रमत्वसूचनाय 'इवे'ति । तेन तेषामवाचकत्वं ध्वनितम्, तद्वाचक एव हि तत्तादात्म्याभ्युपगमात् । एतेन शक्तिभ्रमात्ततो बोध इति च सूचितम्, न च पामराणां शक्त्यग्रहे कथं शक्तिभ्रम इति वाच्यं, गगरीशब्दं शृण्वतः पुंसः साधुस्मरणाद्बोधेऽपि तटस्थस्य गगरीशब्दजन्य एवास्य बोध इति भ्रमेणाऽऽ[illegible] शक्तिभ्रमोऽन्येषां तन्मूलकस्य तद्भ्रमस्य संभवात् । **न शिष्टैरिति** । 'शिष्टैः—साधवः [illegible] इवापभ्रंशा नानुगम्यन्त' इति योजना, पर्यायसमुदाये न संगृह्यन्त इत्यर्थः । नयतः[1] [illegible] बोधयतः—साधुशब्दस्य, **स्मृतिमात्रेण**—अस्य 'अर्थबोधोपपत्ति'रिति शेषः

१ 'नयत' इति—'स्मृतिमात्रेणे'ति च काशिकासम्मतः पाठः ।

'वंबम्बे'ति यथा बालः शिक्ष्यमाणः प्रभाषते ।
अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णयः ॥३॥
एवं साधौ प्रयोक्तव्ये योपभ्रंशः प्रयुज्यते ।
तेन साधुव्यवहितः कश्चिदर्थोभिधीयते ॥४॥ इति ।

नन्वपभ्रंशानां साक्षादवाचकत्वे किं मानं, शक्तिकल्पकव्यवहारादेस्तुल्यत्वादिति चेत्, सत्यम्, तत्तद्देशभेदभिन्नेषु तेषु तेषु शक्तिकल्पने गौरवात्, न च पर्य्यायतुल्यता शङ्क्या, तेषां सर्वदेशेष्वेकत्वाद् विनिगमनाविरहेण सर्वत्र शक्तिकल्पना, न हि अपभ्रंशे तथा, अन्यथा भाषाणां पर्यायतया गणनापत्तेः, एवञ्च शक्तत्वमेवास्तु साधुत्वमिति नैयायिक-

❀ दर्पणः ❀

द्युक्तमर्थं विशदयति—वंबंबेत्यादि । 'अव्यक्त'मिति भाषणक्रियाविशेषणम्, तद्विदाम् = अव्यक्तशब्दश्रोतृणाम् । 'अव्यक्ते = साधुशब्दे । अस्य—'स्मृते सती'ति शेषः । निश्चयः = तदर्थशाब्दबोधो भवतीत्यर्थः । **एवमिति** । इत्थमेवेत्यर्थः । साधौ = गवादिशब्दे । अपभ्रंशः—गाव्यादिः । तेन = असाधुशब्देन । साधुव्यवहितः = साधुस्मृतिद्वारकः, कश्चित् = प्रसिद्धोऽम्ब्वादिरूपः,[1] अभिधीयते= बोध्यते इत्यर्थः । उक्तमेवार्थं द्रढयितुमाशङ्कते—**नन्विति** । तेषाम् = साधुपर्य्यायाणाम् । **एकत्वादिति** । एकजातीयत्वादित्यर्थः । तथा = एकजातीयत्वं, येन तत्रापि विनिगमकाभावाच्छक्तिकल्पना स्यादिति भावः । **अन्यथेति** । एकजातीयत्वस्य—शक्तिकल्पनायामतन्त्रत्वे,—शक्तिमत्त्वाविशेषात् साधूनामिवापभ्रंशानामपि

❀ काशिका ❀

वंबंबेति । शिक्ष्यमाणो बालो 'वं वं वे'त्यव्यक्तं यदा प्रभाषते, तद्विदां = साधुशब्दं जानतां, व्यक्ते = साधुस्मरणे सति, निश्चयः = अर्थनिश्चयो भवतीत्यर्थः । असाधोः साधुप्रकृतिकत्वात् सादृश्येन तत्स्मरणमिति भावः । अत्र 'वं वं वे'ति पाठ एव युक्तो, न त्व'म्बाम्बे'ति, तस्य[2] साधुत्वात् ।

पूर्वकारिकां व्याचष्टे—**एवं साधाविति** । साधुव्यवहितः = साधुस्मरणपूर्वकः । 'व्यवहारादे'रित्यादिपदादाप्तवाक्यसंग्रहः । **पर्यायतुल्यता**—यथा सर्वेऽप्यनेकपर्याया एकस्यार्थस्य [illegible]वाचका अविशेषात्तथापभ्रंशा अपीत्यर्थः । दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमाह—**तेषामिति** । [illegible]पर्यायाणामित्यर्थः । **एकत्वादिति** । अत एव विनिगमनाविरहः, अन्यथा य एव पर्यायः [illegible]संज्ञक[illegible]षु प्रसिद्धस्तत्रैव शक्तिः सिध्येदिति भावः । तथा = सर्वदेशेषु एकता, तेषां देशभेदेन [illegible]मानभिन्नत्वात्, अत एव 'वाचो यत्र विभिद्यन्ते तद्देशान्तरमिष्यते' इति स्मर्यते । **अन्यथेति** । [illegible]योरम्'[illegible]

१ अम्बु = जलम् । २ तस्य = अम्बेत्यादेः ।

मीमांसकादीनां मतं तन्मतेनैव द्रष्टव्यम्।

इदानीं स्वमतमाह—**वाचकत्वाविशेषे चेति**। अयं भावः—'अपभ्रंशानामशक्तत्वे ततो बोध एव न स्यात्, न च साधुस्मरणात्ततो बोधः, तानविदुषां पामराणामपि बोधात्, तेषां साधोरबोधाच्च, न च शक्तिभ्रमात्तेभ्यो बोधः, बोधकत्वस्याबाधेन तद्ग्रहस्याभ्रमत्वात्, 'ईश्वरेच्छा शक्ति'रिति मतेपि सन्मात्रविषयिण्यास्तस्या बाधाभावात्, शक्तेः

❀ दर्पणः ❀

कोशादौ प्रतिपादनं प्रसज्येतेत्यर्थः। **तन्मतेनैवेति**। 'ते साधुष्वनुमानेने'-त्याद्युक्तहरिमतेनैवेत्यर्थः। अपभ्रंशाद्बोधस्योक्तरीत्योपपादितत्वात्तत्र शक्तिकल्पनं स्वाग्रहमूलकमित्याशङ्कां निराचिकीर्षुस्तत्रोक्तप्रकारासम्भवं दर्शयति-**अयं भाव इति**। **तानिति**। साधुशब्दानित्यर्थः। अज्ञानहेतुमाह—**पामराणामिति**। **बोधादिति**। व्यवहारेण तेषां बोधानुमानादित्यर्थः। तथाचानधीतशास्त्राणां तेषां साधुत्वप्रकारकशब्दज्ञानासम्भवेन न तत्र साधुशब्दस्मृतिकल्पनया शाब्दबुद्धिरुपपादयितुं शक्येति भावः। किञ्च साधुशब्दस्मृतिकल्पना कथंचित्सम्भवेदपि यदि प्रत्यक्षश्रुतसाधुशब्दबोधोदयः स्यात्,—स एव तु नास्तीत्याह—**तेषां साधोरिति**। **शक्तिभ्रमादिति**। अर्थनिरूपितायाः साधुशब्दनिष्ठायाः शक्तेरपभ्रंशे भ्रमादित्यर्थः। किं बोधकत्वरूपशक्तिभ्रमात्तत्र बोध उपपाद्यते,? उतेश्वरेच्छारूपशक्तिभ्रमात् ? तत्र नाद्यः कल्प इत्याह--**बोधकत्वस्येति**। द्वितीये त्वाह—**ईश्वरेच्छेति**। **सन्मात्रेति**। 'मात्र'पदं कृत्स्नार्थकम्, अपभ्रंशाद् बोधस्य सर्वानुभवसिद्धत्वेन बोधकत्वेनेश्वरेच्छाया अपि तत्राबाधेन तामादायापि न शक्तिज्ञानस्य भ्रमत्वसम्पत्तिः, प्रतीतेर्भ्रमत्वे विषयबाधस्यैव तन्त्रत्वादिति भावः।

❀ काशिका ❀

अपभ्रंशानामवाचकत्वे चेत्यर्थः। तेषां वाचकत्वे तु तद्व्यावर्तनायान्यविधमेव तद्वक्तव्यमिति भावः। न च लाक्षणिकासंग्रहः, तेषामपि क्वचिच्छक्तत्वात्, वृत्तिमत्त्वं वा तदर्थो बोध्यः। **अविदुषामिति**। तत्तदर्थबोधकत्वेन ग्रहशून्यानामित्यर्थः, एवं च तत्तच्छब्दत्वादिना पूर्वमनुभवेऽपि नेष्टसिद्धिः, तथानुभववतां तथाविधस्मरणसंभवेऽपि तस्य शाब्दबोधानुपयुक्तत्वात्, तत्तदर्थबोधकत्वेन स्मरणस्यैवोपयोगित्वादिति भावः। एतदभिप्रायेणैवाह—**तेषामिति** पामराणामित्यर्थः, अपभ्रंशमात्रव्युत्पन्नाः—पामराः। किं बोधकत्वरूपशक्तेर्भ्रमोऽभिमत उतेश्वरेच्छारूपायाः ? तत्र नाद्य इत्यत आह—**बोधकत्वस्येति**। तत्तदर्थबोधजनकत्वस्येत्यर्थः। **अबाधेनेति**। 'नेदं तदर्थबोधक'मिति बाधनिश्चयाभावेनेत्यर्थः। **बाधाभावादिति**। गगर्यादिशब्दादपि घटादिरूपार्थबोधजननेन 'घटो गगरीशब्दजन्यबोधविषयो जायता'मितीश्वरेच्छावश्यकी,

—पद–पदार्थविशेषघटिताया भ्रमासम्भवाच्चेति ।

ॐ दर्पणः ॐ

ननु लाक्षणिक इवापभ्रंशेपि वाचकव्यवहाराभावेन तद्व्यावृत्तेश्वरेच्छारूप-शक्तेस्तत्र भ्रमे बाधकाभावोत आह—**शक्तेरिति । भ्रमासम्भवाच्चेति ।** तत्पद-विशेष्यकतदर्थबोधजनकत्वप्रकारकेच्छायास्तत्पदविशेष्यकत्वेन गृहीतायाः पदान्तर-विशेष्यकत्वासम्भवेन तद्भ्रमासम्भवादित्यर्थः । यथाश्रुताभिप्रायेणेदम् । परिष्कृत-विशेष्यत्वरूपायास्तत्सम्बन्धावच्छिन्नावच्छेदकत्वरूपायाः पदार्थान्तररूपाया वा शक्तेस्तत्र भ्रमे बाधकाभावादिति बोध्यम् । तथाच भ्रमेणापि बोधस्य दुरुपपाद-त्वेन भाषायां शक्तिरावश्यिकेति भावः । अस्मिन्नपि पक्षे हरिसम्मतिमादर्शयति—

ॐ काशिका ॐ

अन्यथा घटनिष्ठगगरीशब्दजन्यबोधविषयत्वस्येश्वरेच्छाऽविषयतया तस्याः सर्वविषयकत्वानुपपत्तिः । न च तस्य शुद्धविषयतात्वेनैव घटांशे गगरीशब्दजन्यबोधविषयत्वप्रकारकत्वमिच्छाया उपगम्यते, न तु तच्छब्दजन्यबोधविषयतात्वेन, तावतापि तस्याः सर्वविषयकत्वोपपत्तिः, न च बोधांशे गगरीशब्दजन्यतानवगाहितया सर्वविषयकत्वानुपपत्तिरिति वाच्यं, घटनिष्ठविशेष्यतानिरूपित-प्रकारतावच्छेदकघटकतया तदनवगाहित्वेऽपि स्वातन्त्र्येण बोधांशे तदवगाहित्वोपगमात् । तत्त-च्छब्दजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबन्धेन संबद्धेश्वरेच्छा शक्तिः, सा चैवं सति तत्र न संभवति, अथवा पदपदार्थसंबन्धत्वविशिष्टा तथाविधेश्वरेच्छा शक्तिः गगरी-शब्दसंबन्धत्ववैशिष्ट्यं तु तस्या नाङ्गीक्रियत इति न तत्र शक्तिसंभव इति वाच्यं, ततोऽपि बोधोत्पादानुभवेन तत्रापि गगरीशब्दजन्यबोधविषयतात्वेन रूपेण तत्प्रकारकत्वस्येच्छाया अव-श्याभ्युपेयत्वात्, गगरीशब्दघटैतदुभयसंबन्धत्ववैशिष्ट्यस्य वावश्यं स्वीकार्यत्वादिति तात्पर्यम् ।

पदार्थपदविशेषघटिताया इति । तत्तत्पदजन्यबोधविषयत्वप्रकारतानिरूपितार्थनिष्ठविशेष्यता-केच्छाया एव शक्तित्वेन गगरीशब्दजन्यबोधविषयत्वप्रकारिका घटविशेष्यिकेच्छैव शक्तिः, प्रवृ[illegible] वाच्या, सा यद्यस्ति, न तर्हि तद्भ्रमः, यदि नास्ति, तर्हि सुतरां न तद्भ्रमः सिध्यति, क्वचि-त्प्रसिद्धस्य स्वविरहिणि ज्ञानस्यैव भ्रमत्वात् । अथ तत्तच्छब्दविशेष्यिका तत्तदर्थबोधजनकत्व-प्रकारिकेच्छापि शक्तिर्विनिगमनाविरहात्, तथा च गगरीशब्दे घटबोधजनकत्वप्रकारिकाया [illegible]च्छाया विषयतया घटशब्दे प्रसिद्धाया भ्रमः संभवतीति चेन्न, घटबोधकत्वप्रकारिकेच्छामात्रस्य [illegible]त्वाभावेन तद्भ्रमस्यानुपयुक्तत्वा[illegible] [illegible]त्पत्तिविधुरेषु । अभिधातृषु = [illegible] [illegible]णा = अन्यथाकृता, अपभ्रंशीकृतेति यावत् । **अनित्यदर्शिनां त्विति ।** 'कार्याः संज्ञा[illegible]र्थाः' इति मते शास्त्रमात्रसमधिगम्यमर्थबोधकत्वमित्यपभ्रंशेषु शास्त्रेषु तद्ग्राहकस्याभावात्साधव [illegible]मा[illegible] योग्य[illegible]व वाचका नापभ्रंशा इति भवति भ्रम इति भावः ।

वाचकत्वस्य पुरुषभेदनियन्त्रितत्वाभावा'त्तेषां साधुरवाचक' इत्ययुक्तमत आह—अवाच-

उक्तञ्च वाक्यपदीये—

पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु ।
प्रसिद्धिमागता येषु तेषां साधुरवाचकः ॥१॥
दैवी वाग् व्यवकीर्णेयमशक्तैरभिधातृभिः ।
अनित्यदर्शिनां त्वस्मिन् वादे बुद्धिविपर्य्ययः ॥२॥

अवाचकः = अबोधकः । बुद्धिविपर्य्ययः = 'एते एव वाचका नान्ये' इति विपर्यय इत्यर्थः । किञ्च विनिगमनाविरहाद् भाषायामपि

❀ दर्पणः ❀

उक्तञ्चेति । पारम्पर्यादिति—स्वार्थे ष्यञ् । 'विगुणे'ष्विति हेतुगर्भं विशेषणम् । वैगुण्यं च—[1]करणापाटवरूपम् । अभिधातृवैगुण्यस्यापभ्रंशनियामकत्वात् । तथाच विगुणेष्वभिधातृषु सत्सु परम्परया येष्वर्थेषु प्रसिद्धिमागता इत्यर्थः । दैवीति । संस्कृतरूपेत्यर्थः । अशक्तैः = करणापाटववद्भिः । व्यवकीर्णा = उच्छिन्नाऽनुपूर्वीका कृतेत्यर्थः । अनित्यदर्शिनाम् = शब्दानित्यत्ववादिनाम् । अस्मिन् वादे = शक्तिविचारे इत्यर्थः । ननु 'तेषां साधुरवाचक' इत्यनुपपन्नम्, यस्मिन्नर्थेऽपभ्रंशाः प्रयुज्यन्ते तद्वाचकत्वस्य साधुषु सर्वसम्मतत्वादतो व्याचष्टे—अबोधक इति । व्यवहितः साधुर्न तत्र बोधकः, किन्तु साक्षादपभ्रंशा एव तत्तदानुपूर्वीमत्त्वेन वाचका इति भावः ।

नन्वियं = अपभ्रंशरूपा वाग्, अभिधातृवैगुण्येनोच्छिन्नानुपूर्वीकापि, दैवी = संस्कृतरूपैव, नैयायिकानां त्वस्या अबोधकत्वे भ्रम एव, 'पारम्पर्या'दित्युपादनात् साधुतादात्म्यभ्रान्तिमूलकशक्तिभ्रमेण बोधकत्वसम्भवादित्यर्थकं 'दैवीवाग्व्यकीर्णेय'-मित्यपि पूर्वोक्तान्तिमकल्पस्यैवोपोद्बलकम् । नचैवं 'तेषां साधुरवाचक' इत्यनुपपन्नम्, तत्कल्पे आरोपितसाधुत्वकाद्यपभ्रंशानां बोधकत्वेन साधुस्मरणाद् बोधानभ्युपगमात् । 'तेषा'मित्यादेः साधुतादात्म्यारोपविषयास्त एव प्रसिद्धार्थानां बोधकाः, न तु तत्तदानुपूर्वीमत्त्वेन बोधका इत्यर्थात्तस्मान्नोक्तयुक्त्यापभ्रंशानां तत्त्वेन वाचकतासिद्धिरत आह—किञ्चेति । तासाम् = भाषाणाम् । दोष इति ।

❀ काशिका ❀

कोऽबोधक इति । ननु तत्पदजन्यबोधविषयत्वप्रकारिकेच्छैव शक्तिः, एवं तदर्थबोधजनक-प्रकारिकेच्छा, आद्या शब्दघटिता न त्वर्थघटिता, चरमा त्वर्थघटिता, न [illegible] शब्दघटिता [illegible] च चरमाया विलक्षणविषयतासंबन्धेन गगर्यादिशब्दे भ्रमः संभवत्येवेत्यनुशयान [illegible] चेति । सर्वत्रैकत्वेनेति । महाराष्ट्रसंचारयोग्येष्वेकरूपत्वेनेत्यर्थः, तेन यावनादिदे[illegible]

१ करणापाटवम् = जिह्वादिजाड्यम् ।

शक्तिः, न च तासां नानात्वं दोषः, संस्कृतवन्महाराष्ट्रभाषायाः सर्वत्रैकत्वेन प्रत्येकं विनिगमनाविरहतादवस्थ्यात् ।

किञ्चानुपूर्वी पदेवच्छेदिका, सा च पर्य्यायेष्विव भाषायामप्यन्यान्यैवेति कस्तयोर्विशेष इति विभाव्यं सूरिभिः ।

❀ दर्पणः ❀

तथाच गौरवान्न तत्र शक्तिरित्यर्थः । सकलदेशशिष्टपरिगृहीतत्वमेव विनिगमकमत आह—**अवच्छेदिकेति** । बोधजनकतावच्छेदिकेत्यर्थः । **तयोरिति** । साध्वपभ्रंशयोरित्यर्थः । सकलशिष्टपरिगृहीतत्वं तु न विनिगमकम्, 'शवतिर्गतिकर्मा कम्बोजेषु प्रयुज्यते, विकार एवैनमार्य्या भाषन्ते' इति भाष्यात्तत्तद्देशनियतसंस्कृतेषु शक्तिसिद्ध्यनापत्तेः, वाचकस्य व्यञ्जकतायामालङ्कारिकाणां प्राकृतभाषोदाहरणस्यासङ्गतत्वापत्तेश्च । अत एव तत्तद्देशीयशिष्टानां तत्तद्भाषासु निस्सन्दिग्धः शक्तत्वप्रत्ययः सङ्गच्छते, न चासौ भ्रमः, बाधकाभावादिति भावः । उपसंहरति—

❀ काशिका ❀

तदसत्त्वेऽपि न क्षतिः । संस्कृतशब्दस्यापि तत्रासत्त्वाच्च । **पर्यायेष्विवेति** । नानापर्यायनिष्ठा नानानुपूर्व्यो यथा शक्तितावच्छेदिका अङ्गीक्रियन्ते, तथापभ्रंशनिष्ठा अपि ताः शक्ततावच्छेदकत्वेन स्वीक्रियन्तामविशेषादित्यर्थः । **साधूनामेव** । न तु वाचकमात्रस्येत्यर्थः । अत एव "समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः" इति पस्पशाह्निके भाष्ये उक्तं, तत्र समानत्वं–शब्दान्तरस्मरणापूर्वकत्वेन, अन्यथाऽव्यावर्तकतदुपादानस्य नैरर्थक्यापत्तेः । किं च यादृशं साधुशब्दानां हेतुत्वं तादृशमेवापशब्दानामपि स्वरसतः प्रतीयते, न तु व्यवहितं, तदुपमृद्येतासाधोरवाचकत्वाभ्युपगमे । न चैवमार्यम्लेच्छाधिकरणविरोधः—तत्र हि पीलुशब्दं वृक्षविशेषे आर्याः प्रयुञ्जते, तमेव बुध्यन्ते, अनार्यरूपम्लेच्छा गजे प्रयुञ्जते, तमेव प्रतियन्ति, एवं यवशब्दो दीर्घशूके, तद्भिन्नस्तु कङ्गौ, तत्रार्यप्रसिद्धेर्बलवत्त्वात् पीलुशब्दो वृक्षे एव शक्तो, न तु गजे, यवशब्दो दीर्घशूक एव न तु कङ्गाविति—**सिद्धान्तितं**—तद्विरुध्यत इति वाच्यम्, आर्यप्रसिद्धेर्बलवत्त्वाद्वेदे यवपदस्य दीर्घशूकपरत्वमेव न तु शक्तिसत्त्वेऽपि प्रियङ्गुपरत्वमिति सिद्धान्ताशयस्य वर्णनीयत्वात् । 'शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते, विकार [illegible] आर्या भाषन्ते' इत्यादिभाष्यान्निरुक्ताच्च यथा शवत्यादीनां नियतविषयत्वं तथा वेदे [illegible]रत्वमेव यवशब्द[illegible] यत्र जागर्त्येव, अनार्ये प्रसिद्धेऽर्थे [illegible] वा तात्पर्ये मानाभावात् । जैमिनिरपि सूत्रयांबभूव—'तेष्वदर्शनाद्विरोधस्य [illegible] विप्रतिपत्तिः स्या'दिति । यवशब्दे उभयथा शब्दार्थावगमाद्विकल्पः स्यादिति तदर्थः । एवं [illegible]योरय पूर्वपक्षयित्वा सिद्धान्तसूत्रमाह—'शास्त्रस्थानां तन्निमित्तत्वात्' इति । शास्त्रस्थानां = शास्त्रनिष्णातानां—शिष्टानां, शब्दार्थे, वेदे इति शेषः, तेषां स्मृतिरविच्छिन्ना स्मृतिः, शब्देषु वेदेषु च ते

तथाच संस्कृतवद् भाषा—[याः सर्वत्रैकत्वेन प्रत्येकं—]—शब्दाः शक्ता एव। न च पर्य्यायतया भाषाणां गणनापत्तिः, साधूनामेव कोशादौ विभागाभिधानात्।

नन्वेवं साधुता तेषां स्यादित्यत आह—नियम इति। पुण्यजननबोधनाय साधूनां, 'साधुभिर्भाषितव्य'मिति विधिः, पापजनबोधनाय 'नासाधुभि'रिति निषेधः। तथाच पुण्यजननयोग्यत्वं साधुत्वम्, पापजननयोग्यत्वमसाधुत्वम्, तत्र जनकतावच्छेदिका च जातिः,—

❀ दर्पणः ❀

तथाचेति। एवम् = अपभ्रंशानामपि शक्तत्वे। तेषाम्=अपभ्रंशानाम्। साधुता स्यादिति। शक्तत्वस्यैव साधुत्वादिति भावः। साधुभिर्भाषितव्यमिति। 'साधूनेव 'प्रयुञ्जीते'त्यादिरूपश्चेत्यर्थः। नासाधुभिरिति। 'नापभ्रंशितवै न म्लेच्छितवै' इत्यादिनिषेधविधिरित्यर्थः। योग्यत्वं—जनकतावच्छेदकधर्मवत्त्वम्। तत्र=साधुशब्दे। जातिरिति। तत्र प्रमाणं त्वे'कः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवती'त्ये'कः पूर्वपरयो'रित्यत्र भाष्यपठितश्रुतिः। सम्यग् ज्ञातः=साधुत्वेन ज्ञातः। यदिह परिनिष्ठितं तत् साध्वित्यर्थापत्तिलभ्यवाक्येन च तत्। शास्त्रान्वितः=शास्त्रव्युत्पादनमार्गेणाऽभिसंहितः। सुप्रयुक्तः=शिक्षाद्युक्तमार्गेण प्रयुक्त इति तदर्थः। 'ते हेलयो हेलय इति कुर्वन्तः पराबभूवु'रिति

❀ काशिका ❀

शिष्टा हि श्रुतिस्मृतिधारणे निमित्तमित्यर्थः। अपभ्रंशानां वाचकत्वादेव—वाचकस्य व्यञ्जकत्वे 'माए'घरोव क्खरण'मित्यादि भाषोदाहरणं काव्यप्रकाशकृतामाञ्जस्येन संगच्छते इत्यलं विस्तरेण। पुण्यजननेति। तदुक्तमेकः पूर्वपरयोरिति सूत्रे भाष्ये—'एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः शास्त्रान्वितः स्वर्गे लोके कामधुग्भवती'ति। इयं श्रुतिरिति प्राञ्चः। स्मृतिरित्यन्ये। पापजननेति। पापजनकोऽसाधुशब्दप्रयोग इति बोधनाय'न म्लेच्छितवा' इति निषेधः, निषेधेन निषेध्येऽनिष्टबोधनादिति भावः, अयञ्च निषेधो याज्ञे कर्मण्येवेति पस्पशाह्निके भाष्यादौ स्पष्टं, निरूपितं चैतत्प्रागाख्यातार्थविचारे। पुण्यजननेति। तत्स्वरूपयोग्यत्वरूपं पुण्यजनकत्वमित्यर्थः। एवमग्रेऽपि। कोशादीति। आदिपदमाप्तवाक्यादिसंग्रहाय। व्याकरणादीत्यादिपदमुपम

१ माए! घरोवक्खरणं अज्जहु णत्थित्ति साहिअं तुमए।
ता भण किं करणिज्जं एमे अण वासरो ठाई। इति प्राकृतगाथा।
[मातर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया।
तद्भण किं करणीयमेवमेव न वासरः स्थायी॥]—इतिच्छाया।

तज्ज्ञापकञ्च—कोशादि, व्याकरणादि च।

एवमेव च राजसूयादेर्ब्राह्मणे फलाजनकत्ववद् गवादिशब्दानां नाश्वादौ साधुत्वमिति सङ्गच्छते।

आधुनिकदेवदत्तादिनाम्नामपि 'द्व्यक्षर'मित्यादिभाष्येण व्युत्पादितत्वात् साधुत्वम्। एवञ्च यः शब्दो यत्रार्थे व्याकरणे व्युत्पादितः स तत्र साधुरिति पर्यवसितम्।

गौणानां गुण व्युत्पादनात्तत्पुरस्कारेण प्रवृत्तौ साधुत्वमेव, आधुनिक-

---

✽ दर्पणः ✽

श्रुतिश्च। यदि वाचकत्वादीनां साङ्कर्यान्न तस्य जातित्वमिति विभाव्यते तदास्तूपाधिरिति भावः। **तज्ज्ञापकमिति**। तदभिव्यञ्जकमित्यर्थः, यथैतत्तथोक्तम्। व्याकरणादिपदाच्छिष्टप्रयुक्तत्वपरिग्रहः। **एवमेवेति**। तत्तदर्थपुरस्कारेण तत्तच्छब्दानां साधुत्वपर्य्यवसानलाभेनैवेत्यर्थः। **फलाजनकत्ववदिति**। क्षत्रियाधिकारिकृतस्यैव तस्य फलश्रवणादिति भावः। **साधुत्वमिति**। गवाद्यर्थपुरस्कारेणैव गवादिशब्दानां प्रयोगे पुण्यजनकत्वरूपं साधुत्वमित्यर्थः। नन्वाधुनिकदेवदत्ताद्यर्थपुरस्कारेण देवदत्तादिशब्दानां शास्त्रे अव्युत्पादनात्तेषां देवदत्तादौ साधुता न स्यादत आह—**आधुनिकेति**। **द्व्यक्षरमिति**। 'घोषवदाद्यन्तरन्तःस्थं द्व्यक्षरं चतुरक्षरं वा पुरुषस्य नाम कृतं कुर्य्यान्न तद्धित'मिति भाष्यस्थस्मृत्येत्यर्थः। तत्तद्देशभाषानुसारेण क्रियमाणानां नाम्नां तु शास्त्राव्युत्पन्नत्वादसाधुत्वमेवेति भावः। **गौणानामिति**। शुक्लादिशब्दानामित्यर्थः। गुणे=स्वशक्ये शुक्लादिरूपे। **व्युत्पादनादिति**। 'गुणवचनेभ्यो मतुपो लु'गिति स्मृत्या, 'गुणे शुक्लादयः पुंसी'त्यादिकोशेन चेत्यस्यादिः। तत्पुरस्कारेण=नीलाद्यर्थपुरस्कारेणेत्यर्थः। प्रवृत्तौ=गुणिनि प्रयोगे। शक्यार्थस्य बाधेन्वयानुपपत्तिप्रतिसन्धानात्तैर्लक्ष्या-

✽ काशिका ✽

संग्रहाय, कोशादेः साक्षात्प्रातिपदिकशक्तिग्राहकतया प्रथमतस्तदुपादानं, प्रायः कोशादित एव [illegible]क्तिग्रहाच्च। **ब्राह्मणे फलेति**। 'राजा राजसूयेन यजेते'त्यत्र राजपदस्य रूढ्या क्षत्रियार्थ[illegible]शा ब्राह्मणस्य [illegible]नाधिकारित्वान्तेन कृतं तत्र फलाजनकत्वमित्यर्थः। **नाश्वादौ साधुत्व**संज्ञा[illegible] अर्थविशेषनिबन्धनत्वात्साधुत्वस्येति। **पर्यवसितमिति**। अपभ्रंशास्तु न तदर्थे [illegible]त्पन्ना इति न साधव इति भावः। **गौणानामिति**। 'सिंहो माणवक' इत्यादौ सिंहादिशब्दानां क्रौर्यादिगुणयोगात् पुरुषे आगतानां=प्रवृत्तानामित्यर्थः, 'तत्र आगतः' इत्यण्। गुणे=गोत्वादिधर्मे। तत्पुरस्कारेण=तत्तद्धर्मपुरस्कारेण, शक्यतावच्छेदकधर्मारोपेणेति यावत्।

लाक्षणिकानां त्वसाधुत्वमिष्टमेव, अत एव 'ब्राह्मणाय देही'त्यर्थे 'ब्राह्मणं देही'त्यादिकं लक्षणयापि न साधुरित्यादि—विस्तरेण प्रपञ्चितं भूषणे ॥३८॥

अतिरिक्तशक्तिग्रहोपायमाह—

सम्बन्धिशब्दे सम्बन्धो योग्यतां प्रति योग्यता ।
समयाद् योग्यतासंविन्मातापित्रादियोग्यवत् ॥३९॥

॥ दर्पणः ॥

र्थापस्थापनेऽपि शक्यार्थमादाय तेषां शास्त्रव्युत्पन्नत्वादित्यर्थः। गौणपदस्य निरूढ-लाक्षणिकपदोपलक्षणत्वाच्च न 'गङ्गायां घोष' इत्यादौ गङ्गादिपदानामसाधुत्वमिति भावः। **आधुनिकानामिति** । ऐच्छिकयत्किञ्चित्सम्बन्धेन शास्त्रकृत्तात्पर्याविषये प्रयुक्तानामित्यर्थः ॥३८॥

ननु शक्तिग्राहकयोः कोशव्याकरणयोर्विद्यमानत्वाच्छक्तिग्रहोपायकथनं व्यर्थमत आह—**अतिरिक्तेति** । कोशव्याकरणाभ्यामतिरिक्तो यः शक्तिग्रहोपायस्तमित्यर्थः। तथाचानधीतव्याकरणानां तेन शक्तिग्रहासम्भवात् तदर्थं व्यवहाररूपमप्युपायमाहेति पर्य्यवसानान्न वैयर्थ्यमिति भावः। एतेन ग्रन्थकृतातिरिक्तशक्तेरनङ्गीकारेण तद्-ग्रहोपायप्रदर्शनं व्यर्थमित्याशङ्कापि समाहिता। विषयपदाध्याहारेण मूलं व्याचष्टे—

॥ काशिका ॥

आरोपे निमित्तं तु क्रौर्यादिगुणयोगः, 'सिंहो माणवक' इत्यादौ सिंहत्वादिरूपेण माणवकादे-र्भानमिति भावः, 'गङ्गायां घोष' इत्यादावप्येवम् । स्पष्टं चेदं काव्यप्रदीपोद्योते । 'क्रूरो माणवक' इत्याकारकबोधाभ्युपगन्तृनये तु इदं न संगच्छते, सिंहादिशब्दानां क्रौर्याद्यवाचकत्वात् । गुणवा-चकशुक्लादिशब्दपरत्वेन प्रकृतग्रन्थयोजने तु 'गङ्गायां घोषः' 'सिंहो माणवक' इत्याद्यसंग्रहापत्तिः। **आधुनिकेति** । शक्यतावच्छेदकातिरिक्तरूपेण बोधकतात्पर्यकाणां लाक्षणिकानां त्वित्यर्थः। **लक्षणयाप्यसाधुरिति** । अत एव कर्मादौ षष्ठ्यादेरनुशासनं चरितार्थमित्यन्यत्र विस्तरः, अपभ्रंशानां वाचकत्वेऽपि न प्रातिपदिकसंज्ञा, साधुत्वस्याप्युद्देश्यतावच्छेदकत्वात्, अत एव 'सिद्धे शब्दार्थसंबन्धे लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः' इति वार्तिककृतोक्तम् 'साध्वनुशासनेऽस्मिन्शास्त्रे' इति च भाष्य उक्तम् । [illegible] शाब्दबोधे हेतुत्वं साधुत्वनिश्चयस्य प्रतिबन्धकत्वं वेति कथं तेभ्यो साधुत्वग्रहवतां बोध इति न शङ्क्यं, [illegible]ज्ञानान्तरमद-ज्ञानविरहिणामसाधुत्वनिश्चयवतामपि शाब्दानुभवात्, साधुत्वज्ञानस्य हेतुत्वादसाधुत्वनिश्चयस्य [illegible] प्रतिबन्धकत्वाच्च, तदेतदभिप्रेत्याह—**विस्तरेणेति** ॥ ३८ ॥

अतिरिक्तेति । इच्छाविशेषातिरिक्तेत्यर्थः, सा पुनर्बोधजनकतारूपा, पदार्थान्तररूपा वा

सम्बन्धोविषयः । योग्यतां प्रति = योग्यतासम्बन्धिशब्द प्रति, योग्यता—विषय इति, समयाद् योग्यतासंवित् = शक्तिग्रहः । 'घटपदमत्र योग्यमेतत्सम्बन्धी'ति व्यवहारात्सा ग्राह्येत्यर्थः ॥३९॥

❀ इति शक्तिनिर्णयः ॥६॥ ❀

❀ दर्पणः ❀

सम्बन्धो विषय इति । तथाचा'यमेतत्सम्बन्धी'ति व्यवहारे सम्बन्धो विषयः । योग्यतां प्रति = 'इदमत्र योग्य'मिति योग्यताव्यवहारे, योग्यता विषयो यतोतः= समयात् = तद्व्यवहाराद्योग्यतायां बोधकतारूपशक्तेः संवित् = ज्ञानं भवतीत्यर्थः । तत्र दृष्टान्तो—मातापुत्रादियोग्यवदिति । यथायमेतत्सम्बन्धीति व्यवहारस्तयोर्जन्यजनकभावनिश्चायकस्तद्वदित्यर्थः ।

अन्ये त्विदं हरिपद्यमित्थं व्याचक्षते—'सम्बन्धिशब्दे = अयमेतत्सम्बन्धीति व्यवहारे, योग्यतां प्रति=अर्थबोधजनकतावच्छेदकधर्मवत्त्वरूपयोग्यताव्यवहारनिरूपितो यस्तादात्म्यलक्षणोऽन्यो वा सम्बन्धः स एव योग्यताऽपरपर्य्यायो, 'विषय' इति शेषः । स चानादिवृद्धव्यवहारापरपर्य्यायोस्मदादिसमयान्निश्चीयते, न तु बोधजनकत्वमेव शक्तिरेतद्बोधजननेयं योग्य इति व्यवहारात् । अत एवैतच्छेषे—

सति प्रत्ययहेतुत्वं सम्बन्धे उपपद्यते ।
शब्दस्यार्थे यतस्तस्मात्सम्बन्धोऽस्तीति गम्यते ॥

❀ काशिका ❀

भवतु । संबन्धो विषय इति । तज्जन्यप्रतिपत्तिविषयः । तथा च 'संबन्धशब्दे संबन्ध' इत्यस्य संबन्धशब्दवाच्यः संबन्ध इत्यर्थः, एवं योग्यतां प्रतीत्यादेरर्थो बोध्यः, 'संबन्ध'शब्दस्य 'योग्यता'शब्दस्य चार्थप्रदर्शनस्य प्रकृतोपयोगमाह—घटपदमित्यादिना । अत्र योग्यं = घटरूपार्थे योग्यं, तद्विषयकबोधजननयोग्यमिति यावत् । एतत्संबन्धीति । घटसंबन्धीत्यर्थः । सा = शक्तिः । तथा च प्राथमिकशक्तिग्रह उक्तव्यवहाराद्भवति, तत्र च संबन्धादिशब्दशक्तिग्रहोऽपेक्षितोऽतस्तदर्थप्रदर्शनं कृतं, तत्र दृष्टान्तो—मातेति । 'योग्यव'दिति पाठे मात्रादियोग्यः = तत्प्रतियोगिकत्वादिविशिष्टः, संबन्धो, यथा लोकव्यवहाद् गृह्यते तथेत्यर्थः, 'योगव'दिति पाठस्तु स[illegible] । परे तु—संबन्धशब्दे [illegible]तावच्छेदकधर्मरूपयोग्यता-[illegible] यस्ताद[illegible]लक्षणः संबन्धः स एव योग्यता, सा च स्वाभाविक्येवानादिवृद्धव्यवहारसंज्ञ[illegible]र्यायो योऽस्मदादिसमयस्तेन गृहीतेनोक्तेश्वरसमयान्निश्चीयते, यथा मातापुत्रयोर्जन्य-[illegible]भावलक्षणसंबन्धो व्यवहारान्निश्चीयते तथेत्यर्थः, न तु जनकत्वमेव योग्यता, 'एतज्जननेऽयं योग्य' इति व्यवहारादित्याहुः । अत्र कल्पे—'संबन्धशब्द' इत्यस्य—संबध्यत इति संबन्धः, कर्मणि

❀ नञर्थनिर्णयः ❀

नञर्थमाह—

नञ्समासे चापरस्य प्राधान्यात्सर्वनामता ।
आरोपितत्वं नञ्द्योत्यं न ह्यसोप्यतिसर्ववत् ॥४०॥

नञ्समासे अपरस्य = उत्तरपदार्थस्य प्राधान्यात् सर्वनामता, 'सिद्ध्यती'ति शेषः। अत एव—आरोपितत्वमेव नञ्द्योत्यम्,—'इत्यभ्युपेय'मिति शेषः।

❀ दर्पणः ❀

—इत्यन्तेनोक्तार्थः स्पष्टीकृत इति अधिकमन्यतोवधार्यम् ॥३९॥

❀ इति शक्तिनिर्णयः ॥६॥

'समासे खलु भिन्नैवे'त्यत्र 'पङ्कजशब्दव'दितिवदता समासे तद्घटकप्रत्येकशक्तिसहकृतसमुदायशक्तेर्व्यपेक्षात्वमङ्गीकृतम्, तच्चानुपपन्नं, यत्र समासघटकप्रत्येकपदस्यानर्थकत्वं तत्र प्रत्येकशक्तिसाचिव्यासम्भवात्। यथा नञ्समासघटकनञः, 'द्वयोरर्थाभिधाने हि व्यापारो नैव विद्यते' इत्युक्तेः, एवञ्च जहत्स्वार्थावाद इवेदृशस्थले उत्तरपदार्थादिप्राधान्यस्य स्वरसतोऽनुपपत्तिरपीतीमां शङ्कां परिहर्त्तुं नञर्थनिरूपणमित्याह–**नञर्थमिति**। मूले—**नञ्समास इति**। अयं भावः–'घटो न पटो', 'घटो नास्ती'त्यादावभावशाब्दबोधस्य सार्वजनीनप्रसिद्धिसिद्धत्वान्नञोऽभावार्थकत्वमावश्यकं, तथाचोत्तरपदार्थप्राधान्यादिव्यवस्था सुलभा। यद्यपि 'घटो ने'त्यादावभावविशेष्यक एव बोधस्तथाप्यसर्व इत्याद्यनुरोधेनारोपितत्वार्थकत्वमपि नञोऽङ्गीकरणीयमिति। शेषपूरणेन व्याचष्टे सारे—**सिद्ध्यतीति**। **अत एवेति**।

❀ काशिका ❀

घञ्—तत्तदर्थे संबद्धो घटादिशब्द इत्यर्थो बोध्यः, संबन्धशब्दो योग्यतां प्रति संबद्धो योग्यतेति कारिकायां योजना बोध्या। अथवा 'इदं पदमेतदर्थसंबधो'त्यत्रत्यसंबन्धशब्द इत्यर्थः, इत्थं च संबन्धशब्दो–भावघञन्त [illegible] योग्यताविषय इत्यर्थ इति दिक् ॥३ [illegible] बोध इति न [illegible] तरमन

* इति शक्तिनिर्णयः ॥ ६ ॥ *

[illegible] निश्चय [illegible]

'आरोपितत्वं नञ्द्योत्य'मित्यनेन नञर्थ एव प्रदर्श्यते न तु समासार्थ इति [illegible] **नञर्थमाहेति**। प्रसङ्गसंगतिरत्र बोध्या। अपरशब्दार्थमाह–**उत्तरपदार्थस्येति**। **एव** = उत्तरपदार्थप्राधान्यानुरोधादेव। **आरोपितत्वमिति**। आरोपितब्राह्मणत्वादि ब्राह्मणादि-

अयं भावः—'असर्व' इत्यादावा'रोपितः सर्व' इत्यर्थे सर्वशब्दस्य प्राधान्याबाधात्सर्वनामता सिद्ध्यति। अन्यथा 'अतिसर्वे' इत्यत्रेव सा न स्यात्, 'घटो नास्ती'त्यादावभावविषयकबोधे तस्य विशेष्यतायां एव दर्शनात्, अस्मद्रीत्या च स आर्थो बोधो मानसः। तथाचासर्वस्मै इत्याद्यसिद्धिप्रसङ्गो नेति। अत्र चारोपितत्वम् = आरोपविषयत्वम्। आरो-

❀ दर्पणः ❀

प्राधान्यानुपपत्तेरेवेत्यर्थः। ननु नञस्तत्राभावार्थकत्वे कथं प्राधान्यानुपपत्तिरित्यतो भावार्थमाह—अयम्भाव इति। अन्यथा=आरोपितत्वार्थकत्वानभ्युपगमे, भेदार्थकत्व इति यावत्। सा = सर्वनामसंज्ञा। न स्यादिति। 'असर्व' इत्यत्र नञोऽभेदार्थकत्वे तत्र प्रतियोगितया सर्वपदार्थस्योपसर्जनत्वेन संज्ञोपसर्जनानां सर्वादिबहिर्भूतत्वेनाऽ'तिसर्वे' इत्यादाविव तदप्रवृत्तेरिति भावः। 'ननु भेदप्रतियोगी सर्वं' इति तत्र बोधाभ्युपगमान्नोत्तरपदार्थस्य प्राधान्यहानिरत आह—घटो नास्तीत्यादाविति। तस्य = नञर्थस्य। नञर्थाऽभाववत्त्वस्य विशेष्यतायां तन्त्रत्वादिति भावः।

ननु तथाप्य'घटः पट' इत्यतो घटभिन्नः पट इति सर्वसिद्धप्रतीत्यनुपपत्तिरत आह—अस्मद्रीत्येति। सः=भेदबोधः। आर्थ इति। अर्थात्=उपस्थितिविषयादागत इत्यर्थः। मानस इति। तत्र शाब्दत्वप्रत्ययस्त्वसिद्ध एवेति भावः। नन्वसर्वशब्दस्य सर्वनामत्वाभावे का क्षतिरत आह—तथाचेति। अत्र चेति। आरोपितत्वं नञ्-

❀ काशिका ❀

पदप्रवृत्तिनिमित्तमित्यत्राह्मणादिपदघटकनञा द्योत्यत इत्यर्थः। अन्यथा = उत्तरपदार्थप्राधान्यविरहे। अतिसर्वे इत्यत्रेवेति। सर्वमतिक्रान्त इत्यर्थे 'अत्यादयः क्रान्ताद्यर्थे द्वितीयये'ति समासे पूर्वपदार्थप्रधाने सर्वशब्दस्योपसर्जनतया सर्वादित्वाभावेन यथा न सर्वनामत्वं, तथात्रापि नञो भेदार्थकत्वे सर्वभिन्न इत्यर्थेऽसर्व इत्यादेर्न स्यात्, तथा च—'असर्वे' 'असर्वस्मै' इत्यादिप्रयोगानुपपत्तिः। नञन्योन्याभावार्थकत्वपक्षे तस्य प्रतियोगितासंबन्धेन प्रतियोगिनि विशेषणत्वे उत्तरपदार्थप्राधान्यं निर्वहेदित्याशङ्क्याह—घटो नास्तीत्यादाविति। तस्य = अभावस्य। विशेष्यताया एवेति। 'घटाभावोऽस्तित्वाश्रय' इत्याकारकस्य, 'घटकर्तृकसत्ताभाव' इत्याकारकस्य वा [illegible]स्यानुभवसिद्धत्वादित्यर्थः। नन्वेवमघट इत्यादौ घटभिन्न इति बोधस्य सार्वजनीनस्याप- [illegible]योग्य इत्याशङ्क्या[illegible] समवाय्य[illegible]तन्निषेधः [illegible]घटत्वस्यारोपात्तद्भिन्न इति [illegible] न तदपलापः, तत्र शाब्दत्वप्रतीतिस्तु शब्दप्रयोज्यत्वाद्भ्रमरूपैवेति भावः। [illegible]संज्ञ[illegible]रोपविषयत्वमिति। तस्य चोत्तरपदार्थे ब्राह्मणादावन्वयः, आरोपश्च प्रत्यासत्त्या प्रवृत्ति[illegible]प्रकारक एव प्रतीयते, एवं चा'ब्राह्मण' इत्यत आरोपविषयत्ववान् ब्राह्मण इति बोधः, तथाविधश्च क्षत्रियादिरेवाब्राह्मणशब्देन प्रतिपाद्यते नञ्समभिव्याहारे, समवायसंबन्धसंसर्गकारोप-

पमात्रमर्थो, विषयत्वं संसर्ग इति निष्कर्षः । द्योत्यत्वोक्तिः—निपातानां द्योतकत्वमभिप्रेत्य ॥ ४० ॥

❀ दर्पणः ❀

वाच्यमिति कल्पे चेत्यर्थः । **निष्कर्ष इति ।** विषयत्वस्य संसर्गमर्यादयैव दनन्यलभ्यारोपस्यैव नञर्थत्वं, नत्वारोप विषयत्वस्य,—गौरवादिति भावः । नन्वारोपस्य वाच्यत्वाभ्युपगमे द्योतकताप्रतिपादकमूलविरोधोऽत आह—**द्योत्यत्वोक्तिरिति ।** वाच्यस्यापि तस्य विशेषणतैव नाभाववद्विशेष्यतेति सूचयितुं परं तथोक्तिरिति भावः ॥४०॥

❀ काशिका ❀

संबन्धेन ब्राह्मणत्वादिके प्रतीयते इत्यारोपविषयो ब्राह्मण इत्याकारकता बोधस्य नानुपपन्ना, आरोपस्तु कस्यचित् तदानीमपि संभवत्येवेति नासंगतिः । स्पष्टं चेदमत्रैव सूत्रभाष्ये— 'संदेहादुरुपदेशाद्वा' इत्यादिग्रन्थे । अथवा 'रोपविषयत्व'मित्यस्यारोपविषयप्रवृत्तिनिमित्तकत्वमित्यर्थः, व्यवहितकाले आरोपसत्त्वेऽपि न क्षतिः, आरोपिततात्कालित्वस्यानिवेशात् । आरोपविषयत्वस्य प्रकारतया ससर्गतया च भानम् राज्ञः पुरुष इत्यत्र षष्ठ्यर्थस्वत्वादेरिव भानमविरुद्धम्, अब्राह्मण इत्यादित आरोपितब्राह्मणत्ववानिति बोधः, आरोपितत्वविशिष्टब्राह्मण्यवत्त्वं ब्राह्मणभिन्ने एवेति न ब्राह्मणेऽब्राह्मणशब्दप्रयोगः । लघुभूतमर्थमाह—**आरोपमात्रमर्थ इति ।** नञो द्योत्यो वाच्यो वार्थः, स चोत्तरपदार्थे विषयत्वसंबन्धेन विशेषणमित्याह—**विषयत्वं तु संसर्ग इति ।** तथा चैतत्पक्षे निष्कर्ष इति पूर्वपक्षापेक्षयात्र पक्षे लाघवादित्याशयः । भाष्यसंमतस्तु—'अथवे'त्याद्युक्तः पूर्व एव कल्पः, युक्तश्चाथोऽन्त्यस्तु न, आरोपस्य नञ्वाच्यत्वेऽपि ब्राह्मणादिपदानां मुख्यसंबन्धेन ब्राह्मण्यवति शक्तिग्रहात्तत्रारोपान्वयस्यासंभवात् । न च नञ्समभिव्याहारनिबन्धनो मुख्यार्थत्यागः शब्दार्थसंबन्धस्यानित्यतापत्तेः, मध्यमकल्पे तु न दोषः, मुख्यसंबन्धेन ब्राह्मणत्ववत इवारोपितसंबन्धेन तद्वतोऽपि तदर्थत्वात्, नञ् त्वन्त्यार्थे तात्पर्यनिर्णायकः, इदमेव नञो द्योतकत्वं नाम, एतावतैवात्रैकार्थीभावव्यवहारोऽपि, अर्थवत्त्वमपि समासस्योपपद्यते द्योत्यार्थान्तर्भावेण विशिष्टानुपूर्व्याः शक्ततावच्छेदकत्वादित्याहुरित्यन्यत्र विस्तरः । अन्ये त्वब्राह्मण इत्यादौ ब्राह्मणादिपदं तादात्म्यसंबन्धेन ब्राह्मणाद्यारोपविषयार्थकं च, नञ् तात्पर्यनिर्णायकः, एवं चा'ब्राह्मणोऽयमि'त्यत्र ब्राह्मणारोपविषयोऽयमिति बोधः, आरोपितो ब्राह्मण इत्यनेनाप्युक्त एव बोध इत्युच्यते इत्याहुः । अत्रारोपो ब्राह्मणाभिन्नमात्रविशेष्यको ग्राह्यः, तेने'मौ ब्राह्मणा'विति समूहालम्बनारोपवि[illegible]प्रयोगः । ननु नञ[illegible]र्थवाचकत्वस्वीकारेऽपि न क्षतिः, आरोपविषयत्वरूपस्यारोपितत्वरूपस्यारो[illegible]स्या[illegible]ज्ञानान्तरभविषयतासंसर्गेणोत्तरपदार्थे विशेषणत्वसंभवेनाभिमतोत्तरपदार्थप्राधान्यसिद्धेरत आह[illegible]त्वोक्तिरिति । निपातमात्रस्य द्योतकत्वमिति सिद्धान्तानुरोधात् तथोक्तिर्न तु प्रकृते वाच स्वीकारे काचित् क्षतिरिति भावः । वस्तुत उक्तार्थवाचकत्वपक्षे दोष उक्त एवेति प्रागुक्तार्थ-

'घटो नास्ति' 'अब्राह्मण इत्यादावारोपबोधस्य सर्व्वानुभवविरुद्धत्वा-त्पक्षान्तरमाह—

अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशयात् ।
विशेषणं विशेष्यो वा न्यायतस्त्ववधार्यताम् ॥ ४१ ॥

तदर्थः = नञर्थः । 'अर्थ'पदं द्योत्यवत्त्वाच्यत्वपक्षयोः साधारण्येन कीर्त्तनाय । भाष्यस्येति । तथाच 'नञ्'-सूत्रे महाभाष्यम्—'निवृत्त-पदार्थक' इति । निवृत्तं पदार्थो यस्य,–'नपुंसके भावे क्त' इति क्तः । अभावार्थक इत्यर्थः । यत्तु—'निवृत्तः पदार्थो यस्मिन्नित्यर्थः, सादृश्या-

❀ दर्पणः ❀

घटो नास्तीति । यद्यपि समासयोग्यनञ एवारोपार्थकत्वं मूले उक्तं, तथापि 'घटो नास्ती'त्युक्तिरत्रैव तत्राप्यारोपाननुभव इति दृष्टान्तार्थेत्यवधेयम् । 'नञ्द्योत्य'मित्यत्र नञो विशेषणतया व्यवधानेन चोपस्थितत्वेऽपि तत्पदादीनां बुद्धिस्थपरामर्शकत्वात्तदा[1] तत्परामर्शो नानुचित इत्याह—**तदर्थो नञर्थ इति । साधारण्येनेति ।** प्रकृतेऽर्थपदस्य तज्जन्यबोधविषयपरतया पक्षद्वयसंग्रहः ।

❀ काशिका ❀

द्योतकत्वमेव युक्तमिति वदन्ति । 'आरोपितब्राह्मणत्ववा'निति शाब्दबोधोत्तरं जायमानब्राह्मण-भिन्नः क्षत्रिय इति बोधापत्तिः, एवं 'घटो भूतले नास्ती'ति वाक्यादारोपिता घटकर्तृका भूतला-धिकरणिका सत्तेति शाब्दबोधोत्तरं तादृक् सत्ताभावबोधो मानसो भवति, तेन घटकर्तृकभूतला-धिकरणकसत्ताबोधः प्रतिबध्यते, अभावाज्ञानस्य पूर्ववर्तिन एव प्रतियोगिमतो बुद्धिप्रतिबन्धक-त्वमिति न नियमोऽपि तु तत्कार्यसहभावेनापीति नाभावबुद्ध्युत्पत्तिसमयेऽपि प्रतियोगिबुद्ध्युत्पत्तिः 'वायौ रूपं नास्ति' 'शङ्खः पीतो नास्ती'त्यादावपि वाय्वधिकरणिका रूपकर्तृका सत्ता आरोपिता, पीतशङ्खकर्तृकारोपितेति बोधः, विशिष्टप्रसिद्धिस्त्वाहार्यैव, रूपकर्तृकसत्तायां वाय्वधिकरणकत्वा-रोपः, पीतकर्तृकसत्तायां शङ्खकर्तृकत्वारोपश्च पर्यवस्यति, आरोपिता तथाविधसत्तेत्येवं बोधवर्णनं तु क्रियायाः प्राधान्यतयैव नञर्थान्वय इत्यभिप्रेत्येति बोध्यम् ॥ ४० ॥

तदाशयादिति । तस्मिन् = अभावस्य नञर्थत्वे, आशयात् = तात्पर्यात् । **साधारण्ये-**[illegible] । नञ्वाच्यस्याप्यु[illegible] विशेषणत्वं [illegible]विशेष्यत्वं वा कल्प्यते । द्योत्यार्थे-[illegible] वा [illegible] विशेष्यत्वं च, अथवा वाचकत्वपक्षे विशेष्यत्वं द्योत्यत्वपक्षे विशेषणत्वम्, संज्ञा[illegible]व द्योत्यार्थानां विशेषणत्वमेवेति 'हेतुमति चे'ति सूत्रभाष्यसिद्धनियमभङ्गो नेति [illegible]ध्यम् । निवृत्तशब्दार्थमाह—**अभावार्थक इतीति । अध्यारोपितेति ।** अध्यारोपितं

१ तदा = 'तदर्थ' इति तच्छब्देन । तत्परामर्शः = नञः परामर्शः ।

दिनाध्यारोपितब्राह्मण्याः क्षत्रियादयोऽर्था यस्येत्यर्थ' इति कैयटः तन्न;—आरोपितब्राह्मण्यस्य क्षत्रियादेर्नञ्वाच्यत्वात् ।

ॐ दर्पणः ॐ

तत्रासति बाधकं वाचकत्वमेव, सति तु तस्मिन् द्योतकतापीति भावः । नञ्वाच्यत्वादिति । "यद्यप्युत्तरपदार्थप्राधान्येन नञ्तत्पुरुषस्य-ब्राह्मणमात्रस्यानयनं प्राप्नोति, नञः प्रयोगान्नञर्थविशिष्टस्यानयनं भविष्यति, कः पुनरसौ नञर्थो ? निवृत्तपदार्थकः; ब्राह्मणदृष्टस्य गौरत्वादेर्दर्शनाद्, दुष्टोपदेशाद्वा पूर्वं ब्राह्मणोऽयमित्यध्यवस्यति, ततः पश्चादुपलभते 'नायं ब्राह्मण' इति, ततोऽब्राह्मणोऽयमिति प्रयुङ्क्ते, अतश्च तद्दृष्टगुणदर्शनाद्, दुष्टोपदेशाद्वा ब्राह्मणत्वाद्यध्यवसायपूर्वकमेव नाऽयं ब्राह्मण इति ज्ञानम्, न ह्ययं कालवर्णमापणे दृष्ट्वाऽध्यवस्यति—ब्राह्मणोयमिति; यथास्थितं वस्तुतत्त्वं तस्य निर्ज्ञातं भवती"ति नञ्सूत्रभाष्यपर्य्यालोचनया कैयटोक्तार्थस्यैव साधुत्वं लभ्यते । तथापि तद्भाष्यस्याऽभेदप्रत्यक्षे क्वचिद् योग्यानुपलब्धेर्हेतुत्वप्रदर्शनपरतयैवोपपत्तेर्नञ आरोपवाचकत्वे तदुपष्टम्भकत्वाभावात् । अन्यथात्यन्तासदृशे उक्तयुक्त्या तदारोपासम्भवेन तत्र नञस्तदर्थकत्वासम्भवादघटः पट इत्यनापत्तेः, 'प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमा'विति तान्त्रिकोक्तेर्नीलो घट इत्यादौ तादात्म्येन घटांशे नीलपदार्थभानान्नञ्समभिव्याहारे तादात्म्यसम्बन्धावच्छिन्ननीलाभावबोधस्य सर्वानुभवसिद्धस्य नञोऽभावार्थकत्वं विनानुपपत्तेर्नेदं 'रजत'मि'दं रजत'मिति वाक्यजन्यबोधयोस्तत्तदभावानवगाहितया परस्परप्रतिबध्यप्रतिबन्धकभावाऽनापत्तेश्च—नञो भेदार्थकत्वमावश्यकम् । नच नञो भेदार्थकत्वेऽब्राह्मणमानयेत्यादितो ब्राह्मणभिन्नलोष्टादेरपि बोधापत्तिः, न चेष्टापत्तिः, 'न ह्यब्राह्मणमानयेत्युक्ते लोष्ठमानीय कृती भवती'ति भाष्यविरोधादिति वाच्यं, घटत्वेन घटार्थकघटपदात् सन्निहितव्यक्तिबोधवत् प्रकरणादिना ब्राह्मणभिन्नमात्रार्थकाद् ब्राह्मणपदात् क्षत्रियादेरेव बोधसम्भवात् । तस्मादघटो न पट इत्याद्यसमस्ते नञोऽभेद एव शक्तिः, भेदत्वस्याखण्डोपाधितया तस्य शक्यतावच्छेदकत्वे लाघवात्, समासघटकस्य तस्य तु उत्तरपदस्य तद्भिन्ने लक्षणायां तात्पर्यग्राहकत्वमेव । नच 'न ब्राह्मणैरेतैरुपद्रुत'मित्यादौ नञो भेदार्थकत्वे तत्प्रतियोग्यनुयोगिवाचकपदयोः समानविभक्तिकत्वा[illegible]धिकरण्याभ[illegible]

ॐ काशिका ॐ

ब्राह्मण्यं येषु त इत्यर्थः । नञ्वाच्यत्वादिति । लाघवाल्लोकप्रसिद्ध्या च नञोभाव एव [illegible] 'अब्राह्मणो देवदत्त'इत्यादौ देवदत्तादिनानुभूयमानसामानाधिकरण्योपपत्तिस्वाश्रये लक्षणा बोध्येति भावः । अन्यथा = अनुभवस्यान्यथोपपत्तावप्यध्यारोपितब्राह्मण्यकस्य नञ्वाच्यत्वे ।

॥ दर्पणः ॥

दिति वाच्यं, प्रतियोग्यनुयोगिनोरभेदान्वयबोधौपयिकाकाङ्क्षायां सत्यामेव नञा भेदबोधनेन तयोः समानविभक्तित्वस्य तदुपजीव्यत्वात्। एवञ्च नञा भेदबोधनं प्रतियोग्यनुयोगिवाचकपदयोः समानविभक्तिवाचकत्वनियामकमत एव 'भूतले न घट' इत्यादौ न भेदबोधः, दृश्यते च,—'यजतिषु ये यजामहं करोति नानुयाजे'ष्वित्यत्र नञा पर्युदासबोधः, उक्तवाक्ये यजतिशब्दो यागस्वरूपवचनः, तथाचाऽनुयाजभिन्नेषु यागेषु 'ये यजामह'शब्दवन्मन्त्रं करोति = उच्चारयतीत्यर्थः। अत एवात्रानुयाजभिन्नेषु यजतिषु 'ये यजामह'पदवन्मन्त्रप्रयोगरूपैकार्थविधानादेकविधेयार्थकत्वरूपैकवाक्यत्वमुपपद्यते, अन्यथा यागेषु 'ये यजामह'पदवन्मन्त्रविधानमनुयाजेषु निषेधविधानमिति विधेयद्वयार्थकत्वरूपवाक्यभेदापत्तेर्येयजामहपदानुषङ्गकल्पने गौरवाच्चेति भावः।

अन्येतु—शास्त्रविहितप्रतिषिद्धत्वात्, षोडशिग्रहणाग्रहणवद्विकल्पापत्ते'र्नाऽनुयाजे'ष्वित्यत्र नञः प्रतिषेधार्थकत्वम्, तथाहि क्रियायाः कारकसाकाङ्क्षत्वाद् विनिगमनाविरहेण सकलकारकविशिष्टां प्रतियोगिभूतां भावनामुद्दिश्याऽभावविधिस्तत्र वाच्यः, एवञ्चोद्देश्यस्य प्रसिद्ध्यर्थं तत्प्राप्तिरपेक्षिता, प्राप्तिसापेक्षत्वात्प्रतिषेधस्य, प्राप्तिश्च क्वचिद्रागतो–यथा,–'न कलञ्जं भक्षये'दिति, तत्र कलञ्जभक्षणादे'रागत इष्टसाधनत्वाऽवगत्या प्रसक्तायाः कलञ्जभक्षणभावनाया निषेधशास्त्रेण निवृत्तिविषयत्वेऽवगते अर्थात्तद्विषयकलञ्जभक्षणस्यानिष्टसाधनत्वाक्षेपात्ततो निवृत्तिः। प्रकृते तु'ये यजामहङ्करोती'ति शास्त्रादेव सा, एवञ्च निषेधस्य शास्त्रविषयत्वेन प्राबल्यवद्विधिशास्त्रस्याप्युपजीव्यत्वेन प्राबल्यान्निषेधेन विधेरत्यन्तं बाधायोगाद् विकल्प एव प्राप्नोति। विकल्पे च,–'व्रीहिभिर्जुहोति' 'यवैर्वा जुहोती'त्यादौ प्रथमं व्रीह्यनुष्ठाने वेदस्य विपर्यासमितिजनकत्वासम्भवाद्यवशास्त्रस्याप्राप्ताप्रामाण्यस्वीकारः, प्रतीतः प्रामाण्यपरित्यागश्चेति दोषद्वयम्। प्रयोगान्तरे यवोपादाने,–यवशास्त्रस्य स्वीकृताप्रामाण्यपरित्यागः, परित्यक्तप्रामाण्योपादानञ्चेति दोषद्वयमिति चत्वारो दोषाः। पुनस्तृतीये प्रयोगे व्रीह्युपादाने–व्रीहिशास्त्रस्य स्वीकृताऽप्रामाण्यपरित्यागस्त्यक्तप्रामाण्यस्वीकारश्चेति दोषद्वयम्। चतुर्थे यवोपादाने व्रीहिशास्त्रस्या-[illegible]चीकृताऽप्रामाण्यस्वीकारः, स्वीकृतप्रामाण्यत्यागश्चेति दोषद्वयमिति चत्वारोन्ये-[illegible]ष्टदोषविकल्प[illegible]युयाजपदाभ्यामनुयाजभेदो बोध्यते, सोऽयं पर्युदासः। [illegible], 'येयजामहो' न कर्त्तव्यतया प्रतीयते, 'यजतिषु ये यजामहङ्करोती' [illegible]व तद्विधानात्,–किन्तु सामान्यशास्त्रविहितयेयजामहमनूद्य तस्यानुयाजव्य[illegible]तिरिक्तविषयता बोध्यते। तथाच सामान्यशास्त्रस्य विशेषविधिसापेक्षत्वान्नानुयाजेष्वित्यनेनानुयाजव्यतिरिक्तविषयसमर्पणादनुयाजव्यतिरिक्तेषु ये यजामहः कर्त्त-

अन्यथा सादृश्यादेरपि वाच्यतापत्तेः ।
यत्तु—तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ।

❀ दर्पणः ❀

व्यतया प्रतीयतेऽनुयाजेषु तु न कर्त्तव्यतया प्राप्तो नाऽपि प्रतिषिद्धः स इति न विकल्पः । नच नञा निषेधबोधनेपि पदशास्त्रेणाऽऽहवनीयशास्त्रस्येव, 'नानुयाजे'ष्विति विशेषशास्त्रेण 'यजतिषु ये यजामहङ्करोती'तिसामान्यशास्त्रस्य-बाधान्न विकल्प इति वाच्यं, परस्परनिरपेक्षयोर्हि बाध्यबाधकभावः, पदशास्त्रेणाऽऽहवनीयशास्त्रस्यानपेक्षणात्स उचितः । निषेधशास्त्रस्य तु प्रतियोगिप्रसिद्ध्यर्थमस्त्यपेक्षा विध्यर्थस्य, 'प्रसक्तं हि प्रतिषिध्यत' इति न्यायात्तेन तद्बाधाऽसम्भवात्, किन्तूक्तयुक्त्या विकल्प एव । तथा च द्विरदृष्टकल्पनाप्रसङ्गोऽपि । विधेर्ह्येवं जायते—यदनुयाजेषु येयजामहकरणेन कश्चनोपकारो भवति, निषेधाच्च तदकरणादनृतवदनाकरणादिव दर्शपूर्णमासयोः । स चोपकारो दृष्टरूप एवेत्यतोपि विकल्पो न युक्त इत्याहुः ।

अत्र केचित्—निषेधशास्त्रानालोचनेन सामान्यशास्त्रालोचनमात्रेण भ्रमात्मकप्रतियोगिप्रसिद्ध्याभावबोधनसम्भवेन विकल्पाप्रसक्तेः । विशेषनिषेधे सामान्यविधेस्तदितरपरत्वस्य, 'ब्राह्मणेभ्यो दधि दातव्यं, कौण्डिन्याय न दातव्य' मित्यादौ व्युत्पत्तिसिद्धत्वाच्च । न च तत्रापि पर्युदास एव नञा बोध्यते, नञा पर्युदासबोधने विशेष्यविशेषणवाचकपदयोः समानविभक्तित्वस्येव तयोः समानवचनस्यापि तन्त्रत्वात्, तस्य प्रकृतेऽभावात् । अन्यथा,—'न महतो राज्ञ' इत्यादाविव 'न महतां राज्ञ' इत्यादावपि महद्भेदप्रतीत्यापत्तिः । 'एको न द्वा'वितिवत् कथञ्चित्समर्थनेऽपि द्वितीयस्य 'दातव्य'मित्यस्य नैरर्थक्यप्रसङ्गश्च' 'ब्राह्मणेभ्यो दधि दातव्यं, कौण्डिन्याय ने'त्यादावत एव कौण्डिन्यभिन्नब्राह्मणोद्देश्यकदधिदानबोधसम्भवादित्याहुः । विकल्पप्रसक्तिरूपदोषाभावेऽपि वाक्यभेदापत्तेर्जागरूकतया समानविभक्तिकत्वादेस्तद्बोधनियामकस्य सत्त्वेन च नञः पर्युदासार्थकत्वमेव 'नानुयाजे'[illegible]मः । अन्यथे[illegible]र्थ-लाघवानादरेणारोपितत्वस्य नञ्वाच्यत्वाभ्युपगमे इत्यर्थः । 'सादृश्[illegible]त्या[illegible] पठिष्यमाणाल्पत्वादेः संग्रहः । 'अब्राह्मण' इत्यादेर्ब्राह्मणसदृशः, पापाभाव[illegible]तरभि[illegible] भिन्नोऽल्पोदरा गवाश्वेतराः पशवोऽप्रशस्ता धर्मविरुद्ध इत्यादिक्रमेणार्थः । न[illegible] सादृश्यादेरवाच्यत्वे कथं ततस्तद्बोधोत आह—तत्त्विति । तत्पठनं त्वित्यर्थः ।

—इति पठित्वा,—'अब्राह्मणः,' अपापम्,' 'अनश्वः,' 'अनुदरा कन्या,' अपशवो वा अन्ये गोश्वेभ्यः' 'अधर्म' इत्युदाहरन्ति, तत्तु—आर्थिकार्थमभिप्रेत्येति स्पष्टमन्यत्र। विशेषणमिति—'प्रतियोगिनी'ति शेषः।

❀ दर्पणः ❀

अभिप्रेत्येति। भेदप्रतियोगित्वप्रकारकब्राह्मणादिबोधानन्तरभाविमानसबोधमभिप्रेत्येत्यर्थः। ब्राह्मणादिबोधस्य तत्तत्पदादेव सम्भवाद्भेदप्रतियोगित्वेन ब्राह्मणादिबोधनाय यदब्राह्मणादिपदोपादानं तत्सादृश्यादिना क्षत्रियादिबोधनार्थमित्यूहमूलकक्षत्रियादिबोधस्य—'भेदप्रतियोगी ब्राह्मण' इत्यादिशाब्दबोधोत्तरमेव सम्भवादिति भावः। तद्बोधे शाब्दत्वप्रत्ययस्यानुभवाल्लक्षणयैव सादृश्यादिना ब्राह्मणादिबोध इति त्वन्ये। विशेषणस्य विशेष्यस्याकाङ्क्षत्वादाह—प्रतियोगिनीति। एवं चाऽब्राह्मण इत्यादेः 'प्रतियोगितया भेदविशिष्टो ब्राह्मण' इत्याद्याकारको बोध इति भावः। भेदस्य प्रतियोगितयोत्तरपदार्थान्वये उपपत्ति-

❀ काशिका ❀

सादृश्यादेरपीति। सादृश्यादेरप्यब्राह्मण इत्यादौ प्रतीयमानत्वाद्वाच्यतापत्तेरित्यर्थः। अपापमिति। अत्र पापात्यन्ताभाव इति बोधः। 'अनश्व'इत्यतोऽश्वान्य इति बोधः। 'अब्राह्मण' इत्यत्र सादृश्यघटकतयान्यत्वबोधो न केवलान्यत्वबोध इति विशेषः, सादृश्यं पदार्थान्तरमिति' मते भेदस्य तत्राभावाच्च। 'अनुदरा कन्ये'त्यत्राल्पोदरा कन्येति बोधः। 'अपशवो वा'इत्यत्राप्रशस्ताः पशव इति बोधः। 'अधर्म'इत्यत्र धर्मविरोधी अदृष्टविशेषः प्रतीयते, न तु तद्भिन्नमात्रम्। आर्थिकार्थमिति। आरोपितो ब्राह्मण इत्यादिशाब्दबोधोत्तरं सादृश्यादेर्मानसबोधो भवति, अनुदरेत्यादावल्पत्वादिहेतुकोदराभावारोपेण '[1]नञ्साचिव्यादारोपितोदरबुद्ध्या तन्मूलाल्पत्वादौ विश्रान्तिः, एवमन्यत्रापि बोध्यम्। नञर्थाभावस्य प्रतियोग्यतिरिक्ते विशेषणत्वे सामर्थ्यादब्राह्मण इत्यादौ समासानापत्तिः, ब्राह्मणादेरन्योन्याभावप्रत्ययानापत्तिश्चेति शङ्कामपनिनीषुराह—प्रतीति। ब्राह्मणत्वाद्यवच्छिन्नप्रतियोगितासंबन्धेन भेदस्य विशेषणत्वं, तस्य प्रकारत्वानुभवे तु तदन्तर्भावेण वृत्तिरङ्गीकार्या, भेदप्रतियोगित्वमात्रस्य केवलान्वयित्वेऽपि न तथाविधभेदप्रतियोगित्वस्य तथात्वं, तथा चाब्राह्मण इत्यत्र भेदप्रतियोगी ब्राह्मण इति शाब्दबोधे ब्राह्मणप्रतियोगिकभेदबोध आर्थिकः, 'अघटः पट' इत्यत्र पटवृत्तिभेदप्रतियोगी घट इति बोधः, नञो निपातत्वा-[illegible]दर्थे पटस्य नाम[illegible]नान्वयो न विरुध्यते, "अघटमानये'त्युक्ते घटस्यानयनं तु [illegible] भवति, नञुपादानसामर्थ्यात्, शाब्दबोधोत्तरकाले प्रतीयमानस्य घटप्रतियोगिकभेदवत एव संज्ञा[illegible] संभवादिति भावः, 'अब्राह्मणो देवदत्त' इत्यादौ 'कथं नाम' इत एवास्वरसाद्वा विशेष्यो वेति

१ साचिव्यं = साहित्यम्।

तथाचासर्वपदे सर्वनामसंज्ञा, अनेकमन्यपदार्थे, 'सेव्यतेऽनेकया सन्नताङ्ग्या' इत्यादावेकशब्दार्थप्राधान्यादेकवचननियमः, अब्राह्मण' इत्यादावुत्तरपदार्थप्राधान्यात्तत्पुरुषत्वम्,–'अत्वं भवसि,' 'अनहं भवामी'त्यादौ पुरुषवचनादिव्यवस्था चोपपद्यते। अन्यथा त्वदभावो मदभाव इतिवदभावांशे युष्मदस्मदोरन्वयेन युष्मत्सामानाधिकरण्यस्य तिङ्क्ष्वसत्त्वात्

※ दर्पणः ※

माह—तथाचेति। 'सर्वनामता चे'त्यादि—प्रथमान्तचतुष्टयस्यो'पपद्यते' इत्यनेनान्वयः। सर्वनामता = सर्वनामसंज्ञा। 'तदन्तविधिने'ति शेषः। अन्यथा संज्ञोपसर्जनानां सर्वादित्वाभावे तदर्थस्य नञर्थविशेषणत्वे तत्संज्ञानुपपत्तिरिति भावः। 'अनेक'मित्यादावेकभिन्नमिति बोधे स्वीक्रियमाणे एकप्रतियोगिकभेदवति—द्वित्वस्य, बहुत्वस्य वावश्यम्भावेन ततस्तद्बोधकद्विवचनबहुवचनयोरापत्तिरेकत्वार्थस्य तत्र बाधात्तद्बोधकैकवचनस्यानुपपत्तिश्चेति भावः। **तत्पुरुषत्वमिति**। भेदविशेषणत्वे तदनुपपत्तिः स्यात्। **पुरुषेति**। तिबादित्रिकसञ्ज्ञेतितपुरुषेत्यर्थः। **वचनेति**। एकवचनत्वादिरूपेत्यर्थः। 'अयुवां भवथ' इत्यादौ युष्मदस्मदर्थाभावविशेष्यकबोधे अभावे द्वित्वाद्यर्थस्य बाधाद् द्विचनाद्यनुपपत्तिः। 'भावनान्वयिन्येव सङ्ख्यान्वय' इति त्वदभ्युपगमेनान्यार्थगतसङ्ख्यामादाय द्विवचनाद्युपपादस्य कर्त्तुमशक्यत्वादिति भावः। **अन्यथेति**। नञर्थाभावस्योत्तरपदार्थाविशेषणत्वे,

※ काशिका ※

पक्षान्तरपरिग्रह इति बोध्यम्। उत्तरपदार्थप्रधानस्य प्रयोजनमाह—अनेकमिति। इदमेवोत्तरपदार्थप्रधान इति पक्षस्य मुख्यं प्रयोजनम्। तथा च भाष्यम्—'इदं खल्वपि भूय उत्तरपदार्थप्राधान्ये संगृहीतम्, किम्? अनेकमिति, किमत्र संगृहीतम्? एकवचनम्।'इति। **एकवचननियम** इति। अन्यथैकभिन्नस्यानेकत्वाद् द्विवचनबहुवचने एव स्यातां, न त्वेकवचनमिति भावः, 'द्व्येकयो'रिति सूत्रं नियमार्थमित्यभिप्रेत्य 'नियम' इत्युक्तम्। ननु पदान्नियमेनैकवचनमित्यर्थो न बोद्धव्यः, तथा सति पक्षान्तरे तदनियमः प्रतीयेत, तच्च न युक्तं, पूर्वपदार्थप्राधान्येऽन्यपदार्थप्राधान्ये चैकवचनासिद्धेः। **तत्पुरुषत्वमिति**। सति संभवे प्रायिकस्याप्युत्तरपदार्थप्राधान्यस्य तत्पु[illegible]स्वीकारे पुरुषादिव्यवस्था नोपपद्यते इत्याह—अन्यथेति। **इतिवदिति**। 'त्वदभावो' 'मद[illegible]'त्यत्र यथा युष्मदस्मत्सामानाधिकरण्याभावान्न मध्यमोत्तमपुरुषौ भवतोऽपि तु प्रथमस्तदेकवचन[illegible] तद्वदत्वं भवसि, अनहं भवामीत्यत्र युष्मदाद्यर्थस्य नञर्थान्योन्याभावे विशेषणत्वाभ्युपगमे स्यात्, एवमयुवां भवथः, अयूयं भवथेति द्विवचनादिकमपि न स्यात्, कर्तुरभावस्यैकत्वादित्यर्थः।

पुरुषव्यवस्था न स्यात्। अस्मन्मते च भेदप्रतियोगित्ववदभिन्नाश्रयिका भवनक्रियेत्यन्वयात्सामानाधिकरण्यं नानुपपन्नमिति भावः। विशेष्यो वेति। 'प्रतियोगिनी'ति शेषः। अयं भावः—गौणत्वेपि नञ्समासे, 'एतत्तदोः सुलोपोकोरनञ्समासे हलि'ति ज्ञापकात्सर्वनामसंज्ञा नानुप-

❀ दर्पणः ❀

तद्विशेष्यत्व इति यावत्। पुरुषव्यवस्थेति। 'युष्मद्युपपद' इति सूत्रद्वयाऽविषयतया, 'शेषे प्रथम' इत्यस्य प्रवृत्त्या प्रथमपुरुषस्यैवापत्तेरित्यर्थः। नानुपपन्नमिति। तथाचोक्तव्यवस्था सुलभेति भावः। ननु नञर्थभेदस्य प्रतियोगितयोत्तरपदार्थान्वये 'अघटमानये'त्यत्र स्वभेदप्रतियोगित्वस्य घटे सत्त्वात्तद्बोधानन्तरं घटानयनस्याप्यापत्तिरत आह–मूले–विशेष्यो वेति। विशेषणाकाङ्क्षायामाह सारे—प्रतियोगिनीति। उत्तरपदार्थरूपप्रतियोगिनीत्यर्थः। निरूपितत्वं सप्तम्यर्थः, उत्तरपदार्थरूपप्रतियोगिनिष्ठविशेषणतानिरूपितविशेष्यताश्रयो नञर्थ इति यावत्। न तर्ह्युत्तरपदार्थाप्राधान्ये पूर्वोक्तदूषणगणो दुष्परिहरोत आह—अयम्भाव इति। गौणत्वेपीति। नञ्समासघटकैतदाद्यर्थस्य नञर्थविशेषणत्वेपीत्यर्थः। ज्ञापकादिति। तत्सूत्रस्थानञ्समासग्रहणाज्ज्ञापकादित्यर्थः। ज्ञापकता-

❀ काशिका ❀

स्वमते पुरुषादिव्यवस्थामुपपादयति–अस्मन्मते चेति। चस्त्वर्थे। सामानाधिकरण्यं = युष्मदादिसामानाधिकरण्यम्। युष्मदाद्यर्थगतसंख्याभिधायित्वमेव सामानाधिकरण्यम्, तच्च पूर्वपदार्थप्राधान्यपक्षेऽपि संभवत्येवेति तु न युक्तम्। सामानाधिकरण्यपदस्योक्तार्थबोधनेऽसामर्थ्यात्, एवमपि वचनव्यवस्थाया अनुपपादनाच्च। प्रतियोगिनीतीति। तथा चात्राब्राह्मणः क्षत्रिय इत्यतो ब्राह्मणभिन्नः क्षत्रिय इति बोधः। नन्वेवमस इत्याद्यसिद्धिरित्याशङ्क्याह—अयं भाव इति। गौणत्वेऽपि = उपसर्जनत्वेऽपि। ननूपसर्जनत्वेऽप्यनेषो ददाति असः शिव' इत्यत्रैतत्तच्छब्दसत्त्वेन लोपो मा प्रसाङ्क्षीदिति 'अनञ्समासे' इति चरितार्थम्, न चैतत्तदर्थगतसंख्याभिधायिनः सोरनेन लोपो विधीयते, पूर्वपदार्थप्राधान्ये च न तथाभिधः सुः संभवतीति तद्वैयर्थ्यमिति वाच्यं, षष्ठ्यास्तादृशसंबन्धार्थकत्वे मानाभावात्, अनन्तरपदाध्याहारं कृत्वा एतत्तदोरनञ्करस्य सोर्लोप इत्यर्थे [illegible], अन्यथा तथा व्याख्यातत्वाच्चेत्यत आह—अकोरिति। [illegible]सहितप्रयुक्तत्तनाकज्योग्ययोः सर्वनाम्नोरेव तयोर्ग्रहणमुचितं, संसर्गवद्विप्रयोगस्याप्यशङ्कचक्रो संज्ञा[illegible]यादौ विशेषावगतिहेतुत्वस्य क्लृप्तत्वादिति भावः। तथा च = उक्तरीत्या सर्वनाम्नोरेव [illegible]ग्रहणे च, इदमुपलक्षणम्—एतत्तच्छब्दमात्रग्रहणेऽपि अतितदित्यादावुपसर्जने अत्वाभावेन हलङ्यादिलोपस्य दुर्वारतया तद्वैयर्थ्यमित्यपि बोध्यम्। ज्ञापकमिति। पूर्वपदार्थप्राधान्येऽ-

पन्ना। 'असः शिव' इत्यत्र सुलोपवारणाय 'ऽनञ्समास' इति हि विशेषणम्। नच तत्र तच्छब्दस्य सर्वनामतास्ति, गौणत्वात्। 'अकोʼरित्यकच्सहितव्यावृत्त्या सर्वनाम्नोरेव तत्र ग्रहणलाभात्। तथाचानञ्समास इति ज्ञापकं सुवचम्। 'अनेकमन्यपदार्थे' इत्यादावेकवचनं विशेष्यानुरोधात्—'सुबामन्त्रिते पराङ्गवत्स्वरे' इत्यतोनुवर्तमानं सुब्ग्रहणं विशेष्यमेकवचनान्तमेव। किञ्चानेकशब्दाद् द्विवचनोपादाने बहूनां, बहुवचनोपादाने द्वयोर्बहुव्रीहिर्न सिद्ध्येदित्युभयसंग्रहायैकवचनं जात्यभिप्रा-

❀ दर्पणः ❀

मेव प्रपञ्चयति—असः शिव इति। 'एतत्तदोʼरित्यनेन परस्परसाहचर्य्यात् सर्वनामैतत्तदोर्यां परस्य सोर्हलि लोपो विधीयते, नञ्तत्पुरुषान्तर्गतैतत्तदोरुपसर्जनतया सर्वनामत्वाभावादेवानतिप्रसङ्गे व्यर्थं सदनञ्समासग्रहणं नञ्समासे गुणीभूतार्थस्यापि सर्वादेः सर्वनामताज्ञापनेन चरितार्थमिति भावः। साहचर्य्यज्ञापकत्वस्यासार्वत्रिकत्वं सूचयन् सूत्रे सर्वनाम्नोरेव ग्रहणे मानान्तरमाह—अकोरिति। असर्वनाम्नः सर्वनामविहिताकजसम्भवेन तत्पर्य्युदासात् सर्वनाम्नोरेव तयोर्ग्रहणं निश्चीयत इत्यर्थः। एतत्कल्पे एतत्तदुत्तरस्य सोर्हलि लोप इति सूत्रार्थः। अर्थद्वारकसम्बन्धाश्रयणेन व्याख्यानं तु—पूर्वकल्पाभिप्रायेणोत्तरपदलक्षणाभिप्रायेण वेति भावः। **विशेष्यानुरोधादिति।** असति विशेषानुशासने विशेषणवाचकपदस्य विशेष्यवाचकपदसमानवचनकत्वनियमादिति भावः। ननु विशेषणस्य विशेष्यसङ्ख्याविरुद्धसंख्यावत्त्वेपि विशेषणवाचकपदात्तद्वचनमित्यत्र प्रमाणाभावोत आह—**किञ्चेति।** नन्वनेकशब्दोपादानादेव द्वयोर्बहूनां वा तत्सिद्धेः,

❀ काशिका ❀

प्युत्तरपदार्थप्राधान्यप्रयुक्तकार्यप्रवृत्तौ ज्ञापकमित्यर्थः, तेन पुरुषवचनव्यवस्थापि सिध्यतीति भावः। **विशेष्यानुरोधादिति।** भिन्नसंख्यविशेष्यासंनिधाने एव समस्यमानप्रधानपदार्थगतसंख्याभिधायकत्वं सुप इति—तथाविधविशेष्यसंनिधाने वानेकपदस्य द्विवचनबहुवचनान्ततेति भावः। नन्वेवम्'वर्षा हेमन्त' इत्यत्रापि हेमन्तरूपविशेष्यानुरोधादेकवचनान्तत्वप्रसङ्ग इति चेन्न, 'गुणवचनानामाश्रयतो लिङ्ग[illegible] तत्र विशेष्यरूपाश्रयस्यैव प्रतियोगितयाश्रयस्य प्रतियोगिनोऽपि ग्रहणात, एवं च नञ्समासस्य क्वचिद[illegible]गते लिङ्गसं[illegible] क्वचित्प्रतियोगिगते भवत इति स्वीक्रियत इति न दोष इति तात्पर्यात्। ननु 'प्रत्य[illegible]स्मिन् 'तव्यत्तव्यानीयरः' इत्यादावनुवर्तमाने वचनविपरिणामवद् 'धातोः' इत्यस्मिन् 'नन्दिग्रहिपचादिभ्यः' इत्यादावनुवृत्ते वचनविपरिणामवच्च सुबिति शब्देऽपि सोऽस्त्वित्याशङ्क्याह—

यमौत्सर्गिकं वा । 'सेव्यतेनेकये'त्यत्रापि 'योषये'ति विशेष्यानुरोधात्प्रत्येकं सेवनान्वयबोधनाय चैकवचनं, न तूत्तरपदार्थप्राधान्यप्रयुक्तम् । अत एव—'पतन्त्यनेके जलधेरिवोर्मय' इत्यादिकमपि सूपपादम् । 'अत्वं भवसी'त्यादौ युष्मदस्मद्भिन्ने लक्षणा, नञ्द्योतकः । तथाच भिन्नेन

॥ दर्पणः ॥

प्रकृत्यर्थावृत्तिसङ्ख्यार्थकजात्यभिप्रायकैकवचनस्यापि नैरर्थक्यमेवेत्यत आह—**औत्सर्गिकं वेति** । 'एकवचनमुत्सर्गतः करिष्यते' इति, 'न केवले'ति नियममूलकवचनविहितमित्यर्थः । सति तात्पर्ये क्वचित्सार्थकमप्येकवचनमिष्यत एवेत्याह—**प्रत्येकमिति** । एकभिन्नत्वेनोपस्थितासु योषासु प्रत्येकं सेवनान्वयबोधायेत्यर्थः ।

उपसंहरति—**न त्विति । अत एवेति** । अनेकशब्दस्यैकभिन्नार्थकत्वादेवेत्यर्थः । **सूपपादमिति** । भेदप्रतियोग्येकार्थकत्वे तु तद्दुरुपपादं स्यात्, एकशेषेण समर्थनं त्वगतिकगतिरिति भावः । भाष्योदाहृते 'नैकस्तिष्ठती'ति प्रयोगे 'जन' इत्यध्याहार्यम् , प्रत्येकं स्थित्यन्वयबोधार्थं च तत्रैकवचनम्, 'अनेको जना' इति त्वसाध्वेव, उत्तरपदार्थप्राधान्यादिव्यपदेशस्तु प्रायिक इत्याद्यपि बोध्यम् । 'अत्वं भवसी'त्यादिनाऽनहम्भवामीत्यादिर्गृह्यते । 'युष्मद' इत्यस्मदोऽप्युपलक्षणम् । एवं 'त्वद्भिन्न' इत्यत्रापि । 'लक्षणे'ति तु नैयायिकाद्यनुसारेण, 'अत्वम्भवसी'त्यादावारोपादिबोधस्य सर्वानुभवविरुद्धत्वान्नञ्समासे सर्वत्रोत्तरपदस्य स्वार्थभिन्नलाक्षणिकत्वमेव युक्तमिति भावः ।

॥ काशिका ॥

किंचेति । बहूनामिति । बहूनां बहुव्रीहिर्न सिध्येदिति योजना । **औत्सर्गिकं वेति** । एकत्वद्वित्वाद्यविवक्षा 'एकवचनं चे'ति विभक्तसूत्रेणैकवचनमिति भावः । **उत्तरपदार्थेति** । तथा च 'सेव्यतेऽनेकया' इति प्रयोगानुरोधादुत्तरपदार्थप्राधान्यं नास्थेयमेकवचनान्तत्वस्यान्यथासिद्धत्वादिति भावः । **अत एव** = पूर्वपदार्थप्राधान्यादेव । **सूपपादमिति** । सुखेनोपपादयितुं शक्यमित्यर्थे ण्यन्तात् पदेः कर्मणि खल्, उत्तरपदार्थप्राधान्ये त्वत्रानेकशब्दस्य बहुवचनान्तत्वानुपपत्तिः, नन्वनेको रथोऽश्वो गज इत्यर्थादेकशेपेण तदुपपत्तिरिति शक्यमेकशोवानेकशब्दस्य सकलार्थप्रत्यायकत्वसंभवेनानेकानेकशब्दाप्राप्त्यैकशेपावृत्तेः पृथग्विभक्तयन्तरथादिशब्दे प्रयोगे एकस्यैवानेकपदस्याव[illegible]नुपयोगाच्च, तथा [illegible]न्द्वानिर्देशेऽपि समुदिते एकस्यैवान्वयसंभवा[illegible] भावः । ननु 'एतत्तदो'रिति सूत्रेऽनञ्ग्रहणं पूर्वपदार्थप्राधान्येऽपि सर्वनामसंज्ञा[illegible] ज्ञापकमुक्तमेवं चास इत्यादेः सिद्धावपि 'अत्वं भवसी'त्यादौ पुरुषव्यवस्थानुपपन्नैवेत्या[illegible]ङ्कां परिहरति—**अत्वं भवसीत्यादाविति** । **तथा च** = नञो द्योतकत्वे च । **भिन्नेन युष्मदर्थेन** = त्वद्भिन्नरूपयुष्मच्छब्दार्थेन, पूर्वपदार्थप्राधान्येप्युत्तरपदार्थप्राधान्यप्रयुक्तकार्यज्ञाप-

युष्मदर्थेन तिङः सामानाधिकरण्यात्पुरुषव्यवस्था । त्वद्भिन्नाभिन्नाश्रयिका भवनक्रियेति शाब्दबोधः । एवं 'न त्वं पचसी'त्यत्र त्वद्भिन्नाश्रयकानुकूलभावनाऽभावः । 'घटो नास्ती'त्यत्र घटाभिन्नाश्रयकास्तित्वाभाव इति रीत्या बोधः, असमस्तनञः क्रियायामेवान्वयात् । स चा-

ॐ दर्पणः ॐ

प्रसज्यप्रतिषेधार्थकनञो व्यवस्थामाह—**एवं न त्वं पचसीत्यादि ।** नञर्थे युष्मदर्थान्वये तु प्रकृते पुरुषव्यवस्था न सिद्ध्येदिति सूचयितुं 'पचसी'ति मध्यमपुरुषनिर्देशः, अधिकं त्वादावेवोक्तम् । अभावविशेष्यकबोधे हेतुमाह—**असमस्तेति**—व्याख्यातार्थम् । नञः = तदर्थस्य प्रसज्यप्रतिषेधस्य । तादृशनञर्थाऽभावनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन बोधे धातुजन्योपस्थितेर्भावनात्वावच्छिन्नविशेष्यतासम्बन्धेन हेतुत्वस्य पूर्वमुक्तत्वादिति भावः । नन्वभावस्य केन रूपेण शक्यता ? न तावदभावत्वेन, चैत्रो न पचती'त्यादावपि भेदबोधापत्तेः, प्रसज्यप्रतिषेधत्वेन शक्यत्वेपि स एव दोषः, भेदस्यापि योग्यानुपलब्धिजन्यप्रत्यक्षविषयत्वात्, तदनुपस्थितावपि नञोऽभावबोधाच्चेत्यत आह—**स चेति ।** अभावश्चेत्यर्थः । तथाच नञोऽन्योन्याभावत्वेनात्यन्ताभावत्वेन वाऽभावे शक्तिकल्पनान्न दोषः । अन्तं—स्वप्रतियोगिनिष्ठाऽभावप्रतियोगित्वमतिक्रान्तोऽत्यन्तः, स चासावभावश्चेति विग्रहः, तस्य भावस्तत्त्वम्, स्वप्रतियोगिनिष्ठस्वदृशाभावप्रतियोगित्वव्यभिचार्यभावत्वमिति यावत् । 'अन्त्यो जघन्यं चरम'मित्यमरेणान्त्यशब्दस्य

ॐ काशिका ॐ

कता नञ्ग्रहणस्येति लक्षणं विनापि युष्मच्छब्दस्य पुरुषव्यवस्था सिध्यति, अत एव द्योत्यार्थस्य विशेषणत्वमेवेति नियमस्यापि न भङ्ग इति परे । भावनाभाव इति । अस्येति । अस्य—'इति रीत्या बोध' इत्यत्रान्वयः । ननु सकलकारकविशिष्टक्रियाया अभावबोधोपगमेन तस्य भूतलं घटवदिति ज्ञाने प्रतिबध्यत्वं प्रतिबन्धकत्वं च न स्यात्, एवमारोपिता तथाविधसत्तेति बोधाङ्गीकारेऽपि आद्यस्य घटाभावाविषयकत्वादन्त्यस्याभावमात्राविषयकत्वादिति चेद् भूतलवृत्तित्वाभाववान् घट इति बोधस्वीकारपक्षेऽप्येतद्दोषसत्त्वात्, यदि वानुभवबलात्तस्य बोधस्योक्तज्ञानप्रतिबध्यत्वप्रतिबन्धकत्वे अङ्गीक्रियेते तर्हि तयाप्युक्तबोधयोस्ते अङ्गीक्रियेते । यदि भूतलवृत्तित्वाभावबोधोत्तरं भूतलाधिकरणकघटाभावबोधो [illegible] तेनोक्तज्ञानप्रतिबन्धादिनिर्वाह इत्युच्येत—तर्हि स एव पन्था अत्रलम्ब्यते इत्यलमतिविस्तरेण । क्रियायामेवेति । क्रियाग्रहणं गुणस्याप्युपलक्षणम्, अत एव नञ्सूत्रे भाष्ये—'प्रसज्यक्रियां [illegible] ततः पश्चान्निवृत्तिं करोति' इत्युक्तम् । प्रसज्य = विधाय, तस्य प्रतिषेध इति तदर्थः । तेन गुणाभावबोधेऽपि प्रसज्यप्रतिषेध इति लभ्यते, गुणोदाहरणं तु 'न नः—एकं प्रिय'मिति । न इति षष्ठीबहु-

भावोत्यन्ताभावत्वान्योन्याभावत्वादिरूपेण शक्यः, तत्तद्रूपेण बोधादित्याद्यन्यत्र विस्तरः ॥४०॥

❀ इति नञर्थनिर्णयः ॥ ७ ॥ ❀

❀ दर्पणः ❀

जघन्ये वृत्तिबोधनाज्जघन्यत्वं चोक्तार्थस्य, जघन्यवृत्तिबोध्यत्वात्। घटात्यन्ताभावस्य स्वप्रतियोगिनिष्ठात्यन्ताभावप्रतियोगित्वाभाववति घटवृत्तिधर्मे सत्त्वात्तत्र तत्राक्षतम्। घटान्योन्याभावस्य तु—स्वप्रतियोगिनिष्ठान्योन्याभावप्रतियोगित्वव्यापकत्वात्तद्वयावृत्तिः। व्युत्पत्तिप्रदर्शनं चेदम्। लक्षणं त्वत्यन्ताभावस्य तादात्म्येतरसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम्। **अन्योन्याभावेति।** अन्योस्मिंस्तादात्म्येनाभावोऽभवनमिति व्युत्पत्त्या तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वमन्योन्याभावत्वम्, ताभ्यां शक्य इत्यर्थः। वस्तुतस्तु—अत्यन्ताभावस्याभावत्वेनैव शक्यता, न तूक्तरूपेण, गौरवात्, तेन रूपेण बोधस्यानुभवाच्च। अत एव 'तत्सादृश्यमभावश्चे'त्यत्राभावत्वेनेवात्यन्ताभावोपादानम्। न च नञः संयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वादिनाऽभावे शक्त्यनभ्युपगमे,—'भूतले न घट' इति वाक्यजबोधस्य संयोगसम्बन्धेन भूतलविशेष्यकघटविशिष्टबुद्धिविरोधित्वानापत्तिस्तत्संसर्गावच्छिन्नतद्विशिष्टबुद्धौ तत्संसर्गावच्छिन्नप्रतियोगिताकत्वावगाहिन्या एव तदभावबुद्धेः प्रतिबन्धकत्वादिति वाच्यं, निरुक्ताभावत्वेन शक्तावपि संयोगादीनां—लक्षणे तादात्म्येतरसम्बन्धत्वेनानुगतरूपेणैव निवेशनीयतया नञ्पदशक्त्याप्यभावे विशिष्य संयोगावच्छिन्नप्रतियोगिताकत्वभानासम्भवात् प्रतिबन्धकत्वानुपपत्तितादवस्थ्यात्, तादृशविशिष्टबुद्धिविरोधित्वाऽनुरोधेनाकाङ्क्षाबलादेव तादृशप्रतियोगिताकत्वस्य विशिष्य प्रतियोग्यभावयोः सम्बन्धविधया भानस्योपगन्तव्यत्वात्।

❀ काशिका ❀

वचनान्तम्। अत्र ह्येकप्रियप्रतिषेधेन बहुप्रियप्रतीतिर्भवति। 'न संदेह' इत्यादौ च संदेहात्यन्ताभावः प्रतीयते, संदेहस्य गुणत्वात्। पूर्वोदाहरणे एकत्वं संख्यारूपो गुणस्तत्प्रतिषेधः, नोऽस्माकमेकं प्रियं नेति [illegible] एकत्वसंख्याप्रतिषेधः पर्यवस्यति। तदुक्तं कैयटेन—'अत्रैकप्रतिषे[illegible]नर्थ्यादेव संख्यान्तरयुक्तवस्तुप्रतीतिः' इति। न चास्तीत्यध्याहारादेकविषयकर्तृक सत्ता निषिध्यते इति क्रियोदाहरणमेवैतदिति वाच्यम्, उक्तभाष्यप्रामाण्याद्गुणस्यैव तत्र [illegible]षेधानुभव इत्याशयात्, एतन्मते 'क्रियया सह यत्र नञ्' इति प्रसज्यप्रतिषेधलक्षणेऽपि क्रियाग्रहणं गुणोपलक्षणमिति बोध्यम्। भाष्यानुसारिणस्त्वनञ्समासग्रहणमुत्तरपदार्थप्राधान्ये

❀ दर्पणः ❀

नन्वन्योन्याभावसाधारणाभावत्वस्य नञ्पदप्रवृत्तिनिमित्तत्वेऽन्योन्याभावे पृथक् शक्तिकल्पनानर्थक्यम्, नचाऽन्योन्याभावत्वप्रकारकबोधानुरोधात्तदावश्यकत्वम्, अन्यथा तादात्म्यसम्बन्धेन प्रतियोगिप्रकारकेऽयं घट' इति बोधे, 'नायं घट' इति वाक्यजबुद्धेरप्रतिबन्धकत्वापत्तेः, अन्योन्याभावत्वावगाह्यभावबुद्धेरेव तादृश-बुद्धिविरोधित्वात्। 'घटाभाववा'निति बुद्धेरपि तद्विरोधित्वापत्तेश्चेति वाच्यं। तत्राभावत्वस्य नञ्पदशक्यतया तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वस्य समानवि-भक्तिकप्रतियोग्यनुयोगिवाचकपदयोः समभिव्यवहाररूपाकाङ्क्षाबलेन लाभेन तादा-त्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वस्यान्योन्याभावत्वावगाहितयैव तत्तद्बुद्धेः प्रतिबन्धकत्वोपपत्तौ तेन रूपेण शक्तिकल्पनस्याऽकिञ्चित्करत्वात्। न च नञ्त्वेन तदवच्छिन्ने शक्तिः, पृथगुपादनं त्वभावसामान्यस्य नञर्थत्वलाभायैवेति वाच्यम्, तथा सति, 'नञर्थाः षट् प्रकीर्त्तिता' इत्यस्यासङ्गत्यापत्तेरिति चेत्, स्यादेवं यद्यन्योन्याभावत्वं तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वरूपं निर्वक्तुं शक्येत, तदेव न, संयोगितादात्म्यस्य संयोगरूपतया संयोगात्यन्ताभावेतिव्याप्तिः। सम्बन्धविधया तादात्म्यनिष्ठावच्छेदकतानिवेशेऽपि-संयोगसम्बन्धावच्छिन्नसंयो-

❀ काशिका ❀

एव लाघवाज्ज्ञापकं—निवृत्तपदार्थक इति भाष्यस्थकैयटोक्तं व्याख्यानमेव सम्यक्, यत्र उत्तर-पदार्थप्राधान्यपक्षे नञा चेदुत्तरपदार्थाभावो बोध्यते तदोत्तरपदार्थप्राधान्यभङ्ग एव स्यादिति नञस्तत्रानर्थकत्वमुपेयमभावप्रतियोगित्वादिकं त्वव्यावर्तकतया न विशेषणं संभवतीत्याशयेन अब्राह्मणमानयेत्युक्ते ब्राह्मणमात्रस्यानयनं न प्राप्नोतीति शङ्कायां अपनयनार्थं 'नैष दोषः' इत्यादिना यथा 'राजपुरुषमानये'त्यत्र राजविशिष्ट एव पुरुषः प्रतीयते, तथेहापि नञर्थविशिष्ट एव ब्राह्मणो न केवल इत्यर्थकं 'नञ्विशिष्टस्यानयनं भविष्यति' इत्युक्तम्, ततः 'कः पुनरसौ निवृत्तपदार्थकः इति भाष्यमुपादाय—'निवृत्तः पदार्थो ब्राह्मण्यं यस्मिन्' इत्यस्याभिधानात्, तदग्रिमभाष्यग्रन्थेनाप्यारोपितब्राह्मण्यवान् क्षत्रियादिरेव अब्राह्मण इत्यत्र ब्राह्मणपदार्थो नञ्द्योत्य इत्यस्यैव लाभाच्च, पूर्वपदार्थप्राधान्यपक्षे तु ताभ्यां भिन्नोऽस्तीत्यर्थेऽतौ स्त इति द्विवचनस्या-नापत्तिः, तेभ्यो भिन्न इत्यर्थे ते सन्तीत्यत्र बहुवचनान्तस्य चोत्तरपदार्थप्राधान्यमिति भाष्योक्तपक्षे इष्टस्यैकवचनापत्तिश्च, न चेष्टापत्तिः, पक्षयोः फलभेदापत्त्येष्टापत्तेरयोगात्, 'अनेक'मित्यत्रैक-वचनस्येव प्रकृतस्थले द्विवचनादेरप्युत्तरपदार्थप्राधान्यफलत्वस्य ... प्रयोगादभिन्नाश्रयण-स्यायुक्तत्वात्। यद्यपि 'एतत्तदो' रिति सूत्रेऽनञ्समासग्रहणेन पूर्वपदार्थप्राधान्येऽप्युत्तरप्राधान्य-प्रयुक्तकार्यातिदेशेनातौ स्त इत्यादौ द्विवचनादिरनेकमित्यत्रैकवचनस्य च सिद्धिस्तथाप्युक्ता-तिदेशकल्पनापेक्षया लाघवादुत्तरपदार्थप्राधान्यकल्पनैव ज्यायसीति भावः। 'अनेक'मित्यत्रैक-वचनासिद्धिः, सुबिति विशेष्यानुरोधादेकवचनमिति तु न युक्तम्। स्वस्मिन्नन्यसंख्यासत्वेऽपि

❀ दर्पणः ❀

गधर्मावच्छिन्नप्रतियोगिताकाऽत्यन्ताभावातिव्याप्तितादवस्थ्यात् । किन्त्वनुयोगिता-विशेष एव, एवञ्च तादात्म्यस्यान्योन्याभावप्रतियोगितावच्छेदकसम्बन्धत्वमपि प्रामाणिकम् । 'इह संयोगेन घटो नास्ती'तिवदयं तादात्म्येन न घट' इत्यादिप्रत्ययात् । एवञ्च तादृशानुयोगिताविशेषप्रकारताकत्वमेवाभेदसम्बन्धेन प्रतियोगि-प्रकारकधीविरोधित्वे तन्त्रमिति तदनुरोधेन नञः पृथगन्योन्याऽभावे शक्तिराव-श्यिकेति । ननु नञोऽविशेषेणात्यन्ताभावबोधकत्वे,-भूतलं न घट' इत्यादिवाक्यज-बोधेऽत्यन्ताभावभानापत्तिः, नच नञ्पदजन्यात्यन्ताभावबोधेऽनुयोगिवाचकपदोत्तर-सप्तमीसमभिव्याहारज्ञानस्य हेतुत्वान्नोक्तापत्तिरिति वाच्यं, 'चैत्रो न पचती'त्यादि-वाक्यजभावनात्यन्ताभावबोधे व्यभिचारेणोक्तकार्यकारणभावस्यैवासम्भवादिति चेत्, अत्र वदन्ति,—यत्र नञ्समभिव्याहारे प्रतियोग्यनुयोगिनोराधाराधेयभावसंसर्गबो-धौपयिकाकाङ्क्षा तत्रैव नञोऽत्यन्तभावार्थकत्वोपगमेन नोक्तस्थले तद्बोधापत्तिः । तत्र नञ्समभिव्याहारे तादृशबोधौपयिक्याकाङ्क्षाविरहात् । 'न पचति चैत्रो' 'नेदं चैत्रस्ये'त्यादौ नञ्समभिव्याहारे तिङर्थस्य कृत्यादेः प्रथमान्तपदोपस्थापितचैत्रादौ, षष्ठ्यर्थस्वत्वस्येदंपदार्थे आधाराधेयभावबोधौपयिकप्रथमान्तपदादिसमभिव्याहार-रूपाकाङ्क्षायाः सत्त्वेन तत्र नञा कृत्याद्यभावबोधनसम्भवात्, एवञ्च यत्र प्रति-योग्यनुयोगिनोराधाराधेयभावः सप्तमीं विनाऽनुपपन्नस्तत्रानुयोगिवाचकपदात्सप्त-

❀ काशिका ❀

विशेष्यानुरोधि वचनमित्याद्यनुशासनाभावात्, न चावर्षा हेमन्त इत्यत्रेवाश्रयतो लिङ्गेत्यनेन निर्वाहः, प्रतियोगिरूपाश्रयस्यात्र ग्रहणात्, प्रतियोगिज्ञानस्याभावज्ञानार्थमाश्रयणात्, अत एवान्यपदार्थप्राधान्यपक्षवत् पूर्वपदार्थप्राधान्यपक्षेऽवर्षा हेमन्त इत्यत्र हेमन्तरूपाश्रयगतलिङ्ग-संख्यापत्तिरूपो दोषो भाष्ये नोक्तः, 'गुणवचनानामाश्रयतो लिङ्गादिवत् समासार्थः प्रतियोगितया यद् द्रव्यं श्रितस्तस्य लिङ्गादि समासस्ये'त्यङ्गीकारादिति वाच्यम्, गुणवचनाना'मित्यादेरति-देशस्य स्वीकारे गौरवात्, दृष्टान्तदार्ष्टान्तिकयोराश्रयवैलक्षण्यप्रयुक्तवैषम्यापत्तेश्चेति दिक् ।

अन्योन्याभावत्वादीत्यादिपदेन—ध्वंसत्वप्रागभावत्वसंग्रहः । ननु सकलाभावानुगताभावत्वावच्छिन्ने शक्तिरुचिता लाघवात्, न त्वत्यन्ताभावत्वादिरूपनानाधर्मावच्छिन्नेषु गौरवादित्याशङ्क्याह—तत्तद्रूपेण बोधादिति । तत्तद्रूपेण बोधस्यानुभवसिद्धत्वादित्यर्थः । घटप्रागभावध्वंससमये 'अत्र घटो नास्ती'ति [illegible]त्या घटप्रागभावत्वादिना घटप्रागभावो घटध्वंसश्च विषयीक्रियते, न तु तदत्यन्ताभावत्वावच्छिन्नः, प्रागभावध्वंसयोरत्यन्ताभावेन प्राचीनतार्किकमते विरोधेन तदा तत्र तदत्यन्ताभावासत्त्वादिति भावः ।

नव्यतार्किकास्तु—नञोऽत्यन्ताभावत्वावच्छिन्नेऽन्योन्याभावत्वावच्छिन्ने एव शक्तिर्न तु प्रागभावत्वाद्यवच्छिन्नेऽपि, मानाभावात्, प्रागभावादिसमये 'घटो नास्ती'ति धीस्तदत्यन्ताभाव-

❀ दर्पणः ❀

न्यप्यपेक्ष्यते। यथा 'भूतले न घट' इत्यादौ। तदुक्तं दीधितिकृता—वस्तुतो' न पचति चैत्रो' 'नेदं मैत्रस्ये'त्यादौ विभक्त्यर्थकृतिसम्बन्धादेरभावस्य बोधने नञा सप्तमी नापेक्ष्यते, अपेक्ष्यते च प्रातिपदिकार्थस्येती'ति। न च 'चैत्रो न पचती' त्यादौ नञाख्यातार्थभावनाभावबोधने 'चैत्रौ न पचत'श्चैत्रा न पचन्ती'त्यादौ द्विवचनाद्युपपत्तिः, भवन्मते भावनाऽन्वयिनि सङ्ख्यान्वयनियमेन भावनान्वयि-न्यभावे द्वित्वाद्यभावेन द्विवचनादिना तस्य बोधयितुमशक्यत्वात्। वैयाकरणमते तु—तत्र धात्वर्थक्रियाभावस्यैव नञा बोधनेन द्वित्वादिविशिष्टचैत्रकर्तृकक्रियाभाव इति बोधाभ्युपगमेन तादृशानुपपत्त्यभावादिति वाच्यं, 'नञ्समभिव्याहारे भावना-भावान्वयिनि तिङर्थसङ्ख्यान्वय' इति व्युत्पत्त्यन्तराभ्युपगमेन द्विवचनाद्युपपत्तेः। त्वन्मतेपि यच्चैत्रकर्तृकः पाकोऽप्रसिद्धस्तत्र चैत्रो न पचतीति प्रयोगानुपपत्त्या क्रियाप्रतियोगिकाभावस्य नञा प्रत्याययितुमशक्यत्वाच्च। न च तत्र नञा भेद एव बोध्यते, प्रतियोगितया चैत्रादिविशिष्टस्य तस्याख्यातार्थकर्त्तर्य्येवान्वयान्न तादृश-प्रयोगानुपपत्तिरिति वाच्यं, तथा सति प्रतियोगितासम्बन्धावच्छिन्नधात्वर्थप्रका-रकबोधे असमस्तनञ्पदजन्योपस्थितेर्हेतुत्वस्यात्रैव व्यभिचारेण स्वसिद्धान्तव्या-घातात्। नञसमभिव्याहारे आख्यातार्थभावनान्वय्यर्थकत्ववत् तत्समभिव्याहारे भावनान्वय्यर्थकत्वरूपसामानाधिकरण्यस्य युष्मदादौ सत्त्वान्न 'न त्वं पचसी' त्यादौ मध्यमादिपुरुषानुपपत्तिः। यद्वा,—नञसमभिव्याहारे त्वबोधकर्तृत्वबोध-कत्वम्, तत्समभिव्याहारे तु भूतपूर्वं तदादाय पुरुषोपपत्तिरिति। इदं त्ववधेयम्—

❀ काशिका ❀

मेवावगम्यते, प्रागभावाद्योरत्यन्ताभावेन सह विरोधे मानाभावादिति वदन्ति। नन्वत्यन्ताभावत्वं नित्यसंसर्गाभावत्वं, तादात्म्यसंबन्धावच्छिन्नप्रतियोगिताकाभावत्वमन्योन्याभावत्वमेवं चात्यन्ता-भावत्वापेक्षयान्योन्याभावत्वं लघ्विति तदवच्छिन्ने एव शक्तिकल्पनमुचितं, न त्वत्यन्ताभावत्वावच्छि-न्ने। एवमुत्पत्तिमदभावत्वोत्पत्तिशून्यनाशप्रतियोग्यभावत्वरूपध्वंसप्रागभावत्वयोरपि अन्योन्या भावत्वापेक्षया गुरुतया तदवच्छिन्नेऽपि शक्तिकल्पनमनुचितमिति चेन्न, 'नास्ती'त्यादिप्रतीति-साक्षिकोऽनुयोगिताविशेष एवात्यन्ताभावत्वादिर्न तूक्तरूपः, तथा सति संसर्गाभावत्वस्य दुर्वचन तया तद्घटितात्यन्ताभावत्वस्यापि तथात्वापत्तेः, तथा हि—न तावत् संसर्गारोपजन्यप्रतीति-विषयाभावत्वं संसर्गाभावत्वं, प्रतियोगिसंसर्गारोपस्याभावलौकिकप्रत्यक्षं प्रत्येव हेतुतयातीन्द्रिया-भावेऽव्याप्तेः, नापि संसर्गावच्छिन्नप्रतियोगिताकाभावत्वं तत्, अन्योन्याभावस्यापि तादात्म्य-संबन्धप्रतियोगिताकतया तत्रातिव्याप्तेः, न च तादात्म्यातिरिक्तत्वं संसर्गे विशेषणं प्रवेश्यमिति नोक्तदोष इति वाच्यं, तथापि संयोगसंबन्धावच्छिन्नप्रतियोगिताके संयोगिनोऽत्यन्ताभावेऽव्याप्तेः, संयोगरूपसंयोगितादात्म्यरूपतया तदतिरिक्तत्वाभावात्, एवमन्योन्याभावत्वं न तादात्म्यसंबन्धा-

❀ निपातार्थनिर्णयः ❀

'प्रादयो द्योतकाश्चादयो वाचका' इति नैयायिकमतमयुक्तम्, वैषम्ये बीजाभावादिति ध्वनयन्निपातानां द्योतकत्वं समर्थयते—

द्योतकाः प्रादयो येन निपाताश्चादयस्तथा ।
'उपास्येते हरिहरौ' लकारो दृश्यते यथा ॥ ४२ ॥

येन—हेतुना प्रादयो द्योतकास्तेनव हेतुना चादयो निपातास्तथा=द्योतका इत्यर्थः। अयं भावः"—'ईश्वरमनुभवती'त्यादावनुभवादिः प्रतीय-

❀ दर्पणः ❀

'नञसमभिव्याहारे प्रतियोग्यनुयोगिनोर्यः सम्बन्धो भासते तत्समभिव्याहारे तत्सम्बन्धावच्छिन्नतदभावस्तदनुयोगिनि भासते' इति व्युत्पत्तेर्न 'भूतले न घट' इत्यादावन्योन्याभावबोधः,तन्नियामकं त्वादावेवोक्तम्। परन्तु घटत्वादिविशिष्टोपस्थापकपदसमभिव्याहृतनञादिपदस्य घटत्वावच्छिन्नप्रतियोगितासम्बन्धेन घटप्रकारकाभावशाब्दत्वस्य,—तथा नीलादिसाकाङ्क्षघटाद्युपस्थापकपदसमभिव्याहृतनञ्पदस्य नीलघटत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन नीलघटादिप्रकारकशाब्दबुद्धित्वस्य च कार्य्यतावच्छेदकत्वोपगमान्न 'नीलघटो न घट' इत्यादिप्रयोगप्रसक्तिः, भवति च'पीतो घटो न नीलघट' इत्यादिप्रयोगोपपत्तिरित्याद्यन्यतोवधार्य्यमित्याशयवानाह-इत्याद्यन्यत्र विस्तर इति ॥४१॥

❀ इति नञर्थनिरूपणम् ॥ ७ ॥ ❀

प्रासङ्गिकं निपातोपसर्गार्थनिरूपणमित्याशयेन मूलमवतारयति-प्रादयो द्योतका इति। द्योतकतारूपशक्तिमन्त इत्यर्थः। अत एव 'प्रजयती'त्यादौ न प्रकर्षाद्यर्थस्य विशेष्यतेति भावः। मतान्तरे तु तात्पर्य्यग्राहकत्वं द्योतकत्वं वक्ष्यति। तत्र—येनेत्यत्र यच्छब्दो नोत्तरार्द्धपठितहेतुमात्रपरामर्शकः, किन्तु हेत्वन्तरपरामर्शकोऽपीत्याह—अयं भाव इति। न धात्वर्थ इति। न तत्प्रयोगान्त-

❀ काशिका ❀

वच्छिन्नप्रतियोगिताकाभावत्वं, संयोगसंबन्धावच्छिन्नप्रतियोगिताकसंयोगत्यन्ताभावे, समवायसंबन्धावच्छिन्नप्रतियोगिताके समवाय्यत्यन्ताभावे चातिव्याप्तिरिति दिक्, तद् ध्वनयन्नाह—इत्याद्यन्यत्र विस्तर इति। दीधित्यादिग्रन्थेषु विस्तरो द्रष्टव्य इत्यर्थः॥

❀ इति नञर्थनिर्णयः ॥ ❀

ईश्वरमनुभवतीत्यादाविति। 'आदि'पदात् प्रजयतीत्यादेः परिग्रहः। 'अनुभवादि'रि-

मानो न धात्वर्थः, 'भवती'त्यत्राप्यापत्तेः, नोपसर्गार्थः, तथा सत्य-प्रकृत्यर्थतया तत्राख्यातार्थानन्वयापत्तेः, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थ-बोधकत्वव्युत्पत्तेः, 'अनुगच्छती'त्यादावनुभवादिप्रत्ययापत्तेश्च, न विशिष्टार्थः, गौरवात् । तथाच धातोरेव विद्यमानत्वादिवाचकस्यास्तु लक्षणा, उपसर्गस्तात्पर्यग्राहक इत्यस्तु ।

❀ दर्पणः ❀

र्गतधातुशक्य इत्यर्थः । **आपत्तेरिति** । अनुभवादिप्रतीत्यापत्तेरित्यर्थः । **नोपसर्गार्थ इति** । न तद्धातुसमभिव्याहृतप्रादिशक्य इत्यर्थः । **अनन्वयापत्तेरिति** । एतच्चानु-भवादिमात्रप्रतीतिमभ्युपेत्य । वस्तुतस्तथा स्वीकारेऽक्रियार्थकत्वेन अनुभवादेर्धातु-त्वानापत्तिरिति बोध्यम् । नन्वनुभवार्थकत्वेपि तस्य फलस्थानीयत्वेन तदन्वयिव्या-पारसामान्यार्थकान्वादेर्न धातुत्वानुपपत्तिरत आह—**अनुगच्छतीत्यादाविति** । अत्रानोरनुभवार्थकत्वे तदनुरोधेन गमेरपि व्यापारसामान्यार्थकताया एवाभ्यु-पेयतया तथा प्रतीतिर्दुर्वारा स्यादित्यर्थः । वस्तुतस्तु संयोगावरुद्धव्यापारेऽन्वर्था-नुभवस्य बाधेनान्वयासम्भवान्नानोरनुभवार्थकत्वसम्भावनेति भावः । **गौरवा-दिति** । विशिष्टानुपूर्व्याः शक्ततावच्छेदकत्वे गौरवादित्यर्थः । **तथाचेति** । धातूप-सर्गविशिष्टानां प्रत्येकं प्रतीयमानानुभवार्थप्रतिपादकत्वासम्भवादिति समुदितार्थः । **विद्यमानत्वादी**त्यादिनोत्पत्तिर्गृह्यते । 'लक्षणे'त्यस्या'नुभवादिरूपेर्थे' इति शेषः ।

❀ काशिका ❀

त्यादिपदं प्रकृष्टजयादिसंग्राहकम् । **न धात्वर्थः** = न भ्वादिधातुप्रतिपाद्यः । तत्र हेतुमाह—**भवतीत्यत्रेति** । तथा च न तत्तद्धातुवाच्यः स इत्यर्थः । अन्वयव्यतिरेकाभ्यां लाघवादुपसर्गवाच्य एव सोऽस्त्वित्याशङ्कां परिहरति—**नोपसर्गार्थ** इति । नोपसर्गवाच्य इत्यर्थः । ननु प्रत्ययानां प्रकृतितत्समभिव्याहृतान्यतरार्थान्वितस्वार्थबोधकत्वमित्येव व्युत्पत्तिः कल्प्यतां, न चैवं गौरवं, धातौ तत्तदर्थवाचकत्वस्योपसर्गे द्योतकत्वकल्पनापेक्षया लाघवानपायादित्यतो दूषणान्तरमाह—**अनु-गच्छतीत्यादाविति** । **प्रत्ययापत्तेश्चेति** । अनुभववाचकत्वेनाभिमतस्यानोः सत्त्वात्, तत्तद्धातुसमभिव्याहारस्यानुभवादेस्तत्तदुपसर्गेण बोधे नियामकत्वं कल्प्यत इति चेत्, सत्ता-द्यर्थवाचकत्वेन क्लृप्तस्य धातोरेवानुभवादिबोधकत्वमुपसर्गस्य द्योतकत्वं कल्पयितुं युक्तम्, एवं सति 'प्रत्ययाना'मिति व्युत्पत्तिरपि न संकोच्येति भावः । **न विशिष्टार्थ** इति । नोपसर्ग-विशिष्टतत्तद्धातुवाच्य इत्यर्थः । **गौरवादिति** । विशिष्टस्योभयरूपत्वेनोभयत्र वाचकत्वकल्पनायां गौरवात् । ननु 'प्रजयती'त्यत्र जयो धातुवाच्यः, प्रकर्ष उपसर्गवाच्य इत्येव किं नोपयत इति चेच्छृणु—प्रकर्षस्य नामार्थतया धात्वर्थजयेनान्वयानुपपत्तेः, नामार्थधात्वर्थयोः साक्षाद्भेदे-नान्वयस्याव्युत्पन्नत्वात्, 'उपसर्गातिरिक्तत्व'स्य नामनि प्रवेशे तु गौरवमिति भावः । ननु

तथाच तात्पर्य्यग्राहकत्वमेव द्योतकत्वमिति,–तच्च चादिष्वपि तुल्यम्। 'चैत्रमिव पश्यती'त्यादौ सादृश्यविशिष्टं चैत्रपदलक्ष्यम्, इवशब्दस्तात्पर्य्यग्राहक इत्यस्य सुवचत्वात्–"इति। तत्र स्वयं युक्त्यन्तरमाह–**उपास्येते हरिहराविति**। अत्र ह्युपासना किमुपसर्गार्थो? विशिष्टस्य? धातुमात्रस्य वा? नाद्यः, तथा सति स्वार्थफलव्यधिकरणव्यापारवाचकत्वरूपसकर्मकत्वस्यासधातोरुपासनारूपफलवाचकत्वाभावादनापत्तेस्ततः कर्म्मणि लकारो न स्यात्। न द्वितीयः। गौरवात्—तृतीये त्वागतं

❀ दर्पणः ❀

लक्षणाकल्पिकायास्तात्पर्य्यानुपपत्तेस्तात्पर्य्यग्रहाधीनतया तस्य चोपसर्गसमभिव्याहाराद्यायत्तत्वादित्यर्थः। नन्वेतावतोपसर्गस्य तात्पर्य्यग्राहकत्वमेव सम्नायातं, न द्योतकत्वमत आह—**तथाचेति**। 'तात्पर्य्यग्राहकत्वमेवेत्ये'वकारेण द्योतकत्वस्य वृत्त्यन्तरत्वव्यवच्छेदः। अनुभवादिफले धातोस्तात्पर्य्यग्राहकत्वस्योपसर्गसमभिव्याहाराधीनत्वादु'पसर्गाः क्रियायोग' इत्यत्रापि क्रियाविशेषणीभूतार्थतात्पर्य्यग्राहकत्वमेवो'पसर्गाः क्रियायोग' इत्यनेन विवक्षितमिति भावः। एतत्तत्त्वमग्रे वक्ष्यते। **तत्रेति**।

❀ काशिका ❀

वृत्तिं विना कथं तत्रानुभवप्रतीतिरत आह—**तथा चेति**। उक्तरीत्या धातोरुपसर्गस्य चानुभववाचकत्वासंभवे चेत्यर्थः। **विद्यमानत्वादिवाचकस्येति**। इदं धातोर्हेतुगर्भविशेषणं, यतो धातुर्विद्यमानत्वादिवाची—'घटो भवती'त्यादौ तदर्थप्रतीतेरतो धातोरेव शक्यसंबन्धरूपलक्षणा संभवति, उपसर्गस्य केवलस्याप्रयोगात् कस्याप्यर्थस्यावाचकत्वेन शक्यसंबन्धरूपा लक्षणा न संभवतीत्यर्थः। नन्वेवमुपसर्गाणां द्योतकत्वप्रवादविरोध इत्याशङ्क्याह—**तात्पर्येति**। एवं 'प्रतिष्ठते' इत्यत्र गमनत्वेनानुभवसिद्धबोधो धातुलक्षणयैव निर्वाह्यः, उपसर्गस्याभावे शक्तिस्वीकारे तु 'नामार्थधात्वर्थयो'रिति व्युत्पत्तिसंकोचेऽपि गमननिवृत्त्यभावत्वरूपेणैव बोधः स्यान्न तु गमनत्वेनेति बोध्यम्। अन्ये तु—जये कृप्तशक्तेर्धातोरेव प्रकृष्टजये शक्तिः, प्रोत्तरजित्वं शक्ततावच्छेदकम्, इयमेवौपसंदानिकी शक्तिरुपसर्गाणामिति गीयते, शक्ततावच्छेदकानुप्रवेश एव हि तत्रोपसंदानपदार्थः, एवमेवानुभवतीत्यादावित्याहुः। **स्वार्थेति**। आसधातोरुपासनारूपफलवाचकत्वाभावेन 'स्वार्थे'त्यादिरूपस्य सकर्मकत्वस्यानापत्तेरिति योजना। न च फलव्यधिकरणव्यापारवाचित्वमेव सकर्मकत्वमस्तु, मास्तु च तत्र स्वार्थत्वनिवेशनं, तथा चोपासनाया उपसर्गवाच्यत्वेऽपि तदात्मकफलव्यधिकरणव्यापारवाचित्वं धातोर्निष्प्रत्यूहमेवेति वाच्यं, यत्किञ्चिद्व्यधिकरणव्यापारवाचित्वस्यातिप्रसञ्जकतया फले स्वार्थत्वप्रवेशस्यावश्यकत्वात्। **गौरवादिति**। इदमुपलक्षणं-विशिष्टस्य भ्वादिगणे पाठाभावाद्धातुत्वानापत्तिः, पाठः कल्प्यत इति चेत्,

द्योतकत्वं, तात्पर्य्यग्राहकत्वलाभादिति भावः। 'दृश्यते' इत्यत्र कर्मणीति शेषः ॥ ४२ ॥

तच्चादिष्वपि तुल्यमित्याह—

तथान्यत्र निपातेपि लकारः कर्म्मवाचकः।
विशेषणाद्ययोगोपि प्रादिवच्चादिके समः ॥ ४३ ॥

अन्यत्र = 'साक्षात्क्रियते—अलङ्क्रियते—ऊरीक्रियते शिव' इत्यादौ, अत्रापि धातोस्तत्तदर्थे कर्म्मणि लकारसिद्ध्यर्थं तत्तदर्थवाचकत्वं वाच्यमित्युपसर्गवद् द्योतकत्वममीषामपीत्यर्थः। यद्यपि कृधातोः सकर्मकत्वमस्त्येव, तथाप्येष्वर्थेषु सकर्मकता न स्यात्, अन्यथा—'वायुर्विकुरुते',

❀ दर्पणः ❀

द्योतकत्व इत्यर्थः। 'सकर्मकत्वस्ये'त्य'नापत्ते'रित्यनेनान्वितम्। ननु मास्तु सकर्मकत्वमत आह—**तत इति**। उपोपसृष्टास्धातोरित्यर्थः। तथाचोपास्यते हरिरित्यादिप्रयोगानुपपत्तिरिति भावः। **तृतीये त्विति**। धातुमात्रार्थ इति कल्पे त्वित्यर्थः। 'आगत'मिति—कर्तृक्तान्तम्। उपाद्यसमभिव्याहारे विना शक्तिं गम्धातोस्तादृशबोधादर्शनात्तस्येतरार्थपरतायामुपसर्गस्य नियामकत्वलाभादिति भावः ॥ ४२ ॥

तच्चादिष्विति। तद्=द्योतकत्वम्। **तत्तदर्थेति**। तत्तदर्थबोधकत्वमित्यर्थः। **अमीषामिति**। चादिनिपातानामपीत्यर्थः। **अस्त्येवेति**। 'घटः क्रियत' इत्यादौ कर्मणि लकारदर्शनात्। कृञः सकर्मकत्वानुपपत्त्या साक्षात्कारे लक्षणेति भावः। **एष्विति**। साक्षात्कारादिरूपार्थेष्वित्यर्थः। **अन्यथेति**। क्वचिदर्थान्तरमादाय कृञः सकर्मकस्य सर्वत्र तत्त्वाङ्गीकारे इत्यर्थः। **वायुर्विकुरुत इति**। विकारानुकूलव्यापार-

❀ काशिका ❀

तथापि द्विर्वचनाडादिव्यवस्थानापत्तिरित्यपि बोध्यम्। उक्तं च वाक्यपदीये—

'अडादीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनम्।
धातूपसर्गयोः शास्त्रे धातुरेव तु तादृशः ॥' इति।

इदमनुभवतीत्यादावपि विशिष्टस्य वाचकत्वकल्पने वेदितव्यम्। धातोः सकर्मकत्वाभावेऽप्युपास्यत इति भावे लकार उत्पद्यतामित्याशङ्क्याह—दृश्यत इत्यत्र कर्मणीति शेष इति। भावे लकारे 'हरिहरौ उपास्येते' इतिप्रयोगानुपपत्तिरिति भावः ॥४२॥

तत्तदर्थवाचकत्वमिति। लौकिकविषयिताशालिप्रत्यक्षानुकूलव्यापाराद्यर्थवाचकत्वमित्यर्थः, लक्षणास्वीकारे—'वाचकत्व'मित्यस्य बोधकत्वमित्यर्थोऽवसेयः, शक्तिकल्पने तु यथाश्रुतमेव [illegible]। क्वचित्तु 'बोधकत्व'मित्येव पाठः। धातूनामनेकार्थत्वादत्र शक्तिकल्पने तुल्यन्यायादनुभवती-

'सैन्धवा विकुर्वते' इत्यत्रापि स्यादिति भावः। अथोपासनासाक्षात्कारादिर्निपातार्थोऽस्तु, 'साक्षात्प्रत्यक्षतुल्ययो'रिति कोशस्वरसात्। तदनुकूलो व्यापार एव धात्वर्थोऽस्तु स्व-स्वयुक्त-निपातान्यतरार्थफलव्यधिकरणव्या-

※ दर्पणः ※

वाचकस्यापि सकर्मकतापत्त्या'ऽकर्मकाच्चे'ति विहितात्मनेपदानुपपत्तिरिति भावः। 'उपास्यते गुरु'रित्यादावुपाद्युपसर्गाणामुपासनाद्यर्थवाचकत्वेपि पूर्वोक्ताकर्मकत्वानुपपत्तिं परिहरति–इदमिति। सकर्मकत्वानुपपत्तिरूपमित्यर्थः। साधकं = द्योतकत्वसाधकम्। व्युत्पत्तौ निपातातिरिक्तत्वविशेषणान्नेयमापत्तिरत आह—किञ्चेति। इत्यपि स्यादिति। अभ्युच्चयवादोयं चोपस्थाप्यसमुच्चयस्य नित्यं समुच्चेयसाकाङ्क्षतया समुच्चयार्थकपदप्रयोगं विना चादिप्रयोगासम्भवात्। शब्दशक्तिस्वाभाव्येन नित्यं धातुपरतन्त्रोपसर्गैः स्वार्थस्य धात्वर्थविशेषणतयैव बोधनेन तदसमभिव्याहारे तत्प्रयोगस्याप्यसम्भवात्। अत एव वक्ष्यति–तुल्यसमाधेयत्वादिति। ननु निपातानां वाचकत्वे–'चार्थे द्वन्द्व' इत्यादिसूत्रमेव मानम्। प्रादीनां वाचकत्वे तु मानानुपलम्भाद् द्योतकतैवोचितेति चेत्, तत्किमी'षद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु ख'लि-

※ काशिका ※

त्यादावप्यनुभवादिवाचकत्वकल्पनं युक्तम्, अत एव परपशाह्निके कौस्तुभे—'उपास्यते गुरु'रनुभूयते सुख'मित्यादौ धातोः सकर्मकक्रियापरत्वं विना कर्मणि लकारायोगेन वाचकत्वे स्थिते इत्युक्तम्। 'अलंक्रियत' इत्यत्र शोभानुकूलव्यापारविशेषो धात्वर्थः। अन्यथा = यत्किंचिदर्थे सकर्मकत्वमाश्रित्यार्थान्तरेऽपि सकर्मकत्वे। इत्यत्रापि स्यादिति। तत्रापि 'करोति घट'मित्यत्र कृधातोः सकर्मकत्वस्य दृष्टतया 'वायुर्विकुरुत' इत्यादावपि सकर्मकत्वापत्तिः, न चेष्टापत्तिः, 'वायुना विक्रियते' 'सैन्धवैर्विक्रियत' इति भावे लकारो न स्यादिति भावः। किं च—साक्षात्कारादिकर्मत्वेन गुर्वादेरभिधानं लकारेण न स्यात्, साक्षात्कारादेर्धात्वर्थताविरहे धात्वर्थाश्रयकर्मण एव तदुत्तरप्रत्ययेनाभिधानात्, अपि चोक्तस्थले गुर्वादेः कर्मत्वमेव न स्यात्, धात्वर्थफलाश्रयस्यैव कर्मत्वात्, न च करोतिकर्मत्वसंभावनापि, सिद्धे नित्ये तस्य बाधितत्वात्। अर्थभेदेऽपि शब्दाभेदेन, शब्दभेदेऽपि सकर्मकधातुरूपशब्दसादृश्यमूलकाभेदारोपनिबन्धना वा शङ्का, अर्थभेदाच्छब्दभेद एवेत्युत्तरम्। कोशस्वरसादिति। यद्यप्युपासनादावुपादेः कोशो न शक्तिग्राहकस्तथापि—'साक्षात्प्रत्यक्षतुल्ययोः' 'अलं भूषणपर्याप्तिशक्तिवारणवाचकः' 'वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चये' इत्यादि कोशप्रामाण्यात्—'अथ निपाताः—उच्चावचेष्वर्थेषु निपतन्ती'त्यारभ्य निरुक्ते निपातानां तदत्तर्थकत्वस्योक्तेश्चोपासनादिकमपि तदर्थत्वेन कल्प्यत इति [illegible]वः। धातोर्व्यापारमात्रवाचित्वे पूर्वोक्तरीत्या सकर्मकत्वं न स्यादित्याशङ्कां निरस्यति—स्वस्वेति। स्वः = धातुः, स च तद्युक्तनिपातश्च—तयोरन्यतरस्यार्थभूतं तद्व्यधिकरणव्यापार-

पारवत्त्वं सकर्म्मत्वमपि सुवचमिति दृष्टान्तदार्ष्टान्तिकावयुक्ताविति नेदं साधकमिति चेन्न। नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयासम्भवेन निपातार्थधात्वर्थयोरन्वयासम्भवात्। अन्यथा 'तण्डुलः पचती'त्यत्रापि कर्मतया तण्डुलानां धात्वर्थेन्वयापत्तेरिति। किञ्च प्रादीनां वाचकत्वे 'भूयान् प्रकर्षः' 'कीदृशो निश्चय' इतिवद्, 'भूयान् प्र', 'कीदृशो नि'रित्यपि स्यात्। अस्मन्मते प्रादेरनर्थकत्वान्न तदन्वय इत्यतो द्योतकता तेषां स्यादिति। साधकान्तरमभिप्रेत्याह—विशेषणेति। 'शोभनः समुच्चयो दृष्टव्य' इतिव'च्छोभनश्च दृष्टव्य' इत्यस्यापत्तेस्तुल्यसमाधेयत्वादिति भावः।

अपिच निपातानां वाचकत्वे प्रातिपदिकार्थयोर्विना षष्ठ्यादिकं भेदेनान्वयासम्भवः, अन्यथा 'राजा पुरुष' इत्यस्य राजसम्बन्धी पुरुष इत्यर्थापत्तेरित्यभिप्रेत्याह–आदीति। 'धवखदिरयोः समुच्चय' इतिवद् 'धवस्य

❀ दर्पणः ❀

त्यादिसूत्रात्मकं मानं पाणिपिहितमिति विभावय। 'पष्ठ्यादिक'मित्यादिपदेन तदर्थविहितद्वितीयादिपरिग्रहः। अभेदातिरिक्तसम्बन्धावच्छिन्नप्रातिपदिकार्थप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दत्वावच्छिन्नं प्रति विशेष्यतया विभक्तिजन्योपस्थितेर्हेतुतया प्रकृते तदभावेन भेदान्वयासम्भव इत्यर्थः। अन्यथा = उक्तकार्यकारणभावानभ्युपगमे। आपत्तेरिति। भेदेनान्वयबोधापत्तेरित्यर्थः। आदीति। भेदान्वयसंग्राहकमादिपदमित्यर्थः॥ ४३॥

❀ काशिका ❀

वाचकत्वमित्यर्थः। दृष्टान्तेति। उभयत्रापि निपातस्य द्योतकतां विनैव गुर्वादेः कर्मत्वनिर्वाहात्। नेदं साधकमिति। उक्तस्थले गुर्वादेर्लकारेण साक्षात्कारादिकर्मत्वेनाभिधानं— साधकं = धातोर्विशिष्टार्थकत्वस्य, निपातस्य द्योतकत्वस्य च साधकम्। अन्वयस्यैवेति। अनुकूलतासंबन्धेनान्वयस्यैवेत्यर्थः, प्रागुक्तकोशादिकं तु द्योत्यार्थमादायोपपन्नमिति भावः। तदन्वयः = कीदृशादिपदार्थान्वयः। तुल्यसमाधेयत्वादिति। तुल्येन = प्रादितुल्येन निरर्थकत्वहेतुना, समाधातुं शक्यत्वादित्यर्थः। नन्वभेदेन नामार्थप्रकारबोधं प्रति निपातभिन्नजन्योपस्थितिः कारणमिति कार्यकारणभावाङ्गीकारान्न दृष्टान्तदार्ष्टान्तिकयोर्दोष इत्यत आह—अपि चेति। भेदेनान्वयासंभव इति। 'नामार्थयो'रिति व्युत्पत्तिविरोधात्, भेदसंसर्गकनामार्थप्रकारकहेतुभूतप्रत्ययजन्योपस्थितेरभावाच्च, द्योतकतापक्षे तु—तत्तत्प्रातिपदिकस्यैव विशिष्टार्थकत्वेन्वयाभावादेव न दोषः। 'विना षष्ठ्यादिक'मित्युक्तिस्तु–'तत्सत्त्वे तदर्थद्वारा नामार्थयोरपि भेदेनान्वयः संभवति, विभक्त्यर्थसंसर्गद्वारा वेत्यर्थस्य बोधनाय। 'षष्ठ्यादिक'मित्यादिपदं द्वितीयादिसंग्राहकम्। अन्यथा = षष्ठ्या-

च' 'खदिरस्य चे'त्येव स्यादिति भावः ॥ ४३ ॥

ननु 'प्रातिपदिकार्थयोर्भेदान्वयबोधे विभक्तिजन्योपस्थितिर्हेतु'रिति कार्यकारणभावो निपातातिरिक्तविषय एवेति नोक्तदोष इत्याशङ्क्याह—

पदार्थः संदृशान्वेति विभागेन कदाचन ।
निपातेतरसङ्कोचे प्रमाणं किं ? विभावय ? ॥४४॥

सदृशा = सदृशेन, समानाधिकरणेनेति यावत् । अन्वेति–'अभेदेने'ति शेषः । विभागेन = असदृशेन, असमानाधिकारणेनेति यावत् ।

❀ दर्पणः ❀

भेदान्वयेति । 'प्रातिपदिकार्थयोरभेदान्वय' इति पाठस्तु तादृशान्वयबोधे विभक्तिजन्योपस्थितेर्हेतुत्वस्य केनाप्यनभ्युपगमादप्रक्रान्तत्वाच्च चिन्त्यः । **निपातातिरिक्तेति** । तथाच समुच्चयाद्यर्थस्य निपातार्थत्वेन न तेन साकं पदार्थान्तरस्य भेदान्वयानुपपत्तिरित्यर्थः । 'सदृक्'शब्दस्य समाना दृगितिव्युत्पन्नस्योपादानेऽनन्वयापत्त्या प्रकृते तुल्ये रूढस्य, 'तमिवेमं पश्यन्ति जना' इति भाष्ये कर्तृकर्मव्युत्पन्नस्य वा तस्य ग्रहणमित्यभिप्रेत्य व्याचष्टे–**सदृशेनेति** । तुल्येनेत्यर्थः । ननु विरुद्धविभक्तिकस्यापि नामत्वादिना तुल्यत्वात्तेनाभेदेनान्वयापत्तिरत आह—**समानाधिकरणेनेति** । तथाच समानविभक्तिकपदोपस्थाप्यत्वेन सादृश्यस्य विवक्षणान्नोक्तदोष इति भावः । एवञ्च मूले'ऽन्वेती'त्यनन्तरम्—'अभेदेने'तीति शेषः ।

'स्तोकम्पचती'त्यादौ विभिन्नविभक्तिकपदोपस्थाप्यत्वादसदृशेनाप्यभेदान्वयादाह—**असमानाधिकरणेनेति** । विशेष्यवाचकपदप्रकृतिकविभक्तिविरुद्धार्थकविभक्तिप्रकृत्यर्थेनेत्यर्थः । ननु वाचकतावादिनोक्तव्युत्पत्तेर्निपातातिरिक्तत्वेन सङ्कोचनीयतयेत्युक्त्यैवाक्षेपध्रौव्ये मूले—'समानाधिकरणे'त्यादिव्युत्पत्तिकथनेऽर्थान्तरमत

❀ काशिका ❀

दिकं विनापि नामार्थयोर्भेदसंबन्धेनान्वयाङ्गीकारे,—'नामार्थयो'रिति व्युत्पत्त्यनङ्गीकारे इति यावत् । चेत्येवेति । न तु धवश्च खदिरश्चेति भावः ॥४३॥

सदृशेति । 'वाचा' 'निशे'तिवदावन्तमिति भ्रमवारणायाह–सदृशेनेति । येन केनचिद्रूपेण सादृश्यस्यासमानाधिकरणेऽपि संभवादाह—समानाधिकरणेनेति । स्वप्रतिपादकसमानाधिकरणशब्दप्रतिपाद्येन, यद्वा–स्ववृत्तिपदार्थतावच्छेदकसमानाधिकरणपदार्थतावच्छेदकाधिकरणेन, तादात्म्यसंबन्धेन स्वसंबन्धिना वा । एतादृशपदार्थयोरभेदसंबन्धेनान्वयसंभव इत्या-

अयमर्थः,—समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिर्निपातातिरिक्तविषयेति कल्पने मानाभावो गौरवञ्च । अस्माकं निपातानां द्योतकत्वादन्वय एव नास्तीति नायं दोषः, अत एव 'घटो नास्ती'त्यादौ घटपदं तत्प्रतियोगिके लाक्षणिकमिति नैयायिकाः ॥-४४ ॥

❀ दर्पणः ❀

आह—**अयमर्थ इति**। स चेत्थं–'विभागेन कदाचने'त्यनेन व्यधिकरणयोरभेदान्वयं व्यवच्छिन्दता 'नामार्थयोर्भेदेनानन्वय' इति व्युत्पत्तिरेव प्राधान्येन प्रदर्श्यते, न तु 'समानाधिकरणयो'रिति व्युत्पत्त्यन्तरं तथा, किन्तु दृष्टान्तविधयेति नोक्तदोषः । तथाच प्रधानीभूतव्युत्पत्तावेव निपातेतरसङ्कोचोत्कीर्तनमिति सर्वं सुस्थम् । ननु नामार्थयोरभेदान्वयबोधे समानविभक्तिकपदजन्योपस्थितिहेतुतायां पदांशे निपातातिरिक्तत्वं निवेशनीयमिति नोक्तदोष इत्यवतरणं तु सध्रीचीनम्, न च तादृशव्युत्पत्तेरप्रक्रान्तत्वात्कथमेतदिति वाच्यं, मूलोक्तादिपदेनैव षष्ठ्यादिकमन्तरेण भेदेनान्वयासम्भवं प्रतिपादयता समानविभक्तित्वेन'धवश्चे'त्यादावभेदान्वयापादानस्यापि कुक्षीकृतत्वात्तदेव च समानाधिकरण्यं व्युत्पत्तौ निविष्टमिति यथाश्रुतमूलसङ्गमनादिति ।

ननु तदन्वयानुपपत्तिरेव मानमत आह—**गौरवञ्चेति** । ननु तवापीदं दूषणं समानमत आह—**अस्माकमिति** । द्योतकतावादिनामित्यर्थः । **द्योतकत्वादिति**—वादिनां समभिव्याहृतपदसमुच्चिततत्तदर्थरूपलक्ष्यार्थे तात्पर्यग्राहकत्वादित्यर्थः । **नास्तीति** । समुच्चयादेः समभिव्याहृतपदेनैव लाभात्तस्य पृथगुपस्थित्यभावेनान्वयस्यैवाभावेनोक्तस्थलस्य तादृशव्युत्पत्त्यविषयत्वादिति भावः।

अत एवेति । व्युत्पत्तौ निपातातिरिक्तत्वविशेषणप्रवेशादेवेत्यर्थः । **लाक्षणिकमिति** । व्युत्पत्तेस्तद्घटितत्वे तु तत्र लक्षणानुसरणं व्यर्थमेव स्यादिति भावः ।

नैयायिकास्तु—"नञो वाचकताया भाष्यसम्मतत्वाद्, 'घटो न पटः' 'चैत्रो न पचती'त्यादौ नञर्थाभावस्य विशेषणतया घटचैत्रादिष्वन्वयानुरोधादुक्तव्युत्पत्तौ व्यभिचारवारणाय 'निपातातिरिक्तत्व'विशेषणमावश्यकम् । एवञ्च 'घटश्च'

❀ काशिका ❀

शयेनाह–अभेदेनेति । शेषेति । समानाधिकरणेति । समानविभक्तिकयोर्विरुद्धविभक्तिरहितयोर्वा प्रातिपदिकयोरर्थयोरित्यर्थः । अन्वय एव नास्तीति । पृथगुपस्थितयोरेव संसर्गस्यान्वयरूपत्वादिति भावः । नायं दोष इति । 'धवस्य खदिरस्य चेत्येव स्या'दित्युक्तो दोषो न, व्युत्पत्तेर्विभिन्नोपस्थितविषयत्वात्, प्रकृते च खदिरपदेनैव खदिरसमुच्चयोपस्थापनादिति भावः । अत एव = नामार्थयो'रिति व्युत्पत्तेरसंकोचादेव । लाक्षणिकमिति । संकोचे तु

अपिच निपातानां वाचकत्वे काव्यादावन्वयो न स्यादिति साधकान्तरमाह—

'शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव'।
इत्यादावन्वयो न स्यात्, सुपाश्च श्रवणं ततः ॥४५॥

अत्रोस्रसदृशैः शरैः रससदृशानुदीच्यानुद्धरिष्यन्नित्यर्थः। अयञ्चोस्रादिशब्दानां तत्सदृशपरत्वे इवशब्दस्य द्योतकत्वे सत्येव सङ्गच्छते, अन्यथा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिविरोधः। तथा-

ॐ दर्पणः ॐ

पटश्चे'त्यादौ विभक्तिजन्योपस्थितिं विनापि चार्थस्य घटादिष्वन्वयः सुलभः। न च 'घटो ने'त्यत्र घटस्य नामार्थत्वाद्विभक्तिजन्योपस्थितिं विना प्रतियोगितासंसर्गकनञर्थविशेष्यकबोधानुपपत्तिर्दुष्परिहरैवेति वाच्यम्, एतद्भियैव घटादिपदानां तत्प्रतियोगिके लक्षणाभ्युपगमात्। 'निपातातिरिक्तनामार्थयोः साक्षाद्भेदेनान्वयोऽव्युत्पन्न' इत्यत्र द्विवचनस्वारस्येन निपातातिरिक्तनामार्थनिष्ठभेदसम्बन्धावच्छिन्नप्रकारतानिरूपितनिपातार्थावृत्तिविशेष्यतासम्बन्धेन बोधे, विशेष्यतासम्बन्धेन विभक्तिजन्योपस्थितेर्हेतुत्वकल्पनाद्वा सामञ्जस्या'दित्याहुः ॥४४॥

उक्तव्युत्पत्तेर्निपातातिरिक्तविषयत्वेन पूर्वोक्तदोषपरिहारेऽपि स्थलान्तरे तन्मतेऽन्वयानुपपत्तिर्दुर्वारैवेत्याशयेन मूलमवतारयति—**अपिचेति**। **इत्यर्थ इति**। इत्यन्वयबोधः सर्वसम्मत इत्यर्थः। **अयञ्चेति**। उक्तार्थान्वयश्चेत्यर्थः। **अन्यथेति**। निपातानां वाचकत्वाभ्युपगम इत्यर्थः। व्युत्पत्तिविरोधं व्यक्तीकरोति—**तथाहीत्यादि**। नन्विवशब्दोत्तरलुप्ततृतीयार्थकरण एवेवार्थेऽन्वयः

ॐ काशिका ॐ

लक्षणाकल्पनं निरर्थकमेव स्यात्, घटस्य घटत्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन नञर्थाभावेन्वयसंभवात्। ननु घटादिपदस्य घटादिप्रतियोगिके लक्षणामङ्गीकृत्याभेदान्वयोपपादनं नैयायिकानां न युक्तं, तथा सत्यपि 'भूतले न घट' इत्यत्र तात्पर्यसत्त्वे भूतलवृत्तित्वाभावस्य घटेऽन्वयबोधश्च 'दीधितिकारा'दिभिरभ्युपेयते, तथा च तत्र 'नामार्थयो'रिति व्युत्पत्तिभङ्गः। एवं 'चैत्रो न पचती'त्यत्र पाकानुकूलकृत्यभावस्य चैत्रेऽन्वयस्तत्रापि। एवं 'घटः पटो ने'त्यत्र घटप्रतियोगिकभेदस्याश्रयतासंबन्धेन बोधात्तत्रापि। नञोऽभाववल्लाक्षणिकत्वे तस्य मुख्यार्थपरत्वदौर्लभ्यापत्तिः, अभावस्य भेदान्वयबोधोपगमेऽपि कार्यकारणभावाधिक्यविरहाद्भेदान्वयबोधोपगम एव समुचितः, स्पष्टं चेदं व्युत्पत्तिवादे। किं चानेकशब्दे समुच्चयशक्तिकल्पनापेक्षया कतिपयनिपातेष्वेव तत्कल्पना युक्तेत्याशङ्क्याह—अपि चेति। रससदृशानिति। एतेषामु'दीच्या'नित्यत्र

हि—'उस्रै'रिति करणे तृतीया, न चोस्रोत्र करणम्, इवार्थसदृशस्य करणत्वेपि तस्य करणत्वं नानेन बोधयितुं शक्यम्, अप्रकृत्यर्थत्वात्। इवशब्दस्य चासत्त्वार्थकतया तदुत्तरं तृतीयाया असम्भवात्, सम्भवे वा श्रवणप्रसङ्गात्, उस्रपदोत्तरतृतीयानन्वयप्रसङ्गाच्चेत्याह—सुपा-

❀ दर्पणः ❀

सुलभेत आह—**इवशब्दस्येति। असत्त्वार्थकतयेति।** लिङ्गाद्यनन्वय्यर्थकतयेत्यर्थः। एवञ्च कारकानन्वयितावच्छेदकरूपेणोपस्थितेर्थे कारकान्वयासम्भवेन तदर्थकतृतीयाया असम्भवादिति भावः। **सम्भवे वेति।** 'वाकारो'नास्थायाम्, अव्ययेवशब्दस्य सत्त्वार्थकतायाः केनाप्यनभ्युपगमात्तथा वक्तुमशक्यत्वादिति।

दूषणान्तरमाह—**उस्रपदोत्तरेति। अनन्वयप्रसङ्ग इति।** 'वाचकतावादिमत' इति शेषः। इदमुपलक्षणं—तृतीयानुपपत्तेः, उस्रसदृशरूपोस्रार्थस्य उद्धरणकरणत्वस्य तत्राभावात्। अस्मन्मते तूस्रसदृशरूपोस्रार्थस्य करणत्वान्न तदनुपपत्तिरिति भावः। तदुत्तरसुब्व्यतिरिक्तप्रत्ययश्रवणत्वापाद्यत्वासम्भवेन समुच्चेयासम्भवमाशङ्क्य चकारस्यान्यत्रान्वयं इत्याह—**सुपां श्रवणञ्चेति।** चकार-

❀ काशिका ❀

विशेषणत्वम्। **अत्र करणमिति।** अत्र = उदग्देशीयराजोद्धरणक्रियायाम्। **सदृशस्य करणत्वेपीति।** उस्रसदृशस्याभेदेन शरविशेषणतया प्रकृतक्रियायां करणत्वसंभवेऽपि। **तस्य** = सदृशस्य। **अनेन** = उस्रपदोत्तरवर्तितृतीयाप्रत्ययेन। **अप्रकृत्येति।** अत्र 'सदृशस्ये'त्यनुषज्यते। तथा च सदृशे—इवार्थे उस्रपदोत्तरवर्तितृतीयया करणत्वं प्रतिपादयितुं न शक्यते, 'प्रत्ययानां प्रकृत्यर्थान्विते'त्यादिव्युत्पत्तिविरोधादिति समुदितार्थः। **तृतीयाऽसंभवादिति।** करणत्वार्थकतृतीयाया असंभवात्, अव्ययोत्तरं सर्वविभक्तिलुक्संभवेऽपि तस्या निरर्थकत्वात्, विभक्त्यर्थप्रधाननिपातार्थस्य कारकत्वेनान्वयात्। ननु तदर्थस्यापि कारकत्वेनान्वयोऽस्तु, अत एव 'दीधितौ'—'पृथिव्यामेव गन्ध' इत्यत्रैवकारार्थस्यान्यस्य लुप्तसप्तम्यर्थाधेयत्वेऽन्वयं स्वीकृत्यापरस्मिन्नेवशब्दार्थेऽभावे तदन्वयमुपगम्य—पृथिवीसमवेतः—पृथिव्यन्यासमवेतो गन्ध इति बोधो वर्णितः, तथा चेवशब्दोत्तरवर्तितृतीया करणत्वार्थिका संभवत्येवेत्याशङ्क्याह—**संभवे वेति। श्रवणेति।** कारकत्वेन तदर्थस्यान्वयेऽसत्त्वार्थकत्वाभावेन निपातत्वाभावेनाव्ययत्वाप्राप्त्या 'अव्यया'दिति लुगनापत्त्या सुप्श्रवणं स्यादिति भावः, अत एव दीधितिकारस्यात्र न निर्भर इत्युक्तं प्रामाणिकैः। एवं च एवशब्दस्याधेयत्वार्थकतां स्वीकृत्य पूर्वोक्तबोध उपपादनीयः। 'सुपां च श्रवण'मित्यत्र चकारो भिन्नक्रम इत्याह—**सुपां श्रवणं चेत्यर्थ इति।** नन्वेतस्य सत्त्वार्थकत्वेऽपि स्वरादिपाठादव्ययत्वोपपत्तिः, तथा च न सुपः श्रवणप्रसङ्ग इत्यतो मूले

ञ्चेति । सुपां श्रवणञ्चेत्यर्थः । चकारादुस्रपदोत्तरतृतीयानन्वयः समुच्चीयते । इत्यादावित्यादिपदात्,–'वागर्थाविव सम्पृक्तौ पार्वतीपरमेश्वरौ वन्दे' इत्यत्र वागर्थयोर्वन्दिकर्मत्वाभावात्तदुत्तरद्वितीयाया अनन्वयः, इवार्थस्य कर्मत्वान्वयबोधकासम्भवश्च संगृह्यते । यदि च विशेषणविभक्तिरभेदार्था, साधुत्वमात्रार्था वा, तदापि इवशब्दस्य वाचकत्वेनन्वय एव, उस्रसदृशशराणां समानाधिकरणपदोपस्थाप्यतया भेदेनान्वयायोगात् ।

❀ दर्पणः ❀

समुच्चेयं दर्शयति–उस्रपदोत्तरतृतीयेति । तृतीयायाः = तदर्थस्य । अनन्वयमेव स्पष्टयति–उस्रसदृशेत्यादि । तत्तत्पदार्थानामित्यर्थः । भेदेनान्वयेति । 'समानाधिकरणनामार्थयो'रित्युक्तव्युत्पत्तेरिति भावः । ननु तर्ह्यभेदान्वयस्तत्र स्यादत आह–बाधादिति । सादृश्यस्य भेदघटितत्वादिति भावः । अत्रेदं बोध्यम्–वाचकतावादिना इवादिना सादृश्यादिबोधने पर्युदासनञिवानुयोगिप्रतियोगिवाचकपदयोः समानविभक्तिकत्वस्य नियामकताया अभ्युपगमेन

❀ काशिका ❀

चशब्दः उपात्तस्तत्समुच्चेयमाह–चकारादिति । तथा च तृतीयाया असाधुत्वमपि स्यात्' लिङ्गसंख्याविभेदेपि ह्युपमानोपमेयता, विभक्तिः पुनरेकैव, 'उपमानोपमेययो'रित्यनुशासनं तु मुनिप्रणीतं नास्त्येवेति भावः । साधुत्वमात्रार्थेति । 'न केवला प्रकृति'रिति नियमेन क्रियमाणा विभक्तिर्विशेष्यवाचकपदप्रकृतिकसजातीयैव कर्तुमुचिता, अन्यथा भेदान्वयबोधो न स्यात्, विरुद्धविभक्तिराहित्यादेस्तत्र तन्त्रत्वादिति भावः । 'उस्रसदृशशराणा'मिति त्रिपदो द्वन्द्वः । भेदेनान्वयेति । उस्रपदार्थस्य प्रतियोगित्वसंबन्धेन सदृशपदार्थैकदेशे सादृश्ये, सदृशस्य स्वनिष्ठसादृश्यानुयोगित्वसंबन्धेनान्वयो बाधित इत्यर्थः । एवं च 'घनश्याम' इत्यादौ घनादिपदं घनादिसदृशलाक्षणिकम्, घन इव श्याम इति विग्रहेऽपि तत्तथा, अत एव सामानाधिकरण्यात्समासपुंवद्भावावाञ्जस्येन सिद्धौ, अन्यथा वचनसामर्थ्यात्सामानाधिकरण्यविरहेऽपि समासाङ्गीकारे प्रकरणबाधः स्यात्, एवमपि पुंवद्भावानापत्तिः, मृगक्षीरवज्जातिमात्रविवक्षया प्रयोगनिर्वाहस्तु–गत्यन्तरसत्त्वे न युक्त इति स्पष्टमत्रैव सूत्रे कैयटे । उपमानपरत्वं तु 'घन' इति तटस्थप्रयोगमादाय भूतपूर्वगत्याश्रयेण, घनसदृशार्थकत्वेऽपि विशेषणविधया घनार्थकत्वसत्त्वाद्वा, एवं च घनसदृशः श्याम इत्युभयत्र बोधः, द्योत्यस्यापि सदृशस्यानुभवबलाद्विशेष्यत्वाङ्गीकारे क्षतिविरहः, द्योत्यवाच्ययोर्यत्र पृथगुपस्थितिस्तत्रैव द्योत्यस्य वाच्ये विशेषणत्वमिति नियम इति स्वीकारात्, सादृश्यस्य प्रयोजकधर्माकाङ्क्षायामुपस्थितश्यामत्वं प्रयोजकत्वेन मानस-

बाधादभेदेनापि सः। न ह्युस्राभिन्नसदृशाभिन्नः शर इत्यर्थो द्रष्टव्यः ॥४५॥

❀ दर्पणः ❀

प्रकृत उस्रनिरूपितसादृश्याश्रयशरकरणकोद्धरणबोधः सूपपादः, भेदाभेदयोर्विकल्पस्योपन्यासस्तु सारकारोक्तश्चिन्त्य एवेति ॥४५॥

❀ काशिका ❀

बोधविषयो भवतीत्यन्यत्र विस्तरः। उस्राभिन्नेति। उस्रस्य सदृशेऽभेदेनान्वये उस्राभिन्नसदृशस्य शरेऽभेदस्य बाधः, सदृशस्य पूर्वशरेणाभेदान्वये सदृशाभिन्नशरे उस्रस्यान्वये इत्यर्थः। परे तु—केषांचिन्निपातानामनुभवानुरोधेन वाचकत्वमपि, अत एव नेत्थतोऽभावत्रोधोऽनुभूयते, कस्येति जिज्ञासा च दृश्यते, अभावशब्दवत्, अपि च—'आ नो दिवो बृहतः पर्वतादा' इत्यादौ पर्वतादर्वागित्याद्यर्थबोधात्तत्र वाचकत्वमावश्यकमिति निरुक्ते प्रथमाध्याये तृतीयखण्डे—'उपसर्गा अर्थान् निराहुः' इत्युपक्रमे—'अर्थविकरणम्—आ इत्यर्वागर्थे' इत्यत्र स्पष्टम्। द्योतकत्वे हि दिग्योगलक्षणपञ्चम्यनुपपत्तिस्तस्य विशेषणता च स्यात्, अत एव 'स्त्रिया'मिति सूत्रे स्त्रीत्वस्य प्राधान्ये वचनानुपपत्तिर्द्योतकतापक्षमवलम्ब्य परिहृता, अत एव 'हेतुमति चे'ति सूत्रभाष्ये द्योतकतापक्षे 'हेतुमती'त्यस्य प्रकृत्यर्थविशेषणत्वमुक्तम्। हरिणाप्युक्तम्—

'निपाता द्योतकाः, केचित् पृथगर्थाभिधायिनः, ।
आगमा इव केपि स्युः संभूयार्थस्य वाचकाः ॥ इति।

केचिदित्युभयान्वयी, केचित् पृथगर्थाभिधायिनो वाचकाः, केचिन्निरर्थका इत्याह—आगमा इवेति तदर्थः। 'नामाख्यातमुपसर्गो निपात' इत्यादिप्रातिशाख्यमप्यत्र मानं बोध्यमिति मञ्जूषायां निरूपितम्। एवं—'शरैरुस्रैरिवे'त्यादौ द्योतकतापक्षेप्युस्रसदृशैः शरैरित्यर्थो न युक्तः, उक्तरीत्या द्योत्यार्थकस्य विशेषणत्वनियमात्, किं चैवं 'घनश्याम' इत्यादौ विग्रहे समासे च घनशब्दस्य घनसदृशपरत्वेनोपमानत्वेन बोधकानि—सामान्यधर्मविशिष्टोपमेयवचनैः समानाधिकरणैः सह समस्यन्ते इत्यर्थकेन 'उपमानानि सामान्यवचनैः' इति समासानापत्तिः, तस्योपमेयपरत्वेनोपमानपरत्वाभावात्। भूतपूर्वगतिरपि प्रकृते न निर्वाहिका, विग्रहवाक्येपि तस्योपमेयपरत्वात्, घनेन तुल्य इत्यत्रोपमानपरत्वेपि तस्य विग्रहत्वाभावाद् वृत्तिविग्रहयोरुपमानवाचकत्वग्रहणमुचितं प्रत्यासत्तेः, उक्तवाक्यं तु न विग्रहस्तथा सति 'मृगचपले'त्यत्र पुंवत्त्वानापत्तेः। 'दर्शनीया माते'त्यत्र पुंवत्त्ववारणाय वृत्तौ विग्रहे च सामानाधिकरण्यस्य पुंवत्त्वप्रयोजकत्वात्, केवलघनादिशब्दप्रयोगे उपमानत्वविशिष्टवाचकत्वं दुरुपपादमेव, एवं सादृश्यसंबन्धेन पूर्वपदार्थस्योत्तरपदार्थेऽन्वयेऽपि पुंवत्त्वानुपपत्तिः, किं च श्यामशब्दस्योपमेयपरत्वेन घने तदन्वयाभावेन तस्य साधारणधर्मवैशिष्ट्येनैतदितरपरिच्छेदकत्वरूपोपमानत्वानुपपत्तिः। तदुक्तं भाष्ये—'यदि शस्त्रीव श्यामा देवदत्तेति विग्रहस्तदा शस्त्र्यां श्यामेत्येतदपेक्ष्यं स्याद् यदि 'यथा शस्त्री श्यामा तद्वद्देवदत्ते'ति विग्रहस्तदा देवदत्तायां श्यामेत्येतदपेक्ष्यं स्यादि'ति।

कैयटोपाध्याया अपि—'न च शब्दस्यावृत्तिरस्ति येनोभयगतं श्यामत्वं प्रतिपादयेदि'ति, ततः—'एवं तर्हि तस्यामेवोभयं वर्तते' इति भाष्ये सिद्धान्तितम्। तस्याम् = उपमेयायामित्यर्थः। सादृश्यमूलकाभेदाध्यवसायादुपमानशब्दस्याप्युपमेयपरत्वसंभवः, सादृश्यनिर्वाहायोपात्तश्यामादेरेव तन्त्रादिनोपमानेपि संबन्धोऽङ्गीकार्यः, तात्पर्यवशात् प्रियदर्शनत्वरूपोनुपात्तधर्मोपि चन्द्रमुखीत्यादावुपमानिमित्तं भवति, एवं चोपमेये श्रुतः कथमुपमानं न संस्पृक्ष्यतीति, स्पष्टं चेदमत्रैव कैयटे। आवृत्तिसत्त्वेऽपि सामानाधिकरण्यानुरोधादयमेव पक्षो भाष्ये सिद्धान्तितः। श्यामत्वादेरुभयत्र संबन्धे एतदुत्तरं भाष्ये—श्यामत्वस्योभाभ्यामेव संबन्धात्, बहुभिः सम्बन्धाभावात्, समानानां भावः सामान्यं, तद्वचनत्वं सामान्यवचनत्वं, बह्वन्वितधर्मवचनत्वमिति यावत्। तदभावमाशङ्क्य सिद्धान्तिनोक्तं—'श्यामत्वस्योभयत्र भावादुभयगतगुणवाचकत्वाच्च श्यामाशब्दस्य, सामान्यवचनत्वं, नावश्यं स एव सामान्यवचनो यो बहूनां सामान्यमाह, द्वयोरपि यः सामान्यमाह सोपि सामान्यवचनः' इति। अत्रो'भयगतगुणवाचकत्वा'दित्यनेन साधारणधर्मस्योभयत्र शाब्दोन्वय इति सूचितम्। वस्तुगत्योभयगतगुणवाचकत्वार्थकत्वे श्यामत्वस्य बहुष्वपि सत्त्वेन 'नावश्यं स एव सामान्यवचनः' इत्येतद्ग्रन्थोऽसंगत एव स्यादिति बोध्यम्, एवं चोपमानश्यामवनाभिन्नः श्यामो देवदत्त इति बोधः, विग्रहे इवशब्द उपमानद्योतकः, समासे त्वेकार्थीभावात्तद्भानम्। काव्यप्रकाशकृतामप्युपमानत्वप्रकारकबोधोनुमतो, यतः—'यथेववाशब्दास्तस्यैवोपमानताप्रतीतिरिति यद्यप्युपमानविशेषणानि ते' इत्याद्युक्तं तैः। वस्तुगत्या यदुपमानं तद्वाचकं समस्यत इति सूत्रार्थाभ्युपगमे उक्तभाष्यग्रन्थासंगतिः, प्रकाशग्रन्थासंगतिश्च स्यादिति सुधीभिरुह्यम्।

'यथा हरिस्तथा हर' इत्यादौ तु भेदकधर्मवद्वाचकतायाः 'प्रकारवचने थाल्', इति सूत्रस्थाकरग्रन्थसंमततया, यत्प्रकारवान् हरिस्तत्प्रकारवान् हर इति बोधानन्तरं, यत्तच्छब्दाभ्यां तयोर्धर्मयोरेकत्वावगमनमेव प्रकारभूतं धर्मं निमित्तीकृत्योपमानहर्यभिन्न उपमेयहर इति बोधः, तस्यापि शाब्दत्वम्, आलंकारिकमते लक्षणामूलव्यञ्जनास्थले तत्प्रयोज्यशैत्यपावनत्वादिप्रत्ययस्येति बोध्यम्। स्पष्टं चेदं तिङर्थविचारे—तिङन्तार्थक्रियाया असत्त्वनिरूपणावसरे मञ्जूषायां, 'यथा सादृश्ये' इति सूत्रे विवरणादौ च। प्राथमिक एव बोधे उपमानत्वप्रकारकत्वं प्राथमिकबोधेनाभ्युपगतं, तथा सति 'यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते' इत्यत्रापि प्राथमिकबोधे तथात्वस्वीकारापत्त्या 'न वै तिङन्तेनोपमानमस्ति' इति 'सन्'सूत्रभाष्यविरोधप्रसङ्गादित्यलमतिविस्तरेण।

न चैवं 'पुरुषो व्याघ्र इव शूर' इत्यत्राप्युक्ताकारबोधे विशेषणव्याघ्रस्यापि शूरात्मकविशेषणसापेक्षतया समासानुपपत्तिरिति वाच्यं, साधारणधर्मवत्त्वेनेतरपरिच्छेदकत्वरूपोपमानत्वस्य साधारणधर्मांशे नित्यसापेक्षत्वेन दोषासंस्पर्शात्, प्रधानस्य सापेक्षत्वे भवत्येव समासः, प्रधानेनेकविशेषणसंबन्धसंभवात्, 'देवदत्तो धनी सुन्दरश्चे'तिवत्। एतेन—साधारणधर्मवत्त्वेन परिच्छेद्यत्वरूपोपमेयत्वस्यापि नित्यसापेक्षतया प्रधानसापेक्षत्वेपि समासो भवतीत्यर्थे.

ननु त्वन्मते 'अब्राह्मण' इत्यादौ तत्पुरुषलक्षणाव्याप्त्यापत्तिः, पूर्वपदस्यानर्थकत्वेनैवोत्तरपदार्थप्राधान्याभावात्, उपसर्गस्यार्थवत्त्वाभावेनन प्रातिपदिकत्वाभावाद्विभक्तिश्च ततो न स्यादित्यत आह—

नञ्समासे चापरस्य द्योत्यं प्रत्येव मुख्यता ।
द्योत्यमेवार्थमादाय जायन्ते नामतः सुपः ॥ ४६ ॥

नञ्समासादौ योत्तरपदप्रधानता—सा द्योत्यर्थमादायैव, तमेवार्थमादायार्थवत्त्वात्प्रातिपदिकत्वमित्यर्थः ।

ॐ दर्पणः ॐ

उत्तरपदार्थप्रधान्याभावादिति । प्राधान्यस्यान्यनिरूपितत्वनियमादिति भावः ; **द्योत्यार्थमिति ।** द्योतकतावृत्त्युपस्थापितार्थमित्यर्थः । **तमेवेति ।** द्योत्यमेवेत्यर्थः । **अर्थवत्त्वादिति ।** अयं भावः—द्योतकताया अपि वृत्तित्वेन तयार्थवत्त्वस्य द्योतकेप्यक्षतत्वान्न तन्निबन्धनप्रातिपदिकसंज्ञानुपपत्तिः, न हि शक्तिलक्षणान्यतरदेवार्थोपस्थापकमिति वचनमस्तीति । ननु शब्दादुपस्थितसामान्यस्य विशेषे पर्यवस्थापकत्वं द्योतकत्वं, न तु तदुपस्थापकत्वमेवेति न तादा-

ॐ काशिका ॐ

'सामान्याप्रयोगे' इत्यस्य ज्ञापकतापरभाष्यासंगतिरित्यपास्तम्, कैयटोक्तन्यायसिद्धार्थपरत्वेन भाष्यस्यादोषात्, अथवा नित्यसापेक्षत्वं न समासप्रयोजकं, किं तु गमकत्वमेवेति समर्थसूत्रे भाष्ये स्पष्टम्, निरूपितं च समासवादे मञ्जूषायाम् । तथा च सापेक्षप्रधानकस्य समासस्य गमकत्वं 'राजपुरुषः सुन्दर' इत्यादौ दृष्टमिति 'पुरुषो व्याघ्र इव शूर' इत्यत्रापि समासप्रसक्तिरिति-तद्वारणाय 'सामान्याप्रयोगे' इति ज्ञापकपरभाष्यस्याप्यत्रैव तात्पर्यमिति, प्राहुरित्यन्यत्र विस्तरः ॥ ४५ ॥

लक्षणाव्याप्त्यापत्तिरिति । उत्तरपदार्थस्योपसर्जनत्वाभावेनास इत्याद्यसिद्धिर्नापादिता । **प्राधान्याभावादिति ।** प्राधान्यस्य विशेषणनिरूपितत्वेन पूर्वपदस्य निरर्थकत्वे तदसंभवादिति भावः । **उपसर्गस्येति ।** 'उपसर्ग'पदं निपातमात्रोपलक्षणम्, अत एवात्र 'उपसर्गादिभ्यः' इति बृहद्भूषणे उक्तम् । यद्वा—निपातानां प्रागुक्तरीत्या न सर्वेषां द्योतकत्वमपि तु केषांचिदेवेति सूचयितुं 'उपसर्गस्य' इत्येवोक्तम् । **द्योत्यमर्थमादायैवेति ।** उत्तरपदार्थप्राधान्यं नामेतरपदार्थनिष्ठविशेषणतानिरूपितविशेष्यताशालिबोधजनकत्वम्, तत्रेतरपदार्थशब्देन वाच्यलक्ष्यद्योत्यात्मकत्रिविधोप्यर्थो गृह्यत इति नोत्तरपदार्थप्राधान्यहानिरिति भावः । तमेव = द्योत्यमेव । **अर्थवत्त्वादिति ।** अर्थबोधजनकज्ञानवि[illegible]त्वमेव ह्यर्थवत्त्वमर्थवत्सूत्रे निविष्टं, न तु वृत्त्यार्थबोधजनकत्वरूपमतो नानुपपत्तिरिति

वस्तुतस्तु,—'अव्ययादाप्सुप' इतिज्ञापकात्सुबुत्पत्तिः। 'निपातस्यानर्थकस्ये'ति वार्त्तिकाद्वा प्रातिपदिकत्वम्, 'कृत्तद्धितसमासाश्चे'त्यनुक्तसमुच्चयार्थकचकारेण निपातानां संग्रह इति वा बोध्यम्। तस्माद्युक्तं निपातानां द्योतकत्वम्। उक्तञ्चाकृत्यधिकरणवार्त्तिके—

चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः।
क्रियते संशयोत्पत्तेर्नोपसर्गनिपातयोः॥

॥ दर्पणः ॥

दायार्थवत्त्वसम्भवोत आह—**वस्तुतस्त्विति**। **ज्ञापकादिति**। द्योतकतावादे तेषामनर्थकत्वादेव सुबभावे लुग्विधानमनर्थकं सदुक्तार्थे ज्ञापकमिति भावः। ननु स्वरादीनां सत्त्ववचनानामपि सत्त्वात्तद्विहितसुब्लुग्विधाने चरितार्थस्य तस्य न ज्ञापकत्वमत आह—**निपातस्येति**। तद्वार्त्तिकप्रत्याख्याने त्वाह—**कृत्तद्धितेति**। **सङ्ग्रह इति**। अनर्थकस्यापि निपातस्य प्रातिपदिकत्वमित्यर्थः। उपसंहरति—**तस्मादिति**।

एतत्कल्पे मीमांसकसम्मतिमाह—**उक्तञ्चेति**। **चतुर्विध इति**। नामा-

॥ काशिका ॥

भावः। नन्वेतदयुक्तं—'धनं' 'वन'मित्यादौ प्रतिवर्णं संज्ञापत्तेः, तेषामप्यर्थबोधजनकज्ञानविषयत्वात्, न च सत्यपि प्रातिपदिकत्वे संख्याकर्मादेरभावान्न सुबुत्पत्तिरिति वाच्यं, तथा सति निपातादपि सुबुत्पत्त्यनुपपत्तेः, न चेष्टापत्तिः, 'प्रगच्छती'त्यादौ पदात्परत्वाभावेन 'तिङ्ङतिङ'इति निघातानापत्तेः। 'उद्गच्छत्युच्चै'रित्यादौ जश्त्वरुत्वाद्यनापत्तेश्चेत्यत आह—**वस्तुत इति**। **ज्ञापकात्सुबुत्पत्तिरिति**। प्रातिपदिकत्वाभावेऽपि ज्ञापकात्सुबुत्पत्तिरित्यर्थः। **निपातस्येति**। अत्र पक्षे सर्वेषां निपातानां वृत्त्यार्थबोधकत्वरूपार्थवत्त्वाभावात् प्रकृतवार्तिकप्राप्तिः, 'अनर्थकग्रहणं न करिष्यते' इति भूवादिसूत्रभाष्योक्त्या तत्पदरहितस्य तस्य प्राप्तिरित्यन्ये। क्रियायोगाभावाद् गत्युपसर्गसंज्ञाप्राप्तिरेव नास्तीति 'अधिपरी अनर्थकौ' इत्यनेनाधिपर्योर्गत्युपसर्गसंज्ञानिवृत्तये कर्मप्रवचनीयसंज्ञाविधानस्यानर्थकनिपातानामर्थवत्प्रयुक्तकार्यज्ञापकतामाश्रित्यैतद्वार्तिकप्रत्याख्याने तु तस्यैव सामान्यतो निपातानामर्थवत्प्रयुक्तकार्यज्ञापकतामाश्रित्य प्रातिपदिकत्वं सिध्यतीति भावः। सूत्रेणैव सिद्धौ वार्तिकमपि मास्त्वित्याह—'**कृत्तद्धि**'**तेति**। परे तु—निपातानां व्यञ्जनापरपर्यायद्योतकतारूपवृत्त्यार्थबोधकत्वरूपार्थवत्त्वात् प्रातिपदिकत्वसिद्धिः, अत एव वार्तिकमनर्थकपदघटितं संगच्छते, अत एव च येषां द्योत्योऽप्यर्थो नास्ति 'तु ह स्म वै' इत्यादेस्तदर्थमिदमित्यर्थसूचनार्थमनर्थकस्येत्युक्तं कैयटीये इति वदन्ति। द्योतकतायां मीमांसावार्तिककृत्संमतिमाह—**उक्तं चेति**। **चतुर्विधे इति**। नामाख्यातोपसर्गनिपा-

तयोरर्थाभिधाने हि व्यापारो नैव विद्यते ।
तदर्थद्योतकौ तौ तु वाचकः स विचार्य्यते' ॥ इति ।

उपसर्गेण धात्वर्थो बलादन्यः प्रतीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ॥ इति ।

अत्रोपसर्गपदं निपातोपलक्षणम्, धातुपदं पदान्तरस्येति बोध्यम् ।४६।
नन्वन्वयव्यतिरेकाभ्यां निपातानां तत्तदर्थवाचकत्वमेव युक्तम्,

❀ दर्पणः ❀

ख्यातोपसर्गनिपातभेदेन चतुःप्रकार इत्यर्थः। पदे = सुप्तिङन्तरूपे । द्विविधस्य = नामाख्यातस्वरूपस्य । अर्थनिरूपणे हेतुमाह—**संशयोत्पत्तेरिति** । नामार्थो जातिः ? किं वा व्यक्तिः ?, धात्वर्थो व्यापारः ? उत फलं ? किं वोभयमिति सन्देहे तन्निरूपणस्यौचित्यायातत्वादिति भावः । तयोः = निपातोपसर्गयोः । व्यापारः = शक्तिलक्षणान्यतररूपः । तौ = उपसर्गनिपातौ । यदर्थद्योतकौ = यदर्थविषयकतात्पर्यग्रहजनकौ । सः = नामाख्यातात्मकः शब्दः । तस्य च तिङ्कृत्तद्धितघटितत्वात्तदर्थोऽपि विचार्यत इत्यर्थः। यद्यपि स्वाद्यन्तत्वनिबन्धनं नामत्वमुपसर्गनिपातयोरपीति तयोः पार्थक्येन निर्देशोऽनुचितः, तथापि लिङ्गसङ्ख्यानिष्ठप्रकारतानिरूपितविशेष्यताशाल्यर्थकत्वरूपपारिभाषिकनामत्वमादाय तथोक्तम्। उपसर्गाणां निपातत्वेऽपि तदुपादानं तु ब्राह्मणवसिष्ठन्यायेनेति बोध्यम् ।
ननू'पसर्गेण धात्वर्थ' इत्यत्र निपातत्वव्याप्योपसर्गत्वेन प्रादीनामुपादानात्कथं तच्चादीनां द्योतकत्वे उपष्टम्भकमत आह—**उपसर्गपदमिति । पदान्तरेति** । 'चन्द्र इव मुख'मित्यादावर्थवत्त्वेन चन्द्रादीनामुपलक्षकमित्यर्थः। एवञ्च न तद्बलान्निपातानां वाचकत्वमिति भ्रमितव्यमिति भावः ॥ ४६ ॥

इदानीं वाचकतापक्षं परिष्करोति—**नन्विति। अन्वयव्यतिरेकाभ्यामिति** । 'चन्द्र इव मुख'मित्यादाविवादिनिपातसत्त्वे सादृश्याद्यर्थप्रतीतेस्तदसत्त्वे तदप्रतीतेश्च निपातानां घटादिपदवद्वाचकत्वमेव युक्तमित्यर्थः। नन्विच्छादिरूपशक्तेरभावा-

❀ काशिका ❀

त्मके। तथा चोक्तं निरुक्ते-'चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्चे'ति । संशयानुत्पत्तौ हेतुमाह—**तयोरिति** । नन्वेवमुपसर्गेणेत्यादिवृद्धोक्तावुपसर्गस्यैव द्योतकतोक्तिर्विरुद्धेत्याशङ्क्याह—**उपसर्गेणेति । अन्य इति** । उपात्तनिर्दिष्टरूपातिरिक्तरूपावच्छिन्नः। तेन 'प्रजयती'त्यत्र प्रतीयमानप्रकृष्टजयस्य शुद्धजयाभेदेऽपि न क्षतिः ॥ ४६ ॥

बोधकतारूपशक्तेरबाधात्। किञ्चोक्तरीत्या 'पचती'त्यादौ धातोरेव कर्तृविशिष्टभावनायां लक्षणास्तु, तात्पर्य्यग्राहकत्वमात्रं तिङादेः स्यादित्यरुचेः पक्षान्तरमाह—

निपातानां वाचकत्वमन्वयव्यतिरेकयोः ॥
युक्तं वा, न तु तद्युक्तं, परेषां मतमेव नः ॥४७॥

❀ दर्पणः ❀

कथं तेषां वाचकत्वमत आह—**बोधकतारूपेति**। तथाच तदर्थबोधकत्वमेव तद्वाचकत्वमिति तेषामपि घटादिपदवद्वाचकत्वमेवेत्यर्थः। नन्वन्वयव्यतिरेकयोस्तदर्थतात्पर्य्यग्रहे उपयोगस्य प्रागभिहितत्वान्न तयोर्वाचकताप्रयोजकत्वमत आह—**किञ्चेति। उक्तरीत्येति**। अनन्यलभ्यस्यैव शब्दार्थतया 'प्रजयती'त्यादौ प्रकृष्टजयस्य लक्षणया जिधातोरेवोपस्थितौ न प्रादीनां प्रकर्षाद्यर्थकत्वं, तेषां तात्पर्य्यग्राहकतयैवोपयोगादित्युक्तरीत्येत्यर्थः। **तिङादेः स्यादिति**। तत्रान्वयव्यतिरेकाभ्यां कर्त्रादिवाचकत्वावधारणे तु—प्रादीनामपि वाचकत्वावधृतिरिति भावः।

परेतु—'अजर्घा' 'अचका'दित्यादौ धातुमात्रात्कर्त्रादिबोधेन तिङां द्योतकत्वे इष्टैवापत्तिः। नच तत्र लुप्तविभक्तिस्मरणाद्बोधः, लोपमजानतोपि बोधात्, प्रत्ययलक्षणस्य लोपफलत्वं वदता भाष्यकृता लुप्तविभक्तिस्मरणाद्बोधस्यानभ्युपगमाच्च। यत्र प्रत्ययस्य वाचकता तत्रैव 'प्रकृतिप्रत्ययार्थयो'रिति नियमावकाशो,—यथा 'पाचक' इत्यादिकृदन्ते। 'लः कर्मणी'त्यादौ कर्मकर्तृविषयाद्धातोरित्यर्थान्न तद्विरोधः, 'भावे' इत्यस्य सर्वैस्तथैव व्याख्यानात्। नच सर्वत्रैव धातोर्भावनाविषयत्वात्तत्रैव लकारः स्यादिति शङ्क्यम्, 'भावविषया'दित्यस्य केवलक्रियामात्रबोधकादित्यर्थेनादोषात्। अत एव,—'भावकर्मणोः' 'शेषात्कर्त्तरि परस्मैपदं' 'द्व्येकयो'रित्यादीनां नियम

❀ काशिका ❀

ननु तेषां वाचकत्वे तत्र शक्तिकल्पनाप्रयुक्तगौरवप्रसङ्गोऽत आह—बोधकतेति। 'तिङादे'रित्यादिना कृत्सनादिपरिग्रहः। कृत्प्रत्ययस्य द्योतकत्वे तदर्थस्य विशेषणत्वापत्तिरिति न शङ्क्यम्, अनुभवानुरोधात्, सत्त्वप्रधानानि नामानि' इति वचनाद् द्योत्यस्यापि कृदर्थस्य विशेष्यत्वमित्याशयात्, एवं सनादावप्यूह्यं। स्यादिति। न चेष्टापत्तिः, सिद्धान्तविरोधादिति भावः। **परे तु**—सुप्तिङां द्योतकत्वे इष्टापत्तिः, अत एव तदर्थकालकर्त्रादेर्विशेषणत्वम्, कालस्य द्योत्यता तु कैयटादिभिरप्यङ्गीक्रियत एव, अत एव पचेत्यादितः कर्तृप्रतीतिः। कृत्प्रत्ययादेस्तु न द्योतकता, तदर्थस्य विशेषणत्वापत्तेः, न च द्योत्यत्वेपि तदर्थस्य विशेष्यत्वम्, उक्तरीत्या तत्र वाचकतापक्षस्यैव स्वीकर्तुमुचितत्वादित्याहुः। अन्वयव्यतिरेकयोः = तयोः सतोरित्यर्थः। तथा चान्व-

तयो- एवञ्च 'धात्वर्थप्रातिपादिकार्थयोर्भेदेनान्वयबोधो न व्युत्पन्न' इति निपातातिरिक्तविषयः । 'समानाधिकरणप्रातिपदिकार्थयोरभेदान्वय' इत्यपि तथेत्यगत्या कल्पनीयमिति भावः । न त्विति । नैयायिकोक्तं प्रादिचाद्यो वैषम्यमित्यर्थः ।

※ दर्पणः ※

इति भाष्यकृदुक्तिसङ्गतिः, तेषामनिर्दिष्टार्थत्वेन,—'अनिर्दिष्टार्थाः स्वार्थे भवन्ती'ति न्यायेन सर्वत्र सिद्धत्वादित्याहुः ।

तच्चिन्त्यम् । 'व्यतिसे' इत्यादौ धातुं विनापि कर्तृबोधेनाद्ययुक्तेः शैथिल्यात्, तुल्ययुक्त्या सुपामपि द्योतकतापत्तेः, धातोर्द्विवचनाद्यनुपपत्तेश्च । प्रत्ययलक्षणस्य लोपफलत्वेऽपि लुप्तविभक्तिस्मरणजन्यबोधस्य फलत्वाभ्युपगमे बाधकाभावाच्च । 'स्वोत्तरतिङ्वाच्यकर्त्रादिगतद्वित्वारोपेण द्विवचनादि'रिति स्वोक्तविरोधाच्च । भवदुक्तरीत्यैव—कर्तृविशिष्टभावनावाचकात्, कर्मविशिष्टभावनावाचकात्, केवलभावनावाचकाच्च धातोर्लकारा भवन्तीत्यर्थे—'लः कर्मणी'त्यर्थपर्य्यवसानेन, 'अनिर्दिष्टार्था' इति न्यायेनापि तत्तत्कारकादिविशिष्टभावनार्थकानां तिङां सर्वत्र सिद्धसम्भवेन नियमस्यान्यथैव सङ्गमनीयत्वादित्यन्यत्र विस्तरः । ननु निपातानां वाचकत्वे—'घटो न पट' इत्यादौ घटादेः प्रतियोगितया नञर्थाभावे, तस्य चाश्रयतया घटादावन्वयोनुपपन्नः, भेदसम्बन्धेन प्रातिपादिकार्थप्रकारकबोधे—विशेष्यतया प्रत्ययजन्योपस्थितेर्हेतुताया 'नामार्थयोर्भेदेनान्वय' इति व्युत्पत्तिसिद्धत्वात्, एवं 'समानाधिकरणनामार्थयो'रिति व्युत्पत्तेरभेदेनान्वयापत्तिश्चेत्यत आह—एवञ्चेति । विधि-

※ काशिका ※

यव्यतिरेकाभ्यां तिङादीनां वाचकत्ववन्निपातानामपि वाचकत्वमिति भावः । 'परेषां यन्मतं तदेव नोऽस्माकं न युक्त'मिति मूले योजना । एवं च = निपातानां वाचकत्वे च । तथेत्यगत्येति । तथा = निपातातिरिक्तविषयमित्यर्थः, इतरदोषा अपि प्रागुद्धृता एव । इदमुपलक्षणं—सकर्मकत्वं—'स्वस्वयुक्तनिपाते'त्यादिक्रमेण पूर्वोक्तं बोध्यं, तेनानुभवतीत्यादौ न दोषः, 'प्रत्ययाना'मिति व्युत्पत्तावपि प्रकृत्यर्थसमभिव्याहृतनिपातार्थप्रकृत्यर्थान्यतरान्विततत्वं निवेश्यम् । अत एव 'प्रतिष्ठत' इत्यत्रोपसर्गस्य गतिवाचकत्वेऽपि न क्षतिः । उपसर्गस्य फलमात्रवाचकत्वं धातोर्व्यापारवाचित्वमित्यभ्युपगमे तु प्रकृत्यर्थे एव प्रत्ययार्थान्वयादिदं नादरणीयम् । एवं नञर्थप्रकारकभेदसंसर्गकशाब्दबोधं प्रति प्रत्ययनिपातान्यतरजन्योपस्थितित्वेन हेतुत्वमङ्गीकार्यमित्यपि बोध्यम्, न चैवं गौरवम्, उक्तयुक्त्या तेषां तत्तदर्थवाचकत्वे स्थितेऽगत्या गौरवस्य स्वीकरणीयत्वात् । अत एव नेत्येतावन्मात्रादभावबोधनिर्वाहः, तत्र पदान्तरसमभिव्याहारं विना द्यो[illegible]कत्वासंभव इत्याहुः । ननु तेषां वाचकत्वे केवलानामपि प्रयोगापत्तिरिति चेन्न, केषांचित्

यत्तु—सर्वेषां निपातानां वाचकत्वेऽर्थवत्सूत्रेणैव तेषां प्रातिपदिकत्वसम्भवात् 'निपातस्यानर्थकस्ये'ति विधिवैयर्थ्यम्। 'सर्वेषां द्योतकत्वे चानर्थकस्ये'ति व्यर्थम्, तथाच केचिद् द्योतकाः, केचिद्वाचका इत्यभ्युपेयमिति, तन्न। एवं हि चादयो द्योतकाः, प्रादयो वाचका इति वैपरीत्यावारणात्। सर्वथानर्थकानां पादपूरणमात्रार्थमुपात्तानां संग्रहाय वार्त्तिकारम्भस्य कैयटादौ स्पष्टत्वात्, तस्य प्रत्याख्यातत्वाच्च।

'परेषा'मिति बहुवचनं—मीमांसकसंग्रहाय,—"केवलवृत्तशब्दात्समुच्चयाबोधाच्चकारश्रवणे तद्बोधाच्चकार एव तद्वाचको, न द्योतकः। किञ्च द्योतकत्वे पदान्तराणां तत्र शक्तिः कल्प्या, चकारादेर्द्योतकत्वशक्तिश्च

❀ दर्पणः ❀

वैयर्थ्यमिति। तादृशवार्त्तिकेन प्रातिपदिकसंज्ञाविधानवैयर्थ्यमित्यर्थः। अनर्थकस्येति। व्यर्थमिति। व्यभिचाराभावेन तस्य विशेषणत्वायोगादिति भावः। प्रत्याख्यातत्वाच्चेति। 'कृत्तद्धिते'त्यत्र चशब्देनैव तदर्थस्य समुच्चितत्वादिति भावः।

वक्ष्यमाणास्वरसादाह—किञ्चेति। 'प्रकरणादिव'दित्यनेन द्योतकतया

❀ काशिका ❀

'ते प्राग्धातोः' इति नियमनात्, केषांचिन्नेत्यादीनां तथात्वस्येष्टत्वात्, अन्येषां वाचकत्वेपि केवलप्रकृतिप्रत्ययवदुपपत्तेः, उक्तं हि वाक्यपदीये—

'प्रत्ययो वाचकत्वेऽपि केवलो न प्रयुज्यते।
समुच्चयाभिधानेपि व्यतिरेको न विद्यते॥' इति।

प्रत्ययस्य परत्वे नियामकवदत्र तदभावेऽपि प्रकर्षादेर्विना सम्बन्धिनमन्वयानुपपत्तेर्न केवलानां प्रयोगः, 'शोभनः समुच्चय' इतिवत् 'शोभनश्चे'त्यस्य, 'घटस्य समुच्चय' इतिवच्च 'घटस्य चे'त्यस्य चापत्तिरित्यपि न शङ्क्यम्, शब्दशक्तिस्वाभाव्येन नित्यपरतन्त्रतयेतरविशेषणत्वेनैव स्वार्थोपस्थापनेनापत्तिद्वयस्याभावात्, षष्ठ्यर्थसम्बन्धबोधे इतरविशेषणान्वयबोधे च समुच्चयादिशब्दजन्योपस्थितेरेव हेतुत्वकल्पनाद्वा। अथवा चशब्दस्य समुच्चये शक्तिकल्पनान्न दोषः, धर्म्यंशे शक्तिकल्पनाप्रयुक्तगौरवं प्रामाणिकत्वादङ्गीक्रियते, तदुक्तं 'समुच्चिताभिधाने हि व्यतिरेको न विद्यते' इति बोध्यम्। व्यर्थमिति। द्योतकतापक्षे सर्वेषामेव तेषां निरर्थकतया व्यावर्त्याभावात्। स्पष्टत्वादिति। तत्रानर्थकस्येति तु पादपूरणार्थानां सर्वथा नार्थवत्त्वं सूचयितुम्। प्रत्याख्यातत्वादिति। 'अधिपरी अनर्थकौ' इत्यस्य अनर्थकस्याप्यर्थवत्कृतं भवतीत्यर्थे ज्ञापकतामाश्रित्य प्रत्याख्यातत्वात्। बहुवचनं मीमांसकेति। मीमांसकानां भाष्यकारादि

तयोरर्थं कल्प्येति गौरवं स्यात्—" इति हि—समुच्चयाधिकरणे स्थितं, तदपि न युक्तमिति भावः। तथाहि—अन्वयव्यतिरेकौ तात्पर्य्यग्राहकत्वेनाप्युपयुक्तौ। घटादिपदानामेव समुच्चिते लक्षणा, तात्पर्य्यग्राहकः प्रकरणादिवच्चादिरिति स्वीकारान्न शक्तिद्वयकल्पनापि। अस्माकं लक्षणाग्रहदशायां बोधाय तत्कार्य्यकारणभाव आवश्यकः, एवं शक्तिग्रहस्यापीति पक्षद्वयेपि कल्प्यान्तराभावेन गौरवाभावादुभयमपि युक्तमित्यभिमतम्। अत एव—'स वाचको विशेषाणां सम्भवाद् द्योतकोपि वे'ति वाक्यपदीयं सङ्गच्छते। दर्शनान्तररीत्या वाचकत्वमेव द्योतकत्वमेव वेति नियमस्तु न युक्त इति ध्वनयन्नाह—मतमेव न इति ॥ ४७ ॥

❀ दर्पणः ❀

वृत्तित्वाभावो ध्वन्यते। **अस्माकमिति**। पक्षद्वयाभ्युपगन्तॄणामित्यर्थः। **कार्यकारणभाव इति**। समुच्चितघटादिशाब्दबोधे घटपदनिरूपितलक्षणाज्ञानत्वेन हेतुतेत्याकारक इत्यर्थः। **शक्तिग्रहस्यापीति**। घटाद्यर्थबोधे घटशक्तिज्ञानस्य, समुचयादिबोधे तच्छक्तिज्ञानस्य हेतुतेत्याकारकः कार्य्यकारणभावोप्यावश्यक इत्यर्थः। **कल्प्यान्तराभावेनेति**। द्योतकतापक्षे वाचकतापक्षेपि तत्तत्पक्षक्लृप्ताधिककल्पनीयाभावेनेत्यर्थः। **अतएवेति**। [कल्प्य] पक्षद्वये युक्तिसाम्यादेवेत्यर्थः। **स वाचक इति**। 'उपसर्गं प्रक्रम्येदं, प्रतिष्ठत इत्यत्र गतिनिवृत्तिवाचकः स्थाधातुरुपसर्गस्तदभावरूपगतिवाचक" इति पुञ्जराजेन तदर्थस्य कथनात्। 'वाचकत्वमेवे'त्यस्य 'निपातानां'मित्यादिः। 'एवं द्योतकत्वमेवे'त्यस्यो'पसर्गाणा'मित्यादिः। **मतमेवेतीति**। वा = अथवाऽन्वयव्यतिरेकतो—निपातानां वाचकत्वं युक्तम्, अस्माकं मते—परेषां यदेकस्य वाचकत्वमपरस्य द्योतकत्वमिति मतं—तदेव तु न युक्तमिति—मूलयोजना ॥ ४७ ॥

ननु 'चादयोऽसत्त्व' इत्यत्रासत्त्व इति प्रसज्यप्रतिषेधाश्रयणेऽसमर्थसमासापत्तिर्वाक्यभेदापत्तिश्चेति पर्य्युदास एवाश्रयणीयः, तथा चोक्तलक्षणस्यानर्थके तस्मि-

❀ काशिका ❀

भेदेन नानात्वाद् बहुवचनमिति भावः। मीमांसकमतं प्रदर्शयति—केवलेति। तात्पर्यग्राहकत्वेनेति। तथा चान्वयव्यतिरेकयोरन्यथासिद्धतया न शक्तिग्राहकतेति भावः। लक्षणाग्रहेति। धातोः प्रकृष्टजयादौ लक्षणाग्रहे इत्यर्थः। कार्येति। लक्षणाग्रहशाब्दबोधयोः कार्यकारणभाव इत्यर्थः। शक्तिग्रहस्यापीति। अत्र 'कार्यकारणभाव आवश्यक' इत्यनुपज्यते। उभयमपि = वाचकत्वद्योतकत्वोभयमपीत्यर्थः। अत एव = वाचकत्वद्योतकत्वोभयस्वीकारादेव ॥ ४७ ॥

पर्यवसितमुपसंहरन्नाह—

निपातत्वं परेषां यत्तदस्माकमिति स्थितिः ।
व्यापकत्वाच्छक्ततायास्तवच्छेदकमिष्यते ॥ ४८ ॥

परेषां यन्निपातत्वम्—'असत्त्वार्थकत्वे सति चादिगणपठितत्वं' 'शक्तिसम्बन्धेन निपातपदवत्त्व'श्चोपाधिर्वा,—जातिर्वा—तदेवास्माकमपि । परन्तु

❀ दर्पणः ❀

त्व्याप्तिः, तावदन्यतमत्त्वस्यापि निवेशे तु गौरवमत आह—**शक्तिसम्बन्धेनेति** । तस्य लक्ष्यतावच्छेदकत्वमभिप्रेत्याह—**जातिरिति** । निपातपदशक्यतावच्छेदकतया च तत्सिद्धिरिति भावः ।

ननु हत्वादिना साङ्कर्यान्न निपातत्वं जातिः । तथाहि—निपातत्वाभाववति हत्वं धात्वादिहकारे, हत्वाभाववति निपातत्वं,—निपातात्मकचकारे, तयोरेकत्र हकारे समावेशात् । तद्दूषकताबीजं तु—'स्वसामानाधिकरण्य' 'स्वाभावसामानाधिकरण्यो'भयसम्बन्धेन जातिविशिष्टजातित्वावच्छेदेन स्वसमानाधिकरणाभावाप्रतियोगित्वनियमभङ्ग एव । निरुपाधिसहचारग्रहश्च तादृशनियमेनुकूलस्तर्कः । अन्यथा तन्मात्रबलप्रवृत्तानां 'सत्तावाञ्जाते'रित्याद्यनुमानानां विलयप्रसङ्गात् । अत एव भूतत्वं न जातिरिति साम्प्रदायिकाः । हत्वादिव्याप्यनिपातत्वस्य नानात्वाभ्युपगमेन साङ्कर्यस्य परिहारेपि सकलचादिसाधारण्याभावेनाननुगततया तस्यैवासिद्धिर्निष्प्रमाणत्वात् । किञ्च कार्यतावच्छेदकत्वादीनां जातित्वसाधकानां तत्राभावादपि न सा जातिः । शक्यतावच्छेदकत्वं तु न तत्साधकम् । अभावत्वविभुत्वादीनामपि जातित्वापत्तेः । अत एव गुणदीधितौ गुणत्वस्य जातित्वं दीधितिकृता खण्डितमत आह—**उपाधिर्वेति** । सामान्ये = व्यापकधर्मे इत्यर्थः । अयं भावः—उपसर्गेषूभयमतेपि द्योतकत्वे वाचकत्वे वा कल्पनीये तद्धर्मिवृत्तितयोपस्थितोपसर्गत्वनिपातत्वयोरुभयोर्धर्मयोर्मध्ये द्योतकत्वादिकमुपसर्गत्वावच्छेदेन कल्प्यमुत निपातत्वावच्छेदेनेति

❀ दर्पणः ❀

ननु प्रादीनां चादीनां च वाचकत्वे उपसर्गत्वनिपातत्वयोः शक्ततावच्छेदकत्वे गौरवमत आह मूले—**निपातत्वमिति** । तथा च निपातत्वं प्रादिचादिसाधारणमेवेति नोक्तक्रमेण गौरवमित्यर्थः । अथवोपसर्गेषु द्योतकत्वग्रहश्चादिषु वाचकताग्रहश्चोभयसाधारणधर्माभावादुपसर्गत्वावच्छेदेन निपातत्वावच्छेदेन च जायत इत्युपसर्गत्वनिपातत्वयोरुभयोः संबन्धत्वे किमिति निपातत्वावच्छेदेनैव द्योतकत्वादि कल्प्यते, नोपसर्गत्वावच्छेदेनेत्यत्र किं विनिगमकमित्याशङ्कामपनुदति—**परं त्वित्यादिना** । उपसर्गत्वेपि स्वसमानाधिकरणान्योन्याभावप्रतियोगिता-

तयोरु॒ सामान्यधर्मे प्रमाणानां पक्षपाताच्छक्तता—द्योतकता वा—तदवच्छेदेनैव कल्प्येति नैयायिकोक्तं प्रादिचाद्योर्वैषम्यमयुक्तमित्यर्थः । व्यापकत्वात् =

❀ दर्पणः ❀

संशये अवच्छेदकनिर्णिनीषायां व्यापकतया निपातत्वावच्छेदेनैव तत्कल्प्यते, संग्राहकलाघवात्, अत एवेश्वरानुमाने कर्तृजन्यत्वं घटत्वादिनावच्छिद्यते उत कार्यत्वेनेत्यवच्छेदकजिज्ञासायामुक्तलाघवात्कार्यत्वमेव तदवच्छेदकं, न तु घटत्वादिकमिति न्यायसिद्धान्त इति । अत्र वदन्ति—प्रमाणानां सामान्यधर्मस्यावच्छेदकतायां तत्र पक्षपातो,—यत्र बहूनां धर्माणामवच्छेदकत्वकल्पनाप्रयुक्तं गौरवं, यथा कर्तृजन्यत्वानुमाने कृतिजन्यतायां घटत्वाद्यपेक्षया कार्यत्वस्य । यत्र तु विशेषोऽप्येक एव तत्रोक्तयुक्तिविरहात्तस्यैवावच्छेदकत्वम् । अत एव व्यापारत्वस्याधिकसंग्राहकत्वेऽपि कृतित्वस्यैवाख्यातशक्यतावच्छेदकत्वं । स्वीकृतं च मीमांसकैर्द्रव्यप्रत्यक्षत्वं विहाय द्रव्यचाक्षुषत्वस्यैव रूपकार्यतावच्छेदकत्वम् । प्रकृते व्यापकत्वान्निपातत्वस्याधिकसंग्राहकत्वेऽपि व्याप्यस्योपसर्गत्वस्याप्येकत्वेन तस्यैवावच्छेदकत्वमुचितम्, न तु निपातत्वस्य, अद्योतकेऽवाचके पादपूरणमात्रार्थके वृत्तित्वेनातिप्रसक्तत्वात् । 'प्रादयो द्योतकाः, उपसर्गत्वा'दित्यनुमानाच्च । नच प्रादीनां द्योतकता निपातत्वलिङ्गेनैव सेत्स्यतीति[१] वाच्यं, तस्योपसर्गत्वरूपोपाधिमत्तया तदसाधकत्वात् । नच चेष्टादौ साध्याव्यापकत्वान्न तस्योपाधित्वमिति वाच्यं, शुद्धसाध्याव्यापकत्वेऽपि साधनावच्छिन्नसाध्यव्यापकत्वसम्भवात् । अस्ति हि 'निपातत्वावच्छिन्नं द्योतकत्वं—यत्र तत्रोपसर्गत्वम् । यत्र निपातत्वं नञादौ तत्र तदभावाद् ।

ननु प्रकर्षाद्यर्थः प्रादिवाच्यः तदन्वयव्यतिरेकानुविधायिशाब्दधीविषयत्वात्, यो यदन्वयव्यतिरेकानुविधायिशाब्दधीविषयः स तद्वाच्य इति सामान्यव्याप्तौ घटादिर्दृष्टान्तः, नचान्यलभ्यत्वमुपाधिः, तस्य वाच्यत्वरूपसाध्यव्यापकत्वात्, कर्त्रादौ आख्यातान्वयव्यतिरेकानुविधायिशाब्दधीविषये साधनाव्यापकत्वादिति वाच्यम्, उक्तहेतुघटकशाब्दबुद्धेराक्षेपाद्यजन्यत्वेन विशेषणेनानन्यलभ्यत्वस्य साधनव्यापकत्वेनोपाधित्वायोगात् । न च स्वरूपासिद्धिः, धातोरेव प्रकृष्टजया-

❀ काशिका ❀

नवच्छेदकत्वादिरूपव्यापकत्वसत्त्वाद्व्यापकत्वं न सामान्यत्वमत आह—व्यापकत्वात्सामान्यत्वादिति । तथा च व्यापकत्वं प्रकृते उक्तानवच्छेदकत्वविशिष्टं स्वाभाववद्वृत्तित्वात्मकम्-

१ किमुपसर्गत्वस्य हेतुत्वमुररीकृतमित्याशयः । तस्य = निपातत्वस्य । तदसाधकत्वात् = द्योतकत्वासाधकत्वात् ।

॥ दर्पणः ॥

र्थकत्वेनोपसर्गस्य तात्पर्यमात्रग्राहकत्वादिति वाच्यम्, धातोः प्रकृष्टजयार्थकत्वस्य ग्रन्थकृतैव खण्डनात्। नापि लक्ष्यता तस्य, प्रोत्तरत्वादेर्लक्षकतावच्छेदककोटिप्रवेशे गौरवात्, तस्माज्जयत्यादि धातोः शक्यतावच्छेदकं, प्रकर्षत्वादिकं तूपसर्गस्येति वाच्यन्तथाच क्व हेत्वसिद्धिः ?। किञ्चार्थस्य धातुलक्ष्यत्वे जिपूर्वत्वेनापि विनिगमनाविरहाल्लक्षकतावच्छेदककोटौ निवेशापत्तिः। नापि तदर्थस्य धात्वर्थेन साकमनन्वयप्रसङ्गः, निपातातिरिक्तत्वस्योक्तव्युत्पत्तौ विशेषणात्। एवञ्च प्रतिष्ठत' इत्यादौ धातोर्गत्यभावोऽर्थः, तदभावश्चोपसर्गार्थः, तथाच ततो गत्यभावाभाववानिति धीः, गमनत्वप्रकारकबोधस्तूत्तरकालिको मानस एवेति चेन्न। 'प्रत्ययाना'मिति व्युत्पत्तेर्जागरूकतया गमनाभावाभाववानिति बोधस्यापि गगनकुसुमायमानत्वात्। किञ्च तथा बोधाङ्गीकारे तादृशस्थले प्रादीनामुपसर्गत्वमपि दुर्घटं, क्रियाया अविशेषकत्वात्। क्रिया ह्यत्रोपसर्गार्थाभावविशेषिका, न तूपसर्गार्थो गत्यभावविशेषकः, स्वादीनां द्योतकताव्यवस्थापनोक्तरीत्याप्युपसर्गाणां सावसेयेति।

निपातानां तु केषाञ्चिद् वाचकत्वम्, तत्र नञर्थो निरूपितः, चार्थश्च—समुच्चयादिभेदेन चतुर्विध इति—'चार्थे द्वन्द्व' इत्यत्राकरेषु व्यक्तमेव।

इवार्थस्तु सादृश्यम्, तच्च तद्भिन्नत्वे सति तद्गतधर्मवत्त्वम्। यत्तु 'सादृश्यं न भेदघटित'मिति, तन्न। तावतापि 'नञिवयुक्त'मिति परिभाषणेन तस्यैवार्थत्वानपायात्, तद्बोधे त्वनुयोगिप्रतियोगिवाचकपदयोः समानविभक्तिकत्वं नियामकम्। नात'श्चन्द्र इव मुख'मित्यर्थे 'चन्द्रेणेव मुख'मिति साधुः। 'एव'कारस्य त्वन्ययोगव्यवच्छेदोऽयोगव्यवच्छेदोऽत्यन्तायोगव्यवच्छेदश्चार्थः। तत्र विशेष्यगतैवस्थले,–पार्थ एव धनुर्द्धर'इत्यादावन्यतादात्म्यव्यवच्छेदोऽर्थः। अन्यत्वं च समभिव्याहृतपदार्थापेक्षिकम्, तथाच पार्थान्यतादात्म्याभाववद्धनुर्द्धराभिन्नः पार्थ इति बोधः। 'पृथिव्यामेव गन्ध' इत्यत्र पृथिव्यन्यसमवेतत्वाभाववान् पृथिवीसमवेतश्च गन्ध इति बोधः। अत्र भावान्वयबोधानुपगमे[1] 'पृथिव्यामेवाकाशः' इत्यपि प्रसज्येत, एवञ्चैवकारेणान्ययोगव्यवच्छेदबोधे विशेष्यवाचकपदविशेषणवाचकसप्तम्यन्तान्यतरसमभिव्याहारो नियामकः।

विशेषणसङ्गतैवस्थलेऽयोगव्यवच्छेदः, 'शङ्खः पाण्डुर एवे'त्यादौ शङ्खत्वावच्छेदेन पाण्डुरत्वसमवायाभावव्यवच्छेदबोधात्,

१ 'पृथिवीसमवेत' इत्यंशस्यान्वयानुपगमे—गगनस्य पृथिवीतरसमवेतत्वाभावात्तथा प्रयोगापत्तिः, इदानीन्तु पृथिव्यां समवायसम्बन्धेन गगनस्याभावान्नदोष इत्याशयः।

❀ दर्पणः ❀

तयोर॰ 'नीलं सरोजं भवत्येवे'त्यादौ क्रियासङ्गतैवस्थलेऽत्यन्तायोगव्यवच्छेदोऽर्थः । अत्र केचित्—अयोगे आत्यन्तिकत्वं व्यवच्छिद्यते, तच्चान्वयितावच्छेदकव्यापकत्वम्, खण्डशश्च तत्र शक्तिः, तथाचोक्तस्थले सरोजनिष्ठाभावप्रतियोगिनीलभवनाभाव इति बोध इति वदन्ति ।

वस्तुतस्तु अन्ययोगव्यवच्छेदायोगव्यवच्छेदयोरेवैवकारस्य शक्तिः, अन्वयितावच्छेदकावच्छेदेनायोगव्यवच्छेदबोधे ग्रहणाध्ययनार्थकधातुसमभिव्याहारस्यापि नियामकत्वा'ज्ज्ञानमर्थं गृह्णात्येवे'तिवन्न 'ज्ञानं रजतं गृह्णात्येवे'त्यादिप्रयोगः । क्रियान्तरसमभिव्याहारे तु प्रायः सामानाधिकरण्येन तद्भानम्, इत्थञ्चान्वयितावच्छेदकसामानाधिकरण्येनायोगव्यवच्छेदोऽत्यन्तायोगव्यवच्छेदः, अन्वयितावच्छेदकावच्छेदेन त्वयोगव्यवच्छेद इति व्यवह्रियते । विस्तरस्त्वन्यतोवधार्यः ।

'क्वेव भोक्ष्यस' इत्यादावसम्भवनापि तदर्थः । वैयाकरणमते त्वेवकारस्य वाचकत्वासम्भवादवधारणात्मकज्ञानविशेषद्योतकत्वमेव, स च समभिव्याहृतपदार्थानुरोधादनेकविधः । यथा,—'ज्ञानमर्थं गृह्णात्येवे'त्यत्रावच्छेदकावच्छेदेनार्थग्रहणाभावानधिकरणज्ञानप्रकारकज्ञानविषयो ज्ञानकर्तृकमर्थकर्मकं ग्रहणमिति बोधादुक्तपदार्थघटितः सः । परन्त्वनेकधात्वादीनां तत्तदर्थे वृत्तिकल्पनापेक्षयैवकारस्यैव सोचितेत्यन्ये । यद्यप्युपसर्गं प्रक्रम्य,—'स वाचको विशेषाणां सम्भवाद् द्योतकोपि वे'ति हरिणा पक्षद्वयमविशेषेणोक्तम्, ग्रन्थकृता च तदेवानुसृतम्, तथापि—

क्वचित्सम्भविनो भेदाः केवलैरनिदर्शिताः ।
उपसर्गेण सम्बन्धे व्यज्यन्ते प्रसरादिना ॥' इति—

—तदुक्तोपसंहृतिपर्यालोचनयोपसर्गाणां द्योतकत्वमेवावसीयते ।

अत्रेदं बोध्यम्—उपसर्गत्वाद्यजानतोपि 'प्रजयती'त्यादौ प्रकृष्टजयबोधात् प्रत्वादिनैव तेषां द्योतकत्वम् । निपातानामपि चत्वादिनैव वाचकता, यत्र न तामन्तरेण निर्वाहः । क्वचिद् द्योतकत्वमप्युक्तयुक्त्यनभ्युपगमे । यथा—'शरैरुस्रै'रित्यादौ । क्वचिन्नोभयं— यथा पादपूरणमात्रार्थके त्वादौ । तदुक्तं—

निपाता द्योतकाः केचित्पृथगर्थाभिधायिनः ।
आगमा इव केपि स्युः सम्भूयार्थस्य वाचकाः ॥ इति ।

'केचि'दित्युभयान्वयी । न तूपसर्गत्वेन प्रादीनां, निपातत्वेन चादीनां द्योतकता वाचकता चेति स्थिते—उपसर्गत्वावच्छेदेन द्योतकता, न निपातत्वावच्छेदेनेति -विवादः सिद्धान्तानालोचनमूलक एव ।

कर्मप्रवचनीयानां तु नोपसर्गवत् क्रियाविशेषकत्वं, किन्तु क्रियागतसम्बन्धविशेषकत्वम्, 'कर्म=क्रियां प्रोक्तवन्तः कर्मप्रवचनीया' इत्यन्वर्थसंज्ञानात् । अधिप-

सामान्यत्वात्। 'शक्तताया' इत्युपलक्षणम्—द्योतकताया वेत्यपि द्रष्टव्यम् ॥ ४७ ॥

इति निपातानां द्योतकत्वादिनिर्णयः ॥ ८ ॥

❀ दर्पणः ❀

र्थोस्तु सूत्रारम्भसामर्थ्यादेव सा। 'जपमनुप्रावर्ष'दित्यत्र हेतुभूतजपनिरूपितलक्ष्यलक्षणभावसम्बन्धस्य वर्षणक्रियानिष्ठस्यानुना द्योतनात्, एवमन्यत्रापि ज्ञेयम्। अत एव,—न तेषामुपसर्गत्वम्। क्रियागतविशेषद्योतको ह्युपसर्गः। उक्तञ्च हरिणा—

क्रियाया द्योतको नायं सम्बन्धस्य न वाचकः।
नापि क्रियापदाक्षेपी सम्बन्धस्य तु भेदकः ॥ इति।

तदर्थस्तु—कर्मप्रवचनीयसंज्ञकोऽन्वादिः 'प्रजयती'त्यादावुपसर्गवन्न क्रियागतविशेषस्य द्योतकः। विभक्त्यैवोक्तत्वाच्च न सम्बन्धस्य वाचकः। नापि–'प्रादेशं विलिखती'त्यादौ विशब्दवत् क्रियाक्षेपकः, तत्र विना मानक्रियाक्षेपात्। तथा सति तत्तत्क्रियानिबन्धना कारकविभक्तिरेव स्यात्, किन्तु विशिष्टक्रियाजनितो यः सम्बन्धो विभक्त्यर्थं इति तद्द्योतकः। 'प्रादेशं विमाय लिखती'त्यर्थप्रतीतेरित्यधिकमन्यतोवधार्य्यम् ॥ ४८ ॥

❀ इत्युपसर्गनिपातार्थनिर्णयः ॥ ८ ॥ ❀

❀ काशिका ❀

धिकदेशवृत्तित्वरूपं विवक्षितमिति भावः। न्यूनतां परिहरति—शक्तताया इत्युपलक्षणमिति ॥४८॥

❀ इति निपातोपसर्गद्योतकत्वादिनिर्णयः ॥ ८ ॥ ❀



तयोर

❀ अथ भावप्रत्ययार्थनिर्णयः ❀

भावप्रत्ययार्थमाह—

कृत्तद्धितसमासेभ्यो मतभेदनिबन्धनम् ।
त्वतलोरर्थकथनं टीकायां हरिणा कृतम् ॥ ४९ ॥

'कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भावप्रत्ययेनान्यत्र रूढ्यभिन्नरूपाव्यभिचरितसम्बन्धेभ्य' इति वार्त्तिकवचने मीमांसकादीनां भ्रममपाकुर्वन्नाह—टीकायामिति । भर्तृहरिणा महाभाष्यटीकायामित्यर्थः । 'त्वतलो'रिति—भावप्रत्ययमात्रोपलक्षणम् ।

अयमर्थः—समासादौ शक्तिः कल्प्यमाना राजादिसम्बन्धविशिष्टे कल्प्यत इत्युक्तम्, तथाच तदुत्तरभावप्रत्ययः सम्बन्धं वदतीत्यर्थः ।

एतदपि,—भेदः संसर्ग उभयं वेत्युक्तेषु भेदपक्षे न सम्भवतीत्यत आह—मतभेदेति । पक्षभेदेत्यर्थः । एवञ्च,—'राजपुरुषत्वम्', 'औप-

❀ दर्पणः ❀

प्रक्रान्ते नामार्थनिरूपणे नामघटककृत्तद्धितानामर्थमुपोद्घातसङ्गत्या निरूपयिष्यन्नादौ प्रकृत्यर्थप्रकारत्वाद्भावप्रत्ययार्थनिरूपणमित्याशयेनाह—भावेति । 'ष्युञ्वुञादेरपि सम्बन्धरूपभावबोधकत्वात्तत्संग्रहार्थमाह-त्वतलोरिति । भावप्रत्ययेति । भावविहिततद्धितप्रत्ययेत्यर्थः । हरिवाक्यं विवृणोति—अयमर्थ इत्यादिना । 'इत्युक्त'मित्यस्य 'समासशक्तिनिरूपणावसर' इति शेषः । संबन्धमिति । उत्तरपदार्थे पूर्वपदार्थसम्बन्धस्यैव धर्मत्वेन भासमानत्वादिति भावः । भेदपक्ष इति । तत्पक्षे हि 'राजपुरुष' इत्यत्राराजकीयभिन्नः पुरुष इति बोधेन

❀ काशिका ❀

भावप्रत्ययार्थं = त्वादिप्रत्ययार्थम्, वार्तिकवचनं = वार्तिकरूपं वचनमित्यर्थः । हरिणेति । एवं च हर्युक्तौ वार्तिकत्वभ्रमस्तेषामिति भावः । त्वतलोरिति विशेषोपादानेनेमनिजादेरन्यार्थकत्वशङ्का स्यादत आह—त्वतलोरिति । भावेति । अयं = वक्ष्यमाणः । अर्थः = तात्पर्यार्थः । वदति = बोधयतीत्यर्थः । न संभवतीति । तत्पक्षे—राजपुरुषादिसमासजन्यबोधे संसर्गस्याप्रकारत्वात् तत्पक्षे राजपुरुषत्वमित्यत्र त्वप्रत्ययस्य भेद एवार्थ इत्याशयः । एवं पुरुषत्वरूपेण वस्तुगत्या राजसंबन्धवान् यः पुरुषः स समासार्थ इति पक्षे—त्वप्रत्ययार्थः पुरुषत्वमेव, तद्व्यक्तिमात्रनिरूपिताधेयत्वसंबन्धेन प्रकृत्यर्थस्य तत्रान्वयः, अत एव तत्पक्षे कृत्तद्धितेत्यादि-

गवत्वं', 'पक्तृत्व'मित्यादौ स्वस्वामिभावसम्बन्धः, उपगवपत्यसम्बन्धः, क्रियाकारकभावसम्बन्ध इत्यन्वयबोधः। औपगवादावव्यभिचरितसम्बन्धे तु—अर्थान्तरवृत्तिस्तद्धित उदाहार्य्यः। 'दामोदरत्वं', 'कृष्णसर्पत्व'मित्यादौ जातिविशेषेण बोधादाह—अन्यत्रेति। रूढेरभिन्नरूपादव्यभिचरित-

❀ दर्पणः ❀

पुरुषांशे राजसम्बन्धाभानादिति भावः। उपगवपत्यसम्बन्ध इति। उपगवपत्ययोर्जन्यजनकभावात्मकः सम्बन्ध इत्यर्थः। अन्वयबोध इति। तत्तत्पदोत्तरभावप्रत्ययस्य तत्तत्सम्बन्धवाचकत्वादिति भावः। अव्यभिचरितसम्बन्धे त्विति। अव्यभिचरितसम्बन्धरूपजात्यैव भानोपगमे त्वित्यर्थः। 'तु'शब्दसूचितारुचिबीजं तु,—'तस्यापत्य'मित्यनेन षष्ठीप्रकृत्यर्थोपगवादिसम्बद्धेपत्येणादीनां विधानेन षष्ठ्यर्थसम्बन्धान्तर्भावेणैव तत्रैकार्थीभावस्योपगन्तव्यतया तत्रापत्याद्यंशे संसर्गस्यैव प्रकारतया तस्यैव तदुत्तरभावप्रत्ययार्थत्वेन जातेस्तद्वाच्यत्वासम्भवादिति। अर्थान्तरवृत्तिरिति। धात्वर्थघटितार्थवृत्तिराक्षिकाद्यन्तर्गतठगादिरित्यर्थः। तदर्थे कर्त्रादौ देवनादिरूपक्रियायाः क्रियाकारकभावसम्बन्धस्य प्रकारतया भानादित्याशयः। रूढेरिति। कथमप्यज्ञातयोगादर्थविशेषप्रसिद्धादित्यर्थः। अभिन्नरूपादिति। प्रत्ययान्तत्वेपि प्रत्ययलुका प्रकृतिसमानाकाराच्छिष्यमाणं लुप्यमानार्थाभिधायी'ति न्यायेन प्रकृत्यर्थान्वितप्रत्ययार्थाभिधायिन इत्यर्थः। अव्यभिचरितसम्बन्धेभ्य इति। अव्यभिचरितः = व्यक्तिनिष्ठात्यन्ताभावाप्रतियोगी, सम्बन्धः = समवायात्मको यस्य जात्यादेस्तद्विशिष्टवाचकादित्यर्थः। नातः पाकादिना—नाशेन स्वाश्रयनिष्ठाभावप्रतियोगिना—तत्त्वम्।

❀ काशिका ❀

वचनमावश्यकमिति शङ्कानवकाशः। इत्यन्वयबोधः = इति शाब्दबोधः। तद्धितान्तेऽपि शक्तिसत्त्वेन पृथगुपस्थित्यभावेन पृथगुपस्थितिविषयार्थयोः संसर्गस्यैवान्वयत्वेन यथाश्रुतासंगत्यापत्तेः, शाब्दत्वं तु तत्रापि 'शब्दयामी'त्यनुभवादित्यन्यत्र विस्तरः। 'उपस्थितयोः संबन्धोऽन्वय' इति मते तु यथाश्रुतमेवास्तु। अव्यभिचरितसंबन्धे तु = अपत्यापत्यवत्संबन्धस्याव्यभिचरितसंबन्धत्वे तु। यथा सत्-सत्तयोः संबन्धः कदापि न व्यभिचरितस्तथानयोरपि, सतः उत्पत्तिप्रभृति—आविनाशात् संबन्धस्य विद्यमानत्वादपत्यस्योत्पत्तिप्रभृति—आविनाशादुक्तसंबन्धस्यापि तथात्वादिति भावः। 'गोत्रं च चरणैः सहे'त्यनेनापत्यवत्त्वस्यापि जातित्वबोधनाज्जात्याभेदसंबन्धस्य तिरोधानात् जातिरेव तत्र प्रकार इति सैव त्वाद्यर्थ इति तात्पर्यार्थः। जातिप्रयुक्तकार्यमेवातिदिश्यते, न जातित्वं तस्येति पक्षान्तरसूचनाय तुशब्दः। अर्थान्तरवृत्तिरिति। 'ऐन्द्रत्व'मित्यादौ देवताद्यर्थकतद्धित उदाहार्य इत्यर्थः। तद्धितान्तत्वेपीति। अत एव

…म्बन्धेभ्यश्चान्यत्रेत्यर्थः। रूढिरुक्ता। द्वितीयं यथा—'शुक्लत्वम्'। अत्र 'तदस्यास्यस्मि'न्निति मतुपो 'गुणवचनेभ्यो मतुपो लुगिष्ट' इति लुप्तत्वात्। तद्धितान्तत्वेपि,—'घटः शुक्ल' इत्यभेदप्रत्ययाद् गुणस्यैव प्रकारत्वेन भानं जायते। तृतीयं,—सतो भावः सत्तेति। अत्र जातावेव प्रत्यय इति दिक्॥ ४९॥

❀ दर्पणः ❀

उक्तेति। 'दामोदरत्व'मित्यादौ जातिविशेषेण भानादिति ग्रन्थेनेत्यर्थः। द्वितीयं यथेति। अभिन्नरूपोदाहरणं यथेत्यर्थः। 'तद्धितान्तत्वेपी'त्यपिना—तदुत्तरभावप्रत्ययेन सम्बन्धाभिधानं प्राप्नोतीति सूचितम्। अभेदप्रत्ययादिति। इदञ्च षष्ठ्यर्थे विहितस्य मतुपः सम्बन्धार्थकत्वशङ्कानिरासाय। 'तृतीय'मित्यस्यो'दाहरणं यथे'ति शेषः। सत इति। सच्छब्दजन्यबोधे शक्यर्थकत्रंशे सत्तायाः प्रकारतया भानात्तदुत्तरभावप्रत्ययेनापि सैवाभिधीयते इत्यर्थः। तथाचोक्तस्थलेषु भावप्रत्ययान्तात्सम्बन्धाभानादुक्तवाक्ये 'अन्यत्रे'त्युपात्तमिति भावः। ननु 'शुक्लत्वं सत्त्व'मित्यादौ सतोपि शौक्ल्यादिसम्बन्धस्य भावप्रत्ययेनानभिधानवद् 'राजपुरुष' इत्यत्रापि तदनभिधानं स्यात्, तत्रापि राजादीनां पुरुषादिपदार्थे स्वत्वादिसम्बन्धेन प्रकारतेत्यस्यापि वक्तुं शक्यत्वादित्यत आह—दिगिति। तदर्थस्तु निर्वक्ष्यमाणभावे 'तस्य भाव' इति सूत्रेण त्वतलादयो विधीयन्ते, न तु जातित्वादिना

❀ काशिका ❀

संबन्धार्थकत्वप्रसक्तिः। अभेदप्रत्ययादिति। मतुपो लुग्विधानं तु 'पटस्य शुक्ल' इति गुणगुणिनोर्भेदव्यवहारस्यापि सत्त्वाच्छुक्लवानित्यनिष्टप्रयोगनिवृत्त्यर्थम्। जातावेवेति। लोकनिरूढेन 'सोऽय'मिति प्रत्ययेन भेदसंबन्धस्य तिरोधानान्न संबन्धे प्रत्ययः, एवं 'शुक्ल' इत्यादावपि। पाचकादौ तु क्रिययाभेदस्यैव प्रतीतेर्व्यभिचाराच्च क्रियासंबन्धाज्ञानमूलिकैव शब्दस्य द्रव्ये प्रवृत्तिः, एवं राजपुरुषादावपीति—तत्तत्संबन्ध एव तत्तदुत्तरभावप्रत्ययार्थः। 'नीलघटत्व'मित्यादौ नीलघटादिवृत्तिर्घटत्वादिकमेव त्वादिवाच्यत्वेनाश्रयति, न तु संबन्धिविशेषणाऽभिन्नरूपत्वेन, पूर्वोत्तरपदार्थयोर्विशेष्यविशेषणभावातिरिक्तसंबन्धस्याभावात्। घटत्वमेव नीलघटशब्दप्रवृत्तिनिमित्तं, नीलादिविशेषणबलात्तु घटत्वरूपेण नीलादिव्यक्तिभाने नीलसमानाधिकरणघटत्वादिकमेव प्रवृत्तिनिवृत्तिनिमित्तत्वेन भासते, उपाधिभेदाद् घटत्वादेरपि भेदः, अतो घटत्वस्यातिप्रसक्ततया कथं नीलघटादिशब्दप्रवृत्तिनिमित्तत्वमिति शङ्कानवकाशः। 'धवखदिरत्व'मित्यादौ जातिसमुदायस्तद्वाच्यः, समुदायस्यानुद्भूतावयवत्वे एकवचनम्, उद्भूतावयवत्वे पुनर्द्विवचनादिकमनीति बोध्यमिति वदन्ति, तद् ध्वनयन्नाह—दिगिति। तार्किकास्तु—कर्मधारयोत्तरभावप्रत्ययः पदार्थतावच्छेदकयोर्नीलत्वघटत्वयोः सामानाधिकरण्यवचन इत्यूचुः॥ ४९॥

'दण्डी'त्यादौ प्रकृत्यर्थविशिष्टद्रव्यमात्रवाचकता तद्धितस्ये'ति वदन्..
मीमांसकम्मन्यं प्रत्याह—

अत्रार्द्धजरतीयं स्याद् दर्शनान्तरगामिनाम् ।
सिद्धान्ते तु स्थितं पक्षद्वयं त्वादिषु तच्छृणु ॥ ५० ॥

अत्र = भावप्रत्ययविषये । तथाहि—'दामोदरत्वं,' घटत्व'मित्यादौ भावप्रत्ययस्य सम्बन्धानभिधायकत्वेन मीमांसकानां 'दण्डित्व'मित्यादिष्वपि तदभिधानं न स्यात्, प्रकृतिजन्यबोधे प्रकारः प्रकृत्यर्थसमवेतो हि

❀ दर्पणः ❀

जातावेव; सम्बन्ध एव वेति नियमस्तथाच यत्प्रकृतेर्यद्धर्मप्रकारकबोधः शास्त्रकृत्सम्मतः स एव धर्मस्त्वाद्यभिधेय इति रूढ्यादिभिर्भिन्नप्रकृतेः कृदन्तादितोऽपि सम्बन्धप्रकारकबोधस्य भाष्यसम्मतत्वात्तस्यैव भावप्रत्ययेनाभिधानमुचितमिति नोक्तेषु भावप्रत्ययस्य जात्याद्यभिधायकत्वमिति ॥ ४९ ॥

'प्रकृत्यर्थविशिष्टद्रव्यमात्रवचनते'ति पाठः । मात्रपदेन सम्बन्धव्यवच्छेदः । **तद्धितस्येति** । इन्यादेरित्यर्थः । **सम्बन्धानभिधायकत्वेनेति** । प्रकृतिजन्यबोधे तस्याप्रकारत्वादिति भावः । तदभिधानम् = सम्बन्धाभिधानम् । **न स्यादिति** । किन्तु दण्डस्यैवाभिधानं स्यान्न च तदभिधानमिष्टमिति भावः । ननु प्रकृतिजन्यबोधविषयत्वे सति प्रकृत्यर्थवृत्तित्वं भावत्वम्, तच्च दण्डसम्बन्धस्याक्षतमिति भावप्रत्ययेन तदभिधानं भविष्यतीत्यत आह—**प्रकृतिजन्यबोध**

❀ काशिका ❀

प्रकृत्यर्थविशिष्टेति । संयोगादिसंवन्धेन वस्तुगत्या दण्डादिविशिष्टेत्यर्थः, तत्र संयोगादिः संसर्गमर्यादया भासत इति तत्र न शक्तिः, किं तु प्रकृतेर्दण्डे, आश्रये च प्रत्ययस्य । मात्रपदेन संयोगादिरूपसंवन्धव्यावृत्तिः, अत एव 'पाचक' इत्यादावपि संवन्धो न शक्यः । उक्तं च भट्टैः—

'पाकं तु पचिरेवाह कर्तारं प्रत्ययोऽप्यकः ।
पाकयुक्तः पुनः कर्ता वाच्यो नैकस्य कस्यचित् ॥' इति ।

न चानन्तद्रव्येषु शक्तिग्रहासंभवः, परम्परया एकं दण्डत्वादिकमुपलक्षणीकृत्य तत्संभवादित्यरुणाधिकरणोक्तरीत्या द्रष्टव्यमिति भावः । 'मीमांसकाना'मित्यस्य 'मत' इति शेषः । तदभिधानम् = संवन्धाभिधानम् । ननु 'दामोदर'त्वमित्यादौ भावपदेन दामोदरादिनिष्ठो धर्मविशेषो गृह्यत इति तदनभिधानं, 'दण्डित्व'मित्यादौ पुनर्भावः संयोगादिरेवातस्तदभिधाने किं बाधकमित्याशङ्कापनुत्त्यै हेतुमाह—प्रकृतीति । हि = यस्माद्धेतोरुक्तस्वरूपो भावस्तदुत्तरत्वादि-

न्धेभ्यश्चान्दुत्तरभावप्रत्ययेनाभिधीयते । अन्यथा,–'घटत्व मित्यत्र द्रव्यत्वादेः 'दण्डित्व'मित्यादौ दण्डादेश्च तदुत्तरभावप्रत्ययवाच्यतापत्तेः, न च तन्मते 'दण्डी'त्यादिबोधे सम्बन्धः प्रकारः ।

यत्तु—यदा स्वसमवेतोत्र वाच्यो नास्ति गुणेऽपरः ।
तदा गत्यन्तराभावात्सम्बन्धो वाच्य आश्रितः ।। इति ।

※ दर्पणः ※

इति । उक्तार्थस्य भावत्वे तु–'दामोदरत्व'मित्यादौ जातिगुणसम्बन्धस्यापि भावार्थता प्रसज्येतेति भावः । क्रमेण दलद्वयव्यावर्त्यमाह—**अन्यथेति** । एकतरदलमात्रोपादाने इत्यर्थः । **तदुत्तरेति** । घटदण्डिपदोत्तरेत्यर्थः । तथाच 'घटत्व'मित्यादौ द्रव्यत्वस्येव त्वन्मते 'दण्डी'त्यादौ दण्डसम्बन्धस्याप्यपदार्थतया-ऽप्रकारत्वात्–अभावत्वेन न तस्य प्रत्ययार्थत्वसम्भव इति भावः । वस्तुतस्त्वन्त-दलोपादानं व्यर्थम्, मतुवादीनां सम्बन्ध्यर्थकतया 'दण्डी'त्यादिवाक्यजन्यबोधे सम्बन्धस्यैव प्रकारत्वेन दण्डादीनां प्रकृत्यर्थेऽप्रकारत्वादेवानतिप्रसङ्गात् । मीमांसकैकदेशिमते मत्वर्थीयानां सम्बन्धवाचकत्वेपि तदाक्षिप्ताश्रयविशेष्यकबोधस्यैव तैरभ्युपगमे तन्मतेपि प्रकृतिजन्यबोधविशेष्यांशे दण्डादीनामप्रकारत्वेन प्रयोजनविरहादिति विभावनीयम् ।

सम्बन्धः प्रकार इति । अस्य,–'येन तस्य त्वादिप्रत्ययवाच्यता स्या'दिति शेषः । मीमांसकमतमुपन्यस्यति—**यत्त्विति** । अत्र = दण्डित्वमित्यादौ । स्वसमवेतः = त्वादिप्रकृत्यर्थसमवेतः । 'नीलत्व'मित्यादौ नीलादिगुणवन्न सम्भवति—

※ काशिका ※

प्रत्ययेनाभिधीयतेऽतो 'दण्डित्व'मित्यत्र संयोगस्य तव मते दण्डिपदजन्यबोधीयप्रकारत्वाभावेन त्वादिप्रत्ययेनाभिधानं न स्यादित्यर्थः । पदयोः क्रमेण व्यावृत्तिमाह—अन्यथेति । **अन्यथा** = धर्ममात्रस्य भावपदार्थत्वे । द्रव्यत्वादेरिति । तस्यापि घटसमवेतत्वात्, घटपदजन्यबोधे प्रकारत्वं तु नेति न घटपदोत्तरत्वादिना तदभिधानम् । दण्डादेश्चेति । दण्डिपदजन्यबोधे तस्य प्रकारत्वात्, दण्डसंयुक्तदेवदत्तादौ समवेतत्वाभावात्तु न 'दण्डित्व'मित्यत्र त्वादिना दण्डादिरभिधीयते, अत्र समवेतत्वं न समवायेन वर्तमानत्वं, घटत्वत्वमभावत्वमित्यादौ घटत्वत्वादेरसमवेतत्वेन त्वादिवाच्यतानुपपत्तेः, अपि तु प्रकारतावच्छेदकसंबन्धेन तत्र वर्तमानत्वरूपम् । **संबन्धः प्रकार** इति । तथा च दामोदरादिपदजन्यबोधीयप्रकारत्वाभावात् तदुत्तरत्वादिप्रत्ययेन संबन्धाभिधानवद्दण्डित्वमित्यादावपि संबन्धस्य तेनानभिधानं स्यादिति समुदितार्थः । 'दण्डित्व'मित्यादौ संबन्धवाच्यत्वे मीमांसकोक्तां युक्तिमनूद्य दूषयति—यदेति । **स्वसमवेतः** = प्रकृतिजन्यबोधविशेष्यसमवेतः । **वाच्यः** = प्रकृतिवाच्यः, प्रकृतिजन्यबोधप्रकार इति यावत्, यद्वा त्वादि-

तन्न, इनादेः सम्बन्धिवाचकत्वेनोपपत्तौ गत्यभावाभावात्। प्रपञ्चितं चैतदादावेव वैयाकरणभूषणे। ननु तवापीदं वैषम्यं कथमित्य आह— सिद्धान्ते त्विति। जायन्त इति–वक्ष्यमाणविशेषणेन्वितम्। सिद्धान्ते प्रकृतिजन्यबोधे प्रकारे त्वादयो जायन्त इत्यर्थः। 'प्रकृतिजन्यबोधे प्रकार' इत्यत्र पक्षद्वयं स्थितमिति–योजना ॥ ५० ॥

❀ दर्पणः ❀

अतोऽत्तः सम्बन्धस्यैव भावप्रत्ययवाच्यत्वमाश्रितमित्यर्थः, दण्डादेः प्रकृत्यर्थांशे प्रकारत्वेपि प्रकृत्यर्थाऽसमवेतत्वेनाभावत्वादिति भावः। **सम्बन्धिवाचकत्वेनेति**। 'तदस्यास्त्यस्मि'न्निति मतुपः सम्बन्धे विधानेपि 'दण्डी पुरुष' इति सामानाधिकरण्यानुरोधात्सम्बन्धिवाचकत्वस्यावश्यकत्वादिति भावः। **गत्यभावाभावादिति**। सम्बन्धस्यैव भावत्वसम्भवादिति भावः। **आदावेवेति**। 'एवं वैश्वदेवीत्यादिसामानाधिकरण्यस्योक्तरीत्यैवोपपत्ते'रित्यन्तग्रन्थेन भूषणे इत्यर्थः। **तवापीति**। वैयाकरणस्यापीत्यर्थः। इदम् = क्वचिज्जात्यादिवाचकत्वं, क्वचित्सम्बन्धवाचकत्वमित्येवं रूपं वैषम्यमित्यर्थः॥ ५० ॥

❀ काशिका ❀

प्रत्ययवाच्यः, तदभिधानयोग्य इति यावत्। प्रकृतिजन्यबोधीयप्रकारताश्रयो हि तदभिधानयोग्यः। **सम्बन्धो वाच्य इति**। प्रकृतिजबोधप्रकारोऽपि स्वसमवेतः सम्बन्धस्त्वादिवाच्य आश्रित इत्यर्थः। यत्र तत्रेत्यर्थे **यदातदाशब्दयोः** पर्यवसानं बोध्यम्, लक्ष्यविशेषीयकालविशेषपरत्वात् यत्तदोः। **प्रपञ्चितं चैतदिति**। अयं भाव–'दण्डी'त्यादौ सम्बन्धावाच्यत्वे दण्डित्वमित्यत्रापि सम्बन्धस्य वाच्यत्वं न स्यात्, प्रतीतेरतद्वदेवोपपत्तेः, न च त्वादेर्वैयर्थ्यापत्त्या सम्बन्धे वाच्यत्वं कल्प्यत इति चेन्न, 'घटत्व'मित्यादौ क्लृप्तपदार्थतावच्छेदकशक्त्यैव निर्वाहात्। 'कृत्तद्धिते' त्यादिवचनं तु हरेर्न मुनेर्यद्बलात्कल्पना स्यात्। अनुभवानुरोधात्सम्बन्धे त्वादिशक्तिकल्पनमिति चेन्न, शक्त्यन्तरकल्पनामपेक्ष्येनादीनां क्लृप्तशक्तौ धर्मित्वसम्बन्धविषयकत्वेनोपपत्तौ पृथक्शक्तिकल्पना योगात्, तथा सति क्लृप्तपदार्थतावच्छेदकशक्त्यैव तद्भानसम्भव इत्यादि तत्र प्रपञ्चितमिति। **इदं वैषम्यम्** = दामोदरत्वमित्यादौ सम्बन्धो न वाच्यो दण्डित्वमित्यादौ तु वाच्य इति वैषम्यमित्यर्थः। **वक्ष्यमाणेति**। वक्ष्यमाणश्चासौ शेषश्चेत्यर्थः। **परे तु**—इनादेः सम्बन्धावाचकत्वेऽपि दण्ड्यादिशब्दस्य सम्बन्धज्ञानादेव प्रवृत्तिरिति संबन्धस्यैव प्रवृत्तिनिमित्ततया त्वादिवाच्यत्वसम्भव इति प्रतिपन्नाः। इत्यत्र = इत्याकारकजिज्ञासायां सत्याम्॥ ५० ॥

४७८

तौ पद्मावाह—

प्रयोगोपाधिमाश्रित्य प्रकृत्यर्थे प्रकारताम् ।
धर्ममात्रं वाच्यमिति यद्वा शब्दपरा अमी ॥ ५१ ॥
जायन्ते तज्जन्यबोधप्रकारे भावसंज्ञिते ।

प्रयोगे-उपाधिं = निमित्तं, प्रकृत्यर्थे-प्रकारतां = प्रकारतया भासमानं धर्म-वाच्यतया आश्रित्य त्वादयोजायन्ते, प्रकृतिजन्यबोधे प्रकारस्त्वाद्यर्थ.

ॐ दर्पणः ॐ

प्रयोग इति । शब्दप्रवृत्तावित्यर्थः । **निमित्तमिति ।** यद्धर्मवत्त्वेन ज्ञातेर्थे यश्शब्दः प्रयुज्यते स धर्मस्तच्छब्दप्रवृत्तौ निमित्तमित्यर्थः, सः--'दामोदरत्व'-मित्यादौ जातिः, 'शुक्लत्व'मित्यादौ गुण एवेति । ननु प्रकृतिजन्यबोधप्रकार-कत्वेनैवोपाधेः संग्रहे तस्य पृथगुपादानं व्यर्थमत आह—**प्रकृतिजन्येति ।** स च प्रकृत्यर्थवृत्तिरसाधारणो धर्मस्तस्मिन्नसाधारण्यञ्च—तदितरावृत्तित्वे सति सकल-तद्वृत्तित्वम्, सत्यन्तोपादाने द्रव्यत्वादेर्घटासाधारण्यं, विशेष्योपादानाच्च तद्व्य-क्तित्वादिनिरासः । तेन रूपेण धर्मो भावप्रत्ययवाच्यः, तत्र तत्पदार्थस्य घटादेस्त्वा-दिप्रकृत्यैव लाभादनन्यलभ्ये इतरावृत्तित्वादौ भावप्रत्ययस्य शक्तिः । तत्रापीतरद्, वृत्तित्वम्, अभावः, साकल्यं, वृत्तिमच्च विशकलितमर्थः । इतरवृत्तित्वप्रतियोगिका-भावस्यातिप्रसक्तत्वात्, इतरवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्धत्वाद्, घटत्वादौ बाधाच्च--विशिष्टस्य शक्यत्वासम्भवात् । अत्र च प्रकृतिजन्यबोधे येन सम्बन्धेन प्रतिपाद्यतावच्छेदकधर्मस्य प्रकारता,-तेन सम्बन्धेनेतरावृत्तित्वं वृत्ति-मत्त्वं च बोध्यम् । नातः कालादौ कालिकादिसम्बन्धेन घटत्वस्य वृत्तावपि क्षतिः, न वा 'घटत्व'मित्यादौ कम्बुग्रीवादिभानम्, 'प्रमेयत्व'मित्यादौ त्वितरावृत्तित्वांशो न भासते, अप्रसिद्धत्वात्, किन्तु सकलप्रमेयवृत्तित्वमात्रम् ।

नच विशिष्टस्यानतिरिक्तत्वमते 'गुणान्यत्वविशिष्टसत्त्व'मित्यादौ विशिष्ट-सत्त्वे विशिष्टसदितरावृत्तित्वस्य, 'महत्त्व'मित्यादौ सकलमहद्वृत्तित्वस्य महत्परि-माणादावसम्भव इति वाच्यं, तदितरत्वव्यापकात्यन्ताभावप्रतियोगितावच्छेदक-तद्वृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वे दलद्वयतात्पर्यात् । तत्राद्यदलं 'घटत्व'मित्यादौ द्रव्यत्वादेरसाधारण्यवारणायेति भावः । **प्रकारत्वादिति ।**

ॐ काशिका ॐ

मूले—'प्रकृत्यर्थप्रकरता'मित्यस्या'पन्न'मिति शेषः—इत्यभिप्रेत्याह—**प्रकारतया भासमानमिति ।** प्रकारत्वात् = घटत्वत्वस्य प्रकारत्वात् घटत्वपदोत्तरत्वप्रत्ययवाच्यत्वं स्यादित्यर्थः ।

इति यावत्। ननु 'घटत्व'मित्यत्र प्रकारत्वात्तदुत्तरभावप्रत्ययेन घटत्व-त्वस्यापि वाच्यता स्यादित्यत्रेष्टापत्तिमाह—धर्ममात्रमिति। न त्वत्र लघु-गुरुविचार इत्यभिप्रायः। तत्तद्व्यक्तिविशिष्टब्रह्मसत्ताया एव घटत्व-घटत्वत्वादिरूपत्वात्।

सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु।
'जाति'रित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः॥
तां प्रातिपदिकार्थञ्च धात्वर्थञ्च प्रचक्षते।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः॥—

ॐ दर्पणः ॐ

घटत्वासाधारणधर्मत्वादित्यर्थः। लघुगुर्विति। अयं भावः,—धर्मस्यासाधारण-धर्मत्वेन वाच्यत्वेऽप्येकत्वमित्यादौ परिमाणादेर्भानापत्तिः, उक्तासाधारण्यस्य परि-माणे सत्त्वात्। नच प्रकृत्यर्थतावच्छेदकनिरूपितत्वविशिष्टसमवायसम्बन्धेन तदि-तरावृत्तित्वं, तद्वृत्तित्वं च विवक्षितं, न च तेन सम्बन्धेन परिमाणं तत्र वृत्तीति नोक्तदोष इति वाच्यं, तथा सत्यनन्तशक्तिकल्पनावश्यकत्वे तत्तद्धर्मत्वेनैव धर्मे शक्तिरस्तु, किमितरावृत्तित्वादिगौरवसहिष्णुतया, अत एव—'पृथक्त्व'मित्यादौ प्रकृत्यर्थतावच्छेदकगुणान्भावप्रत्ययः प्रतिपादयति, प्रतीतिस्तु ताद्रूप्येण, धर्मत्वेन वेत्यन्यदि'ति गुणदीधितावुक्तं सङ्गच्छत इति। एतेन—भावशक्तत्वादिप्रत्ययेन 'कम्बु-ग्रीवादिमत्त्व'मित्यादौ गुरोरपि धर्मस्य कम्बुग्रीवादिमत्त्वस्य बोधनेन तद्वद्घटत्वत्व-मित्यादावपि गुरोर्धर्मस्य त्वप्रत्ययेन बोधनसम्भवादाशङ्का निःसारेत्यपास्तम्।

धर्मस्य भावप्रत्ययवाच्यत्वे सम्मतिमाह—सम्बन्धिभेदादिति। 'जातिः पदार्थ' इति कल्पे साधकमिदम्। सम्बन्धिभेदाद् = अनुयोगिभेदाद्, भिद्यमाना = गवेतरासमवेतत्वे सति सकलगोसमवेतत्वादिना, तद्व्यक्त्युपरागेण वा पार्थक्येन प्रतीयमाना,—गवादिनिष्ठा ब्रह्मसत्तैव-जातिरित्युच्यते। तस्यां सर्वे शब्दाः—वाचकत्वेन-व्यवस्थिता इत्यर्थः। तदेव व्यक्तीकरोति—तामिति। तां = तत्त-द्व्यक्त्युपरक्तां सत्तामित्यर्थः। धात्वर्थमिति। आकृत्यधिकरणन्यायेन,—'जाति-

ॐ काशिका ॐ

धर्ममात्रमिति। धर्मत्वेन वाच्यता, न तु तत्तद्रूपेण, शक्त्यानन्त्यप्रसङ्गादिति वदन्ति। न च गुरुधर्मे लक्षणेति वाच्यं, शक्तावेव लाघवादरो न लक्षणायामित्यत्र विनिगमनाविरह इति भावः। वस्तुतस्तु—गौरवं नास्त्येवेत्याह—तत्तद्व्यक्तीति। अपरे तु—'घटत्वत्व'मित्यत्राविद्यको धर्मविशेषस्तदर्थो न तु घटेतरासमवेतत्वेत्यादिरूपो गौरवादित्याहुः। निरुक्तभावस्य त्वाद्यर्थत्वे

—इति वाक्यपदीयात्। उक्तञ्च—'तस्य भावस्त्वतला'विति सूत्रे वार्त्तिककारैः—'यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतला'-विति। यस्य गुणस्य = विशेषणतया भासमानस्य, भावाद् = आश्रयत्वाद्, द्रव्ये = विशेष्ये, शब्दनिवेशः = शब्दप्रवृत्तिः, तस्मिन् वाच्ये त्वतलावित्यर्थः। तथाच रूपादिशब्देभ्यो जातौ, शुक्लाणुदीर्घमहदादिभ्यो गुणे, पाचकादिशब्देभ्यः क्रियायां, घटादिशब्देभ्यो जातौ—प्रत्ययः। रूपादिशब्दानां जातिप्रकारकबोधजनकत्वात्। पाचकादिशब्दानां क्रियाप्रकारकबोधजनकत्वे तस्यां प्रत्ययः, संसर्गप्रकारकबोधजनकत्वमिति मते च संसर्गे इति व्यवस्था सूपपादेति भावः।

❀ दर्पणः ❀

मन्ये क्रियामाहु'रिति पक्षाभिप्रायेण वा। 'महा'नित्यात्मविशेषणम्। क्वचिज्जात्यादिः, क्वचित्सम्बन्ध इत्युक्तार्थे वार्त्तिकं प्रमाणयति—**उक्तञ्चे**ति। गुणशब्दस्य वैशेषिकाणां रूपादिष्वेव प्रसिद्धेः प्रकृतोपयुक्तार्थपरतामाह—**विशेषणतयेति**। तथाच प्रकृते गुणपदमुपसर्जनीभूतार्थपरमिति भावः। पर्य्यवसितमाह—**तथाचेति**। 'रूपादी'त्यादिना रसादेर्गुणपरशुक्लादेश्च संग्रहः। **बोधजनकत्व इति**। बोधजनकत्वमत इत्यर्थः। व्यपेक्षावादे क्रियाकारकभावसम्बन्धेन कृदर्थकर्त्रादौ धात्वर्थस्यैव प्रकारतया भानोपगमादिति भावः। स्वसिद्धान्तमनुसृत्याह—**संसर्गप्रकारकेति**। **सूपपादेति**। भावप्रत्ययो जातावेवेत्याद्यनियमादिति भावः। **तत्रेति**। जात्यादिवाचकभावप्रत्ययेषु मध्ये इत्यर्थः। **जातिवाचका-**

❀ काशिका ❀

वार्तिककृत्संमतिमाह—**उक्तं** चेत्यादिना। 'यस्य गुणस्ये'त्यत्र गुणशब्द उपकारकपर इत्यभिप्रेत्याह—**विशेषणतयेति**। उक्तं च कैयटीये—'गुणशब्देन यावान् कश्चित् पराश्रयो भेदको जात्यादिः सर्वं इह गृह्यते' इति। 'भावा'दित्येतद् व्याचष्टे—**आश्रयत्वादिति**। 'द्रव्ये' इत्येतद् व्याचष्टे—**विशेष्ये इति**। **गुणे इति**। गुणिपरशुक्लादिभ्यो गुणे, गुणपरेभ्यस्तु तेभ्यस्तद्वृत्तिजाताविति बोध्यम्, अण्वादिशब्दा नित्यं गुणिपरा इति—तेभ्यः परिमाणरूपे गुण एव प्रत्ययः, 'परिमाणं चतुर्विधमणु महद्दीर्घं ह्रस्वं चे'त्यस्य त्वण्वादिवृत्तिरित्यर्थोऽवसेयः।

घटत्वत्वादिशब्दे व्यक्तय एव त्वादिवाच्या इति पक्षान्तरमाह—**जातिवाचकानामिति**। घटत्वादिशब्दनामित्यर्थः। **व्यक्तय एवेति**। स्ववृत्तित्वसंबन्धेन तासां वाच्यतावच्छेदकत्वमिति बोध्यम्।

तत्र जातिवाचकानां व्यक्तय एव शक्यतावच्छेदिकाः, तथाच 'घटत्व'मित्यत्र घटवृत्तिरसाधारणो धर्म इति बोध इत्यादि द्रष्टव्यम् ।

पक्षान्तरमाह—यद्वेति । 'यद्वा सर्वे भावाः स्वेनार्थेन भवन्ति, स तेषां भाव' इति वार्तिकोक्तेः—यद्वाशब्दस्तत्सूचनप्रयोजनकोपि । भवन्ति—वाचकत्वेन प्रवर्त्तन्ते इति भावाः = शब्दाः । स्वेन रूपेण = अर्थेन, भव-

---

❀ दर्पणः ❀

नामिति । 'अर्थनिष्ठशक्ते'रिति शेषः । गुणाद्यात्मकभाववचनानां शुक्लत्वादि-शब्दानां जातेः शक्यतावच्छेदकत्वसम्भवादाह—**जातिवाचकानामिति** । 'भावप्रत्ययाना' मिति शेषः । **अवच्छेदिका इति** । उपस्थितत्वाद् घटत्वादि-जातिनिष्ठशक्तेः स्वेतरावृत्तित्वावच्छिन्ननिखिलस्ववृत्तित्वरूपाधेयत्वादिसम्बन्धेना-वच्छेदिका इत्यर्थः । तेन न द्रव्यत्वादिनिष्ठशक्तेर्घटावच्छिन्नत्वम्, अवच्छेदकानु-गमकं च गोत्वादिकमेवेति भावः । पर्य्यवसितबोधमाह—**घटवृत्तिरिति** ।

पक्षान्तरमिति । 'तच्छब्द एव भावप्रत्ययवाच्य' इति मतान्तरमित्यर्थः । 'अथ कस्माद्गौरित्युच्यते गौरित्येव हि गौर्गवि वर्त्तते इत्यौक्थिका' इति निरुक्त-मप्येतत्कल्पे उपष्टम्भकं बोध्यम् । **तत्सूचनप्रयोजनको'पी'ति** । 'यद्वा'—शब्दघटितोक्तवार्त्तिकसूचनप्रयोजनकोपीत्यर्थः । अपिना पक्षान्तरसंग्रहः । वार्त्तिके 'स्वेनार्थेन भवन्ती'त्यत्र स्वशब्दस्यात्मीयवचनतयात्मीयार्थेन जात्यादिना प्रवर्त्तन्त इत्यर्थात्कथं पक्षान्तरपरता, कथं वार्थावृत्तेर्धर्मस्य शब्दस्य—भावत्वं चेत्यत आशयं

❀ काशिका ❀

एवं तत्र तत्र त्वाद्यर्थमुक्त्वा शाब्दबोधमाह—**तथा चेति**। 'घटत्व'मित्यत्र प्रकृत्यर्थस्य स्वेतरासमवेतत्व-विशिष्टनिखिलस्वसमवेतत्वसंबन्धेन प्रकारता, प्रत्ययार्थे धर्मे एतावता साधरणधर्मलाभः, एतदभिप्राये-णैवा'साधारणो धर्म' इति बोध इत्यवादीत्, न त्वसाधारणधर्मत्वेन शक्तिस्तस्येतरावृत्तित्वविशिष्ट-सकलप्रकृत्यर्थवृत्तित्वरूपत्वेन गौरवात् । अथवा वस्तुतो योऽसाधारणो धर्मस्तन्निष्ठाधेयत्वसंबन्धेन प्रकृत्यर्थान्वयस्तेन घटत्वमित्यत्र न द्रव्यत्वादिभानम् । **तत्सूचनप्रयोजनकोऽपीति** । तस्य = वार्तिकस्यसूचनायेत्यर्थः । 'अपि'शब्दः पक्षान्तरत्वसूचनाय,—यद्वेतिशब्द इत्यर्थस्य समुच्चयाय, 'वार्तिकसूचनप्रयोजनक' इत्यनेनायं पक्षो वार्तिकोक्त इत्यप्रामाण्यशङ्का निरस्ता । वार्तिकव्या-ख्यानं बृहद्भूषणोक्तमाह—**भवन्तीति** । **वाचकत्वनेति** । वाचकतासंबन्धेनेत्यर्थः । **प्रवर्तन्ते**—अस्यार्थेष्विति शेषः । धातूनामनेकार्थत्वाद् भूधातुः प्रवृत्त्यर्थकः, प्रवृत्तिश्च प्रकृते प्रयोगरूपा । एवं च भावशब्दः शब्दप्रतिपादक इत्याह—**भावाः शब्दा इति** । अत्र 'स्व'शब्द आत्मवाची-त्याह—**स्वेन रूपेणेति** । स = शब्दात्मा, तेषां=शब्दानाम् । वार्तिकस्थचरमभावपदार्थमाह—

न्ते = प्रवर्त्तन्ते, अतः स तेषां भावः = प्रवृत्तिनिमित्तमित्यर्थः। अयं भावः-अर्थवच्छब्दोपि द्रव्ये प्रकारः, हरिहरनलेक्ष्वाकुयुधिष्ठिरवशिष्ठादिशब्देभ्यस्तत्तद्वाच्यः कश्चिदासीदिति शब्दप्रकारकबोधस्य सर्वसिद्धत्वात्, अन्यथा वनौषधिवर्गादेर्नागरिकान् प्रत्यबोधकत्वापत्तेश्च, एवमेवाप्रसिद्धार्थकपदेष्वनुभवः सर्वसिद्धो, न तु घटादिपदेष्विव तत्तज्जात्यादिरूपेण। तथाचोभयमवच्छेदकम्।

❀ दर्पणः ❀

प्रकाशयति—**अयं भाव इति**। जात्याद्यर्थस्य द्रव्यांशे विशेषणतायाः प्रसिद्धत्वात्तद्दृष्टान्तेन शब्दस्यापि तां साधयति—**अर्थवदिति**। जात्यादिवदित्यर्थः। शब्दस्यार्थविशेषणतायामसाधारणस्थलमाह—**हरिहरेति**। 'कश्चिदासी'दित्यनेन जात्यादिप्रकारकबोधासम्भवो ध्वन्यते, हर्य्यादौ सन्निकर्षाभावेनानुपस्थितहरित्वाद्यवच्छेदेन शक्तिग्रहाभावेन तद्धर्मप्रकारकशाब्दबोधासम्भवादुपस्थितपदस्यैव विशेषणत्वमभ्युपगम्य शाब्दबोध उपपादनीयः। यथा च वृत्त्या तदुपस्थितिस्तथोपपादिता नामार्थनिरूपण इति भावः। **अन्यथेति**। अर्थांशे शब्दस्य प्रकारत्वानभ्युपगम इत्यर्थः। आरण्यकानां—सन्निकर्षेण जातिधर्मितावच्छेदककशक्तिग्रहसम्भवादुक्तं—**नागरिकानिति**। **एवमेवेति**। पदप्रकारेणैवेत्यर्थः। **अप्रसिद्धेति**। अगृहीतजात्यादिविशिष्टशक्तिकपदेष्वित्यर्थः। **जात्यादिभेदेनेति**। तद्विशेषेणेत्यर्थः। क्वचित्तु 'जात्यादिरूपेणैवे'त्येव पाठः। **उभयमिति**। जात्यादिरूपं,

❀ काशिका ❀

भावः प्रवृत्तिनिमित्तमिति। ननु शब्दस्य प्रवृत्तिनिमित्तत्वं कथं? शक्ये प्रकारस्यैव तत्त्वादित्याशङ्कां निरसितुमाह—अयं भाव इत्यादिना। तत्तद्वाच्यः कश्चिदिति। विशेषरूपेणानुपस्थित्या नलत्वादिरूपविशेषधर्मावच्छिन्ने शक्तिग्रहासंभवेन सामान्यरूपेणैव बोधोऽभ्युपेयः, 'इदं पदं क्वचिच्छक्तं पदत्वात्—साधुपदत्वा'दिति सामान्यतोऽनुमित्यात्मकशक्तिग्रहसत्त्वात्। **नागरिकान् प्रत्यबोधकत्वापत्तेरिति**। तेषां प्रायो विशेषरूपाज्ञानेन, विशेषरूपेण शक्तिग्रहासंभवात्, ग्रामीणानां तु विशेषतो ज्ञानसंभवान्नाबोधकत्वमिति सूचयितुं—'नागरिका'नित्युक्तम्। तच्च विशेषरूपेणानभिज्ञपरम्, तेन कस्यचिन्नागरिकस्य विशेषरूपेण बोधेऽपि नासंगतिः। **एवमेवेति**। एतत्पदवाच्य इत्याकारक एव, न तु—तत्तज्जात्यादीति,—'अनुभव' इत्यनुषज्यते। अत एव जन्मान्तरीणसंस्कारवशाद्विशेषरूपेण शक्तिग्रहे सति विशेषरूपेण भानं नलादीनामित्यपास्तम्। विशेषरूपेणानुभवाभावेनानन्तसंस्कारकल्पने मानाभावात्, तत्तद्वाचकपदश्रवणं विना तेषां विशेषरूपेण स्मरणापत्तेश्च। उद्बोधकाभावान्न स्मरणमिति तु न साम्प्रतं, तत एव शाब्दबोधनिर्वाहे संस्कारस्मरणाद्योर्हेतुत्वासिद्ध्यापत्तेरित्याहुः। **उभयमवच्छेदकमिति**। जात्यादि, शब्द-

यस्य तथा शक्तिग्रहस्तस्य जात्यादिरूपेणैवोपस्थितिः। पदप्रकारकः शक्तिग्रहस्तु विशिष्य नापेक्षितः, किन्तु—'इदं पदं क्वचिच्छक्तं, साधुपदत्वा'दित्यादिरूप एवापेक्ष्यते इति विशिष्या-

❀ दर्पणः ❀

पदं चेत्यर्थः। अवच्छेदकमिति। शक्त्यवच्छेदकमित्यर्थः। ननु जात्याद्यनुपस्थितिदशायामयमर्थं एतत्पदवानिति शक्तिग्रहोप्यसम्भवदुक्तिकोत आह—पदप्रकारक इति। विशिष्य = घटपटत्वादिरूपेणेत्यर्थः। यद्यपि—'सर्वे भावा' इति सर्वशब्दोपादानादेतत्कल्पे शब्दस्यैव सर्वशब्दप्रवृत्तिनिमित्तत्वमवगम्यते, तथापि घटत्वादिना गृहीतशक्तिकघटादिपदाद् घटत्वप्रकारकबोधस्य सार्वजनीनप्रसिद्धिसिद्धस्यापह्नोतुमशक्यतया प्रायशः प्रसिद्धार्थकस्थले शब्दाप्रकारकबोधस्यानुभवेन चैतत्कल्पेपि जात्यादीनां शब्दप्रवृत्तिनिमित्तत्वमङ्गीकरणीयमेव। वार्त्तिकं तु भावशब्दस्याप्रसिद्धार्थकशब्दपरतया योज्यम्, तत्र निमित्तान्तराभावेन वार्त्तिकबलाच्छब्दस्यैव शब्दप्रवृत्तिनिमित्तत्वावधारणात्। यथा कादिपञ्चकशक्त—'कु'पदे। अत एवा'ऽनुदात्तङित' इति सूत्रे'नुदात्तङितौ द्वावात्मनेपदमित्यस्य तङानौ द्वावर्थं इति तत्र सङ्ख्यातानुदेशः प्राप्नोती'ति यथासङ्ख्यसूत्रे भाष्यकृदुक्तं सङ्गच्छते। अन्यथा नवानां तङर्थत्वेन, आत्मनेपदवत्त्वेन बोधे सर्वेषामेकत्वेन तत्र च 'द्वा'वित्यस्यानुपपत्तिः स्पष्टैव। अत एव सारकृताप्युभयमवच्छेदकमित्युपसंहृतम्। क्वचिच्छब्दोपीति तदाशय इति। कथं तर्हि तत्र शक्तिग्रहोत आह-किन्त्विति। क्वचिच्छक्तमिति। किञ्चिन्निष्ठशक्तिनिरूपकमित्यर्थः। तथाच नृपादिवर्णनप्रस्तावे नृपत्वादिनोपस्थितनलादीनां शक्त्यंशे भाने उपस्थितत्वान्नलादिपदानामपि तदर्थे भानमविरुद्धम्। इदमेतच्छक्यमित्याकारकार्थशक्तिग्रह एव विशेषरूपेणोपस्थितेस्तन्त्रत्वादिति भावः। तथैव बोध इति। पदवाच्यत्वप्रकारक एवेत्यर्थः। एवकारेण जात्यादिप्रकारकबोधव्यवच्छेदः। इदञ्च 'कश्चिदर्थो नलादिपदशक्योऽर्थत्वा'दित्यानुमानिकशक्तिग्रहाभिप्रायेण। उक्तोपनीतपदशक्तिग्रहे स्वर्थविशेष्यकबोधानुपपत्तिरेव। शक्तिज्ञानपदार्थोपस्थितिशाब्दबोधानां समानप्रकारकत्वनियमादित्यवधेयम्। नैयायिकास्तु—नलादिपदानामपि विशिष्य शक्तिग्रहो नानुपपन्नः, यत्र नलत्वादिसम्बन्धेन यत्किञ्चिद्धर्मवत्त्वधीस्तद्विषयीभूतनलत्वादेः शक्तिग्रहे धर्मितावच्छेकतया भाने बाधकाभावात्। यद्वा यत्र 'प्रमेयत्वेन प्रमेयवा'नित्याकारा नलत्वादिविशिष्टबुद्धिः, ततश्च प्रमेयत्वांशे मोपदशायां स्वरूपतो नलत्वादिप्रकारक-

❀ काशिका ❀

मुभयं शक्यतावच्छेदकमित्यर्थः। तत्र शब्दस्य शक्तिसंबन्धेन शक्यतावच्छेदकत्वं, जात्यादेस्तु यथायथं समवायादिसंबन्धेन। तथा शक्तिग्रहः = जात्यादिरूपेण शक्तिग्रहः। तथैव = पदप्रकारक

गृहीतशक्तिकेभ्यस्तथैव बोधः, तथाच शब्दोपि त्वप्रत्ययार्थ इति प्रपञ्चितं भूषणे ॥ ५१½ ॥

❀ इति त्वादि-भावप्रत्ययार्थनिर्णयः ॥९॥ ❀

❀ दर्पणः ❀

नलविशेष्यकस्मरणे बोधकाभावात्तद्विषयनलत्वादिना विशिष्य नलादौ नलादिपदशक्तिग्रहेण तत्तद्रूपेण नलादिपदान्नलादिबोधस्य सुलभत्वात् । न च प्रमेयत्वांशे मोषकल्पने मानाभावः, अनुभूयमानतत्तद्धर्मप्रकारकशाब्दबोधानुपपत्तेरेव मानत्वात्, कथमन्यथानुभवात्मकसमूहालम्बनादेकपदार्थोद्बोधकासमवधानेन्यपदार्थस्मृतिः । अक्लृप्तस्यार्थांशे पदविशेषणत्वस्य कल्पनापेक्षया तादृशस्मृतौ प्रमेयत्वांशे मोपकल्पनस्यैव न्याय्यत्वात् ! पदस्यार्थधर्मत्वाभावेन तस्य पदांशे विशेषणत्वासम्भवाच्च । "तस्य पदस्य तस्मिन्पदे शक्तिरित्यर्थस्यालौकिकत्वेन पदप्रकारकबोधस्य सार्वत्रिकत्वासम्भवाच्चेत्याहुः ॥ ५१ ॥

❀ इति भावप्रत्ययार्थनिरूपणम् ॥ ९ ॥ ❀

❀ काशिका ❀

एव । शक्तिग्रहवैलक्षण्याद्बोधवैलक्षण्यमिति भावः । तथा च = शब्दस्य शाब्दबोधप्रकारत्वे च । शब्दोपि = अपिशब्दो जात्यादिसमुच्चायकः । परे तु—येषां मते शब्दः प्रवृत्तिनिमित्तं तेषां मते शब्दस्त्वाद्यर्थः, येषां मते जात्यादिरूपोऽर्थः प्रवृत्तिनिमित्तं, तेषां मते स तदर्थ इति वदन्ति । प्रकृतेर्लक्षणया शब्दपरत्वं, जात्यादिः शाब्दो वा त्वाद्यर्थः, जन्यबोधप्रकारत्वसंबन्धेन प्रकृत्यर्थस्य शब्दस्य प्रत्ययार्थेऽन्वयः; अत एव शब्दपरत्वं प्रकृतेः स्वीक्रियते, अन्यथा घटादेः प्रकृत्यर्थस्य शब्दरूपे प्रत्ययार्थेऽन्वयासंभवात्, न हि तत्र समवायादेः संभवः । 'जन्यबोधे'त्याद्युक्तसंबन्धस्याप्यसंभवः । शक्तिसंबन्धस्य संभवेऽपि पटत्वादौ तदसंभव इति शब्दपरत्वमेवादृतमिति बोध्यम् । परे तु—भाष्ये—'तस्य भावः—' इत्यत्रत्यभावशब्दस्याभिप्रायाद्यर्थकतयाभिप्रायादिष्वतिप्रसङ्गशङ्कानिरासो 'यस्य गुणस्य भावादि'ति वार्तिकेन कृतः, 'भाव'शब्देन प्रकृतसूत्रे प्रवृत्तिनिमित्तभूतो धर्मो गृह्यते, न त्वभिप्रायादिरित्यभिप्रायात् । तदनन्तरं डित्थत्वमित्यादौ त्वाद्यनुपपत्तिः, डित्थादिशब्देन व्यक्तेरेव बोधनादित्याशङ्कां—व्यक्तेरेव विशेष्यताप्रकारत्वाभ्यां भावस्य प्रकारताविशिष्टव्यक्तिरूपत्वाद्यर्थस्य चोपगमेन समाधाय—'यद्वा सर्वे भावाः स्वेन—' इत्यादिवार्तिकेन समाधानान्तरं कृतम् । तस्यायमर्थः—स्वशब्दोऽत्रात्मीयपरः, शब्दस्य द्विविधोऽर्थो वाच्यो घटादिः, प्रवृत्तिनिमित्तरूपश्च, तदन्यतराभिधाने त्वादिः । तत्रान्त्यो घटत्वमित्यादौ । तत्र प्रकृतिरर्थपरैव, अर्थस्य घटादेः प्रत्ययार्थे जात्यादिरूपेऽन्वयसंभवात् । 'कुत्वं' 'डित्थत्व'मित्यादावाद्यः, तत्र प्रत्ययार्थानुपपत्त्या शब्दपरैव प्रकृतिः, शब्दपरात् कादिशब्दात् व्यक्तिरूपेऽर्थे प्रत्ययः, तत्र च डित्थत्वडित्थशब्दयोः, कुत्वकुशब्दयोः, पदपदशब्दयोः, पर्यायता । अत एव वृद्धिसूत्रे भाष्ये

❀ अथ देवतादिप्रत्ययार्थनिर्णयः ❀

'सास्य देवते'त्यत्र देवताविशिष्टं देयं प्रत्ययार्थः। 'ऐन्द्रं' 'वैश्वदेवी'त्यादौ इन्द्रादेर्देवतात्वोपस्थापकान्तराभावात्, तेन रूपेणोपस्थितये

❀ दर्पणः ❀

ननु देवताया इन्द्रादिपदाल्लाभेन तदन्तर्भावेण तद्धितशक्तिकल्पनमनर्थकमत आह—देवतात्वोपस्थापकेति। इन्द्रत्वेन रूपेण देवतोपस्थितावपि देवतात्वेन रूपेण तदुपस्थापकाभावादित्यर्थः। तेन रूपेणेति। देवतात्वेन रूपेणेन्द्रोपस्थितये इत्यर्थः। अन्यथा—

तद्धितेन, चतुर्थ्या वा, मन्त्रलिङ्गेन वा पुनः।
देवतासङ्गतिस्तत्र दुर्बलं च परं परम्॥—

—इति मीमांसकसिद्धान्तासङ्गतिरिति भावः। द्रव्यस्य देवतासम्बन्धित्वं च तदुद्देश्यकत्यागकर्मत्वं, त्यागोद्देश्यत्वमपि वेदबोधिताबाधितद्रव्यस्वामित्वप्रकारेणेच्छाविषयत्वम्। तदेव च देवतात्वं, नातो घृतादिसम्प्रदानब्राह्मणस्य त्यागोद्देश्यत्वेपि देवतात्वम्, तस्य तत्स्वामित्वाबोधात्[1]। 'ऐन्द्रो मन्त्र' इत्यादौ मन्त्रस्य तद्देवताकत्वं च न तदुद्देश्यकत्यागकरणत्वम्, विनापि मन्त्रमिच्छाविशेषात्मकत्यागोत्पत्त्या व्यभिचारात्, किन्तु त्यागाङ्गोच्चारणकत्वम्। एवञ्च देवतासम्बन्धी प्रत्ययार्थः,

❀ काशिका ❀

'कुत्वं कस्मान्न भवति—'चोःकुः' 'पदस्य' इति, भत्वात्, कथं भसंज्ञा, अयस्मयादीनि छन्दसि' इत्युक्तम्। एवं च कुत्वादिपदस्य कवर्गादिरेवार्थः, एवं सति 'तस्य भाव' इति सूत्रस्थतच्छब्दस्य शब्दपरत्वमास्थेयं, तस्य च 'गुणवचने'ति सूत्रेऽनुवृत्तस्यार्थपरत्वमाश्रयणीयम्, एवं चार्थस्य त्यागोपादानप्रयुक्तगौरवापत्तिश्च न। न हि शब्दस्य कर्म संभवति, प्रतीयते वा, 'तस्यापत्यम्' इत्यादौ तच्छब्दस्यार्थपरताया एव दृष्टत्वाच्चेति समूचिरे। प्रकृत्यर्थप्रत्ययार्थयोः संबन्धस्त्वाद्यन्तसमुदायशक्यः॥५१॥

❀ इति त्वादिप्रत्ययार्थनिर्णयः समाप्तः ❀

प्रसङ्गसंगत्या देवतार्थकतद्धितप्रत्ययार्थमाह—सास्य देवतेत्यत्रेति। प्रथमोपात्तस्याप्यपत्यार्थकतद्धितोपेक्षा तु तत्र प्रत्ययार्थस्यापत्यरूपस्यैकत्वात्, तत्र च प्रकृत्यर्थस्य जन्यजनकभावसंबन्धादिरूपभेदसंबन्धेन प्रकारतायाः सुगमत्वेन। देवतार्थकतद्धिते तु नानापक्षसंभवेन दुरूहत्वेन तदर्थनिर्णये आदर इति बोध्यम्। देवताविशिष्टमिति। स्वस्वामिभावसंबन्धेन स्वोद्देश्यकत्यागकर्मत्वसंबन्धेन वा देवताविशिष्टमित्यर्थः। अत एव = प्रकृततद्धितयोक्तार्थकत्वादेव। तस्यैव =

१ 'बाधा'दिति मुद्रितपुस्तकपाठः।

...क्तिकल्पनावश्यकत्वात्। अत एव—

'आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः।
आमिक्षापदसान्निध्यात्तस्यैव विषयार्पणम्॥' इति।
केवलाद्देवतावाची तद्धितोऽग्नेः समुच्चरन्।
नान्ययुक्तोऽग्निदैवत्यं प्रतिपादयितुं क्षमः॥—

—इति च मीमांसकैरप्युक्तमित्याशयेनाह—

प्रत्ययार्थस्यैकदेशे प्रकृत्यर्थो विशेषणम्॥ ५२॥
अभेदश्चात्र संसर्ग आग्नेयादावियं स्थितिः।
देवतायां प्रदेये च खण्डशः शक्तिरस्तु वा॥ ५३॥

एकदेशे = देवतारूपे। तच्च विशेषणमभेदेनेत्याह—अभेदश्चेति। ननु देवतायाः प्रत्ययार्थैकदेशत्वान्न प्रकृत्यर्थस्य तत्राभेदेनाप्यन्वय इत्या-

❁ दर्पणः ❁

न तु तद्देवताकत्वं, 'ऐन्द्रं हवि'रिति सामानाधिकरण्यानुपपत्तेः। स चामिक्षादिपदसमभिव्याहारे तत्तद्द्रव्येण प्रतीयते। 'देयं प्रत्ययार्थं' इति तु तस्यामिक्षादिपदसमभिव्याहारे दानकर्मत्वेनापि प्रतीतेरित्यभिप्रेत्योक्तमिति भावः। उक्तार्थे सम्मतिमाह—**अत एवेति**। देवतासम्बन्धिनः प्रत्ययार्थत्वादेवेत्यर्थः। **सान्निध्यादिति**। 'सामिक्षा वैश्वदेवी'त्यत्रामिक्षापदसमभिव्याहारादित्यर्थः। **विषयार्पणमिति**। आमिक्षात्मकद्रव्यस्यैव देवतोद्देश्यकत्यागकर्मत्वप्रतीतिरित्यर्थः।

केवलादिति। सोमादिपदासमभिव्याहृतात्। अग्नेः समुच्चरन् = प्रत्ययत्वादग्निशब्दात्पुरः प्रादुर्भवन्,—'आग्नेयोऽष्टाकपालो भवत्यमावस्याया'मित्यादौ। **नान्येति**। सोमादिसाहित्यापन्नाग्निदेवतोद्देश्यकं द्रव्यं प्रतिपादयितुं नेष्टे, किन्तु तद्देवताकमेवेति तद्भावः। तथा च देवताविशिष्टदेयस्य तद्धितार्थत्वं तेषामपि सम्मतमिति भावः। **प्रकृत्यर्थेति**। 'पदार्थः पदार्थेनान्वेती'ति व्युत्पत्तेरिति भावः। अस्मिन्कल्पे च प्रकृत्यर्थस्याभेदसम्बन्धेन देवतारूपतद्धितार्थेन्वयः, तस्य च स्वोद्देश्यकत्यागकर्मत्वसम्बन्धेन द्रव्यरूपतद्धितापरपदार्थे इति बोध्यम्॥ ५३॥

❁ काशिका ❁

तद्धितस्यैव। विषयार्पणमिति। अस्येति सर्वनाम्नो विशेषबोधकतया तदर्थे विहितस्य तद्धितस्यापि तथात्वेन कोऽसौ विशेष इति जिज्ञासायामामिक्षापदसांनिध्यादामिक्षारूपो विशेष इति प्रतीयत इत्यर्थः। केवलादिति। 'केवलादग्नेरग्निशब्दाद्देवतावाची तद्धितः समुच्चरन् =

शयेनाह-देवतायामिति। तथाच पदार्थैकदेशतैव नास्तीति भावः। ५३।

ॐ काशिका ॐ

प्रादुर्भवन्नन्ययुक्ताग्निदैवत्यं प्रतिपादयितुं न क्षम' इति योजना, इतरसापेक्षस्य देवतात्वेऽसामर्थ्यात्तद्धितवृत्तिरेव न स्यादिति भावः। अत एवाग्निषोमीयादावाग्नेयपदव्यवहाराभावाद् 'आग्नेयं चतुर्धा करोति' इति वाक्यविहितचतुर्धाकरणस्य न प्रवृत्तिः, द्वन्द्वे इतरसापेक्षस्यैव व्यासज्यवृत्तिदेवतात्वादिति स्थितं पूर्वतन्त्रे तृतीयस्य प्रथमचरणे। 'नान्ययुक्ताग्निदैवत्य'मित्यादिना केवलाग्निदैवत्यं प्रतिपादयितुं क्षम इति सूचितमिति भवत्युपष्टम्भसंगतिः। देवतायामितीति। बृहद्भूषणकारास्तु—'आग्नेय' इत्यादौ प्रकृत्यैव लब्धस्य प्रकृत्यर्थस्योद्देश्यत्वमात्रं यथा चतुर्थ्या प्रतिपाद्यते, एवमत्रापि प्रत्ययेन देवतात्वं प्रदेयं च प्रतिपाद्यते, देवतात्वस्य निरूपकत्वं प्रदेये संसर्गः, प्रकृत्यर्थस्य तत्राधेयत्वं संसर्गः, प्रदेयत्वं संबन्धित्वेनैव प्रत्ययार्थो न तु दधित्वाद्यात्मकविशेषरूपेण, अत एवेन्द्रं दधीत्यादि प्रयोगसंगतिः, आमिक्षापदेन विशेषाकाङ्क्षा पूर्यते, एवं चाग्नेयमित्यत्राग्निवृत्तिदेवतात्वनिरूपकमिति बोधः। नन्वेवं—

'तद्धितेन, चतुर्थ्या वा, मन्त्रवर्णेन वा पुनः।
देवतासंगतिस्तत्र दुर्बलं तु परं परम्॥' इति—

—मीमांसकोक्तदौर्बल्यानुपपत्तिरिति चेन्न, चतुर्थ्या वाक्याद्देवतात्वसंबन्धलाभः, पृथक्पदोपस्थितहवीरूपसंबन्धिनि तद्धिते तु समानपदश्रुत्यैवेति तद्धितस्य बलवत्त्वोपपत्तेः। अथवा प्रदेयमेव प्रत्ययार्थः, स्ववृत्तिदेवतात्वनिरूपकत्वसंबन्धेन प्रकृत्यर्थस्य प्रत्ययार्थेऽन्वयः, तावतैवेन्द्रादेर्देवतात्वलाभः, देवतात्वघटितसंबन्धेन बोध एवानुशासनतात्पर्यमिति नानुशासनविरोधः, देवतात्वबोधे एव हि तत्तात्पर्यं, न तु तत्प्रकारक एव। उक्तसंसर्गकबोधेऽपि देवतात्वविषयको भवत्येवेति भाव इत्याहुः। देवतात्वं च—दिवेरैश्वर्यकर्मणो देवतेति 'देवात्तल्' इति सूत्रभाष्यान्मन्त्रकरणकहविस्त्यागजन्यस्वर्गादिफलातिरिक्तफलाश्रयत्वम्, मन्त्रस्तुत्यत्वं च अनुक्रमणिकायामप्युक्तम्—यस्य वाक्यं स ऋषिर्या तेनोच्यते सा देवतेति, अत एवैन्द्रो मन्त्र ऐन्द्रं हविरिति द्विविधप्रयोगसिद्धिः। देवतानिष्ठं फलं चारयेदं फलं भवत्वितीच्छात्मकप्रतीतिरेव, क इदं कस्मा अदादित्यादिमन्त्रप्रयोज्यस्वामित्वभाजि प्रतिग्रहीतर्यतिप्रसङ्गनिवृत्तिफलकं 'मन्त्रकरणके'ति हविस्त्यागविशेषणम्। दर्शादिश्राद्धे मृतपत्नीनां देवतात्ववारणायोद्देश्यत्वप्रवेशः। न च तासां तत्तत्फलसंबन्धित्वमिति वाच्यं, 'न योषिद्भ्यः पृथग्दद्या'दित्यादिना तासां फलासंबन्धित्वबोधनात्, शूद्रकर्तृकश्राद्धादावपि नमस्काररूपमन्त्रसत्त्वान्न तदीयपित्रादीनां देवतात्वानुपपत्तिः, 'अनुमतोऽस्य नमस्कारो मन्त्र' इति गौतमस्मृतेरिति प्राहुरित्याद्यन्यत्र विस्तरः।

अभेदेनाप्यन्वय इति। भेदसंबन्धेनान्वयो न संभवति, तस्य बाधितत्वादिति सूचनायापिशब्दः। अथवा स्ववृत्तिदेवतात्वरूपधर्मवत्त्वसंबन्धेनान्वयनिरासायापिरुपात्तः॥ ५३॥

नन्वग्न्यादिदेवस्य प्रकृत्यैव लाभान्न तत्र शक्तिः कल्प्या । न च देवतात्वेन रूपेणोपस्थितये सा कल्प्यते । प्रकृतेर्लक्षणयैव तथोपस्थितिसम्भवात् । उपसर्गाणां द्योतकत्वनये—'प्रजयती'त्यत्र प्रकृष्टजयप्रत्ययवदित्यभिप्रेत्याह—

प्रदेय एव वा शक्तिः प्रकृतेस्त्वस्तु लक्षणा— ॥
देवतायां निरूढेति सर्वे पक्षा अमी स्थिताः ॥ ५४ ॥

नचै'न्द्रं दधी'त्यादौ द्रव्यस्य पदान्तराल्लाभात्कुतः पुनः प्रत्ययस्य तत्र शक्तिः कल्प्यत इति वाच्यं, पदान्तराश्रवणेपि तत्प्रतीतेः । 'ऐन्द्रं दधी'ति सामानाधिकरण्याच्च । अन्यथाख्यातस्यापि कर्तृकर्मवाचित्वं न

❀ दर्पणः ❀

द्योतकत्वनय इति । वाचकत्वनये प्रकर्षस्योपसर्गार्थत्वेन तद्विशिष्टे धातोर्लक्षणाया अकल्पनेन दृष्टान्तत्वासम्भवादिति भावः । **प्रकृष्टजयवदिति**—प्रकृत्यंशमात्रमादाय दृष्टान्तत्वं बोध्यम् । **लाभादिति ।** समभिव्याहृतदध्यादिपदेन देवतारूपसम्बन्धिलाभादित्यर्थः । **कुतः पुनरिति ।** 'अनन्यलभ्यो हि शब्दार्थ' इति न्यायात् । किन्तु सम्बन्धार्थकत्वमेवोचितमिति भावः । **तत्प्रतीतेरिति ।** देवतासम्बन्धिप्रतीतेरित्यर्थः । तथाच तदनुपपत्त्या तद्धितस्य तदर्थकत्वमावश्यकमिति भावः । पदान्तराश्रवणे सम्बन्धिप्रतीतेश्च शपथनिर्णेयत्वादाह—**ऐन्द्रं दधीति ।** सम्बन्धमात्रार्थकत्वे सामानाधिकरण्यानुपपत्तिरित्यर्थः । **अन्यथेति ।** उक्तानुपपत्तेस्तदसाधकत्वे इत्यर्थः । 'पचति देवदत्तः,' 'पच्यते

❀ काशिका ❀

लक्षणयैवेति । अग्न्यादिशब्दोऽग्न्यादिदेवतायां लाक्षणिक इत्यर्थः । **प्रदेये एवेति ।** 'एव'कारो देवताव्यावृत्तये । **निरूढेति ।** अनादितात्पर्यवती निरूढलक्षणेत्यर्थः । तेन सर्वदा देवतात्वरूपेण प्रतीतिनिर्वाहः । स्थिताः = मीमांसकादिग्रन्थेषु स्थिताः । **तत्र शक्तिरिति ।** तत्र = देये द्रव्ये । द्रव्ये शक्त्यभावेऽपि दध्यादिपदलभ्ये तस्मिन् प्रत्ययलभ्याया देवतायाः स्वनिष्ठदेवतात्वनिरूपकत्वादिसंबन्धेनान्वयाद्विशिष्टलाभसंभवः । तत्प्रतीतेः = द्रव्यप्रतीतेः । **सामानाधिकरण्याच्चेति ।** तथा चाभेदान्वयानुरोधात्तत्र प्रत्ययशक्तिरावश्यकीति भावः । उक्तसंबन्धेन देवताया अन्वयस्तु न युक्तो'नामार्थयो'रिति व्युत्पत्तिविरोधात्, न च देवताविशिष्टद्रव्ये प्रकृतेर्निरूढलक्षणैवास्तु, किं प्रदेये प्रत्ययशक्तिकल्पनयेति वाच्यम्, तथा सति प्रदेयस्य प्रकृत्यर्थविशेष्यत्वानापत्तेः, द्योत्यार्थस्य विशेषणत्वनियमात्, अन्यथौपगवादावपि प्रत्ययस्य द्योतकत्वापत्तेः । अन्यथा = सामानाधिकरण्यानुरोधात् प्रदेये शक्त्यनभ्युपगमे । **न सिध्येदिति ।** अस्य 'वैया-

स्यात्, मीमांसकानां पुनः प्रत्ययस्य देवतात्वमेवार्थोऽस्तु, द्रव्यं पदान्तरालभ्यत एवेति आख्यातस्य कर्तृवद्वाच्यत्वं मास्त्विति कुतो न शक्यते वक्तुमिति दिक् ।

※ दर्पणः ※

तण्डुल' इत्यत्र सामानाधिकरण्यानुपपत्तिर्हि कर्त्रादिवाचित्वसाधिकेति भावः । वैयाकरणान् प्रतीयमापत्तिः । मीमांसकान्कटाक्षीकृत्याह—**मीमांसकानामिति** । तन्मते तत्तद्देवताकत्वरूपप्रत्ययार्थेन धर्मिण आक्षेपाल्लाभेन सामानाधिकरण्योपपत्तेरिति भावः । 'पदान्तरा'दित्याक्षेपस्याप्युपलक्षणम् । **वाच्यं मास्त्विति** । आख्यातस्य कर्त्तेव तद्धितस्य द्रव्यं वाच्यं मास्त्वित्यर्थः । इष्टापत्तावा'मिक्षां देवतायुक्ता'मिति स्वसिद्धान्तभङ्ग इति भावः । ननु तेषां कर्तुरनन्यलभ्यत्वान्न प्रत्ययावाच्यत्वं, किन्तु प्राधान्यापत्तेरेव तत्त्वमत आह—**दिगिति** । तदर्थस्तु 'प्रकृतिप्रत्ययार्थयो'रिति न्यायस्य सङ्ख्यादौ व्यभिचारेण तेन प्राधान्यापत्त्यभावात् । 'भावप्रधानमाख्यात'मिति निरुक्तात्तस्याख्यातार्थातिरिक्तप्रत्ययार्थविषयकत्वोपगमाच्चेति । अत्रेदं बोध्यम्—तद्धितस्य देवतात्वाघटितार्थकत्वे 'तद्धितेन चतुर्थ्या चे'ति न्यायस्य सर्वसिद्धस्यानुपपत्तिः, नच तद्धितस्य तदर्थकत्वेऽपि कथं तदपेक्षया चतुर्थ्या [1]जघन्यत्वं, त्यागोद्देश्यकत्वरूपदेवताबोधकत्वस्योभयत्राविशिष्टत्वादिति वाच्यं, नहि देवतासम्बन्धि देयमात्रं तद्धितार्थः, किन्तु वेदबोध्यदेवतात्वघटितः, एवञ्च तद्धितान्तेन बोधस्य देवतात्वांशे वेदबोध्यत्वावगाहित्वेन तदंशेऽप्रामाण्यशङ्काया अनुदयाज्झटिति विनियोजकतया बलवत्त्वं, चतुर्थ्या तु तदंशे वेदबोध्यत्वावगाहिबोधस्यैव जननेन तत्राप्रामाण्यशङ्कानिरासार्थमुपायान्तरस्यापेक्षणाज्जघन्यत्वम् । यद्वा तद्धितेन देवतात्वेन रूपेण देवताबोधे, 'सास्य देवते'ति स्मरणमस्ति,

※ काशिका ※

करणमते' इत्यादिः । **देवतात्वमेवेति** । देवतायां शक्तिस्वीकारापेक्षयापि लाघवाद्देवतात्वे एव शक्तिकल्पनमेवोचितं, देवतात्वस्य स्वनिरूपकत्वसंबन्धेनान्वयो भविष्यतीति भावः । **कर्तृवद्वाच्यत्वमिति** । यथा मीमांसकनये आख्यातस्य कर्ता न वाच्योऽपि तु लाघवाद्भावनैव, आश्रयस्य पदान्तरेण लाभात्, कर्तृत्वविशिष्टबोधस्य तु भावनारूपकर्तृत्वस्य तत्रान्वयेनैव संभवात्, तथात्र प्रदेये पदान्तरलब्धे प्रत्ययार्थदेवतात्वस्यान्वयेनैव विशिष्टलाभसम्भवात् प्रत्ययस्य प्रदेये शक्तिर्न सिध्येत् । न चेष्टापत्तिः, 'आमिक्षां देवतायुक्ता'मित्यनेन प्रदेये तैः शक्तिबोधनात् । अत्र चेत् सामानाधिकरण्यानुरोधात् प्रदेये शक्तिकल्पनं, तर्हि आख्यातेऽपि कर्तृवाचकत्वं स्याद्देवदत्तः पचतीत्यत्र कर्तृदेवदत्तयोरनुभूयमानसामानाधिकरण्यानुरोधादिति—सिंहावलोकनन्यायेनेदं दूषणं द्रष्टव्यम् । नन्वग्न्यादिपदेन शक्त्यैवाग्न्यादिदेवताया लाभे किं लक्षणयेत्यत आह—**देवतात्वेति** ।

1 तद्धितापेक्षया चतुर्थ्या दुर्बलत्वं । परोपदेशाद्धि दुर्बलत्वं प्रत्यायितं तदेव कुत इत्याशयः ।

देवतायां = देवतात्वेन रूपेण। निरूढेति। अनुपपत्तिज्ञानापूर्वकत्वमनादिप्रयोगावच्छिन्नत्वं वा—तत्त्वमिति भावः ॥ ५४ ॥

क्रीडायां णस्तदस्यास्तीत्यादावेषैव दिक् स्मृता ॥
वस्तुतो वृत्तिरेवेति नात्रातीव प्रयत्यते ॥ ५५ ॥

'तदस्यां प्रहरणमिति क्रीडायां ण' इत्यत्र प्रहरणविशिष्टा क्रीडा, प्रहरणक्रीडे, क्रीडामात्रं वार्थः। आदिना,—'सोऽस्य निवासः', 'सास्मिन्

❀ दर्पणः ❀

चतुर्थ्यास्तु देवतात्वे न स्मरणम्। 'चतुर्थी सम्प्रदान' इति सम्प्रदान एव तत्स्मरणात्। सम्प्रदानत्वं च त्यज्यमानद्रव्योद्देश्यकत्वे सति प्रतिग्रहीतृत्वम्। एवञ्च ततः सम्प्रदानत्वघटकतया देवतात्वप्रतीतावपि तद्धितादिव मुख्यतया देवतात्वानधिगमात् तस्यास्तद्धितापेक्षया जघन्यत्वम्। एवं मन्त्रवर्णादधिष्ठानप्रतीतावपि देवतात्वस्य साक्षादप्रतीतेर्मन्त्रवर्णस्य चतुर्थ्यपेक्षया जघन्यत्वं बोध्यम्। तद्धितस्य देवतार्थकत्वानभ्युपगमे तु तदसङ्गतिः स्पष्टैवेति। नन्विन्द्रादिपदाच्छक्त्यैव देवतालाभे तत्र लक्षणाभ्युपगमो व्यर्थोऽत आह—**देवतात्वेन रूपेणेति**। तथा च 'शक्यादन्येन रूपेण ज्ञाते भवति लक्षणे'तिवृद्धोक्तेर्देवताया इन्द्रस्वरूपायाः शक्यत्वेपीन्द्राभिन्नदेवतात्वेन तज्ज्ञानार्थं सोचितैवेति भावः। अनुपपत्तिज्ञानपूर्विकायामपि तीरनिष्ठगङ्गापदलक्षणायां निरूढत्वव्यवहारादाह—**अनादीति**। एतत्तत्वमभिहितं प्राक् ॥५४॥

एकदेशान्वयप्रसङ्गमाह—**प्रहरणक्रीडेति**। व्युत्पत्तिवैचित्र्यादेकपदोपस्थितयोरपि तयोः परस्परमन्वय इति भावः। प्रहरणस्यापि प्रकृत्यैव लाभमभिप्रेत्याह—**क्रीडामात्रञ्चेति**। क्रीडारूपसम्बन्ध्येवेत्यर्थः। 'मात्र'पदेन तत्प्रहरणस्य तद्धितार्थत्वव्यवच्छेदः। तथा च दण्डाभिन्नप्रहारसाधनविशिष्टा क्रीडेति बोधः। **सोऽस्येति**। एतत्सूत्रविहितप्रत्ययस्य निवासः सम्बन्धी चार्थः। अत्र निवास-

❀ काशिका ❀

निरूढपदार्थमाह—अनुपपत्तीति। अन्वयानुपपत्तिज्ञानाभावेऽपि तात्पर्यानुपपत्तिज्ञानसंभवादसंगतिमाशङ्क्याह—अनादीति। लक्ष्ये योऽनादिप्रयोगस्तदवच्छिन्नत्वमित्यर्थः, प्रयोगस्यावच्छेदकत्वं च—कर्मतासंबन्धेन ॥ ५४ ॥

मूले एषैव दिगिति—एषैव रीतिरित्यर्थः। इत्यत्रेति। एतत्सूत्रानुशिष्टणप्रत्ययान्तदाण्डादिशब्दे। प्रहरणविशिष्टेति। अस्यार्थ इत्यत्रान्वयः। अर्थः = णप्रत्ययार्थः। तत्र प्रकृत्यर्थदण्डस्य प्रहरणविशिष्टक्रीडारूपणप्रत्ययार्थैकदेशप्रहरणेऽभेदेनान्वयः। एकदेशेऽन्वयमसहमानः खण्डशः प्रहरणे क्रीडायां च शक्तिमाह—प्रहरणक्रीडे इति। अत्र पक्षेऽभेदेन दण्डादि[illegible]तप्रहरणस्य क्रीडायामाश्रयत्वसंबन्धेनान्वयः। लाघवादाह—क्रीडामात्रमिति। 'मात्र'पदेन

पौर्णमासीति' 'तदस्यास्त्यस्मिन्निति मतु'बित्यादिकं संगृह्यते ।

❀ दर्पणः ❀

शब्दोधिकरणघञन्तः, । निशब्देन च वासे नैरन्तर्यरूपातिशयः प्रत्यायते, स च प्रकरणादिना तत्तत्कालघटितो ग्राह्यः । तथा च स्रुघ्नाभिन्नवासाधिकरणसम्बन्धीति बोधः । निवासश्च प्रत्यासत्त्या प्रत्ययार्थसम्बन्धिकर्तृक एव, अत एव कादाचित्क-स्रुघ्नावासकर्तरि न तथा प्रयोगः । सास्मिन्निति सूत्रविहितत्तद्धितस्य तु पौर्णमासीघटितत्वावच्छिन्नोर्थः, नक्षत्रयुक्तकालविहिताणाद्यन्तपौष्यादिशब्दानां पुष्याभिन्ननक्षत्रकर्मकशशिभोगाश्रयकालोर्थः, तस्योक्तार्थैकदेशपौर्णमास्यामभेदान्वयः, तथाच 'पौषो मास' इत्यादौ पुष्याभिन्ननक्षत्रकर्मकशशिभोगाश्रयकालाभिन्नपौर्णमासीघटितो मास इत्यादिबोधः । पौषादिपदं च न केवलयौगिकम्, पौषः पक्ष इति व्यवहारविरहात्, किन्तु रूढमपि, एतद्बोधनायैव सूत्रे संज्ञाग्रहणम्, रूढिनिरूपकतावच्छेदकं च न त्रिंशत्तिथिसमुदायत्वरूपमासत्वमात्रम्, यत्किञ्चित्तिथ्यवधिकत्रिंशत्तिथिसमुदाये मासादिव्यवहारेपि चान्द्रसौरपौषादिबहिर्भूतपौष्यादिघटितत्रिंशत्तिथ्यन्तर्गततिथिषु पौषादिव्यवहारविरहात्, किन्तु शुक्लप्रतिपदादिदर्शान्ततिथिसमुदायत्वमतो नोक्तदोष इत्याद्यन्यत्र विस्तरः ।

'तदस्यास्त्यस्मि'न्निति सूत्रेण प्रथमान्तादस्त्यर्थोपाधिकात्सम्बन्धिन्यधिकरणे च मत्वर्थीया विधीयन्ते । यद्यप्यस्येत्युक्तेः षष्ठ्यर्थसम्बन्ध एव मतुबादिविधानमाभाति, तथापि 'गोमांश्चैत्र' इति सामानाधिकरण्यानुरोधात्सम्बन्धिवाचकतैवेत्युक्तं प्राक् । एवञ्च 'गोमा'नित्यादौ गोनिरूपितस्वामित्वसम्बन्धवानित्याद्यन्वयबोधः ।

नच,—भूमनिन्दाप्रशंसासु नित्ययोगेतिशायने ।
सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः ।—

—इति सम्बन्धसमकक्षतया भूमाद्यर्थानामप्युपादानात्तेषामपि मतुबादिशक्यत्वमिति शङ्क्यं, स्यादेवं यदि तेष्वर्थेषु मतुबादीनां विधायकं सूत्रादिकमुपलभ्येत, किन्तु प्रयोगोपाधित्वमेव तेषामस्त्यर्थवत्, गवादिपदानां बहुत्वादिविशिष्टलाक्ष-

❀ काशिका ❀

प्रहरणव्यवच्छेदः । प्रकृत्यर्थदण्डादेः स्वनिष्ठप्रहरणत्वनिरूपकत्वसंबन्धेनान्वयः । अथवा दण्डपदस्य दण्डप्रहरणे निरूढलक्षणास्मिन् पक्षे बोध्या । परे तु—प्रहरणत्वं प्रत्ययार्थः, क्रीडा च, प्रहरणत्वे-प्रकृत्यर्थस्याधेयत्वं संसर्गः तस्य तु क्रीडायां निरूपकत्वमित्याहुः । अनेन संबन्धेनान्वये तात्पर्यग्राहकं सूत्रस्थं प्रहरणपदमिति तद्भावः । 'सोऽस्य निवास' इति । स्रुघ्नो निवासो = निवासाधिकरणं स्रुघ्नोऽस्य स्रौघ्नः । अत्रापि पूर्ववत् पक्षत्रयमुन्नेयम्, स्रुघ्नाभिन्ननिवासाधिकरणसंबन्धीत्याद्याकारो बोधः । सास्मिन् पौर्णमासीति । प्रथमान्तादस्मिन् पौर्णमासीत्यर्थे प्रत्ययो भवतीति तदर्थः ।

❀ दर्पणः ❀

णिकतयैव भूमादिप्रतीतिसौलभ्याच्च। अन्ये त्वस्तिशब्दान्मतुबर्थं तद्ग्रहणमित्याहुरित्यन्यत्र विस्तरः।

'इत्यादिक'मित्यादिपदात्,—'तस्यापत्यं', 'तेन रक्तं रागात्' 'संस्कृतं भक्षा' इत्यादिसंग्रहः। तत्र 'गार्गि'रित्यादौ तद्धितार्थापत्यस्य जन्यपुरुषरूपस्यैकदेशे जन्यत्वे प्रकृत्यर्थगर्गादेर्निरूपकतयान्वयाद् गर्गनिरूपितजन्यताश्रयः पुमानित्यादिबोधः। 'गार्ग्य' इत्यादौ तु जन्यपुरुषजन्यपुरुषाद्यात्मकगोत्रापत्यार्थैकदेशे जन्यत्वे प्रकृत्यर्थान्वयः। 'गार्ग्यायण' इत्यादौ तद्धितार्थयुवापत्यैकदेशे गोत्रप्रत्ययान्तार्थस्य निरूपकतयान्वयः। परन्तु 'जीवति तु वंश्ये युवे'ति परिभाषणाद् गर्गजीवनसमानकालिकत्वमपि प्रधानप्रत्ययार्थे विशेषणं, तस्यापि प्रत्ययशक्यत्वात्। एवञ्च,—गर्गजीवनसमानकालिको गर्गगोत्रापत्यनिरूपितजन्यतावान् पुमानिति बोधः। 'तेन रक्त'मिति विहितप्रत्ययस्य तत्सम्बन्धाधीनतदीयरूपारोपविषयोऽर्थः। तादृशारोपविषयत्वमेव 'तेन—रक्तत्व'म्। 'शङ्खः पीत' इत्यारोपमादाय शङ्खादेरारोप्यपीतिमाश्रयहरितालादिना रक्तत्ववारणायाऽधीनान्तमारोपविशेषणम्। माञ्जिष्ठपटादेश्चक्षुरादिना रक्तत्ववारणाय तदीयत्वं रूपविशेषणम्। अत्र च रागकरणस्य मञ्जिष्ठादेः प्रकृत्यर्थस्य तद्धितार्थैकदेशसम्बन्धे प्रतियोगितया रूपे चाधेयतयान्वयः। तथाच मञ्जिष्ठासम्बन्धाधीनो यो मञ्जिष्ठानिष्ठरूपारोपस्तद्विषयताश्रय इति 'माञ्जिष्ठ' इत्यतो बोधः।

❀ काशिका ❀

इतिशब्दः—संज्ञायां यथा स्यादित्येतदर्थः, प्रकृतिप्रत्ययसमुदायश्चेत् संज्ञारूढस्तदेति यावत्। 'चैत्रो मास' इत्याद्युदाहरणम्।

प्रसङ्गात् कतिपयानुक्ततद्धितार्थो निरूप्यते। चैत्र्यादिशब्दो 'नक्षत्रेण युक्तः कालः' इति सूत्रविहिताणन्तप्रकृतिकङीबन्तः, तत्र चित्रादिशब्दः स्वार्थतत्तन्नक्षत्रयुक्तचन्द्रपरः, अन्यथा सर्वेषां नक्षत्राणां सर्वदा सत्त्वेन सर्वदैवाद्य चैत्रमहरित्यादिप्रयोगापत्तेः। अत्र युक्त एव प्रत्ययार्थः न तु कालोऽपि, लाघवेन वस्तुतस एव तस्य प्रत्ययोत्पत्तिनिमित्तत्वौचित्यात्, अहरादिपदेन तल्लाभसंभवाच्च। तथा च चित्रायुक्तचन्द्रयुक्तेति चैत्र्यादिशब्दजबोधः, चैत्रादिशब्दोत्तरतद्धितस्य पूर्णिमाधिकरणादिप्रत्ययार्थः, अत्रापि पूर्ववत् पक्षत्रयमुन्नेयम्, तादृशपौर्णमास्यधिकरणमिति बोधः। तत्तत्पौर्णमास्यां चित्रादियोगानियमेऽपि—'चैत्री पौर्णमासी'त्यादौ तत्तन्नक्षत्रयोगयोग्यतैव विवक्षिता। तत्तन्नक्षत्रयोगाभावेऽपि 'चैत्री' पौर्णमासी'त्यादिप्रयोगात्, 'चैत्रो' 'वैशाख' इत्यादिप्रयोगाच्च। योग्यता च स्वस्वसमीपनक्षत्रान्यतरयुक्तत्वरूपा, चैत्रादिश्रावणान्तानां मासानां चित्रादिद्वन्द्वमध्ये कस्यचिद्योगस्तथाविधव्यवहारे प्रयोजकः, भाद्रपदाश्वयुजोस्तु शतभिषग्रेवत्यादि-

वृत्तिमात्रेतिरिक्तशक्तेः,—'समर्थः पदविधि'रिति सूत्राल्लाभादुक्तो विचारः शास्त्रान्तरीयैः सह तद्रीत्यैवोक्तः, आरोपितप्रकृतिप्रत्ययार्थमादाय वा। वस्तुतो विशिष्टशक्त्यैवार्थोपस्थितिरित्याह—वस्तुत इति ॥५५॥

❀ इति देवताप्रत्ययार्थनिर्णयः ॥१०॥ ❀

❀ दर्पणः ❀

'शूल्यम्', 'उख्य'मित्यादौ 'संस्कृतं भक्षा' इति सूत्रविहिततद्धितार्थैकदेशे पाकादिसंस्कारे शूलोखादेः प्रकृत्यर्थस्याधिकरणत्वेनान्वयः। अनयैव रीत्या-तद्धितान्तराद्बोध ऊहनीयः। तद्धितानां क्वचित्प्रकृत्यर्थे स्वार्थैकदेशस्य, क्वचित्स्वार्थस्यैवान्वयबोधकत्वादिति जहत्स्वार्थवृत्तिपक्षमवलम्ब्य मूलमवतारयति—**वृत्तिमात्र** इति। तथाच तत्पक्षे पदानामानर्थक्यात्तदर्थनिरूपणे सिद्धान्तप्रच्युतिरिति भावः। **तद्रीत्यैवेति**। शास्त्रान्तरीयरीत्यैवेत्यर्थः। ननु वैयाकरणमते जहत्स्वार्थवृत्त्याश्रयणे 'न पूजनात्,' 'तेन रक्तं रागा'दित्यादिसूत्राणां का गतिरत आह—**आरोपितेति**। **विशिष्टशक्त्यैवेति**। 'विशिष्टार्थस्ये'ति शेषः। वृत्तौ पक्षद्वयाभ्युपगमेन जहत्स्वार्थपक्षे तद्घटकपदार्थनिरूपणस्यानुपयोगेऽप्यजहत्स्वार्थपक्षे विशिष्टशक्तिग्रहस्य प्रत्येकशक्तिनिरूपणोपजीवकतया तन्निरूपणस्यौचित्यमेव। एतत्सूचनायैव मूले'ऽतीवे'त्युपात्तमिति रहस्यम् ॥ ५५ ॥

❀ इति देवताप्रत्ययार्थनिरूपणम् ॥ १० ॥ ❀

❀ काशिका ❀

त्रिकान्यतमयोगः, कार्तिकादिमाघान्तानां कृत्तिकादिद्वन्द्वान्यतरयोगः, फाल्गुनस्य तु पूर्वाफाल्गुन्यादित्रयान्यतमयोग इति विवेकः। तथा चोक्तं संकर्षणकाण्डे—

'द्वन्द्वैश्चित्रादितारणां परिपूर्णेन्दुसंगमे।
मासाश्चैत्रादयो ज्ञेयास्त्रिकैः पष्ठ्यन्तसप्तमाः ॥' इति

अन्यत्रापि—'अन्त्योपान्त्यौ त्रिभौ[1] ज्ञेयौ फाल्गुनश्च त्रिभो मतः।
शेषा मासा द्विभा ज्ञेयाः कृत्तिकादिव्यवस्थया ॥' इति ॥

अन्त्योपान्त्यौ = भाद्रपदाश्वयुजौ। चैत्रादिपदस्य शुक्लप्रतिपदादिदर्शान्तसमुदाये रूढिः स्वीक्रियतेऽतो न यत्किंचित्तिथिप्रभृतिकत्रिंशद्दिनसमुदाये चैत्रपौर्णिमासीघटिते चैत्रादिपदप्रयोगातिप्रसङ्गः। कृष्णप्रतिपदादिपौर्णमास्यन्तसमुदाये तु न रूढिः, तत्र प्रचुरप्रसिद्ध्यभावात्, पौर्णमासीघटितमासस्य चान्द्रत्वेन तस्य च 'चान्द्रः शुक्लादिदर्शान्तः' इत्यादिस्मृतिभ्यः शिष्टाचारबाहुल्याच्च शुक्लादिदर्शान्तस्यैव ग्रहीतुमुचितत्वात्। कृष्णप्रतिपदादिपूर्णिमान्ते तु लाक्षणिको व्यवहार इत्याहुः।

---

१ भं = नक्षत्रम्।

माधवाचार्यास्तु—चान्द्रस्य श्रुतिस्मृतिलिङ्गदर्शनाद् दर्शान्तत्वपूर्णिमान्तत्वयोः समो विकल्पः, आथर्वणिकाः—सृष्टिप्रकरणे संवत्सरदक्षिणोत्तरायणसृष्टिमाम्नायमासपक्षसृष्टिमेवामनन्ति। मासो वै प्रजापतिः, तस्य कृष्णपक्ष एव रतिः, शुक्लः प्राण इति। तत्र कृष्णपक्षस्य प्रथमपाठो मासस्य कृष्णप्रतिपदादित्वे लिङ्गम्।

'मासि भाद्रपदेऽष्टम्यां कृष्णपक्षेऽर्द्धरात्रके।
भवेत् प्रजापतेर्ऋक्षं जयन्ती नाम सा स्मृता' ॥ इति ॥

—जयन्तीप्रकरणस्था स्मृतिरपि लिङ्गम्। 'अश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्याद्दिने दिने' इति स्मृति-रपि महालयप्रकरणस्था शुक्लप्रतिपदादित्वे लिङ्गम्। अन्यथा तस्य पक्षस्य भाद्रपदान्तर्गतत्वे-नाश्वयुक्संबन्धित्वाभावेनासंगत्यापत्तेः, शिष्टाचारविशेषोऽपि लिङ्गं, यतिधर्मप्रकरणे'—ऋतुसन्धिषु वापयन्ति' इति स्मर्यते। परं तु यतयः पूर्णिमायामेव वापयन्ति, न दर्शे, अन्यथा तत्रैव वपनं कुर्युः, अनुष्ठाने तत्तद्वचनविशेषाच्छिष्टाचाराच्च व्यवस्थेत्याहुः। एतन्मते दर्शान्ते पूर्णिमान्ते च चैत्रादिशब्दरूढिरिति लभ्यते इत्यलमतिविस्तरेण।

गोमानित्यादौ 'तदस्यास्त्यस्मिन्निति मतु'बिति मतुप्। तत्र संबन्धी संबन्ध आश्रयं चेत्युभयं वा प्रत्ययार्थः, अत्रास्तीति वर्तमानकालो विवक्षितः, अन्यथा गवामतीतत्वे भावित्वे वा मतुबन्तस्य साधुत्वापत्तेः, वर्तमानसत्तावत्स्वार्थपरो गवादिशब्दः, एवं च वर्तमानसत्ता-वद्गोसंबन्धीति बोधः। 'गोमानसी'त्यादौ तु गोमत्पदस्य तत्पदव्यवहारविषये लक्षणेति नानुपपत्तिरिति कैयटादिग्रन्थेषु स्थितम्। पाणिनिना प्रोक्तं—**पाणिनीयम्**। अत्र प्रोक्तत्वं नाध्या-पनेन प्रकाशितत्वम्, सुशर्मणाध्यापिते काठके—सौशर्मणमिति प्रयोगापत्तेः, नापि कृतत्वं—'कृते ग्रन्थे' इत्यनेनैव सिद्धावेतस्य वैयर्थ्यापत्तेः।

ननु वेदस्य नित्यत्वेन तत्र कृतत्वाभावेन तैत्तिरीयं काठकमित्यादिप्रयोगानुपपत्तिरिति चेन्न, 'यद्यप्यर्थो नित्यो—या त्वसौ वर्णानुपूर्वी साऽनित्या' इति भाष्ये एव समाधानात्। प्रलयेपूच्चार-यितृपुरुषाभावादानुपूर्वीविनाशेन पुनरुत्पद्य ऋषयः संस्कारातिशयाद्वेदार्थं स्मृत्वा शब्दरचनां विदधति, अर्थाभेदेऽपि आनुपूर्वीभेदनिबन्धन एव केषुचित् काठकादिव्यवहारस्ततश्च 'कठादयो वेदानुपूर्व्याः कर्तारः प्रवक्तारश्च' इति कैयटोक्तेश्चेति चेन्न, प्रोक्तत्वं = प्रथमप्रकाशितत्वं, तच्च स्वकृतपरकृतसाधारणम्, एवं च माथुरेण प्रथमप्रकाशितायां तेनाकृतायां वृत्तौ माथु[थु ?]रीति प्रयोगोपपत्तये 'तेन प्रोक्तम्' इत्यस्यावश्यकत्वात्। सुशर्मणा काठकन्तु न प्रथमं प्रकाशितमिति नातिप्रसङ्गः। 'तेन प्रोक्तम्' इति सूत्रभाष्ये एव स्पष्टम्, भाष्ये वर्णाऽनुपूर्वीत्यत्र वर्णः शब्दपरस्तेन पदानामभेद इति सूचितम्। तथा च स्मृतिः—

'प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते'। इति।
'स्वयंभूरेष भगवान् वेदो गीतस्त्वया पुरा।
शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः ॥

❀ काशिका ❀

युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवा ॥' इति—

—स्मृतिद्वयं त्वर्थानित्यत्वादुपपन्नमित्यन्यत्र विस्तरः । पञ्चानां पूरणः पञ्चमः,—अत्र 'तस्य पूरणे डट्' इति डट्, तस्य 'नान्तादसंख्यादेः–' इति मडागमः, स्वनिष्ठपञ्चत्वसंख्यापूरणत्वं संबन्धः—प्रकृत्यर्थस्य प्रत्ययार्थे, स्वनिष्ठपञ्चत्वसंख्यापूरण इति बोधः, पूरणत्वं स्वाश्रिततत्तत्संख्यापूर्तिनिमित्तत्वम्, द्वितीयादौ तृतीयादिव्यवहारापत्तिस्तु न—तस्येष्टत्वात्, अत एव 'समर्थः पदविधिः' इत्यध्यायस्याष्टम इति व्यवहारः कृतः, बुद्धिस्थावधिसापेक्षोऽयं व्यवहार इति नातिप्रसङ्गः । **यथा हरिस्तथा हरः** । अत्र 'प्रकारवचने थाल्' इति थाल्प्रत्ययः प्रकारवदर्थकः, सामानाधिकरण्यानुरोधाद्वचनग्रहणाच्च । जातीयरादेस्थाला बाधस्तु न, 'तथाजातीयकः' इति भाष्यप्रयोगात् । प्रकारश्च प्रकृते सामान्यस्य भेदको विशेषः, एवं च यद्विशेषधर्मवान् हरिस्तद्विशेषधर्मवान् हर इति बोधः, यत्तद्भ्यां धर्मयोरैक्यावगतौ हरिसादृश्यं हरे पर्यवस्यति । ननु सादृश्यमेव तदर्थोऽस्तु, एवं च यत्सदृशो हरिस्तत्सदृशो हर इत्यनुभवसिद्धः—सादृश्यप्रकारकः शाब्दबोध उपपद्यत इति चेन्न, 'अन्यथेतरथे'त्यादौ तदप्रतीतेः । 'गुडकल्पा द्राक्षा' 'बहुगुडो द्राक्षा' इत्यत्र 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' 'विभाषा सुपो बहुच् पुरस्तात्तु' इति सूत्राभ्यामीषदसमाप्तिविशिष्टार्थकादेते प्रत्यया भवन्ति, बहुच् एतादृशसुबन्तात् पुरस्ताद्विभाषा भवतीत्यर्थकाभ्यां कल्पब्बहुचौ स्तः, विभाषाग्रहणं तिङन्ते सावकाशानां कल्पबादीनां प्रवृत्त्यर्थम्, गुडपदं–गुडसदृशपरम्, प्रत्ययस्तु द्योतकः, अत एव 'गुडकल्पा द्राक्षे'ति स्त्रीलिङ्गं 'बहुगुडो द्राक्षे'त्यत्र पुंलिङ्गं च निर्वहति । स्वार्थिकानां प्रकृतिलिङ्गवचनातिक्रमानतिक्रमयोः स्वभावसिद्धत्वात्, सादृश्यस्य प्रत्ययार्थत्वे तु 'बहुगुडो द्राक्षे'त्यत्र विशेष्यगतस्त्रीलिङ्गापत्तिः, अत्रेषदसमाप्तत्वं—सादृश्यप्रयोजकं माधुर्यादि प्रतीयते, तेनेषत्सादृश्ये प्रत्ययानुत्पत्तिः, गुडसदृशी द्राक्षेति बोधः, उपमा गम्यते ।

परे तु–सादृश्याद् द्राक्षायां गुडत्वारोपाद्गुडत्वजात्यभावाच्चेषदसमाप्तं गुडत्वं द्राक्षायामिति 'गुड इयं द्राक्षा' 'गुडकल्पा द्राक्षे'ति प्रयोगः । एवं च गुडत्वप्रकारक एव बोध इत्याहुः । मञ्जूषाकृन्मते तु–उपमानगुडाभिन्ना द्राक्षेति बोधः । अन्ये तु–सादृश्यरूपेषदसमाप्तिः प्रत्ययार्थः, गुणगुणिनोरारोपिताभेदाच्च द्राक्षादिनाऽभेदान्वयोपपत्तिः, अथवा सादृश्यवान् प्रत्ययार्थः, सादृश्याश्रयौ वा तदर्थौ, बहुगुडो द्राक्षेति प्रयोगानुपपत्तिस्तु न, विभाषासूत्रे पुरस्तादित्यस्यावृत्त्यावधारणार्थकतुशब्देन पुरस्तादेव सर्वं भवतीति व्याख्यानेन 'प्रत्ययोत्पत्तेः प्राग्दृष्टे ये लिङ्गसंख्ये ते एव स्तः, प्रयोगश्च प्राक् प्रकृते'रित्यर्थाङ्गीकारेणादोषात् । अत एव सूत्रस्थस्तुशब्दश्चरितार्थः, प्रकृतेः पुरस्तादेव बहुजित्यवधारणसंपादनेन प्रत्ययपरत्ववारणार्थस्तु न सः, अपवादकतयैव तत्सिद्धेः, न च 'पुरस्ता' दित्यत्र विभाषापदसंबन्धात् पूर्वत्वविकल्पे सति परत्वमपि स्यात् तन्निवृत्तयेऽवधारणार्थस्तुशब्द इति वाच्यम्, 'उदश्वितोऽन्यतरस्याम्' इत्यत्र परत्वमिवात्र पूर्वत्वं न विकल्प्यते, गुणानां च

❀ काशिका ❀

परार्थत्वादिति न्यायात्, किं तु प्राधान्यात्, प्रत्यय एव विकल्प्यत इति भाष्ये एवोक्तत्वादित्याहुः। पाचकक इत्यादौ—'कुत्सिते' इति सूत्रेण कुत्साविशिष्टार्थकात् पाचकशब्दात् कन्, कुत्सितपाकत्ववानिति बोधः, प्रवृत्तिनिमित्तकुत्साया असंभवे तु—अश्वक इत्यादौ तत्सहचरितधर्मान्तरगतकुत्सानिमित्तकः प्रत्ययः, 'कुत्सितक' इत्यादौ कुत्सितत्वकुत्सानिमित्तकः प्रत्ययः, अस्य कुत्सितत्वं न सम्यक्, कि तु शत्रुभिर्द्वेषेणारोपितमिति तस्य कुत्सा, अथवा नियमेन कुत्सासंबन्धप्रतीत्यर्थं प्रवृत्तिनिमित्तकुत्सायामेव प्रत्ययः, किं च स्वार्थे पूर्णस्यैव कुत्सनादियोगात् सुबन्तादेव कन् इति सुबन्तेन प्रतिपादितार्थस्वार्थद्रव्यलिङ्गादिगता कुत्सा कना प्रत्याय्यते, तत्र—'पण्डितक' इत्यत्र प्रवृत्तिनिमित्तकुत्सा। 'शुक्लकं रूप'मित्यत्र द्रव्यकुत्सा, 'पश्य गाण्डीवधन्वानं विद्धि कौरवकान् स्त्रिय' इत्यत्र लिङ्गकुत्सा। 'पुत्रकः शत'मत्रैकत्वसंख्याकुत्सा, शतमरणे यद्दुःखं तदेकस्यैव मरणे इति प्रतीतेरिति दिक्। अश्व इव अश्वकोऽयम्, 'इवे प्रतिकृतौ' इति कन्, अश्वसदृशाभिन्नोऽयम्, उपमानाश्वाभिन्नोऽयमिति वा बोधः, अन्ये उपमानाश्व इति प्रत्ययान्ताद्बोधः, तस्येदंपदार्थोपमेयेन सादृश्यमूलकारोपिताभेदेनान्वयः' पूज्यप्रतिमाचित्रपटध्वजप्रतिमासु शिवाद्यभेदबुद्धिरेव न त्विवार्थप्रतीतिरिति न कन्। स्पष्टं चेदं रसनिरूपणे काव्यप्रकाशे—तत्र हि—'रामोऽयमिति बुद्ध्या गृहीते नटे' इत्याद्युक्तम्, काकतालीयं—कान्तामेलनादिकम्, अत्र काक इव तालमिवेति विग्रहे 'समासाच्च—' इति च्छः। तत्र पूर्वपदमुपमानकाकागमनपरमुत्तरपदं तूक्तपूर्वपदार्थसमानाधिकरणोपमानतालपतनपरम्, उत्तरपदार्थे पूर्वपदार्थस्य नान्तर्भावः, सामानाधिकरण्यं पूर्वपदार्थप्रतियोगिकमिति बोधनाय परं तथोक्तिरतो न नैराकाङ्क्ष्यं। काकागमनरूपपूर्वपदार्थस्योत्तरपदार्थैकदेशसामानाधिकरण्ये अन्ये सामानाधिकरण्यवत्तिसंबन्धो धर्मिणि वा। अत एव सामर्थ्यसत्त्वात् समासोपपत्तिः, उत्तरपदमपि स्वार्थसमवेतपतनादिमात्रपरं, न तु समानाधिकरणस्यापि तदर्थेऽन्तर्भावः, पूर्वपदोत्तरपदार्थयोः सामानाधिकरण्यरूपसंबन्धसंभवात् सामर्थ्योपपत्तेरिति तु न युक्तम्, सामानाधिकरण्यस्य संबन्धत्वाभावात्। अत एव 'चैत्रस्य भ्राते'त्यादौ षष्ठ्यर्थसंबन्धो न संभवति, एकोदरशायित्वस्य तथात्वे पान्थयोरेकदेशे रात्राबुषितयोरपि संबन्धः स्यात्, तथा च तत्रापि 'यज्ञदत्तस्य देवदत्त' इति प्रयोगः स्यादित्याशङ्क्य काल्पनिकोऽवयवावयविभावः षष्ठ्यर्थ इति समाहितम् 'अनेकमन्यपदार्थे' इति सूत्रे भाष्यकैयटयोः। पान्थयोस्तु न तादृशसंबन्धकल्पना, तादृशप्रयोगाभावात्, एतेनात एव ज्ञापकादसामर्थ्येऽपि समास इति निरस्तम्। उक्तरीत्या सामर्थ्यसंभवात्। काकतालमिति समुदाय उपमेयपरः, एवं चोपमानकाकागमनसमानाधिकरणोपमानतालपतनाभिन्नं कान्तागमनसमानाधिकरणो देवदत्तसमागम इति समासजन्यो बोधः। विशिष्टयोरुपमेयोपमानभावबोधे विशेषणयोर्विशेष्ययोश्च स पर्यवस्यति, तत्तदुपमेयवाचकसमभिव्याहारो नियामकः, ततस्तद्धिते सति समासार्थस्तदुपमानं काकागमनसमानाधिकरणतालनिपतनं तत्प्रयोज्योपमानभूतकाककर्तृकदलिततालफलोपभोगाभिन्नः समासार्थो, यदुपमेयं कान्तागमनसमानाधिकरणदेवदत्त-

※ अभेदैकत्वसङ्ख्यानिर्णयः ※



वृत्तिप्रसङ्गात्—'तत्राभेदैकत्वसङ्ख्या प्रतीयत' इति सिद्धान्तं दृष्टान्तेनोपपादयति—

अभेदैकत्वसङ्ख्याया वृत्तौ भानमिति स्थितिः ॥
कपिञ्जलालम्भवाक्ये त्रित्वं न्यायाद्यथोच्यते ॥५६॥

※ दर्पणः ※

ननु सुबन्ते प्रकृतिपदिकघटकप्रत्ययार्थनिरूपणेभेदैकत्वसङ्ख्यानिरूपणमसङ्गमत आह---वृत्तिप्रसङ्गादिति । तथाच वृत्तिनिरूपणे क्रियमाणे स्मृतिपथप्राप्तत-द्धर्मोपेक्षानुचितेति प्रसङ्गसङ्गतिसत्त्वान्नोक्तदोष इति भावः । यद्यपि वक्ष्यमाण-त्त्वाद्यन्तेपि कृद्वृत्तिसत्त्वात्तदन्तरमेव सङ्ख्या निरूपयितुमुचिता, तथापि तत्प्र-

※ काशिका ※

-समागमरूपं तत्प्रयोज्यो देवदत्तकर्तृकः कान्तासंभोग इति बोधः । उभयत्राप्युपमानोपमेययोः सादृश्यमूलकोऽभेदोऽध्यवसितः, 'घनश्याम' इत्यत्र यथा घनश्यामपदार्थश्रीकृष्णयोः प्रयोज्यप्रयोजक-भावः समुदायशक्तिगम्यः । अन्ये तु—पूर्वपदं काकागमनसदृशलाक्षणिकम्, उत्तरपदं च काका-गमनसमानाधिकरणतालपतनसदृशलाक्षणिकम्, लक्ष्यार्थयोश्च सामानाधिकरण्यं संबन्धः, पूर्वपद-मेव वा काकागमनसदृशसमानाधिकरणलक्षणिकम्, एवं च तयोरभेद एव संबन्धः, काकागमन-सदृशसमानाधिकरणं काकागमनसमानाधिकरणतालपतनसदृशमिति समासजन्यो बोधः, तत इवार्थे छः, छप्रत्ययान्तवृत्तिविषये काकतालशब्दस्य काकतालसमागमप्रयोज्ये निरूढलक्षणा, प्रयोज्यं च क्वचित् काककृततालफलोपभोगरूपं, क्वचित्तालकृतकाकवधरूपमुपमेयवाचकतरसमभिव्याहारवशा-द्बुध्यते प्रयोज्यस्य सादृश्ये प्रतियोगित्वेनान्वयः, काकतालसमागमप्रयोज्यसदृशो देवदत्तकर्तृकः कान्तासंभोग इतिबोधः, उपमानोपमेयभावश्चाकस्मादुपनतत्वेनोपमेयवाचकतत्तत्पदसमभिव्याहारेण, उपमानतावच्छेदकतादृशकाककृततालफलोपभोगतादृशवधत्वादिरूपेणावोधाच्छप्रत्ययोपमायामुपमान-लोपमालंकारिकाःस्वीकुर्वन्ति, वाच्यलक्षणानङ्गीकारे तु तालशब्दस्यैवोक्तप्रयोज्ये निरूढलक्षणेतरत् पूर्ववदित्याहुः । एवमन्यत्राप्यूह्यम् । विस्तरस्तु मञ्जूषादितोऽनुसंधेय इत्यलं विस्तरेण ।

'समर्थः पदविधिरिति सूत्रादिति । तत्संबन्ध्यपत्यमित्यर्थे प्रत्यय इति तस्यापत्यमि-त्यादेरर्थाद् 'वस्त्रमुपगोरपत्यं चैत्रस्ये'त्यर्थविवक्षायामुपगुशब्दात् प्रत्ययप्राप्तावपि 'ऋद्धस्यौपगवो' 'वज्रधर ऐन्द्र' इत्यादिप्रयोगवारणाय समर्थपरिभाषोपस्थितिस्तद्धितेऽप्यावश्यकीति भावः । विशिष्टशक्त्यैवेति तत्तत्प्रकृत्यर्थतत्संबन्धविशिष्टे समुदायशक्त्यैवेत्यर्थः ॥

* इति तद्धितप्रत्ययार्थनिर्णयः *

सङ्ख्याविशेषाणामविभागेन सत्त्वम्—अभेदैकत्वसङ्ख्या। उक्तञ्च वाक्यपदीये—

यथौषधिरसाः सर्वे मधुन्याहितशक्तयः।
अविभागेन वर्त्तन्ते सङ्ख्यां तां तादृशीं विदुः ॥' इति।

परित्यक्तविशेषं वा सङ्ख्यासामान्यं तत्। उक्तञ्च—

भेदानां वा परित्यागात्सङ्ख्यात्मा स तथाविधः।
व्यापाराज्जातिभागस्य भेदापोहेन वर्त्तते ॥

❀ दर्पणः ❀

कृत्यर्थे सङ्ख्याया अभानादाकाङ्क्षाविच्छेदः स्यादित्यत्रैव तन्निरूपितमिति बोध्यम्। अभेदैकत्वसङ्ख्यापदार्थं मतभेदेन द्विधा निर्वक्ति—**सङ्ख्याविशेषाणामिति**। एकत्वत्वाद्यवच्छिन्नानामित्यर्थः। अविभागेन = अभेदेन, अविरोधेनेति यावत्।

उक्तार्थे हरिवाक्यं प्रमाणयति—**उक्तञ्चेति**। आहितशक्तयः,—आहिता=समर्पिता तत्तदोषविभेदनिबन्धनविरोधरूपा शक्तिर्यैरित्यर्थः। त्यक्तविरोधा इति यावत्। अत एव—अविभागेन=अविरोधेनेत्यर्थः। ताम् = अभेदैकत्वसङ्ख्यां, तादृशीं=मधुनिष्ठरसस्थितितुल्यामित्यर्थः। नन्वेकत्वद्वित्वादीनामेकत्र सत्त्वमनुपपन्नं, न हि द्वावेकत्वेन व्यवह्रियेते, नाप्येको द्वाविति। 'न हि द्विपुत्र' इति भाष्यात्। किञ्च दृष्टान्तोऽपि न समञ्जसः, तत्तद्रसवदारब्धेवयविनि माक्षिकेवयवसजातीयरसान्तरस्यैवोत्पादाभ्युपगमादतआह—**परित्यक्तेति**। वाशब्दः पक्षान्तरे। अगृहीतविशेषधर्मकं संख्यामात्रमित्यर्थः। पूर्वकल्पे उक्तास्वरसाभिसन्धिकं वाक्यपदीयं तत्पक्षेपि प्रमाणत्वेनोपन्यस्यति—**भेदानामिति**। भेदानाम्=एकत्वत्वद्वित्वत्वादिविशेषधर्माणां, परित्यागाद्=अग्रहात्। इदञ्च व्यापारपदार्थेऽभेदेनान्वयि। संख्यात्मा = संख्यास्वरूपः। सः = एकत्वादिः। तथाविधः = अभेदैकत्वव्यपदेश्य इत्यर्थः। तदेव विशदयति—**जातिभागस्येति**। एकत्वत्वादेरित्यर्थः। **भेदापोहेनेति**। भेदस्य=

❀ काशिका ❀

अविभागेनेति। संख्यात्वेन रूपेण सर्वसंख्याभानमित्यर्थः। **परित्यक्तविशेषमिति**। अस्मिन् पक्षे संख्यात्वेन संख्यासामान्यस्यैव भानं न विशेषस्येति पूर्वस्माद्विशेषः। यद्यपि विशेषानालिङ्गितसामान्यासत्त्वादिदमसंभवि, तथापि 'वन्ध्यासुतो' 'राहोः शिर' इतिवद्विकल्पात्मकस्य संभवान्न दोषः। तदुक्तम्—

'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दःकरोति हि' इति।

मतद्वयेऽपि 'राजपुरुष' इत्यत्र संख्यावद्राजसंबन्धीति बोधः। जातिभागस्य = संख्यात्वस्य। व्यापारस्तेनैव रूपेण भानम्। भेदापोहेन = भेदरूपो योऽपोहोऽतद्व्यावृत्तिस्तेन वर्तते = तेन

अगृहीतविशेषेण यथा रूपेण रूपवान् ।
प्रख्यायते न शुक्लादिर्भेदापोहस्तु गम्यते' ॥ इति ।

अस्याः—वृत्तौ = समासादौ भानं 'न्यायसिद्ध'मिति शेषः । इति मतस्थितिः—वैयाकरणानाम् । अयं भावः—'राजपुरुष' इत्यादौ राज्ञो, राज्ञोः,—राज्ञां,—वायं पुरुष इति जिज्ञासा जायते, विशेषजिज्ञासा च सामान्यज्ञानपूर्विकेति सामान्यरूपेण तत्प्रतीतिः शब्दादावश्यकी, अत-

❀ दर्पणः ❀

विशेषणस्य योऽपोहोऽग्रहस्तेनेत्यर्थः । यद्वा—'भेदापोहेने'त्यस्य 'व्यापारा'दित्यनेनान्वयः, प्रकृत्यादित्वात्तृतीया । तथाचैकत्वत्वादेर्जातिविशेषस्य भेदाग्रहरूपो यो व्यापारो विशेषणात्मा ततो वर्त्तत इत्यर्थः । 'भेदाऽपोहो न वर्त्तते' 'निवर्त्तते' इति वा पाठे तु—भेदरूपो योऽपोहोऽतद्व्यावृत्तत्वं, स न वर्त्तते = न भासत इत्यर्थोऽवसेयः । पद्यान्तरावलोकनेनैतत्पाठस्यैव हरिसम्मतत्वमध्यवसीयते । द्वित्वत्वाद्यग्रहकालिकसङ्ख्यात्वप्रकारकप्रतीतिगोचरः सङ्ख्यापदार्थोऽभेदैकत्वपदव्यपदेश्यो भवतीतिसमुदितार्थः । तत्र दृष्टान्तमाह—**अगृहीतविशेषेणेति** । शुक्लत्वादिप्रकारकग्रहासमानकालिकरूपत्वप्रकारकप्रतीतिविषयेण शुक्लादिनैव यथा घटादी रूपवानिति प्रतीयते, शुक्लादेर्यो भेदरूपोऽपोहः = शुक्लत्वादिरतद्व्यावृत्तिरूपः, स तु न प्रतीयते, तद्वद्राजपुरुष इत्यादौ राजादिपदार्थः सङ्ख्यावानिति प्रतीयते, न तत्र संख्यांशो एकत्वादि भासत इत्यर्थः । तादृशसङ्ख्याभानस्य परानभ्युपेतत्वात्कथमियं स्थितिरित्यन्तरा शेषपूरणेन व्याचष्टे—**वैयाकरणानामिति** । ननु तादृशसंख्याया वृत्तौ भाने किं प्रमाणमत आह—**अयं भाव इति** । **सामान्यज्ञानपूर्विकेति** । तद्धेतुकेत्यर्थः । **आवश्यकीति** । तां विनोक्तजिज्ञासाया अभावादिति भावः । सा च संख्या—पूर्वोत्तरपदार्थयोः सम्बन्धवद्वृत्तिशक्त्यैव । अजहत्स्वार्थावृत्तिपक्षे पूर्वपदस्य संख्याविशेषवाचकत्वे गमकाभावात् । तेन 'द्विपुत्रः,' 'मौद्गिको,' मासजात'-

❀ काशिका ❀

रूपेण भासत इत्यर्थः, अतद्व्यावृत्तिरेव जातितात्पर्यम् । अगृहीतेति । यथा दूराद्रूपत्वेन रूपं गृह्यते, न तु शुक्लत्वादिना, तथा संख्यात्वेन सामान्यमेव भासत इति यथाकथंचिद् दृष्टान्तः । 'न शुक्लादि'रित्यस्य शुक्लत्वादिनेति शेषः । अत एव रूपत्वेन रूपेण तद्भानेऽपि नासंगतिः । यद्वा 'शुक्लादि'रित्यस्य शुक्लत्वादिविशिष्ट इत्यर्थः । इतिनाध्याहारापेक्षा । पूर्वं संख्याविशेषानुगतं भेदापोहरूपंञ्चादित्युक्तम् । इदानीं समस्तभेदसंसर्गरूपं तदिति विशेषः, तस्याः = अभेदैकत्वरूपसंख्यायाः । विगलितभेदायाः संख्याया अभेदैकत्वसंख्याशब्देन व्यवहारः । तस्या एकत्वेन प्रतीतिरिति मतान्तर-

स्तस्यां शक्तिरिति । तस्या एकत्वेन प्रतीतौ न्यायमाह—कपिञ्जलेति । बहुत्वगणनायां त्रित्वस्यैव प्रथमोपस्थितत्वात्तद्रूपेणैव भानवद्—एकत्वस्य

※ दर्पणः ※

स्तावकीनो,' 'भवद्गि'रामवसरे'त्यादौ वृत्तावभेदैकत्वसंख्याया अभानेपि न क्षतिः। आद्ये—संख्याविशेषस्यैव पूर्वपदार्थत्वात्, द्वितीये,—एकमुद्गस्य क्रयकरणायोग्यत्वाद् बहुत्वावगतिः। तृतीये—विशिष्टकालावगमाय मासपदयोगात्संख्याध्यवसायः, चतुर्थे तवकाद्यादेशादेकत्वावगतिः, पञ्चमे प्रकरणाद् द्वित्वावगतिः।

एवं—'कारकमध्य' इत्यादावप्यूह्यम्, एकस्य मध्यासम्भवात्। सति प्रकरणे 'राजपुरुष' इत्यादावपि संख्याविशेषप्रकारेणैव भानं, तदा तत्रापि न तस्य वृत्त्यर्थत्वमिति। भेदः=भेद-सहिता द्वित्वादिसंख्या, तदभावसहितैकत्वम्—अभेदैकत्वमिति व्युत्पत्त्या संख्यात्वेनैकत्वमेवोपसर्जनपदार्थे भासते। अतएवैकवचनमुत्सर्गतः करिष्यत इति वचनाद् 'राजन् अस् पुरुष सु' इत्यलौकिकविग्रह एकवचनं प्रयुज्यते। यत्र तु प्रकरणादिना संख्याविशेषभानं तत्र बहुवचनमपि, यथा—चित्रगुरित्यादौ—'चित्रा अस् गोअ'सित्यभिप्रेत्योत्तरग्रन्थमवतारयति—**तस्या इति**। वृत्तिघटकपदार्थोपसर्जनव्यक्तेरित्यर्थः। **प्रतीताविति**। संख्यात्वावच्छिन्नैकत्वप्रकारतानिरूपितविशेष्यत्वेन बोध इत्यर्थः। उपसर्जनपदार्थे संख्यात्वेनैकत्वमेव प्रतीयते, न द्वित्वादीत्यत्र दृष्टान्तमाहेति यावत्। **गणनायामिति**। बहुत्वविशिष्टानेकसंख्याने इत्यर्थः। 'कपिञ्जलानालभेते'ति वाक्येन बहुत्वव्याप्यसंख्याविशिष्टकपिञ्जलालम्भनं विधीयते, तत्र—त्रयाणां चतुरादीनां वालम्भनमिति—संशये बहुत्वव्याप्यत्वस्य त्रित्वादिषु सर्वेष्वविशिष्टत्वाद्यथाप्राप्तमेवालब्धव्यमिति पूर्वपक्षे—चतुरादीनामालम्भनं, 'मा हिंस्या'दिति सामान्यशास्त्रविहितनिषेधस्यालम्भ्यतावद्व्यक्तीतरपरत्वरूपतात्पर्यसंकोचकल्पने गौरवाद् गणनायां प्रथमोपस्थितत्रित्वपरतयापि वचनस्य चारितार्थ्याल्लाघवाच्च बहुत्वेन त्रित्वमेव बहुवचनार्थ इति सिद्धान्तितम्। तन्न्यायादत्रापि संख्यात्वेनैकत्वस्यैव वृत्त्यर्थत्वं, न तु द्वित्वादीनाम्, अप्रतीयमानविशेषधर्मकैकत्वमभेदैकत्वमिति व्युत्पत्तेरिति भावः। 'निजां त्रयाणा'मित्यादिनिर्देशैरस्मिन्व्याकरणे न्यासिन्यायस्यै-

※ काशिका ※

माह—तस्या इति। एकत्वेन = एकत्वत्वेन। कपिञ्जलेतीति। 'कपिञ्जलानालभेते'त्यत्र बहुवचनेन त्रय एव प्रतिपाद्यन्ते, गणनायां प्रथमोपस्थितत्वात्, तथा प्रकृते अभेदैकत्वरूपमेकत्वमेकत्वेन भासत इत्यर्थः। तद्रूपेणेति। त्रित्वरूपेणैवेत्यर्थः। त्रित्वादिरूपमेव बहुत्व-

१ 'भवद्गिरामवसरप्रदानाय वचांसि नः। पूर्वरङ्गः प्रसङ्गाय नाटकीयस्य वस्तुनः ॥' माघः।

सर्वतः प्रथमोपस्थितत्वमस्तीति भावः। वस्तुतस्तु जिज्ञासैव नानुभवसिद्धा। तथात्वे वा ज्ञानेच्छयोः समानप्रकारकत्वेनैव हेतुहेतुमद्भावात्तत्तद्रूपेणैव वाच्यता स्यादिति ध्येयम् ॥५६॥

❀ इति अभेदैकत्वसङ्ख्यानिरूपणम् ॥११॥ ❀

❀ दर्पणः ❀

वाश्रयणेन प्रकृते संख्यात्वेनैकत्वप्रतीतिर्दुरुपपादेत्यपि केचित्।

ननु जिज्ञासायां शाब्दमेव सामान्यधर्मप्रकारकज्ञानदर्शनमपेक्षितमिति न नियमः, आम्रादिफलदर्शनेनाऽपि तद्रसास्वादनेच्छाया उत्पत्त्या व्यभिचारात्। नचैवं सामान्यधर्मप्रकारकज्ञानस्यैव हेतुत्वं विलीयेतेति वाच्यम्, आम्रदर्शनस्योद्बोधकतया तद्रसस्मरणेन तदुपपत्तेः। प्रकृते तस्या अशक्यत्वेऽपि तदव्यभिचरितद्रव्यत्वेनानुमानिकतद्बोधसम्भवात्। तादृशजिज्ञासाया अननुभवाच्च नोक्तयुक्तिर्वृत्तेरभेदैकत्वसंख्यार्थत्वसाधिकेत्यभिप्रेत्याह–**वस्तुत इति। अनुभवसिद्धेति।** अस्य–येन तदनुरोधेन सामान्यधर्मकारकज्ञानस्यावश्यकता स्यादिति शेषः। अभेदैकत्वसंख्याया वृत्तौ मानमिति मूलं तु प्राचीनग्रन्थानुवाद एवेति भावः। अनुभवसिद्धत्वस्य शपथनिर्णेयत्वं मत्वाह–**तथात्वे चेति।** अनुभवसिद्धत्वे चेत्यर्थः। **समानप्रकारकत्वेनैवेति।** 'एव'कारेण विभिन्नप्रकारकत्वव्यवच्छेदः। तद्धर्मप्रकारकेच्छां प्रति तद्धर्मप्रकारकज्ञानस्य हेतुतायाः सुखादीच्छास्थले क्लृप्तत्वात्। प्रकृते विशेषधर्मप्रकारकजिज्ञासायाः सविषयविषयकत्वेन ज्ञानप्रकारीभूतविशेषधर्मप्रकारकत्वस्यावश्यकत्वेन तत्पदार्थविशेषधर्मप्रकारकज्ञानकार्य्यतावच्छेदकाक्रान्तत्वादिति भावः। **तत्तद्रूपेणेति।** एकत्वत्वादिरूपेणैवेत्यर्थः। एवकारेण संख्यासामान्यधर्म्मव्यवच्छेदः। इष्टापत्तिस्तु न,–तथा सति शब्दादेव विशेषधर्मावगतौ जिज्ञासाया असम्भवादिति भावः। अत्र वदन्ति–तद्धर्मप्रकारकज्ञानस्य कार्य्यतावच्छेदककोटौ स्वातन्त्र्येण तद्धर्मप्रकारकत्वं सामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकजिज्ञासाजनकत्वानुरोधान्निवेशनीयम्। अन्यथा

❀ काशिका ❀

मित्यर्थः। अभेदैकत्वसंख्याया भानं वृत्तौ इति मतं दूषयति–**वस्तुतस्त्विति।** एकत्वत्वेन रूपेण तद्भानमत्यन्तानुचितमेव, किं तु संख्यात्वेन, अन्यथा 'राजपुरुष' इत्यादावुक्तजिज्ञासानापत्तेः, इष्टापत्तिस्तु न 'वृद्धिमिच्छतो मूलमपि ते नष्ट'मिति न्यायापातात्, 'राजपुरुष' इत्यादौ तत्तत्पदार्थतावच्छेदकरूपेण एकानेकव्यक्तिर्वृत्तौ भासते, न तु संख्यावत्त्वेनेति नव्यमतं समासप्रकरण उक्तम्। ब्राह्मणादिशब्दाद्विशेषधर्मप्रकारकजिज्ञासोदयेऽपि न तस्य तच्छब्दवाच्यतानङ्गीकारादिदमसंगतमिति वाच्यम्। तत्र नियमेन न जिज्ञासोदयः, अत्र नियमेन तदुदयः,

❀ अथ सङ्ख्याविवक्षानिर्णयः ❀

सङ्ख्याप्रसङ्गादुद्देश्यविधेययोः सङ्ख्याविवक्षाऽविवक्षे निरूपयति—

लक्ष्यानुरोधात्सङ्ख्यायास्तन्त्राऽतन्त्रे मते यतः ।
पश्वेकत्वादिहेतूनामाश्रयणमनाकरम् ॥५७॥

'ग्रहं संमार्ष्टी'त्यत्रोद्देश्यग्रहगतैकत्वमविवक्षितमितिवन्नास्माकमुद्देश्यविशेषणाविवक्षानियमः, धातोरित्येकत्वस्य विवक्षितत्वात् ।

❀ दर्पणः ❀

सामान्यधर्मप्रकारकज्ञानस्योक्तजिज्ञासां प्रति हेतुत्वं विलीयेत । न च तत्र मानाभावः, 'जायते च कार्ये कारणे वा ज्ञाते किमस्य कार्यं कारणं वे'ति दीधितिकृद्वाक्यस्यैव मानत्वात् । प्रकृते विशेषधर्मस्य पारतन्त्र्येणैवेच्छांशे प्रकारत्वात्तद्धर्मप्रकारकज्ञानं विनापि सामान्यधर्मप्रकारकज्ञानात्तादृशजिज्ञासाया सूपपादत्वात् । सामान्यधर्मप्रकारकज्ञानं तु विशेषधर्मप्रकारकत्वावच्छिन्नविशेष्यकेच्छात्वमिति न गुणत्वसामान्यज्ञानात्सुखादीच्छाप्रसक्तिः,अधिकमन्यत्रानुसन्धेयम् । तथाचात्र जिज्ञासायाः सर्वसिद्धत्वे तदुपपत्तयेऽभेदैकत्वे वृत्तेर्वृत्तिरावश्यिका । एवञ्चाऽभेदैकत्वसंख्याया वृत्ताविति मूलस्य सङ्गतिः । एतेन भेदस्य तत्सहचरितद्वित्वादेरेकत्वस्य च या प्रतीतिस्तदभाव इत्यर्थपरतया व्याख्यानं परास्तमिति ॥५६॥

❀ इति अभेदैकत्वसंख्यानिरूपणम् ११॥ ❀

सङ्ख्याविवक्षाऽविवक्षानिरूपणे सङ्गतिं दर्शयति—**प्रसङ्गादिति** । अभेदैकत्वसङ्ख्यानिरूपणे 'कपिञ्जलानालभेते'त्यत्र विधेयविशेषणतया त्रित्वसङ्ख्याविवक्षायाः स्मृतत्वादुपेक्षानर्हत्वाच्चेत्यर्थः । **अविवक्षितमितीति** । तद्विवक्षणे यज्ञीययावत्पात्राणां मार्जनाऽलाभ इति भावः । **धातोरितीति** । प्रत्ययविधौ धातोरिति सूत्रस्थधातुपदार्थविशेषणीभूतैकत्वादेरेतच्छास्त्रेऽविवक्षणादित्यर्थः । अस्मच्छास्त्रे उद्देश्यगतविशेषणस्याविवक्षा मीमांसकनामपि सम्मतेत्याह—**उत्पद्येतेति** ।

❀ काशिका ❀

एवं च तदुपस्थापकान्तरासत्त्वे तदुपस्थितये वाच्यता स्यादित्याशयात् । वस्तुतस्तादृशजिज्ञासाभावे एव निर्भरो नात्र दूषणे इति बोध्यम् । विस्तरस्तु वृहद्भूषणादावनुसंधेयः ॥ ५६ ॥

❀ इति अभेदैकत्वसङ्ख्यानिरूपणम् ❀

ग्रहं संमार्ष्टीति । ग्रहं संमार्ष्टी'त्यादौ ग्रहान् वाक्यान्तरविहितानुद्दिश्य संमार्गो विधीयते, तत्रोद्देश्यगतं विशेषणमविवक्षितमिति सर्वग्रहसंमार्गसिद्धिरिति **मीमांसकसिद्धान्तः** स वैयाकरणैर्नाश्रयितुं शक्यते, 'धातो'रित्यादौ व्यभिचारादित्यर्थः, तत्रैकत्वाविवक्षायां धातु-

उत्पद्येत समस्तेभ्यो धातुभ्यः प्रत्ययो यदि ।
तदा सर्वैर्विशिष्येत द्वन्द्वोत्पन्नसुबर्थवत् ॥ इति—

—शब्दान्तराधिकरणे भट्टपादैरभिधानाच्च । 'आर्द्धधातुकस्येड्वलादे-रित्यत्रानुवाद्यार्द्धधातुकविशेषणस्य वलादित्वस्य विवक्षितत्वाच्च । एवं 'पशुना यजेते' इतिवद् विधेयविशेषणं विवक्षितमित्यपि नियमो न । 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इत्यत्र नकारद्वयविधानानापत्तेः ।

❀ दर्पणः ❀

तदा स प्रत्ययार्थः सर्वैर्धात्वर्थैर्विशिष्येतेत्यर्थः । ननु नेयं युक्तिर्विवक्षासाधिका, तादृशसमुदायस्य क्रियावचनत्वाभावेन ततः प्रत्ययोत्पत्तेर्गगनकुसुमायमानत्वेन स्वत एव विवक्षासत्त्वादत आह—**आर्द्धधातुकस्येडवलादेरितीति । विवक्षितत्वाच्चेति** । अन्यथा तदुपादानवैयर्थ्यापत्तेरिति भावः । **एवमिति** । अनुवाद्यविशेषणमविवक्षितमेवेति नियमानाश्रयणवदित्यर्थः । 'पशुना यजेते'त्यत्र यज्यर्थयागस्य करणाकाङ्क्षायां साधनत्वेन पशुर्विधीयते, एवञ्च पशुशब्दस्य विधेयसमर्पकतया तदुपस्थितानां केषाञ्चिद् ग्रहणे केषाञ्चित्परित्यागे मानाभावेन पशुत्वपुंस्त्वादिवदेकत्वमपि यागसाधनत्वेन विवक्षितम् । तेन नानेकपशुकरणयागाददृष्टसिद्धिः । एवमन्यत्रापि विधेयविशेषणं विवक्षितम्, अविवक्षाकारणविरहादिति मीमांसकपरिशीलिता सरणिस्तदनुसरणनियमो नास्माकमित्यर्थः । एतच्छास्त्रे तदाश्रयणेऽनिष्टं प्रदर्शयति—**रदाभ्यामिति । विधानानापत्तेरिति** । न

❀ काशिका ❀

समुदायादपि प्रत्ययापत्तिरिति भावः । धातोरित्यत्रैकत्वविवक्षा मीमांसावार्तिककृतामपि संमतेत्याह—उत्पद्येतेति । द्वन्द्वोत्पन्नेति । द्वन्द्वसमासादुत्पन्नसुबर्थसंख्यादिना यथा सर्वे द्वन्द्वघटकपदार्था विशेष्यन्ते, एवं धातुसमुदायाद्यदि प्रत्यय उत्पद्येत तदा तावन्तो धात्वर्थाः प्रत्ययार्थेन संबध्येरन्नित्यर्थः । इदमुपलक्षणम्—समुदायस्याङ्गसंज्ञायामडादिकं तस्य स्यादित्यपि बोध्यम् । ननूक्तबाधकबलेन प्रत्ययोपात्तानुवाद्यविशेषणविवक्षायामपि प्रातिपदिकोपात्तस्य तस्याविवक्षा बाधकाभावात् स्यादित्याशङ्कां निरस्यति—आर्धधातुकस्येति । यद्वा—'धातुत्वपर्याप्त्यधिकरणात्प्रत्यय' इत्यर्थाङ्गीकारे तत्समुदायस्य धातुत्वपर्याप्त्यधिकरणत्वाभावान्न धातुसमुदायात्प्रत्ययापत्तिरिति नैकत्वविवक्षायास्तत्रोपयोग इत्यत आह—'आर्द्धधातुकस्ये'ति । **लाभो न स्यादिति** । न च वाक्यभेदात्तल्लाभः, तथा सति गौरवापत्तेः, एवमेव चकाराकरणे लाघवातिशयाच्च । **पशुना यजेतेति-वदिति** । यथा वाक्यान्तरेण प्राप्तं यागमनूद्य पशोर्विधानात् पशुगतमेकत्वं विवक्षितमत एव तत्रानेकपशुकरणकयागानुष्ठानान्नादृष्टसिद्धिरेवं विधेयगतं विशेषणं विवक्षितमेवेति नियमो **मीमांसायां** स्थितः, सोऽपि शाब्दिकमते नास्तीत्यर्थः । तत्र हेतुमाह—**रदाभ्यामिति** । ननु

तथाच 'भिन्न' इत्यत्र नकारद्वयलाभो न स्याद् । 'आद्गुण' इत्यादावेकत्वविवक्षयैवोपपत्तौ 'एकः पूर्वपरयो'रित्येकग्रहणवैयर्थ्यापत्तेश्चेति भावः । शब्दार्थस्तु—सङ्ख्याया लक्ष्यानुरोधात्तन्त्राऽतन्त्रे यतो मते, अतः—पश्वेकत्वाधिकरणोक्तहेतूनामाश्रयणं नास्मत्सिद्धान्तसिद्धमिति । आदिना—ग्रहैत्वसंग्रहः ॥५७॥

❀ दर्पणः ❀

इत्येकवचनोपस्थितैकत्वस्यापि विधेयविशेषणतया तद्विवक्षायां नकारद्वयविधानं न स्यादित्यर्थः । ननु मास्तु नद्वयविधानमत आह—**तथाचेति** । इदञ्चैकवाक्यतया विधानमभिप्रेत्य । वाक्यभेदेन विधानपक्षे त्वाह—**आद्गुण इत्यादाविति** । **एकत्वविवक्षयैवेति** । विधेयगुणगतैकत्वविवक्षयैवेत्यर्थः । तथाचैकग्रहणमेवोक्तार्थे ज्ञापकमिति भावः । ननु पश्वेकत्वादिविवक्षाहेतूनां जैमिनिसम्मतत्वान्न तदाश्रयणस्यानाकरत्वमित्याशङ्कामपाकरिष्यन् योजनाप्रदर्शनमिषेणाऽऽकरपदार्थं व्याचष्टे—**शब्दार्थस्त्वित्यादि** । **पश्वेकत्वाधिकरणोक्तहेतूनामिति** । 'पशुना यजेत'-त्यत्र विधेयगतैकत्वस्याविवक्षणे पश्वन्तरालम्भे प्रयोगप्राशुभावबाधेन यागवैगुण्यापत्तिः, गुणानुरोधेन यागावृत्तौ प्रधानत्वभङ्गापत्तिर्यावत्पशुकरणकयागासम्भवश्चेत्येवमादयो दोषा हेतवस्तेषामित्यर्थः । **सिद्धान्तसिद्धमिति** । सिद्धान्तार्थप्रतिपादकमहाभाष्यादिसिद्धमित्यर्थः ॥५७॥

❀ काशिका ❀

तत्र चकारकरणाद्वाक्यभेद एव सूत्रकृतोऽभिमत इति लभ्यते इति नकारद्वयलाभो निराबाध एवेत्यत आह—**आद्गुण इत्येति** । **वैयर्थ्यापत्तेरिति** । यदि विधेयविशेषणं नियमेन विवक्षितं स्यात्, तदा पूर्वपरयोः स्थानिनोरेकस्यैव गुणाद्यादेशस्य सिद्धया एकग्रहणवैयर्थ्यं स्पष्टम्, तस्मात् पाणिनेर्विवक्षैवेति नियमो नाभिमत इति भावः । एवमविवक्षैवेत्यपि न नियमः, 'उपेयिवा'नित्यत्र सूत्र उपेत्यस्याविवक्षाया नञ्प्रभृतेश्च विवक्षाया दर्शनादित्यपि बोध्यम् । तन्त्रातन्त्रे = विवक्षाविवक्षे । 'तात्पर्यातात्पर्ये'इति यावत् । प्रतिपादनेच्छा विवक्षा, संख्याविवक्षाविवक्षयोर्हेतुः—**लक्ष्यानुरोधादिति** । **पश्वेकत्वाधिकरणेति** । तत्र हि समानप्रत्ययोपात्तत्वप्रत्यासत्त्या विभक्त्यर्थे संख्यायास्तदर्थकारके एवान्वयः, तत्रारुणाधिकरणन्यायेन विभक्त्यर्थस्य प्रथमतः क्रियान्वयः, पश्चात् प्रकृत्यर्थेन, इत्थं च पश्वेकत्वोभयकरणको याग इति बोधः, किं गतमेकत्वमित्येकत्वस्याश्रयाकाङ्क्षायामेकः पशुरिति पार्ष्णिको मानसो बोध इत्युक्तम् । ग्रहैकत्वविवक्षायां संमार्गोद्देशेन ग्रहैकत्वयोर्विधाने वाक्यभेदापत्तिः । तथाहि—'प्राजापत्या नव ग्रहा' इत्यादि-

ननु विधेयविशेषणविवक्षावश्यकी, अन्यथा 'सुद्ध्युपास्य' इत्यादावनन्तयकाराद्यापत्तेः। 'भिन्न' इत्यत्र नकारद्वयवदन्येषामप्यापत्तेः, 'एकः पूर्वपरयो'रित्यत्रैकग्रहणञ्च स्थानिभेदादादेशभेदवारणायेत्यभिप्रेत्याह—

विधेये भेदकं तन्त्रमन्यतो नियमो न हि ॥
ग्रहैकत्वादिहेतूनामाश्रयणमनाकरम् ॥५८॥

भेदकं = विशेषणम्। तन्त्रं = विवक्षितम्। विधेयविशेषणं विवक्षितमित्यस्तु, तथाप्यन्यतः—अनुवाद्यस्य नियमो न हि। क्वचित् तन्त्रं

❀ दर्पणः ❀

आदेशभेदवारणायेति। वस्तुतस्तु नैकग्रहणं विधेयगतविशेषणाविवक्षायां तन्त्रम्, 'अनयोः पूलयोः कटं कुर्वि'त्यादाविव, 'आद्गुण' इत्यादावपि 'पूर्वपरयो'रिति द्वन्द्वनिर्देशेनैकवाक्यतयैवोभयोः स्थाने एकविधानसम्भवात्स्थानिभेदान्नानेको

❀ काशिका ❀

वाक्यविहितग्रहानुवादेन संमार्गविधाने ग्रहं संमार्ष्टि, तं चैकमिति वचनव्यक्तौ वाक्यभेदः स्पष्ट एव। उक्तं हि वाक्यपदीये—

'ग्रहास्त्वन्यत्र विहिता भिन्नसंख्याः पृथक् पृथक्।
प्राजापत्या नवेत्येवमादिभेदसमन्विताः॥
अङ्गत्वेन प्रतीतानां संमार्गे त्वङ्गिनां पुनः।
निर्देशं प्रति या संख्या सा कथं स्याद्विवक्षिता॥' इति।

परे तु—उत्पत्तिवाक्ये नवत्वादिसंख्याश्रवणाद्विधेयगतत्वेन नवादिशब्दोपात्तत्वेन तस्याः संख्याया विवक्षणात् तत्संख्यावैशिष्ट्येनैवानुभूतग्रहाणां ग्रहशब्देन तत्संख्याविशिष्टानामेव स्मृतौ तेषु विभक्त्यैकत्वबोधने उपक्रमस्थसंख्याबाधलक्षणो वाक्यभेदः स्यात्। मीमांसकोक्तवाक्यभेदश्चायमेवेति स्पष्टमेतद्धरिकारिकाव्याख्याने हेलाराजीये।

यद्वोत्पत्तिवाक्यगतसंख्ययैतद्वाक्यगतसंख्याया विरोधाद्वाक्यद्वयस्य भेदापत्तिः, न च ग्रहानुवादेन संमार्गो विधेयः, संमृज्यमानग्रहानुवादेनैकत्वं विधीयतामिति वाच्यम्, एकपदोपस्थापितयोरुद्देश्यविधेयभावेनान्वयासंभवात्, संमार्गस्योद्देश्यकोटौ प्रवेशासंभवाच्च। वाक्यभेदतादवस्थ्याच्चेत्याहुः॥ ५७॥

अनन्तयकाराद्यापत्तेरिति। 'सुध्युपास्य' इत्यादौ 'इको यणची'ति सूत्रेणानन्तयकारादिकं स्यादित्यर्थः। पूर्वोक्तामेकग्रहणवैयर्थ्यापत्तिमुद्धरति—एकः पूर्वेति। आदेशभेदेति। इदं सूत्रकाराशयवर्णनमात्रम्। वस्तुतस्त्वनयोः पूलयोः कटं कुर्वित्यत्र द्वित्वविशिष्टफलसंबन्ध्येककटकरणप्रतीतिरिव 'पूर्वपरयो'रिति द्वन्द्वनिर्देशेनोभयोः स्थाने एकवाक्यतयैकगुणादिविधानान्ना-

क्वचिन्नेत्यर्थः । ग्रहैकत्वादौ यो हेतुर्वाक्यभेदादिस्तस्यात्राश्रयणमनाकरम् । एकत्वविशिष्टं धातुं वलादित्वविशिष्टमार्द्धधातुकञ्चोद्दिश्य प्रत्ययेडागमादेर्विधिसम्भवादिति भावः ॥५८॥

❀ दर्पणः ❀

गुण इत्येकग्रहणस्य भाष्ये प्रत्याख्यानादिति रहस्यम्। वाक्यभेदादिरिति। 'प्राजापत्या नव ग्रहा' इति वाक्यविहितग्रहोद्देशेन सम्मार्गो विधीयते 'ग्रहं सम्मार्ष्टी'त्यनेन। तत्रानुवाद्यग्रहैकत्वविवक्षायामुत्पत्तिवाक्यगतसङ्ख्याया विरोधाद् वाक्यस्य यो भेदो विभिन्नविशेष्यकवोधजनकत्वं तदापत्त्यादीत्यर्थः। अन्येतु–'ग्रहं संमार्ष्टि' 'तं चैक'मित्याकारकवाक्यभेदापत्तिमाहुः। 'आदि'पदेनोत्पत्तिवाक्यगतनवत्वसङ्ख्यया ग्रहपदार्थस्य परिच्छिन्नत्वात्परिच्छेदकाङ्क्षाभावस्य 'ग्रह'मिति द्वितीयया संस्कार्यत्वलक्षणप्राधान्यवोधनात् 'प्रतिप्रधानं गुणावृत्ति'रिति न्यायाद्विनिगमनाविरहात् सोमावसेकनिरासफलकसंमार्गस्य सर्वैर्ग्रहैरपेक्षणाद्विधेयपश्वादिविशेषणवत् क्रियाङ्गत्वाभावेन तद्वैकल्यप्रयुक्तक्रियावैकल्याप्रसक्तेश्च तद्विवक्षाविरहवीजस्य च संग्रहः। 'अनाकरमिति–पूर्ववत्। 'इडागमादे'रित्यादिना—'उदीचामातः स्थाने यकपूर्वाया'इति विहितेत्त्वसंग्रहः। तत्राऽऽकारस्थानिकाऽतमुद्दिश्येत्वविधानात्। अत एवेऽग्निषेधविधायकैकाजिति सूत्रेऽच इत्येकत्वविवक्षादरेणानेकाच्कोपदेशव्यावृत्तिर्ग्रन्थः

❀ काशिका ❀

नेकगुणादिप्रसङ्गः, विधेयगतसंख्याया अविवक्षायां हेत्वभावादिति प्रत्याख्यातमेव 'एकः पूर्वपरयोः' इति सूत्रभाष्ये विस्तरेणेति स्पष्टं भाष्यकैयटादिग्रन्थविदाम्। वाक्यभेदादिरिति। वाक्यभेदस्तु वर्णितः। आदिपदेन 'ग्रह'मिति द्वितीयया ग्रहस्य संस्कार्यत्वलक्षणं प्राधान्यं प्रतीयते, एवं च 'प्रतिप्रधानं गुणावृत्ति'रिति न्यायेन, विनिगमनाभावेन च सोमावसेकनिरसनप्रयोजनकसंमार्गस्य सकलग्रहैरपेक्षणाच्च सर्वत्र संमार्गसिद्ध्या विवक्षाफलाभावरूपहेतुपरिग्रहः, पश्वादिविशेषणवत्, क्रियाङ्गत्वाभावेन तद्वैकल्यप्रयुक्तक्रियावैकल्यप्रसक्तिरपि नेति भावः। जैमिन्याचार्येणापि 'एकत्वयुक्तमेकस्य श्रुतिसंयोगात्' इति पूर्वपक्षानन्तरं—'सर्वेषां लक्षणत्वादविशिष्टं लक्षण'मिति सिद्धान्तसूत्रं व्यरचि। तदर्थस्तु–सर्वेषां संमार्गः कार्यः ग्रहत्वजातेर्द्रव्यलक्षणत्वाद्द्रव्यवोधकत्वाद् द्रव्यस्य लक्षणं द्रव्यवोधनं यत इति शब्देन वोध्यमानजात्या व्यक्तिराक्षिप्यत इत्यविशेषात् सर्वव्यक्तिवोधनमिति पर्यवसितोऽर्थः। अनाकरम्=आकरग्रन्थासिद्धं, तद्विरुद्धं वा। ननु ग्रहैकत्ववद्धातोरित्यत्रैकत्वस्य 'आर्धधातुकस्येड्वलादे'रित्यादौ वलादित्वादेरप्यविवक्षा स्यादित्याशङ्क्याह—एकत्वविशिष्टमिति। चोद्दिश्येति। तथा च तत्रैकत्वादिविशिष्टानुवादसामर्थ्यादेकत्वाविवक्षासंभव इति भावः ॥५८॥

नन्वेवं 'भिन्न' इत्यत्र नकारद्वयलाभो न स्यादित्यत आह—

रदाभ्यां वाक्यभेदेन नकारद्वयलाभतः ।
क्षतिर्नैवास्ति तन्त्रत्वे विधेये भेदकस्य तु ॥५९॥

❀ काशिका ❀

नन्वेकत्वविवक्षायामेकस्मादेव धातोः प्रत्ययः स्यान्न तु धात्वन्तरादिति चेन्न, सर्वेषां प्रत्येकमेकत्वादिनिगमनाविरहेण व्यक्त्यन्तरेभ्योऽपि प्रत्ययोत्पत्तिसिद्धिसंभव इत्याशयात्, उक्तरीत्या ग्रहैकत्वविवक्षाया यथा संभवस्तथोक्तम् ।

परे तु—धातुत्वपर्याप्त्यधिकरणात् प्रत्यय इत्यर्थेनैवेष्टसिद्धिसंभवे एकत्वविवक्षाया न प्रयोजनम्, किं चैवमेकस्मादेव कस्माच्चिद्धातोरेव प्रत्ययः स्यान्न धात्वन्तरात्, 'सर्वेषा'मित्यादिकं तु न युक्तम्, तथा सत्येकं ब्राह्मणं भोजयेदित्यादावप्यनेकब्राह्मणभोजनापत्तेरित्याहुः । विस्तरतु समर्थसूत्रादिस्थविवरणादावनुसंधेयः । ननु विधेयगतसंख्याविवक्षायां किं मानमिति चेदत्राहुर्मीमांसकाः—संख्यायाः समानप्रत्ययोपात्तत्वप्रत्यासत्त्या कारके एवान्वयः, न तु प्रकृत्यर्थे, विभक्त्यर्थस्य चारुणाधिकरणन्यायेन क्रियाविशेषणत्वम् । एवं च पश्वेकत्वोभयकरणको याग इति बोधः, 'एकः पशु'रिति तु पार्ष्णिको मानसः सः, एवं चैकत्वस्य शब्देनैव यागाङ्गत्वावगमात् तद्विवक्षावश्यकीति । तदपरे न क्षमन्ते—यतः प्रत्ययार्थस्य प्रकृत्यर्थे एवान्वये साधुत्वं न त्वन्यत्रान्वये, किं च स्वादिसूत्रस्य 'कर्मणि द्वितीया' इत्यादिभिः 'द्व्येकयोः—' इत्यादिभिश्चैकवाक्यत्वे एकस्मिन् कर्मणि द्वितीयैकवचनमित्याद्यर्थेऽन्यत्रैकत्वस्यान्वयेऽसाधुत्वं स्पष्टमेव । अपि च भिन्नपदोपात्तक्रियान्वयापेक्षया समानपदोपात्तत्वेन प्रकृत्यर्थे एवान्वयस्यौचित्यं, तदन्वितस्यैव क्रियाकाङ्क्षादर्शनात् । ननु 'स्वौजसमौट्—' इत्याद्युक्तसूत्रत्रयस्यैकवाक्यत्वेऽपि नैकत्वादेः कर्मादौ विशेषणत्वमुचितं, किं तु विधेयतया प्रधाने एव, गुणानां च परार्थत्वादिति न्यायात्, तथा च प्रातिपदिकात् कर्मणि एकत्वे च द्वितीयैकवचनमित्याद्याकारक एव वाक्यार्थबोधो न तदाकार इति कर्मत्वस्य कारकान्वये न किंचिद्बाधकमिति चेन्न । एवमपि प्रत्यासत्तिन्यायेन परस्परसंबद्धार्थबोध एव तत्तदनुशासनेन तयोः साधुत्वबोधनं, विभक्त्यर्थस्य च प्रकृत्यर्थे विशेषणत्वमेवेति स्थितं मञ्जूषादौ । तस्मात् पशुनेत्यादावेकत्वविशिष्टपशुविधानादेकत्वविवक्षेति युक्तं । विशिष्टविधानादेव वाक्यभेदाप्रसक्तेः । विशिष्टस्य क्रत्वाङ्गत्वबोधनात् पशुत्वादिविशेषणवैकल्ये इवैकत्ववैकल्येऽपि विशिष्टाननुष्ठानाद्यागवैगुण्यमपि सिद्धम् ।

जैमिनिनापि—'तत्रैकत्वमयज्ञाङ्गमर्थस्य गुणभूतत्वात्' इति पूर्वपक्षे 'शब्दवदुपलभ्यते तदागमे हि दृश्यते तस्य ज्ञानं यथान्येषाम्' इति सिद्धान्तसूत्रं प्रणीतम्, शब्दवत् = शब्दबोध्यं यथा भवति तथोपलभ्यते, एकत्वं हि यतस्तदागमे = एकवचनागमे, दृश्यते तस्याङ्गत्वज्ञानं यथान्येषां = विशेषणानां शब्दोपस्थितानां पशुत्वलौहित्यादीनामिति तदर्थः । एवं च जैमिनेरपि संख्याविशिष्टबोध एव तात्पर्यम् । हरिरप्याह—

चकारसूचितं—निष्ठातस्य नः, पूर्वस्य दकारस्य च न इति वाक्य-भेदमादाय नकारद्वयलाभ इत्यर्थः ॥५९॥

❀ इति सङ्ख्याविवक्षानिर्णयः ॥१२॥ ❀

❀ दर्पणः ❀

कृद्भिर्व्याख्याता । वस्तुतस्तु ग्रहैकत्वदृष्टान्तेनात्राप्यनुवादविशेषणानां क्वचिदविवक्षा-स्तु, तदितरविशेषणानां विवक्षायां तु न किञ्चिद्बाधकम् । मीमांसायामनुवाद्यांशे जातिलिङ्गसङ्ख्यातिरिक्तविशेषणस्यादर्शनात् । तेषाञ्चोत्पत्तिवाक्यादेवावगमेनानु-पङ्क्तिकत्वादविवक्षा युज्यते । प्रकृते तु न तथेति बोध्यम् ॥५९॥

❀ इति सङ्ख्याविवक्षादिनिर्णयः ॥१२॥ ❀

❀ काशिका ❀

'यजेत पशुने'त्यत्र संस्कारस्यापि संभवे ।
यया जातिस्तथैकत्वं साधनत्वेन गम्यते ॥' इति ।

'न केवला प्रकृति'रिति न्यायाद्विभक्तेः शब्दसंस्कारार्थत्वसंभवेऽपि जातेरिव तस्याः क्रिया-साधनत्वं, विशिष्टस्यैवोपस्थितेरित्यर्थ इति हेलाराजः । अपि च संख्याया अमूर्तत्वात् साक्षात् क्रियासाधनत्वासंभवात् परम्परया क्रियान्वयात्साधनत्वकल्पनापेक्षयोक्तयुक्तिभिः प्रकृत्यर्था-न्वयस्यैव कल्पनोचिता, आरुण्यस्य तु प्रकृत्यर्थतयागत्या परंपरया क्रियाकरणत्वमुचितम्, एवं च विधेयविशेषणं सर्वं विवक्षितम्, अविवक्षानिमित्तविरहात्, किं चैकेनैव पशुना यागसिद्धौ पश्वन्तरालम्भनं व्यर्थं तथापि मध्ये पश्वन्तरालम्भने प्रयोगविध्यवगतप्रयोगप्राशुभावबाधः स्यात्, उक्तं हि वाक्यपदीये—

'प्रत्याश्रयं समाप्तायां जातावेकेन चेत्क्रिया ।
पशुना न प्रकल्पेत न स्यादेतत्प्रकल्पना ॥
एकेन तु प्रसिद्धायां क्रियायां यदि संभवात् ।
पश्वन्तरमुपादेयमुपादानमनर्थकम् ॥
यथैवाहितगर्भायां गर्भाधानमनर्थकम् ।
तथैकेन प्रसिद्धायां पश्वन्तरमनर्थकम् ॥' इति ।

—विधेयगतसंख्याविवक्षां वर्णयन्तीत्यत्र विस्तरः ॥५९॥

* इति संख्याविवक्षानिरूपणं *



ॐ अथ क्त्वाद्यर्थनिर्णयः ॐ

क्त्वाप्रत्ययादेरर्थं निरूपयति—

'अव्ययकृत' इत्युक्तेः प्रकृत्यर्थे तुमादयः ।
समानकर्तृकत्वादि द्योत्यमेषामिति स्थितिः ॥६०॥

तुमादयः—तुमुन्नादयः। प्रकृत्यर्थे = भावे। आदिना—क्त्वादेः संग्रहः। भावे इत्यत्र मानमाह—अव्ययकृत इति। अव्ययकृतो भावे' इति वार्त्तिकादित्यर्थः। ननु 'समानकर्तृकयोः पूर्वकाले' इत्यादिसूत्राणां का गतिस्त-

ॐ दर्पणः ॐ

अवसरसङ्गतिं क्त्वाद्यर्थनिरूपणे दर्शयति—क्त्वाप्रत्ययादेरिति। प्रकृत्यर्थस्य फलेपि सत्त्वादाह—भाव इति। तत्रापि सत्त्वभूते व्यापारे एव, न तु पूर्वकालादावित्यर्थः। 'पाक' इत्यादाविव 'पक्तुं' 'पक्त्वेत्या'दिजन्यबोधे भावांशे वैलक्षण्यस्याननुभावादिति भावः। वस्तुतस्तु 'पक्त्वे'त्यादिजन्यबोधे भावे लिङ्गसङ्ख्यानन्वयित्वात्तदनुभूयत एव। एवं 'पक्तु'मित्यादौ फलार्थकतुमुना साध्यत्वेन तद्बोधाच्चेत्युक्तप्रायमिति। का गतिरिति। तत्र 'पूर्वकाल' इत्याद्युपादानात् पूर्वकालादीनां वाच्यता प्रतीयते। भावमात्रार्थकत्वे तु तदनुपपत्तिरिति

ॐ काशिका ॐ

क्त्वाप्रत्ययादेरिति। यद्यपि मूले 'तुमादय' इत्युक्तं तथापि क्त्वाप्रत्यये बहुवक्तव्यत्वेन प्राधान्यद्योतनाय 'क्त्वाप्रत्ययादे'रित्युक्तम्। वार्तिकादित्यर्थं इति। भाष्यकाराः—'तुमर्थे' इति सूत्रे 'तुमर्थो भाव' इति व्यवस्थाप्याग्रे 'तुमर्थे' इत्यस्यानुवृत्तिमभ्युपगम्य—'अव्ययकृतो भावे' इति प्रत्याचक्षाणाः—क्त्वादीन् भाव एवाभ्युपयन्ति। परं तु क्त्वातुमुनादेरसत्त्वभूत एव भावोऽर्थः, पाक इत्यादाविव लिङ्गसंख्याननुभवात्, तथा च धात्वर्थानुवादक एव तुमुनादिरिति पर्यवसितम्। का गतिरिति। क्त्वाप्रत्ययस्य भावमात्रार्थकत्वाङ्गीकारे समानकर्तृकत्वादेस्तदर्थत्वासंभवात्तदुपादानवैयर्थ्यापत्तिरतस्तत्क्रियाकर्तृत्वाश्रयः क्त्वाप्रत्ययार्थो वाच्यः, अत एव 'रोटिकाः पक्त्वाहं भोक्ष्ये' इत्यत्रास्मच्छब्दात्तृतीया न, क्त्वाप्रत्ययेन पाककर्तुरभिधानात्। पाककर्तुर्भोजनस्य स्वनिष्ठकर्तृतानिरूपकतासंबन्धेनान्वयात् समानकर्तृत्वलाभः। अथवाकर्तृकत्वं तदर्थोऽस्त्वित्याशयेनायं प्रश्नः, समानकर्तृकत्वादेर्द्योत्यत्वं व्यर्थं, तस्य प्रकृत्यर्थे विशेषणत्वस्य विशेष्यत्वस्य

त्राह—**समानकर्तृकत्वादीति** । अयं भावः—'भोक्तुं पचति' 'भुक्त्वा व्रजती'त्यादावेकवाक्यता सर्वसिद्धा भोजनपाकक्रिययोर्विशेषणविशेष्यभावमन्तरेणानुपपन्ना । अन्यथा 'भुङ्क्ते' 'व्रजती'त्यादावप्येकवाक्यतापत्तेः । तथाच तयोर्विशेषणविशेष्यभावनिरूपकः संसर्गो,—जन्यत्वं, सामानाधिकरण्यं, पूर्वोत्तरभावो, व्याप्यत्वञ्चेत्यादिरनेकविधः । तथाच—

ॐ दर्पणः ॐ

भावः । **समानकर्तृकत्वादिति** । तथाच समानकर्तृकयोर्धात्वर्थयोर्मध्ये पूर्वकालसम्बन्धी योऽर्थस्तद्वाचकात् क्त्वेत्यर्थेऽर्थाकाङ्क्षायां 'कर्तरि कृ'दित्यस्य प्रसक्तौ तद्बाधनार्थं वार्त्तिकारम्भेण भावस्यैव वाच्यता निर्धार्य्यते । कर्तुः प्रत्ययविशेषणत्वे तु समानकर्त्तरीत्येव ब्रूयात् । सूत्रोपात्तानां तु द्योत्यत्वमेव, वर्त्तमानत्वादिति भावः । वस्तुतस्तु न द्योत्यतायामपि निर्भरः, संसर्गमर्यादयैव तद्भानसम्भवादित्याह—**अयं भाव इति** । **एकवाक्यतेति** । 'समानकर्तृकयो'रित्यादिसूत्राणां धातुसम्बन्धाधिकारित्वादिति भावः । **अनुपपन्नेति** । विशेष्यविशेषणत्वयोः संसर्गविषयतानिरूप्यत्वेन सम्बन्धं विना विशिष्टबुद्धेरेवासम्भवात्सम्बन्धभानं तद्वाच्यतां विनाप्युपपन्नमिति भावः । **अन्यथेति** । विशेष्यविशेषणभावमन्तरेणाप्येकवाक्यताभ्युपगमे इत्यर्थः । **सामानाधिकरण्यमिति** । एकाश्रयवृत्तित्वमित्यर्थः । पूर्वोत्तरभावः = स्वोत्तरसमयोत्पत्तिकत्वम्, स्वपूर्वसमयवृत्तित्वं वा । व्याप्यत्वम् = अविनाभावित्वम् । तुमुनाद्यन्ते शाब्दबोधदिशमाह—**तथाचेति** ।

ॐ काशिका ॐ

चाननुभवात् । समानकर्तृकत्वादिकं तु वस्तुसत् क्त्वादेः साधुत्वनियामकं स्यादत आह—**अयं भाव इति** । अयं = वक्ष्यमाणः । **सर्वसिद्धा** = सर्वानुभवसिद्धा । **अन्यथा** = विशेषणविशेष्यभावमन्तराप्येकवाक्यत्वे । **भुङ्क्ते व्रजतीति** । 'एककर्तृका वर्तमानकालिकी भुजिक्रिया' 'एककर्तृका वर्तमानकालिकी व्रजनक्रिये'ति क्रियाद्वयमुख्यविशेष्यताको बोधोऽनुभवसिद्धो, न तु तत्रैकमुख्यविशेष्यताशालित्वरूपमेकवाक्यत्वमनुभवसिद्धम् । 'भुक्त्वा व्रजती'त्यत्रापि भोजनमेककर्तृकं व्रजनं चेति समूहालम्बनात्मकबोधाङ्गीकारे एकवाक्यत्वानुपपत्तिः, कर्तुर्वाच्यत्वाङ्गीकारे भोजनकर्तुः क्त्वार्थस्याख्यातार्थकर्तर्यभेदान्वयसंभवेन 'पचति भवती'तिवदेकवाक्यता यद्यपि संभवति 'चैत्रेण भुक्त्वा गम्यते' इत्यत्रापि भोजनकर्त्रभिन्नचैत्रकर्तृगमनकर्मेति बोधाभ्युपगमात् । अत एव समानकर्तृत्वघटकाभेदांशे न शक्तिः, निष्फलत्वात्, उक्तरीत्यापि तत्रैकवाक्यत्वसंभवोऽस्ति, तथापि कतुर्वाच्यत्वं सूत्रान्न लभ्यते इति ग्रन्थकृतैव वक्ष्यत इति संतोष्टव्यम् ।

समानकर्तृकत्वपूर्वोत्तरकालिकत्ववदन्यदपि संसर्गतया भासमानं क्त्वाद्योत्यं, समानकर्तृकयोरित्यादेरुपलक्षणत्वादित्याशयेनाह—**जन्यत्वमित्यादि** । परे तु—उपलक्षणत्वे मानाभावात्

'भोक्तुं पचति' भुक्त्वा तृप्त' इत्यादौ भोजनजनिका पाकक्रिया, भोजनजन्या

❀ दर्पणः ❀

भोजनजनिकेति । जनकत्वस्यात्र संसर्गतेति स्फुटीकर्त्तुमियमुक्तिः । बोधाकारस्तु,- 'भोजनविशिष्टे'त्येव, जनकत्वस्यापदार्थतयाऽप्रकारत्वात् । क्रिययोर्जन्यजनकभावस्यापि

❀ दर्पणः ❀

तन्मानान्तरगम्यत्वान्न क्त्वाद्योत्यमित्याहुः । **भोजनजनिकेति ।** 'भोक्तुं पचती'त्यत्र भोजनपचिक्रिययोर्जन्यजनकभावसंबन्धस्तुमुन्द्योत्यः, तुमुन्ण्वुलौ क्रियायां क्रियार्थाया'मित्युक्तेः । तादर्थ्यं च जन्यजनकभावरूपमिति भावः । तादर्थ्यंवत् समानकर्तृकत्वमपि क्रिययोः संसर्गतया भासते, शब्दशक्तिस्वभावादत एव विभिन्नकर्तृकक्रियाद्वयतात्पर्यको भोक्तुं पचतीति न प्रयोगः । परे तूद्देश्यत्वनिरूपकत्वरूपं तादर्थ्यं तुमुनादिद्योत्यं संसर्गतया भासते, तच्च तदिच्छाधीनेच्छाविषयत्वम्, 'तुमुन्ण्वुलौ–' इत्यत्र 'भविष्यति' इत्यनुवृत्तेर्भविष्यत्त्वमपि तद्द्योत्यम्, तथा च भविष्यद्भोजनोद्देश्यको भोजनकर्तृकः पाक इति बोधः, तुमुंस्तु न कर्तरि, 'अव्ययकृतो भावे' इत्युक्तेः—'कर्तरि कृ'दित्यस्यात्राप्रवृत्तेः । अनिर्दिष्टार्थकेष्वेतत्प्रवृत्तेः, एतेन–'तुमुनाख्यातार्थकर्त्रोः परस्परमभेदान्वयेनैव विभिन्नकर्तृकक्रियाद्वयतात्पर्यकताद‍ृशप्रयोगापत्त्यभावेन समानकर्तृकत्वं न संबन्ध' इत्यपास्तम् । भोक्तुं पच्यते भोक्तुं स्थीयत इत्यादौ तदसंभवाच्च । न च तत्रापि 'देवदत्तेने'त्यध्याहारात् तृतीयार्थकर्तर्यभेदान्वयान्नानुपपत्तिरिति वाच्यम्, अध्याहारं विनापि वाक्यार्थबोधस्यानुभवसिद्धत्वादिति दिक् । तुमुन्ण्वुलौ–' इति सूत्रविहितो ण्वुल् तु 'कर्तरि कृत्' इति कर्तर्येव, संबन्धश्च क्रिययोः पूर्वोक्त एव, एवं च 'कृष्णं दर्शको याती'ति वाक्यात् कृष्णकर्मकभविष्यद्दर्शनोद्देश्यकं दर्शनकर्तृकर्तृकं वर्तमानकालिकं यानमिति बोध इति वदन्ति । युक्तं चैतत्,—कृष्णदर्शनोद्देश्यकयानेन मार्गस्थजनान्तरदर्शनोत्पादेऽपि 'जनं द्रष्टुं याती'ति प्रयोगविरहात्, 'कृष्णं द्रष्टुं याति न यवनादिक'मिति प्रयोगाच्च । अत एव नव्यतार्किकाः—कर्तृकर्तृकत्वविशिष्टेच्छाधीनेच्छाविषयत्वस्य तुमुन्वाच्यतामनुमन्यन्ते । अत एव चतुर्थीकारके व्युत्पत्तिवादेऽत्र चाहर्तुमिति तुमुनन्तार्थः, स्वरयमभिव्याहृतक्रियान्वयिस्वार्थप्रयोजनकत्वान्वय्याहरणमित्युक्तम् । स्वार्थप्रयोजनकत्वस्य वाच्यतां विनान्वयोत्युक्तेरसंगतिः । अन्यथा तस्य वृत्त्यनियामकतया तत्संबन्धावच्छिन्नप्रतियोगिताया अप्रसिद्ध्या तथाविधप्रतियोगिताकयवनादिगोचरदर्शनाभावस्य बोधयितुमशक्यत्वात् । उक्तसंबन्धेन यवनादिगोचरदर्शनविशिष्टगमनाश्रयत्वाभावएवप्रथमान्तार्थो बोध्यत इति तु न । 'कृष्णं द्रष्टुं स्थीयते न यवनादिक'मित्यादौ तदसंभवादिति दिक् ।

शाब्दिकनये तु सकलविशेषणविशिष्टमुख्यविशेष्यक्रियाया एव सर्वत्र बोधस्वीकारान्नानुपपत्तिरिति ध्येयम् । 'भोक्तुमिच्छती'त्यादौ 'समानकर्तृकेषु' इति तुमुन्, इच्छार्थेषु तुमुन्प्रकृतिभूतधात्वर्थसमानकर्तृकार्थप्रतिपादकेषूपपदेषु धातोस्तुमुन्निति तदर्थः । क्रियार्थक्रियोपपदाभावार्थमिदम्, तुमुन्नर्थविषयित्वविशिष्टकर्तृकर्तृकत्वसंबन्धेन प्रकृत्यर्थस्येच्छायामन्वये तात्पर्यग्राहक-

तृप्तिरिति बोधः। अत एव जलपानानन्तर्यस्य तृप्तौ सत्त्वेऽपि,—'पीत्वा

❀ दर्पणः ❀

सम्बन्धत्वे युक्तिमाह—**अत एवेति**। जन्यत्वस्य संसर्गत्वाभ्युपगमादेवेत्यर्थः।

❀ काशिका ❀

स्तुमुन्, परमते तु-तस्य तद्वाच्यं परकर्तृकभोजनेच्छायां भोक्तुमिच्छतीति प्रयोगवारणाय समानकर्तृकत्वस्यापि संवन्धमध्यनिवेशः। 'शक्नोति भोक्तुं' 'धृष्णोति पठितुं' 'जानाति पठितु'मित्यादौ 'शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन्'—इति तुमुन्। आद्ये सामर्थ्यापरपर्यायशक्तिरूपधात्वर्थे प्रकृत्यर्थस्य प्रयोजकत्वसंवन्धस्तुमुन्द्योत्यः, द्वितीये शङ्काराहित्यरूपप्रागल्भ्यघटकशङ्काया विषयित्वं संवन्धः, प्रयोजकत्वं वोक्तप्रागल्भ्ये संबन्धः, तृतीये विषयित्वं संवन्धः स्पष्ट एव। अत्रापि सर्वत्र समानकर्तृकत्वमपि संवन्धे निवेश्यम्, अत्र यः संवन्धः स परमते तद्वाच्यः, अत्र शक्नोतेरर्थे समभिव्याहृततत्तद्धात्वर्थोऽन्तर्भावनीयः, तथा हि गलाधःसंयोगानुकूलक्रियायां व्यापारे शक्तौ च शक्नोतेर्वृत्तिः। तत्र शक्तौ शक्त्याख्या, इतरत्र लक्षणा, तत्र तुमुन्प्रकृतिर्भुज्यादिस्तात्पर्यग्राहकः। एतादृशेऽर्थे वृत्तिः कर्मप्रत्ययस्थले एव न तु कर्तृप्रत्ययस्थले, प्रयोजनविरहात्, तत्र प्रयोज्यत्वसम्बन्धेन शक्त्यन्वितव्यापारस्य जन्यत्वसम्बन्धेनोक्तक्रियायामन्वयः, तथाविधक्रियारूपफलशालित्वादोदनादेः कर्मत्वं, एवञ्च 'शक्यते ओदनो भोक्तु'मित्यतः शक्तिप्रयोज्यव्यापारजन्यगलाधःसंयोगानुकूलौदनाश्रयिका क्रियेति बोधः। **तार्किकनये** तु—तथाविधक्रियाश्रयतावानोदन इति बोधः। शक्तिश्च मीमांसकनये पदार्थान्तरं, न्यायनये तत्तत्कारणानुकूलासाधारणकारणकलापः, यथा प्रकृते प्रदीप्तजठरानलसंयोगादिः।

अस्ति भवति विद्यते वा भोक्तुम्। अत्रान्नरूपकर्तृकर्तृकसत्तायां जनकत्वसंवन्धेन तुमुन्प्रकृत्यर्थस्यान्वयः, संभवरूपे वास्त्याद्यर्थे विषयित्वसंवन्धेनान्वयः। **पर्याप्तो भोक्तुं** प्रवीणो भोक्तुं कुशलो भोक्तुम्। अत्र 'पर्याप्तिवचनेष्वलमर्थेषु' इति तुमुन्। पर्याप्तिः = पूर्णता तद्वाचिषु सामर्थ्यप्रतिपादकेषूपपदेषु तुमुन् भवतीति तदर्थः। अत्र प्रयोजकत्वं, विषयित्वं वा प्रकृत्यर्थस्य कौशल्यादिनिष्ठं तुमुन्द्योत्यम्। पर्याप्तो भोक्तुमित्यादौ पर्याप्तादिशब्दः समर्थार्थः। अत्र प्रथमपदानुपादाने अलं भुक्त्वेत्यत्रातिप्रसङ्गः। अत्रालंशब्दो'ऽलं कंसं हन्तुं कृष्णः' इत्यत्र 'पर्याप्तिवचन इति प्राप्तिः, द्वितीयपदानुपादाने पर्याप्तं भुङ्क्ते इत्यत्रातिप्रसङ्गः, तदुपादाने तु नैव दोषः, अदनीयगतप्रभूततारूपपर्याप्तेरेव तत्र गम्यमानत्वात् न तु सामर्थ्यस्येत्यलम्।

कालः समयो वेला वा भोक्तुम्। अत्र 'कालसमयवेलासु तुमुन्' इति तुमुन्। अत्र कालनिष्ठो योग्यतालक्षणो भोजनस्य संवन्धस्तुमुन्द्योत्यः, अत्र प्रैषादिग्रहणानुवर्तनात् प्रैषादिविवक्षायामेव तुमुन्, नानुवादे,—भूतानि कालः पचती'त्यादावित्यलमतिविस्तरेण। प्रकृतमनुसरामि—'भुक्त्वा तृप्त' इति वाक्यजं बोधमाह—**भोजनजन्येति**। भोजनजन्या या तृप्तिस्तदाश्रय इत्यर्थः, 'गत्यर्थाकर्मके'ति सूत्रेण कर्तरि क्तप्रत्ययविधानात्। नन्वानन्तर्यसमानकर्तृक-

तृप्त' इति न प्रयोगः। सामानाधिकरण्यस्यापि संसर्गत्वेनार्थात्समानकर्तृकत्वमपि लब्धम्। 'भुक्त्वा व्रजती'त्यादौ पूर्वोत्तरभावः, सामानाधिकरण्यञ्च संसर्ग इति–भोजनसमानाधिकरणा तदुत्तरकालिकी व्रजन-

॥ दर्पणः ॥

'जलपानानन्तर्यस्ये'त्यनेन पूर्वोत्तरभावसम्बन्धसत्त्वं बोध्यते। तज्जन्यत्वविवक्षायां तु प्रयोग इष्ट एवेति भावः। सामानाधिकरण्यस्य संसर्गताभ्युपगमस्तु—यत्र पूर्वापरीभावापन्नभोजनतृप्त्योर्वैयधिकरण्यं तत्र–भुक्त्वा तृप्यती'तिप्रयोगवारणाय। अव्यवहितोत्तरत्वस्य तु—[दिनान्तरित—] पूर्वकालवृत्तिसमानाधिकरणभोजनादिक्रियामादाय त्क्त्वावारणाय। व्यवधानञ्च—तात्पर्यवशाद्दण्डमुहूर्त्तादिना ग्राह्यम्, अतो भोजनानन्तरं दण्डादिव्यवधानेपि न तादृशप्रयोगानुपपत्तिरिति बोध्यम्।

ननु पूर्वोत्तरभावस्य सम्बन्धताभ्युपगमेऽध्ययनकालेऽ'धीत्य तिष्ठती'ति प्रयोगानुपपत्तिः, स्थितावध्ययनानन्तर्याभावात्। एवं 'मुखं व्यादाय स्वपिती'ति न स्यात्, ओष्ठपुटविभागरूपव्यादानकाल एव स्वापादिसत्त्वे तादृशप्रयोगस्येष्टत्वेन व्यादानस्य

॥ काशिका ॥

त्वयोरेव तत्र संसर्गतया भानमस्तु, किं गुरुशरीरजन्यत्वस्य संसर्गतया भानस्वीकारेणेत्यत आह–अत एवेति। जन्यत्वस्य संसर्गतया भानस्वीकारादेवेत्यर्थः। न प्रयोग इति। भोजनजन्यतृप्तौ जलपानजन्यत्वाभावादिति भावः। समानकर्तृकत्वमपीति। 'भुक्त्वा व्रजती'त्यत्र व्रजने भोजनाधिकरणवृत्तित्वस्य भाने क्रिययोरधिकरणनिष्ठैक्यस्याप्यर्थसिद्धत्वात्, समानाधिकरण्यस्य तदैक्यं विनानुपपद्यमानत्वात्। 'मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा' इत्यत्र 'स्थितस्ये'त्यध्याहारात् स्थितिक्रियासमानकर्तृकत्वादिकमस्तीति क्त्वाप्रत्ययस्य नानुपपत्तिः।

पूर्वोत्तरभाव इति। पूर्वकालवृत्तित्वोत्तरकालवृत्तित्वसमुदाय इत्यर्थः, एतस्य संसर्गतया भानानभ्युपगमे व्रजनस्य पूर्वकालवृत्तित्वेऽपि भुक्त्वा व्रजतीति प्रयोगापत्तिः, सामानाधिकरण्यस्य तथात्वानभ्युपगमे भिन्नकर्तृकतथाविधक्रियायुगलाभिप्रायेण तदापत्तिरित्युभयोः संसर्गत्वानुसरणम्। पूर्वोत्तरभावेऽव्यवधानांशोऽपि निवेश्यः। अन्यथा पूर्ववर्षोत्पन्नं श्वशुरगृहे भोजनमेतद्वर्षाधिकरणकं व्रजनं चादाय 'श्वशुरगृहे भुक्त्वा व्रजती'ति प्रयोगापत्तिः। अव्यवधानं तु तात्पर्यवशात् क्वचिद् दण्डेन क्वचिन्मुहूर्तेन क्वचित् प्रहरादिना यथायथं ग्राह्यम्। दण्डादिना व्यवधानं च स्वप्रागभावाधिकरणदण्डादिप्रागभावानधिकरणत्वं, स्वं = समभिव्याहृतव्रजनादिक्रियाविशेषः। तथा चाव्यवहितपूर्वत्वं कालनिष्ठं तादृशाव्यवधानविशिष्टतत्क्रियाप्रागभावाधिकरणत्वं, भोजनोत्तरं दण्डोत्तरं गमनस्थले तु भोजनाधिकरणक्षणादेस्तत्र व्रजनप्रागभावाधिकरणदण्डप्रागभावाधिकरणतया न तथाविधप्रयोगप्रसङ्गः। विशेष्यदलनिवेशाद्व्रजनोत्तरं भोजनतात्पर्येण न 'भुंक्ते' इति प्रयोगप्रसङ्गः।

क्रियेति बोधः। 'अधीत्य तिष्ठति', मुखं व्यादाय स्वपिती'त्यादावध्ययन-व्यादानयोरभावकालेऽप्रयोगाद्यदा यदास्य स्थितिः, स्वापश्च—तदा तदाध्ययनं मुखव्यादानञ्चेति—कालविशेषावच्छिन्नव्याप्यत्वबोधाद्—व्याप्यत्वं, सामानाधिकरण्यञ्च संसर्गः।

❀ दर्पणः ❀

स्वापपूर्वकत्वाभावादत आह—**अधीत्य तिष्ठतीत्यादि। कालविशेषेति।** विभिन्नकालिकयोः कालिकसम्बन्धघटितव्याप्यव्यापकभावाभावेन तत्सम्बन्धावच्छिन्नत्वस्यापि संसर्गतोपगन्तव्या। न केवलं तत्र व्याप्यत्वस्यैव संसर्गता, किन्तु सामानाधिकरण्यस्यापीत्याह—**सामानाधिकरण्यञ्चेति।** नातो विभिन्नकर्तृकैककालिकाध्ययनादिकमादायोक्तप्रयोगापत्तिः। एवञ्च 'समानकर्तृकयो'रिति

❀ काशिका ❀

वस्तुतस्तद्व्रजनकाले भोजनाधिकरणसमय ध्वंसाधिकरणत्वरूपोत्तरत्वविरहान्नोक्तातिप्रसङ्ग इति तन्ननिवेश्यम्। 'अद्य भुक्त्वा श्वो गन्ता' 'मार्गशीर्षे उद्वाह्य पौषे काशीं गत' इत्यादिस्थले दिनमासादिनोक्तव्यवधानाभावो विवक्षित इति नानुपपत्तिः। प्रागभावानभ्युपगमे तु—स्वाधिकरणक्षणोत्पत्तिकध्वंसप्रतियोगिदण्डाधिकरणकोत्पत्तिकध्वंसाप्रतियोगित्वमव्यवधानं, तदधिकरणसमयोत्पत्तिकध्वंसप्रतियोगित्वं तत्पूर्वत्वम्। परं तु प्रकृते एतन्निवेशानावश्यकता पूर्ववदवसेया। **कालविशेषेति।** तत्कालावच्छिन्नस्वाधिकरणनिष्ठात्यन्ताभावप्रतियोगितानवच्छेदकमुखव्यादानत्वादिमत् सामानाधिकरण्यरूपं व्याप्यत्वमित्यर्थः। **कालविशेषावच्छिन्नेति।** अत्र—कालः क्षणादिरूपः सूक्ष्मकालो ग्राह्यः, नातः स्थूलकालावच्छिन्नव्याप्यत्वमादाय मुखव्यादानोत्तरं मुखव्यादानशून्यकालिकस्वापव्यक्त्यभिप्रायेण तत्काले मुखं व्यादाय स्वपितीति प्रयोगापत्तिः। अत एव निरन्तराध्ययनशालिन्येवायमधीत्य तिष्ठतीति प्रयोगो, न तु कदाचिदध्ययनकर्तरीति व्यवस्थोपपद्यते। तत्राप्युक्तव्याप्यत्वस्य संबन्धतया भानान्निरन्तराध्ययनविरहिपुरुषस्थितौ अध्ययनव्याप्यत्वाभावात् तादृशप्रयोगाप्रसङ्गात्। परं तु स्वसमानाधिकरणेत्यत्र स्वशब्देन तत्पुरुषीयनिद्रादिशून्यकालिकस्थितिसामान्यं ग्राह्यं,—नात उक्तदोषतादवस्थ्यम्। 'मुखं व्यादाये'त्यत्र तु स्वपदेन तु तत्तत्स्वापव्यक्तिर्ग्राह्या, नातो व्यादानशून्यकाले तादृशप्रयोगापत्तिर्व्यादानकाले तादृशप्रयोगोपपत्तिश्चेति प्रतिभाति। स्थादिधातुरपि तादृशस्थितित्वाद्यवच्छिन्नपरः, नात उद्देश्यतावच्छेदकावच्छेदेन तादृशव्याप्यत्वान्वयानुपपत्तिः। यद्यप्येतादृशव्याप्यत्वभानेनैवातिप्रसङ्गनिरासे सामानाधिकरण्यस्य संबन्धताभ्युपगमो निरर्थकस्तथापि सामानाधिकरण्यघटिता व्याप्तिः संबन्धतया स्वीकार्येति सूचनाय—'सामानधिकरण्यं च संसर्ग' इत्युक्तम्। अथवोक्तव्याप्तौ सामानाधिकरण्यं न प्रवेश्यमिति यथाश्रुतमेव रमणीयम्। अथवा कालिकसंबन्धावच्छिन्नं व्याप्यत्वं संबन्ध इत्येव कालविशेषावच्छिन्नेत्यादिग्रन्थतात्पर्यार्थः। एवं च कादाचित्का-

—एवञ्चान्यलभ्यत्वान्न सूत्रात्तेषां वाच्यत्वलाभः—

ॐ दर्पणः ॐ

सूत्रविहितक्त्वान्तस्थले समानकर्तृकत्वरूपसामानाधिकरण्यसंसर्गस्य शाब्दबोधविषयता सार्वत्रिकी। जन्यत्वादीनां तु तात्पर्य्यवशात् क्वाचित्की सेति भावः।

अन्येतु—सामानाधिकरण्यस्येव पूर्वोत्तरभावस्यापि क्त्वान्तजबोधविषयता सार्वत्रिकी, 'मुखं व्यादाये'त्यादौ 'सुप्त्वा मुखं व्यादत्त' इत्यत्रेव व्यादानोत्तरमपि स्वापानुवृत्तेस्तथा पौर्वापर्य्यमादाय प्रयोगोपपत्तिः। एवञ्चोक्तसम्बन्धद्वयातिरिक्तसम्बन्धभानस्यैव क्वाचित्कत्वमित्याहुः। न च,—'अवजानासि मां यस्मादतस्ते न भविष्यति। मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा॥' इत्यत्र मत्प्रसूतिमनाराध्य ते प्रजा न भविष्यतीत्यर्थाद्भिन्नकर्तृकादपि क्त्वादर्शनात् समानकर्तृकत्वस्यापि क्त्वान्तजन्यबोधविषयता न सार्वत्रिकीति वाच्यं, सूत्रस्वरसात्तादृशस्थले स्थित्यादिक्रियामध्याहृत्याऽनाराध्य स्थितस्येति बोधस्याभ्युपगमेन सार्वत्रिकत्वाक्षतेरिति। **अन्यलभ्यत्वादिति।** आकाङ्क्षानियम्यत्वाद्वाक्यशक्तिलभ्यत्वाद्वेत्यर्थः।

ॐ काशिका ॐ

ध्ययनकर्तृपुरुषस्थितेरपि पुरुषान्तरीयाध्ययननिरूपितोक्तव्याप्यनाश्रयतया'धीत्य तिष्ठती'ति प्रयोगापत्तिरतः सामानाधिकरण्यस्यापि संबन्धत्वपुरस्कारः। **स्वसमानाधिकरणेति**—स्वशब्दः पूर्वोक्तार्थक एवातो न पूर्वोक्तदोषावकाशः, तत्तत्कालविशेषगर्भस्वसमानकालिकत्वेन सामानाधिकरण्यसहितेन तादृशस्थितित्वावच्छेदेनान्वयो लाघवात् स्वीकर्तुमुचित इति चेत्, यदीयस्वापकाले बहुधा मुखव्यादानं यदीयस्थितिकाले तथाध्ययनं तत्रैव तादृशप्रयोग इष्यते, न तु कादाचित्कं यदीयस्वापादिसमये मुखव्यादानादिकं तत्रेत्यतोऽतिप्रसङ्गवारणायोक्तव्याप्यत्वभानानुसरणमिति प्रतिभाति।

यदि तूक्तस्थलेऽपि स प्रयोगः प्रामाणिकस्तदेदमेवोचितं, प्रकृतग्रन्थस्याप्यत्रैव तात्पर्यमिति वास्तु। अध्ययनमुखव्यादानोत्तरमपि स्वापस्थितिसत्त्वेन पूर्वकालत्वादेः संबन्धस्य सत्त्वान्न क्त्वः साधुत्वानुपपत्तिः। स्पष्टं चेदं प्रकृतसूत्रभाष्ये। न च 'भुञ्जाने भुङ्क्ते' इति प्रयोगवारणाय समभिव्याहृततत्फलविशेषानुकूलयावक्रियावधिकपूर्वत्वस्यैव ग्राह्यतया कथमुक्तरीत्या 'मुखं व्यादाय स्वपिती'ति प्रयोग इति वाच्यम्, तत्र फलभेदकल्पनया मुखव्यादानोत्तरसुखविशेषादिफलकव्यापारसामान्यपूर्वकत्वस्य मुखव्यादाने संभवेनादोषात्। 'भुक्त्वा भुङ्क्ते' इति प्रयोगस्य तु नोक्तस्थले उक्तरीत्यापत्तिः, तत्र तावद्व्यापारजन्यतृप्तिरूपफलैक्यविवक्षणात्, विवक्षायाः प्रयोगानुसारित्वात् 'मध्याह्ने भुक्त्वा रात्रौ भुङ्क्ते' इति प्रयोगस्त्विष्यत एवोक्तरीत्योपपद्यते च। तात्पर्यसत्त्वे एकभोजनस्थलेऽपि 'ओदनं भुक्त्वा रोटिकां भुङ्क्ते' इत्याहुः। अत्र केचन नैयायिकाः—प्रागभावावच्छिन्नकालवृत्तित्वरूपं पूर्वकालिकत्वं कर्ता च क्त्वार्थः, तत्र पूर्वकाल-

❀ काशिका ❀

वृत्तित्वे पूर्वंकाले तद्घटकप्रागभावे एव शक्तिर्वा, कर्तरि तु शक्तिर्निरूढलक्षणा वा। प्रथमपक्षे पूर्वकालवृत्तित्वस्याश्रयत्वसंबन्धेन प्रकृत्यर्थभोजनादावन्वयः। द्वितीयपक्षे—पूर्वकालस्य कालिकसंबन्धावच्छिन्नाधेयत्वं संसर्गः, तृतीयकल्पे—प्रागभावस्य स्वाधिकरणकालवृत्तित्वं संसर्गः। पक्षत्रयेऽपि—समभिव्याहृतव्रजनादिक्रियायाः प्रतियोगित्वसंबन्धेन प्रागभावे प्रकारता, प्रकृत्यर्थभोजनादेः क्त्वार्थे कर्तरि स्वनिष्ठकर्तृत्वनिरूपकत्वसंबन्धेन विशेषणत्वम्। तदर्थंकर्तरि व्रजतीत्याख्यातोपात्तकर्तृत्वस्याश्रयतया विशेषणत्वमिति व्रजनप्रागभावावच्छिन्नकालवृत्तिभोजनानुकूलकृतिमान् व्रजनकर्तृत्वाश्रय इति बोधः। 'पक्त्वा भुज्यते ओदन' इत्यत्र तूक्तविधपाककर्तुः क्त्वान्तार्थस्य भुजधात्वर्थव्यापारे स्वनिष्ठकर्तृकतानिरूपकत्वसंबन्धेनान्वयः। तथा च भोजनप्रागभावावच्छिन्नकालवृत्तिपाककर्तृकर्तृकव्यापारजन्यगलाधःसंयोगानुकूलक्रियाश्रय ओदन इति बोधः। यत्क्रियाव्यक्तौ क्त्वार्थकर्तुः साक्षात् कर्तृत्वद्वारा वान्वयस्तत्क्रियाव्यक्तेरेव क्त्वार्थप्रागभावेऽन्वयं इति व्युत्पत्त्यङ्गीकारान्नान्यकर्तृकव्रजनपूर्वकालवृत्तिकस्वकर्तृकव्रजनोत्तरकालिकभोजनकर्तरि भुक्त्वा व्रजतीति प्रयोगप्रसङ्गः। 'चैत्रो भुक्त्वा व्रजती'त्यत्र तु चैत्रे आख्यातार्थान्वितक्त्वार्थकर्तुरभेदेन विशेषणत्वं विशेष्यत्वं वा। 'चैत्रस्य भुक्त्वा व्रजन'मित्यत्र चैत्रकर्तृकं यद्व्रजनपूर्वकालिकभोजनं तत्कर्तृकर्तृकं व्रजनमिति बोधः। व्रजने तथाविधभोजनकर्तुः स्वनिष्ठकर्तृतानिरूपकत्वं संबन्धः। 'चैत्रो न भुक्त्वा व्रजती'त्यत्र नञा वर्तमानव्रजनकर्तृत्वविशिष्टव्रजनपूर्वकालिकभोजनकर्तृभेदश्चैत्रे प्रत्याय्यते। तेन यदा चैत्रो भोजनं करोति न तदुत्तरं गमनं तदा गमनं करोति न तु तत्पूर्वं भोजनं तदा च तादृशप्रयोगनिर्वाहः, येन पुरुषेण कदापि भोजनोत्तरं गमनादिकं न कृतं तत्तात्पर्यकोऽयं भुक्त्वा न व्रजतीति प्रयोगोऽप्युपपद्यते। एतेन—चैत्राभिन्ने उक्तविधभोजनकर्तरि वर्तमानव्रजनकर्तृत्वाभावबोधोऽभ्युपेयत इति निरस्तम्। उक्तस्थलेऽनिर्वाहादिति दिगित्याहुः।

अपरे पुनस्तार्किका एवं वर्णयांचक्रुः—प्रागभावशक्यः कर्त्ता लक्ष्यः, प्रागभावे प्रकृत्यर्थस्य स्वाधिकरणकालवृत्तित्वसंबन्धेन कालिकसम्बन्धावच्छिन्नवृत्तित्वसंबन्धेन वान्वयः। कर्त्रैकदेशकृतौ त्वनुकूलत्वविषयित्वरूपसंबन्धद्वयेनोक्तसंबन्धेन प्रकृत्यर्थान्वितप्रागभावस्योत्तरक्रियायां प्रतियोगिताविशेषणत्वम्। भोजनकर्तुः स्वनिष्ठकर्तृतानिरूपकत्वसंबन्ध उत्तरक्रियायां विशेषणताघटकः, तावतैव समानकर्तृकत्वलाभः। इत्थं च चैत्रो भुक्त्वा व्रजतीति वाक्यात् चैत्राभिन्नभोजनकर्तृकर्तृकभोजनाधिकरणकालवृत्तिर्भोजनवृत्तिर्वा यः प्रागभावस्तत्प्रतियोगि व्रजनं तत्कर्तृत्ववांश्चैत्र इति बोधः। प्रथमान्तपदासमभिव्याहारे तु व्रजनकर्तृत्वमुख्यविशेष्यक एव बोधः। चैत्रेण भुक्त्वा व्रजनमित्यादौ तु व्रजनादिमुख्यविशेष्यक एव सः। क्त्वार्थद्वयस्यैकक्रियाव्यक्तावेवान्वय इति नियमात्तत् पुरुषान्तरकर्तृकव्रजनप्राक्कालिकस्वकर्तृकव्रजनोत्तरकालिकभोजनकर्तरि तादृक्प्रयोगापत्तिः। चैत्रो न भुक्त्वा व्रजतीत्यत्र तथाविधव्रजनकर्तृत्वाभाववांश्चैत्र इति बोध इति। इत्यादिमतानि नाश्रयितुं योग्यानीत्याह—एवञ्चेति। एवं = पूर्वकालत्वादीनां संसर्गत्वपुरस्कारे। अन्यलभ्यत्वाद्वृत्तिं विनैव

—इति युक्तम्—'अव्ययकृतो भावे' इति। एवञ्च प्रकृत्यर्थक्रिययोः संसर्गे तात्पर्य्यग्राहकत्वरूपं द्योतकत्वं क्त्वादीनाम्। अत एव—'समानकर्त्तृक-यो'रिति सूत्रे 'स्वशब्देनोपात्तत्वान्ने'ति भाष्यप्रतीकमादाय '—पौर्वापर्य्य-काले द्योत्ये क्त्वादिर्विधीयते, न तु विषये इति भाव इति—' कैयटः।

❀ दर्पणः ❀

क्रिययोः संसर्ग इति। प्रकृत्यर्थविशेषकत्वरूपस्य तस्यासम्भवेपि निरुक्तं तदिह बोध्यमित्यर्थः। **अत एवेति।** क्त्वः समानकर्त्तृकत्वादिद्योतकत्वादेवेत्यर्थः। **भाष्यप्रतीकमिति।** 'इदं कस्मान्न भवति—पूर्वं भुङ्क्ते पश्चाद् व्रजती'ति, स्वश-ब्देनोपात्तत्वा'दिति भाष्यम्। तत्र समानकर्त्तृकत्वेन पूर्वकालत्वेन च क्त्व आपाद-नम्। **न तु विषय इति।** न तु प्रयोगघटकयत्किञ्चित्पदबोध्य इत्यर्थः, 'उक्तार्थाना-मप्रयोग' इति न्यायादिति भावः। तथा च 'समानकर्त्तृकयो'रिति निर्द्धारणे षष्ठी,

❀ काशिका ❀

संसर्गविधया भानसंभवात्। अन्यथान्वयमात्रे शक्तिस्वीकारापत्तेरिति भावः। आद्यपक्षे व्रजनपूर्व-कालिकभोजनकर्तेत्यादिक्रमेण बोधस्वीकारेऽनुभवसिद्धस्य पूर्वक्रियाप्रकारकोत्तरक्रियाविशेष्यक-बोधस्यानुपपत्तिरूपमपि दूषणं द्रष्टव्यम्। अत एव **मणिकारैः**—पूर्वकालत्वस्य वाच्यत्वपक्षे पूर्वक्रियाविशेष्यक एव बोधः स्यान्न तूत्तरक्रियाविशेष्यकस्तथा चानुभवविरोध इति दूषणमभि-धायानन्तरमस्य क्त्वावाच्यत्वमङ्गीकृतम्। न च पूर्वकालत्वस्य वाच्यत्वेऽपि तस्य निरूपकता-संबन्धेनोत्तरक्रियायामन्वयोपगमेनानुभवसिद्धो बोधो निर्वहत्येवेत्याशङ्क्य न भुक्त्वा व्रजतीत्यत्र निरूपकत्वस्य वृत्त्यनियामकतया तत्संबन्धावच्छिन्नप्रतियोगिताया अप्रसिद्धतया तादृशप्रतियोगिता-काभावस्य बोधयितुमशक्यत्वम्। आश्रयत्वसंबन्धावच्छिन्नप्रतियोगिताकाभावबोधाभ्युपगमे भोजनोत्तरं गमनकर्तर्यपि नञ्घटितप्रयोगापत्तिः। आनन्तर्यस्य तु आश्रयत्वसंबन्धावच्छिन्नप्रति-योगिताकाभावः प्रत्याययितुं शक्यत एवेत्यपि तैरभ्यधायि। अन्यलभ्यत्वादेवोत्तरकालत्वादेस्तत्सं-बन्धतयैव भानमङ्गीकृतं नव्यतार्किकैरपीत्यभाणि—**गुरुचरणैश्च**पके इत्यलं पल्लवितेन। नन्वेवं 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेते'ति वाक्येन दर्शपूर्णमासोत्तरकालः सोमो विधीयत इति मीमांसकसिद्धान्तासंगतिः, कालस्यावाच्यत्वादिति चेन्न। उत्तरकालत्वसंबन्धेन दर्शपूर्णमासवैशिष्ट्यं विधीयत इति स्वीकारेणाक्षतेः। तावतापि तत्सिद्धान्तफलस्य दर्शपूर्णमासाभ्यां प्राक् सोमानुष्ठाने प्रत्यवायस्य सिद्धेः दर्शाधिकरणे सोमाकरणे च तत्सिद्धेः। **प्रकृत्यर्थेति।** प्रकृत्यर्थश्च क्रिया चेति द्वन्द्वः। अथवा क्त्वाप्रत्ययस्य समभिव्याहृतप्रत्ययस्य च प्रकृतिर्ग्राह्येति नासंगतिः। **स्वशब्दे-नोपात्तेति।** इह कस्मान्न भवति पूर्वं भुङ्क्ते पश्चाद्व्रजतीति पूर्वपक्षस्य समाधानमुक्तं—स्वश-ब्देनेत्यादि। **द्योत्ये इति।** अनेन पूर्वकालत्वोत्तरकालत्वादेर्द्योतकत्वमेव क्त्वादीनां न तु वाचकत्वमिति स्पष्टमेव सूच्यते तेन संसर्गतयैव भानं कैयटाभिमतमिति भावः। **परिमलकारा-**

यत्तु–'समानकर्तृकयो'रिति सूत्रात्समानकर्तृकत्वं क्त्वावाच्यम्, अन्यथौदनं

❀ दर्पणः ❀

'पूर्वकाल' इति च षष्ठ्यर्थे बहुव्रीहिरिति कैयटाशयः। वाक्यार्थस्तु पूर्वमेवोक्तः। न च पूर्वकालस्य पूर्वादिशब्देनाभिधाने क्त्वोऽसाधुत्वे 'पूर्वं भुक्त्वा पश्चाद् व्रजती'त्यत्र क्त्वोनुपपत्तिस्तदवस्थैवेति वाच्यं, भाष्यकृतैव तत्समाधानात्। तथाच भाष्यं—'नैतत् क्रियापौर्वकाल्यं, किं तर्हि कर्तृपौर्वकाल्यमेतत्—पूर्वमसौ भुक्त्वा-न्येभ्यो व्रजितृभ्यः पश्चाद् व्रजतीति। अन्येभ्यो भोक्तृभ्यः पूर्वं भुक्त्वाऽपरेभ्यो गन्तृभ्यः पश्चाद् व्रजतीत्यर्थे साधनान्तरक्रियापेक्षे पौर्वकाल्यमादाय—'विभाषा ग्रह' इति क्त्वः सम्भव इति तदाशयः।

नव्यास्तु—'पूर्वकाल' इति कर्मधारयः, भूत इति तु नोक्तम्, पर्यायशब्द-त्वात्, तेन रूपेण बोधनाननुभवाच्च। तथाच समानकर्तृकयोरर्थयोर्मध्ये पूर्वकाल-विशिष्टार्थवृत्तिधातोः क्त्वेति सूत्रार्थः। तथाच पूर्वकालः क्त्वार्थो धात्वर्थप्रकार एव। अत एव समानकर्तृकत्वेन 'पूर्वं भुङ्क्ते पश्चाद् व्रजती'त्यत्र क्त्वाप्रत्ययमाशङ्क्य—'स्वशब्देनोपात्तत्वान्ने'ति परिहृतं भाष्ये। पूर्वशब्दस्य पूर्वकालोर्थो, न तु धातोस्तत्र वृत्तिरिति तदर्थो, न तूक्तार्थानामप्रयोग इति। अत एवे'ह कस्मान्न भवत्यास्यते भोक्तु'मित्यग्रिमशङ्कासङ्गतिः। अन्यथा फलार्थकतुमुना पूर्वकालत्वस्यासिक्रियायां द्योतनात्तदसङ्गतिः स्पष्टैव। पूर्वकालत्वस्य ततोऽप्रतीतौ तु कथं क्त्व आपादनं, वासरूपन्यायेन लटा साधितमित्यन्यत्। एवञ्च षष्ठ्याः सम्बन्धवाचकत्ववदमीपा-मपि सम्बन्धवाचकत्वं सुवचमित्याहुः।

अत्रेदं चिन्त्यम्—ननु धातोस्तत्र वृत्तिरित्यर्थे—'आस्यते भोक्तु'मित्यग्रिम-शङ्कानुपपत्तेरुपष्टम्भकत्वेनोपन्यसनं शिथिलम्, यतः कैयटमतेऽप्यास्यर्थे पूर्वकाल-सबन्धित्वस्य केनचिदनभिधानेनोक्तार्थानामप्रयोग इति न्यायानवतारादाशङ्कोत्थान-सम्भवात्। प्रत्ययवाच्यस्य कृत्प्रत्ययस्थले धात्वर्थविशेष्यताया नव्यानामपि सम्मतत्वेन 'पूर्वकालः क्त्वार्थो धात्वर्थप्रकार एवे'ति पूर्वग्रन्थविरोधश्च। न च द्योतकत्वाभ्युपगमादुक्तसङ्गतिः, 'षष्ठ्याः सम्बन्धवाचकत्ववदमीपामपि सम्बन्ध-वाचकत्व'मित्युत्तरग्रन्थविरोधात्। न च तदपि सुवचम्, समानकर्तृकत्वादीनां वाच्यतायाः सूत्रादलाभात्। तस्मात् कर्मप्रवचनीयवत् क्रियासम्बन्धविशेषकत्व-मेव क्त्वादीनामिति कैयटोक्तमेव सम्यगिति।

मतान्तरं दूषयितुमुपन्यस्यति—यत्त्विति। क्त्वावाच्यमिति। 'समान-

❀ काशिका ❀

दिमतं दूषयति—यत्त्विति। सूत्रादिति। समानकर्तृकयोरिति धर्मपरं, द्विवचनं तु क्रियाद्वय-रूपाश्रयगतद्वित्वारोपनिमित्तकमिति भावः। अथवा धर्मिपरमेव तत्, क्रियारूपधर्मिणो धातुत एव

पक्त्वाहं भोक्ष्ये' इत्यत्र मयेति तृतीयाप्रसङ्गश्च। नचाख्यातेन कर्तुरभिधानान्न सेति वाच्यं, भोजनक्रियाकर्तुरभिधानेपि पाकक्रियाकर्तुस्तदभावात्। अनभिहिते भवतीतिपर्युदासाश्रयणात्। अत एव 'प्रासादे आस्ते' इत्यत्र प्रसादनक्रियाधिकरणस्याभिधानेप्यस्तिक्रियाधिकरणस्यानभिधानात्सप्तमीति भाष्ये स्पष्टम्। तस्मात् क्त्वाप्रत्ययस्य कर्तृवाचित्वमावश्यक'मिति, तन्न,—

❀ दर्पणः ❀

कर्तृकयोः पूर्वकाले' इत्युभयोः पदयोर्बहुव्रीहित्वाविशेषेण पूर्वकालस्य वाच्यत्वमितरार्थस्य द्योत्यत्वमिति वैषम्ये बीजाभावादिति। वैषम्ये बाधकमाह—अन्यथेति। तस्य क्त्वाप्रत्ययावाच्यत्वे इत्यर्थः। तृतीयाप्रसङ्गश्चेति। क्त्वाप्रत्ययेन कर्तुरनभिधानादिति भावः। नन्व'नभिहित' इति सूत्रे नञः प्रसज्यप्रतिषेधार्थकतया प्रकृते कर्तुराख्यातेनाभिधानान्न तृतीयापत्तिरित्याशङ्क्य निराचष्टे—नचेति। 'अनभिहित' इति न प्रसज्यप्रतिषेधो वाक्यभेदादिदोषात्। न चानुपपत्त्या तत्स्वीकारः, वक्ष्यमाणभाष्यविरोधात्। तथाचैकेनाभिधानेप्यन्येनानभिधानात्तृतीया दुर्वारेत्यभिप्रायेणाह—पाकक्रियाकर्तुरित्यादि। तदभावादिति। अभिहितभिन्नत्वादित्यर्थः। अत एवेति। तत्सूत्रस्थनञः पर्युदा-

❀ काशिका ❀

लाभात्, समानकर्तृकत्वे कर्तर्येव वा शक्तिः सूत्रबलात् कल्प्यत इति भावः। अस्तुवानुभवानुरोधात् कर्तृकर्तृकत्वेशक्तिः, भुक्त्वाव्रजतीत्यत्र भोजनस्य कर्तृत्वेऽन्वयः। तस्यावाच्यत्वे बाधकमाह—अन्यथेति। तृतीयेति। क्त्वाप्रत्ययेन कर्तुरनभिधानादिति भावः। अभिहिते तृतीया न भवतीति प्रसज्यप्रतिषेधमभ्युपेत्याह—न चेति। क्रियाकर्तुरभिधानेपीति। क्रियाकर्तृत्वविशिष्टस्याभिधानेऽपीत्यर्थः। क्रियाकर्तृत्वशक्तेरिति पर्यवसितोऽर्थः। क्रियाद्वयस्यैक एव कर्तेति यथाश्रुतस्यासंगत्यापत्तेः। एवमग्रिमस्यापि क्रियाकर्तुरित्यस्यार्थः। पर्युदासाश्रयणात्। प्रसज्यप्रतिषेधे तु अभिहिते न भवतीत्यर्थात् तिङा कर्तृत्वशक्तेरभिधानान्न मयेति तृतीयापत्तिः। पर्युदासाश्रयणे तु अभिहितभिन्ने भवतीत्यर्थादनभिहितभुजिक्रियानिरूपितकर्तृत्वशक्तिमादाय तृतीयापत्तिर्दृढैवेति भावः। लाघवात् पर्युदासाश्रयणमेव युक्तम्। प्रसज्यप्रतिषेधे हि असमर्थसमासो वाक्यभेदश्चाश्रयणीयः स्यात्। तदाश्रयणे फलमप्याह—क्रियाधिकरणस्येति। प्रसीदत्यस्मिन्नित्यधिकरणे 'हलश्च' इति घञ् प्रत्ययः। क्रियाधिकरणस्येति कर्तुरितिवद् व्याख्येयम्। भाष्ये स्पष्टमिति। अस्यानभिहिते इत्यादिः। वस्तुतस्तु शक्तेः साधनत्वमिति सिद्धान्तपक्षे घञा प्रकृत्यर्थनिरूपितशक्तेरभिधानेन तस्यां वाच्यायां सप्तमीनिषेधेपि आसनक्रियानिरूपिताधिकरणत्वशक्तौ वाच्यायां निषेधाभावेन प्रासादे आस्ते इत्यत्र सप्तमींसिद्धिर्निष्प्रत्यूहैव। स्पष्टं चेदं कैयटोद्योते। एवं चात्र लाघवादेव पर्युदासाश्रयणमिति तत्त्वम्। उपसंहरति—तस्मादिति। सामानकर्तृकयोरिति। समान एकः

सूत्रात्तस्य वाच्यत्वालाभात्, 'समानकर्तृकयोः क्रिययोः पूर्वकाले क्त्वा' —इत्येव तदर्थात्। अन्यथा 'समानकर्त्तरी'त्येव सूत्रन्यासः स्यात्। तृतोयापादनं तु—आख्यातार्थक्रियायाः प्रधानभूतायाः कर्तुरभिधानात्प्रधानानुरोधेन गुणे कार्यप्रवृत्तेर्न सम्भवति। उक्तञ्च वाक्यपदीये—

प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते॥

❀ दर्पणः ❀

सार्थकत्वादेवेत्यर्थः। 'भाष्ये' इत्यस्या'नभिहितसूत्रस्थे' इति शेषः। **तस्येति**। समानकर्तृकत्वस्येत्यर्थः। द्विवचनप्रकृतिबहुव्रीहिणा समानकर्तृकत्वस्य धात्वर्थविशेषणतैव प्रतीयते, न तु विधीयमानत्त्व इति भावः। तदेव विशदयति—**अन्यथेति**। एतत्सूत्रस्य कर्तृशक्तिप्रतिपादकत्वे इत्यर्थः। **समानेति**। तदुपादानाच्च कर्तृद्वयस्यैक्यलाभः। **न्यासः स्यादिति**। 'कर्त्तरि कृ'दितिवत्। वस्तुतस्तु न तथा सम्भवति, 'कर्त्तरि कृ'दिति सूत्रेणैव गतार्थत्वाद्,'अव्ययकृतो भाव' इति वार्त्तिकविरोधाच्चेति भावः। उक्तापत्तिं निरस्यति—**तृतीयापादनं त्विति**। **आख्यातार्थक्रियाया इति**। क्रियाद्वयनिरूपितकर्तृशक्त्योरनेकत्वेपि प्रधानतिङन्तार्थक्रियानिरूपितकर्तृशक्तेराख्यातेनाभिधाने तत्र कृदन्तार्थक्रियानिरूपिततत्तच्छक्तेरनभिहिताया अप्यभिहितत्वातिदेशस्य, अनभिधाने त्वनभिहितत्वातिदेशस्य चोक्तभाष्यप्रामाण्येनाभ्युपगमान्न तृतीयापत्तिः प्रकृते इति भावः। **प्रधानेतर-**

❀ काशिका ❀

कर्ता ययोः क्रिययोरिति क्रियारूपेऽन्यपदार्थे बहुव्रीहिः। **पूर्वकाल** इत्यादि। पूर्वः कालोऽस्येति बहुव्रीहिः। तथा च समानकर्तृकयोः क्रियारूपार्थयोर्मध्ये पूर्वकालवृत्त्यर्थाभिधायिनो धातोः क्त्वाप्रत्ययो भवतीत्येव सूत्रार्थः। एवं च कर्तुर्वाच्यत्वं कथमपि न लभ्यत इति भावः। ननु पूर्वोक्तरीत्या तल्लभ्यत एवेत्याशङ्क्याह—**अन्यथेति**। पूर्वोक्तक्रमेण कर्तुर्वाच्यत्वे विवक्षिते। **समानकर्तरि** इति समानपदोपादानं क्त्वार्थकर्तुः समभिव्याहृतक्रियाकर्तर्यभेदान्वयः पूर्वोक्तरीत्येति बोधनायेति बोध्यम्। **न्यासः स्यात्** = न्यासः कृतः स्यात्। अपि च पूर्वोक्तरीत्या वाक्यार्थवर्णनं न समञ्जसमिति बोध्यम्। ननु तृतीयादर्शनमेव पूर्वोक्तार्थकल्पनद्वारा कर्तुर्वाच्यत्वे मानं भविष्यतीत्याशङ्क्य तृतोयादर्शनस्यान्यथासिद्धिमाह—**तृतीयापादनं त्वि**त्यादिना। **प्रधानेतरयोरिति**—कारिकाद्वयं प्राग्व्याख्यातम्। इमे च हरिकारिके 'स्वादुमि णमुल्' इति सूत्रस्थभाष्यार्थानुवादिन्याविति स्पष्टं शेखरादौ। ननु किमित्येवं वर्ण्यते तृतीयावारणार्थं क्त्वादेः कर्तरि शक्तिरेवाभ्युपगम्यतामत एव 'समानकर्तृकयोः' इति सूत्रकारोक्तिः सप्रयोजना। अन्यथा जन्यत्वादिसंबन्धवदेतस्यापि संबन्धस्यानुभवबलादेव लाभो भविष्यतीति व्यर्था सोक्ति-

प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते ।
यदा गुणे तदा तद्वदनुक्तापि प्रतीयते ॥ इति ।

किञ्चान्यथा कर्मणोपि क्त्वार्थतापत्तिः, 'पक्त्वौदनो मया भुज्यत'

❀ दर्पणः ❀

योरिति । गुणप्रधानक्रियानिरूपितशक्तिद्वयं यत्रैकस्मिन् द्रव्ये तत्र गुणक्रियानिरूपितशक्तिः प्रधानक्रियानिरूपितशक्तिधर्ममनुरुणद्धीत्यर्थः । उक्तातिदेशेपि तत्सम्मतिमाह—प्रधानविषयेति । प्रधानं—विषयो=निरूपकं यस्याः सा शक्तिर्यदा प्रत्ययेन तिङाभिधीयते तदा गुणक्रियावाचकधातूत्तरप्रत्येनानभिहिताप्यभिहितवत् प्रतीयत इत्यर्थः । इदमुपलक्षणम्—अभिहिताया अपि अनभिहितत्वप्रतीतेः । तत्र 'प्रसादे आस्त' इत्युदाहार्य्यम् । अवश्यं चेत्थमभ्युपेतव्यम्—अन्यथा कर्त्तुः क्त्वार्थत्वाभ्युपगमेनोक्तस्थले तृतीयापत्तिवारणेपि 'पक्त्वौदनो मया भुज्यत' इत्यत्रौदनपदोत्तरं द्वितीयापत्तिर्दुर्वारा । तत्र पाकक्रियानिरूपितकर्मत्वशक्तेः कृतानभिधानादुक्तरीतेरसम्भवादित्याह—किञ्चेति । अत्रेदं बोध्य—यदौदने पाकक्रियानिरूपितकर्मत्वस्यैव शाब्दविषयत्वमभिप्रेतं न तु प्रधानक्रियानिरूपितकर्मत्वस्यापि, तदौ'दनं पक्त्वा भुज्यते' इत्यपि साधु, ओदनस्य भोजनकर्मताया आर्थिकत्वात् । यदा तूभयकर्मत्वस्यैव शाब्दविषयत्वमभिप्रेतं तदौदनपदाद् द्वितीया असाध्वेव, उक्तव्यवस्थितेः । परन्त्वाख्यातवाच्यक्रियायाः प्राधान्यात्तां प्रत्येव क्त्वान्तोपस्थिताः सर्वाः क्रिया गुणीभवन्ति, न तु तासां परस्परं विशेष्यविशेषणभावः; 'गुणानां च परार्थत्वा'दिति न्यायात् । एवञ्च 'स्नात्वा पीत्वा भुक्त्वा व्रजती'त्य-

❀ काशिका ❀

रित्याशङ्क्याह—अन्यथेति । प्रकारान्तरेणेति । कर्तरि शक्त्यङ्गीकारेऽपि कर्मणोऽनभिधानादोदनपदाद् द्वितीयापत्तिर्दुर्वारैव । कर्मण्यपि शक्तिस्वीकारे तु गौरवं मानाभावश्च । उक्तरीत्यनुसरणे तु तिङन्तोपात्तप्रधानभुजिक्रियानिरूपितकर्मशक्तेरितङाभिधानाद्गुणभूतपचिक्रियानिरूपितायास्तस्या अनभिधानेऽपि न द्वितीयापत्तिरिति समुदिततात्पर्यार्थः । अपि च वाचकत्वपक्षे क्त्वादीनां जन्यत्वव्याप्यत्वाद्यनेकार्थकत्वापत्तिः । जन्यत्वादीनां वाच्यत्वे प्रत्ययार्थतया तेषां विशेष्यत्वापत्त्या 'भुक्त्वा भुक्त्वा व्रजती'त्यत्र 'आभीक्ष्ण्ये द्वे वाच्ये' इति द्वित्वानापत्तिः । क्रियाप्राधान्यविरहात् । विशेषणीभूतक्रियामादाय तत्प्रवृत्त्यङ्गीकारे तु पाचक इत्यादावपि तदापत्तिः । एवं धातुसंबन्धाधिकारबाधापत्तिश्च । न च प्रत्ययार्थद्वारकः संबन्धोऽक्षत एवेति बोध्यम् । 'लुनीहि-लुनीहीत्येवायं लुनाती'त्यादौ धात्वर्थयोः साक्षात् संबन्धदर्शनेन 'यथाविध्यनुप्रयोग' इत्यादौ संबन्धपदाऽनुवृत्तेः साक्षात् संबन्धतात्पर्यकताया एव निर्णयेन परस्परासंबन्धस्य तदर्थकत्वाभावनिश्चयात् । गौरवादपि न परम्परासंबन्धस्य तदर्थकत्वमिति तद् ध्वनयन्नाह—

—इत्यत्र द्वितीयायाः प्रकारान्तरेणावारणादित्यास्तां विस्तरः ॥६०॥

इति वैयाकरणभूषणसारे क्त्वाद्यर्थनिर्णयः ॥१२॥

ॐ दर्पणः ॐ

विशेषेण प्रयोगाः । तुमुनस्तादर्थ्यरूपमुद्देश्यत्वमपि द्योत्यं, 'क्रियार्थायां क्रियाया'मित्युक्तेः । तन्निष्कर्षश्च पूर्ववदेव । तुम्प्रकृत्यर्थोपपदार्थयोस्तादर्थ्यवत्समानकर्तृकत्वादिकमपि सम्बन्धः । तथाच,—'हरिं द्रष्टुं याती'त्यतो हरिकर्मकभविष्यद्दर्शनोद्देश्यकं दर्शनकर्तृकर्तृकं यानमिति शाब्दधीः । अनयैव दिशा 'एधानाहारको व्रजती'ति बोध ऊहनीयः ॥६०॥ ॐ इति त्त्वाद्यर्थनिरूपणम् ॥ १२॥ ॐ

ॐ काशिका ॐ

आस्तां विस्तर इति । परे तु समानकर्तृकयोर्धात्वर्थयोर्मध्ये पूर्वकालविशिष्टार्थबोधकाद् धातो क्त्वेति सूत्रार्थात् पूर्वकालः क्त्वाप्रकृत्यर्थे प्रकारः आनन्तर्यं च धात्वन्तरार्थे तादृशप्रकृत्यर्थस्य प्रकारताघटकः संबन्धः । अत एव भाष्ये—पूर्वं भुङ्क्ते पश्चाद्व्रजतीत्यत्र क्त्वाप्रत्ययशङ्का—पूर्वशब्दोऽत्र पूर्वकालार्थो न तु धातोस्तत्र वृत्तिरित्यर्थकेन स्वशब्देनोक्तत्वादित्यनेन समाहिता । उक्तार्थानामिति न्यायपरत्वं तु न तस्य, तथा सतीह कस्मान्न भवति—आस्यते भोक्तुमिति शङ्कापरभाष्यस्यासंगत्यापत्तेः । तत्रापि तुमुना तदुद्देश्यकत्वरूपसंवन्धं बोधयताऽऽसने पूर्वकालत्वस्य द्योतितत्वेन तदप्राप्तेः । तत्र पूर्वकालानवगमे तु कथं शङ्का पदं निदध्यात् । वासरूपन्यायेन लटा साधनमित्यन्यत् । 'यदा ह्यासेः क्त्वा भवति तदा भुजेस्तुमुन्न भवति अनभिधाना'दिति कैयटग्रन्थः । 'पूर्वं भुक्त्वा पश्चाद्व्रजती'त्यत्र त्व'न्येभ्यो भोक्तृभ्यः पूर्वं भुक्त्वान्येभ्यो व्रजितृभ्यः पश्चाद्व्रजतीत्यर्थ' इति साधनान्तरक्रियावधिकमेव पूर्वकालत्वं प्रतीयत इति नास्य सूत्रस्य विषयः, किन्तु 'विभाषाग्रे प्रथमे'त्यस्येति स्पष्टमत्र भाष्ये । 'दर्शपूर्णमासाभ्या'मित्यत्र त्वानन्तर्यसंबन्धेन पूर्वकालिकदर्शादिवैशिष्ट्यं सोमे प्रतीयत इति न तत्र दोषः । एवं च 'पूर्वकाल' इति कर्मधारयः, एवं च षष्ठीवत् क्त्वादिरपि समानकर्तृकत्वादिसंबन्धवाचक इति वक्तुं शक्यमिति प्राहुः । अत्र पूर्वकालत्वं प्रागभावावच्छिन्नकालत्वं, प्रागभावे व्रजनक्रियायास्तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेनान्वयः । आनन्तर्यं च—तदधिकरणसमयध्वंसाधिकरणमुहूर्तादिध्वंसानधिकरणत्वविशिष्टतदधिकरणसमयध्वंसाधिकरणक्षणवृत्तित्वम्, तेन न पूर्वोक्तदोषः, 'ईश्वरो ज्ञात्वा तिष्ठती'त्यत्रेश्वरज्ञानध्वंसाप्रसिद्ध्या तद्ध्वंसो नानन्तर्ये निवेशितः । इदमत्र बोध्यम्—'स्नात्वा भुक्त्वा पीत्वा व्रजती'त्यत्र व्रजनक्रियावधिकपूर्वकालत्वमादायैव सर्वत्र क्त्वा, न तु भोजनादिक्रियावधिकं तदादाय । तथा सति 'तस्यापत्यम्' इत्यादावेकत्वादेरिव प्रकृते 'समानकर्तृकयो'रिति द्विवचनोपात्तस्य द्वित्वस्याविवक्षायामप्यमीषां ब्राह्मणानां पूर्वं आनीयतामित्युक्ते सर्वपूर्व एव आनीयते,

❀ स्फोटनिरूपणम् ❀

❀ दर्पणः ❀

इत्थं व्याकरणादिना गृहीतशक्तिकपदसमुदायादनासन्नादगृहीतार्थतात्पर्य्यकादयोग्यादनाकाङ्क्षाच्च शाब्दबोधादर्शनादासत्त्यादिकमपि शक्तिज्ञानजन्यपदार्थोपस्थित्या बोधे जननीये सहकारि। आसत्तिश्च––प्रकृतबोधानुकूलपदाव्यवधानम्। अस्ति च––'पर्वतो वह्निमा'नित्यत्र तादृशपदाव्यवधानं, न तु 'गिरिर्भुक्तं वह्निमान् देवदत्तेने'ति––न ततो बोधः। अत एव––'स्थाल्यां तण्डुलं पचती'त्यत्र तण्डुलकर्मकस्थाल्यधिकरणक्रियेति बोधे नाऽनासन्नता, तद्घटकसर्वेषां पदानां तादृशबोधानुकूलत्वात्। 'स्थाल्यां पचती'त्येतावन्मात्रबोधे तु तदनासन्नमेव। श्लोकादौ तु योजनावाक्यादेव बोधः, तत्क्रमेणाऽनासन्नाद्बोधदर्शनात्तज्ज्ञानमेव हेतुरिति–सम्प्रदायः।

नव्यास्तु––'मौनिश्लोकादन्वयबोधानुदयप्रसङ्गान्नोक्ताव्यवधानमासत्तिः, आकाङ्क्षादिसत्त्वे, तात्पर्य्यज्ञाने च सति–व्यवहितादव्यवहिताच्च बोधदर्शनात्, तज्ज्ञानविलम्बेन शाब्दाविलम्बाच्च। किन्त्वि'दं पदमेतत्पदेन सम्भूयाऽन्वयबोधं जनय'त्वित्याकारकपदतात्पर्य्यरूपाभिसन्धापयित्रिच्छा सा, न तु वक्त्रिच्छा, मौनिश्लोकादौ दोषतादवस्थ्यात्। शुकवाक्ये तु भगवत्तात्पर्यमादायैव गतिरित्याहुः।

वस्तुतस्तु सत्यर्थतात्पर्य्यज्ञाने पदतात्पर्य्यज्ञानविलम्बेन शाब्दबोधाविलम्बाद् वृत्त्या पदजन्यपदार्थानामव्यवधानेनोपस्थितिरेवासत्तिः––स्वरूपसत्यन्वयबोधे हेतुः। न हि पदार्थानामनुपस्थितावन्वयधीः केनाप्यनुभूयते इति। अर्थतात्पर्य्यं त्वि'दं पदमेतस्मिन्नर्थेऽपरपदार्थान्वयं बोधय'त्वित्यभिसन्धापयित्रिच्छा। संवादिशुकवाक्ये तु भगवत एव सा। विसंवादिनि तु शिक्षयितुरेव। अस्य संशये व्यतिरेकनिश्चये चान्वयबोधात्तत्क्रमेणान्वयबोधदर्शनाच्च तज्ज्ञानमप्यन्वयबोधे हेतुः। अधिकमग्रे वक्ष्यते।

शाब्दबोधे योग्यताया ज्ञानं कारणमिति बहवः। सा चैकपदार्थेऽपरपदार्थस्य यादृशसंसर्गवत्त्वं तादृशसंसर्गवत्त्वैव, प्रकृतशाब्दबोधविषयसंसर्गवत्त्वमिति यावत्।

❀ काशिका ❀

न तु यत्किञ्चित्पूर्वो मध्यमस्तथात्रापि स्नातेरेव क्त्वाप्रत्ययः स्यान्न तु भुज्यादेः। एवं च–स्नानक्रियायाः पानक्रियायाश्च व्रजनक्रियायामेवान्वयो, न तु स्नानादिक्रियाया भोजनादौ, अत एव तत्र 'भुक्त्वा स्नात्वा पीत्वा व्रजती'ति विपरीतप्रयोगोऽप्युपपद्यत इति स्पष्टं भाष्ये इति शिवम्॥ ६०॥

❀ ॥ इति तुमुन्क्त्वाद्यर्थनिर्णयः॥ ❀

❀ दर्पणः ❀

अस्ति च 'पयसा सिञ्चती'त्यत्र सेके पयःकरणकत्वस्य संसर्गः, अत एव करकाऽभिप्रायप्रयुक्त'पयसा सिञ्चती'ति वाक्यं न योग्यम्, पयःपदार्थकरकायां सेककरणत्वाभावात्। 'यादृशे'ति विशेषणाच्चा'काशः शब्द' इति वाक्यं समवायसंसर्गमादाय नाभेदान्वये योग्यम्। अयोग्येप्येतत्क्रमेणान्वयदर्शनादेतज्ज्ञानस्यापि हेतुता। ननु संसर्गस्य वाक्यार्थत्वेन तद्बोधात् प्रागनुपस्थित्या कथं तद्बोधस्य तत्र तत्त्वमिति चेत्, न योग्यताज्ञानस्य शाब्दबोधे निश्चयत्वेन हेतुतां ब्रूमो, येनोक्तदोषोऽवकाशमासादयेत्, किन्तु संशयनिश्चयसाधारणज्ञानत्वेन, तस्य च न दौर्लभ्यम्। 'पयसा सिञ्चती'त्यादौ सेकः पयःकरणको न वेति संशयात्मकस्य 'भूतले घटोऽस्ती'त्यादौ च प्रात्यक्षिकनिश्चयरूपस्यापि तत्प्राक्सौलभ्यात्, स्वजन्यशाब्दबोधस्यैवान्वयबोधप्रतिबन्धकतयोक्तबोधात्तत्सम्भवात्।

केचित्तु—लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्वत्ताबुद्धित्वावच्छिन्नं प्रति तदभाववत्ताज्ञानाभावस्य हेतुतया शाब्दबोधस्यापि तत्कार्य्यतावच्छेदकाक्रान्ततयाऽयोग्यताज्ञानसत्त्वे तदभावादेव शाब्दबोधवारणे—कृतं योग्यताज्ञानस्य तद्धेतुतया। कार्य्यतावच्छेदककोटौ 'प्रत्यक्षान्यत्व'निवेशेनैव लौकिकप्रत्यक्षनिरासेपि घटाद्युपनीतभानसंग्रहाय तद्विहाया'ऽजन्या'न्तद्वयनिवेशः। नच बाधनिश्चयाभावत्वापेक्षया संशयनिश्चयसाधारणयोग्यताज्ञानत्वेन हेतुत्वे लाघवमिति वाच्यं, स्यादेवं यदि बाधाभावस्य—शाब्दत्वं कार्यतावच्छेदकं कल्प्येत, किन्तु शाब्दबोधस्य बाधाभावकार्य्यतावच्छेदकाक्रान्ततया तद्दशायां तं प्रतिषेधामः, अत एव 'घटोऽभिधेय' इत्यादावुक्तबाधाप्रसिद्धावपि न क्षतिः, तत्संसर्गावच्छिन्नतत्प्रकारकतद्विशेष्यकबुद्धित्वस्यैव तत्कार्य्यतावच्छेदकत्वात्। घटाभावेऽभिधेयत्वप्रतियोगिकत्वभ्रमदशामादाय तदभावस्यापि प्रसिद्धेश्चेत्याहुः।

अत्र वदन्ति—न हि तद्विशिष्टबुद्धिसामान्ये बाधाभावः कारणं, किन्तु बाधावतारे इच्छासत्त्वे आहार्य्यप्रत्यक्षोदयादिच्छया उत्तेजकत्वानुरोधेन प्रत्यक्षस्यैव प्रतिबध्यतावच्छेदकत्वावश्यकतयोपनीतभानसाधारणप्रतिबध्यतायाः शाब्दबोधेऽसम्भवात्। न च तथाप्यनुमितिसाधारणप्रतिबध्यतायाः शाब्दबोधसाधारण्यं शङ्क्यम्, तत्साधारणस्य प्रत्यक्षान्यज्ञानत्वस्य प्रतिबध्यतावच्छेदकत्वे प्रत्यक्षान्यत्वज्ञानत्वयोर्मिथो विशेष्यविशेषणभावे विनिगमनाविरहेणानेकप्रतिबध्यप्रतिबन्धकभावापत्तेः, प्रतिबध्यतावच्छेदकगौरवापत्तेश्चानुमितित्वस्यैव तदवच्छेदकत्वस्याङ्गीकरणीयत्वात्। अतो बाधाभावस्य स्वातन्त्र्येणैव शाब्दबोधं प्रति हेतुता वाच्या। तत्र चोक्तगौरवेण संसर्गरूपयोग्यताज्ञानस्यैव हेतुत्वमुचितम्। अपि च शाब्दबोधे तद्वदन्योन्याभावतदभावव्याप्यवत्ताज्ञानादीनां प्रतिबन्धकत्वकल्पना-

※ दर्पणः ※

पेक्षया लाघवाद्योग्यताज्ञानस्यैव हेतुत्वमुचितम्। किञ्च,—'पयसा सिञ्चती'ति-शाब्दसामग्रीकाले 'सेकः पयःकरणकत्वाभाववा'निति मानसवारणाय तत्र शाब्द-बोधसामग्र्याः प्रतिबन्धकत्वकल्पने तत्र योग्यताज्ञानस्यावश्यकतया विपरीतज्ञानो-त्तरप्रत्यक्षे विशेषदर्शनस्य हेतुतया तदभावादेव तद्वारणात्, विशेषदर्शनसत्त्वे तु तदभावव्याप्यवत्तानिर्णयरूपप्रतिबन्धकसत्त्वेन शाब्दसामग्र्या एवाभावेन तथा मानसे इष्टापत्तेः। नच निर्णयं प्रत्येव विशेषदर्शनस्य हेतुतया शाब्दसामग्रीकाले मानससंशयवारणाय शाब्दसामग्र्याः प्रतिबन्धकत्वे कल्पनीये संशयत्वमनिवेश्य सेकत्वावच्छिन्नविशेष्यकपयःकरणत्वाभावप्रकारकमानसत्वमेव तत्प्रतिबध्यतावच्छेद-कमिति वाच्यं, सेकत्वावच्छिन्नविशेष्यकपयःकरणकत्वप्रकारकमानसे शाब्दसामग्री-प्रतिबन्धकत्वान्तरस्य कल्प्यतया तेनैव संशयवारणे तत्संशये प्रतिबन्धकत्वान्तरा-कल्पनात्, न च विपरीतज्ञानोत्तरप्रत्यक्षे विशेषदर्शनस्य हेतुत्वसिद्धावेव योग्यता-ज्ञानस्य हेतुत्वसिद्धिरिति वाच्यं, गुरुभूतशाब्दसामग्रीप्रतिबन्धकत्वकल्पनापेक्ष-या तद्धेतुत्वकल्पनाया एवौचित्यात्, अनयैव दिशेष्टसाधनत्वादिज्ञानानां प्रवृत्तौ हेतुतासिद्धिरित्यलं परमतानुवर्णनेन।

'घटः कर्मत्व'मित्याधाराधेयभावेनान्वये निराकाङ्क्षवाक्याद् 'घटीया कर्म-ते'ति बोधानुदयादाकाङ्क्षापि सहकारिणी। सा च यत्पदे यत्पदसमभिव्याहार-प्रयुक्त यद्विशेष्यकयत्संसर्गकयत्प्रकारकबोधजनकत्वं तत्पदे तत्पदनिरूपिताकाङ्क्षा। यथा 'घटमानयती'त्यत्र घटपदे कर्मताविशेष्यकाधेयतासंसर्गक'घटीया—कर्मते'ति-बोधौपयिकाऽम्पदनिरूपिताकाङ्क्षा। तां विना 'घटः कर्मत्व'मित्यत्र घटपदेन तादृशबोधाजननात्। एवं धातुपदेऽप्याख्यातनिरूपिताकाङ्क्षोह्या, अत एव'आनयनं कृति'रित्यत्र नानयनानुकूला कृतिरिति बोधः' धातावाख्यातासमभिव्याहारात्। इयमेवाकाङ्क्षा व्याकरणेन प्रतिपाद्यते। तथाच तत्तत्पदे'तत्तत्पदपूर्वापरीभावरूप-समभिव्याहारः सेति फलति। तां विना यद्यप्युक्तानाकाङ्क्षे कर्मत्वपदेऽम्पदत्वभ्रम-दशायां 'घटीया कर्मते'ति बोधोदयेन तज्ज्ञानं हेतुर्न तु स्वरूपसती सा। नच जनितान्वयबोधाद्वाक्यात्पुनरपि तादृशबोधापत्तिरुक्ताकाङ्क्षायास्तदानीमप्यविकलत्वा-दिति वाच्यं, प्रकृतान्वयबोधसमानाकारबोधानुपहितत्वास्यापि स्वरूपसत आका-ङ्क्षात्वेन जनितान्वयबोधस्थले तदभावेनापत्त्यसम्भवात्। तात्पर्यविषयत्वरूपप्रकृत-त्वेन बोधविशेषणाच्च। 'बोधद्वयं जायता'मिति तात्पर्यसत्त्वे न जनितान्वय-द्वितीयबोधे निराकाङ्क्षत्वं, 'स्वसमाने'त्युक्तेश्च न जनितावान्तरबोधस्य महावाक्यार्थ-बोधे तत्त्वम्। अत एवा'ऽयमेति पुत्रो राज्ञः पुरुषोपसार्य्यता'मित्यादौ राज्ञः पुरु-षेण सहान्वयबोधजनने सर्वदा निराकाङ्क्षत्वम्।

सिद्धान्तनिष्कर्षमाह—

वाक्यस्फोटोतिनिष्कर्षे तिष्ठतीति मतस्थितिः ।
साधुशब्देन्तर्गता हि बोधका न तु तत्स्मृताः ॥६१॥

यद्यपि—वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, अखण्डपदवाक्यस्फोटौ, वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इत्यष्टौ पक्षाः 'सिद्धान्तसिद्धा' इति वाक्यग्रहणमनर्थकं, दुरर्थकञ्च, तथापि—

❀ दर्पणः ❀

नव्यास्तु—"यत्पदस्य यत्पदव्यतिरेकप्रयुक्ततात्पर्य्यविषयीभूतान्वयाननुभावकत्वं तेन सह तस्याकाङ्क्षा, 'अयमेति राज्ञः पुरुष' इति वाक्ये राजपुरुषसंसर्गप्रतीतीच्छयोच्चरिते राज्ञ इत्यस्य पुरुषेण साकाङ्क्षत्ववारणायान्वयबोधे 'तात्पर्य्यविषयत्वं'-विशेषणम् । एवञ्च न तात्पर्य्यज्ञानस्य शाब्दबोधे पृथक् हेतुता । अगृहीतार्थतात्पर्य्यके निरुक्ताकाङ्क्षाज्ञानाभावादेवान्वयबोधापत्त्यभावात्" इत्याहुः । एवञ्च शाब्दबोधात्प्रागवश्यक्लृप्ततत्तत्पदसमभिव्याहाररूपाकाङ्क्षयैवान्वयरूपवाक्यार्थभानोपपत्तौ वाक्यस्य तत्र शक्तिर्निष्प्रमाणेति नैयायिका वदन्ति । मीमांसकादयस्तु—वाक्यस्य तत्र लक्षणैव, न तु तत्र शक्तिरिति तन्मतं खण्डयितुं स्फोटनिरूपणमित्याशयेन मूलमवतारयति—**सिद्धान्तेति** । यद्वा 'ननूक्तं व्याकरणस्य प्रकृतिप्रत्ययेषु तत्तदर्थबोधकत्वशक्तिप्रतिपादकत्वमनुपपन्नं, प्रकृतिप्रत्ययानां क्रमिकाशुविनाशिनानावर्णात्मकतयाऽस्थिरत्वेनाऽप्रत्यक्षतया तत्र शक्तिग्रहस्य कथमप्यसम्भवेन तत्प्रतिपादकस्यास्य शास्त्रस्याप्रामाण्यप्रसङ्ग इत्याशङ्कानिराकरणाय स्फोटनिरूपणमित्याशयेन मूलमवतारयन्नाह—**सिद्धान्तनिष्कर्षमिति** । तथाचोपोद्घातसङ्गतिरत्रेत्यवधेयम् । तत्तन्मतनिराकरणं तु मूल एव सुव्यक्तम् । अष्टानां स्फोटानामाकरसिद्धतया तद्व्यावर्त्यालाभ इत्याशयेनाह—**अनर्थकमिति** । निष्प्रयोजनकमित्यर्थः । **दुरर्थकमिति** । तदुपादाने वाक्यातिरिक्तानामसंग्रहापत्तेरिति भावः । समाधत्ते—**तथापीति** । अन्येषां = वर्णादिपञ्चस्फोटानामित्यर्थः । तत्र स्फोटत्वं स्फुटत्यभिव्यक्तीभवत्यर्थोऽस्मादिति व्युत्पत्त्यार्थप्रकाशकत्वं, प्रकाशश्च ज्ञानम्, तथाचार्थनिष्ठविषयताप्रयोजकशक्तिमत्त्वं पर्य्यवस्यति । वर्णस्यैव तत्त्वा-

❀ काशिका ❀

सिद्धान्त इति । प्रागुक्तप्रकृतिप्रत्ययाद्यर्थविचारस्यावारतत्वं ध्वनयितुं स्फोटस्यैव वाचकत्वमिति सिद्धान्तनिष्कर्षमाहेत्यर्थः । स्फुटति प्रकाशतेऽर्थोऽस्मात् स्फोट इति व्युत्पत्त्यार्थबोधकशब्दः स्फोट इति पर्यवसन्नम् । **अनर्थकमिति** । इतरस्फोटानामपि स्वीकृततयाऽव्यावर्तकत्वात् । **दुरर्थकम्** = अनभिहितवर्णस्फोटादिव्यावृत्तिप्रतिपादकम् । विचाराङ्गभूतां विप्रति-

वाक्यस्फोटातिरिक्तानामन्येषामवास्तवत्वबोधनाय तदुपादानम्। एतदेव ध्वनयन्नाह—अतिनिष्कर्ष इति। इति मतस्थितिः—वैयाकरणानां महाभाष्यकारादीनाम्। तत्र क्रमेण सर्वांस्तान्निरूपयन् वर्णस्फोटं प्रथममाह—साधुशब्द इति। साधुशब्दान्तर्गता वाचका न वेति विप्रतिपत्तिः। विधिकोटिरन्येषां, नेति वैयाकरणानाम्।

❀ दर्पणः ❀

भ्युपगमे तु पदादिस्फोट इति व्यवहारः। **अवास्तवत्वेति**। वर्णस्फोटादीनामाकाङ्क्षानिवर्त्तकत्वाभावादवास्तवत्वं, शास्त्रीयप्रक्रियानिर्वाहाय परं सिद्धान्ते तत्स्वीकारः, पारमार्थिकत्वं तु वाक्यस्फोटस्यैवेति भावः। **विप्रतिपत्तिरिति**। संशयीययावत्कोट्युपस्थापकं वाक्यमित्यर्थः। न तु संशयजनकं वाक्यमेव सा 'परोक्षं ज्ञानं निश्चयात्मकमेवे'ति प्राचीनप्रवादेन संशयजनकत्वस्य वाक्ये असम्भवात्। वस्तुतस्तु संशयजनकवाक्यत्वमेव विप्रतिपत्तित्वम्, तत्तदभावसहचरितधर्मवद्धर्मिज्ञानस्येव 'समानाऽनेके'ति सूत्रेण विप्रतिपत्तेरप्याहत्यैव संशयहेतुत्वोत्कीर्त्तनादित्यवधेयम्। मूले असाधुशब्दान्तर्गतवर्णवाचकताविचारस्याप्रस्तुतत्वं मत्वाह—**साधिवति**। अत्र साध्वन्तर्गतवर्णत्वसामानाधिकरण्येन वाचकत्वादिसाधने तद्वाक्यस्य विप्रतिपत्तित्वासम्भवः, नैयायिकैरपि साध्वन्तर्गतानां केषाञ्चिद् वाचकत्वाभ्युपगमात्। तादृशवर्णत्वावच्छेदेन वाचकत्वादिसाधने तु वैयाकरणानां,—परेषां विकरणेषु बाधश्चात आह—**तत्स्मृता इति**। ननु यथाश्रुते साधुशब्दान्तर्गता वाचकास्तदन्तर्गतवर्णस्मारिता नेत्यर्थलाभादेतद्वाक्यस्य विभिन्नधर्मिबोधकत्वाद्विप्रतिपत्तित्वस्यैवासम्भवः, एकधर्मिकविरुद्धकोटिकसंशयजनकस्यैव तत्त्वादतो व्याचष्टे-सारे—**साधुशब्दान्तर्गता इति**। साध्वन्तर्गतवर्णस्मारिता इत्यर्थः। यथाश्रुते साध्वनन्तर्गतविपरीतानां पूर्वोक्तवर्णानां वाचकत्वस्य केनाप्यनभ्युपगमाद्, बाधसिद्धसाधनयोरापत्तेः। तत्स्मारितत्वं च—शास्त्रबोधितादेशादेशिभावनिमित्तनिमित्तिभावान्यतरसम्बन्धेन, तेन अस्याऽपत्यमिः, इयानित्यादेर्नासंग्रहः। **विधिकोटिरिति**। समुच्चयव्यावृत्ता कोटिताख्या विषयता संशये आवश्यकीति सूच-

❀ काशिका ❀

पत्तिमाह—**साधुशब्देति**। संशयीययावत्कोट्युपस्थापकं वाक्यं विप्रतिपत्तिः न तु संशयजनकवाक्यम्, शब्दस्य नव्यतार्किकैः संशयजनकत्वानङ्गीकारात्, तदङ्गीकर्तृमते तु तदेव विप्रतिपत्तिपदप्रतिपाद्यमस्तु, साधुशब्दानन्तर्गतानां घकारादीनां घटादिशब्दघटकानां परैरपि वाचकत्वाङ्गीकारात्, साधुशब्दान्तर्गतत्वावच्छेदेन बोधकत्वसाधने न वैयाकरणमतेंऽशतः सिद्धसाधनम्, अर्थान्तरं वा निषेधसाधनेंऽशतोबाधः, अतः साधुशब्दान्तर्गतत्वं पक्षतावच्छेदकमनुसृतम्। अन्येषां = प्राचीननैयायिकादीनाम्। ननु साधुशब्दाघटकेषु वर्णेषु बोधकत्वव्याद्वृत्तिसिद्धावपि वाचकत्वव्यावृत्तिर्न सिद्धेत्यत-

साधुशब्दे = 'पचति' 'राम' इत्यादिप्रयुज्यमानेऽन्तर्गतास्तिप्त्विसर्गादय एव, बोधकाः = वाचकाः, तेषामेव शक्तत्वस्य प्रागव्यवस्थापितत्वात्। न तु तैः स्मृताः—लादयः, स्वादयश्चेत्यर्थः ॥६१॥

ये तु—"प्रयोगान्तर्गतास्तिप्त्विसर्गादयो न वाचकाः, तेषां बहुत्वेन शक्त्यानन्त्यापत्तेः, 'एधाञ्चक्रे' 'त्रह्वे'त्यादावादेशलुगादेरभावरूपस्य बोध-

॥ दर्पणः ॥

नायोक्तं—'कोटि'रिति। अन्येषाम् = नैयायिकानाम्। तैर्'लः कर्मणि', 'स्वौजस-मौ'ङित्यादिविहितप्रत्ययानामेव वाचकत्वम्, तिप्त्विसर्गादीनां स्वादेशिस्मृतिद्वारा बोधकत्वमेव लिपिवदित्यभ्युपगमात्। तथाच साध्वन्तर्गतवर्णस्मारितवर्णत्वावच्छेदेन मतभेदेनोभयसाधनान्नोक्तदोष इति भावः। यथाश्रुतमूलोक्तविप्रतिपत्तिमनुसृत्याह—**साधुशब्द** इत्यादि। ननु साध्वन्तर्गतवर्णानां बोधकत्वसाधनेपि न वाचकत्वसिद्धिरत आह—**बोधका वाचका** इति। **तस्यैवेति**। बोधकत्वस्यैवेत्यर्थः। **प्रागिति**। शक्तिनिरूपणावसर इत्यर्थः। बोधकत्वसिद्धौ च तदन्यथानुपपत्त्या पदार्थान्तररूपा शक्तिरपि सिध्येत्, तदभावे तु सापि—नेति वाचकत्वसामान्याभावसिद्धिरिति भावः ॥६१॥

नैयायिकमतं दूषयितुमुपन्यस्यति—**ये त्विति**। वाचकत्वाभावे प्रयोजकमाह—**तेषामिति**। 'बहुत्वेने'त्युपलक्षणमनुगमकधर्माभावस्यापि, तिङ्त्वसुप्त्वादीनामेकवचनत्वादिवदनुगमकत्वासम्भवात्तिङ्त्वाद्युपस्थितिं विनापि कृत्याद्यर्थोपस्थितेर्व्यभिचारेण शक्ततानवच्छेदकत्वाच्चेति बोध्यम्। ननु तिबाद्यादेशिनामपि तत्तदनुबन्धभेदेन नानात्वान्नोक्तरीत्या तेषां वाचकत्वमत आह—**एधामिति**।

॥ काशिका ॥

वीह—**बोधका वाचका** इति। बोधकपदाद्वाचकत्वलाभः। कथमित्याशङ्कायामाह—**तस्यैवेति**। बोधकत्वस्यैवेत्यर्थः। 'शक्तिः पदार्थान्तर'मिति मतेऽपि बोधकत्वान्यथानुपपत्त्या कल्प्यमाना शक्तिबोधकत्वसमनियतेति साधुशब्दानन्तर्गतेषु बोधकत्वाभावे सिद्धे शक्त्यभावोऽप्यर्थात् सिध्यतीति बोध्यम्। परमतं दूषयितुमुपन्यस्यति—**यत्त्विति**। **तेषां** = तिबाद्यादेशानां, **बहुत्वेन** = लादिरूपादेश्यपेक्षया बहुत्वेन। **शक्त्यानन्त्येति**। शक्ततावच्छेदकत्वमपि बह्वीष्वादेशनिष्ठानुपूर्वीषु कल्पनीयमित्यपि दूषणमत्र पक्षे बोध्यम्। स्थानिनो वाचकत्वपक्षेऽपि शाब्दबोधपूर्वमनेकस्मृतिकल्पनायां लाघवानवकाश इत्यतो दूषणान्तरमाह—**एधांचक्रे** इति। अत्र 'आमः' इत्यनेन लिटो लुक्। **अभावरूपस्येति**,—हेतुगर्भविशेषणं, यतोऽभावरूपत्वमतस्तस्य बाधकत्वासंभवः, तस्याः भावनिष्ठत्वादभावेन क्वचिदपि बोधाजननादिति भावः। 'एधांचक्र' इत्यत्रानुप्रयुज्यमानधातूत्तरश्रूयमाणतिङादेशेनैव कालकारकाद्यनुगम इति स्पष्टं निबन्धेषु। तदर्थंकालान्वयस्य

कत्वासम्भवाच्च,—किन्तु तैः स्मृता लकाराः स्वादयश्च वाचकाः, लत्वस्य जातिरूपतया शक्ततावच्छेदकत्वौचित्यात्, अव्यभिचाराच्च। आदेशानां भिन्नतया परस्परव्यभिचारित्वात्। 'लः कर्मणी'त्याद्यनुशासनानुगुण्याच्च।

ॐ दर्पणः ॐ

अनुप्रयुज्यमानधातूत्तरैधादिनापि तदर्थबोधोपपत्तेर्नोक्तदोषोऽत आह—ब्रह्मेति। आदिना'ऽद्य तिप्यो' 'लिड्' 'धु'गित्यादिसंग्रहः। 'लुगादे'रित्यादिना, लुब्लोपयोः सः। तैरिति। आदेशैरित्यर्थः। उक्तदोषमाशङ्क्याह—लत्वस्येति। जातिरूपतयेति। लडादिलेषु 'ल'—इत्यनुगतप्रतीत्या तत्सिद्धिरित्यभिप्रायः।

नव्यास्तु—'शक्ततावच्छेदकतया न तत्सिद्धिः, सर्वलकारसाधारणलत्वस्यातिप्रसक्तत्वाद्दशलकारमात्रवृत्तेस्तु शक्तिग्रहात् पूर्वमनुपस्थितेः, 'पच'न्नित्यादौ कृतिबोधापत्त्या तस्य शक्ततावच्छेदकत्वासम्भवाच्च, तिप्त्वतस्त्वादिकमेव तदवच्छेदकमित्याहुः। तथाचोक्तविप्रतिपत्तौ प्राचीनैः सह विवाद एवेति बोध्यम्। अव्यभिचाराच्चेति। लत्वावच्छिन्नशक्तिग्रहस्य कृतिबोधात्पूर्वं नियमेन सत्त्वातिप्त्वादीनां शक्यतावच्छेदकत्वे तु तदवच्छिन्नशक्तिग्रहं विनापि तसादिशक्तिग्रहंवत् कृतिबोधेनादेशवाचकतावादिमते व्यभिचारो दुर्वार इति भावः। ननु कार्य्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशान्नेयमापत्तिरत आह—लः कर्मणीति।

ॐ काशिका ॐ

यद्यपि अनुप्रयुज्यमानकृञाद्यर्थे एव तथाप्यभेदेन तदर्थान्वय्येधाद्यर्थेऽपि तस्यार्थिकं भानं संभवत्येव। स्पष्टं चेदं प्रकृतसूत्रभाष्ये। अत एव 'कृञ् चानुप्रयुज्यते' इति सूत्रे कौमुद्यां—'तेषां क्रियासामान्यवाचित्वादाम्प्रकृतीनां विशेषवाचित्वात्तदर्थयोरभेदान्वय' इत्युक्तम्। अभेदान्वयश्चेत्थम्,—एधादयस्तत्तत्फलानुकूलव्यापारार्थकाः, कृञ्—उत्पत्त्यनुकूलव्यापारार्थः अस्ती—सत्तानुकूलव्यापाराभिधायिनौ। उत्पत्त्यादिकमाम्प्रकृत्यर्थफलनिष्ठमेव, प्रत्यासत्तेः। इत्थं चैधांचक्र इत्यत एककर्तृकवृद्ध्यनुकूलव्यापाराभिन्नपरोक्षानद्यतनभूतोत्पत्त्यनुकूलव्यापार इति बोध इत्याहुः। एवमादेशानां वाचकत्वपक्षेऽपि नात्र दोष इत्यतो 'ब्रह्मे'त्यस्यानुसरणम्। आदिपदेन 'वारि' 'पच' 'या' 'अपाची' त्यादेः संग्रहः, न च तत्रापि 'यः शिष्यत' इति न्यायेन प्रकृतिरेव लुप्तप्रत्ययार्थिकेति वाच्यम्, प्रकृतेस्तत्र शक्त्यादिकल्पनापेक्षयाऽन्यत्रबोधकत्वेन क्लृप्तस्य प्रत्ययस्य स्मरणकल्पनैव युक्तेत्याशयात्। स्थानिनो वाचकतापक्षे शक्ततावच्छेदकलाघवमप्यस्तीत्याह—लत्वस्येति। जातिरूपतयेति। दन्तवायुसंयोगजन्यतावच्छेदकतयानुगतप्रत्ययनिर्वाहकतया च तस्य जातित्वमिति भावः। परमते त्वानुपूर्वीणां शक्ततावच्छेदिकानां नानात्वं स्पष्टमेव।

युक्त्यन्तरमप्याह—अव्यभीति। कर्त्राद्यर्थज्ञानाधिकरणे तज्ज्ञानपूर्वसमये नियमेन लकारज्ञानसत्त्वादित्यर्थः। तथा च न स्वमते व्यतिरेकव्यभिचारः। परमते तु सोऽस्तीत्याह—आदेशाना-

न ह्यादेशेष्वर्थ[वत्ता]बोधकमनुशासनमुपलभामहे"—इत्याहुः,—तान् स्वसाधकयुक्तिभिर्निराचष्टे—

व्यवस्थितेर्व्यवहृतेस्तद्धेतुन्यायतस्तथा ।
किञ्चाख्यातेन शत्राद्यैर्लडेव स्मार्यते यदि ॥६२॥
कथं कर्तुरवाच्यत्ववाच्यत्वे ? तद्विभावय ! ॥

व्यवस्थानुरोधात् प्रयोगान्तर्गता एव वाचकाः, न तु तैः स्मृता इत्यर्थः । तथाहि—'पचती'त्यादौ लकारमविदुषां बोधान्न तस्य वाचकत्वम् । न च तेषां तिङ्क्षु शक्तिभ्रमाद् बोधः । तस्य भ्रमत्वे माना-

ॐ दर्पणः ॐ

इत्याहुरिति । तथाचादेशानामेव वाचकत्वं सप्रमाणमिति तद्भावः । स्वसाधकेति । स्वमतपरिपोषकेत्यर्थः । 'व्यवस्थिते'रित्यादिपञ्चम्यन्तत्रयस्य पूर्वकारिकास्थबोधकपदार्थेऽन्वयं प्रदर्शयन्नादौ 'व्यवस्थिते'रित्येतद्विवृणोति—व्यवस्थानुरोधादिति । प्रमाणेन पदार्थनिर्द्धारणं व्यवस्था, तदन्यथानुपपत्तेरित्यर्थः । शक्तिभ्रमादिति । लत्वावच्छिन्ननिष्ठवाचकत्वस्य तत्रारोपादित्यर्थः । मानाभावा-

ॐ काशिका ॐ

मिति । भिन्नतया = परस्परप्रतियोगिकभेदवत्तया,—अनेकतयेति यावत् । न चैवं 'भू-ल' इत्यतोऽपि बोधः स्यादिति वाच्यम्, समभिव्याहारविशेषस्य कारणत्वाभ्युपगमात् । अन्यथा तव मतेऽपि भू—अति इत्यादेरपि बोधापत्तिः । आदेशिज्ञानविधुराणां बोधस्तु शक्तिभ्रमादुपपद्यते, अपभ्रंशेषु तथाकल्पनादिति भावः । अथैवं शत्राद्यन्तस्थले कर्तृकर्मबोधो न स्यात्, लकारस्य तव मते कृतिकर्मत्वमात्रवाचकत्वादिति चेन्न । लकारस्य कृत्यादिमात्रवाचकत्वेपि शत्रादेः कर्त्रादिवाचकत्वाभ्युपगमात्, 'कर्तरि कृ'दित्यनुशासनात् । नामार्थयोरभेदान्वयानुरोधात्तत्र लकारस्यैव कर्माद्यर्थ इति न कोऽपि दोषः । एवं च श्रूयमाणमात्रवृत्तिवाचकताविरहाद् वर्णस्फोटो न युक्त इति भावः । स्वसाधकेति । स्वपक्षसाधकेत्यर्थः । अत्र संप्रदायविद इत्थं वर्णयन्ति स्म—आदेशानां वाचकत्वे 'राम' इत्यादौ विसर्ग एकत्वस्य वाचक इति व्यवस्था भवति, स्मृतानां वाचकत्वेऽव्यवस्था स्यात् । तथा हि 'राम' इत्यत्र विसर्गेण किं सुः ? किं वा रुः ? किं वा सिः स्मर्तव्यः ? पाणिनीयैः सुः, अन्यै रुः, कालापतन्त्राभिज्ञैः सिः, यस्तु सकलतन्त्राभिज्ञस्तस्य विनिगमनाविरहेण प्रतिबन्धात् कस्यापि स्मरणं न स्यादिति । तत्तु न युक्तम् । अनेकलिपिज्ञानसत्त्वेऽपि यथा नम् शब्दे एककाले न शब्दोपस्थितिप्रतिबन्धस्तथा सकलव्याकरणाभिज्ञस्य नादेशिस्मृतिबन्धः । अपि तु सर्वेषां स्मृतिस्तयाचार्थोपस्थितिरविलक्षणैवेत्यभ्युपगममात्र । अत एव घटकलशाद्यनेकपर्यायेभ्योप्यविलक्षणबोध उपपद्यतेऽतोन्यथा व्याचष्टे—तथाहीत्यादिना । बोधादिति । तथा च बोधानापत्तिरेवात्राव्यवस्थापदार्थ इति भावः । मानाभा-

भावात्। आदेशिनामपि तत्तद्वैयाकरणैः स्वेच्छया भिन्नानामभ्युपगमात्, —कः शक्तः को नेति व्यवस्थानापत्तेश्च। सर्वेषां शक्तत्वे गौरवं, व्यभिचारश्चास्त्येव। आदेशानां प्रयोगान्तर्गततया नियतत्वाद्युक्तं तेषां शक्तत्वम्। तथाचादेशिस्मरणकल्पना नेति लाघवम्।

साधकान्तरमाह—व्यवहृतेरिति। व्यवहारस्तावच्छक्तिग्राहकेषु

❀ दर्पणः ❀

दिति। विपयबाधस्यैव भ्रमत्वे तन्त्रतया प्रकृते बोधकत्वशक्तेस्तत्राबाधादिति भावः। नन्वादेशानां बहुत्वमेव तत्र शक्तिस्वीकारे बाधकमत आह—**आदेशिनामपीति**। वैयाकरणैः = शाकटायनप्रभृतिभिः। **व्यवस्थेति**। इदमेव वाचकमिति निर्द्धारणानुपपत्तेरित्यर्थः। अनुशासनस्य सर्वत्रापि सत्त्वादिति भावः। 'सर्वेषा'-मित्यस्य 'विनिगमकाभावा'दित्यादिः। ननु तथाप्यादेशापेक्षयादेशिनामल्पत्वेन तत्प्रयुक्तलाघवादादेशिष्वेव वाचकत्वं सेत्स्यतीत्यत आह-**व्यभिचारश्चेति**। ननु विनिगमनाविरहादेवादेशिनां वाचकतासिद्धिरत आह--**आदेशानामिति**। तथाच गौरवादिदोपस्य तत्परिहारस्य चोभयोः साम्येऽप्यादेशिस्मरणकल्पनाविरहप्रयुक्तलाघवसहकृतप्रयोगनैयत्यमेवादेशानां वाचकत्वे विनिगमकमित्याखण्डलार्थः।

ननु बोधकतायाः शक्तित्व एव भवदुक्तव्यवस्थोपपत्तिः, न च बोधकत्वस्य शक्तित्वं तन्मतसिद्धं, किन्तु सङ्केतस्य, पदार्थान्तरस्य वा तत्त्वम्। तथाचानुशासनेन यत्र सा प्रतिपाद्यते तत्रैव तदङ्गीकारेण कथं तिबादिपु तत्सिद्धिः, स्मरणकल्पनागौरवं तु प्रामाणिकत्वादपि न दुष्टमित्यस्वरसात्—प्रयोगे श्रूयमाणानां तिबादीनां वाचकत्वे साधकान्तरमुपन्यस्यतीत्याह-**साधकान्तरमिति**। **मुख्य इति**। मुख्यत्वं च—तस्मिन् शक्तिग्राहकान्तरनिरपेक्षत्वम्। व्याकरणा-

❀ काशिका ❀

वादिति। ततो बोधोदयेन तत्र वाचकत्वस्याबाधितत्वादिति भावः। विनिगमनाविरहात्सर्वेषामपि स्थानिनां वाचकत्वं भवतीत्याशङ्कायामाह—**सर्वेषामिति**। **व्यभिचारश्चास्त्येवेति**। तथा च यद्वयादादेशानां वाचकत्वपक्षपरित्यागस्तौ दोपौ स्थानिनो वाचकत्वपक्षेपि दुष्परिहरावेवेत्यर्थः। आदेशानां तिबादीनामाधिक्यात्तत्पक्षापेक्षयात्र पक्षे बहु गौरवमित्यनुशयान आह—**तथा चेति**। **मुख्य इति**। शक्तिग्रहे जननीये शक्तिग्राहकान्तरानपेक्षत्वरूपमुख्यत्वम्। व्याकरणादीनां तु न तथात्वम्,—तथाहि—'तस्यापत्य'मित्यादिनाणादिप्रत्ययस्य शक्तिग्रहेऽपत्यादिशब्दशक्तिग्रहोऽपेक्ष्यते, स चेच्छब्दान्तरेण, तस्यापि शब्दान्तरेणैव शक्तिग्रह इत्यभ्युपगमेऽ-

१ त्वय। कृत्यादिबोधे लत्वस्यापि कारणतावच्छेदककोटौ निवेशात्, तस्य च—तद्भिन्नस्थानितो यत्र बोधस्तत्राभावाद् व्यभिचारः स्फुटः।

मुख्यः। स च श्रूयमाणतिङादिष्वेवेति त एव वाचका इत्यर्थः। किञ्च,—'तद्धेतुन्यायत'इति। लकारस्य बोधकत्वे, 'भू-ल'इत्यतोपि बोधापत्तिः स्यात्। तादृशबोधे 'भव्-अती'ति समभिव्याहारोपि कारणमिति चेत्, तर्ह्यावश्यकत्वादस्तु तादृशसमभिव्याहारस्यैव वाचकत्वशक्तिः। अन्यथा लका-

❀ दर्पणः ❀

दिना शक्तिग्रहे नियमेन तद्ग्राहकान्तरापेक्षणात्। स चेति। व्यवहारजन्यशक्तिग्रहश्चेत्यर्थः। तिङादिष्वेवेति। व्यवहारेण पूर्ववाक्ये तद्ग्रहेप्यावापोद्वापाभ्यां पश्चात्तघटकतिङादिष्वेव तन्निर्णयादिति भावः। ननु प्रयोगान्तर्गतवर्णेषु सर्वसिद्धव्यवहारेण शक्तिग्रहे 'घटमानये'त्याद्यन्तर्गतशवादीनामपि वाचकत्वापत्तिः, न च सेष्टा, 'विकारणानां नैरर्थक्य'मिति सिद्धान्तव्याकोपात्। किञ्चानयनादिव्यवहारस्य लोडाद्यन्तप्रयोगं विनाऽसम्भवेन तादृशप्रयोगान्तर्गतवर्णानां तेन तत्त्वसिद्धावपि तद्रहितवाक्यान्तर्गतवर्णेषु वाचकत्वमनुशासनेनैवेष्टव्यं, तथा च तत्रादेशिनां वाचकत्वसिद्धावन्यत्राप्यादेशिषु सा कल्प्येत्यस्वरसादाह—किञ्चेति। तद्धेत्विति। 'तद्धेतोरेव तत्त्वे किं तेने'ति न्यायाकारः। लाघवमूलकश्चायं न्यायः, उभयोर्हेतुत्वे गौरवात्। तं सङ्गमयति—लकारस्येति। बोधापत्तिरिति। भवनकर्तृबोधापत्तिरित्यर्थः। 'न केवले'ति न्यायात्केवललकारस्य प्रयोगानर्हत्वाद्, 'भू'इत्युक्तम्। लकारदशायां शपोऽसम्भवाच्च 'भवती'त्युपात्तम्। तथाच भवतीत्यत्रानुसंहिताल्लकाराद्यथा कर्तृबोधस्तथा प्रत्यक्षश्रुतलकारादपि कर्तृबोधापत्तिरिति भावः। न चासाधुत्वज्ञानं प्रतिबन्धकं, शक्तत्वरूपसाधुताया अपि सत्त्वादपभ्रंशादपि बोधोदयेन तदीयज्ञानस्याप्रतिबन्धकत्वाच्चेति भावः। तादृशेति। आपादितकर्तृबोधे इत्यर्थः। समभिव्याहार इति। पूर्वापरी-

❀ काशिका ❀

नवस्थाप्रसङ्गोऽतो व्यवहारस्यापत्यादिशब्दशक्तिग्रहसंपादनद्वाराऽपेक्षणादिति भावः। त एव = तिङादय एव। एवकारेण स्थानिभूतलकारादिव्यवच्छेदः। ननु व्यवहारात्तिङपु गृह्यमाणापि शक्तिर्लाघवादादेशिनि व्यवस्थाप्यते, न तु तिङ्पु, गौरवात्, यथा व्यवहाराद्वाक्ये गृहीतापि शक्तिर्लाघवात्तत्पदे कल्प्यते तद्वत्। अनेकस्मरणकल्पनागौरवं तु फलमुखत्वान्न दोषायेत्याशङ्कमानो मूले साधकान्तरमाह–तद्धेतुन्यायत इति। तद्धेतुन्यायपदयोः कर्मधारयः। व्याख्यायां–किं चेति। अस्य 'साधकान्तरमाहे'ति शेषः। पूर्वफक्किकास्थस्यानुषङ्गो वा बोध्यः। न्यायं व्युत्पादयति–लकारस्येति। तादृशे बोधे = एककर्तृकवर्तमानकालिकविक्लित्यनुकूलो व्यापार इति बोध इत्यर्थः। पचतीति समभिव्याहारोपीति। अव्यवहितोत्तरत्वसंबन्धेन पच्धातुविशिष्ट अविविशिष्ट पचतिशब्दरूपः समभिव्याहार इत्यर्थः। वाचकत्व-

रस्य वाचकत्वं, समभिव्याहारस्य कारणत्वञ्चेत्युभयं कल्प्यमिति गौरवं स्यात् । तथाच तादृशसमभिव्याहारः, समभिव्याहृता वर्णा वेत्यत्र विनिगमनाविहात् प्रयोगान्तर्गता वर्णा वाचका इति सिध्यतीति भावः ।

❀ दर्पणः ❀

भावापन्नवर्णसमुदाय इत्यर्थः । आवश्यकत्वात्तं विना लकारेणापि बोधाजननेनोक्तसमभिव्याहारस्यापेक्षणादित्यर्थः । **वाचकत्वशक्तिरिति** । अर्थबोधकत्वरूपा शक्तिरित्यर्थः । तथाचाप्राप्तकालता वर्णस्फोटोपयोगित्वान्न स्यादिति भावः ।

वाचकत्वानभ्युपगमे आदेशिशक्तिवादिमते गौरवं प्रदर्शयति—**अन्यथेति** । उक्तसमभिव्याहारस्य वाचकतानभ्युपगमे इत्यर्थः । नन्वेतावता समभिव्याहारस्य वाचकत्वसायातं न प्रयोगान्तर्गतधातुप्रत्ययघटकानां वर्णानामत आह—**तथाचेति** । **विनिगमनाविरहादिति** । न च वर्णानां बाहुल्यमेव विनिगमकम्, उक्तानुपूर्व्यास्तदनुगमकत्वात् । किञ्च समभिव्याहारस्य वाचकत्वे तद्घटकनानावर्णानामवच्छेदकतायां गौरवम् । वर्णानां वाचकत्वे तूक्तानुपूर्व्या एकस्या एव तत्त्वमिति लाघवस्यैव विनिगमकत्वमिति भावः । ननु प्रयोगान्तगतवर्णस्मारितवर्णत्वावच्छेदेन वाचकत्वसिद्धौ प्रकृतायां वाचकत्वाभावसाधनाय 'भू-ल' इत्यतो भवनक्रियाकर्तृबोधापादनमनुचितम्, तादृशलकारस्य प्रयोगान्तर्गतवर्णास्मारितत्वात् । तथाच नोक्तयुक्तिः समभिव्याहारस्य वाचकत्वसाधिका । नाप्यत्र तद्धेतुन्यायावकाशः, समभिव्याहास्य लवाचकताग्रहोपयोगितया शाब्दबोधे हेतुत्वेपि तद्वाचकतायां मानाभावेन तेन तदन्यथासिद्ध्यसम्भवात्, लकारस्य वाचकत्वे त्वनुशासनस्यैव मानत्वादित्यपरि-

❀ काशिका ❀

शक्तिः = वाचकत्वरूपा शक्तिरित्यर्थः । समभिव्याहारस्य वाचकत्वे सिद्धेपि साधुशब्दान्तर्गतवर्णत्वावच्छेदेन न तत्सिद्धमित्याशङ्कामपाकर्तुमाह—तथा चेत्यादिना । **सिध्यतीति** । विनिगमनाविरहात्समभिव्याहृतवर्णानामपि वाचकत्वं सिध्यतीत्यर्थः । अन्ये तु—विनिगमनाविरहात्प्रत्येकावृत्तेः समुदायावृत्तित्वाच्च समभिव्याहृतवर्णानामेव वाचकत्वम् । न च द्वित्ववत् प्रत्येकावृत्तित्वेऽपि समुदायवृत्तित्वसंभवः, द्वित्वस्यापि प्रत्येकं वृत्तित्वस्वीकारादित्याहुः । [1]पेटाकृतस्तु रथाङ्गेषु प्रत्येकं गमनानुकूलशक्तिविरहेऽपि तत्समुदायरूपे रथे तत्सद्भाव इत्यर्थवत्सूत्रे—'दृष्टो ह्यतदर्थेन गुणेन गुणिनोऽर्थभावः, [2]यथा तर्हि रथाङ्गानि विहृतानि प्रत्येकं व्रजिक्रियां प्रत्यसमर्थानि तत्समुदायश्च रथः समर्थ इति रथाङ्गवदिति भाष्यकारै रभिहितं, तद्वत् प्रकृतेऽपि संभव इति विनिगमनाविरहेण समभिव्याहृतवर्णानामपि वाचकत्वमित्येव युक्तमित्याहुः । सम-

१ मञ्जूषाकृत इत्यर्थः, २. यथा तर्हि = यथाहि ।

अपिच लकारस्यैव वाचकत्वे कृत्तिङोः कर्तृभावनावाचकत्वव्यवस्था त्वत्सिद्धान्तसिद्धा न स्यादित्याह–किञ्चेति । आदेशानां वाचकत्वे च-तिङ्त्वेन भावनायां शानजादिना कर्त्तरि शक्तिरित्युपपद्यते विभाग इति भावः । न च शानजादौ कृतिर्लकारार्थः, आश्रयः शानजर्थ इत्यस्तु 'कर्त्तरि कृ'दित्यनुशासनादिति शङ्क्यं, स्थान्यर्थेन[1] निराकाङ्क्षतया 'शानजादौ 'कर्त्तरी'त्यस्याप्रवृत्तेः, अन्यथा घञादावपि प्रवर्त्तेत ॥ ६२½ ॥

'देवदत्तः पचमान' इत्यादिसामानाधिकरण्यानुरोधाच्छानचः कर्त्ता वाच्यः स्यादित्याशङ्क्याह—

तरबाद्यन्ततिङ्क्ष्वस्ति नामता कृत्स्वव स्फुटा ।
नामार्थयोरभेदोऽपि तस्मात्तुल्योवधार्यताम् ॥ ६३ ॥

※ दर्पणः ※

तोपान्मूलमवतारयति—अपिचेति । न स्यादिति । स्थानिनो लकारस्योभयत्रैक्यादिति भावः । नव्यनैयायिकनये तु नेयमापत्तिः । तैः प्रयोगान्तर्गततिबादीनामेव वाचकताया अभ्युपगमात् । धातुप्रत्ययलोपस्थले तत्तदर्थबोधोपपादनं तूभयोः समप्रयत्नकमित्यवधेयम् । इत्यस्त्विति । तथाच तदुभयशक्त्यैव कर्त्तृलाभः, कृत्याश्रयस्यैव कर्तृत्वादिति भावः । अन्यथेति । अनाकाङ्क्षेपि शास्त्रप्रवृत्तावित्यर्थः । शक्ततावच्छेदकभेदस्य तत्रापि सत्त्वादिति भावः ॥ ६२॥

सामानाधिकरण्यानुरोधादिति । शानचः कृतिवाचकत्वे सर्वानुभवसिद्धान्वयबोधानुपपत्तेरित्यर्थः । लडादेशत्वबोधनफलं धात्वर्थे वर्त्तमानत्वप्रतीतिरेवेति

※ काशिका ※

भिव्याहृततावद्वर्णवृत्तिर्वाचकतेत्यभ्युपगमान्न तद्धटकैकैकादिवर्णात् तत्तदर्थबोधापत्तिरिति बोध्यम् । कर्तृभावनेति । कृतः कर्तृवाचकत्वं, तिङो भावनावाचकत्वमिति विभागो न स्यादित्यर्थः । भवन्मते न स्यादिति । शत्रादिरूपे कृति कर्तृवाचकत्वस्यासंभवात् तस्यापि लादेशत्वाविशेषेण वाचकत्वासंभवात्, स्थानिभूतलकारस्य तु भावनामात्रवाचकत्वादिति भावः । निराकाङ्क्षतयेति । 'अर्थांशे' इति शेषः । कर्तरीत्यस्येति । 'कर्तरि कृ'दित्यस्येत्यर्थः । अप्रवृत्तेरिति । साकाङ्क्षितविधानस्यैवोचितत्वादिति भावः ॥ ६२ ॥

इत्यादिसामानाधिकरण्येति । इत्यादौ सामानाधिकरण्यानुरोधात् , अभेदान्वयानुरोधादित्यर्थः । यदि कर्ता शानजर्थो न स्यात् तदा चैत्रः पचमान इत्यादावनन्वयः स्यादभेदस्य बाधि-

१ स्थान्यर्थेन = लडाद्यर्थकृत्यादिना ।

'पचतितरां मैत्रः', 'पचतिकल्पं मैत्र' इत्यादिषु नानार्थत्वाभेदान्वययोः सम्भव एवेति कर्तृवाचकता स्यादिति भावः। न च 'पचतिकल्प'मित्यत्र सामानाधिकरण्यानुरोधात् कर्त्तरि लक्षणा, 'पचमान' इत्यत्राप्यापत्तेरिति। 'लः कर्म्मणी'त्यनुशासनञ्च लाघवात् कल्पिते लकारे कर्त्रादिवाचित्वं कल्प-

❀ दर्पणः ❀

बोध्यम्। पचतिकल्पमिति। इदञ्च 'स्वाद्यन्तं नामे'ति मतमनुसृत्य। 'सत्त्वप्रधानानि नामानी'तिनिरुक्ताद् द्रव्यविशेष्यकबोधजनकत्वं नामत्वम्। तदेव च 'नामार्थयो'रिति व्युत्पत्तिघटकम्। अत एव निपातार्थस्य भेदान्वय इति मतेनेदं दूषणमिति तु परे। 'लक्षणे'त्यस्य 'लस्ये'ति शेषः। आपत्तेरिति। नच सा तवेष्टेति भावः। नन्वादेशानां वाचकत्वे आदेशिशक्तिप्रतिपादक'लःकर्मणी'त्यादिसूत्राणां वैयर्थ्यमत आह–लः कर्मणीति। उक्तमिति। 'आख्यातशक्तिनिरूपणावसरे' इति

❀ काशिका ❀

त्वात्। आधाराधेयभावसंबन्धेनान्वयस्य नामार्थयोरिति व्युत्पत्तिविरोधेनासंभवात्। कर्तृवाचकता स्यादिति। अस्य 'तिङ'मित्यादिः। 'पचतितरां मैत्र' इत्यत्रातिशयितविक्लित्त्यनुकूलक्रियानुकूलभावनाया नामार्थत्वेन मैत्रेण सहाभेदान्वयासंभवात्। एवं 'पचतिकल्पं मैत्र' इत्यत्रेपदसमासतथाविधक्रियानुकूलभावनाया नामार्थत्वेनाभेदान्वयासंभवात् कर्त्राख्यातस्य कर्तृवाचकत्वं स्यात्, तच्च परमतेऽनिष्टमिति भावः। इत्यत्राप्यापत्तेरिति। शानचोऽन्यत्र शक्त्यनिर्णयेन शक्यसम्बन्धरूपा लक्षणा न संभवतीति न शङ्क्यम्। प्रथमान्तपदासमभिव्याहृताख्यातवदितरासमभिव्याहृतपचमान इति प्रयोगे शानचोऽपि भावनायां शक्तिनिर्णयसंभवात्। अथवा तत्स्थानिनो लकारस्य तत्र लक्षणापत्तिर्बोध्या। न च 'नामार्थयो'रिति व्युत्पत्तौ नामपदं सत्त्वप्रधानपरं, तिङन्तप्रकृतिकतरबाद्यन्तप्रतिपाद्या भावना त्वसत्त्वभूतैवेति न दोषः, किं च 'नामार्थयो'रित्यादिव्युत्पत्तेर्नामजन्यप्रतीतिविशेष्ययोरेवान्वयः स चाभेदेनैवेति शरीरम्, एवं च भवन्मतेऽपि 'पचतितरां देवदत्तः' 'पचतिकल्पं देवदत्त' इत्यत्र कथं देवदत्तस्य विशेषणीभूतेन तिङर्थकर्त्रा सहान्वयः। तव मते व्युत्पत्तेस्तत्र संकोच इति चेन्मयापि सोऽनुस्रियत इति वाच्यम्। नामपदेन प्रातिपदिकमात्रस्य, सुबन्तमात्रस्य वा ग्रहणं, नामजन्यप्रतीतिविशेष्ययोरेवेत्यादिनियमे मानाभावश्चेत्याशयात्। न च तथाविधनियमानभ्युपगमे 'नित्यो घट' इत्यस्य वाक्यस्य घटत्वे नित्यपदार्थान्वयसंभवात् प्रामाण्यापत्तिरिति वाच्यम्। घटत्वस्य पदार्थैकदेशतया 'पदार्थः पदार्थेनान्वेती'त्यादिव्युत्पत्तिविरोधेन तत्र तदन्वयासंभवेनोक्तवाक्यस्य प्रामाण्यापत्तेरभावात्। कर्तुः पदार्थैकदेशत्वाभावेन 'पचतिकल्पं देवदत्त' इत्यादावन्वयोपपत्तिस्त्वक्षतैव। तस्मात् समभिव्याहृतवर्णानामेव वाचकत्वमिति वर्णस्फोटो निष्प्रत्यूहः। ननु तिबाद्यादेशानां वाचकत्वे 'लः कर्मणि—

तमादायेत्युक्तम् ॥ ६३½ ॥ [इति वर्णस्फोटनिरूपणम् ॥]

अथादेशा वाचकाश्चेत् पदस्फोटस्ततः स्फुटः ॥ ६४ ॥

[1]एवमादेशानां वाचकत्वे सिद्धे पदस्फोटोऽपि सिद्ध एवेत्याह—अथेत्यादि। आदेशास्तिब्विसर्गादयः। अयं भावः—समभिव्याहृतवर्णानां वाचकत्वे सिद्धे तादृशवर्णसमभिव्याहाररूपपदस्य वाचकता सिद्ध्यति। प्रतिवर्णमर्थस्मरणस्यानुभवविरुद्धत्वात्। प्रत्येकं वर्णाना-

※ दर्पणः ※

शेपः। एवञ्च प्रयोगे श्रूयमाणप्रकृतिप्रत्ययघटकवर्णेषु शक्तिर्वर्णस्फोटइति पर्य्यवसन्नम् ॥६३½॥ इति वर्णस्फोटनिरूपणम्।

पदस्फोटनिरूपण उपजीव्योपजीवकभावस्यापि सङ्गतित्वं सूचयन्मूलमवतारयति—**एवमिति**। उक्तरीत्येत्यर्थः। आदेशानामपि केषाञ्चित् प्रयोगान्तर्गतत्वादाह—**तिब्विसर्गादय इति**। प्रयोगान्तर्गतवर्णा इति यावत्। ननु तादृशयावद्वर्णानां वाचकत्वे कथं पदस्फोटसिद्धिरतो भावार्थमाह—**अयमिति**। समभिव्याहृतं तूक्तार्थम्। **सिद्ध इति**। आनुपूर्वीविशिष्टतावतां वर्णानामवाचकत्वे आनुपूर्वीरूपपदस्य वाचकत्वाशा दुराशेति भावः। ननु समुदायस्य प्रत्येकानतिरिक्तत्वेन वाचकतायाः प्रत्येकवर्णे विश्रामो वाच्यस्तथाच कथं समुदिततादृशवर्णरूपपदस्य वाचकतेत्यतः प्रत्येकवर्णवाचकतां निरस्यति—**प्रतिवर्णमिति**। **अनुभवविरुद्धत्वादिति**। घटशब्दादमुमर्थं प्रत्येमीत्येव प्रतीतेरित्यर्थः। बाधकान्तरमप्याह—**प्रत्येकमिति**। **अर्थवत्त्व इति**। तदभ्युपगम इत्यर्थः। [2]नलोपादी-

※ काशिका ※

इत्याद्यनुशासनविरोधस्तेन स्थानिनामेव वाचकत्वबोधनादित्याशङ्क्याह—'लः कर्मणी'त्यनुशासनमिति ॥ * इति वर्णस्फोटनिरूपणम् *

समभिव्याहृतवर्णानाम्—तत्तत्पदघटकयावतां समभिव्याहृतवर्णानामित्यर्थः। **वाचकत्वे सिद्धे इति**। तावतां वर्णानां वाचकत्वं विना वक्ष्यमाणस्वरूपपदस्य वाचकत्वं नोपपद्यते, अतः पदस्य वाचकत्वसिद्धिस्तावतां वर्णानां वाचकत्वसिद्ध्यधीनेति भावः। एवं च पूर्वग्रन्थेन सहास्य ग्रन्थस्योपजीव्योपजीवकभावसंगतिः सूचिता। ननु तथापि वाचकता प्रतिवर्णं विश्राम्यतु नाम, नैतावता 'पदं वाचक'मित्यभिमतसिद्धिरित्याशङ्क्याह—**प्रतिवर्णमिति**। **समभिव्या-**

१ एतावता प्रबन्धेनादेशानां = तिबादीनां। वर्णस्फोटस्य सिद्धाविति यावत्। २ धकारस्य झलां जशोऽन्त इति जश्त्वं स्यादित्यर्थः। ३ तेषां = धन—वनादीनाम्।

मर्थवत्त्वे प्रातिपदिकत्वापत्तौ नलोपः प्रातिपदिकान्तस्येत्यादिभिर्धनं वनमित्यादौ नलोपाद्यापत्तेश्च । एतच्च—"चरमवर्ण एव वाचकत्व-

❀ दर्पणः ❀

त्यादिना जश्त्वादिपरिग्रहः । तथाच समुदितानामेव तेषां वाचकत्वमभ्युपेयम् । तत्र चोक्तयुक्त्या तत्समुदायस्य वाचकत्वं निराबाधम् । स एव चास्माकं पदशब्द-व्यपदेश्य इति भावः । ननु प्रत्येकवर्णानां वाचकत्वस्य गौरवपराहतत्वादेवासम्भवात् समुदायस्यैव तत्सेत्स्यतीत्यादेशा वाचकाश्चेदिति समभिव्याहृतवर्णानां वाचकताया हेतुत्वोपन्यासो विफलः । उन्मत्तप्रलपितत्वशङ्काया अवसरेणैव निरासादित्यत आह—एतच्चेति । समभिव्याहृतवर्णानां वाचकत्वोपन्यसनं चेत्यर्थः । **चरमवर्ण एवेति** । पदान्ते श्रूयमाणवर्णे एवेत्यर्थः । 'एवकारेण पदघटतत्प्राक्तनवर्णव्युदासः । तत्र हेतु-माह—शक्तेरिति । स्वरूपसम्बन्धात्मिकायां बोधकारणतायां पर्य्याप्तत्वासम्भवा-च्चरमवर्णादेव बोधोदयेनान्यत्र तत्सत्त्वे मानाभावादिति वार्थः । ननु तस्यैव वाचकत्वे

❀ काशिका ❀

हाररूपेति । समुदायरूपे यर्थः । **नलोपाद्यापत्तेश्चेति** । सुपः श्रवणं तु नापादितं, समुदाया-त्मकप्रातिपदिकावयवत्वेन 'सुपो धातु'ति लुक्संभवात् । समासग्रहणस्य—'भेदे सति पदार्थयोः परस्परं संसर्गस्तथाविधार्थवत्समुदायस्य चेद्भवति तर्हि समासस्यैवे'ति नियमार्थतया प्रकृते समु-दाये प्रातिपदिकत्वस्य निष्प्रत्यूहत्वात् । **प्रतीपोद्योतकृतः**—प्रतिवर्णं संख्यार्थकपेत्वाभावान्न तद्-द्योतकविभक्त्युत्पत्तिः । एतादृशस्थले एव संख्योत्पत्तेः । संख्या च समुदायस्यैवार्थो न प्रत्येकवर्णा-नाम्, 'एकत्वं संघातस्यार्थ'इति 'अइउ'णसूत्रस्थभाष्यस्वरसात् । तथा च तत्र भाष्यं—संघात-स्यैकार्थ्यात् सुबभावो वर्णा'दित्यादि । प्रकृत्यंशे वर्णव्यत्ययोपजनयोः सत्त्वेऽपि संख्यान्तरानवगमात् संख्या समुदायस्यैवार्थ इति तदाशयः । न चाव्ययेभ्य इवैकवचनं दुर्वारमिति वाच्यं, संख्या-शून्यार्थके एव भाष्यप्रामाण्यात्तथाकल्पनेऽपि न तद्युक्तार्थकेऽनभिधायकस्वाद्युत्पत्तिः कल्पनार्हा, मानाभावात् । गमकसत्त्वे एव तत्कल्पनाच्च । एवं चैषां प्रत्ययोद्देश्यत्वरूपं प्रकृतित्वमेव नेति 'न केवले'ति न्यायस्यापि नावतारः । एवं च न नलोपाद्यापत्तिरिति—प्राहुः । एवं चानुभवविरुद्धार्थ-स्मरणापत्त्या वर्णव्यत्ययोपजनादिसत्त्वेऽपि 'तर्कु' 'रज्जु'रित्यादौ धात्वर्थान्तरानवगत्या गौरवेण च न वर्णानां प्रत्येकमर्थवत्त्वमित्येव ज्यायः । स्पष्टं चेदम् 'अइउण्' सूत्रभाष्ये । **एतच्चेति** । समभि-व्याहारवाचकत्वसमर्थनं चेत्यर्थः । **चरमवर्ण एवेति** । प्रकृत्यादिघटकचरमवर्णे एवेत्यर्थः । प्रथमादिवर्णे तु न शक्तिः, तन्मात्रोच्चारणादर्थप्रत्ययापत्तेः, उत्तरवर्णानुभवजन्यसंस्कारस्य तदा-नुपूर्व्येण प्रथमवर्णानुभवस्योत्तरोत्तरवर्णानुभवजन्यसंस्काराणां सहकारित्वासंभवात् । उत्तरोत्तर-वर्णानुभवजनितसंस्कारसहकृतप्रथमादिवर्णानुभवजन्यसंस्कारस्य हेतुत्वे तु विनिगमनाविरहेण

शक्तिः, शक्तेर्व्यासज्यवृत्तित्वे मानाभावात्। पूर्वंपूर्वं वर्णानुभवजन्यसंस्कारा-श्चरमेणार्थधीजनने सहकारिण इति न तन्मात्रोच्चारणादर्थधीरिति—" वर्णस्फोटवादिनां मतान्तरस्य दूषणायोक्तम्। 'रामोस्ती'ति वक्तव्ये, 'राम्' इत्यनन्तरं घटिकोत्तरमोकारोच्चारणेऽर्थबोधापत्त्या तादृशानुपूर्व्या एव

❀ दर्पणः ❀

तन्मात्रश्रवणादर्थबोधापत्तिरत आह—**पूर्वंपूर्वेति**। तत्पदघटकपूर्ववर्णैत्यर्थः। **मतान्तरेति**। समभिव्याहृतवर्णानामवाचकत्वे तत्समुदायरूपपदस्य सुतरामवाचकत्वमिति यन्मतान्तरं तत्खण्डनायेत्यर्थः। 'उक्त'मित्यस्य 'मूल' इति शेषः। **अर्थबोधापत्त्येति**। वस्तुतस्तु नेयमापत्तिः, उद्बोधकस्य फलानुमेयत्वेन तादृशस्थले फलाभावेनोद्बुद्धसंस्काराभावादिति बोध्यम्। ननु समभिव्याहारो न समूहः, वर्णानां क्रमिकाणामाशुविनाशिनां च तदसम्भवादत एवाव्यवहितोत्तरत्व-सम्बन्धेन न पूर्वपूर्ववर्णवत्त्वं, पूर्वपूर्ववर्णस्यैवाभावात्, नापि वर्णसमवेतं पदार्था-न्तरं, मानाभावात्, अन्यथा तादृशधर्मानुगतीकृतवर्णानां वाचकत्वेनैवोपपत्तेः—पदस्फोटस्य निरालम्बनतापत्तेः, पदप्रयुक्तकार्याणां वर्णेष्वेव दर्शनाच्चेति कथं

❀ काशिका ❀

तावद्वर्णसमुदाये शक्तिसिद्ध्यापत्तिरिति भावः। **व्यासज्यवृत्तित्वे**—अनेकवर्णपर्याप्तत्वे। **मानाभावादिति**। चरमवर्णानुभवोत्तरमेवार्थबोधोदयेन तत्रैव वाचकत्वविश्रान्तिरिति भावः।

नन्वेवं चरमवर्णमात्रोच्चारणेप्यर्थबोधापत्तिरत आह—पूर्वंपूर्वेति। अत एव नेतरवर्णैरर्थक्यम्। **दूषणायेति**। दूषणायापि। अपिना पूर्वोक्तपक्षदूषणसमुच्चयः। अथवा—पूर्वोक्तपक्षस्यानेक-पूर्वोक्तदोषपराहतत्वादेवैतत्पक्षदूषणस्यैवोद्देश्यतया,—दूषणायैवेत्यर्थः। **आनुपूर्व्या एवेति**। न तु चरमवर्णमात्रवृत्तितद्व्यक्तित्वादेः। ननु 'घट' इत्यादौ घोत्तरावर्णोत्तरटकारोत्तरावर्णत्वादि-रूपानुपूर्व्याश्चरमे वर्णे एव वृत्तेर्न तावद्वर्णसमुदायवृत्तित्वमिति कथं पदस्य वाचकत्वरूपभवदभि-मतसिद्धिरिति चेन्न। आनुपूर्व्या पदार्थान्तरत्ववादिमीमांसकमते एतद्दोषासंस्पर्शात्। 'पूर्वोक्तरूप-नुपूर्वी'ति मतेऽपि घाव्यवहितोत्तरावर्णत्वस्यावर्णे, तदव्यवहितपूर्वघत्वादिरूपानुपूर्व्यास्तत्पदघटक-सकलवर्णेषु विश्रान्तेरक्षतेः। एतासां नानात्वेन गौरवान्न शक्ततावच्छेदकत्वमिति चेन्न, अगत्या स्वीकारात्। 'अव्यवहितोत्तरत्व'संबन्धेन पूर्वपूर्ववर्णसंश्लिष्टोत्तरोत्तरवर्णसमुदायत्वस्यानुपूर्वीरूप-त्वाद्वा। अथवा चरमवर्णमात्रविश्रान्तानुपूर्वीविषयिताव्यापकविषयताप्रतियोगित्वरूपानुपूर्वीघटकत्वं, तेन संबन्धेनानुपूर्वी वा शक्ततावच्छेदिकेत्यङ्गीक्रियतां, पदभेदेन घटकवर्णानां भेदेऽपि घत्वाद्यव-च्छिन्नविषयितात्वेन वर्णविषयितानां तादृशानुपूर्वीविषयिताव्यापकत्वं विवक्षणीयमिति नाव्या-पकत्वासंभवादिदोष इत्यलं पल्लवितेन।

शक्ततावच्छेदकत्वौचित्यादिति दिक् ॥६४॥

'सुप्तिङन्तं पद'मिति पारिभाषिकपदस्य वाचकत्वस्वीकर्त्तॄणां मतमाह–

घटेनेत्यादिषु न हि प्रकृत्यादिभिदा स्थिता ॥
वस्त्रसादाविवेहापि सम्प्रमोहो हि दृश्यते ॥ ६५ ॥

❀ दर्पणः ❀

पदस्फोटसिद्धिरित्यत आह––दिगिति । तदर्थस्तु वर्णसमुदायः पदं, न वर्ण इति प्रतीतेर्वर्णातिरिक्ततत्समुदायात्मकपदस्वीकार आवश्यकः । अत एव 'पदे वर्ण' इति व्यवहारोपि स्वरसतः सङ्गच्छते । नित्याश्च वर्णास्तेषु पौर्वापर्यञ्च पूर्वपूर्ववर्णानुसन्धानस्याव्यवहितोत्तरत्वसम्बन्धेनोत्तरोत्तरवर्णानुसन्धाने वाक्यस्फोटवक्ष्यमाणरीत्या सम्भवात्तद्विषयकानुसन्धानविशिष्टानुसन्धानविषयत्वरूपमिति स्वीकारेऽपि क्षत्यभावाच्च । यथा चैतत्तथा वाक्यस्फोटनिरूपणे वक्ष्यत इति । तथा च वर्णसमुदायो वाचक इति पदस्फोटपक्षे पर्यवस्यति ॥६४॥

पारिभाषिकेति । शास्त्रकारसङ्केतितेत्यर्थः । पूर्वं तु प्रकृतिघटकवर्णसमु-

❀ काशिका ❀

ननु तादृशानुपूर्व्याः सहकारित्वादेवोक्तातिप्रसङ्गवारणेऽलं तस्याः शक्ततावच्छेदकत्वकल्पनेयेत्यत आह—दिगिति । तदर्थस्तु—समुदायस्यार्थवत्त्वाभावेन प्रादिपदिकत्वानापत्तिः, अर्थबोधजनने सहकारित्वमात्रेण समुदायस्य प्रातिपदिकत्वस्वीकारेऽपि चरमवर्णमात्रस्यापि प्रातिपदिकत्वात्ततोऽपि प्रत्ययोत्पत्त्यापत्तिः । एवं चरमवर्णस्यैव वाचकत्वे तदर्थे विभक्त्यर्थान्वयो न स्यात्, तस्याप्रकृतित्वात् । समुदायस्य प्रकृतित्वेऽपि प्रकृतार्थस्य तद्वृत्त्यनुपस्थित्या तदर्थत्वाभावात् । किं च—पङ्कजादिपदे समुदाये शक्त्यभावे यौगिकयोगरूढादिविभागोच्छेदापत्तिः, 'पाचक'इति वक्तव्ये 'पाच्' इत्यनन्तरं घटिकादिव्यवधानेनाक इत्युच्चारणेऽपि पाककर्त्तेति बोधापत्त्या सर्वत्र समुदायानुपूर्व्या एव यत्र सहकारित्वं तत्र यौगिक'मित्यादेर्वक्तुमशक्यत्वात् । ननु यत्स्वघटप्रकृत्यादिचरमवर्णशक्त्यैवार्थोपस्थापकं तद्यौगिकं, यथा पाचकादिपदं । यत् स्वचरमवर्णशक्त्यैवार्थोपस्थापकं तत् 'केवलरूढं'—यथा–डित्थादिपदं । यत्र स्वघटकप्रकृत्यादिचरमवर्णशक्त्या, स्वीयचरमवर्णशक्त्या च पृथगुपस्थितयोरर्थयोः परस्परमन्वयस्तद्योगरूढं, यथा–पङ्कजादिपदमित्येवं विभागः संभवत्येवेति चेन्न । पाचकादिपदघटकप्रत्ययचरमवर्णे स्वचरमवर्णत्वस्यापि सत्त्वेन निरुक्तयौगिकत्वस्यासंभवापत्तेः । एवं गोपदे केवलरूढत्वं न स्यात्, तच्चरमवर्णस्य तद्घटकप्रत्ययचरमवर्णाभिन्नतया स्वचरमवर्णशक्त्यैवोपस्थित्यभावादित्यादिर्वोध्यः ॥६४॥

परिभाषितपदस्येति । तस्यैवेत्यर्थः । अर्थवत्पदत्वेनाभिमतप्रकृतिप्रत्ययव्युदासः ।

'घटेने'त्यादौ घटे इति प्रकृतिर्नेति प्रत्ययः, 'घट्'-इति प्रकृतिरेनेति प्रत्यय इति विभागस्य,–'सर्वे सर्वपदादेशा' इति स्वीकारे विशिष्य प्रकृतिप्रत्यययोर्ज्ञानासम्भवात्—न वाचकत्वमित्यर्थः। वैयाकरणैर्विभागः सुज्ञान इत्यतो दृष्टान्तव्याजेनाह—वस्नसादाविति। 'बहुवचनस्य वस्नसा'विति समुदायस्यादेशविधानान्नात्र तद्विभागः सम्भवतीत्यर्थः ॥ ६५ ॥

❀ दर्पणः ❀

दायरूपस्य, प्रत्ययघटकवर्णसमुदायरूपस्य च तस्य वाचकतोक्ता, इदानीन्तूभयसमुदायस्यैव सेति भेदः। 'घट' इति प्रकृतिरेनेति प्रत्यय इति। प्रकृतिप्रत्यययोर्विभागस्य ज्ञानासम्भवादिति योजनाय। सर्वे सर्वपदेति। वर्णानित्यता प्रतिपादकं भाष्यमेतत्। वस्नसादेरपि पक्षत्वादाह—व्याजेनेति। तथा च निश्चितसाध्यवत्त्वस्यैव दृष्टान्तत्वे तन्त्रत्वेन तस्य पक्षभिन्नत्वाभावेपि न दृष्टान्तत्वमनुपपन्नमिति भावः। तत्र = वस्नसादिस्थले। विभागः = तन्निर्णयः। अस्य 'वैयाकरणनामपी'ति शेषः ॥

परे तु आमादौ प्रत्ययत्वस्य दृष्टत्वेन वामित्यादावामो, व इत्यादावसादेः प्रत्ययत्वमितरांशस्य प्रकृतित्वमनुमातुं शक्यमित्युक्तरीत्या न प्रकृतिप्रत्ययसमुदायरूपपदस्य वाचकत्वसिद्धिः। 'घटेने'त्यत्र तु नशब्दस्य टादेशत्वं भाष्यकृतैवोक्तमिति न तत्र विभागासिद्धिः। 'अजघ्नं' 'अचका'दित्यादौ त्वगत्या 'शिष्यमाणं

❀ काशिका ❀

सुबन्तादेरेव प्रयोगेण व्यवहारात्तत्रैव शक्तिग्रहादिति भावः। अन्ये तु–परिभाषितपदस्यापीत्यर्थः इत्याहुः। तादृशपदस्य वाचकत्वेऽन्यथानुपपत्तिमपि प्रमाणयति—मूले घटेनेत्यादिष्विति। तद्व्याचष्टे–घटेनेत्यादाविति। नेति प्रत्यय इति। अस्ये'ति विभागस्ये'त्यत्रान्वयः। इति विभागस्य ज्ञानासंभवादिति योजना। निर्णयासंभवादित्यर्थः। विशिष्य ज्ञानसंभवादिति। 'वर्णयोरादेश'इति पक्षे–एकाररूप आदेशः पूर्वावयवो वा परावयवो वेति संशयादितस्ततसंशयः संभवति। 'सर्वे सर्वपदादेशा' इति पक्षे तु—वस्नसादाविव संप्रमोहाद्विभागज्ञानमेव न संभवतीति भावः। कश्चिदत्र प्रकृतिभागः कश्चिदत्र प्रत्ययभागः स्यादिति ज्ञानं संभवत्येवेत्यतो 'विशिष्ये'त्युक्तम्। अयं प्रकृतिभागोऽयं प्रत्ययभागः इति ज्ञानासंभवादित्यर्थः। विभागः संभवतीति। तथा च यथा वैयाकरणानामपि वस्नसादौ विभागज्ञानं न संभवति तथा 'सर्वे सर्वपदादेशाः' इति पक्षे 'रामेणे'त्यादावपीति भावः। अत्र पक्षे टास्थाने नादेशं विदधतो भाष्यकारमतेऽपि वैयाकरणानामपि विभागज्ञानं न सुशकमिति बोध्यम्। एवं सत्यपि 'रामेणे' त्यतो रामाभिन्नः कर्तेत्यादिरूपबोधान्यथानुपपत्त्या सुबन्ताद्यात्मकपदस्य वाचकत्वमास्थेयमिति भावः। यत्र प्रकृत्यादिविभागकल्पना न संभवति तस्यैव पदस्य वाचकत्वं, यत्र तु तथा

सुप्तिङन्तचयरूपवाक्यस्यापि तदाह—

हरेऽवेत्यादि दृष्ट्वा च वाक्यस्फोटं विनिश्चिनु ।
अर्थे विशिष्य सम्बन्धाग्रहणं चेत्समं पदे ॥
लक्षणादधुना चेत्तत्पदेऽर्थेऽप्यस्तु तत्तथा ॥ ६६ ॥

'हरेऽव' 'विष्णोऽवे'त्यादौ पदयोः, 'एङः पदान्तादती'त्येकादेशे सति न तद्विभागः सुज्ञानः । तथाच प्रत्येकं पदाज्ञानेऽपि समुदायशक्तिज्ञानाच्छाब्दबोधात्समुदायेऽप्यावश्यिकी शक्तिः । एवञ्च प्रकृतिप्रत्ययेषु विशिष्याज्ञायमानेष्वपि समुदायव्युत्पत्त्या बोधात्तत्राप्यावश्यिकैव

॥ दर्पणः ॥

लुप्यमानार्थाभिधायी'ति न्यायात् प्रकृतेरेव वाचकता । अस्तु वा तत्रापि लुप्तप्रत्ययानुसन्धानाद् बोधः, प्रकृतेः स्वार्थविशिष्टप्रत्ययार्थे लक्षणा वा । 'सर्वे सर्वपदादेशा इत्यपि वर्णानित्यत्ववादिनां दूरापास्तमित्याहुः ॥ ६५ ॥

युक्तेरैक्यात्क्रमप्राप्तं वाक्यस्फोटनिरूपणमित्याशयेन मूलमवतारयति—सुप्तिङन्तेति । तत् = वाचकत्वम् । **समुदाय इति** । पदसमुदायरूपे वाक्य इत्यर्थः । **एवमिति** । वाक्यशक्तिवदित्यर्थः । विशिष्य = सूत्रोपात्तरूपेण । अज्ञायमाने'ष्वित्यनेन तन्निष्ठबोधकत्वज्ञानाऽसंभवः सूच्यते । **समुदायव्युपत्त्येति** । समुदायस्य वाचकत्वग्रहेणेत्यर्थः । बोधात्=प्रकृत्यर्थविशिष्टप्रत्ययार्थबोधादित्यर्थः । तत्रापि = सुप्तिङन्तरूपपदेपि । **शक्तिरिति** । तत्कल्पनेत्यर्थः । ननु 'घटेने'त्यादिमूलेन समयुक्तिकस्फोटद्वयोपादनात्कथं पदस्फोटे साध्ये वाक्यस्फोटस्य दृष्टान्तत्वम् ? किञ्च प्रथमं पदस्फोटस्य सिद्धौ तदर्थसम्बन्धरूपवाक्यार्थाप्रसिद्धया क्व ? वाक्यशक्तिर्कल्पना-

॥ काशिका ॥

कल्पनासंभवस्तत्र प्रकृतिप्रत्ययोरेव वाचकत्वमित्याहुः । भाष्यतत्त्वविदस्तु–एतादृशस्थले पदस्य वाचकत्वे क्लृप्ते सर्वत्रैव पदस्य वाचकत्वमन्यथार्धजरतीयतापत्तेर्व्यवहारात्तत्रैव शक्तिग्रहाच्चेत्याहुः । एवं वाक्यस्फोटेऽपि मतद्वयं बोध्यम् ॥ ६५ ॥

तदाह = वाचकत्वमाहेत्यर्थः । **पदयोरेङ इति** । वर्णयोरादेशपक्षे पदावयववर्णयोरित्यर्थः । 'सर्वे सर्वपदादेशाः' इति पक्षे तु यथाश्रुतमेव साधु । तद्विभागः = पूर्वपदोत्तरपदविभागः । हरेवेत्यादावित्यादिपदाद्—'विष्णोऽव' 'कृष्णेवे'त्यादिसंग्रहः । आदेशेनापहारो न प्रकृतिप्रत्ययभागयोर्यथा—'लिहं लिढो लिढ' इत्यादौ । तत्रापि समुदायशक्तिरवश्याभ्युपेयेत्याह—**एवं प्रकृतीति** । मूले—वाक्यफोटमिति । वाक्यं = वाचकमित्यर्थः । ननु यत्र विभागज्ञानं न

शक्तिरिति भावः। वस्तुतः पदैः पदार्थबोधवद्वाक्येन वाक्यार्थबोध इति पदार्थशक्तिः पदेष्विव वाक्यार्थशक्तिर्वाक्येऽभ्युपेयेति पदस्फोटवाक्यस्फोटौ व्यवस्थितौ। अन्यथा 'घटः कर्मत्वमानयनं कृति'रित्यादौ तादृशव्युत्पत्तिरहितस्यापि बोधप्रसङ्गः। 'घटमानये'त्यत्रेव पदार्थानामुपस्थितौ,

❀ दर्पणः ❀

वसर इत्याद्यपरितोषात्पदस्फोटमेव दृष्टान्तीकृत्य वाक्यशक्तिं साधयति—**वस्तुत इति**। तथाच यत्र पदोपस्थित्या पदशक्तिग्रहसम्भवस्तत्र पदशक्त्यैव वाक्यार्थबोधो यत्र तदसम्भवो 'हरेऽवे'त्यादौ—तत्रानायत्या वाक्यशक्त्यैव तद्बोध इति। यद्यपि 'व्यवस्थिता'विति पदमहिम्ना पक्षद्वयं व्यवस्थितमिति लभ्यते, तथापि आवश्यकवाक्यस्फोटेनैवोपपत्तौ पदस्फोटकल्पनं नावश्यकमिति सिद्धान्ते वाक्यस्फोट एव पर्यवस्यतीति बोध्यम्। वाक्यस्फोटस्यावश्यकतामेव दर्शयति—**अन्यथेति**। वाक्यशक्त्यनभ्युपगमे इत्यर्थः। **तादृशेति**। वाक्यार्थबोधजनकत्वरूपवाक्यशक्तिज्ञानरहितस्यापीत्यर्थः। तत्सत्त्वे तु तत्रापि बोध इष्ट एवेति भावः। बोधप्रसङ्गः = घटकर्मकानयनानुकूलकृतिबोधापत्तिरित्यर्थः। पदवृत्तिज्ञानजन्यपदार्थोपस्थितेः सत्त्वादिति भावः। **घटमानयेत्यत्रेवेति**। अत्र 'तादृशव्युत्पत्तिरहितस्ये'त्यनुप-

❀ काशिका ❀

संभवति तस्य वाक्यस्य वाचकत्वसिद्धावपि न सर्ववाक्येषु तत्सिद्धिरत आह—वस्तुत इत्यादिना। पदैः=घटादिप्रातिपदिकैः, सुबन्तैर्वा—यथा घटादिरूपोऽर्थो बोध्यते, तथा 'घटोऽस्ती'त्यादिवाक्यैर्वाक्यार्थः प्रत्याय्यते, परं तु प्राप्ताप्राप्तविवेकेन संसर्गे सा शक्तिः पर्यवस्यतीति बोध्यम्।

पेटिकाकृतस्तु—विभक्त्यैव क्रियाकारकभावसंबन्धस्याभिहिततया तदंशे वाक्यशक्तेरसंभवेऽपि विशेष्यविशेषणभावे वाक्यशक्तिः। विभक्तिप्रकृत्यर्थगतविशेषणत्वस्य विभक्तिशक्यत्वेऽपि विशेष्यनिष्ठमितरपदार्थविशेषणताप्रतियोगिकं विशेष्यत्वं तच्छक्यं बोध्यं, विषयताया अपि शाब्दबोधे भानमावश्यकमिति 'अर्थवत्—' सूत्रे भाष्ये स्पष्टम्। तथा प्रातिपदिकार्थसूत्रे 'षष्ठी शेषे' इति सूत्रे च भाष्ये। तत्र हि—'वीरः पुरुष' इत्यादौ 'विशेषणविशेष्यभावरूपं यदाधिक्यं स वाक्यार्थ' इत्युक्तम्। 'आधिक्य'मित्यत्र स्वार्थे ष्यञिति प्राहुः। वाक्ये शक्त्यकल्पने बाधकमाह—अन्यथेति। तादृशव्युत्पत्तीति। 'घटः कर्मत्व'मित्यादिवाक्यं घटकर्मकानयनबोधजनकमिति ज्ञानरहितस्येत्यर्थः। बोधप्रसङ्ग इति। घटकर्मकमानयनमिति बोधप्रसङ्गः। 'घटादिपदशक्तिग्रहवत' इति शेषः। तथा च 'घटमानये'त्यत्रेवात्रापि पदार्थोपस्थित्यादिघटितसामग्रीसत्त्वात् तथाविधबोधप्रसङ्ग इत्यर्थः। तादृशव्युत्पत्तिमतो बोध इष्ट एवेति तादृशव्युत्पत्तिराहित्यानुसरणम्। ननु 'घटः कर्मत्व'मित्यादिवाक्यं स्वरूपायोग्यमेवेति न ततो बोधापत्तिः, घटेऽव्यवहितपूर्ववर्तित्वसंबन्धेनामूपदवत्त्वस्याम्पदेऽव्यवहितोत्तरवर्तित्वसंबन्धेन घटादिपदवत्त्वस्याऽकारे 'आनय्'पदवत्त्वस्यानय्पदेऽकार-

सत्यपि तात्पर्य्यज्ञाने बोधाभावाच्च। तत्रैव घटकर्मकमानयनमिति बोधे घटार्थकप्रातिपदिकोत्तरं कर्म्मत्ववाचकविभक्तेस्ततो धातोस्तत आख्यातस्य समभिव्याहारः कारणमिति कार्य्यकारणभावज्ञानवतो बोधात्तज्ज्ञानमपि हेतुरिति चेत्तर्हि सिद्धो वाक्यस्फोटः। घटादिपदार्थबोधे बोधकतारूपपदशक्तिज्ञानकार्यकारणभावस्येव विशिष्टवाक्यार्थबोधे पदसमभि-

ॐ दर्पणः ॐ

ज्यते। ननु शाब्दबोधकारणार्यंतात्पर्यज्ञानरूपसहकार्य्यन्तराभावादेव न बोधोत आह—सत्यपीति। बोधाभावादिति। तादृशबोधाभावादित्यर्थः। तथाच यदभावात्कार्य्याभावस्तस्य तद्धेतुतया वाक्यशक्तिरावश्यिकेति भावः। एतेन व्यतिरेकसहचारकारणताग्राहकः प्रदर्शितः। अन्वयं प्रदर्शयन् वाक्यशक्तिं व्यवस्थापयति—तत्रैवेति। 'घटमानये'त्यत्रैवेत्यर्थः। 'बोधा'दित्यनेन स्वरूपसतो हेतुत्वव्यवच्छेदः। तादृशसाकाङ्क्षनिष्ठबोधहेतुत्वस्यैवास्मन्मते वाक्यशक्तित्वेनाकांक्षाशक्तिरिति परिभाषाभेदेपि वाक्यस्फोटसिद्धिर्निराबाधेत्याशयेनाह—तर्हीति। ननु शाब्दबोधहेत्वर्थोपस्थितिजनकत्वं शक्तित्वम्, तत्तु पदे एव, न वाक्ये,

ॐ काशिका ॐ

वस्वस्य वाकाङ्क्षात्वाद्—'घटः कर्मत्व'मित्यादौ च तादृशाकाङ्क्षाभावात्। घटपदे कर्मत्वपदवस्वादेराकाङ्क्षात्वाभावात्, शाब्दबोधजनकसमभिव्याहारस्यैवाकाङ्क्षात्वादित्यत आह—घटमानयेत्यत्रेवेति। अत्रापि 'तादृशव्युत्पत्तिरहितस्ये'त्यनुपज्यते। बोधाभावाच्चेति। वाक्यशक्त्यनङ्गीकारे तु तज्ज्ञानेतरसकलकारणकलापसत्त्वाच्छाब्दबोधापत्तिरित्यर्थः। तत्रैव=घटमानयेत्यत्रैव। 'इति ज्ञानवतो बोधा'दिति योजना। घटार्थकप्रातिपदिकेति। तेन कलशादिपदसंग्रहः। कर्मत्ववाचकेति। एतत्तु स्पष्टार्थम्। घटादिपदोत्तराम्पदस्य कर्मत्ववाचकत्वाव्यभिचारात्। क्वचित् 'कर्मत्ववाचकविभक्ते'रित्येव पाठः। कर्मत्ववाचकविभक्तित्वेनौशसोः संग्रहः। तथा च घटकलशादिपदभेदेनाऽमादिवचनभेदेन च न कार्यकारणभावबाहुल्यमिति भावः। 'धातो'रित्यनन्तरं विकरणस्येति क्वचिद्बोध्यम्। परन्तु विकरणस्य सर्वत्र न निवेशः, 'ओदनं पपाचे'त्यादौ तदसत्त्वात्। यद्यप्यानयेत्यादावाख्यातस्यापि न श्रूयमाणत्वम्, अनुसंधानं चोभयत्र समानमेव, तथाप्याख्यातस्यार्थोपस्थित्यर्थमनुसंधानमावश्यकं, विकरणस्य त्वनर्थकतया तदनावश्यकमित्याशयेन धातोरित्यनन्तरं विकरणस्येति नाभिहितम्। अथवा विकरणस्य निरर्थकत्वरूपमप्राधान्यं सूचयितुं विकरणानभिधानम्। तज्ज्ञानमपीति। तथाविधकार्यकारणभावज्ञानमपि हेतुरिति। तथा चान्वयव्यतिरेकाभ्यामेतादृशाकाङ्क्षाज्ञानहेतुत्वेनैवोपपत्तौ वाक्ये शक्तिसद्भावे मानाभाव इति भावः। सिद्धो वाक्यस्फोट इति। वाक्यस्य वाचकता सिद्धेत्यर्थः। विशिष्टवाक्यार्थबोधे=वाक्यार्थविशेषबोधे। 'घटकर्मकमानयन'मित्याद्याकारकबोधे इति यावत्।

व्याहाररूपवाक्यनिष्ठबोधकतारूपवाक्यशक्तिज्ञानस्यापि हेतुत्वकल्पनात् ।
अर्थोपस्थापकज्ञानविषयशब्दवृत्तिज्ञानकारणत्वस्यैव शक्तित्वात् ।—

ॐ दर्पणः ॐ

तन्निष्ठबोधकतायास्तादृशोपस्थित्यजनकत्वादत आह—अर्थोपस्थापकेति । शब्दवृत्तीति । शब्दनिष्ठं यद्बोधकारणत्वमित्यर्थः । तथाचोपस्थितौ शाब्दहेतुत्वनिवेशे एतत्कल्पे प्रयोजनाभावेन तज्ज्ञानस्य तादृशोपस्थित्यजनकत्वेपि शक्तित्वाक्षतेः । बोधकशब्दस्य शब्दत्वेन निवेशाच्चापभ्रंशस्यापि संग्रह इति भावः । ननु वाक्यशक्तिवादिमते संसर्गरूपवाक्यार्थस्य नानात्वात्तद्भेदेन शक्त्यानन्त्यम्, किञ्च पदवृत्त्या वाक्यशक्तिं विनापि वाक्यार्थबोधजननाद्वाक्यशक्तिग्रहस्य तद्धेतुतायां व्यभिचारः । अखण्डवाक्यपक्षस्तु नेदानीं प्रक्रान्तः, कार्य्यतावच्छेदकेऽव्यवहितोत्तरत्वानिवेशेन तद्वारणेप्यनुपस्थितसंसर्गे वाक्यशक्तिग्रहः शाब्दबोधात् प्रागसम्भवीति कथं तस्य कारणतेति चेत्, सत्यम्, संसर्गस्य विशिष्यानुपस्थितावपि तदादिवत्कारकविभक्तिविशिष्टधातुपदं कारकविशिष्टक्रियाबोधकमिति सामान्यतस्तद्ग्रहात् । तात्पर्य्यग्रहस्य त्वयाप्येवमेव वाच्यत्वात्, अनन्तरं पदविशेषसमभिव्याहारेण तात्पर्य्यवशात्संसर्गविशेषेण तत्कारकविशिष्टतत्क्रियाभानं, नापि संसर्गानन्त्यप्रयुक्तशक्त्यानन्त्यम्, सम्बन्धत्वस्यानुगमकस्य सत्त्वात्, तत्तत्पदघटितसमभिव्याहारस्य नियामकताप्युभयोः समैवेति तन्मतनिष्कर्षः ।

ननु स्यादेवोक्तप्रकारो यदि वाक्यनिष्ठबोधकतायाः शक्तित्वं सप्रमाणं स्यात्,

ॐ काशिका ॐ

पदसमभिव्याहारेति । उक्तपूर्वापरीभावापन्नपदसमुदायरूपं च तद्वाक्यं चेत्यर्थः । इदं च 'घटमानये'ति वाक्यादेव बोध इत्यभिप्रेत्य । यदि तु 'आनय—घट'मिति विपर्यस्तादपि वाक्यात्तथाविधबोधोऽनुभवसिद्धः, अत एव समर्थसूत्रे भाष्ये उक्तम्—'यथेष्टमन्यतरेणाभिसंबन्धो भवति वाक्ये—राज्ञः पुरुषः, पुरुषो राज्ञ इती'त्युच्यते—तदोक्तसमभिव्याहारमिव विपरीततिङन्तसमभिव्याहारमादाय तन्निष्ठप्रकृतवाक्यार्थबोधकत्वग्रहस्यापि तथाविधबोधे कारणत्वं बोध्यम् । ननु तादृशकार्यकारणभावज्ञानमभ्युपगन्तव्यमन्यथा घटविषयकवृत्तिज्ञानात् पटादिविषयकबोधापत्तिः । एवं विषयभेदेन कार्यकारणभावभेदावश्यकत्वे हेतुत्वकल्पनेऽपि वाक्ये शक्तिः कथं सिद्धेत्यत आह—अर्थोपस्थापकेति । अर्थोपस्थापकं—यज्ज्ञानं तद्विषयो यः शब्दस्तद्वृत्ति यज्ज्ञाननिरूपितकारणत्वं तस्येत्यर्थः । 'घटमानये'तिवाक्यनिष्ठघटकर्मकानयनरूपवाक्यार्थज्ञानकारणत्वज्ञानस्य शक्तित्ववारणाय 'र्थोपस्थापके'ति । प्रकृतार्थोपस्थापकेत्यर्थः । तेन न तत्तद्दोषतादवस्थ्यम् । तथा च परमते या आकाङ्क्षा सैवास्माकं वाक्यशक्तिरिति नाधिक्यमिति भावः । ननु तद्विषयकशाब्दबोधे तद्विषयकवृत्तिज्ञानस्य हेतुत्वे प्रयोजनाभावेन संबन्धरूपविषयं निवेश्य कार्यकारणभावकल्पना-

युक्तं चैतत्,–विषयतासम्बन्धेन शाब्दबोधमात्रे वृत्तिज्ञानस्य लाघवाद्धेतुत्व-

※ दर्पणः ※

तदेव तु नेत्यत आह—**युक्तं चैतदिति**। एतद् = वाक्यनिष्ठबोधकत्वस्य शक्तित्वम्। युक्तिमेवाह—**विषयतेति**। शाब्दबोधमात्रे = तत्सामान्य इत्यर्थः। **वृत्तिज्ञानस्येति**। वृत्तिज्ञानजन्योपस्थितेरित्यर्थः। 'विषयतासम्बन्धेने'त्यनुपज्यते। **लाघवेनेति**। अन्यथा घटपदशक्तिमविदुषस्तत्पदज्ञानवतो 'घटमानये'ति वाक्याद् बोधापत्त्या घटशाब्दबोधे घटार्थकपदवृत्तिज्ञानजन्योपस्थितित्वेन हेतुता वाच्येत्यर्थभेदेनानन्तकार्य्यकारणभावकल्पने गौरवम्। अस्मन्मते तु विषयतासम्बन्धेन घटे वृत्तिज्ञानजन्योपस्थितेरसत्त्वान्न शाब्दे तस्य भानमित्येक एव कार्य्यकारणभावः कल्प्यत इति—लाघवादित्यर्थः।

※ काशिका ※

तदंशे शक्त्यनभ्युपगमेऽपि तद्बोधोपपत्तिसंभव इत्याशङ्क्याह—युक्तं चैतदित्यादिना। विषयतासंबन्धेनेति। तथा च न विषयभेदेन कार्यकारणभावबाहुल्यमिति संबन्धांशे शक्त्यनभ्युपगमे तद्बोधानिर्वाहान्न शक्तिस्वीकार आवश्यक इति भावः। ननु 'घटमानय' 'पटमानये'त्यादिसमभिव्याहारानन्त्याच्छक्त्यानन्त्यं स्यादिति चेत्, तवापि मते तत्तत्समभिव्याहारभेदेन कार्यकारणभावानन्त्यं स्यादिति गौरवस्य तुल्यत्वात्। यदि घटप्रकारकशाब्दबोधत्वावच्छिन्नं प्रति घटार्थकपदोत्तरविभक्त्यादिजन्योपस्थितिर्हेतुः, कार्यताकारणतयोरवच्छेदकः संबन्धो विशेष्यता, एवं विशेष्यतासम्बन्धेन कर्मत्वप्रकारशाब्दत्वावच्छिन्नं प्रति कर्मत्वार्थकविभक्तिप्राग्वर्तिपदजन्योपस्थितिर्विशेष्यतासंबन्धेन हेतुः। इदं च कर्मत्वस्य द्वितीयाद्यर्थस्य प्रकृत्यर्थे विशेषणत्वाभ्युपगमे। विशेष्यत्वाभ्युपगमे तु प्रकारतासंबन्धेन कर्मत्वविशेष्यकशाब्दे कर्मत्वार्थकविभक्तिप्राग्वर्तिपदजन्योपस्थितिर्विशेष्यतासंबन्धेन हेतुरिति विषयविशेषमनिवेश्य सामान्यत एव कार्यकारणभावः सर्वत्राभ्युपेयते,—तदा वाक्यशक्तिस्वीकारे तदानन्त्यापत्तिरतिरिच्यते इति चेत्तदा ममापि मते 'घटमानय' 'पटमानये'त्यादिसकलवाक्यनिष्ठैकैव शक्तिरभ्युपेयते। वाक्यार्थविषयिण्यास्तु निरूपितत्वादेः कर्मत्वादिसंबन्धस्यैक्यात्। 'घटमानये'त्यत्र पटस्य पदादुपस्थित्यभावादेव न पटकर्मकबोधापत्तिः। वस्तुतस्तु घटप्रकारकशाब्दबोधे घटपदोत्तराम्पदजन्योपस्थितिर्हेतुरिति विशिष्यैव तत्तत्पदमन्तर्भाव्य हेतुहेतुमद्भावकल्पनमावश्यकम्। अन्यथा निराकाङ्क्षघटपदाद् घटोपस्थितौ कलशपदेऽगृहीतशक्तिकपुंसः 'कलशमानये'ति वाक्याद्बोधापत्तेरिति बोध्यम्। एतत्सूचनायैव भूषणे—'यदि घटप्रकारके'त्यत्र 'यदी'त्युक्तम्। तत्तत्पदमन्तर्भाव्य तदुक्तौ तु नोक्तापत्तिः। तत्पदघटिताकाङ्क्षाज्ञानसहकृततत्तत्पदजन्योपस्थितेरेव सामग्रीमध्ये निवेशात्।

ननु तथापि वाक्यनिष्ठबोधकतायाः शक्तित्वे किं मानमिति चेच्छाब्दबोधे संबन्धभानान्यथानुपपत्तिरिति गृहाण। शाब्दबोधीयविषयताया वृत्त्या पदजन्योपस्थितिविषयत्वनियतत्वात् विषय-

सिद्धेः ।—विवेचितश्चैतद्भूषणे ।

❀ दर्पणः ❀

ननु घटघटत्वयोर्विशेष्यविशेषणभावे विपरीतं व्युत्पन्नस्य 'घटमानये'त्यतो घटत्वविशिष्टबोधवारणाय घटत्वविशिष्टबोधे उपस्थितेर्घटपदवृत्तिज्ञानजन्यघटत्वविशिष्टाया हेतुताया अवश्यवाच्यतया तत एवानतिप्रसङ्गे उक्तकार्य्यकारणभावे मानाभावोत आह—विवेचितं चैतदिति । पदपदार्थभेदेनानन्तकार्यकारणभावेषु वृत्तिप्रवेशमपेक्ष्य उपस्थितेः पदज्ञानजन्यत्वेनैव शाब्दसामग्रीकुक्षौ प्रवेश उचितः, तथा सति समवायेनाकाशस्य, जनकतयोपस्थितस्य देवदत्तादेश्च शाब्दे भानवारणाय-विषयतया शाब्दसामान्ये वृत्तिजन्योपस्थितेर्विषयतया हेतुत्वं वाच्यम्, एवञ्च संसर्गस्य शाब्दे भानानुरोधेन संसर्गेपि वृत्तिकल्पनमावश्यकं, तथाच पदैः पदार्थानां वाक्येन वाक्यार्थस्य बोध इति न विशेष्यविशेषणव्यत्यासेन शाब्दबोधे पदार्थानां भानं, पदोपस्थितानामेव संसर्गस्य वाक्यशक्तया बोधादिति वृत्तिज्ञानस्येति यथाश्रुतार्थकमेवेति तत्र विवेचितम् । वस्तुतस्तु 'वृत्तिज्ञानस्ये' त्यनन्तरम्—अनुषक्त'विषयतासम्बधेने'त्यस्य वृत्तिज्ञानविषयबोधकत्वघटकबोधीयविषयतासम्बन्धेनेत्यर्थः । अन्यथा वाक्यवृत्तिज्ञानजन्योपस्थितेरेव शाब्दबोधत्वेन तस्मिंस्तेन सम्बन्धेन तद्धेतुत्वासम्भवेन वाक्यशक्तेर्भङ्गापादादिति बोध्यम् ।

❀ काशिका ❀

तासंबन्धेन शाब्दबोधपदार्थोपस्थित्योर्विषयमनिवेश्य सामान्यत एव हेतुहेतुमद्भावकल्पनात् । तत्पुरुषीयत्वं त्ववच्छेदककोटौ निवेश्यम् । अन्यथा पुरुषान्तरस्योपस्थितिसत्त्वे तच्छून्यस्यापि पुरुषस्य शाब्दबोधप्रसङ्गः । विषयं निवेश्यात्मनिष्ठप्रत्यासत्त्या तयोहर्तुहेतुमद्भावकल्पनायां पुरुषापेक्षया विषयाणामाधिक्यादधिककार्यकारणभावापत्तिरन्यथागृहीतशक्तिकघटादिपदाच्चक्षुराद्युपस्थितघटादेरपि शाब्दबोधापत्तिः । ननु सांसर्गिकविषयतातिरिक्तविषयतासंबन्धेनैव कार्यकारणभावऊरीक्रियतेऽतो न संबन्धे शक्तिस्वीकारावश्यकतेति चेदत्राहुः,—ज्ञानरूपाया विषयताया विशेष्यादित्रयसाधारण्या ऐक्यात्तथा निवेशनासंभवात् । अतिरिक्तविषयतापक्षेपि तस्या ऐक्येनैवोपपत्तौ तत्त्रैविध्यानभ्युपगमात् विषयस्वरूपा विषयतेति पक्षे त्रैविध्यसंभवेपि सांसर्गिकविषयताभेदनिवेशे गौरवादित्यादिकं भूषणतोऽनुसंधेयम् । तदेतदभिप्रेत्याह—विवेचितं चैतद्भूषणे इति ।

परे त्वन्वयांशे वाक्यशक्त्यनङ्गीकारे 'तं शाब्दयामी'त्यनुव्यवसायानुदयापत्तिः, शब्दसंबद्धबोधस्यैव तथानुव्यवसायविषयत्वात् । शब्दप्रयोज्यत्वस्यैव तथाविधानुव्यवसायनियामकत्वे धूमपदोपस्थितधूमलिङ्गिकाया वह्न्यनुमितेरपि शब्दप्रयोज्यतया तादृशानुव्यवसायापत्तिः । ननु शाब्दत्वजातिरेव तथाविधानुव्यवसायहेतुः, सा च जातिराकाङ्क्षाज्ञानादिघटितसामग्रीजन्य-

॥ दर्पणः ॥

अत्र वदन्ति—पदजन्यपदार्थोपस्थितिमन्तरेण शाब्दबोधानुदयात्तादृशपदार्थोपस्थितेः शाब्दबोधे हेतुतेति तावन्निर्विवादम्, पदस्य च प्रकृत्याद्यात्मकस्याऽर्थे सम्बन्धं विना तदुपस्थापकत्वासम्भवात्तस्मिन् वृत्त्यात्मकसम्बन्धोप्यावश्यक एव, न तु तत्समुदायरूपपारिभाषिकपदस्य, तत्समूहरूपवाक्यस्य विशिष्टार्थे सः। तं विनापि तेभ्य आकाङ्क्षादिरूपकारणसमवधानादेव विशिष्टबोधोपपत्तेः। एकपदार्थविशिष्टापरपदार्थशाब्दत्वस्यैव तत्कार्य्यतावच्छेदकत्वात्।

यत्तु—लाघवाद् वृत्तिज्ञानजन्योपस्थितेर्विषयतासम्बन्धेन हेतुत्वमेव वाक्यशक्तौ प्रमाणमिति, तन्न, स्वातन्त्र्येण तद्धेतुत्वस्यैवासिद्धेः। तथाहि—तादृशकार्य्यकारणभावे-'वृत्तित्वेन पदवृत्तेर्निवेशः' ? किं वा वाक्यवृत्तेः ? किं वा वृत्तिमात्रस्य ?। न तावदाद्यः,—पदवृत्तिज्ञानजन्योपस्थितेः शाब्दहेतुत्वस्य सर्वैरेवाभ्युपगमात्, न द्वितीयः,—वाक्यवृत्तेस्ततः प्रागसिद्धेः। अत एव न तृतीयः। किञ्च तव मते वाक्यशक्तिजन्योपस्थितेः शाब्दबोधात्मकत्वेन तस्मिंस्तद्विषयत्वासम्भवादपि नोक्तरीतिः साधीयसी। अपि च—वाक्यवृत्तिज्ञानस्य शाब्दसामान्ये न स्वातन्त्र्येण हेतुत्वं, यदाकदाचिद्विवरणादिना घटादिपदशक्तिज्ञानजन्यपदार्थोपस्थितिदशायां 'घटमानये'ति वाक्यशक्तिमविदुष आकाङ्क्षादिवशाच्छाब्दबोधोदयेन व्यभिचारात्। यदपि-समभिव्याहाररूपाकाङ्क्षैव वाक्यमिति, तदपि न, तथा सति घटीयाकर्मतेत्यादिबोधे 'घटमानये'ति वाक्यं साकाङ्क्षं, निराकाङ्क्षं च—'घटः कर्मत्व'मिति सर्वसिद्धव्यवहारानुपपत्तिः। 'पदयोः समभिव्याहार' इतिवत् 'पदयोर्वाक्य'मिति व्यवहारप्रसङ्गश्चेति,—समभिव्याहृतपदानामेव वाक्यत्वमुपगन्तव्यम्। तथाच समभिव्याहारस्य शाब्दबोधहेतुत्वेपि वाक्यस्य तत्त्वं दुरुपपादमेवेति क्व वाक्यशक्तिसिद्धिः ? समभिव्याहारनिष्ठबोधजनकत्वग्रहवतो बोधात्तज्ज्ञानं[1] हेतुरित्यपि-

॥ काशिका ॥

शाब्दबोध एव, न त्वनुमिताविति नोक्तापत्तिरिति चेत्, तथापीमे वाक्ये परस्परं 'संबद्धे' इति व्यवहारो विलीयेत, शब्दानामर्थद्वारकसंबन्धस्यैवाङ्गीकारेण वाक्ययोस्तद्विरहात्। न च प्रयोजनरूपबोधविषयद्वारको वाक्ययोरपि संबन्धः संभवत्येवेति वाच्यम्, ईदृशसंबन्धस्य संबद्धव्यवहारनियामकत्वाभावात्। अन्यथा जन्यजनकभावादिसंबन्धसत्त्वे माथुरपाटलिपुत्रकयोरपि संयुक्तसंयोगादिरूपपरम्परासंबन्धस्य, स्वनिष्ठद्रव्यत्वादिमत्त्वस्य च सत्त्वेने'मौ संबद्धा'विति व्यवहारापत्तेरित्यलमिति प्राहुरित्यलं पल्लवितेन।

इदं तु बोध्यम्—बहुषु स्थलेषु पदस्फोटवाक्यस्फोटयोर्व्यवस्थितत्वेपि यत्र वाक्यस्यैव

१ समभिव्याहारनिष्ठं 'बोधजनकत्व'ज्ञानं हेतुरित्यर्थः।

ननु वाक्यार्थस्यापूर्वत्वात् कथं तत्र शक्तिग्रह इत्याशङ्कयाह—
अर्थ इति । 'वाक्यस्ये'ति शेषः । वाक्यस्य वाक्यार्थे विशिष्य शक्य-

❀ दर्पणः ❀

रिक्तं वचः । अन्वयव्यतिरेकाभ्यां समभिव्याहारज्ञानस्यैव शाब्दधीहेतुत्वेन तद्भि-
न्नबोधजनकत्वज्ञानस्य हेतुताया एवाभावात्, । न च तदपि सम्भवति, शाब्द-
बोधात् प्राक् संसर्गस्यैवानुपस्थितेः सामान्यतस्तदुपस्थितावपि विशेषरूपेण
भानार्थं तात्पर्यज्ञानाद्यपेक्षणे च मूलशैथिल्यात्तव वाक्यशक्तेरेवासिद्ध्यापत्तिः ।
वक्ष्यमाणरीत्या शाब्दबोधात् प्राक् तदुपस्थित्यभ्युपगमे, वाक्यवृत्तिज्ञानजन्योप-
स्थित्यनन्तरं शाब्दबोधाभ्युपगमे वा शाब्दप्रामाण्यभङ्गापत्तिः । अनधिगतार्थग्रह-
कारणस्यैव प्रमाणत्वात् । अत एव सूत्रकृता—'कृत्तद्धितसमासाश्चे'त्यत्र "समास'
ग्रहणं कृतं, वाक्यशक्तौ तु तद्वैयर्थ्यं स्पष्टमेव । 'सामयिकः शब्दादर्थप्रत्यय' इति
कणादोक्तेर्वाक्यशक्तिग्राहकानुशासनादेरभावेन तद्ग्रहासंभवाच्चेति वाक्यस्फोट
आपातरमणीय एवेति ।

पूर्वोक्तशक्तिग्रहप्रकारस्य शैथिल्यं मनसि निधाय तस्मिन् प्रकारान्तरं
वक्तुमग्रिमग्रन्थ इत्याशयेनाह—नन्विति । अपूर्वत्वात्=शाब्दबोधात् प्रागनुप-
पस्थितत्वात् । ननु शाब्दबोधात्पूर्वं पदे प्रत्यक्षाद्युपस्थितपदार्थनिरूपितशक्तिग्रहः
सुलभ एवेति, 'पदे सम'मिति मूलमनुपपन्नमत आशयं प्रकाशयति—पद एवेति ।
पदानामेवान्वितपदार्थे शक्तिरन्वयश्च सामान्यरूपेण ज्ञानम् । अत एव घटादिपदा-
दन्वितघटाद्युपस्थितौ नियमेन तत्प्रतियोग्याकाङ्क्षा भवति—किमन्वितो घटः, ?

❀ काशिका ❀

शास्त्रेण संस्कारस्तत्र वाक्यादेवार्थबोधो, न पदात्, यथा 'पट्सन्त' इत्यादौ । अत एव
'ङः सि धुट्' इति सूत्रे भाष्ये धुडादयः पूर्वान्ता एव किं न कृता इत्याशङ्का ष्टुत्वापादनेन समा-
हिता । अन्यथा शक्ततावच्छेदकानुपूर्वीभेदापत्त्या 'सन्त' इत्यतः स्वार्थबोधानुपपत्तिः स्यादिति
परादित्वस्यावश्यकत्वेन स विचारोऽसंगतिमापद्येतेति वदन्ति । सर्वत्र श्रूयमाणानुपूर्व्येव शक्तता-
वच्छेदिका, न तु स्मर्यमाणानुपूर्वी, श्रूयमाणादेव बोधानुभवात्, स्थान्यादेशभावग्रहविधुराणां
तत्स्मरणासंभवाच्च । एतेन 'पट्सन्त' इत्यत्रागमरहितानुपूर्व्येव तत्तदर्थशक्ततावच्छेदिका,
अत एव 'सन्तः पूज्या' इत्यादिवाक्यघटक—'सन्त' इत्यतः स्वार्थोपस्थित्यादिकं भवत्यतो न
भाष्यस्थविचारासंगतिरिति दूषणं निरस्तम् । एवमेव 'घटेने'त्यादौ टानुसन्धानपूर्वक एव
शाब्दबोधः । तस्यैव 'मत्या' 'गोदुहे'त्यनुरोधेन कल्पनात् । एवं च स्थानिनः क्वचिदपि न
श्रूयमाणता, यथा लकारादेरतस्यैव न वाचकत्वमित्यपि निरसनीयम् । स्थान्यादेशभावज्ञानविधुरस्य
श्रूयमाणादेव बोधोदयेन तस्य वाचकत्वावश्यकत्वादिति दिक् । अपूर्वत्वात् = सर्वत्र शाब्द-

ग्रहणश्चेत्तर्हि पदेपि समम्, पदे एवान्वयांशे शक्तिरिति पक्षेपि तद्ग्रहासम्भवस्तुल्य इत्यर्थः। यदि च—पदशक्तिः पदार्थांशे ज्ञाता अन्वयांशे वाऽज्ञातोपयुज्यत इति कुब्जशक्तिवादस्तदा ममापि वाक्यस्य शक्तिरज्ञातैवोपयुज्यत इति वादाभ्युपगमस्तुल्य इति भावः। ननु वृद्धव्यवहारं पश्यतो मनसा पदार्थवद्वाक्यार्थेपि तद्ग्रह इति चेत्तुल्यमित्याह—लक्षणादिति। लक्ष्यते तर्क्यतेऽनेनेति लक्षणं—मनस्तस्मात्। अपिपदं पदोत्तरं बोध्यम्। पदेऽपि लक्षणात्तद्ग्रहश्चेत्तर्ह्यस्तु वाक्येपीति शेषः।

॥ दर्पणः ॥

किमन्वितं कर्मत्वमित्याद्याकारा। सामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकजिज्ञासाजनकत्वात्। विशेषरूपेण भाने त्वमादिपदसमभिव्याहारो नियामकोत एव तस्य शाब्दे भानम्, पदवृत्तिविषयत्वात्। अशक्यस्यापि भानेऽतिप्रसङ्गात्।

न चैवं 'घटमानये'त्यत्रेतरान्वितं कर्मत्वमिति रीत्यानेकधा संसर्गस्य भानापत्तिः, तत्तत्पदेभ्यस्तथार्थोपस्थितावप्याकाङ्क्षावशादेकधैव तज्ज्ञानसम्भवात्। न चाकाङ्क्षायास्तज्ज्ञाननियामकत्वावश्यकत्वे तत्र वृत्तिकल्पनापार्थेति वाच्यम्, अशक्यभानभियैव तदभ्युपगमात्। तथाच पदशक्त्यैव संसर्गभानोपपत्तौ तत्र न वाक्यशक्तिः, पदत्वापेक्षया वाक्यस्य गुरुत्वाच्चेति तन्मतम्। तथाचान्विताभिधानमतेपि पदे वाक्यार्थशक्तिग्रहासंभवः समान इत्यर्थः। **ज्ञातेति**। पदार्थानां प्रागुपस्थित्या तत्र पदार्थशक्तिग्रहसंभवादिति भावः। **अज्ञातैवेति**। वृत्त्यभ्युपगमस्तु शाब्दे भानापत्त्यैवेति भावः। **पदार्थवदिति**। सप्तम्यन्ताद्वतिः, उपमेये सप्तमीदर्शनात्। वाक्यार्थेपि=संसर्गेऽपीत्यर्थः। इदं च 'बोध्यत्वं शक्ति'रित्यभिप्रेत्य। तद्ग्रहः= शक्तिग्रहः।

लक्षणशब्दस्य चिह्नादौ प्रसिद्धेः प्रकृतोपयोग्यर्थपरतया तं व्याचष्टे—**लक्ष्यत इति**। मूले,—**अर्थे इति**। निरूपितत्वं सप्तम्यर्थः। तच्छब्दार्थे शक्तिज्ञानेन्वेतीत्यभिप्रेत्य व्याचष्टे—**पदेपीत्यादि**। **तद्ग्रह इति**। वाक्यार्थनिरूपित-

॥ काशिका ॥

बोधात् प्रागज्ञानात्। तेन क्वचिदिन्द्रियेण तज्ज्ञानसंभवेऽपि नासंगतिः। **तद्ग्रहासंभवः**= अन्वये पदशक्तिग्रहासंभवः। **वादाभ्युपगम** इति। अज्ञातशक्तेरनुपयोग इत्यतोऽभ्युपगम इत्युक्तम्। तथा चात्र पक्षेऽनिर्भरः सूचितः। अत एव पक्षान्तरं मूले उक्तम्। तदवतारयति—नन्वित्यादिना। **पदार्थवदिति**—सप्तम्यन्ताद्वतिरुपमेयवाक्यार्थे इति सप्तमीदर्शनात्। **वाक्यार्थेपि**=अन्वयेऽपि। **तद्ग्रहः**=पदशक्तिग्रहः। 'पदेऽर्थेऽप्य'स्त्वित्यत्र वाक्यार्थपरार्थपदोत्तरवर्तिनापिशब्देन पदार्थसमुच्चयेऽसंगत्यापत्तिः, पदार्थे शक्तिग्रहस्याप्रतिक्षेपादत आह—**अपिः**

वस्तुतस्तु समुदितार्थे विशिष्टवाक्यस्यैव प्रथमं तद्ग्रहः, आवापोद्वापाभ्यां परं प्रत्येकं तद्ग्रह इति बोध्यम् ॥ ६६ ॥

❀ दर्पणः ❀

शक्तिग्रह इत्यर्थः। अयं भावः–'घटमानये'त्यादिवृद्धव्यवहाराद्यस्य पदे पदार्थ-निर्णयस्तस्य तद्वाक्यश्रवणे पदैः पदार्थोपस्थित्यादिसमवधाने मनसा तत्संसर्गो-पस्थितिर्नानुपपन्ना। परन्तु मानसस्य प्रायः संशयात्मकस्यापि संभवात्त-न्निश्चयार्थं शब्दादरः। तत्र शक्तिग्रहहेतुलिङ्गादेर्निर्णायकस्य सत्त्वेन संशयस्या-संभवादिति।

ननु शब्दशक्तिनिर्णयस्यैव शाब्दबोधे हेतुतावधारणेन तस्य शाब्दबाधात् प्रागु-क्तरीत्याऽसंभवेन वाक्यशक्तेः शाब्दबोधहेतुत्वं दुर्घटमेवेत्यत आह–वस्तुतस्त्विति। तद्ग्रहः = विशिष्टवाक्यार्थशक्तिग्रहः। तथाच शक्तिग्राहकशिरोमणिना व्यवहारेण पूर्वं वाक्य एव शक्तिग्रहेण तस्यैव शाब्दबोधहेतुत्वावधारणात्तादृशवृत्तेश्च स्वाश्रयविषयकत्व—स्वविषयोद्बुद्धसंस्कारसामानाधिकरण्योभयसम्बन्धेन वैशिष्ट्य-स्येदानीन्तनवाक्यज्ञानेप्यक्षतत्वान्न वृत्तिज्ञानस्य शाब्दधीहेतुतायां व्यभिचारः। मध्ये वाक्यार्थोपस्थितेरनपेक्षणाच्च नोक्तदोषावसर इति भावः। ननु तर्हि पदस्फो-टस्य निरालम्बनतापत्तिरत आह–आवापोद्वापाभ्यामिति। आनयनापसारणा-भ्यामित्यर्थः। तद्ग्रहः=प्रत्येकपदे प्रत्येकपदार्थशक्तिग्रहः। तथाच प्रत्येकपदशक्ति-

❀ काशिका ❀

पदपदोत्तरमिति। तद्ग्रहश्चेदिति। वाक्यार्थे शक्तिग्रहश्चेदित्यर्थः। एतावता ग्रन्थेन पूर्वं पदार्थे शक्तिग्रहस्तत्प्रयुक्तपदार्थोपस्थितौ सत्यां पश्चान्मनसोपस्थितसंबन्धे शक्तिग्रह इत्युक्तम्। अधुना तु व्यवहारदर्शनसहकृतमनसा वाक्यार्थे एव शक्तिग्रहः, पश्चादेवावापोद्वापाभ्यां तत्तत्पदस्य तत्तदर्थे शक्तिग्रह इत्याह—वस्तुतस्त्विति। अत्रापि 'वृद्धव्यवहारं पश्यत' इत्यनुषञ्जनीयम्। तेन कोशादितो वाक्यशक्तिग्रहात् पूर्वं पदशक्तिग्रहेऽपि न क्षतिः। क्वचिदुपदेशे न वाक्ये विशिष्ट-वाक्यार्थनिरूपितशक्तिग्रहः पूर्वं भवति पश्चात्तद्घटकपदशक्तिग्रहः। एतादृशस्थले, 'पट—सन्त' इत्यादौ च पदार्थज्ञानपूर्वक एव वाक्यार्थबोध इत्यस्य भङ्ग इत्याहुः। क्वचित् पदेभ्यः पदार्था-नामुपस्थितौ सत्यामाकाङ्क्षासाचिव्याद्वाक्यार्थोपस्थितौ तदैव शक्तिग्रहो बोधश्च, मूलभूतवाक्यार्थो-पस्थितौ वृत्तिजन्यत्वाभावाच्छाब्दबोधादरः। न च पदानामेवान्वितस्वार्थे शक्त्यैवोपपत्तौ वाक्ये शक्तिकल्पनं व्यर्थमिति वाच्यम्, अन्वये शक्तिस्वीकारेऽप्यन्वयविशेषबोधनिर्वाहाय समभिव्याहारे तद्बोधकारणत्वमभ्युपेयम्। तथा कारणत्वाग्रहवतो बोधवारणाय तद्ग्रहस्यापि हेतुत्वमुपेयमिति वाक्यशक्तेर्निष्प्रत्यूहत्वात्, पदानामन्वये शक्तिकल्पनायां गौरवापत्तेश्चेत्याद्यन्यत्र विस्तरः।

इयमेव मीमांसकानां, वेदान्तैकदेशिनां च गतिरित्याह—

सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति ये विदुः ।
भाट्टास्तेपीत्थमेवाहुर्लक्षणाया ग्रहे गतिम् ॥ ६७ ॥

'भाट्टा' इति—तदनुयायिनां वाचस्पतिकल्पतरुप्रभृतीनामुपलक्षणम् ।

ननूक्तपक्षद्वयमनुपपन्नम्, उत्पत्तेरभिव्यक्तेर्वैकदा असम्भवेन उत्पन्नानाम-

❀ दर्पणः ❀

साचिव्येनाकाङ्क्षादिवशात् पदाद्वाक्यार्थशाब्दबोधस्तदा पदस्फोटो, यदा तु तन्निरपेक्षैव सा बोधं जनयति तदा वाक्यस्फोट इति मतद्वयं पर्यवस्यतीति भावः ।'

केचित्तु—उपस्थिताः पदार्थास्तदुपस्थितिर्वा शाब्दबोधहेतुर्न तु पदज्ञानमपि, तद्विनापि शाब्दबोधोदयेन व्यभिचारात् ।

तदुक्तं,—पश्यतः श्वेतमारूपं ह्रेषाशब्दं च शृण्वतः ।
खुरविक्षेपशब्दं च 'श्वेतोऽश्वो धावती'ति धीः ॥ इति ।

तन्न । शब्दं विना जायमानस्य घटादिचाक्षुषस्यापि शाब्दत्वापत्तेः । तत्र 'पश्यामि न शाब्दयामी' त्यनुव्यवसायान्न शाब्दत्वं यदि, तदा प्रकृतेपि समम् । उक्त-प्रतीतेरनुमानेनैव निर्वाहात्तत्र शाब्दप्रत्ययस्त्वसिद्ध एवेत्यादि स्वयमूह्यम् ॥ ६६ ॥

उपलक्षणमिति—तन्मते 'गभीरायां नद्यां घोष' इत्यादौ प्रत्येकपदशक्त्या स्वशक्यसम्बन्धरूपलक्षणया वोक्तदिशाभीप्सितार्थान्वयबोधासम्भवात्स्वबोध्यसंबंध-स्य लक्षणत्वाभ्युपगमेन वाक्यार्थमात्रे वाक्यलक्षणाङ्गीकारादिति भावः । **पक्षद्वय-मिति** । पदवाक्यभेदेन व्यवस्थितं स्फोटद्वयमित्यर्थः । अनुपपत्तिमेवाह— **उत्पन्नानामिति** । वर्णानित्यतावादिमते वर्णानां योग्यविभुविशेषगुणत्वेन स्वोत्तरोत्पन्नगुणनाश्यत्वादेकदावस्थानासम्भवः । तन्नित्यतावादिमते त्वाह—

❀ काशिका ❀

नन्वेवं पदार्थवद्वाक्यार्थस्य स्मृतिरेव स्यान्न त्वनुभव इति चेदत्राहुः—वाक्यार्थबोधस्यानुभव-रूपत्वाभावात् स्वर्गादिकं शृण्वतोऽपि 'स्वर्गादिकमनुभवामी'त्यप्रतीतेः, किं तु शाब्दत्वं ज्ञानत्व-व्याप्यो जातिविशेष इति ॥ ६६ ॥

उक्तपक्षद्वयम्=पदं वाचकं, वाक्यं वाचकमिति पक्षद्वयम् । अनुपपत्तिं स्पष्टयति— **उत्पत्तेरिति** । वर्णानां जन्यत्वमते—उत्पत्तेरिति, नित्यत्वमते त्वभिव्यक्तेरिति । **सर्वदासं-भवेनेति** । यद्येकदोत्पत्तिः स्यात्तदा युगपदुत्पन्नरूपरसादीनामिव प्रत्यक्षं स्यात् । एवमभिव्यक्ति-र्नानावर्णानां युगपद्भवेत्तदा पदप्रत्यक्षवाक्यप्रत्यक्षोपपत्तिर्भवेत्, न चैकदा तत्संभवः, अभिव्यञ्जक-

भिव्यक्तानां वर्णसमूहरूपपदज्ञानासम्भवात्। तथाच सुतरां तत्समूह-रूपवाक्यज्ञानासम्भव इति चेन्न। उत्तरवर्णप्रत्यक्षसमये तस्मिन्नव्यवहितोत्तरत्वसम्बन्धेनोपस्थितपूर्ववर्णवत्त्वं, तथा तदुत्तरप्रत्यक्षकाले उपस्थित-विशिष्टतद्वर्णवत्त्वं तस्मिन् सुग्रहमिति तादृशानुपूर्वीघटितपदत्वस्यैव

❀ दर्पणः ❀

अभिव्यक्तानामिति। वर्णा नित्याः, किन्तु तदभिव्यक्तिरेवानित्या, वर्णोत्पादकत्वेनान्याभिमतानामेव कण्ठाद्यभिघातादीनां तदभिव्यञ्जकत्वाभ्युपगमात्, तथाचाभिव्यक्तेरपि योग्यविभुविशेषगुणतया स्वोत्तरोत्पन्नगुणनाश्यत्वाविशेषात् क्षणिकत्वात्तद्विशिष्टवर्णानामपि युगपदवस्थानासम्भव एवेत्यर्थः। नन्वस्तु वर्णानां युगपदनवस्थानं किमस्माकमनिष्टमत आह—**वर्णसमूहेति**। वाक्यस्फोटकल्पेपि तदाह—**तथाचेति**। **ज्ञानासम्भव इतीति**। आशुविनाशिनां क्रमिकाणां मेलकासम्भवादन्तिमवर्णोत्पत्तिकाले, तदभिव्यक्तिकाले वा पूर्वपूर्ववर्णानां तावदभिव्यक्तीनां वावस्थानासम्भवेन तत्समूहरूपपदस्य, वाक्यस्य वा तादात्म्येन प्रत्यक्षकारणस्याभावात् प्रत्यक्षस्यैवासम्भवेन तत्रोक्तशक्तिग्रहस्य गगनकुसुमायमानत्वादित्याखण्डलार्थः।

अभिव्यक्तिपक्षमादाय समाधत्ते—**उत्तरवर्णप्रत्यक्षेति**। **अव्यवहितोत्तरेति**। एतन्नये वर्णानां नित्यत्वेन सर्वेषामेव वर्णानामव्यवधानेन स्वाधिकरणक्षणोत्तरकालवृत्तित्वादव्यवस्थापत्त्या स्वस्वाभिव्यक्तिगतमेवाव्यवहितोत्तरत्वं वाच्यं, तदारोपादेव वर्णेष्वव्यवहितोत्तरत्वव्यवहारः। अत एव तत्रोपस्थितेर्विशेषणतया निवेशः, तच्चाव्यवहितत्वे सत्युत्तरत्वम्। अव्यवहितत्वं च स्वध्वंसानधिकरणक्षणसम्बन्धित्वम्। तेन घटितघट इत्यादौ नातिप्रसङ्गः। उत्तरत्वं तु स्वाधिकरणक्षणध्वंसाधिकरणसमयोत्पत्तिकत्वम्। तेन—'पिब मधु शीघ्र'मित्यादौ न 'शीघ्रु'भागस्य

❀ काशिका ❀

तत्तत्स्थानानुयोगिकवायुसंयोगादेः क्रमिकत्वात्—उत्पत्तेरपि क्रमिकत्वेन आशुतरविनाशिनां क्रमिकाणां मेलनासंभवात् तावद्वर्णसमूहरूपपदवाक्यप्रत्यक्षानुपपत्तिरिति समुदितार्थः। **तस्मिन्** = उत्तरवर्णे। **उपस्थितेति**। स्मृतेत्यर्थः। **पूर्ववर्णवत्त्वमिति**। अस्य 'सुग्रह'मित्यनेनान्वयः। **उपस्थितविशिष्टेति**। उपस्थितो यः प्रथमवर्णविशिष्टो द्वितीयो वर्ण इत्यर्थः। एवं चतुर्थादिवर्णप्रत्यक्षसमये उपस्थितप्रथमवर्णविशिष्टद्वितीयविशिष्टतृतीयवैशिष्ट्यं सुग्रहमिति रीत्या चरमवर्णप्रत्यक्षं पदवाक्यघटकयावद्वर्णविषयकं संपद्यते इति न पदार्थबोधवाक्यार्थबोधयोरनुपपत्तिरिति प्रघट्टकार्थः। **पदत्वस्यैवेति**। वाक्यशक्त्यनभ्युपगमेपि पदस्य वाचकत्वमभ्युपगम्यत एव, तन्निर्वाहोपयोगिपदत्वप्रकारकप्रत्यक्षोपपत्तिरुक्तरीत्यैवाभ्युपेतव्या। एवं च वाक्यशक्त्यभ्युपगमपक्षे

वाक्यत्वस्यापि सुग्रहत्वात् ॥ ६७ ॥ [इति पदवाक्यस्फोटः]

इदानीमखण्डपक्षमाह—

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन ॥६८॥

पदे = पचतीत्यादौ, न वर्णाः, नातो वर्णसमूहः पदमिति शेषः। दृष्टान्तव्याजेनाह—वर्णेष्विति । एकारौकारऋकारादिवर्णेष्ववयवाः प्रतीयमाना

❀ दर्पणः ❀

पदत्वम्। अन्यैर्निरूपिताव्यवधानादेरन्यसम्बन्धत्वाभावेन स्वत्वस्य परिचायकतया प्रवेशान्नाननुगमशंकापि। उत्तरोत्तरवर्णोपस्थितेः पूर्वपूर्ववर्णोपस्थितिध्वंसानधिकरणसमयसम्बन्धित्वात्तदधिकरणक्षणध्वंसाधिकरणत्वाच्च निरुक्तसम्बन्धेन तद्वत्त्वमविकलम् । इत्थञ्च पूर्वपूर्ववर्णांशे अलौकिकस्य चरमवर्णांशे लौकिकप्रत्यक्षस्य सम्भवात्तत्रार्थे बोधकत्वरूपशक्तेः सुग्रहत्वादुक्तपदवाक्यस्फोटसिद्धिर्निराबाधेति भावः ॥ ६७ ॥

इति पदवाक्यस्फोटनिरूपणम् ॥ १६ ॥

अखण्डस्फोटनिरूपणेऽवसरस्य सङ्गतित्वं सूचयन्नाह—इदानीमिति । सखण्डस्फोटनिरूपणानन्तरमित्यर्थः । अखण्डेति । पदवाक्ययोरखण्डत्वं चाविद्यमानावयवकत्वम् । वर्णानामवयवाघटितत्वस्यापि सिषाधयिषितत्वादाह—दृष्टान्तेति । दृष्टान्तवाक्यस्येवादिघटितत्वनियमेन तदभावात्कथं वर्णेष्वित्यादेस्तत्त्वमित्याशङ्क्य यथाशब्दान्तर्भावेण मूलं व्याचष्टे—यथेति । इवेतीति । अवयवा इवेत्यर्थः । तथाच यथाश्रुतस्यैव दृष्टान्तत्वं नानुपपन्नमिति । 'विचिर् पृथग्भावे' इति प्रव्युपसृष्टघञन्तभावसाधनप्रविवेकशब्दार्थः पृथग्भावो भेदे पर्यवस्यतीत्याशयेनाह–भेद इति । ननु पदादिप्रतीतौ तदवयवानां वर्णानामुपलभ्यमानत्वात्कथं

❀ काशिका ❀

वाक्यत्वप्रकारकं प्रत्यक्षमपि तयैव रीत्योपपद्यत इत्यर्थः । एकस्मृत्युपारूढानां वर्णानामर्थबोधकत्वे संभवतीयं गुरुभूतरीतिर्नोपास्येति न शङ्क्यम्, आनुपूर्वीज्ञानाभावेनार्थबोधानुपपत्तेरनुभवक्रमेणैव स्मरणमिति नियमाभावेन 'सरो रस' इत्यादववविलक्षणबोधापत्तेश्च ॥ ६७ ॥

इदानीम् = सखण्डपदस्फोटनिरूपणानन्तरसमये । तथा च प्रसङ्गोऽवसरो वासङ्गतिरिति सूचितम् । अखण्डपक्षमाहेति । 'लाघवा'दिति शेषः । ननु 'वर्णेष्ववयवा न चे'ति प्रकृतानुपयुक्तमित्याशङ्कां परिहर्तुमाह—दृष्टान्तेति । दृष्टान्तमिषेणेत्यर्थः । प्रतीयमाना अपि यथा

अपि यथा नेत्यर्थः। क्वचिद्विवेत्येव पाठः। एवं वाक्येऽप्याह—**वाक्यादिति**। पदानामपि वाक्याद्विवेको—भेदो नास्तीत्यर्थः। अयं भावः—वाक्यं, पदं चाखण्डमेव, न तु वर्णसमूहः। अनन्तवर्णकल्पने मानाभावात्। तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगनिष्ठं तत्तद्वर्णजनकताया व्यञ्जकताया वाऽवच्छेदकं वैजात्यमादायैव ककारो गकार इत्यादिप्रतीतिवैलक्षण्यसम्भवात्। स्पष्टं हि भामत्याम्—'तारत्वादि वायुनिष्ठं वर्णेष्वारोप्यत' इत्युक्तं देवताधिकरणे। नचैवं वायुसंयोग एव वाचकोऽपि

※ दर्पणः ※

तदसत्त्वमत आह—**अयम्भाव इति**। **अखण्डमेवेति**—व्याख्यातार्थम्। एवकारव्यवच्छेद्यं स्पष्टयति–**न त्विति**। **अनन्तेति**। अनेकेत्यर्थः। ननु 'ककारो' 'गकार' इति प्रतीतिरेव वर्णकल्पने मानं, यदि च वर्णाभिव्यञ्जकत्वेनोत्पादकत्वेन वाभिमतवायुसंयोगविशेषाभिव्यक्तस्फोट एव कत्वादिना तादृशप्रतीतिविषय इति विभाव्यते, तदाप्युत्पन्नः ककारो', 'नष्टः ककारः' इत्यादिप्रतीत्यनुपपत्तिः। स्फोटातिरिक्तककारादीनां त्वयानभ्युपगमात्, तस्य च नित्यत्वात्। व्यञ्जकनिष्ठाया उत्पत्तेस्तद्विषयत्वे सुखादीनामपि नित्यतापत्तिरत आह—**तत्तद्वर्णोत्पादकत्वेनेति**। वैजात्ये प्रमाणं दर्शयति—**वर्णजनकताया इत्यादि**। तथाच तादृशवैजात्यं समवायेन स्फोटांशे आदायारोप्योक्तप्रतीतिवैलक्षण्योपपत्तौ न तदनुपपत्तिरतिरिक्तककारादिवर्णसाधिका। नाप्युत्पन्नः क इत्यादिप्रतीतिस्तथा, 'सोयं क' इत्यभेदतत्प्रत्यभिज्ञारूपबाधकसत्त्वेन तादृशप्रतीतेर्भ्रमत्वात्। नापि सुखादीनां नित्यतापत्तिः, तन्नाशकस्य स्वोत्तरवर्त्तियोग्यात्मविशेष्यगुणस्य जागरूकत्वादिति भावः। भामत्याम्=तन्नामकवाचस्पतिग्रन्थे। **आरोप्यत इतीति**। एतदनुरो-

※ काशिका ※

नेति। सा प्रतीतिस्तु तत्तदुच्चारणविशेषव्यङ्ग्यतत्तद्वर्णसमानाकारध्वनिविशेषोपरागौपाधिकी भ्रान्तिरेवातो नार्थसाधिका, एकारादाववयवकल्पने गौरवापत्तेः। **क्वचिदिवेत्येवेति**। 'वर्णेष्ववयवा' इति पाठ इत्यर्थः। अस्मिन् पाठे दृष्टान्तता स्फुटैव। 'प्रविवेक'पदार्थमाह—**भेद इति**। 'विचिर् पृथग्भावे' इति धात्वर्थानुसारात्—प्रविवेकपदं भेदार्थकमिति भावः। ककारादिप्रतीतिवैलक्षण्यान्यथानुपपत्तिरेव मानमित्याशङ्कामपाकरोति—**तत्तद्वर्णोत्पादेति**। तत्तद्वर्णोत्पादकत्वेनाभिमतो यो वायुसंयोगस्तन्निष्ठमित्यर्थः। **जनकताया इति**। जनकतानिरूपितं व्यञ्जकतानिरूपितं वा यदवच्छेदकत्वं तद्वदित्यर्थः। **प्रतीतिवैलक्षण्येति**। वायुसंयोगगतं यत् कत्वादि तेन रूपेण स्फोटो विभासत इति 'ककारः' 'खकार' इत्यादिविलक्षणप्रतीतिनिर्वाह इत्यर्थः। भामत्याम्=वाचस्पतिग्रन्थे। **वर्णेष्वारोप्यत इति**। अत एव 'तारो' 'मन्द' इति

किं न स्यादिति वाच्यम्, प्रत्यक्षोपलभ्यमानककारादेरेव वाचकत्वस्यानुभवसिद्धत्वात्। तथाच वाचकत्वानुपपत्त्या, तदेवेदं पदं तदेवेदं वाक्यम्,

❀ दर्पणः ❀

धेनैवादायेति पदमारोपपरतया व्याख्यातम्। मतान्तरन्तु वक्ष्यते। 'वायुसंयोगोपी'त्यपिरेवार्थे। कण्ठताल्वाद्यभिघातजवायुसंयोग एवेत्यर्थः। समवायस्यानारोपितस्य वाचकतावच्छेदकत्वे लाघवात्। तथाच संयोगत्येव काद्यात्मकत्वमस्त्वित्यर्थः।

समाधत्ते—प्रत्यक्षेति। अयमाशयः—कादिवर्णानामुक्तसंयोगात्मकत्वेतीन्द्रियतापत्तिः—न च सेष्टानुभवविरोधात्। नचोक्तकत्वस्यातीन्द्रियधर्मत्वेन कथं साक्षात्कारविषयत्वमिति वाच्यं, 'सुरभि चन्दन'मिति प्रतीतौ चक्षुरयोग्यस्यापि सौरभादेश्चाक्षुषविषयत्ववत्तस्यापि श्रोत्रग्राह्यत्वसम्भवात्। विषयबाधेन परं स्फोटांशे कत्वप्रतीतिभ्रान्तित्वमिति।

अन्ये तु—कादिप्रतीतिर्यदि स्फोटांशे कत्वादिकं समवायेनावगाहेत, स्यात्तदा भ्रान्तित्वसम्भावना, किन्तु स्वाश्रयाभिव्यङ्ग्यत्वसम्बन्धेनैव तदंशे वैजात्यम्। न च स्वाश्रयाभिव्यङ्ग्यत्वस्य सम्बन्धत्वे प्रमाणाभावः, कादिप्रतीतेरेव मानत्वात्। विशिष्टप्रतीतिनियामकविशेषो हि सम्बन्धः। अत एव,—'लोहितः स्फटिक' इति बुद्धेः स्वाश्रयसंयोगस्य सम्बन्धतामामनन्ति। न च समवायविषयैव सा भ्रान्तिः, यथाकथञ्चित् प्रतीतेः प्रमात्वोपपत्तौ भ्रमत्वकल्पनाया अन्याय्यत्वात्। अधिकमग्रे वक्ष्यत इत्याहुः।

उपसंहरति—तथाचेति। वाचकत्वानुपपत्त्येति। पदवाक्ययोर्वर्णसमूहरूपत्वे उक्तरीत्या वर्णानां युगपदवस्थानासम्भवेन वाचकत्वग्रहानुपपत्त्येत्यर्थः। वर्णानामनित्यत्वे प्रत्यभिज्ञानुपपत्तिः साप्यसमन्वये नास्तीत्याह—तदेवेदमित्यादि। तद्व्यक्त्यभेदावगाहिपदाविशेष्यकप्रत्यभिज्ञानुपपत्त्या चेत्यर्थः। उक्तरीत्या कथञ्चिच्छक्तिग्रहोपपादनेप्यनित्यवर्णघटितपदवाक्ययोरप्यनित्यतया प्रत्यभिज्ञानुपपत्तिर्दु-

❀ काशिका ❀

एकवर्णविषयप्रतीतिव्यवहारयोरुपपत्तिः, अन्यथा विरुद्धधर्मद्वयस्यैकत्रानुत्पत्त्या तत्तद्वर्णभेदापत्तेः। एकस्मिन्नपि वर्णे किंचिदपेक्षया तारः, किंचिदपेक्षया मन्द इति व्यवहारस्तु सकलजनसिद्ध एव। आरोपाभ्युपगमे तु नायं दोषः। अनारोपितस्यैव विरुद्धधर्मद्वयसंबन्धस्याश्रयभेदप्रयोजकत्वात्। प्रत्यक्षोपलभ्यमानेति। प्रत्यक्षेणोपलभ्यमानो यः ककारादिः कत्वादिविशिष्टः, कत्वादिप्रकारकप्रत्यक्षविषयस्येत्यर्थः। एवं 'शृणोमी'त्यनुभवानुरोधेन च स्फोट आवश्यकः। संयोगस्य श्रवणेन्द्रियग्राह्यत्वाभावात्। तदवेदमिति। इत्यादित्रयस्य-प्रतीत्ये'त्यत्रान्वयः। 'तदेवेदं पद'मि-

सोऽयं गकार इति प्रतीत्या च स्फोटोऽखण्डः सिद्ध्यति। एतेन गौरित्यादौ गकारौकारविसर्गादिव्यतिरेकेण स्फोटाननुभवाच्छ्रूयमाणवर्णानामेव वाचकत्वमस्त्वित्यपास्तम्। तेषां स्फोटातिरिक्तत्वाभावात्। यत्तु वर्णानां प्रत्येकं वाचकत्वे प्रत्येकादर्थबोधापत्तिः, समुदायस्य तु क्रमव-

❀ दर्पणः ❀

-त्परिहरैवेति भावः। **एतेनेति।** प्रत्यभिज्ञानुपपत्तिसिद्धाखण्डस्फोटस्य वाचकत्वव्यवस्थापनेनेत्यर्थः। **अननुभवादिति।** तथा च तत्रैव प्रमाणाभावेन वाचकत्वं दूरपराहतमिति भावः। तेषाम् = गकारादिवर्णानाम्। **स्फोटातिरिक्तेति।**

❀ काशिका ❀

-त्याद्याकारकप्रतीत्येत्यर्थः। न च व्यक्तिभेदेऽपि 'तदेवेदमौषधं' 'तदेवेदं नखं' 'त एवेमे केशा' इत्यादिप्रतीतिवत् साजात्यावलम्बनोक्तप्रतीतिरिति वाच्यम्। 'तज्जातीयमिदं पद'मित्यादि व्यवहारस्याप्यापत्तेः। न चेष्टापत्तिः, 'तदेवेदं पद'मित्यादिव्यवहारस्यैवेष्टत्वात्। एवमेकं वाक्यमिति बुद्धिरपि तत्साधिका बोध्या। न चैकसमुदायविषयत्वात् सेनावनादिवदेको धान्यराशिरितिवच्चोपपत्तिरिति वाच्यम्, वनराश्यादेरप्यतिरिक्तस्याङ्गीकारात्। अपि चैकदेशस्थत्वादिरूपोपाधेरेकत्वेनैको धान्यराशिरित्यादिप्रतीतेस्तादृगुपाधिविषयत्वेनोपपत्तावपि प्रकृते चोपाध्यसंभवेन तदसंभवात्।

नचैकार्थमुख्यविशेष्यकबोधहेतुत्वं तथा, व्याससमाससमुदायेऽतिप्रसङ्गात्। न चार्थे किंचित्पदार्थाविशिष्टत्वं निवेश्यम्, समासेऽव्याप्तेः। 'घट' इति प्रकृत्यंशेऽतिव्याप्तेश्च। एकार्थबोधहेतुत्वेनैकत्वसिद्धावेकत्वेनैकार्थबोधहेतुत्वसिद्धिरित्यन्योन्याश्रयापत्तेश्च। अर्थबोधाभावेऽपि अप्रसिद्धार्थकपदश्रवणे 'एकं पद'मिति प्रतीतेश्च। न चैकबुद्धिविषयत्वालम्बनैककर्तृकं पदमित्यादिप्रतीतिरिति वाच्यम्, अनेककर्तृकोच्चारणविषयेऽपीदमेकं घटपदमिति प्रत्ययस्येष्टस्यानुपपत्तेः। न च तत्रैकबुद्धिविषयत्वाभावात् तत्र नेष्यत एवेति वाच्यम्, तस्यैक एवेन्द्रशब्दोऽनेकक्रतुष्वाविर्भवती'त्यादिसरूपसूत्रभाष्यसिद्धत्वात्। न चैकजातीयबुद्धिविषयत्वं तत्र निमित्तमिति वाच्यम्, पदादिरूपविषयैक्याधीनं बुद्धीनामेकजातीयत्वमेकजातीयबुद्धिविषयत्वनिबन्धनं च विषयैक्यमित्यन्योन्याश्रयात्। न चैकजातीयत्वमेकाकारत्वं, तच्च विषयैक्यं विनाप्युपपन्नमिति नान्योन्याश्रय इति चेत्, पटादिरूपावयविनोऽप्यतिरिक्तस्य सिद्ध्यनापत्तेः। 'एकः पट'इति व्यवहारस्याप्येकबुद्धिविषयत्वन्तु समूहेनैवोपपत्तेर्यदि तत्रैकबुद्धिविषयत्वस्याग्रहेप्येक इति व्यवहारात्स व्यवहारोऽतिरिक्तावयविसाधक इत्युपेयते तर्हि प्रकृते स न पाणिपिहितः। न चैक इन्द्रशब्द इत्यस्यैकजातीय इन्द्रशब्द इत्यर्थ इति वाच्यम्, अनेकशब्दकल्पनापेक्षा तदेकत्वस्यैवोचितत्वात्। एकजातीयत्वावलम्बनायाः पश्चादिघटेष्वपि 'एको घट' इति प्रतीतेरापत्तेश्च। एकजातीय-इन्द्रशब्द इत्यव्यवहाराच्चेति कृतं पल्लवितेन। **वर्णानामेवेति।** तावद्वर्णविषयकप्रत्यक्षं तु प्रागुपपादितमेवेति भावः। तेषां = वर्णानां। **स्फोटातिरिक्तत्वाभावादिति।** व्यञ्जकवायु-

तामाशुतरोत्पन्नानां तथैवाभिव्यक्तानां वा ज्ञानमसम्भाव्यमेव । पूर्वपूर्व-वर्णानुभवसंस्कारसहकारेणैकदा समूहालम्बनरूपसकलज्ञानसम्भवस्तु

❀ दर्पणः ❀

गत्वप्रकारकप्रतीतिविषयगादिस्फोटस्यैवास्माभिर्वाचकत्वाभ्युपगमादिति भावः । क्रमिकाणामपि स्थायिना सहावस्थानादुक्तम्—**आशुतरेति** । तृतीयक्षणवृत्ति-ध्वंसप्रतियोगिनामित्यर्थः । आशुतरविनाशिनां सहोत्पन्नानां समुदायसम्भवा-दुक्तं—**क्रमवतामिति** । **असम्भाव्यमिति** । प्रत्यक्षे तादात्म्येन विषयस्य हेतुतया समूहरूपविषयस्यैवाऽभावादिति भावः । **पूर्वपूर्वेति** । ननु वर्णानित्य-तावादिमते तृतीयक्षणवृत्तिध्वंसप्रतियोगिनां तेषां प्रत्यक्षस्यैवासम्भवात् कथं तज्जन्यसंस्कारस्य सहकारितासम्भवः । तथाहि—कादिप्रतीतिः ककारादौ विशेषण-तया कादित्वमवगाहते । विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुतया ककाराद्युत्पत्ति-द्वितीयक्षणे निर्विकल्पकमभ्युपेत्य तृतीयक्षणे विशिष्टज्ञानं वाच्यम् । तत्र न सम्भ-वति । 'सम्बद्धं वर्त्तमानं च दृश्यते चक्षुरादिना'—इति वृद्धोक्तेः । प्रत्यक्षे विषयस्य कार्य्यसहभावेन हेतुतया तृतीयक्षणे तद्वर्णरूपविषयस्याभावात् । न च ककारा-द्युत्पत्तिक्षणोत्पन्नकत्वादिस्मृत्यैव द्वितीयक्षणे एव सविकल्पसम्भव इति वाच्यम्, एवमपि प्राथमिकविशिष्टबुद्धेर्दुरुपपादत्वादिति चेदत्र वदन्ति,—संसारस्यानादित्वे बालस्य स्तनपानप्रवृत्तिहेत्विष्टसाधनत्वस्मृतेरिव प्राथमिककत्वादिविशिष्टबुद्धिजनक-स्मृतेः सम्भवान्न तदनुपपत्तिः । ककाराद्युत्पत्त्यनन्तरं ककारीयगकारवृत्तिविशिष्ट-बुद्धेरेव च तादृशकल्पने मानमिति ।

❀ काशिका ❀

संयोगगतगत्वादिना स्फोटस्यैव भानादिति भावः । वर्णानां प्रत्येकं वाचकत्वं ? तत्समुदायस्य वेति विकल्प्य नाद्य इत्याह—**वर्णानां प्रत्येकमिति** । नान्त्य इत्याह—**समुदायस्तु त्विति** । एतस्य ज्ञानमित्यनेनान्वयः । **आशुतरोत्पन्नानामिति** । 'वर्णानां'मित्यनुषज्यते, तस्य च समुदायस्येत्यन्वयः । 'आशुतरोत्पन्नानां'मिति आशुतरविनाशिनामित्यस्याप्युपलक्षणम् । एतेनाशुतरोत्पन्नानामपि क्रमवतां चिरस्थायिनां पदार्थानां ज्ञानं संभवत्येवेत्य'संभव्येवे'त्युक्तिर-संगतेत्यपास्तम् । **तथैव** = क्रमेणैव । तथा च वर्णानां जन्यत्वपक्षे तत्समुदायस्यैवासंभवा-त्तज्ज्ञानासंभवः । नित्यत्वपक्षे समुदायसंभवेऽपि तज्ज्ञानासंभव इति भावः । **संस्कारेणेति** । एतत्सहकारः श्रोत्रेन्द्रिये चरणवर्णानुभवे वा बोध्यः । तथा च चरमवर्णविषयकानुभवस्तथा-विधसंस्कारवशात्तज्जन्यस्मृतिवशाद्वा तावद्वर्णविषयकः । तथाविधसंस्कारसहकृतचरमवर्णानुभवेन स्वजन्यसंस्कारद्वारा तावद्वर्णविषयकं समूहालम्बनरूपं स्मरणं वा जन्यते, तेनार्थबोध इति भावः । **साधारण इति** । उभयत्रापि समूहालम्बनस्य समनियतविषयताकत्वात् । न च येन

सरो-रसो-राजजरा-नदीदीनादिसाधारण इत्यतिप्रसङ्ग इति स्फोट एवाखण्डो नादाभिव्यङ्ग्यो वाचक इति कैयटः। तत्तुच्छम्। पदज्ञानसम्भवस्योपपादितत्वात्। वर्णानां प्रत्येकं व्यञ्जकत्वं समुदितानां वेत्यादिविकल्प-

❀ दर्पणः ❀

अन्ये तु—"प्रतियोगितासम्बन्धेन योग्यविभुविशेषगुणनाशं प्रति स्वसामानाधिकरण्य-स्वाव्यवहितपूर्ववृत्तित्वोभयसम्बन्धेन यदि सामान्यतस्तादृशविशेषगुणस्य कारणता स्यात्तदा ककारादिप्रत्यक्षानुपपत्तिः प्रसज्येतापि। सैव न। अन्तिमशब्दनाशे सुषुप्तिप्राक्कालोत्पन्नज्ञानादिनाशे च व्यभिचारात्। किन्तु विजातीयगुणनाशे वैजात्यं चरमशब्दादिव्यावृत्तमिव प्राथमिकविशिष्टबुद्धिविषयवर्णव्यावृत्तमपि। न च तादृशवैजात्ये मानाभावः, नाश्यतावच्छेदककोटिप्रविष्टतयैव तत्सिद्धेः। तथा-चान्तिमशब्दनाशेन द्वितीयलक्षणस्यैव तादृशवर्णनाशेऽपि न तृतीयक्षणस्थतद्व्यक्तित्वेन हेतुत्वकल्पनान्न तृतीयक्षणस्थायिनस्तस्य प्रत्यक्षानुपपत्तिरुक्तहेतुहेतुमद्भावस्वीकारेऽपीत्याहुः।

आख्या **अतिप्रसङ्ग इति**। सरःशब्दघटकसकाराकाररेफविसर्गानुभवजन्यसंस्कारे नर्वबोधापत्तिरित्यर्थः। **नादाभिव्यङ्ग्य इति**। ध्वन्यन्तर्गतवर्णाभिव्यङ्ग्य इत्यर्थः। अखण्डः = वर्णाघटितः। 'उपपादितत्वा'दित्यस्य—'सखण्डस्फोटनिरूपणावसर' इति शेषः। तादृशप्रत्यक्षस्यान्तिमवर्णांशे लौकिकस्यातीतवर्णांशेऽलौकिकस्य 'सरो'-'रस' इत्याद्यनतिप्रसक्तस्योपपादितत्वादित्यर्थः। अतिरिक्तस्य वाचकत्वे दूषणमाह—**वर्णानामिति**। **विकल्पग्रासादिति**। प्रत्येकव्यञ्जकत्वे आद्यवर्णादेव तदभिव्यक्तिसम्भवे इतरोच्चारणवैयर्थ्यापत्तेरतिप्रसङ्गाच्च। समुदायस्य तूक्तरीत्या दुरुपपादत्वेन तद्व्यञ्जकत्वस्याप्यसम्भवदुक्तिकत्वादित्यर्थः।

❀ काशिका ❀

क्रमेणानुभवे विषयभानं तेनैव क्रमेण स्मरणेऽपीति नाविशेष इति वाच्यम्, तादृशनियमासिद्धेः, येन क्रमेणानुभवस्तद्विपरीतक्रमेणापि स्मरणस्यानुभवसिद्धत्वात्। न च वर्णानुभवस्मरणयोरेव तथा नियम इति वाच्यम्, मानाभावात्। 'सरो-रस' इत्यादावर्थबोधवैलक्षण्यानुरोधात्तथा कल्प्यत इति चेन्न, अतिरिक्तस्फोटकल्पनयापि तदुपपत्तेः। त्रिचतुरादिपदाद्यनुभवे तद्विपरीतक्रमेण स्मरणानुभवाच्च। विकल्पेति। यदि प्रत्येकं व्यञ्जकत्वं तर्हि प्रथमवर्णेनैव व्यञ्जनसंभवे इतरवर्णवैयर्थ्यम्, समुदितानां व्यञ्जकत्वं त्वसंभवि, चरमवर्णस्य व्यञ्जकत्वेपि तदितरवर्णवैयर्थ्यम्। पूर्वपूर्ववर्णानुभवजसंस्कारसहितचरमवर्णानुभवस्य व्यञ्जकत्वे तस्यैवार्थप्रत्यायकत्वमस्त्वलमतिरिक्तस्फोटाङ्गीकारेणेति भावः।

❀ दर्पणः ❀

कैयटानुयायिनस्तु—'पूर्वपूर्ववर्णकाले चेद् द्वितीयादिवर्णोत्पत्तिः सम्भवेत्तदा स्यादपि कथञ्चिन्द्रवदुक्तरीत्या पदवाक्यप्रत्यक्षनिर्वाहः, सैव न, किन्तु यावद्गकारे वाग्वर्त्तते न तावदौकारे, 'येनैव यत्नेनैको वर्ण उच्चार्य्यते, तेनैव विच्छिन्ने तस्मिन् वर्णे उपसंहृत्य तं यत्नमन्यमुपादाय द्वितीयः प्रवर्त्तते इति 'परः सन्निकर्षः' इति सूत्रस्थभाष्यप्रमाण्यात् पूर्ववर्णविनाशानन्तरं यत्नान्तरेण द्वितीयवर्णाऽभ्युपगमात्। किञ्च भवन्मते वर्णप्रत्यक्षस्यैवानुपपत्तिः, तेषामुच्चरितप्रध्वंसित्वेन तदुत्पत्तेरभिव्यक्तेर्वा क्षणिकत्वेनातीन्द्रियक्षणावच्छिन्नत्वात्, तथाचे'को यणची'त्यादिसूत्रोपयोगिनोऽयं पूर्वोऽयं पर इति प्रत्यक्षविषयार्थकेदंशब्दाभिलप्यमानपौर्वापर्य्यव्यवहारस्यासम्भवः, एवं नष्टविद्यमानयोः सम्बन्धिनोरव्यवहितोत्तरत्वस्य सम्बन्धतया वक्तुमशक्यतयापि पूर्वोक्तरीत्या पदप्रत्यक्षानुपपत्तिः। अपि च गृहीशक्तिकस्यैव

❀ काशिका ❀

परे तु—उक्तरीत्या पदज्ञानसंभवोपपादनं न युक्तम्, 'अयं पूर्वोऽयं पर' इत्यभिलापासंभवात्, तादृशाभिलापाभावे—'इको यणची'त्यादिशास्त्राणामसंगत्यापत्त्येष्टापत्तेरयोगात्। मन्मते तु नानारञ्जनसाधनद्रव्याहितनानावर्णोपरागेण पटादेर्भानवदुच्चारितवर्णक्रमेणैव तत्तद्वर्णगतकत्वादिना स्फोटाभिव्यक्तिस्तत्रैव बुद्धिविषये पौर्वापर्यव्यवहारसंभवः। [illegible] एव 'सरो रस' इत्यत्र विलक्षण-विलक्षणार्थबोधोपपतिः। नष्टविद्यमानयोरव्यवहितोत्तरत्वसं[illegible] संबन्धवक्तुमशक्यत्वा[illegible] नष्टविद्यमानपुरुषयोरयं पूर्वो[illegible] [illegible] व्यक्तपदार्थो वर्ण [illegible]—हरिपदाभि[illegible] ध्वनिनैयत्यादभेदोपचारात एव त्रापि पौर्वकालिकत्वादिनिबन्धनः स व्यवहार उपपद्य[illegible] [illegible]इने—लोकेऽर्थबोधकत्वेन गृही[illegible] संबन्धानुपपत्तेर्जागरूकत्वात्, वक्तुमशक्यत्वाच्च कालिकसंबन्धस्य [illegible] शब्द' इत्यु[illegible] [illegible]नेऽपि तत्र वृत्त्याश्रयत्वज्ञानासंभवाच्च; पदस्याविद्यमानत्वात्, अविद्यमानेऽप्याश्रयत्वापगमेऽतीतघटो जलवा'निति प्रत्ययापत्तिः, अबाधितार्थकतया तज्ज्ञानस्य प्रमात्वात्। नन्विदानीमतीते वृत्त्याश्रयत्वाभावेपि पूर्वकालावच्छेदेन वृत्त्याश्रयत्वं तत्र सुघटमेवातीतघटे रूपाद्याश्रयत्ववदिति चेन्न, वर्णसमुदायात्मकपदस्य पूर्वमप्यसत्त्वात्। घटस्य पूर्वं सत्त्वेन तत्र तदा रूपाद्याश्रयत्वमुपपद्यत एवेति स्पष्टम्। नन्वतीतघटो जलवानिति प्रत्ययो नापादयितुं शक्यः, मतुपा वर्तमानसंबन्धस्यैवाभिधानात्, 'तदस्यास्त्यस्मि'न्निति सूत्रेण तथैव बोधनात्। एवं च बुद्धिविषयवर्णसमुदायात्मकपदे वृत्त्याश्रयत्वाङ्गीकारे न किंचिद्बाधकम्। अत एवा'तीतघटं जानामी'ति प्रयोग उपपद्यते। अन्यथातीतघटे इदानीन्तनज्ञानाद्याश्रयत्वाभावात्तदनुपपत्तिः स्पष्टैवेति चेन्न, एवमपि पदवाक्ययोरभावेन शब्दार्थसंबन्धस्यैव हान्यापत्तिः। तदुक्तं वाक्यपदीये—

'अशाब्दो यदि वाक्यार्थः पदार्थोपि तथा भवेत्' इति।

पदसमुदायरूपवाक्यवद्वर्णसमुदायरूपपदस्यापि विरहात्, अर्थसंबन्धस्योभयत्राप्यसत्त्वादिति तद्भावः। एवं तदेवेदं कृष्णपदमेकं पदमेकं वाक्यमिति बुद्धेरनुपपत्तिश्च। उपपादितं तत्त्व-

❀ दर्पणः ❀

बोधकत्वमिति नियमेनोच्चारणभेदाद्भिन्नेषु शक्तिग्रहासम्भवः, आनुपूर्व्यास्तत्तत्काल-घटितान्यवहितोत्तरत्वघटितत्वेनाननुगतत्वाच्छक्ततावच्छेदकत्वासम्भवात् । अखण्ड-स्फोटाङ्गीकारे तु तत्तद्वर्णोपाध्यवच्छिन्ने तस्मिन् पौर्वापर्य्यादिव्यवहारविषयत्वस्य सूपपादत्वान्नोक्तानुपपत्तिः । तस्य चानुपूर्व्यन्तर्गतसमस्तवर्णा एव यद्यप्यभिव्यञ्ज-कास्तथापि चरमवर्णाभिव्यक्त एव स बोधहेतुरिति नोक्तविकल्पस्याप्यवसर इत्याहुः ।

❀ काशिका ❀

मेतत् । किं चैवमुच्चारणभेदभिन्नशब्देषु शक्तिग्रहासंभवः, व्यक्तिवादवदानन्त्यव्यभिचारप्रसरात् । गृहीतशक्तिकादेव बोध इति नियमे व्यभिचारोऽवगन्तव्य इति दिक् । एवं च कैयटोक्तमेव सम्यगिति प्राहुः । स्फोटश्च परापश्यन्तीमध्यमावैखरीतिचतुर्विधवाङ्मध्ये या मध्यमा वाक् तस्या यो नादांशस्तदात्मकः । विस्तरस्तु हरिग्रन्थादवगन्तव्य इति मञ्जूषायां स्पष्टम् ।

स चाखण्ड एकवर्णस्वीकारपक्षे यद्यप्येकैकवर्णेनाभिव्यज्यते तथापि नेतरवर्णवैयर्थ्यमन्त्य-वर्णाभिव्यक्तस्यैव तस्य बोधहेतुत्वात् । न च तथापि तदितरवर्णवैयर्थ्यं दुर्वारमेवेति वाच्यम् । पूर्वपूर्ववर्णानुभवजनितसंस्काराणामपि सहकारित्वात्, संस्काराणां च स्थिरतया नोक्तोपपत्त्य-संभवः ...नुभवश्च तदानीन्तन उपादेयः, नातो देवदत्तादिपदे दकारादिवर्णानां सार्थक्यं ...कालान्तरीणतावद्वर्णानुभवजनितसंस्काराणां सत्त्वादिति दूषणावकाशः । संस्कारो-नच्चबोधापत्तिरित्यर्थः ... ...वद्वर्णसंस्काराणामेव सहकारित्वात् ... अखण्डस्फोटाभ्युपगमे वैयर्थ्यम् ... उपपाद... ...शेपः । तादृशप्रत्यक्षस्यान्तिमम... भाष्येऽप्युच्चरितप्रध्वस्तानां वर्णानां संनिकर्षः पौर्वापर्यं चानुपू... न्याद्यनतिप्रसङ्ग...

अतिप्रसङ्ग... अखण्डः = वर्णाघटितः ।

'बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तत्त्वन्नीतिः[१] ।

शब्देनार्थान् वाच्यान् दृष्ट्वा बुद्धौ कुर्यात् पौर्वापर्यम् ॥

बुद्धिविषयमेव शब्दानां पौर्वापर्यम् । इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यत्यस्मिन्नर्थेऽयं शब्दः प्रयोक्तव्योऽस्मिंस्तावच्छब्दोऽयं तावद्वर्णस्ततोऽयं ततोऽयमिति । तत्त्व-न्नीतिः = सकलविषयकज्ञानवान् । धीरः = पाण्डित्यभाक्, बुद्धावन्तः करणे, चेष्टाः = कण्ठाद्य-भिघातव्यापारजन्यशब्दान् प्रतिबिम्बितान् कृत्वा, 'शब्देने'ति साहित्ये तृतीया, तथा च तत्सहित-तद्वाच्यार्थान् बुद्धावुपदेशे दृष्ट्वा तत्रैव पौर्वापर्यव्यवहारं कुर्यादिति तदर्थः[२] । 'बुद्धिविषय'मित्यस्य बुद्धिस्थशब्दविषयमित्यर्थः । 'य एष' इत्यादिना वक्तृबुद्धिस्थत्वोपपादनं तु शास्त्रस्य वक्त्रुद्देशे-

---

१ तननं तत्, सास्ति यस्याः सा—तत्त्वती, = सकलविषयव्यापिनी, नीतिः = बुद्धिः—यस्यासौ—'तत्त्वन्नीति'रित्युच्यते । केचित्तु 'तन्वन्नीति'रिति पठन्तः—तन्वती = विषयान् व्याप्नुवती बुद्धिरस्येति स एवार्थ इत्याहुरिति—कैयटः । २ भाष्यार्थः ।

ग्रासाच्च । ननु त्वन्मतेऽप्येष दोषः, तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगानां प्रत्येकं व्यञ्जकत्वं समुदितानां वेति विकल्पस्य सद्भावादिति चेत्—उच्यते—प्रत्येकमेव संयोगा अभिव्यञ्जकाः, परन्तु केचिद् गत्वेन, केचिदौत्वेन, केचिद्विसर्गत्वेनेत्यनेकैः प्रकारैः, अत एव वर्णानां तदतिरेकास्वीकारोऽप्युपपद्यते । एवञ्चाव्यवहितोत्तरत्वसम्बन्धेन घवत्त्वं टकारे

❀ दर्पणः ❀

ननु वायुसंयोगानां प्रत्येकमभिव्यञ्जकत्वाभ्युपगमेऽपि 'गौ'रित्यत्र घत्वेन टत्वेन च स्फोटोऽभिव्यज्येतेत्यत आह—**परन्त्विति** । तथाच विलक्षणवायुसंयोगस्य गत्वप्रकारकस्फोटाभिव्यञ्जकत्वाभ्युपगमान्नोक्तदोष इति भावः । **अत एवेति** । विलक्षणवायुसंयोगस्य तत्तद्रूपेण स्फोटाभिव्यञ्जकत्वाऽभ्युपगमादेवेत्यर्थः । **तदतिरेकास्वीकार इति** । तत्तत्संयोगादेव कत्वादिप्रकारककारप्रतीत्युपपत्तौ स्फोटातिरिक्ततत्कल्पने मानाभावादिति भावः । ननु 'सरो' 'रस' इत्यादावतिप्रसङ्गस्तदवस्थ एव, सत्वादिरूपेणाभिव्यञ्जकवायुसंयोगानामुभयत्र तौल्यादत आह—**एवञ्चेति** ।

❀ काशिका ❀

... र्थं ... सं-
नैव प्रवृत्तेस्तस्यैव धर्मफलश्रवणाच्चेति बोध्यम् । बुद्धिगतपौर्वापर्यस्य ... त्पत्त्या व्यक्तिपदार्थौ वर्ण ... —हरिपदार्थाः ... नां ध्वनिनैयत्यादभेदोपचारोत एव प्रत्यक्षविषयमानपरामर्शकेदमाभिलापासंभवोऽपि स्फोटानङ्गी... इने—लोकेऽर्थबोधकत्वेन गृही... अत्यसूक्ष्मोच्चारणव्यङ्ग्यत्वेन तदुपपत्तिरिति भावः । एव दो... ...शब्द' इत्य... दोष इत्यर्थः । तमुपपादयति—तत्तद्वर्णेति । प्रत्येकं व्यञ्जकत्वमिति । तथात्वे च तदितरवायुसंयोगोपादाननैरर्थक्यापत्तिरिति भावः । नाभिप्रदेशादुद्गतवायोस्तत्तत्स्थाने क्रमेणैव संयोगोत्पत्त्या समुदितानां वायुसंयोगानामसंभवो बोध्यः । प्रत्येकं संयोगानामभिव्यञ्जकत्वेपि कश्चित् गत्वेन कश्चनौत्वेन कश्चिद्विसर्गत्वेन रूपेण स्फोटमभिव्यनक्ति, तथा च तावद्रूपवैशिष्ट्येनाभिव्यक्तस्यैव तस्यार्थबोधकत्वमिति न कस्यापि वायुसंयोगस्य वैयर्थ्यमित्याशयेन समाधत्ते—प्रत्येकमेवेति । अत एव = वायुसंयोगानां स्ववृत्तिगत्वादिनाभिव्यञ्जकत्वादेव । तदतिरेकास्वीकारोपि = स्फोटातिरिक्तास्वीकारोपीत्यर्थः । वायुसंयोगस्य गत्वादिनाभिव्यञ्जकत्वानुपगमे तु तथाभिव्यक्त्येतिरिक्तवर्णस्वीकार आवश्यको भवेदिति भावः । ननु वायुसंयोगानां पूर्वोक्तदिशा यौगपद्यासंभवेन कथं युगपत्तत्तद्रूपेण स्फोटाभिव्यक्तिसंभव इति चेन्न, नाभिप्रदेशादुद्गतवायोः स्थूलतया युगपदेवानेकस्थानेषु नानासंयोगोत्पत्तिसंभवेनोक्तदोषानवकाशात् । नन्वेवमपि पदाभावेन पदज्ञानस्यार्थधीकारणताऽसंभवदुक्तिकैवेत्याशङ्कामपनुदति—एवं चेति । वायुसंयोगगततत्तद्रूपेण स्फोटाभिव्यक्तौ चेत्यर्थः । 'गृह्यत' इत्यस्य 'यत्रे'ति शेषः । तथा च यत्र ज्ञाने घटत्वं

गृह्यते, एतादृशपदज्ञानकारणताया अविवादात्। परं त्वव्यवहितोत्तरत्वं स्वज्ञानाधिकरणक्षणोत्पत्तिकज्ञानविषयत्वं वाच्यम्। अत एव घज्ञानानन्तरटज्ञानविषयत्वरूपानुपूर्वीत्यादिर्नैयायिकवृद्धानां व्यवहारः। एवञ्च न कश्चिद्दोषः। एतेन—"पर्य्यायस्थलेष्वेक एक स्फोटो ? नाना वा ? नाद्यः, घटपदे एव गृहीतशक्तिकस्य कलशादेर्बोधप्रसङ्गात्, नच तत्पर्याया-

❀ दर्पणः ❀

घवत्वमिति। तथा चौपाधिकभेदमादाय तस्मिन्नेव टकारात्मके घत्वप्रकारकप्रतीतिविषयाव्यवहितत्वग्रहविषये यथा घटपदव्यवहारविषयता तथा 'रा'त्मके स्फोटे सत्वप्रकारकप्रतीतिविषयाव्यवहितत्वग्रहे 'सरः'पदव्यवहारविषयतेति न सरआत्मकस्फोटस्य रसरूपतेति भावः। ननु तव मते गकारादिवर्णस्य नित्यस्फोटरूपतया नित्यत्वेन तद्ध्वंसाधिकरणक्षणानुत्पत्तिकत्वविशिष्टतदधिकरणक्षणोत्पत्तिकत्वरूपाव्यवहितोत्तरत्वासम्भवात्कथमुक्तप्रकारसम्भवोत आह—परं त्विति। तथाच वर्णानां नित्यत्वेऽपि तदभिव्यक्तेरनित्यत्वस्य सांख्यानामपि सम्मतत्वेन तदव्यवहितोत्तरत्वस्य वर्णान्तराभिव्यक्तावबाधेन तदादाय घटादिपदप्रत्ययोपपत्ति-[illegible] अत एवेति। अभिव्यक्तिनिरूपिताव्यवहितोत्तरत्वस्यानुपूर्वीव्यव-[illegible]

नच बोधापत्तिः कालान्तर[illegible]र्थः।

अखण्डः = वर्णाघटितः। [illegible]

[illegible]नि शेषः। तादृशप्रत्यक्षस्यान्तिम[illegible]त्यर्थः। 'अपास्त'मित्यनेनाऽन्वयि। स्फोट इति। वाच[illegible]त्याद्यनतिप्रसक्ताखण्डपदार्थ इत्यर्थः। नाद्य इति। नैक इत्यर्थः। तत्पक्षे दूषणमाह—घटपद इति। 'घट' इत्यानुपूर्व्यवच्छिन्नस्फोटे गृहीतशक्तिकस्येत्यर्थः। 'कलशपदा'दित्यस्या'गृहीततदवच्छिन्नस्फोटशक्तिका'दित्यादिः। बोधप्रसङ्गादिति। घटबोधवल्लसकारणताक'कलश' इत्यानुपूर्व्यवच्छिन्नस्फोटस्य तदानीं

❀ काशिका ❀

टकारे भासते तादृशं यत्पदज्ञानं तत्कारणतया इत्यर्थः। अविवादादिति। सर्वमतत्वादित्यर्थः। ननु घटत्वादिना भासमानस्य स्फोटस्य नित्यतया स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणत्वविशिष्टस्वाधिकरणक्षणध्वंसाधिकरणत्ववान् यः क्षणस्तदुत्पत्तिकत्वरूपमव्यवहितोत्तरत्वमसंभवीत्यत आह—परं त्वव्यवहितोत्तरत्वमिति। स्वज्ञानेति। स्वं = घत्वादिना भासमानः स्फोटः। एतादृशाव्यवहितोत्तरत्वनिवेशो न दृष्टचर इत्याशङ्क्याह—अत एवेति।

परिमलोक्तं स्फोटखण्डनं दूषयति—एतेनेति। उक्तवक्ष्यमाणहेतुभिरित्यर्थः। घटपद एवेति। घटपदाभिव्यक्ते एवेत्यर्थः। कलशपदादिति। कलशपदाभिव्यक्तादित्यर्थः। बोधप्रसङ्गादिति। स्फोटस्यैक्येन घटपदाभिव्यक्ते तत्र शक्तिग्रहस्य वृत्तत्वात्—कलशपदाभिव्यक्ता-

भिव्यक्ते शक्तिग्रहस्तत्पर्य्यायश्रवणेऽर्थधीहेतुरिति वाच्यम्, एवं सति प्रतिपर्य्यायं शक्तिग्रहावश्यम्भावेन तत्तत्पर्य्यायगतशक्तिग्रहहेतुताया उचितत्वात्। तथा सति शक्तिग्रहत्वेनैव हेतुत्वे लाघवाच्च। अन्यथा तत्पर्य्यायाभिव्यक्तगतशक्तिग्रहत्वेन तत्त्वे गौरवात्। न द्वितीयः,—अनन्तपदानां तेषां शक्तिं चापेक्ष्य क्लृप्तवर्णेष्वेव शक्तिकल्पनस्य लघुत्वादिति"—परिमलोक्तमपास्तम्। पर्य्यायेष्वनेकशक्तिस्वीकारस्य सर्वसिद्धत्वात्तदवच्छेद-

※ दर्पणः ※

सत्त्वान्नित्यैकरूपत्वात्तस्य। वर्णसमुदायरूपपदस्य वाचकत्वे तु नोक्तदोष इति भावः। **अर्थधीहेतुरिति**। उक्तस्थले च स्फोटस्य कलशरूपपर्यायाभिव्यक्त्यवच्छिन्नशक्तिग्रहविषयत्वाभावान्न अर्थबोधप्रसङ्ग इति भावः। **एवमिति**। तत्पर्य्यायजन्यशाब्दबोधे तत्पर्य्यायाभिव्यक्त्यवच्छिन्नशक्तिग्रहस्य हेतुत्वाभ्युपगम इत्यर्थः। **शक्तिग्रहावश्यम्भावेनेति**। 'नागृहीतविशेषण'न्यायेन तत्पर्य्यायशक्तिग्रहस्यावश्यमभ्युपेयत्वादिति भावः। **उचितत्वादिति**। औचित्यमेवाह—**तथा सतीति**। **शक्तिग्रहत्वेनेति**। तत्पर्य्यायगतशक्तिग्रहत्वेनेत्यर्थः। **लाघवादिति**। उक्तरूपापेक्षयैतस्य कारणतावच्छेदकत्वे लाघवादित्यर्थः। [illegible] पूर्वकल्पे गौरवं प्रकाशयति—**अन्यथेति**। उक्तिवैचित्र्यमेनुरुपपत्त्या व्यक्तिपदार्थौ वर्ण [illegible]—हरिपदमि[illegible] ध्वनिनैयत्यादभेदोपचारोत एव स्फोटानां कल्पनामित्यर्थः। **शक्तिमिति**। तद्भेदा[illegible]ने—लोकेऽर्थबोधकत्वेन गृही[illegible]त्यर्थः। **लघुत्वादिति**। तथाच वर्णातिरिक्तस्फोटकल्पनाऽ[illegible]शब्द' इत्याशयः। **पर्यायेष्विति**। एकधर्मावच्छिन्नबोधकनानापदेष्वित्यर्थः। **अनेकेति**। पर्यायभेदभिन्नेत्यर्थः। **सर्वसिद्धत्वादिति**। तथाच पर्यायेषु नानाशक्तिकल्पना-

※ काशिका ※

दपि ततोऽर्थबोधप्रसङ्ग इत्यर्थः। वर्णसमुदायरूपपदस्य वाचकत्वमते तु नायं दोषः, तेन शब्देन बोधे जननीये तच्छक्तिग्रहस्य हेतुत्वात्। **अर्थधीहेतुरिति**। तत्पर्यायश्रवणजाभिव्यक्तिस्तत्पर्यायाभिव्यक्तशक्तिग्रहसहकृतार्थधीहेतुरित्यर्थः। तत्पर्यायश्रवणेन स्फोटाभिव्यक्तिद्वारार्थबोधे जननीये तत्पर्यायाभिव्यक्तशक्तिग्रहः सहकारि कारणमिति वार्थः। तत्तत्पर्यायगतशक्तिग्रहहेतुताया उचितत्वे हेतुमाह—**तथा सतीति**। **शक्तिग्रहत्वेनैवेति**। तत्तत्पर्यायगतशक्तिग्रहत्वेनैवेत्यर्थः। अथवा, उपधायकतासंबन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति विषयतासंबन्धेन शक्तिग्रहत्वेनैवेत्यर्थः। **लाघवाच्चेति**। चो हेतौ। कारणतावच्छेदकलाघवादित्यर्थः। तत्त्वे—हेतुत्वे। **परिमलोक्तमिति**। 'परिमला'द्युक्तमित्यर्थः। आदिना 'न्यायरत्नामणि'परिग्रहः। **सर्वसिद्धत्वादिति**। स्फोटानभ्युपगन्तृमतेऽपि पर्यायभेदेन शक्तिभेदस्य सिद्धत्वादित्यर्थः। ननु स्फोटस्य नानात्वे गौरव-

※ दर्पणः ※

नापूर्वेति न दोषः । अयमाशयः—वर्णाः स्फोटाऽभिव्यञ्जका इति स्वीकारे भवदुक्त-दूषणस्यावसरो न तु स्फोटस्य वर्णानतिरेकपक्षे, तत्र पृथक्शक्तिकल्पनायाः अभावेन गौरवासम्भवात्, पर्य्यायशक्तिग्रहकार्य्यतावच्छेदककोटावव्यवहितोत्तरत्व-निवेशेन व्यभिचारवारणं तूभयोः सममिति ।

ननु त्वन्मते स्फोटानतिरेकेण वर्णानां नित्यत्वादुत्पत्तिघटिताव्यवहितोत्तरत्व-सम्बन्धेनोत्तरवर्णेषु पूर्वपूर्ववर्णवत्त्वरूपशक्ततावच्छेदकानुपूर्व्यसम्भवात् आह—

※ काशिका ※

मेकत्वे कथं शक्तिभेद इत्याशङ्क्याह—तदवच्छेदकेति । तथा च स्फोटस्यैक्येऽपि शक्तता-वच्छेदकानुपूर्वीभेदाच्छक्तिभेदः, शक्यतावच्छेदकभेदेन तद्भेदवदिति भावः । स्फोटातिरिक्तवर्णा-नामभावेन 'घटपदे एव गृहीतशक्तिकस्ये'त्यादिदोषानवकाशः । नन्वतिरिक्तवर्णानभ्युपगमेऽपि घत्वटत्वादिनाभिव्यक्त एव गृहीततत्तच्छक्तिकस्य पुंसः कलशत्वादिनाभिव्यक्तादपि स्फोटाच्छाब्द-बोधापत्तिरूपो दोषस्तदवस्थ इति चेन्न । तत्तदानु'पूर्व्यवच्छिन्ने शक्तिग्रहस्य तत्तदानुपूर्वी-प्रकारकज्ञानेन बोधे जननीये सहकारित्वात् । वर्णानामतिरिक्तानामभ्युपगमपक्षेऽपि तत्तद्वर्ण-गतरूपरूपितस्यैवार्थे संकेतग्रहान्न घटशब्दे एव गृहीतशक्तिकस्य पुंसः कलशादिपदश्रवणे बोधा-[illegible]प्रसु[illegible] च स्फोटात्मकः शब्दो वस्तुत एकोऽपि तत्तद्वर्णविषयकसंस्कारैः प्रति-नच्चबोधापत्तिरिकालान्त[illegible]वापन्न इति सर्वपदरूप इति बोध्यम् । 'स्फोट एव कत्वादिना

१अखण्डः = वर्णाघटितः । [illegible]

[illegible]न्तु शेषः । तादृशप्रत्यक्षस्यान्तिम[illegible]इत्यत्र 'कृपो रोलः' इति लत्वं न प्राप्नोतीत्याशङ्क्य—'अथवा इत्याद्यनतिप्रसक्त[illegible] निर्दिश्यते रश्रुतेर्लश्रुतिर्भवति' इत्युक्तम् । अत्रेदमाकूतं भाष्यकृताम्—वस्तुतो यद्गतं रत्वं तादृशो न कश्चिद्वर्णः किं तु तद्रूपेण स्फोटस्यावभासमात्रमतो रत्वावभास-मानस्फोटप्रसङ्गे लत्वावभासमानस्फोटो भवति इत्यर्थो वर्णनीयः । अन्यथा कल्पत इत्यादावपि न प्रवर्तेत । एवं कृपावपि रेफावभासात् क्लृप्त इत्यादावपि लत्वं सिद्धम् । एवं दीर्घाकारादौ ह्रस्वप्रयुक्तकार्यातिप्रसङ्गस्तु न तत्र ह्रस्वावभासविरहादिति । अन्तर्भूतानन्तर्भूतसाधारणजाति-निर्देश इत्येतत्परमिदं भाष्यमिति[१] तु न पेशलम् । अन्तर्गते रत्वजातिसत्त्वे मानाभावात् । नरसिंहवद्वर्णान्तर'मिति [२]स्वोक्तिविरोधाच्चेति विस्तरेण निरूपितं विवरणादौ सूरिभिः[३] । किं चैवं स्फोटानङ्गीकारे द्रुतमध्यमविलम्बितवृत्तिषु प्रयत्नभेदेन चिराचिरकालोच्चारण-जन्यत्वाद्ध्रस्वाकारस्यापि कालभेदेन यत्किंचिदेकवृत्तौ तपरकरणे तदन्यवृत्तावतो भिस ऐसना-पत्तिः । [४]तदङ्गीकारे तु न क्षतिः । तदभिव्यञ्जयनन्तरं जायमानो यो वैकृतध्वनिस्तेन चिरकालं चिरतरकालं मध्यमायां विलम्बितायामुपलब्धिर्भवति । एवं चोपलब्धेरेव कालभेदो न तु

१. कैयटोक्तं व्याख्यानं दूषयति—न पेशलमिति । २. स्वोक्तिः = कैयटोक्तिः ।
३. नागेशभट्टैः । ४. तदङ्गीकारे = स्फोटाङ्गीकारे ।

कानुपूर्व्याः प्रागुपपादनादिति दिक्। शब्दकौस्तुभे तु—'वर्णमालायां

❀ दर्पणः ❀

तदवच्छेदकेति। शक्ततावच्छेदकेत्यर्थः। **प्रागिति**। 'स्वाभिव्यत्त्यधिकरणक्ष-णोत्पत्तिकाभिव्यक्तिविषयत्वमिति ग्रन्थेने'ति शेषः। ननु वर्णानां नित्यत्वाभ्युपगमे नित्यवर्णैरेव स्फोटकार्य्योत्पत्तौ स्फोटस्यैवासिद्धिः। तथाहि—आनुपूर्व्या भवद्भिरे-वोपपादितत्वात्तद्विशिष्टानां तेषां पदत्वेन तत्प्रत्यक्षस्य सौलभ्येन शक्तिग्रहस्य सूपपादत्वात्तदेवेदं पदं वाक्यमिति प्रत्यभिज्ञोपपत्तेश्चेत्यत आह—**दिगिति**। तदर्थस्तु—यदि स्वतन्त्रा नित्या वर्णाः स्युस्तदा स्यादेव तैः स्फोटान्यथासिद्धिः, किन्तु कत्वादिना प्रतीयमानः स्फोट एव ककारादिवर्ण इत्यभ्युपगमेनोक्तान्यथा-सिद्ध्यसंभवोऽत एव नानावर्णकल्पनाप्रयुक्तगौरवशङ्कापि नेति।

ननु कोसौ स्फोटो यदनतिरिक्ता वर्णा इति चेदत्राहुः,—ईश्वरसिसृक्षात्मक-

❀ काशिका ❀

स्फोटे इति वक्तुं शक्यत्वात्, 'तमेवायं द्रुतमुच्चारितवानन्यो विलम्बित'मिति प्रत्यभिज्ञा-सत्त्वात्। ह्रस्वदीर्घादौ त्वेवं न प्रत्यभिज्ञेति तपरकरणेऽपि न ह्रस्वप्रयुक्तस्य कार्यस्य दीर्घादावापत्तिः। जन्यत्वे तु वर्णानामाशुतरविनाशित्वाभ्युपगमाच्चिरमुपलब्धिर्न [illegible] स्यादिति बोधयन्। तदुक्तं तपरसूत्रे भाष्यकृद्भिर्वृत्त्यन्तरे ऐसोऽनापत्तिरित्याशङ्क्य [illegible] उत्पत्त्या व्यक्तिपदार्थो वर्ण [illegible] स्फोटः शब्दो [illegible] कथम्? यथा [illegible] ध्वनिनैयत्यादभेदोपचारोत एव [illegible] आह—हरिपदामि [illegible] पदानि गच्छति कश्चित्त्रिंशत् कश्चिच्चत्वारिंशत् स्फोटस्ता[illegible]ङ्गने—लोकेऽर्थबोधकत्वेन गृही-

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु ख[illegible] शब्द' इत्य-

अल्पो महांश्च केषांचिदुभयं तत्स्वभावतः॥" इति।

स्फोटः शब्द इति। श्रोत्रेन्द्रियग्राह्यः स्फोटनामकः पदार्थः, स्फोटाभिव्यक्त्युत्तरं जायमान-वैकृतध्वनिर्ध्वनिपदेनात्र विवक्षितः। स च स्फोटात्मकस्य शब्दस्योपकारकत्वाद्गुणः। 'भेरी-माहत्ये'त्यस्य—'तं शब्दमुपलभमान' इति शेषः। 'ध्वनिकृते'त्यत्रापि ध्वनिपदं वैकृतध्वनिपरम्। ध्वनिः स्फोटश्चेत्यस्य 'स्त' इति शेषः। शब्दानां = शब्दसंबन्धो ध्वनिः। वैकृतध्वनिस्तु केषांचिदल्पोऽल्पकालमुपलब्धिजनकः, केषांचिन्महान् = बहुकालमुपलब्धिजनको लक्ष्यते। तत्र प्रमाणमावेदयति—'उभयं तत्स्वभावतः' इति। 'सिद्ध'मिति शेषः। हरिरप्याह—

"स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः।
स्वभावतस्तु नित्यत्वाद् ह्रस्वदीर्घप्लुतादिषु॥
प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते॥"—

—इत्याद्यन्यत्र विस्तरः। अतिरिक्तस्फोटसाधिकां कौस्तुभोक्तयुक्तिमाह—कौस्तुभे

१ भाष्ये—'भेर्याघातव'दिति वार्तिकमुपादाय 'तद्यथा भेर्याघातः भेरीमाहत्य—'इत्याद्युक्तम्।

पदमिति प्रतीतेर्वर्णातिरिक्त एव स्फोटः, अन्यथा कपालातिरिक्तघटाद्य-

ॐ दर्पणः ॐ

मायाबिन्दुपरपर्य्यायत्रिगुणात्मकाव्यक्तप्रभवः शब्दब्रह्मापरनामा चेतनाधिष्ठितो-नभिव्यक्तवर्णविशेषो रवः परादिशब्दैर्व्यवह्रियमाणो नादः स्फोट इत्युच्यते। स च सर्वगतोपि पुरुषस्य ज्ञातार्थविवक्षाधीनप्रयत्नाधिष्ठितमूलाधारस्थपवनेनाभिव्यक्तः 'परे'तिव्यवह्रियते। नाभिपर्य्यन्तमागच्छता तेनाभिव्यक्तः 'पश्यन्ती'ति। पुनर्हृदयमागच्छता तेनैवाभिव्यक्तस्तत्तदर्थोल्लेखिज्ञानविषयः परश्रोत्राग्राह्यत्वात्सूक्ष्मो 'मध्यमा' वागिति। वक्त्रा तु कर्णपिधाने सूक्ष्मतरवाय्वभिघातेनोपांशुशब्दप्रयोगे च श्रूयते। स एव चास्यपर्यन्तमागच्छता तेन वायुना कण्ठदेशं गत्वा मूर्द्धानमाहत्य परावृत्य तत्तत्स्थानेष्वभिव्यक्तः परश्रोत्रेणापि ग्रहीतुं शक्यो 'वैखरी'ति व्यह्रियते। उक्तार्थे प्रमाणं च,—

चत्वारि वाक् परिमितानि पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति—इति श्रुतिः।
बिन्दोस्तस्माद्भिद्यमानाद्रवोऽव्यक्तात्मकोऽभवत्।
अतिप्र[illegible]निसम्पन्नः शब्दब्रह्मेति गीयते इति—पुराणवाक्यं च।

[illegible] नचबोधापत्तिरित्थं [illegible] कालान्तर [illegible] कन्थादौ स्फुटोयमर्थः। शिक्षायामपि—
अखण्डः = वर्णाघटितः। उपपा[illegible] सखण्डस्फोट[illegible]
[illegible] शेषः। तादृशप्रत्यक्षस्यान्ति[illegible] स प्रेरयति मारुतं॥

[illegible]त्याद्यनतिप्र[illegible]हेता वक्त्रमापद्य मारुतः। वर्णान् जनयते,—इति। अनेन हृदयावच्छिन्नमध्यमायां यो नादांश आन्तरप्रणवरूपः स एव वाचकः। 'आकार एव सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना नानारूपा भवती'ति श्रुतेः। सर्वप्राणिहृद्देशस्थत्वाच्च ब्रह्मपदव्यवहार्योपीत्यन्यत्र विस्तरः। **इति प्रतीतेरिति।** अन्यथा वर्णपरम्परारूपमालायास्तत्समूहरूपपदानतिरिक्ततयाधाराधेयभावावगाहि-प्रतीत्यनुपपत्तिरिति भावः। **अन्यथेति।** प्रतीतेः पदार्थासाधकत्व इत्यर्थः।

ॐ काशिका ॐ

त्विति। वर्णमालायां = वर्णसमूहे। पदमिति प्रतीतेः। इदमुपलक्षणं,—वाक्यमिति प्रतीते-रित्यस्य। व्यतिरिक्त एव = वर्णातिरिक्त एव। समुदायस्य समुदाय्यतिरिक्तत्वात्। अन्यथा 'पद'मित्यादिप्रतीत्यनुपपत्तेः, वर्णानां प्रत्येकपदरूपत्वाभावात्। उक्तरीत्या 'एकं पद'मिति प्रतीत्यनुपपत्तेश्च। अन्यथा = व्यतिरिक्तस्फोटानङ्गीकारे। कपालातिरिक्तेति। 'पद'मिति प्रतीतेर्बुद्धिस्थतावद्वर्णविषयकत्वेनोपपादने 'घट' इति प्रतीतेरपि घटसमवायित्वेनाभिमततावत्क-पालैरेवोपपादनसंभवात् कपालाद्यतिरिक्तघटादेः पराभिमतस्यासिद्धिप्रसङ्ग इत्यर्थः। परमाण्वति-

सिद्धिप्रसङ्गश्चेति प्रतिपादितम् ॥ ६८ ॥

नन्वेवं शास्त्राप्रामाण्यप्रसङ्गः, पदस्याखण्डत्वात्। शास्त्रस्य च प्रकृतिप्रत्ययाभ्यां पदव्युत्पादनमात्रार्थत्वादित्याशङ्कां समाधत्ते—

❀ दर्पणः ❀

'कपाले घट' इति प्रतीत्या भेदावगाहिन्या तत्सिद्धिः, प्रतीतेस्तदसाधकत्वे तु घटाद्यसिद्धिः स्पष्टैव, कपालतत्संयोगानादायैव तादृशप्रतीत्युपपत्तेरिति भावः। कौस्तुभे त्विति—'तु'शब्देनारुचिः सूचिता, तद्बीजं तु वर्णातिरिक्तस्फोटानङ्गीकारेपि नोक्तप्रतीत्यनुपपत्तिः, आनुपूर्व्यवच्छिन्नवर्णानां मालापदार्थत्वेन तत्रानुपूर्वीरूपपदस्याधाराधेयभावसम्भवात्, घटकपालादीनां विजातीयकारणजन्यत्वेन तद्भेदस्यापलपितुमशक्यत्वेनोक्तातिप्रसङ्गाभावाच्चेति।

अन्ये तु—'न वर्णानां स्फोटात्मकत्वम्, किन्तु स्फोटस्य वर्णाभिव्यङ्ग्यत्वमेव। न च प्रत्येकव्यञ्जकत्वपक्षोक्तदोषः, प्रयोगान्तर्गतसकलवर्णानां तद्व्यञ्जकत्वेपि चरमवर्णाभिव्यक्तस्यैव तस्य वाचकत्वोपगमादत एव नाद्यवर्णजाभिव्यक्त्युत्तरमर्थबोधः। तस्यैकत्वेपि तत्र व्यञ्जकरूपप्रतिबिम्बनात्तद्रूपरूपि[illegible]नानात्वेन प्रतीतिरौपाधिकी, एकस्यैव मुखस्य कृपाणदर्प[illegible]त्पत्त्या व्यक्तिपदार्थो वर्ण[illegible]—हरिपद[illegible]नां ध्वनिनैयत्यादभेदोपचारोत एव व्यञ्जकाभावाच्च न कदाचिदपि वर्णराहित्येन [illegible]ने—लोकेऽर्थबोधकत्वेन गृह्य[illegible] संस्कारा एव। ते च येन क्रमेण चित्तस्थास्तेनैव क्रमेण [illegible] शब्द' इत्यस्येत्यभ्युपगमाच्च,—न 'सरो' 'रस' इत्यनयोरविशेषः। व्यञ्जकरूपरूपितस्यैव तस्यार्थे शक्तिग्रहाच्च—न घटादिपर्य्यायाभिव्यक्तस्फोटे गृहीतशक्तिकस्याप्रसिद्धपदश्रवणेर्थबोधापत्तिरत एवे'दमेकं पदं', 'एकं वाक्य'मिति व्यवहारः स्वरसतः सङ्गच्छत इत्याहुः ॥६८॥

एवमिति। अखण्डस्फोटस्यैव वाचकत्वे इत्यर्थः। अप्रामाण्यप्रसङ्गमेवोपपादयति—पदस्येति। वाक्यस्याप्युपलक्षणमिदम्। अखडत्वादिति। प्रकृतिप्रत्ययविभागशून्यत्वादित्यर्थः। तथाभूतस्यैव वाचकताया भवद्भिरुपपादितत्वादिति

❀ काशिका ❀

रिक्तघटासिद्धिप्रसङ्गस्तु नोक्तः, तथा सति महत्त्वाभावेन प्रत्यक्षानुपपत्तेः। इदमुपलक्षणं—कपालादेरपि त्र्यणुकाद्यतिरिक्ततयासिद्धिप्रसङ्गस्येत्यलमतिविस्तरेण ॥ ६८ ॥

एवम् = अतिरिक्तस्फोटस्यैव वाचकस्याङ्गीकारे। शास्त्राप्रामाण्येति। व्याकरणशास्त्रा-

पञ्चकोशादिवत्तस्मात्कल्पनैषा समाश्रिता ॥
उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः ॥ ६६ ॥

'उपेयप्रतिपत्त्यर्था' इत्यन्तेनान्वयः । अयं भावः—यथा 'भृगुर्वै वारुणिर्वरुणं ब्रह्म पृष्टवान्, स उवाच अन्नमिति । तस्योत्पत्त्यादिकं बुध्वा

❀ दर्पणः ❀

भावः । शास्त्रस्य = व्याकरणात्मकस्य । प्रकृतिप्रत्ययाभ्यामिति । ताभ्यां यद् व्युत्पादनं = शक्तिबोधनं, तन्मात्रप्रयोजनत्वादित्यर्थः । तथा च प्रकृतिप्रत्ययविभागेन पदार्थवाचकत्वबोधकस्यास्य शास्त्रस्य पदस्याखण्डत्वेऽप्रामाण्यापत्तिरिति भावः । **उपेयप्रतिपत्त्यर्थे**ति,—वचनविपरिणामेन उत्तरत्राप्यन्वेति । उपेयस्य = बोधनीयस्य, प्रतिपत्तये एषा कल्पना श्रिता = स्वीकृता, 'मुनिने'ति शेषः । तत्र दृष्टान्तमाह—**पञ्चकोशादिवदिति** । दृष्टान्तमेव स्फुटयति—**अयम्भाव इति** । तत्र हि, 'भृगुर्वै वारुणिर्वरुणं ब्रह्म पृष्टवान्, स उवाचा'न्नं ब्रह्मे'ति । तस्योत्पत्त्यादि बुद्ध्वा पुनस्तेन पृष्टः 'प्राणो ब्रह्मे'ति, तस्यापि तथात्वं बुद्ध्वा पृष्टो,—'मनो ब्रह्मे'ति, [illegible]श्यशितमन्नं त्रेधा भवति—यत्स्थूलं तत्पुरीषं, यन्मध्यमं तन्मांसं, [illegible] **अतिप्र**[illegible] [illegible]श्रवणादनित्यत्वमवधार्य्य पुनः पृष्टो,—'विज्ञानं ब्रह्मे'ति । [illegible] नच बोधापत्तिरित्यर्थः [illegible] कालान्तरीणतो[illegible] [illegible] प्रश्नेनोपदिष्टम्—[illegible] [illegible]संस्काराणामेव सहकारित्वात् [illegible] स्फोटवैयर्थ्यम् [illegible] ॰खण्डः = वर्णाघटितः । उपपा[illegible] [illegible]तपादितम् । ननु नेयं वल्ली पञ्चकोशप्रतिपादिका, [illegible] । तादृशप्रत्यक्षस्यान्तिम[illegible] [illegible]त्वाच्च, तस्यैव तत्र ब्रह्मत्वात्, किन्तु 'ब्रह्म पुच्छं प्रतिष्ठे'त्यत्र श्रूयमाणब्रह्मपदस्यैव मुख्यब्रह्मपरत्वम् । अत एवाधारार्थकः पुच्छशब्दोऽप्युपपद्यते । तस्य लाङ्गूलरूपमुख्यार्थस्य बाधात् । एवञ्चानन्दवल्ल्यां यथा पञ्चकोशाः सर्वाधारब्रह्मबोधनायोपायतयोपात्ता, न तु तेषां वास्तवब्रह्मत्वं तथेहाप्यवास्तप्रकृतिप्रत्ययवाचकत्वव्युत्पादनं वास्तवस्फोटनिष्ठवाचकत्वबोधनायेत्याखण्ड-

❀ काशिका ❀

प्रामाण्येत्यर्थः । **उपेयप्रतिपत्त्यर्था इत्यन्तेनेति** । एषा कल्पना = प्रकृतिप्रत्ययादिकल्पना, उपेयप्रतिपत्त्यर्थे'त्यत्र वचनविपरिणामो लिङ्गविपरिणामश्च बोध्यः । इत्येतद्रूपो योऽन्तस्तेनेत्यर्थः । उत्तरत्र यत इत्यध्याहार्यम् । यतो हेतोरुपेयप्रतिपत्त्यर्था उपाया अनवस्थिता भवन्तीत्यन्वयः । उपेयस्य = प्राप्यस्य, प्रतिपत्तिः = प्राप्तिः, ज्ञानं वार्थः । 'पञ्चकोशादिवदित्याद्युपपादति—अयं भाव इत्यादिना । भृगुवल्ल्याम् = उपनिषद्विशेषे । आनन्दवल्ल्याम् = उपनिषद्विशेषे । अन्नप्राणेति—आनन्दशब्दान्तो द्वन्द्वः, ततः प्राचुर्यार्थे मयट् । तस्य प्रत्येकं संबन्धः, 'द्वन्द्वान्ते श्रूयमाण'मिति न्यायात् । तथा चान्नमयप्राणमयमनोमयविज्ञानमया-

पृष्ठे प्राणमनोविज्ञानानन्दात्मकपञ्चकोशोत्तरं—'ब्रह्मपुच्छं प्रतिष्ठे'ति ज्ञेयं ब्रह्म प्रतिपादितम्। तत्र कोशपञ्चकव्युत्पादनं शुद्धब्रह्मबोधनाय। यथावा आनन्दवल्लीस्थपञ्चकोशव्युत्पादनं वास्तवशुद्धब्रह्मबोधनाय। एवं प्रकृति-प्रत्ययादिव्युत्पादनं वास्तवस्फोटव्युत्पादनायैवेति।

ननु प्रत्यक्षस्य स्फोटस्य श्रवणादितोपि बोधसम्भवान्न शास्त्रं तदु-पाय इत्यत आह—उपाया इति। उपास्योपायान्तरादूषकत्वात्। तथाच

❀ दर्पणः ❀

लार्थः। श्रवणादित इति। आदिना—मननादिपरिग्रहः। न शास्त्रमिति। एतच्छास्त्रं विनापि श्रवणादिना तद्बोधेन व्यभिचारादिति भावः। उपायस्योपाया-न्तरादूषकत्वे सदृष्टान्तं युक्तिमाह—तथाचेति। व्याकरणाध्ययनस्य स्फोटज्ञानत्वं

❀ काशिका ❀

नन्दमयात्मका ये कोशास्तत्पञ्चकव्युत्पादनमित्यर्थः। वास्तवेति। वास्तवं = कालत्रयाबाधितं यत् पुच्छं = जगदाधारभूतं ब्रह्म तद्बोधनायेत्यर्थः। एतस्य वास्तवत्वोक्त्या पञ्चकोशानामवा-स्तवत्वमावेदितम्, तच्च शारीरकभाष्यादौ स्पष्टमेव। अत्र 'केचिदित्थं [illegible]—'तथा हि भृगुर्वारुणिर्वरुणं पितरं ब्रह्म पप्रच्छ। वरुण उवाच—'अन्नं [illegible] [illegible] पुनः [illegible] व्याचचक्षे—'प्राणो ब्रह्म'[illegible]ुत्पत्त्या व्यक्तिपदार्थौ वर्ण [illegible] पुनः प्रश्ने पुनराह—'मन' इति। तस्यापि 'आशं' [illegible] ध्वतिनैयत्यादभेदोपचारोत एव यन्मध्यमं तन्मासं, यदणीयस्तन्मनः" इति श्रुतावुत्पत्तिश्रव[illegible]ऽर्थबोधकत्वेन [illegible]नमय' इति। तस्यापि वृत्त्युपहितत्वेनातथात्वं बुद्ध्वा पुनः पृष्टवान्। तत 'आनन्दो ब्रह्मे'त्युत्तरिते वस्तुतत्त्वं प्राप्य स्थितो भृगुरिति। तन्न पेशलम्। पञ्चमस्य तत्रानुपायत्वात्। अकोशत्वाच्च। तस्माद्भृगुवल्ली नोदाहरणं, किंत्वानन्दवल्ली, तत्रत्यानां पञ्चानामप्युपायत्वात्। आनन्दमयपदं हि तत्रत्येन मुख्यब्रह्मपरमपि तु जीवपरम्, 'ब्रह्म पुच्छं प्रतिष्ठा'—इत्यत्र श्रूयमाणं 'ब्रह्म' पदमेव तु मुख्यब्रह्मसमर्पकम्। अत एव जगदाधारत्वार्थक'पुच्छ'शब्दोपपत्तिः। लाङ्गूलात्मक-मुख्यार्थस्य तत्र बाधात्। "आनन्दमयोऽभ्यासात्" इति व्याससूत्रं तु तत्रत्यानन्दमयशब्दस्य तद्वाक्यशेषे श्रूयमाणब्रह्मपदे तात्पर्यात् संगमनीयमित्यादि भगवच्छङ्करपादप्रभृतिभिः प्रपञ्चितम्। एतत् सर्वमभिप्रेत्येहानन्दवल्ल्येवोदाहृता। क्वचिद्भूषणसारपुस्तके—भृगुवल्ल्यामित्यादिग्रन्थो दृश्यते, स तु न युक्तः, उक्तहेतुभ्याम्। अथवोक्तास्वरसादेव भृगुवल्ल्युपन्यासानन्तरमानन्द-वल्ल्युपन्यास इति योजना विधेया। ननु व्याकरणज्ञानं विनोत्पन्नस्फोटज्ञाने व्यभिचारोऽत आह—तथा च व्याकरणेति। वैजात्यं कल्प्यत इति। तथा च कार्यतावच्छेदकभेदान्न

१ दर्पणकृतो हरिवल्लभपण्डिताः।

व्याकरणाभ्यासजन्यज्ञाने वैजात्यं कल्प्यते,—मन्त्रजन्यमिवार्थस्मरणे, वेदान्तजन्यमिव ब्रह्मज्ञाने। तस्य च ज्ञानस्य यज्ञादीनामन्तःकरणशुद्धाविव शरीरादिशुद्धावुपयोगः, साक्षात्परम्परया वा स्वर्गमोक्षादिहेतुत्वञ्च। तदुक्तं वाक्यपदीये—

तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते॥

❀ दर्पणः ❀

न कार्य्यतावच्छेदकं, किन्तु तादृशज्ञानगतं वैजात्यं, तदवच्छिन्नं च नोपायान्तरादिति न व्यभिचारः। वैजात्यस्य प्रागनुपस्थितावपि कारणताग्रहो विधिवादोक्तदिशावसेय इति भावः। **मन्त्रजन्यमिवेति**। मन्त्रजन्यतावच्छेदकमिवेत्यर्थः। एवमग्रेपि। ननु पुरुषार्थसाधकस्य तस्य सम्पादनवैयर्थ्यमत आह—**तस्य चेति**। स्फोटज्ञानस्य चेत्यर्थः। **यज्ञादीनामिति**। कामनापरित्यागेन विधीयमानानां तेषामित्यर्थः। 'यज्ञादी'त्यादिना—'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति, यज्ञेन दानेन तपसाऽनाशकेने'ति श्रुत्युक्तदानादिपरिग्रहः। 'शरीरादी'त्यादिना वागिन्द्रियपरिग्रहः। ननु शरीरादिशुद्धेरप्यपुरुषार्थतया तदुद्देशेनापि प्रवृत्तिर्दुर्घटा अत आह—**साक्षादिति**। 'स्वर्गादी'त्यादिनापवर्गपरिग्रहः। साक्षात्स्वर्गहेतुत्वं, कालान्तरा...र्थः। स्वर्गहेतुत्वे चै'कः शब्द' इति भाष्यपठितश्रुतिः, ... नच...बोधापत्तिरित्यर्थः ... अखण्डः = वर्णाघटितः। ... उपपा... ...ध...शेषः। तादृशप्रत्यक्षस्यान्तिम 'विदित्वे'ति श्रुत्या तदतिरिक्तस्य साक्षान्मोक्षहेतुत्वव्येयाद्यनतिप्र...र्त बोध्यम्। उक्तार्थे हरिसम्मतिमाह—**तदुक्तमिति**। तत् = नादात्मकस्फोटप्रतिपादकं शास्त्रम्। **अपवर्गस्येति**। मोक्षस्येत्यर्थः। **द्वारमिति**। तदुपयोगीत्यर्थः। हेतुगर्भविशेषणमाह—**वाङ्मलानामिति**। **चिकित्सितमिति**। अपनयनार्थकसन्नन्तात् कितेः क्तप्रत्यये वाङ्मलकर्मकापनयन-

❀ काशिका ❀

व्यभिचारः। **मन्त्रेति**। मन्त्रेणार्थस्मृतिः प्रकारान्तरेणापीति व्यभिचारवारणाय मन्त्रजन्यार्थस्मृतौ वैजात्यं मीमांसकैः कल्प्यते तद्वदत्रापीति भावः। 'मन्त्रजन्य'मित्यस्य मन्त्रजन्यतावच्छेदकमित्यर्थः। **वेदान्तेति**। तच्छ्रवणजन्यतावच्छेदकम्। अन्यथा भाषाग्रन्थश्रवणेनापि ब्रह्मज्ञानस्योत्पत्तेर्व्यभिचारापत्तिरिति वेदान्तिभिस्तत्र वैजात्यं यथा कल्प्यते तथेति भावः। **तस्य च ज्ञानस्येति**। शास्त्राभ्यासजनितस्फोटज्ञानस्येत्यर्थः। **शरीरादिशुद्धावुपयोग इति**। एवं च न शास्त्रवैयर्थ्यमिति भावः। **परम्परया वेति**। यज्ञाद्यनुष्ठानद्वारा वेत्यर्थः।

उक्तार्थे वाक्यपदीयं प्रमाणयति—**तदुक्तमिति**। चिकित्सा संजाता यत्रेत्यर्थः। वाङ्मलानामपनयहेतुरिति पर्यवसितोऽर्थः। **अधिविद्यमिति**—विभक्त्यर्थेऽव्ययीभावः। सर्वविद्या-

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ।
अत्रातीतविपर्यासः केवलामनुपश्यति ॥ इति ।

न चालीकया 'प्रकृतिप्रत्ययकल्पनया कथं वास्तवस्फोटबोधः ?' तस्या अलीकत्वासिद्धेर्वक्ष्यमाणत्वात् । एवं रेखागवयन्याय आदिना गृह्यते ॥ ६९ ॥

❀ दर्पणः ❀

साधनं यतस्ततोमोक्षद्वारमित्यर्थः । मनःशुद्धौ यज्ञादीनामिव वाक्शुद्धावेव तस्योपयोगादिति भावः । यतः सर्वविद्यानां मध्ये पवित्रमतोधिविद्यं = विद्यासु, प्रकर्षेण दीप्यत इत्यर्थः । तथाचोक्तम्—'तेषां च सामर्थ्यजुषां पवित्रं महर्षयो व्याकरणं निराहु'रिति । इदमिति । सिद्धिसोपानपर्वणां मध्ये इदं प्रथमं पदस्थित्यधिकरणमित्यर्थः । अत्र = स्फोटे । अतीतविपर्य्यासः = भ्रान्तिशून्यः, एतत्तत्त्वज्ञानवानिति यावत् । केवलां = पराख्याम् । अनुपश्यतीति । योगजधर्मेण प्रत्यक्षीकरोतीत्यर्थः । तथा च योगित्वसिद्धौ किमवशिष्यते तत्त्वज्ञान इत्यर्थः ... रदध्यादी' ...
द्वादशे नादनिरूपणानन्तरं— ... वसंग्रहः । ... त्पत्त्या व्यक्तिपदार्थो वर्ण

यदुपासनया ब्रह्म योगिनो मलमो... ध्वनिनैयत्यादभेदोपचारोत
द्रव्यक्रियाकारकाख्यं धूत्वा यान्त्यपुन... बोधकत्वेन

अलीकत्वासिद्धेरिति । पञ्चकोपादिवत् प्रकृतिप्रत्ययविभागस्यापि मायिकत्वेन नात्यन्तासच्छशश्रृङ्गादिवदलीकत्वमिति वक्ष्यमाणप्रायत्वादित्यर्थः । अवास्तवत्वेपि मणिप्रभाप्रतिबिम्बस्य मणिप्रासाविवैतस्यापि परमात्मदर्शने उपयोगसम्भवादिति भावः । आदिपदेनेति । 'पञ्चकोशादिव'दित्यत्रोपात्तेनादिशब्देनेत्यर्थः । न्यायस्तु समासवादे प्रपञ्चितः ॥ ६९ ॥

❀ काशिका ❀

व्यापकमिति पर्यवसितोऽर्थः । अतीतेति । अतीतो विपर्यासो भ्रमो यस्येत्यर्थः । केवलाम् = पराख्यां वाचम् । कथं वास्तवेति । अलीकजलादेर्वास्तवतृडादिनिवृत्तिजननादर्शनादलीकप्रकृत्यादिकल्पनया वास्तवस्फोटप्रतीतिर्न संभवतीति भावः । वक्ष्यमाणत्वादिति । 'अनेकव्यक्त्यभिव्यङ्ग्ये'त्यादिग्रन्थेन पञ्चकोशादिवत् सदसद्वैलक्षण्यस्य सूचयिष्यमाणत्वात् । आदिना = 'पञ्चकोशादी'त्यादिपदेन ॥ ६९ ॥

ननु स्फोटस्य वर्णजातीनाञ्च नित्यतया 'ककार उत्पन्न' इति न स्यात्, वायुसंयोगनिष्ठजातेः स्फोटे भाने कादिप्रतीतीनां भ्रमत्वापत्ति-श्चेत्यत आह—

कल्पितानामुपाधित्वं स्वीकृतं हि परैरपि ।
स्वरदैर्घ्याद्यपि ह्यन्ये वर्णेभ्योऽन्यस्य मन्वते ॥ ७० ॥

❀ दर्पणः ❀

उत्पत्तिविनाशप्रतीतिसाक्षिकं वर्णानामनित्यत्वं तादृशवर्णात्मकस्फोटाभ्युपगमे तस्याप्यनित्यत्वप्रसङ्ग इत्याशङ्कासमाधानपरतया मूलमवतारयति—**नन्विति** । **वर्णजातीनामिति** । वर्णानां, तद्वृत्तिकत्वादिजातीनां चेत्यर्थः । **न स्यादिति** । अयं भावः—'उत्पन्नो नष्टो वा ककार' इत्यादिप्रतीतेः ककारादिवर्णात्मकः स्फोटस्तद्वृत्तिजातिर्वोत्पत्त्यादिमत्त्वेन विषयो वाच्यः, तथाच न सम्भवति, द्वयोरेव नित्यत्वाज्जायमानायास्तस्या विषयबाधेन भ्रमत्वापत्तेरिति । तादृशप्रतीतेर्भ्रान्तत्वे इष्टापत्तावाह—**वायुसंयोगेति** । कादिप्रतीतीनां = 'ककारो' 'गकार' इत्यादि-प्रतीना[illegible] **भ्रमत्वापत्तिरिति** । यथाश्रुताभिप्रायेणेयं, पूर्वोक्तान्तिमकल्पे [illegible] च स्वन्मतेपि कत्वादीनां लौकिकविषयत्वानुपपत्तिः, तद्व्य-[illegible] अतिप्र[illegible] नत्वबोधापत्तिरित्य[illegible] लौकिकसन्निकर्षस्य[illegible] अखण्डः = वर्णाघटितः । [illegible] शेषः । तादृशप्रत्यक्षस्यान्ति[illegible] कत्वं साक्षात्करोमीति प्रतीत्या स्वसमवेत-व्यञ्[illegible]त्याद्यनतिप्र[illegible]सङ्गापगमेन लौकिकविषयत्वानपायात् । तादृशानेकप्रतीतीनां भ्रमत्वकल्पनापेक्षयैतत्कल्पनाया एवौचित्यात् । 'आरोपे सति निमित्तानुसरण'मिति न्यायात् । मूलं तु तन्मते इत्थमवतारणीयं—ननु स्वसमवेताभिव्यञ्जकगत-समवायस्य सम्बन्धता न केनाप्यादृतेत्यत आह—**कल्पितानामिति** । कल्पितानां =समवायसम्बन्धेन तद्वृत्तीनामप्युक्तसम्बन्धेन तत्र कल्पितानां वायुसंयोगगतधर्म-विशेषाणामुपाधित्वमुदात्तत्वादिप्रकारकप्रतीतिजनकत्वमित्यर्थः । अधिकं त्वग्रे वक्ष्यते ।

❀ काशिका ❀

वर्णजातीनाम् = वर्णवृत्तित्वेनाभिमतकत्वादिजातीनाम् । उत्पन्न इति न स्यादिति । इति प्रतीतिर्न स्यादित्यर्थः । जातीनां नित्यत्वाभिधानं—'शिखी ध्वस्त' इति वह्निशेषणीभूत-जातिविषयकतयैवो'त्पन्नः ककार' इत्यादिप्रतीतिनिर्वाह—इत्यस्य निराकरणाय । इदमुपलक्षणं 'विनष्टः ककार' इति प्रतीतेरिति बोध्यम् । व्याप्यवृत्तिको धर्मविशेषो जातिरिति मते नोक्तप्रतीत्यनुपपत्तिरित्यत, आह—वायुसंयोगेति । परैरपीति । मूले—'पर' शब्दो मीमांसकपरः ।

स्वीकारस्थलमाह—**स्वरदैर्घ्याद्यपीति** । आदिनोत्पत्तिविनाश-संग्रहः । उदात्तत्वादि न वर्णनिष्ठम्, तस्यैकत्वाद् नित्यत्वाच्च । तच्च,—स एवायमितिप्रत्यभिज्ञानात् । न च गत्वावच्छिन्नप्रतियोगिताकभेदाभाव-स्तद्विषयः, व्यक्त्यंशाभेदस्यापि भासमानस्य विना बाधकं त्यागायोगात् । नचोत्पत्तिप्रतीतिर्बाधिका, प्रागसत्त्वे सति सत्त्वरूपाया उत्पत्तेर्वर्णेष्वनुभव-

❀ दर्पणः ❀

दृष्टान्तस्फुटीकरणाय मीमांसकमतमाह—**उदात्तत्वादीति** । आदिनाऽनु-दात्तत्वपरिग्रहः । उदात्तत्वानुदात्तत्वयोः परस्परविरोधाद्वर्णभेदेन तत्सत्ता वाच्या । वर्णभेदश्च तदनित्यत्वेऽनेकत्वे वा स्यात् तदेव तु न सम्भवतीत्याह—**तस्यैकत्वा-दित्यादि** । नित्यत्वे प्रमाणमाह—**तच्चेति** । नित्यत्वमेकत्वं चेत्यर्थः । **त्यागा-योगादिति** । अविषयत्वायोगादित्यर्थः । **बाधकेति** । व्यक्त्यभेदे प्रतीतिर्बाधि-केत्यर्थः । **प्रागसत्त्वे सतीत्यादि** । स्वाधिकरणसमयध्वंसवत्त्वसम्बन्धा-वच्छिन्नप्रतियोगिताकाभाववत्त्वावच्छिन्नकालिकविशेषणतासम्बन्धरूपाया इत्यर्थः ।

❀ काशिका ❀

मूले—'स्वरदैर्घ्याद्यपि ह्यन्ये' इत्यत्राद्योऽन्यशब्दोऽपि तत्परः । 'स्वरदैर्घ्यादी'[illegible] नोदात्तत्वादिस्वरो ग्राह्यः । 'विनाशादी'त्यादिपदेन प्रागभावसंग्रहः । [illegible]त्पत्त्या व्यक्तिपदार्थो वर्ण [illegible]—हरिपदमि[illegible]ना ध्वत्तिनैयत्यादभेदोपचारोत एव नामविरोध एवेति वाच्यम्, 'अग्नि'मित्यकारोऽनुदात्तः, [illegible]ने—लोकेऽर्थबोधकत्वेन गृही[illegible] इत्यादिप्रतीत्यनापत्तेः । ननु तस्यानित्यत्वमङ्गीक्रियत इति ना[illegible] शब्द' इत्य[illegible]ह—तस्य नित्यत्वाच्चेति । न च गत्वावच्छिन्नेति । तथा च पूर्वकालैतत्कालभवगकारयोः परस्परं तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदेऽपि गत्वावच्छिन्नप्रतियोगिताकभेदो न गत्वा-वच्छिन्ने गकारे इति तादृशभेदाभावोऽक्षत इति भावः । तद्विषयः = स एवायं गकार इति प्रत्यभिज्ञाविषयः । एवं च वर्णानामनेकत्वे न क्षतिरिति नोदात्तादिप्रतीत्यनुपपत्तिरिति भावः । व्यक्त्यंशाभेदस्येति । एतत्कालवृत्तिव्यक्तावतीतकालवृत्तिव्यक्तेस्तद्व्यक्तित्वावच्छिन्नप्रतियोगिता-कभेदाभावस्येत्यर्थः । [1]त्यागायोगादिति । अन्यथा पदार्थमात्रस्य क्षणिकत्वापत्तिः, प्रत्यभिज्ञाया उक्तरीत्यैवोपपत्तिरिति भावः । अनुभवेति । 'उत्पन्नो गकार'इत्यस्य त्वभिव्यक्तो गकार इत्यर्थ इति तात्पर्यम् । ननूत्पन्नो घट'इतिवदु'त्पन्नो गकार'इति प्रतीतेः प्रागसत्त्वविशिष्टसत्त्व-रूपोत्पत्तिरेव विषयो वाच्यः, समानाकारप्रतीत्योर्विभिन्नविषयत्वस्यानुचितत्वादित्याशङ्क्याह—

१. अत्रास्मदीयलिखितकाशिकायां मूलव्याख्याने पौर्वापर्यव्यत्ययो दृश्यते, परं मूलानुसारेणैव टीकाक्रमः स्थापितोऽस्माभिः ।

विरुद्धत्वात्। अत एव 'वर्णमुच्चारयती'ति प्रत्ययो, न तू'त्पादयती'ति प्रत्ययो, व्यवहारश्च। उच्चरितत्वञ्च तात्वोष्ठसंयोगादिजन्याभिव्यक्ति-विशिष्टत्वम्। किञ्च—व्यञ्जकध्वनिनिष्ठोत्पत्त्यादेः परम्परया वर्णनिष्ठत्व-विषयत्वेनाप्युपपत्तेर्न सातिरिक्तवर्णसाधिका। परम्परया वर्णनिष्ठत्वाभ्यु-पगमाच्च न भ्रमत्वम्। साक्षात्सम्बन्धांशे भ्रम इत्यवशिष्यते, तदपि 'सोय'मित्यत्र व्यक्त्यभेदांशे तव भ्रमत्ववत्तुल्यम्। परन्तु समातिरिक्त-

❀ दर्पणः ❀

द्वितीयादिक्षणसम्बन्धस्य निरुक्तसम्बन्धेन स्ववत्त्वान्न तत्रातिप्रसङ्गः। अत एवेति। अनुभवविरुद्धत्वादेवेत्यर्थः। प्रत्ययो = ज्ञानम्। व्यवहारः = शब्दप्रयोगः। ननूच्चारणमपि तदुत्पत्त्यनुकूलो व्यापार एव, तथा च सैव प्रतीतिर्वर्णानित्यत्वसाधिकेत्यत आह—उच्चरितत्वञ्चेति। अभिव्यक्तिविशिष्टत्वं—तद्विषयत्वम्। तथा च तादृशप्रतीत्याभिव्यक्तिनिष्ठं वर्णनिरूपितविषयित्वमेव विषयीक्रियते, नतूत्पत्तिनिष्ठं वर्णवृत्तित्वमिति न साऽनित्यत्वसाधिकेति भावः। ननु वर्णाभिव्यक्तिजनकः कण्ठता-ल्वाद्यभिघात एवोच्चारणपदार्थो, न वर्णोत्पत्तिजनक इत्यत्र किं प्रमाणम्? किञ्च [illegible]दिनामु'त्पद्यते वर्णो' 'वर्णमुत्पादयती'त्यादिप्रयोगा इष्टा एवेति नानु-[illegible] भ्रमत्वाप[illegible]—किञ्चेति। 'उत्पत्त्यादे'रित्यादिना—'विनष्टो वर्ण' इति नच्छ्वोधापत्ति[illegible] च स्वन्मता[illegible]। परम्परया = [illegible]व्यङ्ग्यत्वरूपया। अखण्डः = वर्णाघटितः [illegible] लौकिकसन्निकर्ष[illegible]चकत्यर्थः। न तु स्फोटातिरिक्तेति तदर्थः, तैः [illegible]पः। तादृशप्रत्यक्षस्यान्तिम[illegible] स्फो[illegible]ध्वनतिप्रसङ्ग[illegible] [illegible]न्युत्पत्त्यादेस्तादृशप्रतीत्या वर्णेष्ववगाहने भ्रान्तत्वा-पत्तिरत आह—परम्परया वर्णेति। स्वाश्रयसंयोगावगाहिन्या 'लोहितः स्फटिक' इति प्रतीतेर्यथा न भ्रमत्वं, तथास्या अपीति भावः। 'अवशिष्यत' इत्यस्यो'त्पन्नो वर्ण' इति प्रतीतेरिति शेषः। ननु तादृशप्रतीतेर्नियमेन परम्परासम्बन्धविषयत्व-कल्पने गौरवमत आह—परन्त्विति। अतिरिक्तेति। अधिकेत्यर्थः। तथाचानेकवर्ण-

❀ काशिका ❀

किं चेति। उच्चरितत्वं ताल्वोष्ठपुटसंयोगजन्यत्वमेवेत्युत्पत्तिप्रतीतिर्जागर्त्येवैत्याशङ्कायामाह—उच्चरितत्वं चेति। परम्परया = स्वाश्रयव्यङ्ग्यत्वरूपपरम्परासंबन्धेन। उत्पत्त्यादे'रित्यादि-पदेन नाशपरिग्रहः। तस्य तु स्वप्रतियोगिव्यङ्ग्यत्वरूपः संबन्धो बोध्यः। वर्णनिष्ठत्वेति। नित्यवर्णनिष्ठत्वाभ्युपगमादित्यर्थः। "इत्थं च पूर्वानुभूतेनेदानींतनानुभूतस्याभेदसिद्धौ तावत्काल-स्थिरं चैनं कः पश्चान्नाशयिष्यति" इति न्यायेन वर्णानां नित्यत्वं सिद्धमेवेति भावः। साक्षात् संबन्धांशे इति। उत्पत्त्यादेः साक्षात्संबन्धेनोत्पन्नो गकार इति साक्षात्संबन्धांशे या प्रतीति-स्तस्या भ्रमत्वरूपं दूषणमवशिष्यत इत्यर्थः। व्यक्त्यभेदांशे इति। व्यक्त्यभेदावगाहिनी या

वर्णतत्प्रागभावध्वंसकल्पना नेति लाघवमतिरिच्यते। न च वर्णस्थले ध्वनिसत्त्वे मानाभावः, तदुत्पादकशङ्खाद्यभावेन तदसम्भवश्चेति वाच्यं, ककाराद्युच्चारणस्थले तत्तत्स्थानस्य जिह्वाया ईषदन्तरपाते वर्णानुत्पत्ते- र्ध्वन्युत्पत्तेश्च दर्शनाज्जिह्वाभिघातजवायुकण्ठसंयोगादेर्ध्वनिजनकत्वकल्प- नात्,—तस्य च वर्णोत्पत्तिस्थलेपि सत्त्वात्तवैव प्रतिबध्यप्रतिबन्धकभाव-

❀ दर्पणः ❀

तद्ध्वंसादिकल्पनापेक्षया तत्प्रतीतेर्नियमतस्तादृशसम्बन्धावगाहित्वकल्पनैव लघीय- सीति भावः। यदि वर्णस्थले ध्वनिनैयत्यं स्यात्,—स्यादेव तदोत्पत्तेस्तद्घटित- परम्परासम्बन्धेन वर्णनिष्ठता, तत्रैव च मानाभाव इत्याशङ्क्य निराचष्टे—न चेति। वर्णपार्थक्येन ध्वनेरनुभवादिति भावः। हेत्वसमवधानादपि तत्सत्त्वं न घटत इत्याह—तदुत्पादकेति। शङ्खौष्ठाभिघातजवायुसंयोगादेरित्यर्थः। वर्णानुत्पत्ते- रिति। वर्णानभिव्यक्तेरित्यर्थः। दर्शनादिति। दशिर्ज्ञानसामान्यार्थः। सत्त्वा- दिति। तथा च पार्थक्येनानुभूयमानायाः प्रतीतेर्जिह्वाभिघातजकण्ठवायुसंयोगादेर्हे- तोश्च सत्त्वान्न वर्णाभिव्यक्तिस्थले ध्वन्यनैयत्यमित्युक्तसम्बन्धविषयकप्रतीतिर्निरा- बाधेति भावः। तवैवेति। वर्णस्थले ध्वन्वसत्त्ववादिन एवेत्यर्थः। [illegible]विपरीत-

❀ काशिका ❀

[illegible]त्पत्त्या व्यक्तिपदार्थो वर्ण 'स एवायं गकार' इति प्रतीतिस्तस्या अभेदांशे इत्यर्थः। [illegible] ध्वनिनैयत्यादभेदोपचारोत एव [illegible]—[illegible] तेर्यथा तव मते भ्रमत्वं तथा साक्षात्संबन्धनात्पर्यात् [illegible] वर्णा[illegible]ने—लोकेऽर्थबोधकत्वेन गृही[illegible] एकप्रतीतेर्भ्रमत्वापत्तिरूपं दूषणं मतद्वयेन समानमिति पर्यवा[illegible]न जन्य[illegible] शब्द' प्रसाम्ये नित्यनानावर्णपक्षोपेक्षा निर्बीजेत्याशङ्क्याह—परन्त्विति। मम = नित्यवर्ण[illegible] लाघव- मतिरिच्यत इति। परमते तूक्तगौरवात् तत्पक्षोपेक्षेति भावः। वर्णस्थले ध्वनिनैयत्यं यदि स्यात् तदा परंपरासंबन्धेनोत्पत्त्या प्रतीतिनिर्वाहस्तत्र ध्वनिसत्त्वे एव तु न मानमित्याशयेन शङ्कते—न चेति। ननु गकार उत्पन्न इत्यादिप्रतीत्यन्यथानुपपत्तिरेव तत्र मानं भविष्यती- त्याशङ्क्याह—तदुत्पादकेति। ध्वन्युत्पादकसामग्र्यभावेन तदसंभवः। न ह्यन्यथानुपपत्तिरेव कार्योत्पादिका, सामग्रीं विनान्यथानुपपत्तिशतमपि कार्योत्पादनसमर्थं न दृष्टचरमिति भावः।

समाधत्ते—ककाराद्युच्चारणेति। ककाराद्युच्चारणस्वरूपयोग्ययत्नादिस्तत्र इत्यर्थः। ईषदन्त- रेति। ईषद्विश्लेषे सतीत्यर्थः। जिह्वेति। जिह्वातत्तत्स्थानयोर्योऽभिघाताख्यसंयोगस्तज्जन्यो यो वायुकण्ठसंयोगादिस्तस्येत्यर्थः। ध्वनिजनकत्वेति। अन्वयव्यतिरेकाभ्यामुक्तविधवायु- तत्स्थानसंयोगादेर्ध्वनिजनकत्वकल्पनादित्यर्थः। तस्य = तादृशवायुसंयोगादेः। सत्त्वादिति। तथा च सामग्रीसत्त्वेन वर्णोत्पत्तिस्थलेऽपि ध्वन्युत्पादोऽक्षत एवेति भावः। वर्णोत्पादक[illegible] प्रतिबन्धकत्वान्न वर्णोत्पत्तिस्थले ध्वन्युत्पादसंभव इत्याशङ्कते—तवैवेति। एवम् = उक्त[illegible]

कल्पना निष्प्रामाणिकी स्यादिति गौरवं विपरीतम्। एवं परस्परविरोधादुदात्तत्वानुदात्तत्वह्रस्वत्वदीर्घत्वादिकमपि न वर्णनिष्ठं युक्तमिति तेषामभिप्रायः। एवञ्चोत्पत्त्यादिप्रतीतीनां तत्प्रमात्वस्य च निर्वाहः परेषामपि समान इति प्रतिबन्द्यैवोत्तरमिति भावः॥ ७०॥

※ दर्पणः ※

गौरवमिति। स्वकारणबलाज्जायमाने ध्वनौ वर्णोत्पादकसामग्र्याः प्रतिबन्धकत्वकल्पना ध्वन्यकल्पनप्रयुक्तलाघवापेक्षया विपरीतगौरवग्रस्तेति यावत्। **तेषामिति।** वर्णनित्यतावादिनां मीमांसकानामित्यर्थः। **एवञ्चेति।** उत्पत्त्यादीनां वर्णावृत्तित्व इत्यर्थः। **प्रतिबन्द्यैवेति।** पराभिमतसमाधिसमाधेयमुत्तरं प्रतिबन्दिस्तयेत्यर्थः। तथा च तत्र मीमांसकैरुत्पत्त्यादिप्रतीतेः प्रमात्वे यः समाधिराश्रितः स एवास्माभिरप्यनुसर्त्तव्य इति भावः। तथा चाखण्डवाक्यस्फोटस्वीकारे न किञ्चिद् बाधकमिति फलितम्।

नन्वेतत्कल्पे पदानामसत्त्वेन मीमांसकसिद्धान्तविरोधः, तथाहि—'व्रीहिभिर्यजेते'त्यत्र यागेन द्रव्यमात्राक्षेपे व्रीहिश्रुतिर्नियमार्था 'व्रीहिभिरेव नान्यै'रिति। तत्र व्रीह्यभा[illegible]त्यकर्मणः, प्रारब्धकाम्यकर्मणश्च लोपो मा भूदिति प्रतिनिधिरुपादीयते, न व्रीज[illegible]श्रुमत्वो[illegible]क्षणत्वेन प्रतिनिधेरपि श्रौतत्वात्, भवन्मते तत्र प्रतिनिध्युनच्चबोधापो[illegible] च स्वन्म[illegible]

※ काशिका ※

अखण्डः = वर्णाघटि[illegible] [illegible]कौ[illegible]प्रतिकूप[illegible]स्थापनोत्पत्त्यादिपरिग्रहः। तथा चात्परयादिवद्दीर्घ-[illegible]ति शेषः। तादृशप्रत्यक्षस्यान्तिम[illegible] त्वादि इत्याद्यनतिप्रसक्त[illegible] भावः। तेषां = मीमांसकानां। प्रमादादिपूर्वकोच्चारितशब्दात् [illegible]पूर्वनिष्ठप्रमादजन्यत्वानुमानानुपपत्तिस्तु न शङ्कनीया, एतन्मते तदनुमापकस्य तत्तदुच्चारितशब्दे वैजात्यस्यासम्भवेपि प्रमादादिजन्यतावच्छेदकताल्वोष्ठसंयोगादिगतवैजात्यस्य वर्णेष्वारोपेण प्रमादादिजन्यत्वानुमानोपपत्तेः। धूमत्वेन ज्ञायमानपदार्थान्तरेणापि वह्न्यनुमितेर्दृष्टत्वात्। न च 'सेयं गुर्जरी' 'सेयं दीपकलिके'ति प्रत्यभिज्ञावशात् तेषामपि नित्यत्वं स्यात्। गुर्जरी रागविशेष इति वाच्यम्। तत्र मानान्तरेण नाशप्रतियोगित्वसिद्धौ अगत्या प्रत्यभिज्ञाया भ्रमत्वस्य साजात्यावलम्बस्य वाङ्गीकारात्। वर्णानामेकत्वे 'घटिक' इत्यत्र द्व्यज्लक्षणष्ठन् घटेन तरतीत्यर्थे आवृत्तिगतद्वित्वसंख्यामारोप्य निर्वाह्यः। एवं 'घटेने'त्यादौ 'साचेकाचः—' इति विभक्त्युदात्तत्वमपि आवृत्तिगतद्वित्वसंख्ययैकत्वस्य बाधाद्वारणीयम्। स्पष्टं चेदं सर्वं प्रत्याहाराह्निके भाष्यादौ इत्यास्तां विस्तरः। **प्रतिबन्द्येवोत्तरमिति।** क्वचित् प्रतिबन्देरप्युत्तरत्वमिति भावः। एतादृशस्थले प्रतिबन्देरनुत्तरत्वे परसिद्धान्तस्यैव भङ्गापत्तेः। **पञ्चेति।** वर्णपदवाक्यस्फोटास्त्रयः, चरमयोः सखण्डत्वाखण्डत्वाभ्यां द्वैविध्यमिति व्यक्तिस्फोटानां पञ्चविधत्वमिति भावः॥ ७०॥ * इति व्यक्तिस्फोटनिरूपणम् *

❀ दर्पणः ❀

पादाने तद्वाक्याखण्डार्थाननुष्ठानान्नित्यादेर्विलोपापत्तिः । नीवारकरणकक्रियाया अन्यत्वात् क्रिया न प्रतिनिधीयते, द्रव्यं तु प्रतिनिधीयते एवेति परिभाषाया उच्छेदः । एवं 'श्वेतं छागमालभेते'त्यत्र क्रियायाश्छागद्रव्येण सम्बन्धः श्रौतो, द्वितीयाश्रुत्या तस्य साक्षात्प्रतिपादनात्, श्वेतगुणस्य तु वाक्यीयः सः, तत्सामानाधिकरण्यात्तस्य निर्गुणस्य द्रव्यस्य, निरधिकरणस्य गुणस्य चासम्भवात् । श्वेतगुणस्य छागसम्बन्धमुपजीव्यैव क्रियासम्बन्धात्, श्रुतिप्रतिपादितद्रव्यसम्बन्धाद् वाक्यप्रतिपादितगुणसम्बन्धस्य दुर्बलत्वात् । श्वेतच्छागाभावेन्यगुणकश्छाग आलभ्यते, न तु श्वेतगुणयुक्तो मेषः, श्रुतिबाधापत्तेः । तस्य चाखण्डपक्षे असम्भवात् । एवमेव पदार्थनिबन्धनमीमांसान्यायासम्भवोपि । अखण्डस्फोटस्यैव भवन्मतेऽखण्डार्थत्वेन केन कस्य बाधो भवेदिति चेत्, अत्राहुः—अखण्डवाक्यादखण्डतत्तदर्थाच्च रेखागवयन्यायेन पदपदार्थावापोद्वापाभ्यां कल्पितपदपदार्थमादाय प्रतिनिध्याद्यादानस्योपपत्तिः, ऋषीणां तत्त्वार्थाववोधेऽपि तत्त्वभूतेन वस्तुना व्यवहारासम्भवाद् व्यवहारकालेऽनिर्द्धारिततत्त्वसदृशैस्तैर्नानाप्रकारैः पदतदर्थानां व्यवह्रियमाणत्वान्न तद्वचोभिः पदपदार्थानां वास्तवसत्यत्वम् । वाक्यार्थस्यापि तदापेक्षिकमेव, परमार्थदशायां सर्वस्यापि व्यावहारिकस्यासत्यत्वादिति । [illegible]

नैयायिकास्तु—सर्वमिदं वर्णानां नित्यत्वे सम्भवेत्, [illegible]उत्पत्त्या व्यक्तिपदार्थो वर्ण [illegible]—हरिपदार्थ[illegible] ध्वनिनैयत्यादभेदोपचारोत एव प्रतीव कण्ठादिस्थानवाय्वभिघातस्यापि वर्णा[illegible]ने—लोकेऽर्थबोधकत्वेन गृही[illegible] निमित्तत्वावधारणाच्च । एवञ्च तादात्म्यसंबन्धेन जन्य[illegible] शब्द' इत्य[illegible]सम्बन्धेन ध्वंसत्वावच्छिन्नं प्रति हेतुतयोच्चरितवर्णस्य क्षणान्तरितस्याप्रतीते'र्नष्टो वर्ण' इति प्रतीतेश्च—स्वाव्यवहितोत्तरवर्णस्यैव नाशकता कल्प्यते, प्रतियोगितासंबन्धेन योग्यविभुविशेषणगुणनाशं प्रति 'स्वसामानाधिकरण्य' 'स्वाव्यवहितवर्णत्वो'भयसम्बन्धेन योग्यविभुविशेषगुणस्य हेतुताया ज्ञानादिस्थले क्लृप्तत्वाच्च । कण्ठताल्वाद्यभिघातस्य च कत्वादिकमेव कार्य्यतावच्छेदकं न तु तत्तद्वर्णाभिव्यक्तित्वं, गौरवात् । न च लौकिकविषयितया कत्वमेव तदवच्छेदकं वाच्यमिति न गौरवमिति वाच्यं; तथा सति कोलाहलाऽप्रत्यक्षप्रसङ्गात् । न हि कोलाहलप्रत्यक्षं कत्वादिविषयकं, येन तल्लौकिकविषयितायाः कार्य्यतावच्छेदकघटकता सम्भाव्येत । किञ्च घटाद्युत्पादकदण्डादेरपि तदभिव्यक्तित्वस्यैव कार्य्यतावच्छेदकत्वापत्तौ घटादीनामपि नित्यत्वापत्तिरिति बहुव्याकोपः । न च 'सत एवाभिव्यक्ति'रिति साङ्ख्यमताश्रयणादुक्तापत्तिरिष्टैवेति वाच्यं, तन्मतस्याप्यापातमनोरमत्वात् । तथाहि—अभिव्यक्तिः सत्यसती वा ? नाद्यः, घटानुत्पत्तिदशायां घटस्येव तस्या अपि सत्त्वाद् घट इति

इत्थं पञ्चधा व्यक्तिस्फोटाः । जातिस्फोटमाह—

शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम् ॥
औपाधिको वा भेदोऽस्तु वर्णानां तारमन्दवत् ॥ ७१ ॥

❀ दर्पणः ❀

प्रतीत्यापत्तेः । अभिव्यक्तेरप्यभिव्यक्त्यङ्गीकारेऽपि तस्या अपि कार्य्यत्वेन सत्त्वादुक्तदोषो दुरुद्धर एव, अन्त्ये स्वसिद्धान्तव्याघातः, युक्तितौल्येन पदार्थान्तरस्याप्युत्पत्तिसिद्धेरिति । किञ्चो'त्पन्नो घटो' 'नष्टो घट' इति प्रतीत्या घटादीनामनित्यत्ववदु'त्पन्नः ककारो' 'नष्टः स' इत्यविलक्षणप्रतीत्या ककारादीनामनित्यत्वमेवावधार्यते । कत्वादीनां संयोगधर्मत्वं तु दुरुपपादमेव, वर्णासमवेतत्वेन श्रोत्राग्राह्यत्वप्रसङ्गात् । न चोक्तसन्निकर्षादेव तत्प्रत्यक्षोपपत्तिस्तथा सति शब्दत्वादिप्रत्यक्षानापत्तेः । न च तत्सम्बन्धस्य 'ककारं शृणोमी'ति प्रतीतौ भाने प्रमाणमस्ति । 'शब्दं शृणोमी'ति प्रतीतेः समवायविषयकत्ववदुक्तप्रतीतेरपि तद्विषयकत्वेनोपपत्तेश्च । समवायांशे सर्वत्र तादृशप्रतीतीनां भ्रमत्वमित्यपि न, वर्णसमवेतत्वस्य तत्राभ्युपगमेत् विषयाबाधात् । एवञ्च वर्णानामनेकत्वेन तत्रोदात्तत्वादिप्रतीतिरपि [illegible] भ्रमत्वा[illegible]दिति दृष्टान्तदौर्भिक्ष्यमेव । एवञ्च वर्णप्रागभावध्वंसानां प्रमाण[illegible] च [illegible] तत्कल्पनागौरवमपि । न च वर्णनित्यतावादिमते [illegible] [illegible]स्तज्जातीयत्वेनोपपादनं तु तज्जातीयो-

नच[illegible]बोधाप[illegible]

अखण्डः = वर्णाघटि[illegible]

[illegible]ति शेषः । तादृशप्रत्यक्षस्यान्तिम[illegible] [illegible], यत्र प्रत्यभिज्ञायां गत्वादेर्जातित्वेन भानं तत्रैव तस्या'स्त[illegible]'मित्याकारो, यत्र तु स्वरूपेण तत्र 'सोय'मित्याकार इत्यभ्युपगमात्, तज्जातीयाभेदावगाहिन्या'स्तदेवौषध'मित्याकारायाः प्रत्यभिज्ञायाः सर्वसिद्धत्वाच्च । तस्माद् वर्णात्मकस्फोटस्य वाचकत्वमसम्भवदुक्तिकमेव । स्फोटस्य ध्वन्यतिरिक्तत्वाभावाच्च । योगशास्त्रादौ तस्य निरूपणं तूपासनार्थमेवेति प्रागुक्तप्रायम् । सखण्डस्फोटस्तु प्रागेव निरस्त इत्यानुपूर्व्यवच्छिन्नवर्णानां वाचकत्वमूह्यमिति वदन्ति । इत्थमिति । पूर्वोक्तप्रकारैरित्यर्थः । **पञ्चधेति** । वर्णपदवाक्याखण्डपदाखण्डवाक्यभेदभिन्ना इत्यर्थः ॥७०॥ [इति व्यक्तिस्फोटनिरूपणम् ॥]

क्रमप्राप्तं जातिस्फोटं निरूपयति मूले—**शक्यत्व इवेति** । ननूक्तरीत्या स्फोटातिरिक्तवर्णानामसत्वात्तद्गतजातेर्वाचकत्वविचारः काकदन्तपरीक्षासमोत आह

❀ काशिका ❀

'बोपदेव'रीतिमवलम्ब्य जातिस्फोटमाह—शक्यत्व इवेति । ननु अखण्डस्फोटवादिना वर्णानामनङ्गीकाराद् आश्रयं विना जातेरसंभवाज्जातेर्वाचकत्वमसंभवदुक्तिकमित्याशङ्कामपाकर्तुमाह—

अयं भावः—वर्णास्तावदावश्यकाः, उक्तरीत्या च 'सोयं गकार' इतिवद्, 'योयं गकारः श्रुतः सोयं हकार' इत्यपि स्यात्, स्फोटस्यैकत्वात्, 'गकारोयं, न हकार' इत्यनापत्तेश्च । किञ्च स्फोटे गत्वाद्यभ्युपेयं ? न वा ? आद्ये तदेव गकारोस्तु, वर्णनित्यतावादिभिरतिरिक्तगत्वानङ्गीकारात् । तथाचातिरिक्तस्फोटकल्पन एव गौरवम् । अन्त्ये[1]—गकारादिप्रतीति-

※ दर्पणः ※

सारे—अयंभाव इति । हकारगकारयोरभेदे साधकमाह—स्फोटस्यैकत्वादिति । तदभिन्नाभिन्नस्य तदभिन्नत्वनियमेन हकारात्मकस्फोटाभिन्नगकारे तदभेदावगाहिबुद्धेः प्रमात्वापत्तिरित्यर्थः । अनापत्तेश्चेति । अभेदादेव च तादृशभेदावगाहिबुद्धेः प्रमात्वानुपपत्तेरित्यर्थः । ननु वर्णात्मकस्फोटस्यैकत्वेपि गत्वादिविरुद्धधर्माध्याससूलकभेदप्रतीतेर्नानुपपत्तिः, प्रामाण्यं तु तस्या वर्णैक्यवादिमते दूरापास्तमेवेत्यत आह—किञ्चेति । उपाधित्वाभिमतगत्वादीत्यर्थः । आद्ये=स्फोटे गत्वाभ्युपगमपक्षे । तदेव = गत्वमेव । ननु गत्वादेर्वर्णधर्मतया भेदेन कथं तस्य तदात्मकत्वमत आह—वर्णनित्यतावादिभिरिति । मीमांसकादिभिरित्यर्थः । अतिरिक्तेति । धर्मधर्मिणोरभेदाभ्युपगमादित्यर्थः । गौरवमि[illegible]त्यर्थः [illegible]स-प्रतीतीनां गत्वादिविशिष्टगकारादिविषयकत्वेनोप[illegible]त्युपपत्त्या व्यक्तिपदार्थौ वर्ण[illegible] आह—हरिपदमि[illegible]नां ध्वनिनैयत्यादभेदोपचारोत एव [illegible]ने—लोकेऽर्थबोधकत्वेन गृही[illegible]र्थः । [illegible] शब्द' इत्य[illegible]

※ काशिका ※

—अयं भाव इत्यादिना । उक्तरीत्येति । वर्णानङ्गीकारसा[illegible] नन्वेतन्मते 'योऽयं गकार' इत्यादिप्रतीतिरिष्टैव । अद्वैतवादिमते 'योऽयं [illegible] स यज्ञदत्त' इतिवदित्यत आह—गकारोऽयं नेति । नन्वारोपितभेदावलम्बनो 'गकारोऽयं न हकार' इति प्रत्यय उपपद्यते, वेदान्तिनये परस्परं जीवभेदप्रत्ययवदित्यनुशयानो दूषणान्तरमाह—किं चेति । गत्वादीति । अनारोपितं गत्वाद्यभ्युपेयं न वेत्यर्थः । आरोपितस्व परेणाप्यङ्गीकाराद्यथाश्रुतासंगतेः । तदेव = गत्वाद्येव । गत्वादेर्गकारादिरूपत्वे हेतुमाह—वर्णनित्यतेति । अतिरिक्तेति । वर्णातिरिक्तेत्यर्थः । गत्वानङ्गीकारादिति । गत्वाद्यनङ्गीकारादित्यर्थः । अनेकव्यक्तीनामनुगतप्रतीतये हि अतिरिक्तजात्यभ्युपगमः । वर्णानां नित्यत्वमते तु गकारादिव्यक्तेरैक्येनाननुगमाप्रसक्तया गकाराद्यतिरिक्तगत्वाङ्गीकारस्य निष्प्रयोजनत्वादिति भावः । तथा च = स्फोटे गत्वाद्यभ्युपगमे च । अथवा गकारादेर्गत्वादिरूपत्वे चेत्यर्थः । अतिरिक्तस्फोटेति । गत्वाद्यतिरिक्तस्फोटकल्पने इत्यर्थः । गौरवम् = अतिरिक्तस्फोटात्मकधर्मिकल्पनागौरवमित्यर्थः । अन्त्ये = स्फोटे गत्वाद्यनभ्युपगमपक्षे । प्रतीतिविरोध इति । गत्वाद्यभावे गत्वादिप्रकारकोक्त-

१ अन्त्ये = स्फोटे गत्वादि नाभ्युपेयमिति पक्षे ।

विरोधः । वायुसंयोगवृत्ति, ध्वनिवृत्ति या वैजात्यमारोप्य तथा प्रत्यय इति चेन्न, । प्रतीतेर्विना बाधकं भ्रमत्वायोगात् । अस्तु वा वायुसंयोग एव गकारोपि, तस्यातीन्द्रियत्वं दोष इति चेत्—धर्मवदुपपत्तेरिति क्तं

❀ दर्पणः ❀

अन्त्ये = स्फोटे गत्वाद्यनभ्युपगमकल्पे इत्यर्थः । **विरोध इति ।** गादिप्रतीत्यनुपपत्तिरित्यर्थः । गत्वस्यान्यधर्मस्य स्फोटावृत्तित्वेन तद्विशिष्टविषयकप्रतीत्यनुपपत्तिरिति भावः । **वायुसंयोगवृत्तीति**—स्वमते । **ध्वनिवृत्तीति**—मतान्तरे । पूर्वोक्तरीत्या तादृशवैजात्यारोपेण प्रतीतेः सूपपादत्वादाह—**आरोप्येति । भ्रमत्वायोगादिति ।** साक्षात्सम्बन्धेन प्रमात्वोपपत्तावारोपितसम्बन्धे तदुपपन्नत्वे प्रमाणाभावादिति भावः । नन्वतिरिक्तानेकवर्णकल्पनापेक्षया तादृशप्रतीतीनां भ्रमत्वमेव न्याय्यमत आह—**अस्तु वेति ।** तथाच तावतैव प्रतीतेः प्रामाण्यनिर्वाहेऽलं स्फोटकल्पनयेति भावः । तस्य=संयोगस्य । अतीन्द्रियमात्रवृत्तिधर्मत्वस्य साक्षात्काराविषयत्वव्याप्यत्वं त्वया न स्वीक्रियते, तथातीन्द्रियसंयोगगतविशेषस्य मयापीत्यर्थः । **अतीन्द्रियत्वमिति ।** लौकिकविषयताशून्यत्वमित्यर्थः । [illegible] भ्रमत्वमित्यर्थः । प्रतिबन्द्योत्तरयति—**धर्मवदिति ।** यथातीन्द्रियमात्रवृत्तिनच्च बोधाप[illegible] च [illegible]विषयत्वव्याप्यत्वन्त्वया न स्वीक्रियते, तथाऽतीन्द्रियसंयोग[illegible] अखण्डः = वर्णाघो[illegible] लौकिक[illegible] [illegible]ति शेषः । तादृशप्रत्यक्षस्यान्तिम[illegible] प्रत्यय इति । गत्वादेः स्फोटावृत्तित्वेऽपि वायुसंयोगादिवृ[illegible] इत्याद्यनतिप्रसक्त[illegible] बाधकाभाव इति भावः । आरोप्येत्यस्य स्थितस्येत्यध्याहारेणोपपत्तिः । अन्यथा प्रतीतिभवनसमानकर्तृकत्वाभावेन क्त्वाप्रत्ययानुपपत्तेः । पौर्वकालिकारोपानुसरणं तु तथाविधप्रत्ययमूलकस्य व्यवहारस्योपपत्तेः । एव च प्रत्यययोर्व्यवहार इत्यर्थः । यद्वा समानकालिकत्वं प्रत्ययभवने संबन्धतया भासत इति यथाश्रुतार्थकमेव प्रत्ययपदमस्तु । 'वायुसंयोग एवे'त्येवेन स्फोटव्यवच्छेदः । **गकारोऽपीति ।** तथाविधप्रत्ययविषयोऽपीत्यर्थः । एवं च प्रतीतेर्न भ्रमत्वप्रसक्तिः । **अपिना**—'ककार' इत्यादिप्रत्ययविषयसंग्रहः । तस्य = वायुसंयोगस्य । **अतीन्द्रियत्वं दोष इति ।** संयोगप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वमभ्युपेयम्, अन्यथा घटाकाशसंयोगप्रत्यक्षापत्तेः । तथा च वायोरप्रत्यक्षत्वेन वायुतत्तत्स्थानसंयोगस्यातीन्द्रियतया गकार इत्यादिप्रत्यक्षानुपपत्तिरित्यर्थः । **धर्मवदिति ।** वायुधर्मस्य स्पर्शवदित्यर्थः । यथा वायोरतीन्द्रियत्वेऽपि वायुस्पर्शस्त्वाचप्रत्यक्षविषयस्तथा ताल्वाद्यनुयोगिकवायुसंयोग ऐन्द्रियिको भविष्यति बहिर्द्रव्यग्राहकेन्द्रियजन्यसंयोगप्रत्यक्षे एव यावदाश्रयप्रत्यक्षस्य हेतुत्वाङ्गीकारादिति भावः । अथवा 'गगने शब्द' इतिवद्वायुसंयोगे गत्वमिति संयोगविशेषणकं संयोगोपनीतमेव गत्वादिविशेष्यकं तदंशे लौकिकप्रत्यक्षमस्तु, संयोगलौकिकप्रत्यक्षे एव यावदाश्रयप्रत्यक्षस्य हेतु-

स्फोटेन। तस्मात्सन्त्येव वर्णाः, परन्तु न वाचकाः, गौरवात्। आकृत्यधिकरणन्यायेन जातेरेव वाच्यत्ववद्वाचकत्वस्यापि युक्तत्वाच्च। 'इदं हरिपद'मित्यनुगतप्रतीत्या हर्युपस्थितित्वावच्छेदेन हरिपदज्ञानत्वेन हेतु-

❀ दर्पणः ❀

गतविशेषस्य मयापीत्यर्थः। यद्यतीन्द्रियस्यैवैन्द्रियकत्वमत्यन्तासम्भवदुक्तिकं, तदा तादृशवैजात्यस्य स्फोटधर्मत्वमपि। तथैव प्रत्यक्षानुपपत्तेरिति भावः। ननु कत्वादिधर्माणामतीन्द्रियत्वेपि ज्ञानलक्षणया कादिप्रतीतौ तद्भाने बाधकाभाव इति चेन्न। 'ककार' इति प्रत्यये, 'कत्वं साक्षात्करोमी'त्यनुव्यवसायेन लौकिकविषयत्वावगाहि‍ि नोक्तप्रकारोऽसम्भवात्। 'शङ्खः पीत' इति ज्ञानानन्तरोत्पन्नः 'पीतत्वं पश्यामी'ति प्रत्ययस्तु भ्रम एव। दोषविशेषस्य तादृशविषयतानियामकत्वकल्पनगौरवादिति विभावनीयम्। उपसंहरति—**तस्मादिति**। कत्वादिविशिष्टविषकसाक्षात्कारानुपपत्तिप्रमाणसद्भावादित्यर्थः। **सन्त्येवेति**। त्वदभिमतस्फोटातिरिक्ता वर्णाः सन्त्येवेत्यर्थः। **परमिति**। किन्त्वित्यर्थः। **गौरवादिति**। तत्तद्वर्णभेदभिन्नाऽनन्तशक्तिकल्पने गौरवादित्यर्थः। ननु तावद्वर्णगतपदत्वादिजात्यनुगतीकृतेष्वेकस्या एव शक्तेरभ्युपगमान्न नानात्वप्रयुक्तगौरवमत [illegible] धिकरणेति। न्यायस्तु नामार्थनिरूपणे प्रपञ्चितः। [illegible]त्या व्यक्तिपदार्थो वर्ण [illegible] आह—**हरिपदमि**[illegible] ध्वतिनैयत्यादभेदोपचारोत एव दृशप्रतीत्यनुपपत्तेरिति भावः। नन्वनुगतप्रतीति[illegible]ने—लोकेऽर्थबोधकत्वेन गृही[illegible] देरपि जातित्वापत्तिरतः कारणतावच्छेदकत्वादिनैव ता[illegible] शब्द' इत्य[illegible]भावात् प्रकृते कथं तस्य जातित्वमत आह—**हर्युपस्थितित्वावच्छेदेनेति**। कार्यता-

❀ काशिका ❀

त्वात्। तदेव प्रत्यक्षं 'गकार' इति शब्देनाभिलप्यत इति भावः। एतत्पक्षे धर्मवत् = अतीन्द्रियगगनादिधर्मवदिति व्याख्येयम्। कृतं स्फोटेन = अलं स्फोटेन। तत्तद्वायुसंयोगैरेव तत्तदर्थबोधनिर्वाहादिति भावः। तत्तत्संयोगसमुदाय एव इदमेकपदमित्यादिप्रतीतिविषय इति हृदयम्। वस्तुतस्त्वेतत्प्रतीत्यन्यथानुपपत्त्यातिरिक्तस्फोटाङ्गीकार आवश्यक इत्याहुः। निरूपितं चैतत् पूर्वम्।

आकृत्यधिकरणेति। तत्र हि यथा आनन्त्यव्यभिचाराभ्यां व्यक्तिर्न शब्दवाच्या किं तु जातिरित्युक्तम्। तथा शब्दवता जातिरेव वाचिकेति स्वीकारः, समुचितस्तुल्यहेतोरित्यर्थः। ननु वर्णवृत्तिजातीनामपि नानात्वात् कथं वाचकत्वनिर्वाह इत्याशङ्क्याह—**इदं हरीति**। ननु नानुगतप्रतीत्या जातिसिद्धिः संमता तान्त्रिकाणामपि तु कारणतावच्छेदकतया, कार्यतावच्छेदकतया वेत्यत आह—**हर्युपस्थितीति**। तदवच्छेदकतया = हेतुतावच्छेदककोटिप्रविष्टतया। वर्णानुपूर्व्यैवानुगतप्रतीतिनिर्वाहः, सैव च हेतुतावच्छेदिका भविष्यतीति कृतमतिरिक्तजातिस्वीकारेणेत्याशङ्क्ते—

त्वात्तदवच्छेदकतया च जातिविशेषस्यावश्यकल्प्यत्वात् । न च वर्णानुपूर्व्यैव प्रतीत्यवच्छेदकत्वयोर्निर्वाहः, घटघटत्वादेरपि संयोगविशेषविशिष्टमृदा आकारादिभिश्चान्यथासिद्ध्यापत्तेः । तस्मात्—सा जातिरेव वाचिका, तादात्म्येनावच्छेदिका चेति । ननु 'सरो' 'रस' इत्यादौ जात्योः

❀ दर्पणः ❀

वच्छेदकप्रदर्शनमिदम् । **आवश्यकेति** । अन्यथा तावत्पदानां तत्तद्व्यक्तित्वेन हेतुताया व्यभिचारेणासम्भवादिति भावः । **प्रतीत्यवच्छेदकत्वयोरिति** । अनुगतप्रतीत्यवच्छेदकत्वयोरित्यर्थः । **वर्णानुपूर्व्येति** । तादृशजात्यभिव्यञ्जकत्वेनावश्यकल्प्यया तयेत्यर्थः । **निर्वाह इति** । तथा चावश्यक्लृप्तनियतपूर्ववृत्तिताऽवच्छेदकताकानुपूर्व्यैवानुगतप्रतीतिकारणतावच्छेदकत्वयोः सम्भवे न तद्रूपविशिष्टपदोपस्थितित्वेन हेतुत्वमन्यथासिद्धेरिति भावः । **अन्यथासिद्ध्यापत्तेरिति** । न च सेष्टा, प्रत्यक्षादिप्रमाणविरोधादिति भावः । ननु जातेः शक्यत्वे जातित्वं शक्यतावच्छेदकं वाच्यम्, तस्य च तदितरावृत्तित्वविशिष्टसकलतद्वृत्तित्वरूपतया तत्त्वासम्भवो गौरवादत आह—**तादात्म्येनेति** । ...र्ममत्वा... तथा च नोक्तदोष इति भावः । एतत्तत्त्वमभिहितं प्राक् ।

नच्चबोधाप... च स्व... ...यो रेफाकारसकारविसर्गघटितत्वाविशेषादस्व...

अखण्डः = वर्णघटित... ...

...वि शेषः । तादृशप्रत्यक्षस्यान्तिम...

❀ काशिका ❀

...इत्याद्यनतिप्रसक्त...

न चेति ... ...त्तारात् । संयोगविशेषविशिष्टमृदादिभिरेव घट इत्याद्यनुगतप्रतीतेर्दण्डादिकार्यतावच्छेदकत्वस्य च निर्वाहाद् घटत्वादिजातिरपि न सिध्येत् । संयोगविशेषावच्छिन्नमृदादिकं प्रति दण्डादेः कारणत्वस्य वक्तुं शक्यत्वादिति भावः । एवं घटादिरवयव्यपि न सिध्येत्, घट इत्यादिप्रतीतेः—संयोगविशेषविशिष्टमृदादिविषयकत्वेनैवोपपत्तेरित्यर्थः । आकारः = अनुगतसंस्थानविशेषः । यद्यवयवसंयोगानामननुगमाद् घटत्वादिजात्यभ्युपगम आवश्यकः, एवं संयोगविशेषविशिष्टानामवयवानां नानात्वाद् 'घट' इति प्रतीतेस्तद्विषयकत्वे गौरवमेको घट इति प्रतीत्यनुपपत्तिश्चेति घटघटत्वाद्याश्रयणमिति चेत्, प्रकृतेऽपि तुल्यमित्याशयेनाह—**तस्मादिति** । उक्तरीत्या जातिस्वीकारादित्यर्थः । ननु पदादिवृत्तिजातेरेव वाचकत्वे तद्वृत्तिधर्मस्य सकलघटादिपदसमवेतत्वविशिष्टघटपदाद्यतिरिक्तासमवेतत्वरूपस्य वाचकतावच्छेदकत्वमुररीकर्तव्यं, तथा चातिगौरवमित्यत आह—**तादात्म्येनेति** । अवच्छेदिका=वाचकतावच्छेदिका, तादात्म्यस्य वृत्त्यनियामकत्वेऽप्यवच्छेदकतावच्छेदकत्वस्य नानुपपत्तिः, स्वाधिकरणसम्बद्धत्वस्यैवावच्छेदकतायां तन्त्रत्वादिति भावः । **जात्योः सत्त्वादिति** । पदद्वयेऽपि आश्रयीभूतानां तेषामेव वर्णानां सत्त्वाद्विनिगमनाविरहेणैकस्मिन् जातिद्वयसत्त्वाविशेषादित्यर्थः । वाशब्दस्य विकल्पार्थकत्वेऽर्थासंगतिरत आह—**वा त्वर्थे**

सत्त्वादर्थभेदबोधो न स्यादित्यत आह—औपाधिको वेति । वा त्वर्थे उपाधिरानुपूर्वी, सैव जातिविशेषाभिव्यञ्जिकेति भेदः, कारणीभूतज्ञानस्येति नातिप्रसङ्ग इति भावः। उपाधिप्रयुक्तज्ञानवैलक्षण्ये दृष्टान्तमाह—वर्णानामिति ॥ ७१ ॥

ननु जातेः प्रत्येकं वर्णेष्वपि सत्त्वात् प्रत्येकादर्थबोधापत्तिः स्यादित्यत आह—

अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता ॥
कैश्चिद् व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ॥ ७२ ॥

अनेकाभिर्वर्णव्यक्तिभिरभिव्यक्तैव जातिः स्फोट इति स्मृता,

ॐ दर्पणः ॐ

विशिष्टोपस्थापकतावच्छेदकसरस्त्वविशिष्टोपस्थापकतावच्छेदकजात्योरेकतरस्या एव सत्तायां विनिगमकाभावात्ततो विलक्षणार्थबोधानुपपत्तिरित्यर्थः। वाशब्दस्य पक्षान्तरपरत्वभ्रमं निराकरोति—वा त्वर्थ इति। अवधारणे [illegible] भेद इति। तथाच तत्र वर्णतौल्येऽप्यानुपूर्वीवैलक्षण्येन [illegible]पत्त्या व्यक्तिपदार्थौ वर्ण[illegible]कजातेर्निरुक्ताव्यवहितोत्तरत्वसम्बन्धेन [illegible] ध्वत्तिनैयत्यादभेदोपचारोत एव व्यञ्जकतया तदभावेन न सरः—पदाद्रसत्वविशिष्ट[illegible]ने—लोकेऽर्थबोधकत्वेन गृही[illegible]

मूले 'तारमन्दव'दित्यत्र तारमन्दशब्दौ धर्मपरौ, तथा[illegible] शब्द' इत्य[illegible]त्येककत्वमते विजातीयवायुताल्वाद्यभिघातसत्त्वे तारत्वादिना भेदप्रतीतिस्तद्वदित्यर्थः ॥ ७१ ॥

वर्णजातिस्फोटमभिप्रेत्य शङ्कते–सारे–नन्विति। जातेरिति। अर्थबोधकजातेरित्यर्थः। प्रत्येकेति। पदान्तर्गततत्तद्वर्णेष्वित्यर्थः। एवमग्रेपि। अर्थबोधा-

ॐ काशिका ॐ

इति। त्वर्थश्च प्रकृतेऽवधारणमित्याशयेनाह—सैवेति। भेदः कारणीभूतेति। तथा चोभयत्र वर्णानामभेदेऽप्यानुपूर्वीभेदस्य जागरूकतया तत्तदानुपूर्वीविशेषेण एकैव जातिरभिव्यज्यते एकत्र, अन्यत्रान्यैव जातिरभिव्यज्यत इति तत्तज्जातिज्ञानरूपकारणभेदात् 'सरो' 'रस' इत्यत्र विलक्षणबोधरूपकार्योपपत्तिरित्यर्थः। व्यञ्जिकेतीति। इति=इति हेतोः। कारणीभूतज्ञानस्य भेद इति योजना। अतिप्रसङ्गः=अविलक्षणबोधस्यातिप्रसङ्गः। उपाधिप्रयुक्तेति। बलवदुच्चारितत्वादिकं तत्रोपाधिः। तेन यथा 'तारो' 'मन्द' इति प्रतीतिवैलक्षण्यं तद्वदित्यर्थः ॥ ७१ ॥

जातेरिति। घटपदादिवृत्तित्वेनाभिमतजातेः। स्फुटति बोधविषयो भवत्यस्मादर्थ इति

योगार्थतया बोधिकेति यावत् । एतेन स्फोटस्य नित्यत्वात्सर्वदार्थबोधापत्तिरित्यपास्तम् । अयं भावः—यद्यपि वर्णस्फोटपक्षे उक्तदोषोऽस्ति, तथापि पदवाक्यपक्षयोर्न, तत्र तस्या व्यासज्यवृत्तित्वस्य धर्मिग्राहक-

❀ दर्पणः ❀

पत्तिरिति । तदभिव्यञ्जकवर्णसत्त्वादिति भावः । **योगार्थतयेति** । स्फुटत्यर्थोऽस्मादिति वक्ष्यमाणावयवव्युत्पत्त्येत्यर्थः । **एतेनेति** । तत्पदघटकयावद्वर्णाभिव्यक्तजातेर्वाचकत्वाङ्गीकारेणेत्यर्थः । सर्वदा=पदाश्रवणेऽपि । **अपास्तमिति** । जातेः सनातनत्वेऽप्युक्तस्थले व्यञ्जकासमवधानात्तदभिव्यक्त्यभावेन बोधस्यापादयितुमशक्यत्वादिति भावः । ननु वर्णजातिस्फोटपक्षे पदघटकयावद्वर्णगतजातीनामेवार्थबोधकत्वमुपगन्तव्यम्, तत्र चान्यवर्णगतजातेरन्यवर्णानभिव्यङ्ग्यत्वात्तत्तद्वर्ण एवाभिव्यञ्जको वाच्यः, तथा चोक्तदोषस्तदवस्थ एवेत्यत आह—**अयम्भाव इति** । **उक्तदोष इति** । तथाच दुष्टत्वात्स पक्षो नाश्रयणीय इति भावः । **तत्रेति** । पदे, वाक्ये च । तस्याः=पदत्वादिजातेः । **व्यासज्यवृत्तित्वस्येति** । पर्य्याप्त्याख्यविलक्षणसम्बन्धेन वृत्तित्वस्येत्यर्थः । ननु जातेः समवेतत्वस्यैव सार्वत्रिकतया कथमेतस्या [illegible]आह—**धर्मिग्राहकेति** । धर्मवती जातिस्तद्ग्राहकं मानं—पदस्य नचर्बोधाप[illegible] च [illegible]त्वन्नुपपत्तिस्तत्सिद्धत्वादित्यर्थः । प्रत्येकवर्णविश्रान्तजातेर्वाचअखण्डः = वर्णघटित[illegible]वाचकत्वानुपपत्त्या कल्प्यमाना पदत्वादिजा[illegible] शेषः । तादृशप्रत्यक्षस्यान्तिम[illegible]त्तदा तत्सिद्धिरेव न स्याद्, वाचकत्वानुपपत्तेरपरिहार[illegible]इत्याद्यनतिप्रसक्त[illegible]व तत्पर्य्याप्तत्वसाधकम्, एवं चा'नेकव्यक्त्यभिव्यङ्ग्ये'त्यस्यानेकव्यक्तिपर्य्याप्तेत्यर्थ इति भावः । वस्तुतस्तु घटादिप्रत्येकव्यक्त्यैक्ये घट इति

❀ काशिका ❀

व्युत्पत्त्या स्फोटपदं बोधकपरमित्याह—**योगार्थतयेति** । **अपास्तमिति** । जातेः सर्वदा सत्त्वेऽप्यभिव्यक्तिविशिष्टाया असत्त्वेन नोक्तदोषः, अभिव्यक्तिविशिष्टाया एव जातेर्बोधकत्वादिति भावः ।

नन्वेवमपि पदघटकद्व्यादिवर्णेभ्योऽर्थबोधो दुर्वार एवाभिव्यक्तिविशिष्टजातेः सत्त्वात् । न च पदघटकयावद्वर्णैरेव जातेरभिव्यक्तिरित्यभ्युपगमान्न दोष इति वाच्यम् । तथा सति पदस्फोटे वाक्यस्फोटे वा पर्यवसानेनैतत्पक्षे वर्णस्फोटोच्छेदापत्तेरित्याशङ्कामपाकर्तुमाह—**अयं भाव इति** । कथितदोषः = यत्किञ्चिद्वर्णादर्थबोधापत्तिरूपो दोषः । पक्षयोर्नेत्यत्र 'कथित दोष' इत्यनुकृष्यते । तत्र व्यासज्यवृत्तित्वस्य = पदादिघटकयावद्वर्णसमुदायवृत्तित्वस्य । वर्णस्फोटपक्षे तु नैवं वक्तुं शक्यम् । प्रत्येकावृत्तेस्तदनतिरिक्तत्वाद्वर्णसमुदायवृत्तित्वस्यासम्भवात् । समुदायस्यातिरिक्तत्वे तु पदस्फोटो वाक्यस्फोट एव वा सिध्येन्न वर्णस्फोट इति भावः । पदवाक्यपक्षयोः=तयोः **धर्मिग्राहकेति** । धर्मी = जातिरूपस्तद्ग्राहकं मानम् = इदं हरिपदमित्याद्यनुगतप्रतीत्यादि-

मानसिद्धत्वादिति कैश्चिद्—व्यक्तयो ध्वनय एव ध्वनिवर्णयोर्भेदाभावादि-त्यभ्युपेयन्ते—इति शेषार्थः। उक्तं हि काव्यप्रकाशे—'बुधैर्वैयाकरणैः प्रधानीभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृत' इति ॥ ७२ ॥

ननु का सा जातिस्तत्राह—

सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ ।
सत्यं यत्तत्र सा जातिरसत्या व्यक्तयो मताः ॥७३॥

❀ दर्पणः ❀

सर्वसिद्धप्रतीत्या व्यवहारेण च सिद्धयतु घटत्वादेः प्रत्येकमात्रवृत्तित्वम्, न ह्येक-वर्णे घटपदादिव्यवहारो, येन पदत्वादेः प्रत्येकवृत्तिता स्यात्, किन्तु पटशब्दे, पदं न प्रकार इति वैपरीत्यमिति—तादृशजातेः पर्य्याप्तत्वमावश्यकम्। 'पदत्वं न पर्य्याप्तं, जातित्वा' दित्यनुमानं त्वप्रयोजकमनुकूलतर्काभावादिति विभावनी-यम्। इदं पुनरिहावधेयम्—'अनेकव्यक्त्यभिव्यङ्ग्य' त्यस्यानुपूर्व्यवच्छिन्नवर्णा-भिव्यङ्ग्येत्यर्थः। नातः 'सरो' 'रस' इत्यादौ अर्थभेदबोधानुपपत्तिः। एवञ्च पूर्वोक्तार्थस्यैवायं प्रपञ्चः, आनुपूर्वीवर्णयोर्विशेषणविशेष्यभावव्यत्यासः परं व्यति-रिच्यते, अत एवाग्रिमग्रन्थसङ्गतिरिति। व्यज्यतेऽनयेति व्युत्पत्त्या व्यक्तिपदार्थो वर्ण इत्यभिप्रेत्याह—**ध्वनिवर्णयोरिति**। वर्णानां ध्वनिनैयत्यादभेदोपचारोत एव पस्पशायाम'थ गौरित्यत्र कः शब्द' इति प्रश्ने—लोकेऽर्थबोधकत्वेन गृहीतो ध्वनिवर्णात्मकः समूह इत्यर्थकम'थ वा प्रतीत पदार्थ ध्वनिः शब्द' इत्युक्तमिति भावः। **शेषार्थ इति**। प्रकृतकारिकोत्तरार्द्धार्थ इत्यर्थः। वर्णेषु ध्वनिव्यवहारे सम्मतिमाह—**उक्तं हीति**। **काव्यप्रकाश इति**। 'इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः' इति वृत्तिव्याख्यावसर इति शेषः। **स्फोट-व्यङ्ग्येति**। स्फोटरूपं यद् व्यङ्ग्यं, तद्व्यञ्जकवर्णात्मक शब्दस्येत्यर्थः॥ ७२ ॥

नन्वेतावता प्रबन्धेन पदत्वादेर्जातित्वस्य तद्वाचकत्वस्य च व्यवस्थापनम-फलं, पुरुषार्थानुपयोगित्वादित्याशङ्क्य समाधानपरतया मूलमवतारयति-**ननु**

❀ काशिका ❀

रूपं, तत्सिद्धत्वात्। तथा च वर्णस्फोटोऽस्मिन् पक्षे दुष्टत्वान्नाभ्युपेयत इति भावः। मूले **व्यक्तय एवास्या इति**। अस्याः=जातेर्व्यञ्जिकेति शेषः। **शेषार्थः**='कैश्चिद्व्यक्तय' इत्या-द्युत्तरार्धस्यार्थः। वर्णव्यक्तीनां स्फोटव्यञ्जकतया तत्र ध्वनिरिति व्यवहारः कृतइ त्यपेक्षायामाह—**उक्तं हित्यादिना**। **स्फोटव्यञ्जकस्येति**। वर्णव्यक्तीनां स्फोटव्यञ्जकतया तत्र ध्वनिरिति व्यवहारः कृत इत्यर्थः॥ ७२ ॥

प्रतिभावं = प्रतिपदार्थम् । सत्यांशो—जातिः, असत्या-व्यक्तयः । तत्तद्व्यक्तिविशिष्टं ब्रह्मैव जातिरिति भावः । उक्तञ्च कैयटेन—'असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यमित्यर्थ' इति । 'ब्रह्मतत्त्वमेव शब्दस्वरूपतया भाती'ति च । कथं तर्हि,—ब्रह्मदर्शने च गोत्वादिजाते-

❀ दर्पणः ❀

का सेति । 'सा वाचकत्वेनाभिमता जातिः के'ति योजना । **सत्यांश इति ।** सत्यत्वं कालत्रयाबाध्यत्वं, तद्विपरीतमसत्यत्वम् । पर्यवसितार्थमाह—**तद्व्यक्तीति ।** तद्व्यक्त्युपलक्षितमित्यर्थः । परमार्थब्रह्मणा व्यक्तीनां वैशिष्ट्यासम्भवात् । अत एव जगत्कर्तृत्वादीनां तदुपलक्षणत्वमामनन्तीति बोध्यम् । **जातिरिति ।** तद्व्यवहारविषय इत्यर्थः । **असत्योपाधीति ।** व्यक्तीनामुपाधित्वं च वस्तुत एकस्या अपि नानाप्रतीतिजनकत्वं, तदवच्छिन्नं = तदुपलक्षितमित्यर्थः ।

द्रव्यशब्देति । गवादिशब्देत्यर्थः । गुणगतजातेरनङ्गीकारात्, अथवा द्रव्यात्मको यश्शब्दस्तद्वाच्यमित्यर्थः । मीमांसकैः शब्दस्य द्रव्यत्वोपगमात् । **शब्दस्वरूपतयेति ।** श्रुत्यात्मकशब्दरूपतयेत्यर्थः । 'द्वे ब्रह्मणी वेदितव्ये' इति श्रुतेः । अयमाशयः—'तस्मादेतस्माद्वा आत्मन आकाशः सम्भूत' इत्यादितैत्तिरीयकश्रुतौ ब्रह्मणो जगदुपादनत्वश्रवणादुपादेयस्य चोपादानाभिन्नत्वस्य लोकप्रसिद्धत्वान्नामार्थयोरपि स्वाभिन्नोपादानाभिन्नत्वेन परस्पराभिन्नत्वे सुस्थे पृथक्प्रतीयमानजगतो,

❀ काशिका ❀

अद्वैतसिद्धान्ते "आत्मैवेदं सर्वम्" "नेह नानास्ति किंचन" इत्यादिश्रुतिभ्यो ब्रह्मातिरिक्तपदार्थमात्रस्यासत्यतया कथं जातेः सत्यत्वमित्याशङ्क्याह—**तत्तद्व्यक्तिविशिष्टं ब्रह्मैवेति ।** आधेयतासंबन्धेन तत्तद्व्यक्त्युपहितं ब्रह्मैव जातिरूपमिति तस्या नित्यत्वं नानुपपन्नमिति भावः । विशेष्यान्वयिविधेयानन्वयी व्यावर्तक उपाधिः । विशेष्यान्वयिविधेयान्वयी व्यावर्तको विशेषणम् । 'कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्'मित्यत्र कर्णशष्कुल्युपाधिः । श्रोत्रत्वरूपविधेयानन्वयात् । विधेयान्वयाच्च रूपविशिष्टो घटोऽनित्य इत्यत्र रूपं विशेषणम् । प्रकृते च तत्तद्व्यक्तेरुपाधित्वमेव । जातित्वरूपविधेयानन्वयादिति बोध्यम् । एतच्च—

"संबन्धिभेदात् सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ॥"—

—इति वाक्यपदीये उक्तम् । **असत्येति ।** परपशाह्निके—"द्रव्यं नित्यम्" इति भाष्यमुपादायेदं कैयटे उक्तम् । **ब्रह्मतत्त्वमेवेति ।** प्रत्याहाराह्निके "चन्द्रतारकवत् प्रतिमण्डितो

रप्यसत्त्वादनित्यत्वम्, 'आत्मैवेदं सर्व'मिति श्रुतिवचनादिति कैयटः सङ्गच्छताम्? अविद्या—आविद्यको धर्मविशेषो वेति पक्षान्तरमादायेति द्रष्टव्यम् ॥ ७३ ॥

तमेव सत्यांशं स्पष्टयति—

इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम् ।
ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः ॥७४॥

❀ दर्पणः ❀

'नेह नानास्ती'ति श्रुत्या बाधे दृढे, बाधितार्थप्रतीतेरधिष्ठानसत्तैकनियम्यत्वेनावशिष्यमाणब्रह्मणः सद्रूपस्य साक्षाज्ज्ञातुमशक्यतयोपलक्षणीभूतरूपनामनिरूपणद्वारा तज्ज्ञानाय शास्त्रस्योपयोग इति । कथमिति—'सङ्गच्छता'मित्यनेनान्वितम् । पूर्वापरविरोधादिति भावः । मिथ्याज्ञानरूपायास्तज्जन्यसंस्काररूपाया जातित्वासम्भवादाह—आविद्यकइति । अविद्याकल्पित इत्यर्थः । धर्मविशेषइति । अवृत्तिवारणाय—धर्मेति । तद्व्यक्तित्वादिवारणाय,—विशेषेति । तथा च सतभेदेनार्थद्वयस्याप्याकरस्थितत्वान्न पूर्वापरविरोध इति भावः । वस्तुतस्तु गवाद्युपाध्यवच्छिन्नसत्तात्वमेव गोत्वादिव्यवहारनियामकमद्वैतदर्शने च गवादेरवच्छेदकस्याभावान्न सत्ताया विशिष्टसत्तात्वं, 'तदानीं निर्धर्मत्वेनैवावस्थानादित्यर्थपरतयापि विरोधः सुपरिहर इति बोध्यम् ॥७३॥

यद्यप्यविशेषेण वाक्यविषयेऽखण्डवाक्यतज्जातिरूपस्फोटद्वयमुक्तं, तथापि नादात्मकस्फोटकल्पे शास्त्रस्य पुरुषार्थे परम्परयोपयोगित्वमन्तिमकल्पे तु साक्षादेवेति तस्यैव मुख्यत्वमित्याशयेन मूलमवतारयति—तमेवेति । 'अयमात्मा तत्सत्य'मित्यादिश्रुतिसिद्धं यत्सत्यं तत्र सा जातिरित्यनेनोक्तमेवेत्यर्थः । मूले,— इत्थमिति । पूर्वोक्तप्रकारेण अध्यस्तवाचकत्वेभ्यः—प्रकृत्यादिभ्यः पृथक्क्रियमाणम् । अत एव निरञ्जनम् = उपाधिविनिर्मुक्तम्, अत एवाक्षरम् = अविनाशि । 'यस्तु सर्वेषु भूतेषु नश्यत्सु न विनश्यती'ति स्मृतेः । सोपाधिकस्यैव विनाशप्रतियोगित्वात् । शब्दतत्त्वं ।—शब्दपदं—रूपस्याप्युपलक्षणम्, तेन,—नामरूपोपादानं, यत्तद् ब्रह्मैवेति विशेषणसङ्गतैवकारेण ब्रह्मतादात्म्याभावरूपे विशेषणायोगव्यवच्छेदे

❀ काशिका ❀

वेदितव्यो ब्रह्मराशिः" इत्यत्रायं कैयटग्रन्थः । इति कैयट इति । अयमपि कैयटग्रन्थ "आकृतिरनित्या" इति पस्पशास्थभाष्यस्थो द्रष्टव्यः । अविद्येति । अत्र धर्मविशेषः इत्यत्र जातिरिक्त इत्यनुपज्यते । स्पष्टं चेदं कौस्तुभे ॥ ७३ ॥

अयं भावः—'नामरूपे व्याकरवाणी'ति श्रुतिसिद्धा द्वयी सृष्टिः, तत्र रूपस्येव नाम्नोऽपि तदेव तत्त्वम्। प्रक्रियांशस्त्वविद्याविजृम्भणमात्रम्। उक्तञ्च वाक्यपदीये—शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते।

समारम्भात्तु भावानामनादि ब्रह्म शाश्वतम्। इति।

❀ दर्पणः ❀

शब्दतत्त्वरूपान्वयितावच्छेदकव्यापकत्वं बोध्यते। प्राहुः = प्रकर्षेण कथयन्ति = ब्रह्माऽभेदेन जानन्तीति यावदिति तदर्थः। तत्र शब्दोपादानत्वस्य तन्त्रान्तरे गगनादौ प्रसिद्धेः कथं ब्रह्मणस्तदुपादानत्वमित्याशङ्कायामाह—**अयम्भाव** इत्यादि। **नामरूपेति**। 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी'ति श्रुतिसिद्धेत्यर्थः। **द्वयीति**। नामरूपात्मकद्वयवयवसमूहरूपेत्यर्थः। **तत्र** = सृष्टिद्वयमध्ये। **रूपस्येवेति**। आकाशाद्यात्मकार्थस्येवेत्यर्थः। **नाम्न इति**। तद्वाचकशब्दस्यापीत्यर्थः। तदेव = ब्रह्मैव। तत्त्वम् = उपादानमित्यर्थः। 'तस्मादेतस्माद्वा आत्मन' इत्यादिश्रुतेः। शब्दतन्मात्राकाशोपादानत्वे पर्य्यवसानाद्द्वयोरप्युपादानं ब्रह्मैव, अत एव तयोः परस्परमभेदसिद्धिः, स्वोपादानब्रह्माभिन्नत्वात्। न च ब्रह्मणो जगदुपादानत्वे विकारित्वापत्तिः, 'जगदेतद्विवर्त्तते' इति वदता मूलकृतैव समाहितत्वात्। तथा च व्यावहारिकप्रातिभासिकपदार्थनिरासेन श्रुत्या ब्रह्मैव परिशेषीक्रियत इति प्रागुक्त एवार्थः। ननु नानात्वस्य सर्वथैव मिथ्यात्वे कथं स प्रत्ययो लोकानामत आह—**प्रक्रियांशस्त्विति**। प्रकृतिप्रत्ययपञ्चकोशादिव्यवहारांशस्त्वित्यर्थः। **अविद्येति**। मलिनसत्त्वाज्ञानविलास एवेत्यर्थः। तथाच ब्रह्माऽतिरिक्तत्वेनाऽसत्यानामपि तेषां पार्थक्येन प्रतीतिरधिष्ठानाज्ञानकृतैवेति, न यावदधिष्ठानाऽज्ञानं तावत् तन्निवृत्तिरिति भावः। यद्वा—ननु तादृशब्रह्मज्ञाने कथं शास्त्राणामुपयोगोत आह—**प्रक्रियांश इति**। प्रकृतिप्रत्ययादिव्युत्पादनं त्वित्यर्थः। **अविद्येति**। तथाच पञ्चकोशादिन्यायेन शास्त्राणामुपयोगो, न तु तज्ज्ञाने साक्षादुपयोग इति भावः। **अविद्यैवोपवर्ण्यत इति**—वाक्यपदीयानन्तरम्—

उपायाः शिक्ष्यमाणानां बालानामुपलालनाः।

असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते। इति श्लोकः। 'समारम्भात्तु भावाना'मित्यस्य पूर्वार्द्धन्तु—'घटादिदर्शनाल्लोकः परिच्छिन्नोवसीयत' इति। तदर्थस्तु—यथा घटादिकं दृष्ट्वा लोको विश्वप्रपञ्चः परिछिन्नः किञ्चिन्निष्ठकारणतानिरूपककार्य्यतावत्त्वेनानुमीयते, एवं भावानामाकाशादीनां समारम्भादिति—सम्यगारम्भो जननं यस्मात्। भावप्रधानश्च निर्देशः। तदुत्पत्तिहेतुत्वादित्यक्षरार्थः। भावोपादानत्वादिति यावत्। तादात्म्येन वा हेतुः। **समारम्भादिति**। शाश्वतं नित्य-

'ब्रह्मैवे'त्यनेन,–'अत्रायं पुरुषः स्वयञ्ज्योति', 'तमेव भान्तमनुभाति सर्वं' 'तस्य भासा सर्वमिदं विभाती'ति श्रुतिसिद्धं स्वपरप्रकाशत्वं सूचयन्—स्फुटत्यर्थोऽस्मादिति स्फोट इति यौगिकस्फोटशब्दाभिधेयत्वं सूचयति। निर्विघ्नप्रचय्यायान्ते मङ्गलं स्तुतिनतिरूपमाह—पूर्णात्मने—

❀ दर्पणः ❀

मपि ब्रह्म आदिमत्सकारणकमिवावसीयत इत्यनुषज्यते। परिणाम्युपादानत्वे तस्मिन्नभ्युपगम्यमाने विकारित्वप्रसङ्गशङ्का, वस्तुतो न तत्प्रसक्तिर्विवर्त्तोपादानताया एवाङ्गीकाराद्रज्ज्वादौ प्रातिभासिकभुजङ्गस्येवेति भावः। 'अनादि ब्रह्म शाश्वत'मिति पक्षस्त्वन्यतरविशेषणोपादानवैयर्थ्यापत्त्या नादरणीयः। ननु नादेपि ब्रह्मग्रुपदेशस्य प्रायशो दर्शनात् पुरुषार्थानुपयोगितद्भेदज्ञानसम्पादनवैयर्थ्यमत आह—ब्रह्मैवेतीति। तथाच प्रकृते ब्रह्मपदस्य स्वप्रकाशरूपब्रह्मपरत्वान्नोक्तानुपपत्तिरिति भावः। 'तमेव भान्त'मित्यस्य,—'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोयमग्नि'रिति पूर्वार्द्धम्। 'श्रुती'त्युपलक्षणं, 'यदादित्यगतं तेजो जगद्भासयतेऽखिल'मित्यादिस्मृतेरपि। स्वपरप्रकाशकत्वमिति। तत्र परप्रकाशकत्वे मानमुक्तम्। स्वप्रकाशकत्वं च स्वभिन्नाप्रकाश्यत्वे सति प्रकाश्यत्वम्, स्वात्मकनित्यज्ञानविषयत्वमिति यावत्। 'नित्यं विज्ञानमानन्दं ब्रह्मे'ति श्रुत्या ब्रह्मणो नित्यज्ञानानन्दस्वरूपत्वप्रतिपादनात् प्रकृतश्रुतिः, 'स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तमे'तिस्मृतिश्च स्वप्रकाशत्वे, पराप्रकाश्यत्वे च,—'न तद्भासयते सूर्य्य' इत्यादिस्मृतिश्च मानमधिकमन्यत्रानुसन्धेयम्। सूचयतीति। स्फोटस्वप्रकाशपदयोः पर्यायत्वं बोधयतीत्यर्थः। तथाच जातिस्फोटवादिमते उपाधिनिरासद्वारा शब्दब्रह्मणः स्वप्रकाशत्वरूपेण पुरुषार्थोपयोगिनि ज्ञाने व्याकरणस्योपयोग इति सिद्धम्। नादस्फोटवादिमते यथोपयोगस्तथोपपादितं प्राक्। निर्विघ्नेति। अप्रतिबद्धस्वग्रन्थप्रचारार्थमित्यर्थः। अन्ते=ग्रन्थावसाने। मङ्गलमिति। नत्यात्मकं तदित्यर्थः। 'मङ्गलादीनि मङ्गलान्तानि मङ्गलमध्यानि च शास्त्राणि प्रथन्त'

❀ काशिका ❀

मूले—निरञ्जनम्=अज्ञानरहितमित्यर्थः। समारम्भ इति। भावानां=दृश्यमानघटादिपदार्थानां, समारम्भः=उत्पत्तिरित्यर्थः। अनादीति। प्रागभावाप्रतियोगीत्यर्थः। 'शाश्वतमि-त्यनेन ध्वंसाप्रतियोगित्वमुक्तम्। तथा च प्रागभावाप्रतियोगित्वविशिष्टं ध्वंसाप्रतियोगित्वरूपं नित्यत्वं लब्धम्। प्रचय्यान्ते मङ्गलमिति। 'कारिकावली'रूपग्रन्थान्ते इत्यर्थः। शिष्टाचारानुगृहीताद् "ग्रन्थादौ ग्रन्थमध्ये च ग्रन्थान्ते मङ्गलं चरेत्" इत्यभियुक्तवचनाद् ग्रन्थान्ते मङ्गलमाहेत्यर्थः। स्तुतिनतीति। 'नमः' इत्यनेन नतिः, संपूर्णात्मने' इत्यनेन स्तुतिः

इत्यादिना ॥ ७४ ॥ अशेषफलदातारमपि सर्वेश्वरं गुरुम् ॥
श्रीमद्भूषणसारेण भूषये शेषभूषणम् ॥ १ ॥

इति कौण्डभट्टकृते वैयाकरणभूषणसारे स्फोटवादः, ग्रन्थश्च ।

❀ दर्पणः ❀

इति भाष्यकारोक्तश्रुतेरिति भावः। पूर्णत्वम्=अखण्डानन्दत्वम्, अप्रतिहतेच्छत्वं वा, तेन रूपेण तन्नतिश्च स्वीयग्रन्थप्रचारेच्छाविषयसिद्धये इति बोध्यम् ॥ ७४ ॥

ज्ञात्वा श्रीफणिवाक्यजालमतुलं नैयायियोक्तीरपि
मीमांसानयमाकलय्य च मया सम्यक्कृते दर्पणे ॥
अस्मिन् भूषणसारतां बुधजनः सोत्कण्ठमालोकतां
यन्निश्वासमलीमसो न मुकुरस्तत्त्वार्थबोधक्षमः ॥१॥
आसीत् कूर्मगिरौ धरासुरवरः श्रीवल्लभः कोविदो
वेदान्तेषु विनोदमञ्जरिरिति ख्यातास्ति यन्निर्मितिः।
तत्सूनुर्हरिवल्लभः समकरोत्सद्युक्तिमण्युज्ज्वलं
श्रीमद्भूषणसारदर्पणमिमम्मोदाय विद्यावताम् ॥२॥
उत्प्रेक्षितार्थो हि न मोदहेतवेऽभ्यस्तो भृशं सोपि बुधां तथैव ।
इत्याकलय्योभयमत्र युक्तिप्रमाणसिद्धं समुदाहृतं मया ॥३॥
सर्वोप्यर्थो बुधैः स्पृष्टो यद्यपीह, तथापि मे ।
सत्सन्दर्भांशवितता ममता केन वार्य्यते ॥४॥

❀ काशिका ❀

प्रतिपाद्यते। पूर्णत्वमप्रतिहतेच्छत्वं, समाप्तकामत्वेन निरिच्छत्वं वा। सोऽकामयत वहु स्यां प्रजायेय' इत्यनारोपितैव तत्रेच्छेति न विरोधः। स्वीयसुखेच्छावदन्यत्वं वा पूर्णत्वम्। स्पष्टं चेदं "पूर्णाय परमात्मने" इति दीधितिव्याख्याने गदाधरीये इत्यलमतिविस्तरेणेति शिवम् ॥७४॥

योऽभूत्पण्डितमण्डलीपरिणतः श्रोताब्धिसारज्ञतामाप्तो वेदविदां वरः परिवृढैर्भूमेः सदा वन्दितः।
श्रीमद्भैरवशङ्करीपदरजःसेवाप्तपूर्णार्थकः श्रीमत्केशवदीक्षितः समभवत्तस्यात्मजोऽभूद्धरिः ॥
ग्रामान्तः शिवपालिते शिवपुरे श्रीकाशिशब्दाभिधे तेनेयं खलु निर्मिता कृतिवरा श्रीभूषणे काशिका।
श्रीमद्भैरवपादसेवनवपुः श्रीकण्ठपादेऽर्पिता मोदं सन्तनुतां सदाप्तविदुषां सद्युक्तिभाजां चिरम् ॥
धनराजानुजः श्रीमान् सखीदेव्यास्तु गर्भजः। व्याख्यांचक्रे भूषणस्य यथामति शिवाप्तये ॥
युगभूतदिगीशाख्यसंमिते वत्सरे गते। मार्गशीर्षशुक्लपक्षे पौर्णमास्यां विधोर्दिने ॥
रोहिणीस्थे चन्द्रमसि वृश्चिकस्थे दिवाकरे। समाप्तिमगमद् ग्रन्थस्तेन तुष्यतु नः शिवः ॥

'लण्डन लाइब्रेरी' पुस्तकादिप्रतिलिपितो ज्ञाताः, शुद्धाः पाठाः।

	पृष्ठ०	पंक्ति
रसाप्रेमासक्तं	१	३
विरुद्धनानाधर्मांशे	८	९
द्वयोः सदसतोर्भावो द्विता	८	११
तन्निवारणमादिः=मुख्यं	८	१४
मङ्गलस्योपयोगो	१०	११
गम्याद्यर्थव्यापारजन्य	१४	६
तत्राप्रसङ्गवारणाय कर्तृ	१५	३
'निरवयवत्वात्प्रत्यक्षत्वा' दिति पाठो नोचितः	१५	५
जनकजनकसाधारणं	१५	१४
उपलक्षणे तृतीया	१६	४
आश्रितक्रमं रूपं	१७	१०
अननुगतनानाधर्मं	२०	११
नानार्थत्वान्न तेषां	२०	१२
संकलनरूपबुद्धि	२१	४
हेतुनाह	२३	६
शक्तिकल्पने तु	२३	८
एतन्मतस्य विचारासह	२४	१२
नभिधानव्यवस्थार्थं	२६	१६
तदापि न क्षतिः—शक्तिः	२७	१४
नैयायिकादिमते चेदम्	३२	४
अनुशासनानादरेण	३४	९
ग्रन्थैकवाक्यताप्रतिपत्ति	३८	५
प्रलपितत्वशङ्का	३९	२
एकपदजन्यो	४२	५
प्रतीत्यविषय इत्यर्थः	४४	२
तथा चाख्यातार्थं—	४४	८
तदन्वयाद्यभिचार	४४	११
त्रिपयत्वान्न संख्या	४४	१६
विशेषणवितरण	४५	४
नियमानवकाशः	४६	१३
विषयाबाधात्	४७	८

	पृष्ठ०	पंक्तिः
देश्यकत्वेपि तदजनकत्वात्	४७	१९
प्रक्रम्य	४९	४
लक्षणे तात्पर्यांव	४९	८
रूपमाख्यातत्वम्-आख्यात	४९	१०
स्वस्वकर्त्रवरुद्धत्वेन	५२	५-६
विशेषणतायां द्योत्यत्वस्य	५३	१६
संख्याभानानापत्त्या	५३	२४
कर्त्तृ कर्मकारक	५३	२८
धात्वर्थमादाय	५३	२९
कार्यकारणभावाकल्पन	५४	१
कर्त्तुर्विशेषणाकाङ्क्षा	५४	१५
व्यापारार्थकपचिशब्दस्य	५५	१६
समानस्वभावेपदमास	६४	१९
व्यापातात् कल्पवा	६४	२०
भावनाप्रकारक	६४	२७
नुरोधेन साधनेपि	६६	१९
तिङोक्तत्वादित्यनेन	६७	३
संख्यान्वये तु प्रतीतिरेव मानमितितदनुपपत्तेरेव कर्मणीत्यादि—	६७	१७
नाशमात्रं 'नश्' धातो	६८	१०
सम्भवति समनियते	७४	१२
व्यवाये स्वतन्त्रा	७८	११
प्रकृतिस्मृधातौ	७९	६
सकर्मकरूप	८०	१३
ततो 'भूयते'	११२	टिप्पणी
आश्रयत्वत्वं शक्यता	२५७	६
यत्रतुबाधप्रतिसन्धानं रथो	८४	८
रिक्तार्थे विशेषणतया कृत्याद्यप्र	८४	१३
विक्लित्यादौ व्यापार…… …विक्लितित्वादी	८४	१
द्वितीयाद्यर्थान्वय्यर्थकत्वं	८७	१९
कर्मत्वानुपपत्तिरपि	८७	१





